গোপালতাপনী।

[illegible] গোপালতাপনী নামক এই উপনিষদখানি দুইটী টীকার সহিত মুদ্রিত করিয়াছে। এই উভয় টীকার মধ্যে [illegible] শ্রীজীব গোস্বামীর ব্যাখ্যাটী সম্পূর্ণ ভক্তিমতের আধার স্বরূপ। [illegible] যদিও [illegible] মুদ্রিত হইয়াছিল তথাপি তাহাতে ভক্তিমান পাঠকগণের পরিতোষ [illegible] টীকাদ্বয়ের [illegible] অনুশীলন করিয়া থাকেন, কিন্তু বিশেষরূপে [illegible] টীকাটীর ব্যাখ্যা [illegible] কিন্তু গোপালতাপনী [illegible] বিশ্বনাথ [illegible] বিশেষতঃ এই [illegible] মহাত্মা বৈষ্ণবদিগের [illegible] আদরের বস্তু; [illegible] কোথাও মুদ্রিত হয় নাই, এই জন্য [illegible] অনুরোধে [illegible] এই উভয়বিধ টীকার সহিত এই গ্রন্থখানি মুদ্রিত [illegible]

[illegible]

শ্রীহরিচরণ বসু

[illegible]

[illegible]

शब्दकल्पद्रुमः।

चतुर्थकाण्डम्।

य

अन्तःस्थयकारः। स च षड्विंशव्यञ्जनवर्णः। अस्योच्चारणस्थानं तालु। (यदुक्तं सिद्धान्तकौमुद्याम्। "इचुयशानां तालु।" तथा च शिक्षायाम्। १७।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।")
तस्य स्वरूपं यथा,—
"यकारं शृणु चार्व्वङ्गि! चतुष्कोणमयं सदा।
पलालधूमसङ्काशं स्वयं परमकुण्डली॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा।
प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम्॥"
इति कामधेनुतन्त्रे ५ पटलः॥
वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा चतुष्कोणमयी शुभा।
नारायणेशविधयस्तासु तिष्ठन्ति नित्यशः॥
मात्रा कुण्डलिनी ज्ञेया ध्यानमस्य प्रचक्षते॥"
तस्य ध्यानं यथा,—
"धूम्रवर्णां महारौद्रीं षड्भुजां रक्तलोचनाम्।
रक्ताम्बरपरीधानां नानालङ्कारभूषिताम्॥
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम्।
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्॥"॥
तन्त्रशास्त्रमन्तो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
प्रणमामि सदा वर्णं शक्तिमामोक्षमव्ययम्॥"
इति वर्णोद्धारतन्त्रम्॥
अस्य नामानि यथा,—
"यो वायुः पवनो वायुर्व्विरतिः पुरुषोत्तमः।
द्रुमामः श्वसनः शीघ्री धूमार्च्चिः प्राणिसेवकः॥
शङ्खाभ्रमो वटो लोला वायुवेगा यशस्करी।
सङ्कर्षणः चपा वालो हृदयं कपिलाप्रभा॥
वामेयो पापकल्याणो होमो यानं धमा सुखम्।
चण्डः सर्व्वेश्वरी धूम्रचामुण्डा सुमखेश्वरी॥
अगाला मलयो माता दंशिनी भृङ्गनायकः।
वेनमः शोधको मांसो पतितानन्दवेदिनी।
मेढः योमः पश्चिमाशा पावनः प्राणसंज्ञकः॥"
इति नानातन्त्रशास्त्रम्॥

यकृत्

(धात्वनुबन्धविशेषः। स तु दिवादिगणीयकः। तथा च कविकल्पद्रुमे। "दिवादौ यानुबन्धकः।"
छन्दःशास्त्रान्तर्गतगणविशेषः। तथा छन्दोमञ्जर्याम्।
"आदिगुरुः पुनरादिलघुर्यः॥"
अस्य साङ्केतिकचिह्नं यथा, ।ऽऽ;
काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम्। यथा, वृत्तरत्नाकरटीकायाम्।
"यो लक्ष्मीं दत्तु दाहं यवनमय वौ शः सुखं पञ्चखेदम्॥")

यः, पुं, (याति यातीति। या गतौ+डः।) वायुः। यशः। योगः। यानम्। याता इति शब्दरत्नावली॥ सर्व्वनाम। यच्छब्दार्थ इति यावत्। इति विश्वः॥

यकः, त्रि, यः। ये इति भाषा। यच्छब्दस्य टेरत्वे टेः पूर्व्वं अकागमेन निष्पन्नः। ("अव्ययसर्व्वनाम्नामकच् प्राक् टेः।" ५।३।७१। इति पाणिनिसूत्रम्। यथा, ऋग्वेदे। ८।२१।१८।
"चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु॥")

यकृत्, क्ली, (यज्+"शकेर्ऋतिन्।" उणा० ४।५८। इत्यत्र "बाहुलकात् यजेः कश्च।" इत्युज्ज्वलदत्तोक्त्या ऋतिन् जस्य च कः।) कुक्षेर्दक्षिणभागस्थमांसखण्डम्। तत्पर्य्यायः। कालखण्डम् २। इत्यमरः। २।६।६६॥ कालखञ्जम् ३ कालेयम् ४ कालकम् ५। इति हेमचन्द्रः॥ करला ६ महास्नायुः ७। इति रभसः॥ (यथा, ऋग्वेदे। १०।१६३।३।
"यक्नं मतस्नाभ्यां यक्नः शाशिभ्यो विवृहामि ते।"
"यक्नः हृदयसमीपे वर्त्तमानः कालमांसविशेषो यकृत् सञ्ज्ञान्।" इति तद्भाष्ये सायणः।)
अथ शरीरावयवविशेषस्य यकृतः उत्पत्तिमाह।
"अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्॥"
अथ यकृद्रोगमाह।
"प्लीहोदरस्य हेत्वादि समस्तं यकृदामये।

यकृद्दा

किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः॥"
अथ यकृद्रोगचिकित्सा।
"प्लीहोद्दिष्टाः क्रियाः सर्व्वा यकृत्यपि समाचरेत्।
कार्य्यश्च दक्षिणे बाहौ तत्र शोणितमोक्षणम्॥
क्षारश्च विड्लवणाभ्यां पूतिकस्याम्बु निःसृतम्।
पिबेत् प्रातर्यथावह्नि यकृत्प्लीहप्रशान्तये॥"
इति भावप्रकाशः॥
(तथा च।
"वातेनोदीरितं रक्तं कफेन च घनीकृतम्।
पित्तेन पाकतां प्राप्तं त्रिदोषसंश्रितं यकृत्॥
लक्षणं तस्य वक्ष्यामि तेन तच्चापि लक्षयेत्।
क्षीयते तेन मनुजो मृत्युराशु प्रवर्त्तते॥
वमिश्चमस्तथोद्गारो ह्लासः श्वसनं भ्रमः।
दाहोऽरुचिस्तृषा मूर्च्छा कण्ठे दाहः शिरोव्यथा॥
ह्रुच्छूलश्च प्रतिश्यायः क्षीणता कटुकाननः।
अश्मरी छर्दिः शूलश्च निद्रानाशः प्रलापता॥
हृदये मन्यते चाङ्गं उदरं गच्छते भ्रमम्।
एतैर्लिङ्गैर्विजानीयात् यकृत् कोष्ठे च पच्यते॥"
अथास्य चिकित्सा।
"निम्बनीपधवचित्रकं शिवा
काश्मरी च तुलसी च सिंहिका।
क्वाथ एष हृदयामयापहः
आशु शूलयकृतश्च नाशकृत्॥
क्षीरवृक्षकाशीथमदीपधानि
दुरालभाश्वातिप्रवालकश्च।
दार्व्वी यवानी ककुभः समङ्गा
क्वाथः सपिप्पलीदारु हन्ति॥"
इति हारीते चिकित्सितस्थाने चतुर्थोऽध्याये।
"प्लीहवर्दाक्षणात् पार्श्वात् कुर्य्याद्यकृदपि च्युतम्॥"
इति वाभटे निदानस्थाने द्वादशोऽध्याये।)

यकृद्दात्रिका, स्त्री, (यकृत् दात्रिका छेदनं यया। बहुव्रीहौ कः। टापि अत इत्वम्।) तैलपायिका। इति शब्दचन्द्रिका।

यक्षहेरी, [न्] पुं, (यक्षतो वैरी नाशकः ।) रोहितकवृक्षः । यथा,—
"प्रोहमो मांसहलनो यक्षहेरी चलच्छदः ।"
इति शब्दचन्द्रिका ।

यक्ष, क इ महि । इति कविकल्पद्रुमः । (चुरा०-आत्म०-सक०-सेट् ।) क इ, यक्षयते । महि पूजायाम् । इति दुर्गादासः ।

यक्षः, पुं, (यक्ष्यते पूज्यते इति । यक्ष+घञ् । यद्वा, ईं लक्ष्मीमक्ष्णोतीति । अक्ष+अण् ।) गुह्यकमात्रम् । गुह्यकेश्वरः । इति मेदिनी । षे, १२ । इन्द्रगृहम् । धनरक्षकः । इति सारस्वतः ।
यक्षस्वरूपं यथा,—
"व्यागमुर्वचनिकराः कुवेरवरकिङ्कराः ।
पैलमग्रसरकरा अञ्जनाकारमूर्त्तयः ।
विकटाकारवदनाः पिङ्गलाक्षा महोदराः ।
स्फटिका रक्तवेशाश्च दीर्घस्कन्धाश्च केचन ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० अध्यायः ।
यक्षगणो यथा,—
"प्रवेशयः सुता यक्षास्तेषां नामानि मे शृणु ।
केवलो हरिकेशश्च कपिलः काञ्चनस्तथा ।
मेघमाली च यक्षाणां गण एव उदाहृतः ।"
तस्य व्युत्पत्तिर्यथा,—
"धातुर्यक्षयोक्तस्त्वदने चयने च सः ।
यद्यक्षन्तुक्तवानेव तस्माद्यक्षो भवत्ययम् ।"
इति वह्निपुराणे काश्यपीयवंशः ।
(अपरा निरुक्तिर्यथा, विष्णुपुराणे ।१।५।४१।
"मैवं भो रक्ष्यतामेव यैरुक्तं राक्षसास्तु ते ।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात् ।"
पुं, क्ली, पूजा । यथा, ऋग्वेदे । ७ । ६१ । ५ ।
"अमूरा विश्वा वृषणा विमा वां
न यासु चित्रं ददृशे न यक्षम् ।"
"न यक्षं न पूजा दृश्यते ।" इति तद्भाष्ये सायनः । तथाच अथर्ववेदे ।११ । २ । २४ ।
"तव यक्षं मन्यते अप्सु मा ।")

यक्षकर्दमः, पुं, (यक्षप्रियः कर्दमः ।) कर्पूरागुरुकस्तूरीकक्कोलानां मिश्रितसमभागः । इत्यमरः । २ । ६ । १३३ । "कर्पूरादिभिर्गन्धद्रव्यैः समभागैः साधितोऽनुलेपनभेदो यक्षकर्दम उच्यते । यक्षप्रियः कर्दमो यक्षकर्दमः ।
'कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं तथा ।
महासुगन्धमित्युक्तं नामतो यक्षकर्दमः ।'
अन्यत्रापि । इति धन्वन्तरिः ।
'कर्पूरागुरुकस्तूरीकक्कोलघर्षणादि च ।
एकीकृतमिदं सर्वं यक्षकर्दम इष्यते ।"'
इति तट्टीकायां भरतः ।

[यक्षत]रुः, पुं, (यक्षप्रियो यक्षाश्रितो वा तरुः । शाकपार्थिवादिवत् समासः ।) वटवृक्षः । इति राजनिर्घण्टः । (विवरणमस्य वटशब्दे ज्ञातव्यम् ।)

[यक्षधू]पः, पुं, (यक्षप्रियो धूपः ।) धूनकामाख्यम् । [यक्ष]धूपः । इति केचित् । धूना इति ख्यात

इति केचित् । इति भरतः । तत्पर्यायः । सर्जरसः २ अरालः ३ सर्वरसः ४ बहुरूपः ५ । इत्यमरः । २ । ६ । १२७ । रालः ६ धूनकः ७ वह्निवल्लभः ८ । इति रभसः । शालसारः ९ शालजः १० शालनिर्यासः ११ सर्जः १२ । इति रत्नमाला । (अस्य पर्यायान्तरं यथा,—
"रालस्तु शालनिर्यासस्तथा सर्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्जरसश्च सः ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।
[अ]नेन माधवपूजनविधौ देवीपूजा चोक्ता यथा
[का]लिकापुराणे ६८ अध्याये ।
"[य]क्षधूपं विशेषेण माधवाय कराचन ।"
"यक्षधूपेन वा देवीं महामायां प्रपूजयेत् ।")
सजरसः । टारपिन तैल इति भाषा ।
[पर्य्य]ायः । पायसः २ श्रीवासः ३ सरलद्रवः ४ ।
[इति] हेमचन्द्रः । ४ । ३११ ।

यक्षरः, पुं, (यक्षप्रियो रसः । शाकपार्थिववत् समासः ।) पुष्पमधम् । तत्पर्यायः । मध्वासवः २ । इति त्रिकाण्डशेषः ।

यक्षराज, पुं, (यक्षाणां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति समासान्तष्टच् ।) कुवेरः । इति शब्दरत्नावली । (यथा, महाभारते । ५ । १९४ । ११ ।
"इत्युक्त्वा भगवान्देवो यक्षराजः सुपूजितः ।
प्रययौ सहितैः सर्व्वैर्निमेषान्तरचारिभिः ।")

यक्षराट्, [ज्] पुं, (यक्षेषु राजते इति । राज्+"सत्सूद्विषद्रुहेति ।" ३।२।६१ । इति क्विप् ।) कुवेरः । यथा, भागवते । ८ । १८ । १७ ।
"तस्मा उपनीताय यक्षराट् पात्रिकाम-
दात् ।"
यक्षराजमत्रम् । मणिभद्रः । यथा, महाभारते । ३ । ६४ । १२७ ।
"तथा नो यक्षराडद्य मणिभद्रः प्रसीदतु ।"०
यथा इव मता राजसोऽन । राज्+क्विप् ।)
रङ्गमण्डपः । इति मेदिनी । जे, ३५ ।

यक्षराट्पुरी, स्त्री, (यक्षराजः पुरी ।) अलका । सा च कैलासपर्वतस्थितकुवेरपुरी । इति जटाधरः ।

यक्षरात्रिः, स्त्री, (यक्षप्रिया यक्षाणां वा रात्रिः ।) कार्त्तिकी पूर्णिमा । तत्पर्यायः । दीपाली २ । इति त्रिकाण्डशेषः ।

यक्षसाधनं, क्ली, (यक्षाणां साधनम् ।) यक्षोपासना । यथा, तारारहस्ये ।
"यक्षाणां यक्षिणीनाञ्च पैशाचीनाञ्च साधनम् ।
भूतवेतालनाम्नाञ्च मारणोच्चाटनानि च ।
अघोरमन्त्रमेतेषां साधने ऐहिकं हितम् ।"

यक्षामलकं, क्ली, (यक्षाणामामलकम् ।) पिण्डखर्ज्जूरफलम् । इति शब्दमाला ।

यक्षावासः, पुं, (यक्षाणामावासो वासस्थानम् ।) वटवृक्षः । इति राजनिर्घण्टः ।

यक्षिणी, स्त्री, (यक्षः पूजा अस्त्यस्याः । यक्ष+इनिः । ङीप् ।) कुवेरपत्नी । इति शब्दरत्ना-

वली । यक्षभार्य्या च । (यथा, [कथासरित्]सागरे । १० । १०८ ।
"सोऽपि शुश्राव विप्रेभ्यः पु[...]
अकीर्त्ति मा कृथाः पुत्र ! मम [...]"

यक्षी, स्त्री, (यक्षस्य भार्य्या । यक्ष[...]दिति ङीष् ।) कुवेरपत्नी । इति [...]
यक्षी । (यक्षभार्य्या । यथा, महा[भारते ...]६ । ११० ।
"यक्षी वा राक्षसी वापि उताहोसि[...]
सर्व्वथा कुरु नः स्वस्ति रक्षमाणा[...]
[...]निन्दिते ! [...]"

यक्षोडुम्बरकं, क्ली, (यक्षप्रियमुडुम्बरम् । ततः स्वार्थे कन् ।) अश्वत्थफलम् । इति त्रिकाण्डशेषः ।

यक्ष्माघ्नी, स्त्री, (यक्ष्माणं हन्ति । हन्+"अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् । ततो ङीप् ।) द्राक्षा । इति शब्दमाला ।

यक्ष्मा, [न्] पुं, (यक्ष+"अन्येभ्योऽपि दृश्यते ।" उणा० ४ । १४७ । इत्यत्र उक्तत्वात् मनिन्प्रत्ययेन साधुः ।) रोगविशेषः । तत्पर्यायः । क्षयः २ शोषः ३ । इत्यमरः । २ । ६ । ५१ ।
राजयक्ष्मा ४ रोगराट् ५ । अस्य राजयक्ष्मेति नामकारः । "तत्र राजयक्ष्मणो निरुक्तं चरकेण निदानमाह ।
'वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ।
वेगोऽत्र वातमूत्रपुरीषाणाम् ।
'वातमूत्रपुरीषाणि निरुणद्धि यदा नरः ।'
इति चरकवचनात् ।
क्षयात् क्षीयतेऽनेनेति क्षयः तैजातिव्यव[...]
मद्यनैथ्यादयो धातुक्षयहेतवः क्षयशब्देनोक्ताः ।
साहसात् बलवता सार्द्धं मल्लयुद्धादितः । विष[...]
शनात् बहु स्तोकमकाले वा यत् तत् विष[...]
शनम् । तस्मात् । त्रिदोषः सान्निपातिकः ।
हेतुचतुष्टयात् अन्येऽपि हेतवः
एषामन्तर्भवन्ति । यक्ष्मणः पर्य्यायाः
क्षयशोषाः ।०। यक्ष्मादीनां शब्दा[र्थ]
माह ।
'वैद्यो व्याधिमतां यस्मात् व्याधेर्यत्नेन
स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविश[ारदैः]
यक्ष्यते पूज्यते ।
'राजचन्द्रमसो यस्मादभूदेष किलामयः
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः
क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः ।
संशोषणाद्रसादीनां शोष इत्यभिधीयते ।'
संप्राप्तिमाह ।
'कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा ।
क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः ।'
कफप्रधानैर्दोषैः रसवर्त्मसु रुद्धेषु अन्नाद्
सर्व्वे धातवः क्षीयन्ते ततो मानव शुष्यति

कारणभूतस्य रसस्य क्षये शरीराणां रसादी-नामनुक्रमेण क्षीयमाणत्वात् । * । सामान्येन रसक्षयहेतुमाह चरकः ।
'रसः स्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्ध्वं कासवेगेन बहुरूपः प्रवर्त्तते ॥'
स्वस्थानस्थः हृदयस्थः । ताभ्यां विनापि रसक्षयो भवति सामान्यदोषवृद्धिमात्रेण रसस्य शोषणात् । उक्तञ्च ।
'धातोर्धातुक्षयात् कोपो मार्गस्यावरणेन च ।
अनुलोमक्षयं दृष्ट्वा प्रतिलोमक्षयावहः ॥'
अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमप्याह । अतिव्यवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तरा सर्वे धातवो रसपर्यन्ताः क्षीयन्ते । तद्यथा । शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते । एवं पूर्व्वं पूर्व्वं क्षीयते । ननु कार्य्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः । उच्यते । शुक्रक्षयाद्वायुः कुप्यति । यदुक्तम् ।
'धातोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।'
स वायुः प्रातिलोम्यक्रमेण मज्जादीन् सर्वान् धातून् संशोषयति । तदनन्तरं मानवः शुष्यति । * । पूर्व्वरूपमाह ।

'श्वासाङ्गमर्दकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्
शुष्कांस्तरून् पवनधूमदवार्द्दितांश्च ॥'*।

यक्ष्मणो लक्षणमाह ।
'अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥'
अंसयोः पार्श्वयोः अभितापः पीडा अत्र सकलधातुक्षयपूर्व्वकः सकलशरीरशोषोऽपि बोद्धव्यः । क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानव इति संप्राप्तेः । एवं षड्रूपे एकादश-रूपे च बोद्धव्यम् । एतानि त्रीणि लक्षणानि प्रायोभावित्वेन चरकेणोक्तानि । सुश्रुतेन यक्ष्मणि षट्लक्षणान्युक्तानि ।
'भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥'*।
उल्वणतया दोषाणां भेदादेकादश लक्षणा-

...सं सङ्कोचश्चांसपार्श्वयोः ।
...रश्च पित्ताद्रक्तस्य चागमः ॥
... एव च ।
...कफकोपतः ॥'
...तु कफाच्च । यत
...को गदः ।
...न्ति च ॥'

अन्यान्यपि लिङ्गान्याह ।
'एकादशभिरेभिर्वा षड्भिर्वापि समन्वितम् ।
त्रिभिर्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः ।
जह्याच्छोषार्दितं जन्तुमिच्छन् सुविपुलं यशः ॥'
तत्र विशेषमाह ।
'सर्व्वैरर्द्धैस्त्रिभिर्वापि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्व्वरूपोऽप्यतोऽन्यथा ॥'
सर्व्वैर्लिङ्गैरेकादशभिः । अर्द्धैः षड्भिः । त्रिभि-र्ज्वरकासरुधिरवमनैः । अतोऽन्यथा मांसे बले सति सर्व्वरूपोऽपि प्रत्याख्याय चिकित्स्यः ।
'महाशनं क्षीयमाणमतीसारनिपीडितम् ।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत् ॥'
महाशनं क्षीयमाणमित्येकमसाध्यलक्षणम् । अतीसारनिपीडितमिति द्वितीयम् । यत उक्तम् ।
'मलायत्तं बलं पुंसां शुक्रायत्तञ्च जीवनम् ।
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥'
शूनमुष्कोदरमिति तृतीयम् । * । अरिष्ट-माह ।
'शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीडितम् ।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥'
मेहन्तं शुक्रं क्षरन्तम् । शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि । * । अवधिमाह ।
'परं दिनसहस्रन्तु यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः ॥'
शोषपीडितो मानवश्चेत्तरुणो भवति । सुभि-षग्भिरुपक्रान्तो भवति । तदा परं दिनसह-स्रम् । द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः । एतेन शोषपीडितो मानवश्चेत्तरुणो भवति । सद्वैद्यचिकित्स्यो भवति । तदा प्रथमदिनसहस्रं जीवेदेवेत्युक्ता चिकित्स्यतामाह ।
'ज्वरानुबन्धरहितं बलवन्तं क्रियासहम् ।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ॥'
आत्मवन्तं यत्नवन्तं धृतिमन्तं वा । * ।
अथ निदानविशेषैः शोषविशेषानाह ।
'व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥'
व्रणोरःक्षतसंज्ञौ शोषिणौ । व्रणशोषी उरः-क्षतशोषी च । * । तत्र व्यवायशोषिणो लक्षणमाह ।
'व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः ॥'
शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः । तानि यथा, शुक्रक्षये मेढ्रवृषणयोर्वेदना अशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्पशुक्रदर्शनमिति । यथापूर्व्वं क्षीयन्ते चास्य धातवः प्रथमं शुक्रं क्षीयते पश्चात् शुक्रक्षयजनितवायुना मज्जा-दयोऽपि धातवो यथापूर्व्वं क्षीयन्ते । * । शोकशोषिणो लक्षणमाह ।
'प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयकृतैर्विकारैरुपलक्षितः ॥'

प्रध्यानशीलः चिन्ताभ्यासेन शोकी अभिमत-ध्यानपरः । स्रस्ताङ्गः शिथिलाङ्गः । तादृशः व्यवायशोषिसदृशः । तेन शुक्रादिक्रमधातुक्षय-युक्तो भवति । परं शुक्रक्षयकृतैर्विकारैर्मेढ्र-वृषणवेदनादिभिर्लिङ्गैर्हीनो भवति । व्याधिस्व-भावात् । * । जराशोषिणो लक्षणमाह ।
'जराशोषी कृशो मन्दवीर्य्यबुद्धिबलेन्द्रियः ।
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥
ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीडितः ।
संप्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥'
मन्दसत्त्वः मन्दार्थः । शुष्करूक्षमलच्छविः शुष्करूक्षे मलच्छवी यस्य सः । * । अध्व-शोषिणो लक्षणमाह ।
'अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥'
संभृष्टस्येव परुषा छविर्यस्य सः । प्रसुप्तगात्रा-वयवः प्रसुप्तः स्पर्शाज्ञः । क्लोम तिलकं पिपासा-स्थानम् । * । व्यायामशोषिणो लक्षणमाह ।
'व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥'
एभिरेव स्रस्ताङ्गत्वादिभिरध्वशोषिणो लक्षणै-रेव । भूयिष्ठं अत्यर्थम् ।*। सनिदानं व्रणशोष-माह ।
'रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषो याप्योऽसाध्यश्च स स्मृतः ॥'
उरःक्षतस्य निदानमाह ।
'धनुषायस्यतोऽत्यर्थं भारमुद्वहतो गुरुम् ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥
वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः ।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान् ॥
अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो द्रुतम् ।
महानदीं वा तरतो हयैर्वा सह धावतः ॥
सहसोत्पततो दूरं तूर्णं चातिप्रनृत्यतः ।
तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा ॥
क्षीणे चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ।
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्य्यते ॥'
आयास्यतः आयासं कुर्व्वतः । दम्यं वृषादिकम् । अन्यञ्च गजोष्ट्रादिकम् । शिला दीर्घपाषाणः । अश्म प्रस्तरखण्डः । निर्घातोऽस्त्रविशेषः । व्याधिः उरःक्षताख्यः ॥*॥ उरःक्षतस्य लक्षण-माह ।
'उरो विरुज्यतेऽत्यर्थं भिद्यते च विभज्यते ।
शूलं भवति तनुपादं शुष्यत्यङ्गं प्रवेपते ॥
प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रकम्पते ।
क्रमाद्वीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते ॥
ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहु ।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ॥
स क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ।
अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ॥'
विरुज्यते पीड्यते । भिद्यते विदार्य्यत इव ।

यक्षदेवी, [न्] पुं, (यक्षाणां देवो नायकः ।) रोहि-मत्स्यः । यथा,—

"रोहितो मांसलश्चैव यक्षदेवी चलच्छदः ।"

इति शब्दचन्द्रिका ।

यक्ष, क इ अर्चि । इति कविकल्पद्रुमः । (चुरा०-आत्म०-सक०-सेट् ।) क इ, यक्षयते । अर्चि पूजायाम् । इति दुर्गादासः ।

यक्षः, पुं, (यक्ष्यते पूज्यत इति । यक्ष+घञ् । यद्वा, [illegible] । यक्ष+अच् ।) गुह्यकभावम् । गुह्यकेश्वरः । इति मेदिनी । षे, ४० । इन्द्रहस्तः । कपोतकः । इति सारसुन्दरी ।

[illegible] यथा,—

"[illegible] कुबेरकिङ्कराः ।

[illegible]

[illegible] महोदराः ।

[illegible] ।"

इति [illegible] अध्यायः ।

[illegible] यथा,—

"[illegible] ।

[illegible] ।

[illegible] ।"

[illegible],—

"[illegible] ।

[illegible] ।"

इति [illegible] ।

[illegible]

[illegible]

इति केचित् । इति भरतः । तत्पर्य्यायः । सर्ज्ज-रसः २ अरालः ३ सर्व्वरसः ४ बहुरूपः ५ । इत्यमरः । २ । ६ । १२७ । रालः ६ धूमकः ७ वह्निवल्लभः ८ । इति रभसः । शालसारः ९ शालजः १० शालनिर्य्यासः ११ सर्ज्जः १२ । इति रत्नमाला । (अस्य पर्य्यायान्तरं यथा,—

"रालस्तु शालनिर्य्यासस्तथा सर्ज्जरसः स्मृतः ।

देवधूपो यक्षधूपस्तथा सर्व्वरसश्च सः ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

[illegible] साधकपूजनविधौ देवीपूजा प्रोक्ता यथा कालिकापुराणे ६८ अध्याये ।

"[illegible] यक्षधूपं वितरेत् साधकाय कदाचन ।"

"यक्षधूपेन या देवीं महामायां प्रपूजयेत् ।")

यक्षधूपरसः । टारपिन तैल इति भाषा । तत्पर्य्यायः । पायसः २ श्रीवासः ३ सरलद्रवः ४ । इति हेमचन्द्रः । ३ । ३११ ।

यक्षरस, पुं, (यक्षप्रियो रसः । शाकपार्थिववत् समासः ।) पुष्पमधुम् । तत्पर्य्यायः । मध्वा-सवः २ । इति त्रिकाण्डशेषः ।

यक्षराज, पुं. (यक्षाणां राजा । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति समासान्त-टच् ।) कुबेरः । इति शब्दरत्नावली । (यथा, महाभारते । १ । १६४ । ३८ ।

"इन्द्र भगवान्देवो यक्षराजः सुपूजितः ।

यक्षो [illegible] अर्थसिद्धिकारणादिभिः ।")

यक्षराट्, [ज्] पुं, (यक्षेषु राजते इति । राज्+ "सत्सूद्विषेति ।" ३।२।६१ । इति क्विप् ।) कुबेरः । यथा, भागवते । ८ । १८ । १० ।

"छत्रं [illegible] यक्षराट् [illegible]-राट् ।"

यक्षराजमणिम् । मणिभद्रः । यथा, महा-भारते । ३ । ४१ । १२७ ।

"तथा मे [illegible] मणिभद्रः प्रसीदतु ।"०। यक्षा इव सदा राजन्तीति । राज्+क्विप् ।) इन्द्रप्रस्थः । इति मेदिनी । षे, ३५ ।

यक्षराट्पुरी, स्त्री. (यक्षराजः पुरी ।) अलका । सा च कैलासस्थितालकाकुबेरपुरी । इति जटा-धरः ।

यक्षरात्रि, स्त्री, (यक्षप्रिया यक्षाणां वा रात्रिः ।) कार्त्तिकी पूर्णिमा । तत्पर्य्यायः । दीपाली २ । इति त्रिकाण्डशेषः ।

यक्षवासं, क्ली, (यक्षाणां वासनम् ।) यक्षो-[illegible] । यथा, [illegible] ।

"[illegible] वासनम् ।

[illegible] च ।

[illegible] ।"

यक्षकर्द्दम, क्ली, ([illegible] ।) [illegible] । इति [illegible] ।

[illegible], पुं, ([illegible] ।)

[illegible] । इति [illegible] ।

यक्षिणी, स्त्री, ([illegible] । यक्ष+ इनि । ङीप् ।) कुबेरपत्नी । इति शब्दरत्ना-वली । यक्षभार्य्या च । (यथा, कथासरि-त्सागरे । १० । १७८ ।

"सोऽपि तत्राशु [illegible] पुत्रं [illegible]

अधृतिं मा कृथाः पुत्र ! मम सिद्धा [illegible]

यक्षिणी ।"

यक्षी, स्त्री, (यक्षस्य भार्य्या । यक्ष+पुंयो-गादिति ङीष् ।) कुबेरपत्नी । इति शब्दर-[illegible] यक्षी । (यक्षभार्य्या । यथा, महाभारते । ३ । ११७ ।

"यक्षी वा राक्षसी वापि उताहोऽसि सुरा-ङ्गना ।

सर्व्वथा कुरु नः स्वस्ति रक्षस्वाकाश-निन्दिते ।")

यक्षोडुम्बरकं, क्ली, (यक्षप्रियमुडुम्बरम् । ततः स्वार्थे कन् ।) अश्वत्थफलम् । इति त्रिकाण्डशेषः ।

यक्ष्मघ्नी, स्त्री. (यक्ष्माणं हन्ति । हन्+"अ-मनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ततो ङीप् ।) द्राक्षा । इति शब्दमाला ।

यक्ष्मा, [न्] पुं, (यक्ष+"आतुपकात् मनिन् इति ।" उणा० ४।१४० । इत्यत्र उज्ज्वलदत्तोक्त मनिन्प्रत्ययेन साधुः ।) रोगविशेषः । तत्पर्य्याय: क्षयः २ शोषः ३ । इत्यमरः । २ । ६ । ५१ । राजयक्ष्मा ४ रोगराट् ५ । अथ राजयक्ष्माधिकारः । "तत्र राजयक्ष्मणो विप्रकृष्टं सन्निकृष्ट निदानमाह ।

'वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।

त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ।'

वेगोऽत्र वातमूत्रपुरीषाणाम् ।

'वातमूत्रपुरीषादि निगृह्णाति यदा नरः ।'

इति चरकवचनात् ।

क्षयात् क्षीयतेऽनेनेति क्षयः तेनातियाव-[illegible] [illegible] । साहसात् बलवता सह मल्लयुद्धादितः । विष-मशनात् बहु स्तोकमकाले वा भुक्तं तत् विष-मशनम् । तस्मात् । त्रिदोषः सान्निपातिकः । हेतुचतुष्टयात् [illegible] [illegible] [illegible] । [illegible] यक्ष्मणः पर्य्यायाः राजय-क्ष्मशोषाः ।" यक्ष्मादीनां शब्दानां निरु-[illegible] माह ।

'[illegible] यक्षात् [illegible] यक्ष्मेति ।

स यक्ष्मा प्रोच्यते लोके शब्दप्रावृत्तिकारणे ।'

यक्ष्मणि पूर्व्वं ।

'राजचन्द्रमसो यस्मादभूदेष किलामयः ।

तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः ।

क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः ।

संशोषणाद्रसादीनां शोष इत्यभिधीयते ।'"

[illegible] माह ।

'[illegible] रेतसः ।

[illegible] ।

[illegible] ।'

[illegible] ।

[illegible]

कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् ॥ * ॥ मार्गावरोधे रसक्षयहेतुमाह चरकः।
'स स्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते।
ऊर्द्ध्वं कासवेगेन बहुरूपः प्रवर्त्तते ॥'
स्वस्थानस्थः हृदयस्थः। कासं विनापि रसक्षयो भवति मार्गावरोधकुपितवातेन रसस्य शोषणात्। उक्तञ्च।
'वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन च।
अनुलोमक्षयं दृष्ट्वा प्रतिलोमक्षयावहः ॥'
अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमप्याह। अतिव्यवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तरा सर्व्वे धातवो रसपर्य्यन्ताः क्षीयन्ते। तद्यथा। शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते। एवं पूर्व्वं पूर्व्वं क्षीयते। ननु कार्य्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः। उच्यते। शुक्रक्षयाद्वायुः कुप्यति। यदुक्तम्।
'वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति।'
स वायुः सान्निध्यक्रमेण मज्जादीन् सर्व्वान् धातून् संशोषयति। ततस्तदनन्तरं मानवः शुष्यति ॥ * ॥ पूर्व्वरूपमाह।
'श्वासाङ्गसादकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्
शुष्कांस्तरून् पवनधूमदवार्द्दितांश्च ॥' * ॥
यक्ष्मणो लक्षणमाह।
'अंसपार्श्वाभितापश्च सन्तापः करपादयोः।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥'
अंसयोः पार्श्वयोः अभितापः पीडा अत्र सकलधातुक्षयपूर्व्वकः सकलशरीरशोषोऽपि बोद्धव्यः। क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानव इति संप्राप्तिः। एवं षड्रूपे एकादशरूपे च बोद्धव्यम्। एतानि त्रीणि लक्षणानि प्रायोभावित्वेन चरकेणोक्तानि। सुश्रुतेन यक्ष्मणि षट्लक्षणान्युक्तानि।
'भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनम्।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥' * ॥
उल्वणतया दोषाणां भेदादेकादश लक्षणान्याह।
'स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥'
अनिलादुल्वणात् एवं पित्तात् कफाच्च। यत आह सुश्रुतः।
'एक एवमतः शोषः सन्निपातात्मको गदः।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति च ॥'
असाध्यलक्षणमाह।
'एकादशभिरेभिर्व्वा षड्भिर्व्वापि समन्वितम्।
त्रिभिर्व्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः।
जह्याच्छोषार्द्दितं जन्तुमिच्छन् सुविपुलं यशः ॥'
तत्र विशेषमाह।
'सर्व्वैरर्द्धैस्त्रिभिर्व्वापि लिङ्गैर्मांसबलक्षये।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्व्वरूपोऽप्यतोऽन्यथा ॥'
सर्व्वैर्लिङ्गैरेकादशभिः। अर्द्धैः षड्भिः त्रिभिर्ज्वरकासरुधिरवमनैः। अतोऽन्यथा मांसे बले सति सर्व्वरूपोऽपि प्रत्याख्याय चिकित्स्यः।
'महाशनं क्षीयमाणमतीसारनिपीडितम्।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत् ॥'
महाशनं क्षीयमाणमित्येकमसाध्यलक्षणम्। अतीसारनिपीडितमिति द्वितीयम्। यत उक्तम्।
'मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम्।
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥'
शूनमुष्कोदरमिति तृतीयम् ॥ * ॥ अरिष्टमाह।
'शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीडितम्।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥'
मेहन्तं शुक्रं क्षरन्तम्। शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि ॥ * ॥ अवधिमाह।
'परं दिनसहस्रन्तु यदि जीवति मानवः।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः ॥'
शोषपीडितो मानवश्चेत्तरुणो भवति। सुभिषग्भिरुपक्रान्तो भवति। तदा परं दिनसहस्रम्। द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः। एतेन शोषपीडितो मानवश्चेत्तरुणो भवति। सद्वैद्यैश्चिकित्स्यो भवति। तदा प्रथमदिनसहस्रं जीवेदेव इत्युक्ता चिकित्स्यमाह।
'ज्वरानुबन्धरहितं बलवन्तं क्रियासहम्।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ॥'
आत्मवन्तं यत्नवन्तं धृतिमन्तं वा ॥ * ॥ अथ निदानविशेषैः शोषविशेषानाह।
'व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान्।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥'
व्रणोरःक्षतसंज्ञौ शोषिणौ। व्रणशोषी उरःक्षतशोषी च ॥ * ॥ तत्र व्यवायशोषिणो लक्षणमाह।
'व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः ॥'
शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः। तानि यथा, शुक्रक्षये मेढ्रवृषणयोर्वेदना अशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्पशुक्रदर्शनमिति। यथापूर्व्वं क्षीयन्ते चास्य धातवः प्रथमं शुक्रं क्षीयते पश्चात् शुक्रक्षयजनितवायुना मज्जादयोऽपि धातवो यथापूर्व्वं क्षीयन्ते ॥ * ॥ शोकशोषिणो लक्षणमाह।
'प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः।
विना शुक्रक्षयकृतैर्विकारैरुपलक्षितः ॥'
प्रध्यानशीलः यस्याभावेन शोको जनितस्तद्ध्यानपरः। स्रस्ताङ्गः शिथिलाङ्गः। तादृशः व्यवायशोषिसदृशः। तेन शुक्रादिसर्व्वधातुक्षययुक्तो भवति। परं शुक्रक्षयकृतैर्विकारैर्मेढ्रवृषणवेदनादिभिर्वर्जितो भवति। व्याधिस्वभावात् ॥ * ॥ जराशोषिणो लक्षणमाह।
'जराशोषी कृशो मन्दवीर्य्यबुद्धिबलेन्द्रियः।
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥
ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीडितः।
संप्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥'
मन्दशब्दः स्वल्पार्थः। शुष्करूक्षमलच्छविः शुष्करूक्षे मलच्छवी यस्य सः ॥ * ॥ अध्वशोषिणो लक्षणमाह।
'अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥'
संभृष्टस्येव परुषा छविर्यस्य सः। प्रसुप्तगात्रावयवः प्रसुप्तः स्पर्शाज्ञः। क्लोमं तिलकं पिपासास्थानम् ॥ * ॥ व्यायामशोषिणो लक्षणमाह।
'व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥'
एभिरेव स्रस्ताङ्गत्वादिभिरध्वशोषिणो लक्षणैरेव। भूयिष्ठं अत्यर्थम् ॥ * ॥ सनिदानं व्रणशोषमाह।
'रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात्।
व्रणितस्य भवेच्छोषो याप्योऽसाध्यश्च स स्मृतः ॥'
उरःक्षतस्य निदानमाह।
'धनुषायास्यतोऽत्यर्थं भारमुद्वहतो गुरुम्।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥
वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः
परान् ॥
अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो द्रुतम्।
महानदीं वा तरतो हयैर्व्वा सह धावतः ॥
सहसोत्पततो दूरं तूर्णं चातिप्रनृत्यतः।
अथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा ॥
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः।
विक्षते वक्षसि व्याधिर्ब्बलवान् समुदीर्य्यते ॥'
आयास्यतः आयासं कुर्व्वतः। दम्यं वृषादिकम्। अन्यच्च गजोष्ट्रादिकम्। शिला दीर्घपाषाणः। अश्म प्रस्तरखण्डः। निर्घातोऽस्त्रविशेषः। व्याधिः उरःक्षताख्यः ॥ * ॥ उरःक्षतस्य लक्षणमाह।
'उरो विरुज्यतेऽत्यर्थं भिद्यते च विभज्यते।
शूलं भवति तत्पार्श्वं शुष्यत्यङ्गं प्रवेपते ॥
प्रपीड्यते ततः पार्श्वं शुष्यत्यङ्गं प्रकम्पते।
क्रमाद्वीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते ॥
ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहु।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ॥
स क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात्।
अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ॥'
विरुज्यते पीड्यते। भिद्यते विदार्य्यत इव।

यजुः, [स्] क्ली, (इज्यतेऽनेनेति । यज् + "अर्त्तिपृवपियजीति ।" उणा० २ । ११८ । इति उसिः ।) वेदविशेषः । इत्यमरः । १ । ६ । ३ ॥ "इज्यतेऽनेनेति यजुः । यजो णौ देवार्च्चादानसङ्गतौ । आङ्गसिस् इति उस् ।" इति भरतः ॥ अपि च । यजुराह जैमिनिः । शेषे था यजुःशब्दः । शेषे ऋक्सामभिन्ने मन्त्रजाते तच्च यन्मन्त्रजातं प्रश्लिष्य पठितं गानादिविच्छेदरहितं तत् यजुरिति । इति तिथ्यादितत्त्वम् ॥ यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति । चरकाः १ आह्वरकाः २ कठाः ३ प्राच्यकठाः ४ कपिष्ठलकठाः ५ औपमन्यवाः ६ आत्तालकठाः ७ चारायणीयाः ८ वारायणीयाः ९ वार्त्तान्तवेयाः १० श्वेताश्वतराः ११ मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति । मानवाः १ दुन्दुभाः २ चैकेयाः ३ वाराहाः ४ हारिद्रवेयाः ५ श्यामाः ६ श्यामायनीयाश्चेति ७ । तेषामध्ययनमष्टौ शतम् । यजुःसहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद्भवति । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि । तत्र प्रायोदीच्या वेदेषु विशेषः । तत्र वाजसनेया नाम सप्तदश भेदा भवन्ति । जाबालाः १ बौधेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शापीयाः ५ तापायनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आवटिकाः ९ परमावटिकाः १० पाराशर्याः ११ वैधेयाः १२ वैनेयाः १३ औधेयाः १४ गालवाः १५ वैजवाः १६ कात्यायनीयाश्चेति १७ । प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायतर्क इत्युपाङ्गानि भवन्ति । उपज्योतिषम् १ कल्पसूत्रम् २ प्रतिज्ञा ३ अनुवाक्यम् ४ परिसंख्या ५ चरणव्यूहम् ६ श्राद्धकल्पः ७ प्रवराध्यायश्च ८ शुल्बम् ९ क्रतुः १० संख्या ११ अनुक्रमः १२ यज्ञम् १३ शाखाः १४ पार्षदम् १५ प्रवरः १६ उक्थानि १७ कूर्मलक्षणम् १८ । इत्यष्टादश परिशिष्टानि ।

"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यानमेतत् सकलं यजुर्विधम् ।
[illegible] ब्राह्मणस्य चतुर्गुणम् ।
[illegible] वेदानां [illegible] ।
[illegible] तु [illegible] ॥"

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति । औख्याः खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति । आपस्तम्बी १ बौधायनी २ सत्याषाढी ३ हिरण्यकेशी ४ औधेयी चेति ५ । तत्र [illegible] ।

"[illegible] ।

यजुर्वेदः स विज्ञेयोऽन्यं शाखान्तराः स्मृताः ।" यजुर्वेदस्य धनुर्वेद उपवेदः । यजुर्वेदस्य भारद्वाजगोत्रम् । रुद्रदैवत्यम् । त्रैष्टुभं छन्दः । यजुर्वेदः कृशः । दीर्घः । कपाली । ताम्रवर्णः । कामलनयनः । आदित्यवर्णः वर्णेन । पञ्चारत्निमात्रः । अस्य ध्यानम् ।

"वन्दे रौद्रं त्रैष्टुभं ताम्रवर्णं
भारद्वाजं कञ्जनेत्रं कृशाङ्गम् ।
यजुर्वेदं दीर्घमादित्यवर्णं
कापालीनं पञ्च चारत्निमात्रम् ॥"

य इदं दैवतं रूपं गोत्रं प्रमाणं छन्दो वर्णं वर्णयति स विद्यां लभते स विद्यां लभते । जन्मजन्मनि वेदपारो भवति । जन्मजन्मनि वेदधारी भवति । अव्रतो व्रती भवति । अप्रयतः प्रयतो भवति । अब्रह्मचारी ब्रह्मचारी भवति । जातिस्मरो जायते । इति चरणव्यूहम् ॥ (ऋक्सामभिन्नो मन्त्रविशेषः । इति केचित् ।)

यजुर्वेदः, पुं, (यजुरेव वेदः । यजुषां वेद इति वा ।) वेदविशेषः । तस्याधिपतिर्यथा,—
"ऋग्वेदाधिपतिर्जीवः सामवेदाधिपः कुजः ।
यजुर्वेदाधिपः शुक्रः शशिजोऽथर्व्ववेदराट् ॥"
इति ज्योतिषम् ॥

अस्य वक्ता वैशम्पायनः । स तु व्यासशिष्य एवासीत् । यथा,—
"ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्वेदप्रवक्तारं वैशम्पायनमेव च ॥
जैमिनिं सामवेदस्य श्रावकं सोऽन्वपद्यत ।
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ॥
एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिः स्यादृग्भिर्होत्रं द्विजोत्तमाः ।
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च बिभेद सः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥"
इति कौर्म्मे ४९ अध्यायः ॥

यज्ञः, पुं, इज्यते हविर्दीयतेऽत्र । (इज्यन्ते देवता अत्र इति वा । यज् + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३।३।९० । इति नङ् ।) यागः । तत्पर्य्यायः । सवः २ अध्वरः ३ यागः ४ सप्ततन्तुः ५ मखः ६ क्रतुः ७ । इत्यमरः ।२।७।१३॥ इष्टिः ८ इज्या ९ वितानम् १० मन्युः ११ आहवः १२ सवनम् १३ हवः १४ अभिषवः १५ होमः १६ हवनम् १७ महः १८ । इति शब्दरत्नावली । स त्रिविधः । सात्त्विको राजसिकस्तामसिकश्च । सात्त्विकयज्ञो यथा,—
"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"

राजसिकयज्ञो यथा,—
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ । तं यज्ञं विद्धि राजसम् ॥"
तामसिकयज्ञो यथा,—
"विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥
स च नानाविधः । यथा,—
"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥"
इति श्रीभगवद्गीतायाम् ४ अध्यायः ॥
पञ्च यज्ञा यथा,—
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इति गारुडे २१५ अध्यायः ॥
(तथाच मनुः । ४ । २१—२२ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥
एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥")
अपरपञ्चयज्ञा उक्ता यथा, शिवपुराणे वायुसंहितायामुत्तरभागे । १८ । ९९—१०१ ।
"कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः ॥
कर्म्मयज्ञरताः केचित्तपोयज्ञरताः परे ।
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तरम् ।
कर्म्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥
कामान् कामी ततो भुक्त्वा कामासक्तः पुनर्भवेत् ।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥
तपोयज्ञरतो भूत्वा जायते नात्र संशयः ।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युतः ॥
जपध्यानरतो भूत्वा जायते भुवि मानवः ।
जपध्यानरतो मर्त्यस्तद्दैर्घ्यस्वभावतः ॥
ज्ञानं लब्ध्वा चिरादेव शिवसायुज्यमाप्नुयात् ।
तस्मात्तु शिवाज्ञया कर्म्मयज्ञोऽपि [illegible] ।
अकामः कामसंयुक्तो बन्धायैव भविष्यति ।
तस्मात् पञ्चसु यज्ञेषु ध्यानज्ञानपरो भवेत् ।
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ।
हिंसादिदोषनिर्मुक्तो विशुद्धश्चित्तसाधकः ।
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
बहिः कर्म्मकरा यद्वन्मात्रफलभागिनः ।
दृष्ट्वा नरेन्द्रभवने सहस्राणि कश्चित् ।
ध्यानिनो हि वपुः सूक्ष्मं भवेत् प्रत्यक्षमैश्वरम् ।
तथैव कर्म्मिणः स्थूलं मृत्काष्ठाद्यैः प्रकल्पितम् ।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणरूपकान् ।
नात्यन्तं प्रतिपद्यन्ते शिवयाथात्म्यवेदनात् ।
आत्मस्थं यः शिवं त्यक्त्वा बहिरभ्यर्चयेन्नरः ।
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मनः ।
ज्ञानात् ध्यानं भवेत् ध्यानात् ज्ञानं भूयः प्रवर्त्तते ।
तदुभाभ्यां भवेन्मुक्तिस्तस्मात् ध्यानरतो भवेत् ।
द्वादशान्ते तथा मूर्द्ध्नि ललाटे भ्रूयुगान्तरे ।

 यज्ञः यज्ञः

ग्नौ वा तदाख्ये वा चत्वरे हृदये तथा ।
ं वा शाल्वतस्थाने श्रद्धाविहीन चेतसा ॥
ंगोपचारेण देवं देवीञ्च पूजयेत् ।
वा पूजयेन्नित्यं लिङ्गे वा हतकेऽपि वा ॥
वा स्थण्डिले चाथ भक्त्या विष्णुमारतः ॥
वान्तर्व्वेदिसंस्थैव पूजयेत् परमेश्वरम् ।
न्तरगः पूजां वहिः कुर्व्वीत वा न वा ॥")
ोत्पत्तिर्यथा,—

ऋषय ऊचुः ।

यं यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
त्वमगमन् पुत्रा वराहस्य कथं त्रयः ।
ाद्य ओप्यमागानां कथयस्व महामते ! ॥

श्रीमार्कण्डेय उवाच ।

ध्वं द्विजशार्दूला यत् पृष्टोऽहं महाद्भुतम् ।
ु देवास्तिष्ठन्ति यज्ञे सर्व्वं प्रतिष्ठितम् ॥
ेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः ।
ेन भूता जीवन्ति पर्जन्यादन्नसम्भवः ॥
न्यो जायते यज्ञात् सर्व्वं यज्ञमयं ततः ।
यज्ञोऽभूद्वराहस्य कायात् शम्भुविदारितात् ॥
ाहं कथये तद्वः शृणुध्वमवहिता द्विजाः ।
ारिते वराहस्य काये भर्गेण तनुत्यजात् ॥
ब्रह्मविष्णुशिवा देवाः सर्व्वैश्च प्रमथः सह ।
ुर्णलात् समुद्धृत्य तच्छरीरं नभः प्रति ॥
ुभैवः शरीरन्ते विष्णोश्चक्रेण खण्डशः ।
ाङ्गसन्धयो यज्ञा जातास्ते वै पृथक् पृथक् ॥
ज्ञादृयस्ताच ये यज्ञास्तान् शृणुध्वं महर्षयः ।
नासासन्धिना जातो ज्योतिष्टोमो महाध्वरः ॥
ुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।
ुर्भुवोः सन्धिना तु व्रात्यष्टोमो व्यजायत ॥
ाजः पौनर्भवष्टोमस्तस्य पोत्रोष्ठसन्धिना ।
हष्टोमबृहत्ष्टोमौ जिह्वामूलाद्व्यजायत ॥
ातिरात्रं सवैराजमधोजिह्वान्तरादभूत् ॥
ध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
ोमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
ान्तं तर्पणपर्य्यन्तं नित्ययज्ञाश्च सर्व्वशः ।
ण्ठसन्धेः समुत्पन्ना जिह्वातो विधयस्तथा ॥
ाग्निमेधो महामेधो नरमेधस्तथैव च ।
ाणिहिंसाकरा येऽन्ये ते जाताः पादसन्धितः ॥
ाजसूयोऽथ कारीषो वाजपेयस्तथैव च ॥
पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च ॥
ातिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा ।
हृत्सन्धितः समुत्पन्नाः सावित्रीयज्ञ एव च ॥
सर्व्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये ।
ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः ॥
रक्षःसत्रं सर्पसत्रं सर्व्वञ्चैवाभिचारिकम् ।
गोमेधो हचणाभ्य खुरेभ्यो ह्यभवन्निमे ॥
मायेष्टिः परमेष्टिश्च गोष्पतिर्भोगसम्भवः ।
लाङ्गूलसन्धौ संजाता ऋग्निष्टोमस्तथैव च ॥
नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकीर्त्तिताः ।
लाङ्गूलसन्धौ ते जातास्तथा द्वादशवार्षिकम् ॥
तीर्थप्रयोगसामौजयज्ञुःसङ्कर्षणस्तथा ।
वार्क्कमाथर्व्वणश्चैव नाभिसन्धेः समुद्गताः ॥
अश्वोत्कर्षः चेममयज्ञः पद्ममार्गोऽतियोजनः ।
लिङ्गसंस्थानदैवमयज्ञा जाताश्च जानुनि ॥
एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ।
यज्ञानां सततं लोका येर्भान्त्यद्यापि च ।
सुगस्य पोत्रात् संजाता नासिकायाः सुवोऽभवत् ॥
अन्ये सुक्स्रुवभेदा ये ते जाताः पोत्रनासयोः ।
ग्रीवाभागेन तस्याभूत् प्राग्वंशो मुनिसत्तमाः ॥
इष्टापूर्त्तं यजुर्धर्म्मो जाताः श्रवणरन्ध्रतः ।
दंष्ट्राभ्यो ह्यभवन् यूपाः कुशा रोमाणि चाभवन् ॥
उद्गाता च तथाध्वर्य्युर्होता समिध एव च ।
अग्रदक्षिणवामाङ्गपश्चात्पादेषु सङ्गताः ॥
पुरोडाशाः सचरवो जाता मस्तिष्कसञ्चयात् ।
कर्णनेत्रयुगाज्जाता यज्ञकेतुस्तथा खुरात् ॥
मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत ।
रेतोधारास्तथैवाज्यं स्वराश्मन्त्राः समुद्गताः ॥
यज्ञालयः पृष्ठभागात् हृत्पद्मात् यज्ञ एव च ।
तदात्मा यज्ञपुरुषो सृष्टाः कथात् समुद्गताः ॥
एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च ।
तानि यज्ञवराहस्य शरीरादेव चाभवन् ॥
एवं यज्ञवराहस्य शरीरं यज्ञतामगात् ।
यज्ञरूपेण सकलमाप्यायितुमिदं जगत् ॥
एवं विधाय यज्ञन्तु ब्रह्मविष्णुमहेश्वराः ।
सुवृत्तं कनकं घोरमासेदुर्यत्नतत्पराः ॥
ततस्तेषां शरीराणि पिण्डीकृत्य पृथक् पृथक् ।
त्रिदेवाखिलशरीराणि वधमम्मुखवायुभिः ॥
सुवृत्तस्य शरीरन्तु वधमम्मुखवायुना ।
स्वयमेव जगत्स्रष्टा दक्षिणाग्निस्ततोऽभवत् ॥
कनकस्य शरीरन्तु भ्रामयामास केशवः ।
ततोऽभूद्गार्हपत्याग्निः पञ्चवैतानभोजनः ॥
घोरस्य तु वपुः शम्भुर्भ्रामयामास वै स्वयम् ।
तत आहवनीयोऽग्निस्तत्क्षणात् समजायत ॥
एतैस्त्रिभिर्जगत् व्याप्तं त्रिमलं सकलं जगत् ।
एतत् यत्र त्रयं नित्यं तिष्ठति द्विजसत्तमाः ।
समस्ता देवतास्तत्र वसन्त्यनुचरैः सह ॥
एतद्ब्रह्मपरं नित्यमेतदेव त्रयात्मकम् ।
एतत् त्रयीविधिस्थानमेतत् पुण्यकरं परम् ॥
यस्मिन् जनपदे चैते हूयन्ते ह्यग्नयस्त्रयः ।
तस्मिन् जनपदे नित्यं चतुर्व्वर्गो विवर्द्धते ॥
एतद्वः कथितं सर्व्वं यत् पृष्टं द्विजसत्तमैः ।
यथा यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
तथा च तस्य पुत्राणां देहाग्नित्वमागमन् ॥"

इति कालिकापुराणे ३० अध्यायः ॥ *॥

ब्रह्मण आदियज्ञो यथा,—

पुलस्त्य उवाच ।

"पूर्व्वमेव मया ख्यातं यदा स्वायम्भुवो मनुः ।
जातः परमधर्म्मात्मा शतरूपापतिः स्वयम् ॥
स्रष्टा प्रजापतिः पूर्व्वं सृष्टिकर्म्मण्ययोजयत् ।
वत्स ! त्वमेव संकल्प्य स्वरूपां सृष्टिं कुरु राघ ॥
स्वयं तु पुष्करं गत्वा कृत्वा यज्ञन्तु विस्तरम् ।
ब्रह्मोद्गाता होताध्वर्य्युश्चत्वारो यज्ञवाहकाः ।
एकैकस्य त्रयश्चान्ये परिवाराः स्वयं कृताः ॥
एते वै षोड़श प्रोक्ता ऋत्विजो वेदचिन्तकाः ।
शतानि त्रीणि षड्भिश्च यज्ञाः सृष्टाः स्वयम्भुवा ॥

भीष्म उवाच ।

यज्ञस्य ब्रह्मणो विप्र ! समाप्तिं वद साम्प्रतम् ॥

पुलस्त्य उवाच ।

मन्वन्तरे व्यतीते तु यज्ञस्यावभृथोऽभवत् ।
दक्षिणा ब्रह्मणा दत्ता प्राची होतुस्तु दक्षिणा ॥
आध्वर्य्यवे प्रतीची तु उद्गातुश्चोत्तरा तथा ।
त्रैलोक्यं सकलं ब्रह्मा ददौ तेषान्तु दक्षिणाम् ॥
धेनूनाञ्च शतं सार्द्धं दातव्यं यज्ञसिद्धये ।
अध्वर्य्यूणां सहस्राणि स्वेच्छया दानमिष्यते ॥"

इति पाद्मे सृष्टिखण्डे ३१ अध्यायः ॥ *॥

ब्राह्मणादीनां स्वधर्म्मयज्ञा यथा,—

"आरम्भयज्ञाः क्षत्राः स्युर्हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥"

इति मात्स्ये ११८ अध्यायः ॥ *॥

हिंसायज्ञस्य अधर्म्मजनकत्वं यथा,—

"तथा विश्वभुगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ।
दैवतैः सह संहृत्य सर्व्वसाधनसंभृतम् ॥
तस्याश्वमेधे वितते समाजग्मुर्महर्षयः ।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा ॥
विश्वं भुजन्ते त्वपृच्छन् कोऽयं यज्ञविधिस्तव ।
अधर्म्मो बलवानेष हिंसाधर्म्मेप्सया तव ॥
न नः पशुवधस्त्विष्टस्तव यज्ञेश्वरोत्तम ! ।
अधर्म्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया ॥
नायं धर्म्मो ह्यधर्म्मोऽयं न हिंसा धर्म्म उच्यते ।
आगमेन भवान् धर्म्मं प्रकरोतु यदीच्छति ॥
विधिदृष्टेन यज्ञेन धर्म्मेणाव्ययसेतुना ॥
एवं विश्वभुगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः ।
उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षिणाम् ।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥
ते तु खिन्ना विवादेन तत्त्वयुक्ता महर्षयः ।
सन्धाय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥

ऋषय ऊचुः ।

महाप्राज्ञ कथं दृष्टस्त्वया यज्ञविधिर्नृप ! ।
उत्तानपादे ! प्रब्रूहि संशयं नो नुद प्रभो ! ॥

सूत उवाच ।

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य बलाबलम् ।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि ।
हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥
एवं कृतोत्तरास्ते तु युक्तात्मानं ततो धिया ।
अवश्यं भाविनं दृष्ट्वा तमधो [illegible]स्तदा ॥
इत्युक्तमात्रो नृपतिः प्र[illegible]म् ।
धर्म्माणां संशयच्छेत्ता [illegible]ो गतः

तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशयः।
तस्मान्न हिंसा यज्ञस्य यदुक्तमृषिभिः पुरा॥"

इति मात्स्ये ११६ अध्यायः॥

तद्वैदिकपर्य्यायः। वेनः २ अध्वरः ३ मेधः ४ विदथः ५ नार्य्यः ६ सवनम् ७ होत्रा ८ इष्टिः ९ देवताता १० मखः ११ विष्णुः १२ इन्दुः १३ प्रजापतिः १४ घर्म्मः १५। इति पञ्चदश यज्ञनामानि। इति वेदनिघण्टौ। ३। १७॥ (विष्णुः। यथा, महाभारते।१३।१४९।११७।
"यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः॥")

यज्ञकृत्, त्रि, (यज्ञं करोतीति। कृ+क्विप्। यागकर्त्ता। (यथा, श्रीमद्भागवते।४।४।७।
"नाभागतां तत्र न कश्चनाद्रियद्-
विमानितां यज्ञकृतो भयाज्जनः।
ऋते स्वसॄर्वै जननीञ्च सादराः
प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा॥"
पुं, विष्णुः। यथा, महाभारते।१३।१४९।११८।
"यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग् यज्ञसाधनः॥")

यज्ञपशुः, पुं, (यज्ञार्थः पशुः।) घोटकः। इति शब्दमाला॥ (यथा, श्रीमद्भागवते। ४। १९। ११।
"चरमेणाश्वमेधेन यजमाने यजुष्पतिम्।
वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः॥")
छागश्च॥

यज्ञपुरुषः, पुं, (यज्ञरूपी पुरुषः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥ (यथा, श्रीमद्भागवते। २। ७। ११।
"सत्रे ममास भगवान् हयशीरषाथो
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः॥")

यज्ञभाजनं, क्ली, (यज्ञस्य भाजनम्।) यज्ञपात्रम्। इति जटाधरः॥

यज्ञभूषणः, पुं, (यज्ञं भूषयतीति। भूष+णिच्+ल्युः।) श्वेतदर्भः। इति राजनिर्घण्टः॥ (कुशमात्रम्। यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च॥")

यज्ञयोग्यः, पुं, (यज्ञे योग्यः उचितः।) उडुम्बरवृक्षः। इति राजनिर्घण्टः॥ यागार्हे, त्रि॥

यज्ञवल्ली, स्त्री, (यज्ञस्य वल्ली।) सोमवल्ली। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः सोमवल्लीशब्दे ज्ञातव्याः।)

यज्ञवाटः, पुं, (यज्ञस्य वाटो वेष्टनम्।) यज्ञस्थानम्। इति हेमचन्द्रः॥ (यथा, श्रीमद्भागवते। १०। ३३। २३।
"इत्थं नृदेवनवरस्य यज्ञवाटं कृत्यकृता:।
[illegible] ॥")

[illegible], पुं, (यज्ञस्य [illegible]।) [illegible]। इति [illegible]।(विष्णुः। [illegible] यथा,

"विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यज्ञश्रेष्ठा, स्त्री, (यज्ञे श्रेष्ठा।) सोमवल्ली। इति राजनिर्घण्टः॥

यज्ञसाधनः, पुं, (यज्ञं साधयतीति। सिध+णिच्+ल्युः।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १४९। ११८॥ (यज्ञसाधके, त्रि। यथा, ऋग्वेदे।१।१४५।१।
"पुरुप्रैषस्तुरियज्ञसाधनः।"
"यज्ञसाधनः यज्ञसाधकः तदधीनत्वात् यज्ञस्य।"
इति तद्भाष्ये सायणः॥)

यज्ञसारः, पुं, (यज्ञे सारः उत्कृष्टः।) यज्ञोडुम्बरवृक्षः। इति राजनिर्घण्टः॥

यज्ञसूत्रं, क्ली, (यज्ञे धृतं सूत्रम्।) यज्ञोपवीतम्। यथा,—
"पवित्रं यज्ञसूत्रञ्च यज्ञोपवीतमित्यपि।
यज्ञसूत्रं तदेवोपवीतं स्याद्दक्षिणे भुजे॥
उद्धृते वामबाहौ तु प्राचीनावीतमन्यदः।
निवीतन्तु तदेव स्यात्कण्ठेऽपि लम्बितम्॥"
इति जटाधरः॥
तस्य प्रमाणं यथा,—
"ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः।
तन्तुत्रयमधोवृतं यज्ञसूत्रं विदुर्बुधाः॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम्।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम्॥
यजुर्व्विदां नाभिमितं सामगानामयं विधिः।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम्॥"
इति कल्किपुराणे ४ अध्यायः॥
अस्य धारणे मन्त्रो यथा —
"यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपन-
ह्यामि।"
इति संस्कारतत्त्वधृतभट्टभाष्यम्॥
यजुर्व्वान्,—
"यज्ञोपवीतं परमं पवित्रं
बृहस्पतेर्यत् सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः॥"
इति पशुपतिः॥
युगभेदे तत्सूत्रनियमो यथा,—
"सत्ये स्वर्णमयं सूत्रं त्रेतायां राजतं तथा।
द्वापरे ताम्रजं प्रोक्तं कलौ कार्पाससम्भवम्॥"
इति हृदयमार्त्तण्डः॥
अन्यच्च।
"यज्ञार्थं प्रार्थयेत् सूत्रं यत्तं कन्यत्यमिप्यते।
सूत्रं दीर्घं ताम्रमयं यद्वा कार्पाससम्भवम्॥
स्थापयित्वा गृहे शुद्धे यथाशक्तं निधाय च।
यज्ञसूत्रं परिचरेद्ग्रन्थिसिद्धक्रियात्मकम्॥
न तत्र नियमो यस्मात् तत्तत्कल्पप्रक्रिया॥"
इति हारीतसंहिता॥

यज्ञस्थानं, क्ली, (यज्ञस्य स्थानम्।) यज्ञवाटः। इति जटाधरः॥

यज्ञाङ्गः, पुं, (यज्ञं अङ्गति प्राप्नोतीति। अ
अण्।) उडुम्बरः। इत्यमरः। २। ४।
(अस्य पर्य्यायो यथा,—
"यज्ञाङ्गो ब्रह्मवृक्षश्च हेमदुग्धोऽप्युडुम्बरः
इति वैद्यकरत्नमाला।
"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भा
खदिरवृक्षः। इति राजनिर्घण्टः। श्र
यष्टिका। इति शब्दचन्द्रिका॥ (यज्ञ ए
यस्य। विष्णुः। यथा, महाभारते।१३।
११७।
"भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामह
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः
यज्ञस्याङ्गमिति।) यागावयवे यज्ञसाध
क्ली॥ (यथा, कुमारसम्भवे। १। १७।
"यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च॥")

यज्ञाङ्गा, स्त्री, (यज्ञमङ्गति प्राप्नोति या। अ
अण्। टाप्।) सोमवल्ली। इति राजनिर्घ
(विवृतोऽस्याः सोमवल्लीशब्दे ज्ञातव्यः।

यज्ञान्तः, पुं, (यज्ञस्य अन्तोऽवसानं यस्मि
अवभृथः। इति हेमचन्द्रः। ३। ४९८।
वैश्वश्च॥ (यथा, महाभारते। १३। १
११८।
"यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च।

यज्ञारिः, पुं, (यज्ञस्य दक्षयज्ञस्य अरिर्नाश
शिवः। इति धनञ्जयः॥ राक्षसश्च॥

यज्ञिकः, पुं, पलाशवृक्षः। इति जटा
(अनुकम्पितो यज्ञदत्तः। "बह्वचो म
नाम्नष्ठ् वा।" ५। ३। ७८। इति
"ठाजादावूर्द्ध्वं द्वितीयादचः।" ५।३।८३
प्रत्यये द्वितीयादच ऊर्द्ध्वस्य लोपः। यज्ञद
इति काशिका॥)

यज्ञियं, त्रि, (यज्ञमर्हतीति। यज्ञ+"यज्ञर्त्त्वि
ग्भ्यां घखञौ।" ५।१।७१। इति घः।) यज्ञ
र्हम्। इत्यमरः।२।७।२७॥ (यथा, हरि
२९। १६।
"ततो यज्ञविभागो हि यज्ञियैर्हि हरेः पुर
यज्ञाय हितम्। इति मुग्धबोधव्याकर
(यथा, मनुः। २। २३।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः पर

यज्ञियः, पुं, (यज्ञाय हितः। यज्ञ+घः।) द्
युगम्। इति त्रिकाण्डशेषः॥ (खदिरवृ
तत्पर्य्यायो यथा,—
"खदिरो रक्तसारश्च गायत्री दन्तधावनः
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः।
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भा
पलाशः। तत्पर्य्यायो यथा,—
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्प
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे

[यज्ञियदे]शः, पुं, (यज्ञियश्चासौ देशश्चेति।) यागकरणोपयुक्तदेशः। यथा, मनुः। २।२३।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः॥"

[य]ज्ञियशाला, स्त्री, (यज्ञिया शाला।) यागमण्डपम्। इति जटाधरः॥

[य]ज्ञीयः, पुं, (यज्ञे भवः इति। यज्ञ+"गहादिभ्यश्च।" ४।२।१३८। इति छः।) उडुम्बरवृक्षः। इति राजनिर्घण्टः॥ यागसम्बन्धिनि, त्रि॥ (यथा, महाभारते। ३।१२४।६।
"प्रशस्तेऽहनि यज्ञीये सर्व्वकामसमृद्धिमत्।
कारयामास शर्य्यातिर्यज्ञायतनमुत्तमम्॥")

यज्ञीयब्रह्मपादपः, पुं, (यज्ञीयश्चासौ ब्रह्मपादपश्चेति।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

यज्ञेश्वरः, पुं, (यज्ञानामीश्वरः।) विष्णुः। यथा,
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्व्वे॥"
इति श्राद्धतत्त्वम्॥

यज्ञेष्टं, क्ली, (यज्ञे इष्टम्।) दीर्घरोहिषकतृणम्। इति राजनिर्घण्टः॥

यज्ञोडुम्बरः, पुं, (यज्ञोचितः उडुम्बरः।) उडुम्बरवृक्षः। यज्ञडुमुर इति भाषा॥ तत्पर्य्यायः। हेमदुग्धी २ यज्ञफलः ३ यज्ञाङ्गः ४ हेमदुग्धकः ५ उडुम्बरः ६ जन्तुफलः ७। इति शब्दरत्नावली॥ अस्य गुणाः यथा, भावप्रकाशे।
"उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रनुत्।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः॥"

यज्ञोपवीतं, क्ली, (यज्ञार्थं उपवीतम्।) यज्ञसूत्रम्। पैता इति भाषा। तत्पर्य्यायः। पवित्रम् २ ब्रह्मसूत्रम् ३ द्विजायनी ४। इति त्रिकाण्डशेषः॥ तस्य निरूपणं यथा। उपवीतमाह गोभिलः। यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव। यज्ञोपवीतं विशिष्टविन्यासधारणकर्म्मतया कुरुते। किं तत् सूत्रम्। सूत्रं विशेषयति छन्दोगपरिशिष्टम्।
"ऊर्द्ध्वन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते॥"
वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यं एवं त्रिवृतं त्रिसवं उपवीतं स्यात्। एको ग्रन्थिरिति नानात्वनिषेधार्थम्। तथा बौधायनः।
"कौषं सौत्रं त्रिस्त्रिवृतं यज्ञोपवीतमानाभेः॥"
कौषं कृमिकोषोद्भवं पट्टसूत्रादिमयमित्यर्थः। सौत्रं कार्पासोद्भवम्। तथा मनुः।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"
त्रिस्त्रिवृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृन्मात्रं त्रिसवत्वेन विशेष्यम्। यत्तु पैठीनसिवचनम्। कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य। क्षौमं राजन्यस्य। आविकं वैश्यस्य। तत्रव्यगमभावे षट्तन्तुविधायकम्। नवतन्तुत्वं यत्तमाह देवलः।
"यज्ञोपवीतं कुर्व्वीत सूत्राणि नव तन्तवः।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा॥"
एकेन ग्रन्थिना युक्त इति शेषः। द्विगुणस्त्रिगुणोऽथवेति। तन्तुवत्त्वेन द्विसवस्त्रिसवो वा कर्त्तव्यः। द्विसवत्वं त्रिसवत्वासम्भवे। गोभिले वाशब्दो विकल्पार्थः। अपिशब्दो वस्त्रकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः। एवकारस्त्रिसवत्वव्यवच्छेदार्थः। द्वितीयो वाशब्दः अनुक्तमौञ्जवालादिसमुच्चयार्थः। तथा निगमपरिशिष्टम्। वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण। कुशमुञ्जवालप्रतिमरज्जुभिर्व्वा। वालोऽत्र गोवालः। यथा देवलः।
"कार्पासक्षौमगोवालशणरज्जुतृणोद्भवम्।
सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः॥"
तदभाव इति करणाद्वस्त्राभावे कुशरज्जुभिरिति बोद्धव्यम्। इति श्राद्धविवेकः॥ * ॥ अथोपनयनदिनम्। तत्र गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं शस्तम्। क्षत्त्रियस्य गर्भैकादशे। गर्भद्वादशे वैश्यस्य शस्तम्। अत्रासामर्थ्ये ब्राह्मणस्य षोडशवर्षपर्य्यन्तमेव। क्षत्त्रियस्य द्वाविंशतिवर्षपर्य्यन्तम्। वैश्यस्य चतुर्व्विंशतिवर्षपर्य्यन्तं तदनुष्ठानकालः। तत्र मासाः माघफाल्गुनचैत्रवैशाखज्यैष्ठाषाढा विहिताः। तत्र तिथयः द्वितीयैकादशीद्वादशीपञ्चमीदशमीतृतीया विहिताः। तत्र वाराः वृहस्पतिशुक्ररवीणां प्रशस्ताः। सामगानां मङ्गलवारोऽपि। तत्र नक्षत्राणि। स्वाती ज्येष्ठा धनिष्ठा अश्विनी अनुराधा हस्ता रेवती पुष्या चित्रा श्रवणा मृगशिरः शतभिषा पूर्व्वफल्गुनी उत्तरफल्गुनी पूर्व्वभाद्रपदा उत्तरभाद्रपदा रोहिणी पूर्व्वाषाढा। तत्र लग्नानि वृषसिंहतुलाधनुर्मीनसंज्ञकानि। तत्र पक्षः शुक्लः। तच्चन्द्रादिशोभने अनध्यायादीन् परित्यज्य कर्त्तव्यम्। इति ज्योतिषतत्त्वमतम्॥ * ॥ अथोपनयनम्। तत्र गोभिलः। गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशेषु क्षत्त्रियं गर्भद्वादशेषु वैश्यम्। आषोडशात् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्त्रियस्य आचतुर्व्विंशात् वैश्यस्य। अत ऊर्द्ध्वं पतितसावित्रीका भवन्ति। नैतानुपनयेयुर्नाध्यापयेयुर्न एभिर्व्विवाहयेयुः॥ आषोडशादित्यभिविधावाङ्। तथा च विष्णुधर्म्मोत्तरम्।
"षोडशाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते॥"
अत्र षोडशवर्षाणामुपनयनाङ्गता प्रतीयते।
"पतिता यस्य सावित्री दश वर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः॥"
इति यमवचनेन तदनङ्गता प्रतीयते अनयोर्गर्भजन्मगणनाभ्यामविरुद्धता। तथा च मात्स्यः।
"व्रतबन्धविवाहे च वत्सरम्परिगणनमाहुराचार्य्याः।
आधानपूर्व्वकमेके प्रसूतिपूर्व्वं सदान्ये तु॥"
यत्तु द्विजानामित्युपक्रम्य पैठीनसिवचनम्। द्वादशषोडशविंशतिश्चेदतीता अवरुद्धकाला भवन्ति। तद्द्वादशवर्षाद्युपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थं षोडशवर्षोपरि गुरुप्रायश्चित्तमिति। तथा च शङ्खलिखितौ। व्रात्यश्चान्द्रायणं चरेत् गोप्रदानञ्च कुर्य्यात्। चान्द्रायणाशक्तौ धेन्वष्टकं तन्मूल्यं वा सार्द्धद्वाविंशतिकार्षापणाः गोमूल्यं कार्षापण एकः मिलित्वा सार्द्धत्रयोविंशतिकार्षापणाः देयाः। पितृमातृरहितस्य निःस्वस्य देशोपप्लवादिना पतितसावित्रीकस्य वा विषये तु मनुविष्णू।
"येषां द्विजानां सावित्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्॥"
कृच्छ्रं प्राजापत्यम्। तदशक्तौ धेनुत्रयं तन्मूल्यं वा नव कार्षापणाः। अकृतप्रायश्चित्तं प्रत्याह नैतानित्यादि। तत्र बहुवचनं तत्कर्त्तृसंसर्गिणां प्रायश्चित्तप्रदर्शनार्थम्। तथा च स्मृत्यन्तरम्।
"व्रात्याचार्य्यस्य भुक्तान्नं कृच्छ्रपादेन शुध्यति।
यश्चोपनयते व्रात्यान् त्रिभिः कृच्छ्रैः स शुध्यति॥"
भुजबलभीमकृत्यचिन्तामण्योः।
"स्वातीशक्रधनाश्विमित्रकरभे पौष्णेऽथ चित्राहरि-
त्विन्दौ तोयपतौ भगेऽदितिसुते भाद्रद्वये सागरे।
केन्द्रस्थे भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्केज्यकाः॥"
अदितिसुत उत्तरफल्गुनी। सागरः पूर्व्वाषाढा। दीपिकायाम्।
"जीवार्केन्दुभृगुर्द्धौ हरिशयनवह्निर्भास्करे चोत्तरस्थे
स्वाध्याये वेदवर्णाधिप इह शुभदे चौरिमे नाडितौ च।
शुक्रार्केज्यर्क्षलग्ने रविमदनतिथिं प्रोज्झ्य षष्ठाष्टमेन्दु-
र्नो जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यात्॥"
रविमदनतिथिं सप्तमीं त्रयोदशीम्। षष्ठाष्टमेन्दुं लग्नापेक्षया। कृत्यचिन्तामणौ।
"माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्॥
एकादश्यां जातं उत्तरफल्गुनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ५॥ ततः प्राच्याम्।

ॐ शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्।
पद्मस्थमाह्वयेत् सूर्य्यमुखं श्वेतं चतुर्भुजम्॥
सदाक्षवरकरकादण्डहस्तं सिताम्बरम्।
शक्राधिदैवतं ध्यायेत् शचीप्रत्यधिदैवतम्॥

नवम्यां जातं पुष्यनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शुक्र इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ६॥ पश्चिमायाम्।

सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्।
कृष्णं कृष्णाम्बरं गृध्रगतं सौरिं चतुर्भुजम्॥
सशूलवरशूलधनुर्हस्तं समाह्वयेत्।
यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम्॥

कृष्णचतुर्द्दश्यां जातं रोहिणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ७॥ नैरृत्याम्।

राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाह्वयेत्॥
चतुर्बाहुं खड्गवरशूलचर्म्मकरं तथा।
कालाधिदैवं सूर्य्यास्यं सर्पप्रत्यधिदैवतम्॥

पौर्णमास्यां जातं भरणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन् राहो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ८॥ वायव्याम्।

कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम्।
धूम्रं गृध्रगतं शूद्रमाह्वयेत् विकृताननम्॥
सूर्य्यास्यं धूम्रवसनं वरदं गदिनं तथा।
चित्रगुप्ताधिदैवञ्च ब्रह्मप्रत्यधिदैवतम्॥

अमावास्यायां जातं अश्विनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन्तः केतव इहागच्छत इहागच्छत इह तिष्ठत इह तिष्ठत इति शुक्लतण्डुलैरावाह्य स्थापयेत्॥ ९॥ अधिदैवतप्रत्यधिदैवतपूजनञ्च अयुतहोमादौ। ततस्तत्तद्वर्णवस्त्रतत्तद्वर्णगन्धतत्तद्वर्णपुष्पं दद्यात्॥ धूपे विशेषः। रवये गुग्गुलुधूपम्। सोमाय सरलम्। मङ्गलाय देवदारुम्। बुधाय घृतमिश्रितदेवदारुम्। बृहस्पतये दशाङ्गम्। शुक्राय अगुरु। शनैश्चराय कालागुरु। राहवे गुड़त्वचम्। केतुभ्यो मधुमिश्रितगुड़त्वचम्। अभावे षोड़शाङ्गं वा॥ * ॥ गन्धे विशेषः। सूर्य्याय रक्तचन्दनम्। सोमाय श्वेतचन्दनम्। मङ्गलाय कुङ्कुमम्। बुधाय सरलम्। गुरवे रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलं मिश्रितसमभागत्वेन दद्यात्। शनैश्चराय कस्तूरीम्। राहवे पद्मकाष्ठम्। केतुभ्यश्च पद्मकाष्ठम्। अधिदेवताप्रत्यधिदेवताः पूजयेत्॥ * ॥ अधिदेवता प्रत्यधिदेवता यथा। सूर्य्यस्य शिववह्नी। सोमस्य उमा जलम्। मङ्गलस्य स्कन्दः क्षितिः। बुधस्य नारायणविष्णू। बृहस्पतेः ब्रह्मा इन्द्रश्च। शुक्रस्य शक्रः शची। शनैश्चरस्य यमः प्रजापतिश्च। राहोः कालः सर्पश्च। केतूनां चित्रगुप्तः ब्रह्मा च। एतत्तु अयुतादिहोमे ज्ञेयम्॥ * ॥ सूर्य्याय गुड़ौदनबलिः। एवं सोमादीनामपि। सति सामर्थ्ये षोड़शोपचारादिना। बलौ तु। सूर्य्याय गुड़ौदनम्। सोमाय घृतपायसम्। मङ्गलाय पक्वयवचूर्णात्मकयावकम्। बुधाय क्षीरान्नम्। गुरवे दध्योदनम्। शुक्राय घृतौदनम्। शनैश्चराय कृशरम्। राहवे छागमांसम्। केतुभ्यः अजाक्षीरसाधिताजकर्णरक्तमिश्रित-यव-तिल-तण्डुलरूपं चित्रौदनम् तत्तद्द्रव्यालाभे भक्ष्यान्तरं दद्यात्॥ * ॥ ततश्चरुं श्रपयेत्। तत्र सामगानां क्रमः। अग्नेः पश्चिमायां दिशि प्रागग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालितवारणमुदूखलं वैणवञ्च सूर्पं वारणचमसस्थजलप्रोक्षितं संस्थाप्य व्रीहीन् यवान् वा अशक्तौ क्षालिततण्डुलान् सूर्पे निधाय ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामि इति गृहीत्वा उदूखले स्थापयेत्। एवं सोमाय। एवं मङ्गलादीनामपि निर्व्वपणं कृत्वा उदूखले स्थापयेत्। त्रिस्तूष्णीम्। ततो दक्षिणहस्तमुपरि कृत्वा मुषलेनावहत्य सूर्पेण प्रस्फोटयेत्। इत्थमेव वारत्रयम्। ततश्चरुस्थाल्याममन्त्रकं कृतोत्तराग्रं पवित्रं निःक्षिप्य तत्र प्रक्षालिततण्डुलान् निधाय तदुपरि दुग्धं दत्त्वा यथा पायसचरुर्भवति तथा स्तोकं स्तोकमुदकं दत्त्वा तन्मध्ये खदिरपलाशोडुम्बराणामन्यतमस्य प्रादेशप्रमाणं उभयथा साङ्गुष्ठप्रमाणं चतुष्कोणमुष्कलं मेक्षणं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथा अन्तरोष्मणा सम्यक् पाको भवति मण्डलाकारं दाहश्च न भवति। सम्यक्पाके भूते चरुमध्ये घृतस्रुवं दत्त्वा प्रागादिदिक्चिह्नितं कृत्वा चरुमपसार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतस्रुवं दद्यात्। ततो भूमिजपादिस्रुवसंस्कारपर्य्यन्तं कर्म कृत्वा अग्नेः पश्चिमतः आस्तृतकुशोपरि पूर्व्वमाज्यं पश्चाच्चरुं निधाय उदकाञ्जलिसेकं कृत्वा विरूपाक्षजपान्तां कुशण्डिकां समापयेत्॥ * ॥ यजुर्वेदिनान्तु आज्यस्थाल्यामाज्यनिर्वपणानन्तरं सूर्पं पुरतो दक्षिणभागे संस्थाप्य तथोदूखलं विन्यस्य व्रीह्याद्यन्यतमं तत्र निधाय ॐ सूर्य्याय त्वा जुष्टं गृह्णामि इत्येकां मुष्टिं गृहीत्वा ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति उदूखले स्थापयित्वा ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रोक्षणीजलेन प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। तत ॐ अवधं विदिहतं त्वा इत्यादिना मन्त्रेण निर्व्वपणप्रोक्षणानि कृत्वा त्रिस्तूष्णीं कुर्य्यात्। ततः पूर्व्ववत् पचनम्। सर्वं ज्ञात्वा अवदानं गृहीत्वा

चरुमध्ये दक्षिणावर्त्तेन भ्रामयित्वा समर्पिं तत्रैवाग्नौ श्रिपेत्। तत आघाराज्यभागान्तं कर्म्म कुर्य्यात्॥ ॥ कर्म्मेदिनान्तु प्रोक्षणी-पात्रस्थापनानन्तरं पवित्रान्तर्हिते ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति ब्रीह्याद्यन्यतममुष्टिं प्रक्षिप्य ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रणीताजलेन प्रोक्षयेत्। इत्यादि। ततः खिष्टिकृदर्थकिञ्चिदधिकं तूष्णीं तथा कृत्वा पवित्रान्तर्हितं कृत्वा पूर्व्वपश्चिमोर्द्ध-लोमकृष्णाजिने उदूखलं निधाय तत्र सूर्य्यस्य ब्रीह्याद्यन्यतमं प्रक्षिप्य मुषलेनावहत्य सूर्पेण वितुषीकृत्य प्रस्फोट्य त्रिः प्रक्षाल्य पवित्रं चरुस्थाल्यां प्रक्षिप्य तथैव श्रापयित्वा उदीच्यां दक्षिणभागे ॐ सोमाय स्वाहेति होमपर्य्यन्तं कुर्य्यात्। ततः शान्तिकर्म्मणि अग्ने त्वं वरद-नामासीति नाम कृत्वा।

ॐ पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः।
छागस्थः साक्षसूत्रोऽग्निः सप्तार्च्चिः शक्तिधा-
रकः॥

इत्यादिपुराणीयं ध्यात्वा ॐ वरदनामाग्ने इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इत्यावाह्य पाद्यादिना पूजयेत्॥ ॥ पौष्टिक-कर्म्मणि तु बलदनामाग्निः। ग्रहहोमे अमी-नाह गोभिलः।

आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते।
धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृतः॥
बृहस्पतौ शिखी नाम शुक्रे भवति हाटकः।
शनैश्चरे महातेजा राहौ चैव हुताशनः।
केतुष्व लोहितोऽग्निः स्यादिति वह्निविनिर्णयः॥

ततः स्वगृह्योक्तविधानेन चरुणा सूर्य्यादि-ग्रहेभ्यः प्रत्येकाहुतिं दद्यात्॥ ॥ अथ मन्त्राः। सूर्य्यस्य आकृष्णेनेतिमन्त्रस्य हिरण्यस्तूपाङ्गिरा ऋषिस्त्रिष्टुप् छन्दः सविता देवता आदित्यस्य पूजाहोमकर्म्मणि विनियोगः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च हिर-ण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। इदं सूर्य्याय इति देवतोद्देश-मन्तरे: कार्य्यः॥ १॥ सोमस्य इमन्देवेति-मन्त्रस्य वरुण ऋषिर्विराड् देवता सोमस्य पूजा-होमकर्म्मणि विनियोगः। ॐ इमन्देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा स्वाहा। इदं सोमाय॥ २॥ मङ्गलस्य अग्निर्मूर्द्धेति-मन्त्रस्य विरूप आङ्गिरस ऋषिर्गायत्री छन्दोऽग्नि-र्देवता मङ्गलस्य पूजाहोमकर्म्मणि विनि-योगः। ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति स्वाहा। इदं मङ्गलाय॥ ३॥ बुधस्य उद्बुध्यस्वेतिमन्त्रस्य पर-मेष्ठी ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता बुधस्य पूजा-होमकर्म्मणि विनियोगः। ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्त्ते संसृजेथामयञ्च। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय॥ ४॥ बृहस्पतेः बृह-स्पते अतीतिमन्त्रस्य गृत्समद ऋषिस्त्रिष्टुप् छन्दो ब्रह्मा देवता जीवस्य पूजाहोमकर्म्मणि विनि-योगः। ॐ बृहस्पते अतियदर्य्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तद-स्मासु द्रविणं धेहि चित्रं स्वाहा। इदं बृह-स्पतये॥ ५॥ शुक्रस्य अन्नात् परिस्रुत इति मन्त्रस्य प्रजापतिर्ऋषिरतिजगती छन्दोऽश्विसरस्वतीन्द्रा देवताः शुक्रस्य पूजाहोमकर्म्मणि विनियोगः। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय॥ ६॥ शनैश्चरस्य शन्नो देवीतिमन्त्रस्य दध्यङ्ङाथर्व्वण ऋषिर्गायत्री छन्द आपो देवता शनैश्चरस्य पूजाहोम-कर्म्मणि विनियोगः। ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं शनैश्चराय॥ ७॥ राहोः काण्डात् काण्डा-दिति मन्त्रस्य अग्निर्ऋषिर्गायत्री छन्दो दूर्व्वे-ष्टका देवता राहोः पूजाहोमकर्म्मणि विनि-योगः। ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि। एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राहवे॥ ८॥ केतूनां केतुं कृण्वन्नितिमन्त्रस्य मधुच्छन्द ऋषिर्निचृद्गायत्री छन्दोऽग्निर्देवता केतूनां पूजाहोमकर्म्मणि विनियोगः। ॐ केतुं कृण्वन् केतवे पेशो मर्य्या अपेशसे। समुषद्भिरजायथा स्वाहा। इदं केतुभ्यः॥ ९॥ ततो मधुघृताक्तां घृताक्तां क्षीराक्तां वा प्रादेशप्रमाणां सायामर्कसमिध-मादाय ॐ आकृष्णेन इत्यादिमन्त्रेण सूर्य्याया-ष्टोत्तरशतं अष्टाविंशतिमष्टौ वा अशक्ता। अष्टस्यातिपीड़ाकरत्वात्तदा अष्टोत्तर-सहस्रं जुहुयात्॥ ॥ समिधमाह याज्ञ-वल्क्यः।

अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः।
उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात्॥
होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते।
अतिपीड़ाकरो यस्तु तत्र यत्नेन पूजयेत्॥

ततो होमानन्तरं उदीच्यं कर्म्म कुर्य्यात्। ततो गुड़ौदनादीन् ऋत्विजे भोजयेत्। तत्तद्द्रव्या-लाभे भोज्यान्तराणि वा दद्यात्। भोजना-सामर्थ्ये तत्तद्द्रव्याणि पात्रेणा प्रतिपादयेत्। ततो मत्स्यपुराणोक्तैर्मन्त्रैर्दक्षिणां दद्यात्। धेनुः शङ्खस्तथानड्वान् हेम वासो हयस्तथा। कृष्णा गौरायसं छाग एता वै दक्षिणाः क्रमात्॥

तत्र।

कपिले सर्व्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे॥

इति पठित्वा ॐ अद्येत्यादि कृतैतद्ग्रहयज्ञ-कर्म्मणः प्रतिष्ठार्थं दक्षिणां कपिलां धेनुं सम्प्रददे आदित्याय नमः। एवम् इति ब्राह्मणाय ऋत्विजे तुभ्यमहं सम्प्रददे इति ब्रूयात्। कपिलाभावे वा। तदभावे काञ्चनम्। तद्भावे रजतं वा दद्यात्। काञ्चनादित्रय अभावेऽपि दद्यात्॥ १॥ एवम्। पुण्यस्त्वं शङ्खपुण्यानां मङ्गलानां च मङ्गलम्। विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे॥ इत्युच्चार्य्य पूर्व्वोक्तक्रमेण सोमाय शङ्खं दद्यात्॥ २॥

ॐ धर्म्मस्त्वं वृषरूपेण जगदानन्दकारक।
अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य मङ्गलाय वृषं दद्यात्॥ ३॥

ॐ हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य बुधाय काञ्चनं दद्यात्॥ ४॥

ॐ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम्।
प्रदानात्तस्य मे विष्णोरतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य गुरवे पीतवस्त्रयुगं दद्यात्। तदभावेऽन्यवर्णवासोयुगमपि दद्यात्॥ ५॥

ॐ विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः।
चन्द्रार्कवाहनो नित्यं अतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य शुक्राय अश्वं दद्यात्॥ ६॥

ॐ यस्मात्त्वं पृथिवी सर्व्वा धेनुः केशवसन्निभा।
सर्व्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य शनैश्चराय कृष्णां धेनुं दद्यात्॥ ७॥

ॐ यस्मादायसकर्म्माणि त्वदधीनानि सर्व्वदा।
लाङ्गलाद्यायुधादीनि अतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य राहवे लौहं दद्यात्॥ ८॥

ॐ यस्मात्त्वं सर्व्वभूतानां मङ्गलाय यव-
स्थितः।
यागं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य केतवे छागं दद्यात्॥ ९॥ इति शान्तिकुम्भजलेन संसिच्य शान्तिं कु-र्य्यात्। ततः कृताञ्जलिः।

ॐ गच्छध्वममराः सर्व्वे गृहीत्वार्घ्यं स्वमा-
लयम्।
सन्तुष्टा वरमस्माकं दत्त्वेदानीं सुपूजिताः॥

इति विष्णुधर्म्मोत्तरीयं पठित्वा यथाशक्ति विसर्ज्जयेत्। दक्षिणा च प्रदातव्या यथायाम्ययं त्रिवर्णमिति वशिष्ठवचनात्।" इति रघुनन्दनभट्टाचार्य्यविरचितग्रहयागप्रयोगः समाप्तः।

याच, टु ड कृ ञ याचने। इति कविकल्पद्रुमः। (भ्वा०-उभ०-द्विक०-सेट्।) याचनमत्रार्थं प्रेरणम्। टु, याचथुः। ड, याचिष्णुः। कृ, अययाचत्। ञ, याचति याचते। विप्रः। अत्र याचार्थे प्रेरणेऽपि याचति शिष्यं गुरवे शिष्यः। इति दुर्गादासः॥

याचकः, त्रि, (याचत इति। याच्+ण्वुल्।) याच्ञाकर्त्ता। तत्पर्य्यायः। वनीयकः १ याचनकः २ मार्गणः ३ अर्थी ४। इत्यमरः।

।१।१६। वनीपकः ६ भिक्षुकः ७ भिक्षा-हरः ८। इति शब्दरत्नावली। तस्य लघुत्वं यथा,—
"तृणादपि लघुस्तूलस्तूलादपि च याचकः।
वायुना किं न नीतोऽसौ किंचित्प्रार्थनशङ्कया॥"
इति प्राचीनाः॥
अपि च।
"कुलस्य कीटपातस्य वातादिप्रक्षालितस्य च।
शिखरे वसतस्तस्य वरं जन्म न याचितम्॥
अगस्त्यनिर्दिं याचित्वा विष्णुर्वामनतां गतः।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघ-वम्॥"
इति गारुडे नीतिसारे ११५ अध्यायः॥

याचन, [त्] त्रि, (याचतीति। याच्+शतृ।) याचकः। यथा,—
"मुखभङ्गः स्वरो दीनो गात्रस्वेदो महद्भयम्।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः॥"
इति गारुडे नीतिसारे ११५ अध्यायः॥

याचनं, क्ली, (याच्+भावे ल्युट्।) याच्ञा। (यथा, नैषधे।५।११२।
"भीमजार्थयाचनवाचि
यूयमेव गुरवः करणीयाः॥")

याचनकः, त्रि, (याचन+स्वार्थे कन्।) याचकः। इत्यमरः।३।१।४८॥ (यथा, मनौ।३।१६५।
"आचारहीनः क्लीबश्च नित्यं याचनकस्तथा॥")

याचना, स्त्री, (याच्+स्वार्थे णिच्+युच्। टाप्।) याच्ञा। इत्यमरः।२।७।३२॥ (यथा, रामायणे।२।२७।२३।
"नयस्व मां साधु कुरुष्व याचनाम्॥")

याचमानः, त्रि, (याचते इति। याच्+शानच्।) याचकः। यथा,—
"नवीनदीनभावस्य याचमानस्य मानिनः।
पचोजीवितयोरासीत् पुरोनिःसरणे रणः॥"
इति वररुचिः॥
अपि च।
"द्विजेभ्यो याचमानेभ्यो यजमानः प्रयच्छति।
स याति चाक्षयान् लोकान् येभ्यो नावर्त्तते पुनः॥
षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि।
योऽनुमन्तापि भवति निरये प्रतिषेधकः॥"
इति वह्निपुराणे वामनप्रादुर्भावो नामाध्यायः॥

याचितं, क्ली, (याच्+क्तः।) याचनवृत्तिः। तत्पर्य्यायः। मृतम् २। यथा,—
"द्वे याचितायाचितयोर्यथासंख्यं मृतामृते॥"
इत्यमरः।२।७।३२॥
"द्वे। याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतम्। अयाचितं अमृतमिव अमृतम्। याचितायाचितयोर्भावे कर्म्मणि वा क्तः।" इति भरतः॥ प्रार्थितवस्तुनि, त्रि॥ (यथा, देवीभागवते।३।२८।६७।
"पिता ते याचितः पूर्व्वं मया वै त्वत्कृते-ऽनघे!॥")

याचितकं, क्ली, (याचितेन निर्वृत्तम्। याचित+"अपमित्ययाचिताभ्यां कक्कनौ।"४।४।२१। इति कन्।) याच्ञाप्राप्तम्। इत्यमरः।२।९।४॥ "याच्ञया। प्रत्यर्पणीयत्वेन याच्ञया यत् प्राप्तमलङ्कारादिवस्तु तत् याचितकम्। कार्य्या-नन्तरं वस्तुस्वामी यत् पुनर्गृह्णाति तदित्यर्थः। याचितेन प्राप्तमिति ठघे काविति कः।" इति भरतः॥

याच्ञा, स्त्री, (याचनमिति। याच्+"यजयाच-यतविच्छप्रच्छरक्षो नङ्।" ३।३।९०। इति नङ्।) याचनम्। तत्पर्य्यायः। अभिशस्तिः २ याचना ३ अर्थना ४ भिक्षा ५ अर्दना ६। इत्यमरः।२।७।३२॥ लालसा ७। इति जटाधरः॥ (यथा, भागवते।२।७।१७।
"ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः॥")
तद्वैदिकपर्य्यायः। ईमहे १ यामि २ मन्महे ३ दद्धि ४ शग्धि ५ पूर्द्धि ६ मिमिड्ढि ७ मिमीढि ८ रिरिड्ढि ९ रिरीहि १० पीपरत् ११ यन्तारः १२ यन्धि १३ इयुध्यति १४ मदेमहि १५ मनामहे १६ मायते १७। इति सप्तदश याच्ञाकर्म्माणः। इति वेदनिघण्टौ ३ अः॥

याजः, पुं, अन्नम्। इति हेमचन्द्रः।३।५८॥ (ऋषिभेदः। यथा, महाभारते।१।१६८।७।
"याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ॥")

याजकः, पुं, (यजतीति। यज्+ण्वुल्।) याज्ञिकः। राज्ञो गजः। इति मेदिनी। के, १४२॥ मत्तहस्ती। इति जटाधरः॥ ऋत्विक्। यथा,
"अग्नीध्राद्या धनैर्व्वार्य्या ऋत्विजो याज-काश्च ते॥"
इत्यमरः।२।७।१७॥
"यजमानेन धनैर्व्वार्य्याः धनानि दत्त्वा इदमस्मा-दनाय व्रियन्ते प्रार्थ्यन्ते ये अग्नीध्रप्रभृतयस्ते ऋत्विजो याचकाश्च कथ्यन्ते। अग्निं इन्धयन्ति दीपयन्ति अग्नीध्राः इन्धी ञि ध ङ दीप्तौ ञिः नाम्नीति रः मनीषादित्वान्नलोपः। आदिना ब्रह्मोद्गातृहोत्रध्वर्य्युब्राह्मणाच्छंसिप्रभृतयः षो-डश गृह्यन्ते। वार्य्या इति वृञ्याशोरिति घ्यण् इत्यनुषेत्यादौ ट म इति सानुबन्धनिर्द्देशात् अन्यवृधातोर्न क्यप्। ऋतौ यजन्ति ऋत्विजः क्विप्। यजन्ति याचकाः यकः।" इति भरतः॥ * ॥ वहुयाजकग्रामयाजकयोर्निन्दा यथा,—
"अग्राह्यास्तु षट् प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः।
आदौ राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो वहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्याश्च यः पूर्व्वां सादित्याञ्चैव पश्चि-माम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"
इत्याह्निकतत्त्वे सन्ध्योपासनम्॥
अपि च।
"शूद्रधर्मोदिक्रयाजी ग्रामयाजीति कीर्त्तितः।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः।
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

याजनं, क्ली, (याज्यते इति। यज्+णिच्+ल्युट्।) यागक्रियाकारणम्। याग कराण इति भाषा। तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः। यथा,—
"अध्यापनमध्ययनं यजनं याजनन्तथा।
दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत्॥"
इति मानवे १ अध्यायः॥

याजिः, पुं, (यज्+"वसिवपियजिराजीति।" उणा० ४।१२४। इति इञ्।) यज्ञः। इति संक्षिप्तसारोणादिवृत्तिः॥ यागकर्त्ता। इत्युणादिकोषः॥

याजुषं, त्रि, (यजुष इदमिति। यजुष्+अण्।) यजुर्वेदसम्बन्धि। इति सिद्धान्तकौमुदी॥

याज्ञवल्क्यः, पुं, (वल्कयतीति। वल्क+अच्। यज्ञस्य वल्को वक्ता। तस्य गोत्रापत्यम्। यज्ञवल्क+"गर्गादिभ्यो यञ्।"४।१।१०५। इति यञ्।) धर्म्मशास्त्रप्रयोजकमुनिविशेषः। तत्पर्य्यायः। ब्रह्मरातिः २ योगीशः ३। इति हेमचन्द्रः॥ योगीश्वरः ४। इति मिताक्षरा॥ (महर्षिरयं याज्ञवल्क्यः सूर्य्यात् शुक्लयजुर्व्वेदं प्राप्तवान्। तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तेषु कृपापरः चतुर्धा व्यस्य ऋग्यजुःसामाथर्व्वाख्यां-श्चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश ते च स्वशिष्येभ्यः। तत्र वैश-म्पायनो याज्ञवल्क्यादिभ्यः स्वशि-ष्येभ्यो यजुर्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो गुरुः शिष्यं याज्ञवल्क्यं अधीतवेद-परित्यागार्थमादिष्टवान्। याज्ञवल्क्योऽपि योग-बलेन अधीतयजुर्विद्यां मूर्त्तिमतीं विधायोद्-वाम। वान्तानि यजूंषि गृह्णीतेति गुरूक्ता अन्ये शिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तान्येव यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो वेदहीनोऽतिदुःखितो याज्ञ-वल्क्यः सूर्य्यमाराध्य शुक्लानि यजूंषि प्राप्तवान् तानि च जावालगौधेयकाण्वमाध्यन्दिनादीन् पञ्चदशशिष्यानध्यापयामास। तथाहि भागवते द्वादशस्कन्धे ६ अध्याये।
"तेनार्षीं चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्रविवक्षया॥
पुत्रानध्यापयत् तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान्।
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्॥
ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः।

[illegible]

इति शब्दरत्नावली । (यथा, भागवते । ११ । १० । २३ ।
"इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ।")
रक्तखदिरः । पलाशः । अश्वत्थः । इति राजनिर्घण्टः ॥

याज्ञिक्यं, क्ली, (याज्ञिकानां धर्म्म आम्नायो वा । याज्ञिक+"छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ।" ४ । ३ । १२९ । इति ञ्यः ।) यज्ञः । इति सिद्धान्तकौमुदी ॥

याज्यं, क्ली, (इज्यत इति । यज्+ण्यत् । "यजयाचरुचप्रवचर्चश्च ।" ७ । ३ । ६६ । इति कुत्वनिषेधः ।) यागजद्रव्यादि । इति सिद्धान्तकौमुदी । यजनीये, त्रि । (यथा, मनौ । ८ । ३१७ ।
"भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥"
शिष्यः । प्रायश्चार्हः । यथा, देवीभागवते । १ । १८ । ८ ।
"याज्योऽस्ति जनकस्तत्र जीवन्मुक्तो नराधिपः ।
विदेहो लोकविदितः पाति राज्यमकण्टकम् ॥")

याज्या, स्त्री, (यजत्यनया । यज्+ण्यत्+टाप् ।) ऋक् । इति मुग्धबोधव्याकरणम् ॥ (यज्ञा । यथा, काशीखण्डे सहस्रनामकीर्त्तने । ४९ । १४२ ।
"योगनिद्रेश्वरा याज्या यज्ञेशपरिपूजिता ॥")
याग, च, व्याख्यानव्रतविशेषः । स च विधिलिङ्गोत्थः परस्मैपदप्रथमपुरुषैकवचनम् । स तु विध्याद्यर्थे आशीर्म्मङ्गलार्थकश्च । इति व्याकरणम् । मुग्धबोधमते विध्याद्यर्थे अस्य ज्ञौसंज्ञा । आशीरर्थे टौसंज्ञा ॥

यातं, क्ली, (या+क्तः ।) निषादिनां पादकर्म्म । इति हेमचन्द्रः । ४ । १९७ । पुस्तकान्तरे यन्त्रमिति पाठः । यथा,—
"अपरमन्तुमन्मार्गं यानमकुशवारणम् ।
निषादिनां पादकर्म्म वा(य)नं यीनञ्च यहयम् ।"
यात, त्रि, गतः । याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, मनुः । ४ । १०८ ।
"अवनीं विनाशे याता येन यानाः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥")

यातना, स्त्री, (यत्+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । टाप् ।) तीव्रवेदना । तत्पर्य्यायः । कारणा २ तीव्रवेदना ३ । इत्यमरः । ३ । ८ । ३ । कर्मयातना ४ । इति शब्दरत्नावली । (यथा, भागवते । ७ । १ । ४१ ।
"वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥")
प्रतिकरणम् । इति हैमचन्द्रिका नरकः ॥

यातयामं, त्रि, (यातो गतो यामः प्रहरो यस्य तत् ।) जीर्णम् । (यथा, मार्कण्डेये । ६ । ३६ ।
"न भोजनमन्नमत्र यातयामं तथा तत्र ।
यातयामं न भुञ्जीत यातयामं न कारयेत् ॥")
परिभुक्तम् । इत्यमरः । ३ । ३ । १४५ । उच्छिष्टम् । इति मेदिनी । मे, ४२ । (प्राचीनवस्तुम् । यथा, गीतायाम् । १७ । १० ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"
गतरसः । यथा, शतपथब्राह्मणे । ४ । ३ ।
"ब्रह्मवादिनो वदन्ति यातयामा अयातयामा इति ते मायातयामेति वत"
"यातयामः गतरसः ।" इति सायणः ।)

याता, [ऋ] स्त्री, (यततेऽन्योन्यभिन्नायेति । "न्प्तृ ।" उणा० २ । ९८ । इति ऋ) पतिभ्रातृपत्नी । इत्यमरः । २ । ६ । ३० । इति भाषा । (यथा साहित्यदर्पणे । ३ । "स्वामी निःश्वसितेऽप्यसूयति मनो जिघ्रः सपत्नी ... र भ्रूरिङ्गितदैवतं नयनयोरीहालिहो यातरः" या+तृच् । गमनकर्त्तरि, त्रि । (यथा, ऋक्संहितायाम् । ११ । १३ । [वृ ।
"उस्रा शुभदा पुरतो दिवाकरविनिःसृत" सारथ्यादिः । यथा, मनौ । ८ । २९० ।
"यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥"
"यातुः सारथ्यादेः ।" इति कुल्लूकः । ऋ यथा, ऋग्वेदे । १ । ३२ । १४ ।
"अहेर्यातारं कमपश्य इन्द्र ।"
"यातारं हन्तारम् ।" इति तद्भाष्ये सायणः ।)

यातायातं, क्ली, गमनागमनम् । यथा,—
"पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनाम्भसां यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥"
इति श्रीभागवते १२ स्कन्धे १३ अध्यायः ॥

यातिकः, पुं, (यातं गमनं प्रायश्चित्तमस्य । यात+ठन् ।) पान्थः । इति शब्दरत्नावली ॥

यातु, क्ली, (कर्म्मयात्मनां यान्तीति । या+"कमिमनिजनि ।" उणा० १ । ७३ । इति तुः) राक्षसः । इत्यमरः । १ । १ । ६१ । ("यातु यातुधानो राक्षसः प्रेतः कथ्यते इत्यमरटीकायां रघुनाथचक्रवर्त्ती । पुंलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ७ ।
"न यातव इन्द्र जूजुवुर्नः ।"
"यातवो राक्षसाः ।" इति तद्भाष्ये सायणः ।)

यातुः, पुं, (कालं याति गच्छतीति, या+"कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) काल । अध्वगः । इति सिद्धान्तकौमुदीस्थोणादिवृत्तिः ॥ वायुः । इति सारस्वतोणादिवृत्तिः ॥ (क्ली, राक्षसः । यथा, ऋग्वेदे । ७ । १०४ । १६ ।
"मा नो रक्ष आवेशीदाघृणीवसो मा यातुः ।"

"यातुर्यातना पीड़ा।" इति सायणः॥ कर्म्मनाशकरी हिंसा। यथा, तत्रैव।५।१२।२।
"नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः।"
"यातुं कर्म्मणां नाशकरीं हिंसाम्।" इति तद्भाष्ये सायणः॥)

यातु, त्रि, यातीति। या+"कमिमनीति।" उणा० १।७३। इति तुः।) गन्ता। इत्युणादिकोषः॥ क्रियापदं चेत् गच्छतु॥

यातुघ्नः, पुं, (यातु हन्तीति। हन्+"अमनुष्यकर्त्तृके च।"३।२।५३। इति टक्।) गुग्गुलुः। इति राजनिर्घण्टः॥

यातुधानः, पुं, (यातूनि रक्षांसि दधाति पुष्णातीति। धा+बहुलमन्यत्रापीति युच्। स्वजातिपोषकत्वात्तथात्वम्।) राक्षसः। इत्यमरः।१।१।६३॥ (यथा, भट्टिकाव्ये। २। ४८।
"हविःष्वपिष्टे क्रममालिंकीने-
ष्वद्रयातुधानैर्विचिते प्रशमेत॥")

यात्रकः, पुं, (यातीति। यात्र+स्वार्थे कन्।) पान्थः। इति शब्दरत्नावली॥

यात्यं, त्रि, यतितव्यम्। यतनीयम्। यतधातोः कर्म्मणि ध्यण्प्रत्ययेन निष्पन्नम्॥

यात्रा, स्त्री, (या+"हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४।१६७। इति त्रन्। टाप्।) विजिगीषोः प्रयाणम्। तत्पर्य्यायः। व्रज्या १ अभिनिर्य्याणम् ३ प्रस्थानम् ४ गमनम् ५ गमः ६। इत्यमरः।२।८।९५॥ प्रस्थितिः ७ यानम् ८ प्रागमनम् ९। इति शब्दरत्नावली॥ यापनम्। (यथा, भागवते। १०।८६।१५।
"यात्रामात्रं त्वहरहर्दैवादुपनमत्युत।")
उत्सवः। इति मेदिनी। रे, ७८॥ (यथा, कथासरित्सागरे। १०।८७।
"यात्रागुपवने द्रष्टुं जगाम सखिभिः सह।"
व्यवहारः। यथा, गीतायाम्। ३।८।
"शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः।"
"शरीरयात्रा देहव्यवहारः।" इति तत्र नीलकण्ठः॥) उपायः। इति विश्वः॥०॥ अथ यात्रादिकम्। भाद्रपौषचैत्रमासेषु दूरयात्रा कर्त्तव्या। पूर्व्वस्यां दिशि रविशुक्रवारयोः प्राशस्त्यम्। दक्षिणस्यां मङ्गलवारस्य प्राशस्त्यम्। पश्चिमायां सोमशनिवारयोः प्राशस्त्यम्। उत्तरस्यां बृहस्पतिवारस्य प्राशस्त्यम्। पूर्व्वस्यां दिशि सोमशनिवारे न गन्तव्यम्। दक्षिणस्यां बृहस्पतिवारे [illegible] बुधवारे च न गन्तव्यम्। पश्चिमायां रविशुक्रवारे। एवं उत्तरस्यां बुधमङ्गलवारे न गन्तव्यम्। द्वितीया तृतीया पञ्चमी सप्तमी दशमी एकादशी त्रयोदशी च एताः यात्रायां प्रशस्ताः। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

विशाखा मघा आर्द्रा भरणी कृत्तिका अश्लेषा। तत्र गमनवर्जनकथनम्। स्वात्यां ज्येष्ठायाञ्च पूर्व्वदिग्गमनं निषिद्धम्। एवं पूर्व्वभाद्रपदे अश्विन्याञ्च दक्षिणदिग्गमनं पुष्ये रोहिण्याञ्च पश्चिमदिग्गमनं उत्तरफल्गुन्यां हस्तायाञ्च उत्तरदिग्गमनं निषिद्धम्। तत्रानुक्तकरणानि। गरं वणिजं विष्टिः। गरमपि केचिच्छुभं मन्यते। अथ उत्तमलग्नानि। सिंहवृषकुम्भकन्यामिथुनानि। तत्र योगिनीनिर्णयः। प्रतिपदि नवम्याञ्च प्राच्यां योगिनी। तृतीयायां एकादश्याञ्चाग्निकोणे। पञ्चम्यां त्रयोदश्याञ्च दक्षिणे। द्वादश्यां चतुर्थ्याञ्च नैर्ऋतकोणे। षष्ठ्यां चतुर्द्दश्याञ्च पश्चिमे। सप्तम्यां पूर्णिमायाञ्च वायुकोणे। द्वितीयायां दशम्याञ्च उत्तरदिशि। अष्टम्याममावास्यायाञ्च ईशानकोणे। सा दक्षिणे सम्मुखे च कृत्वा न गन्तव्यम्। पापयोगवारदग्धमासदग्धादिषु यात्रा न कर्त्तव्या। वारवेलाकालवेलाकुलिकवेलाभद्रादिषु च यात्रा न कर्त्तव्या। द्विरागमनदिनं नववधूप्रवेशस्य॥०॥ अथ गोयात्राप्रवेशविक्रयाः। तत्र निषेधः। अमावस्याष्टमीचतुर्द्दशीविहितभिन्नाः। तत्र नक्षत्राणि। रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढ़ा पूर्व्वभाद्रपत् उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् श्रवणा भरणी चित्रा एतद्भिन्नानि। योगाः। व्यतीपातभिन्नाः। वाराः। क्रूरभिन्नाः॥०॥ अथ नौकायात्रा। तत्र विहितनक्षत्राणि। अश्विनीहस्तापुष्यमृगशिरःपूर्व्वफल्गुनी-पूर्व्वाषाढ़ा-पूर्व्वभाद्रपदनुराधाधनिष्ठा-श्रवणाः। वाराः शुभग्रहाणाम्। तत्र लग्नं शोभनम्। तत्र शोभनलग्नः। तारा च शोभना विहिता। इति ज्योतिस्तत्त्वम्॥०॥

अथ यात्रायां शुभजनकद्रव्यदर्शनादि यथा,—
"धेनुर्व्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्त्तवह्नि-र्दिव्यस्त्रीपूर्णकुम्भा द्विजनृपगणिकाः पुष्पमाला पताका।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो गन्तुकामः।"
इति समयप्रदीपः॥

तत्राशुभजनकदर्शनं यथा,—
"सम्मुखे रक्तवर्णं पश्चात् सुरभिं यदि गच्छति।
न गमनं तदा गच्छात् [illegible]॥
[illegible]
[illegible] यात्रा न कर्त्तव्या [illegible]॥"
इति ज्योतिस्सारः॥

यात्राकाले [illegible] यथा,—
"[illegible]
[illegible]
[illegible]

वैश्यस्त्रीपूर्णकुम्भानां यात्रायां दर्शनं शुभम्॥"
यात्राकाले अशुभलक्षणं यथा,—
"कार्पासौषधतैलञ्च पङ्काङ्गारभुजङ्गमाः।
मुक्तकेशी रक्तमाल्यं नग्नाद्यशुभलक्षणम्॥"*॥
यात्राकाले छिक्कायाः फलं यथा,—
"छिक्कायां लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम्।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात्॥
नैर्ऋते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत्।
ऐशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम्॥"
अथ यात्रायां दिग्विशेषे विशेषनक्षत्राणि।
"कृत्तिकादौ तु पूर्व्वेण सप्त ऋक्षाणि वै व्रजेत्।
मघादौ दक्षिणे गच्छेदनुराधादि पश्चिमे॥
प्रशस्ता चोत्तरे यात्रा धनिष्ठादिषु सप्तसु।
अश्विनीरेवतीचित्राधनिष्ठाः सर्व्वतः शुभाः।
हस्ताश्विमित्रपुष्याश्च सर्व्वदिक्षु शुभाः सदा॥"
यात्रादौ लग्नादिषु ग्रहस्थितिफलं यथा,—
"कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्म्मसु।
शुक्रचन्द्रौ च लग्नस्थौ शुभदौ च द्वितीयगौ॥
शशिशुक्रजीवाश्च रवौ चाथ तृतीयके।
भौममन्दशशाङ्कार्का बुधः श्रेष्ठश्चतुर्थके॥
शुक्रजीवौ पञ्चमौ च श्रेष्ठौ षष्ठिदराहतौ।
मन्दार्केन्दुकुजाः षष्ठे गुरुचन्द्रौ च सप्तमे॥
शुक्रश्चाष्टमे श्रेष्ठौ नवमस्थो गुरुः शुभः।
अर्कार्किचन्द्रा दशमे एकादशे तथा ग्रहाः॥
बुधोऽपि द्वादशे चैव भार्गवः शुभदो भवेत्॥"
इति गारुडे ६०। ६१ अध्यायौ॥०॥

अथ-राजयात्रा।
"इदानीं सर्व्वधर्म्मज्ञ धर्म्मशास्त्रविशारद !।
यात्राकालविधानं मे कथयस्व महीक्षिताम्॥
यदा मन्येत नृपतिराक्रन्देन बलीयसा।
पार्ष्णिग्राहाभिभूतोऽरिस्तदा यात्रां प्रयोजयेत्॥
योधाश्चान्ता प्रभूताश्च प्रभूतञ्च बलं मम।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत्॥
अशुद्धपार्ष्णिर्नृपतिर्न तु यात्रां प्रयोजयेत्।
पार्ष्णिग्राहाधिकं सैन्यं मूले निःक्षिप्य वा व्रजेत्॥
चैत्रे वा मार्गशीर्षे वा यात्रां यायान्नराधिपः।
चैत्रीं पश्यति वैशाखं हन्ति पुष्टिञ्च शारदीम्॥
एतदेव विपर्य्यस्तं मार्गशीर्षे नराधिपः।
शत्रोर्व्वा व्यसने यायात् कालः स तु सुदुर्लभः॥
दिव्यान्तरीक्षक्षितिजैरुत्पातैः पीड़ितं परम्।
षड्क्षपीड़ाभिहतं पीड़ितञ्च तथा परैः॥
ज्वलन्तीव तथोल्काभिर्दिशं यत्र प्रपद्यते।
भूकम्पोल्का दिशं याति याञ्च केतुः प्रदृश्यते॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

सैनिकानाममुखानि स्फुरन्त्यङ्गानि यत्र च ।
दुःस्वप्नान्यपि पश्यन्ति तत्कालमभियोजयेत् ॥
उत्साहबलसम्पन्नश्चानुरक्तबलस्तथा ।
तुष्टपुष्टबलो राजा परानभिमुखो व्रजेत् ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान् यायान्नराधिपः ॥
एवञ्च दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नाञ्च यात्रां यायान्नराधिपः ॥
उलूकस्य निशि ध्वाङ्क्षः स च तस्य दिवा बली ।
एवं देशञ्च कालञ्च ज्ञात्वा यात्रां प्रयोजयेत् ॥
पदातिनागबहुलां सेनां प्रावृषि योजयेत् ।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः ।
चतुरङ्गबलोपेतां वसन्ते वा शरद्यथ ॥
सेना पदातिबहुला यस्य स्यात् पृथिवीपतेः ।
अभियोज्यो भवेत्तेन शत्रुर्विषममाश्रितः ॥
गम्ये वृक्षावृते देशे स्थितं शत्रुं तथैव च ।
किञ्चित्पङ्के तथा यायाद्बहुनागो नराधिपः ॥
रथाश्वबहुलो यायात् शत्रुं समपथाश्रितम् ।
महाश्रयन्तो बहुलास्तथा राजाभिपूजयेत् ॥
खरोष्ट्रबहुलो राजा शत्रुं बन्धनसंस्थितम् ।
बन्धनस्थोऽपि योज्योऽरिस्तदा प्रावृषि भूभुजा ॥
हिमपातयुते देशे स्थितं ग्रीष्मेऽभियोजयेत् ।
शरद्वसन्तौ धर्मज्ञ कालौ साधारणौ स्मृतौ ॥
विज्ञाय राजा द्विजदेशकालौ
दैवं त्रिकालञ्च तथैव बुद्ध्वा ।
यायात् परं कालविदां मतेन
सञ्चिन्त्य सार्द्धं द्विजमन्त्रविद्भिः ॥"
इति मात्स्ये २१४ अध्यायः ॥ * ॥
[या]त्राकाले माङ्गल्यद्रष्टव्याणि यथा,—
...सीमापथे सहस्रान्तं ताडका च शुभप्रदे ।
...व सार्द्धं बलवान् बभूव गमनोन्मुखः ॥
...यं मङ्गलं रामः शुश्राव जयसूचकम् ।
... मनसा सर्वं विजयं वैरिसंक्षयम् ॥
...काले च पुरतः शुश्राव सहसा शुचिः ।
...स्यं प्रकरं घण्टादुन्दुभिवादनम् ॥
...ध्यायों सङ्गीतं वयसे भवितेति च ।
... तत्र कल्याणं मेघशब्दं पयारवम् ॥
... यात्रां भगवान् सर्वैरेवंविधं शुभम् ।
...रतो विप्रवृन्दैर्दैवमभिमुखान् ॥
...पं बिभ्रतीं पतिपुत्रवतीं सतीम् ।
...र्धे ओरास्यां नानाभूषणभूषिताम् ॥
...वां पूर्णकुम्भं चाषञ्च मङ्गलन्तथा ।
...र्पं रामेशो यात्रामङ्गलसूचकम् ॥
...मत्तं सिंहं तुरगं मत्तकं द्विपम् ।
...चहंसञ्च चक्रवाकं शुकं पिकम् ॥
...ञ्चैव मञ्जपिञ्जरचकोरकम् ।
...वाकाश्च कारण्डं चामरं पटम् ॥
...वार्यं सर्वं सर्वसभां शुभाम् ।
...मीरञ्च मत्स्यं मद्यं सुदर्शनम् ॥

माणिक्यं रजतं मुक्तां मणीन्द्रञ्च मनोहरम् ।
दधि लाजं शुक्लधान्यं शुक्लपुष्पञ्च कुङ्कुमम् ॥
शुक्लच्छत्रं पताकाञ्च दर्पणं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च रथस्थं भूमिपं तथा ॥
दुग्धञ्च रोचनामाज्यमन्नं पायसं तथा ।
शालग्रामं पक्वफलं स्वस्तिकं शर्करां मधु ॥
मार्ज्जारञ्च हरीन्द्रञ्च मेघपर्वतमूर्द्धिकम् ।
मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥
कस्तूरीं कज्जलं तोयं हरिद्रां तीर्थमृत्तिकाम् ।
सिद्धार्थं सर्षपं दूर्वां विप्रबालञ्च बालिकाम् ॥
नटीं वेश्याञ्च भ्रमरं कर्पूरं पीतवाससम् ।
गोमूत्रं गोपुरीषञ्च गोधूलिं गोष्पदाङ्कितम् ॥
गोष्ठं गवां वर्त्म रम्यं गोशालं गोरतिं शुभाम् ।
भूषणं देवप्रतिमां ज्वलदग्निं महोत्सवम् ॥
ताम्रं स्फाटिकं रैत्यञ्च सिन्दूरं माल्यचन्दनम् ।
गन्धञ्च हीरकं रत्नं ददर्श दक्षिणे शुभम् ॥
सुगन्धि वायोराघ्राणं प्राप विप्राशिषं शुभम् ।
दृष्ट्वेदं मङ्गलं ज्ञात्वा प्रययौ स मुदान्वितः ॥"
इति ब्रह्मवैवर्ते गणपतिखण्डे ३२ अध्यायः ॥*॥
यात्राकाले अमङ्गलसूचकानि यथा,—
"राजा जगाम समरं हृदयेन विदूयता ।
सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसंख्यकैः ॥
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ।
ययौ तथापि समरं न जगाम गृहं पुनः ॥
मुक्तकेशीं छिन्ननासां रुदतीञ्च दिगम्बरीम् ।
शय्यावस्त्रपरीधानामपरां विधवामपि ॥
ऋतुदुष्टां योनिदुष्टां व्याधियुक्ताञ्च कुट्टनीम् ।
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमपि ॥
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ।
कुचैलमपि रूक्षाङ्गं नग्नं काषायवासिनम् ॥
मत्स्यविक्रयिणञ्चैव कन्याविक्रयिणं तथा ।
चितां दग्धशवं भस्म निर्वाणाङ्गारमेव च ॥
सर्पं वानरं सर्पं गोधाञ्च शशकं विषम् ।
व्याहपाकञ्च पित्तञ्च मोदकञ्च तिलांस्तथा ॥
देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनम् ।
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् ॥
कुशपुत्तलिकाञ्चैव शवदाहनकारिणम् ।
शून्यकुम्भं चूर्णकुम्भं तैलं लवणमस्थि च ॥
कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् ।
दक्षिणे च शृगालञ्च कुर्व्वन्तं भैरवं रवम् ॥
कपर्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् ।
कलहञ्च विलापञ्च विलापकारिणं जनम् ॥
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् ।
मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् ॥
पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभोजिनम् ।
देवतागुरुविप्राणां वस्तुवित्तापहारिणम् ॥
दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् ।
पितृमातृविरक्तञ्च ब्रह्माश्वत्थविघातिनम् ॥
सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहारिणं जनम् ।
मित्रद्रुहं मित्रघ्नञ्च धूर्तं विश्वासघातिनम् ॥
गुरुदेवद्विजातीनाञ्च निन्दकं स्वाङ्गघातकम् ।
जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् ॥

शवोपरागहीनञ्च दीनाहीनं मृतपुत्र...
गणिनागाधिनाञ्च गुरुघ्नमेव च ।
पुत्रघ्नं स्त्रीनिघ्नञ्च सुरापं सुरां त...
विषं वमनं रुधिरं मलिनं मर्दं त...
मूत्रं पुरीषं श्लेष्माणं क्लिन्नं हुङ्कारिण...
भग्नपात्रं रक्तवर्णं चापञ्च हुताशनम्...
शशञ्च शूकरं सर्पं शिवं कङ्कञ्च भल्लुकम् ।
मांसञ्च शुष्ककाष्ठञ्च चायसं गन्धकं तथा ।
अपराधिनाक्षञ्च तमसञ्चोपजीविनम् ।
वैद्यञ्च रक्तपुष्पञ्चौषधयुक्तमेव च ।
कुमारीं जलनारीञ्च विप्रयानञ्च दारकम् ।
दुर्गन्धवातं दुःशब्दं राजा संग्राम वर्त्मनि ।
मनश्च कुत्सितं प्रायः क्षुभिताश्च निरन्त...
नामाङ्गस्पन्दनं दैववाचं राज्ञो बभूव ह ।"
इति ब्रह्मवैवर्ते गणपतिखण्डे ३५ अध्यायः ।
श्रीकृष्णस्य मथुरायात्रा यथा,—
"राधिकायाश्च सभायां समासु गोपिकासु च ।
पुण्यवृन्दावने च वायुना सुरभीकृते ।
तृतीयप्रहरेऽतीते निशायाश्च शुभक्षणे ।
शुभचन्द्रसंयोगे चान्द्रयोगसमन्विते ।
सौम्यग्रहाभियुते लग्ने सौम्यग्रहनिरीक्षिते ।
पापग्रहसमाक्रान्तदोषादिवर्जि...
यशोदां बोधयामास कारयामास ...
बन्धूनामन्त्रयामास समुत्थाय हरिः ...
वाद्यं निषेधयामास राधिकाभयभीत...
सतन्त्रो विश्वकर्मा च माता भर्त्ता स...
प्रक्षाल्य पादयुगलं कृत्वा धौते च वास...
उवास संस्कृते स्थाने निलिप्ते चन्दनादि...
पञ्चपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः ।
वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं सुदक्षिणे...
पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा ।
दूर्वाकाण्डञ्च सुस्निग्धं पुष्पं धान्यं सितं शुभ...
गुरुदत्तं गृहीत्वा च ददौ मस्तकोपरि ।
घृतं ददर्श माध्वीकं रजतं काञ्चनं दधि ।
चन्दनं लेपनं कृत्वा पुष्पमालां गले ददौ ।
गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः ।
शङ्खध्वनिं वेदपाठं सङ्गीतं मङ्गलाष्टक...
विप्राशीर्वचनं रम्यं शुश्राव परमादरम्...
ध्यात्वा मङ्गलरूपञ्च सर्वेशं मङ्गलप्रदम् ।
चिक्षेप दक्षिणं पादं सुन्दरं स्थलपद्म...
निष्क्रम्य नासिकावामभागं प्रथमया दिशः ...
निरुह्य वायुमिष्टञ्च नासादक्षिणरन्ध्रतः ।
ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम् ।
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ७१ अध्याय...
अथ यात्रायुक्तिः । तत्र समयः ।
"यात्रायां द्विविधः कालो वैकारः सहजस्तथा ।
प्रोक्त आत्ययिके कार्य्ये विकारी नाम निर्णयः ।
सहजः स्वेच्छया राज्ञां तस्य निर्णय उच्यते ।
यात्रालसिंहमथो प्रवेशरथयोगमतां यदि ।
भानौ कुलीरवृषवृश्चिकगोभिरोर्षा
प्रशस्तु देवलमतेऽश्विनि पृष्ठतोऽर्कः ।
अश्विनी रेवती ज्येष्ठा तथा पुष्यपुनर्वसू ।

…स्तादितो शुभा यात्रायात्तुगमा: स्मृता: ।
…ो लग्नचार्थेषा विशाखा चोत्तरात्रयम् ।
मधुप्रतिष्ठेय यात्रायां मरणप्रदा: ॥
पूर्व्वे कुबेरे दहने निशाटे
यमे जलेशे पवने महेशे ।
त्यान्दं गतस्य प्रतिपन्नमेण
शुभं तिथीनां प्रवदन्ति तज्ज्ञा: ।
स्थान् संतुरे यानमतस्तथाच
पश्चाद्वदेत् सर्व्वशुभाय पुंसाम् ॥
…शुक्र: कुजो राहुर्मन्दश्चन्द्रो गुरुर्बुध: ।
…: शोभना यात्रा एठतो मरणं ध्रुवम् ॥
पूर्व्वेऽन्द्रं दक्षिणे याम्यपादं
रोहिण्ये तथाग्निमाख्याय शूलम् ।
कामं यायात् साम्परायेषु कार्य्ये-
ष्वप्यदापि प्रेक्ष्य शूलानि भानि ॥”
…दिक्शूलम् ।
…ष्टमी चतुर्थी च नवमी द्वादशी तथा ।
…दशी कृष्णस्याद्या यात्रायामशुभप्रदा: ॥
…ायो जगु: सदृशश्चतुर्दशाय संस्था:
…ापा: शुभा: मयिष्ठकं परिगृह्य लग्नम् ।
…र्व्वेवगा: शुभफलं जनयन्ति सौम्या-
…स्त्वक्रारिसंस्थममरारिगुरुं जिगीषो: ॥
…लवर्षविद्युत्स्तनितप्रियं कथञ्चिदपि यानम् ।
…माद्यात् दिव्यान्तरीक्षभौमैस्तथोत्पातै: ॥”
…क्रम: ।
…ां यात्राविधिं वक्ष्ये जिगीषूणां परायणीम् ।
…ाजनाविधिं कृत्वा सैनिकाद्यानशेषत: ।
…ान्यान् स्थानस्थानिति यात्राक्रमो मत: ॥”
नीराजनाविधि: ।
…ान्त्यभ्युदिते शुक्रे चन्द्रे पूर्णे शुभग्रहे ।
…नीराजनं कुर्य्यात् यथोक्तर्व्विधसत्तमै: ॥
…चौ प्रविशते भानौ संक्रान्त्यां वा शुभे दिने ।
…नीराजनं कुर्य्यात् महीपालो जिगीषिवान् ॥
…वकस्थे रवौ कुर्य्यात् पत्तिनीराजनाविधिम् ।
…कानीराजनं कुर्य्यात् दक्षिणायां प्रतिष्ठति ॥
…येवाश्वेव यानानां विजयादशमीविधिम् ।
…जादीनाञ्च सर्व्वेषां शक्रोत्थाने नीराजनम् ॥
…त्रस्य गवदण्डस्य तथा सिंहासनस्य च ।
…स्य नगरस्यापि महाविषुवसंक्रमे ॥
…त्मनो युवराजस्य महिष्या मन्त्रियान्तथा ।
…जन्मदिवसे राजा कुर्य्यान्नीराजनाविधिम् ॥
…भिषेकदिनं प्रोक्तमेषां जन्मदिनं मया ॥”
…न्यथा,—
…अश्वानां भास्करो देवो रेवन्तमिति संज्ञया ।
…जानां देवता शक्र: पत्तीनां कालिका मता ॥
…ौकानां वरुणो देवो यानानान्तु जयन्तक: ।
…र्धायां देवता रामो यम: खड्गस्य पूज्यते ॥
…जानां हनुमान् पूज्यो वृहस्पतिरिति क्रमात् ।
…ान् पूजयित्वा विधिवद्देवान्नीराजयेन्नृप: ॥
…दशमहिषै: पुष्पैश्चामरघण्टाखनादिभूषणै: ।
…ागखेर्महिषपद्दिगुणै: पुरुषैस्तद्दिगुणैश्चारुदीपि-
काभि: ॥

भवं वा महमाङ्गदिनं नीराजयेद्यदा ।
द्वादशवार्षि: स्थविरै: माह्नीपाह्नैरनेकसंख्यै: ।
मध्याह्नेतो याम्येगजशतनीराजनं सम्भवति ।
छागलशतं वृषभशतं शतञ्च मेषाणाम् ॥
तुरगा दश हस्त्यष्टौ याम्या: पञ्च द्विपञ्चक: ।
भद्रुका हि कुक्कुराश्चैकैका: पत्तिजनस्य ॥
नौकाशतकं सार्द्धं मयदशकं काञ्चनादिभि-
र्घटितम् ।
वैहुगतमपि जन्मनो नौकानीराजने राज्ञाम् ॥
यदा द्विपदं यानं सर्व्वेषामिष्यते तुरगै: ।
सुरशावत्सरचयितैर्योग्याङ्गैर्योग्यवर्गैश्च ॥
अष्टाभिधातुभि: कुर्य्याद्रथनीराजनाविधिम् ।
गजाश्वरथनौकाभिर्द्विगुणाभिर्वेधोत्तरम् ।
एवैर्नानाविधैरन्यैर्धातुभिर्व्वन्नैस्तथा ॥
सिंहासनेष योग्यैश्च कुर्य्यान्नीराजनाविधिम् ।
छत्रनीराजनाद्येवं नरस्याद्य निगद्यते ॥
श्वभि: नरै: शृगालैश्च व्याघ्रैरश्वैस्तथोष्ट्रै: ।
पुरं नीराजयेद्राजा चिरसम्पत्तिहेतवे ॥
ध्वा दशाश्वस्तदर्द्धेन नरश्चैव तदर्द्धत: ।
व्याघ्रादीनां मधेयैकं रथं नानाविधन्तथा ॥
अस्त्राणि धातवश्चैव वस्त्राणि च फलानि च ।
यन्ता: स्थलजाश्चैव जलजाश्चैव जन्तव: ।
नवग्रहाश्च सूर्य्याद्या: शैला: सप्त घटास्तथा ।
योग्यधातुसमुत्कृता नौकारत्नत्रयन्तथा ॥
निजदेहमितं स्वर्णं रजतं ताम्रमेव वा ।
आत्मनीराजने दद्यादृयदिच्छेच्चिरसंस्थितिम् ॥
अन्यैर्नानाविधै: कुर्य्याद्युवराजनीराजनम् ।
अलङ्कारैश्च विविधैर्देवीनीराजनं मतम् ॥
मन्त्रिनीराजनं राजा हयेनैव समाचरेत् ।
अमात्यानां सैनिकानां विप्राणां धनिनान्तथा ।
वस्त्रैर्नीराजनं कुर्य्यादिति भोजस्य सम्मतम् ॥
नीराजनाया वस्तूनि न पश्येन्न पुन: स्पृशेत् ।
सप्तकृत्व: परिभ्राम्य कुर्य्यान्नीराजनाविधिम् ॥
न्यसेद्वा परराष्ट्रेषु गहने वा जलेऽपि वा ।
देवब्राह्मणदीनेभ्य: प्रयच्छेद्वा यथायथम् ॥
इति संक्षेपत: प्रोक्तो मया नीराजनाविधि: ।
अनेन विधिना राजा सुचिरं सुखमश्नुते ॥”
तथा हि गर्ग: ।
“नीराजना महीन्द्राणां निघ्नन्ति विपदोऽखिला: ।
सैव सन्नहनं राज्ञां कञ्चुकेनेव संयत: ॥
नीराजनान्वितानां न भयं विद्यते क्वचित् ।
नीराजनाविहीनानां नश्येयु: सर्व्वसम्पद: ॥”
तथा च वात्स्य: ।
“ये भूमिपाला: प्रतिवत्सरान्तं
कुर्व्वन्ति नीराजनकर्म्म सम्यक् ।
तेषां न लक्ष्मी: क्षयतामुपैति
साम्राज्यलक्ष्मी: करगैव तेषाम् ॥
एवं नीराजनं कृत्वा राजा प्रस्थानमाचरेत् ॥”
इति नीराजनाविधि: ॥ * ॥
अथ यात्रा ।
“गुणातिशयसम्पन्न: शत्रुं यायाज्जिगीषया ।
यदि पश्चात् प्रकोपो न यदि राष्ट्रे न कण्टका: ॥

संज्ञायामत्र यायाद्वा पार्ष्णिग्राहैश्च शत्रुणा ॥
राज्ञां शुक्रो विनिहन्ति काकान्
काकोऽप्युलूकान् रजनीव्यपाये ।
इति प्रकारं समुदीक्ष्य यायात्
काले फलन्तीह समीहितानि ॥
प्रपन्नसस्यनोपेतं दुर्भिक्षादिप्रपीडितम् ।
सम्भूतान्तरकोपेतं न यायात् पृथिवीपति: ॥
निजदेवानुकूल्ये हि प्रातिकूल्ये परस्य च ।
यायान्नृपो यतो दैवं बलमेतत् परं मतम् ॥”
अन्यत्र तु ।
“निरातङ्के निरुत्पाते निरवद्ये निरामये ।
विपक्षे जयमिच्छन्ति राजानो विजिगीषव: ॥”
इति युक्तिकल्पतरु: ॥
युद्धयात्रायाममङ्गलदर्शनं यथा,—
“तस्य निर्गच्छतो गेहात् श्वानोऽस्थि मुखतो-
ऽभवन् ।
ध्वजे वरोह कापोत: शिवा श्यामा च
दक्षिणा ॥
पिङ्गला चञ्चुगोधा च शूकरी केवली तथा ।
गजवानरसेनाश्वशिच्छिकाश्च वामत: ॥
पथं विभिन्दते सर्प: कुम्भोदकं व्यशीर्य्यत ।
रराव वानरो ऋक्षो मार्जारो ह्यतिभैरवम् ॥
तैलतक्रत्वक्केशयुक्ताभ्यक्तादिदर्शनम् ।
वान्तोन्मत्तजडमूकच्युतवामनकं रवम् ॥
तुषकार्पाससर्पाणां निन्दितानाञ्च दर्शनम् ।
रक्ताम्बरधरो मुण्ड: मज्जामिषं तथा वसा ॥
ललाटं शक्रचाप उल्कापातध्वजारुणा: ।
दिशां दाहमहीकम्पा: खरज: कलुषं नभ: ॥
निस्तेजस्तपते भानुर्नद्य: प्रतिमुखावहा: ।
उष्णोदकं महाकूपं दरयं दीर्घिकासु च ॥
अकालविकृति: पुष्पफलानामन्वभूत्तदा ।
शीत उष्णविपर्य्यासा मेघनादाश्च दारुणा: ॥
आरण्यसत्त्वा ग्रामेषु ग्रामजारण्यवासिन: ।
क्रोष्टृसर्पसमूहाश्च शशश्वान: पिपीलिका: ॥
भृङ्गाणां महती सेना स्थगायाश्च तथैव च ।
एते च पुरप्राकारे निपतन्त्युत्पतन्ति च ॥
दुर्गन्ध: शार्करो वायुर्दीना योधा हतप्रभा: ।
शकृन्मूत्राश्रुपातानि गजा अश्वा: प्रचक्रिरे ।
ध्वजच्छत्रपताकानां स्फुटनं दण्डभिन्दनम् ।
कलङ्कमसि चक्रे च हता दुन्दुभिरेव च ॥
ज्यातलास्फुटनञ्चापि नाराचानाञ्च कुण्ठता ।
गदानां तुमराणाञ्च शीर्णता ह्युरुभिन्दता ॥
शुष्कप्ररोहणञ्चार्कमाङ्गमारस्तथैव च ।
प्रतिमारुदितं स्वेदो मृतकानाञ्च जल्पनम् ॥
गवां रासभमारोह: स्त्रीणाञ्च सङ्करता ।
स्त्रीरुते अविच्छागादि सूनावि शिशुशोभनम् ।
बालानां घातनं युद्धे निस्त्रिंशा: सकला: प्रजा: ।
मक्षिकादंशमण्डूकवहुशोनावदर्शनम् ॥
निस्तेजा न वहेद्वह्नि: सधूम: स्फुटते तरु: ॥
एवंविधान् तथोत्पातान् दृष्टान् घोरेण वासव ।
पप्रच्छ नारदं सोऽथ किमेतद्विकृतं द्विज ! ॥”
इत्याद्ये देववतारे घोरवधाध्याय: ॥

अथ द्वादश यात्रा ।
"प्रणम्य जगतां नाथं कलिकल्मषनाशनम् ।
द्वादशयात्रातत्त्वानि वक्ति श्रीरघुनन्दनः ॥"
तत्रादौ द्वादशयात्राकालस्य मुख्योपादेयत्वात् आदौ स एव निरूप्यते । तद्यथा स्कन्दपुराणे ।
इन्द्रद्युम्न उवाच ।
"वैशाखादिषु मासेषु यात्रापूजाविधिं मुने ! ।
श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि ॥
जैमिनिरुवाच ।
वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः ।
या या द्वादश यात्राः स्युस्ता हि वक्ष्यामि ते शृणु ॥
वैशाखे चान्दनी यात्रा ज्यैष्ठे स्नापन्युदीरिता ।
आषाढ़े रथयात्रा स्यात् श्रावणे शयनी तथा ।
भाद्रे दक्षिणपार्श्वीया आश्विने वामपार्श्विका ।
उत्थानी कार्त्तिके मासि छादनी मार्गशीर्षके ॥
पौषे पुष्याभिषेकः स्यान्माघे शाल्योदनी तथा ।
फाल्गुने दोलयात्रा स्याच्चैत्रे मदनभञ्जिका ।
एकैका मुक्तिदा सर्व्वा धर्म्मकामार्थसाधनाः ॥"
अथ यात्राविधिः । स्कान्दे ।
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥
वैशाखस्यामले पक्षे तृतीया पापनाशिनी ।
स्वयमाविष्कृता चैषा प्राजापत्यर्क्षसंयुता ॥
यः पश्यति तृतीयायां कृष्णं चन्दनभूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥
वैष्णवा जयशब्दैश्च पूजयित्वा सदा हरिम् ।
नानास्तोत्रनिवेदैर्व्विविधैः संस्तुवन्ति च ।
वेणुवीणादिवाद्यैश्च तथा नानोपहारकैः ।
स्तोत्रयन् जगन्नाथं तृतीयादौ विलेपयेत् ।
वैशाखस्य तृतीयायां जलमध्ये विशेषतः ।
लेपनं मण्डपे कुर्य्यान्नदीकूले वा ह्रदने ।
चन्दनागुरुह्रीवेरं कुष्ठकुङ्कुमरोचनाः ।
जटामांसी मुरा चैव विष्णोर्गन्धाष्टकं विदुः ।
एतैर्गन्धैस्तथान्यैश्च विष्णोर्गात्राणि लेपयेत् ।
एतच्च तुलसीकाष्ठे कुर्य्याल्लेपनकर्म्मणि ॥" १ ॥
अथ स्नानयात्रा । स्कन्दपुराणे ।
"ज्यैष्ठामृक्षगतेऽतीते पूर्ण्यं शक्रवासरम् ।
तस्याञ्च स्नापनं कार्य्यं महास्नानविधानतः ।
तस्यां प्रातःस्नानकाले मञ्चका रचितञ्च माम् ।
रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥"
तथा ।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां हरेः स्नानं सर्व्वकामफलप्रदम् ॥
सर्व्वतीर्थमयः कूपस्तदास्ते निर्म्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षं भवति द्विजाः ॥
तस्मात् ज्यैष्ठ्यां महद्भिश्च सौमाद्यैः कलसैर्जलैः ।
स्नापयन्ति तदा सर्व्वे जगन्तं तं जगद्गुरुम् ॥
दृष्ट्वापि च हरेः स्नानमुत्सवं परमाद्भुतम् ।
गर्भवासे न योनौ च तस्मात्तद्यत्नमाचरेत् ।
स्नाना रथश्चादिमोक्षयात्रा प्रतिष्ठिता ।
ज्यैष्ठस्नानं मनवो ये पश्यन्ति दयान्विताः ।
न ते भवार्ण्णवे मज्जन्ति यात्रायां गमनागताः ।
ज्यैष्ठे च स्नपनं कुर्य्यात् श्रीविष्णोर्जन्मवासरे ।
दैनन्दिनन्तु दुरितं पक्षमासर्त्तुवर्षजम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ।
स्वर्णस्तेयसुरापानगुरुतल्पयुतानि च ।
कोटिकोटिसहस्राणि उपपापानि यानि च ।
सर्व्वाण्येव प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
पुरुषसूक्तमन्त्रेण पावमान्या तथैव च ।
नारिकेलोदकेनाथ तथा तालफलाम्बुना ।
पञ्चामृतैः शीततोयैर्द्राक्षाकर्पूरवासितैः ।
यवोदकेन शुद्धेन तथा पुष्पोदकेन च ।
स्नापयित्वा जगन्नाथं पूजयेत् परमेश्वरम् ।
ॐ घं घण्टायै नमः इति घण्टावाद्यं निवेदयेत् ।
य एवं कुरुते विद्वान् ब्राह्मणः क्षत्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ।
चतुर्द्दश्यां दृढं मञ्चं कारयित्वा सुशोभनम् ।
सुगन्धिधूपसुरभिं चन्द्राभ्रःसमुच्चितम् ।
एवं मञ्चं प्रतिष्ठाप्य कलसानधिवासयेत् ।
सुवासितं जलपूर्णं पावकं कलसं न्यसेत् ।
जयशब्दैश्च स्तुतिभिर्नीयते जगदीश्वरः ।
जयस्व राम कृष्णेति जयभद्रेति चोदिते ।
नीयते मञ्चदेशन्तु निशीथे ब्राह्मणादिभिः ॥"
अथ रथयात्रा । स्कन्दपुराणे ।
"गुण्डिकाख्यां महायात्रां प्रकुर्व्वीयाः क्षितीश्वर ! ।
आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रवर्त्त्याथ प्रीणयेच्च द्विजान् बहून् ।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ।
सप्ताहं सरितस्तीरे मम यात्रा भविष्यति ।
अष्टमे दिवसे सर्व्वान् रथान् माल्यैर्व्विभूषयेत् ।
नवम्यामानयेद्देवांस्तेषु प्रीतः सकृद्विशाम् ।
दक्षिणाभिमुखो यात्रा विष्णोरेषा सुदुर्लभा ।
यथा पूर्व्वा तथा चेयं ते द्वे मुक्तिप्रदायिके ।
चराहे विरहोत्कण्ठं तद्दिनेन तु पार्व्वतीम् ॥"
इतिवत्तु तिथिना एकाहो बोद्धव्यः ।
"तिथिरेकेन दिवसश्चान्द्रमानेन कीर्त्तितः ॥"
इति विष्णुधर्म्मोत्तरात् ।
यत्तु ।
"आषाढ़स्य सिते पक्षे भद्रा सा पुष्यसंयुता ।
यात्रोत्सवं प्रकुर्व्वीयात्तदभावे पुष्य एव हि ॥"
इति ईश्वरसंहितायां वचनान्तरम् ।
तद्वैकल्पिकप्रयोगान्तरविधायकम् । पाद्मे ।
"आषाढ़स्य द्वितीयायां रथं कुर्य्याद्विशेषतः ।
आषाढ़शुक्लैकादश्यां शयनीममहोत्सवम् ।
नातः परं हि तथास्य यात्रान्तरमपेक्षते ।
अत्र स्वयं त्रिलोकेशः स्यन्दनेन कुतूहलात् ।
नाशयन् सर्व्वपापानि वर्षे वर्षे व्रजेदसौ ।
रथस्थितं व्रजन्तं तं महावेदीमहोत्सवे ।
ये पश्यन्ति मुदा भक्त्या वासस्तेषां हरेः पदे ।
सत्यं सत्यं पुनः सत्यं प्रतिज्ञातं द्विजोत्तमाः ।
नातः श्रेयःपदो विष्णोरुत्सवः शास्त्रसम्मतः ।
रथयात्रैव यात्राणां मुख्यैषाह प्र…
महावेदीं व्रजन्तं तं रथगं पुरुषो…
बलभद्रं सुभद्राञ्च दृष्ट्वा मुक्तिर्न वा…
आषाढ़स्य सिते पक्षे दिने विष्णोः…
प्रतिष्ठाप्य मन्त्रैश्च विधिवत् पूर्व्ववी…
रथं नरो हरेः कुर्य्यात् स्वाधनं सुर्व्व…
भूषयेद्विविधैर्भक्त्या वस्त्रालङ्कारमाल…
स्वर्द्धमपताकाभिश्च शिरोदेशादपलक्ष…
नटनर्त्तकमुख्याश्च गायना वन्दन…
वेश्या यौवनदर्पाढ्या कम्बालङ्कारम…
ध्वजाश्च बहवस्तत्र पताकाधिष्ठिता…
गरुड़श्च ध्वजं कुर्य्यात् रक्तचन्दनभ…
दीर्घनासं पीतदेहं शुक्लाभ्यां विभ…
चतुःपदद्भुजगं सर्व्वालङ्कारभूषित…
देवाः पद्मध्वजं कुर्य्यात पद्माकार…
मत्स्यदमयं कुर्य्याच्छौरिको लाङ्ग…
सारथिं वाजिनश्चैव वर्त्तं वक्षसुरादि…
चौरकैर्मङ्गलैदांत्रैर्म्मिलवर्णैः सुशोभ…
दृश्यं सुघटितं तन्तु रथं देववधस्य
अरुणोदयवेलायां देवं तस्मात् प्रदु…
ब्राह्मणैर्व्वैष्णवैः सार्द्धं यतिभिश्च त…
विज्ञापयेद्देवदेवं यात्रायै स कृताञ्ज…
ततः कर्पूरपर्य्यैश्च सुमनोभिरवाकि…
पथि शोभनवस्त्राणि प्रवदन्ति द्वि…
केचिन्मङ्गलगाथाश्च केचिच्च जयें…
जितन्तु इति मन्त्रं वै केचित् पुण्ये…
सूतमागधमुख्याश्च कीर्त्तिं कार्ष्णीं…
पर्व्वैरीभर्भरीवेणुवीणामाधुरिका…
शङ्खायन्ते सुमधुरं गोविन्दविजय…
एवं प्रवृत्ते समये कृष्णं रामपुरःस…
नयन्ति विप्रा भद्राञ्च क्षत्रियाश्च…
करे धृत्वा जगन्नाथं भ्रामयित्वा र…
रामं भद्राञ्च कृष्णञ्च रथमध्ये निवे…
पूजयेदुपचारैस्तैः श्रद्धाभक्तिसमन्व…
रथच्छायां समाक्रम्य ब्रह्महत्या च…
तद्दर्शनं सकृत्तस्य जीवे पापसंहृति…
सत्यामुष्टिसिक्तेन स्वर्गद्वारान्त…
ये प्रणामं प्रकुर्व्वन्ति तेऽपि मोक्ष…
अनुगच्छन्ति ये कृष्णं ते देवतुल्यापि…
वेदैः स्तुवन्ति वेदानां वक्तारो मोक्ष…
इतिहासपुराणाद्यैः स्तोत्रैर्व्वापि सु…
स्तुवन्ति पुण्डरीकाक्षं ये वै विगतक…
ते वै जयन्ति पापानि जयशब्दैः स…
नर्त्तनं कुरुते वापि गायत्यथ नरो…
वैष्णवोत्तमसंसर्गान्मुक्तिं प्राप्नोत्यसं…
नामानि कीर्त्तयिष्यन्ति न ते यान्ति…
जयस्व रामकृष्णेति जयभद्रेति यो…
न मातृगर्भे वासोऽस्य स च दे…
चामरैर्व्यजनैः पुष्पैः तालवृन्तैश्चेल…
रथस्याग्रे स्थितो यो वै वीजयेत् …
संवीज्यमानोऽप्सरोभिर्देववर्णैर्व्वयोनि…
भुङ्क्ते तु भोगानखिलान् यावदा…

...न: परतरो लोके महादेवीमहोत्सवात् ।
...सर्वपापहरो योग: सर्वतीर्थफलप्रद: ॥
...गृहिन ये तत्र दानं ददति ये नरा: ।
...नुकिञ्चिदल्पफलं मेरुदानेन संमितम् ॥
...िकामण्डपे यान्तं भद्राख्यं सहाग्रजम् ।
...जगन्नाथं दर्पणेष्वभिषेचयेत् ॥
...स्नानै: शीतलतोयै: पुष्पकर्पूरवासितै: ।
...रिकेलजलेनाथ तथा तालफलाम्बुना ॥
...क्षीरोदकेन शुद्धेन तथा पुष्पोदकेन च ।
...लिप्तेन चन्दनै: कुङ्कुमद्रवै: ॥
...गन्धमाल्याभरणैश्चीनचेलै: सुशोभनै: ।
...चामरैश्च जलाभैश्च शीतलैर्व्यजनैस्तथा ॥
...बीजयेत् पुण्डरीकाक्षं सुभद्रां बलमेव च ।
...फलाभि: पानकैर्हृद्यैस्तथा गव्यविकारकै: ॥
...खर्ज्जूरैर्नारिकेलैश्च नानारम्भाफलादिभि: ।
...तथा क्षीरविकारैश्च पनसैरिक्षुभिस्तथा ॥
...वासितै: शीतलतोयैश्च गन्धताम्बूलपत्रकै: ।
...एलाकर्पूरलवङ्गाद्यै: पूजयेत् परमेश्वरम् ॥
...दक्षिणस्थितं देवत्रयं ये पुरुषर्षभा: ।
...प्रदक्षिणं प्रकुर्व्वन्ति विपद्दु:खस्य एव च ॥
ततोऽपराह्ने देवेशं दक्षिणानिलवीजितम् ।
शनै: शनैर्नयेद्विष्णुं मण्डपस्य च मध्यत: ॥
एवं व्रजति देवेशे सर्व्वपापं गतोऽभवम् ।
दीपकानां सहस्राणि ज्वालितानि नरैस्तत: ॥
मण्डपे वासयेद्देवान् गुण्डिकाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
पूजयित्वा जगन्नाथं तोषयेत् गीतनृत्यकै: ।
उपहारादिभिस्तत्र सप्ताहानि जनार्द्दनम् ॥
सप्ताहं ये प्रपश्यन्ति गुण्डिकामण्डपे स्थितम् ।
साध रामं सुभद्राञ्च विष्णुसायुज्यमाप्नुयात् ॥
दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ।
यत्किञ्चित् कुरुते कर्म्म कोटिकोटिगुणं भवेत् ॥
सर्व्वं मेरुसमं दानं सर्व्वे व्याससमा द्विजा: ।
महावेद्यां गते कृष्णे योगोऽयं खलु दुर्लभ: ॥
अर्द्धोदयादयो योगा: स्कन्देन परिभाषिता: ।
महावेद्याख्ययोगस्य कलां नार्हन्ति षोडशीम् ॥
अष्टाहे च पुन: कृत्वा दक्षिणाभिमुखाग्रयान् ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा प्रकीर्त्तिता ॥
कार्य्या प्रयत्नत: सा हि भुक्तिमुक्तिप्रदा भवेत् ।
दक्षिणाभिमुखं यान्तं कृष्णं पश्यन्ति ये नरा: ॥
न तेषां पुनरावृत्ति: सत्यमेतन्न संशय: ।
पुराविदो वदन्त्येतां यात्रां नवदिनात्मिकाम् ॥
तस्या: संकीर्त्तनादेव निर्म्मलो जायते नर: ।
तावतीयं महायात्रा यो यथा कर्त्तुमिच्छति ॥
सोऽपि विष्णुप्रसादेन वैकुण्ठभवनं व्रजेत् ।
उद्धृत्य सप्तपुरुषान् पापावलिसमन्वितान् ॥”४॥
अथ शयनयात्रा । स्कान्दे ।
“आषाढ़े शुक्लद्वादश्यां कुर्य्यात् स्वापमहोत्सवम् ।
मण्डपे रचयेत्तत्र शयनागारमुत्तमम् ॥
देवस्य पुरत: शय्यां रत्नादिनिर्म्मितोपरि ।
आस्तीर्य्य मृदुचेलादि मृदुपीनोत्तरच्छदाम् ॥
कर्पूरधूलिविक्षिप्तां चारुचन्द्रातपां शुभाम् ।
पुष्पगन्धयुतां मुक्तारत्नैश्चन्दनाङ्किताम् ॥
चातुरीं शुभां स्निग्धां नानाचित्रोपशोभिताम् ।
एवं स्वापगृहं कृत्वा निशीथे स्वापयेद्विभुम् ॥
संपूज्य भावयेद्देवं तेषां शय्यादिभि: सह ।
लक्ष्मीदेवीं च संप्रार्थ्य स्वापार्थं परमेश्वरम् ॥
नयेच्छय्यागृहद्वारं यापयेत् घटिकात्रयम् ।
पश्चात्तै: स्नापयेत्तान् पृथक्पलशताधिकै: ॥
सुगन्धिचन्दनैर्लिप्तान् वस्त्रालङ्करणादिभि: ।
पूजयित्वा यथान्यायं प्राञ्जलिर्मन्त्रमुच्चरेत् ॥”
जगद्बन्ध इत्यादि ।
“सुदृढं कारयेद्द्वारं विष्णो: शयनवेश्मन: ।
स्नापयित्वा जगन्नाथं लभते सुरसत्तमम् ॥”५॥
अथ पार्श्वपरिवर्त्तनयात्रा ।
“अथ ते संप्रवक्ष्यामि पार्श्वस्य परिवर्त्तनम् ।
नभस्यविमले पक्षे संप्राप्ते हरिवासरे ॥
विष्णो: स्वापगृहद्वारं शनैर्गत्वा प्रविश्य च ।
नमस्कृत्य जगन्नाथं पर्य्यङ्कशयितं मुदा ॥
अवधाय शनैर्द्वारं पूजयेदुपचारकै: ।
प्रणम्य भक्त्या तत्पादौ स्थापयेदुत्तरामुखम् ॥”
मन्त्रश्चेमं पठेत् ।
“ॐ देवदेव ! जगन्नाथ ! कल्याणं परिकल्पय ।
परिरक्तमिदं सर्व्वं यथा स्थावरजङ्गमम् ॥
यत् दृष्ट्वा चेष्टितैरेव जाग्रत्स्वप्नसुषुप्तिभि: ।
जगद्धिताय सुप्तोऽपि पार्श्वेन परिवर्त्तय ॥
परिवर्त्तनकालोऽयं जगत: पालनाय ते ।
स्वस्थलोऽयं शक्रोऽपि स्वर्गे तिष्ठतु सन्तसुख: ।
इदं त्वत्पादकमलं विमुच्य महि वत्सलम् ।
मर्त्यो जलं श्रावयति प्रजापालनहेतुकम् ॥
इति संप्रार्थ्य देवेशं विनयात्तोषयेत्तत: ।
व्यजनैश्चामरैश्चैव वीजयेत् परमेश्वरम् ॥
सुगन्धिचन्दनैरस्य सर्व्वाङ्गं परिलेपयेत् ।
स्वादूनि भक्ष्यद्रव्याणि पायसादीनि दापयेत् ॥
शय्यागृहद्वारि विभो: शनैर्भक्त्या निवेदयेत् ।
देवमुद्दिश्य यत् कुर्य्यात् सर्व्वमक्षयतां व्रजेत् ॥
पार्श्वे च जन्मदिवसे उपवासपरो भवेत् ॥”
एवं आश्विनशुक्लैकादश्यां पूर्व्वोक्तविधानेन श्रीहरस्य वामपार्श्वपरिवर्त्तनं कार्य्यम् ॥
मतान्तरे ।
“शुभे चैवाश्विने मासि महामायां प्रपूजयेत् ।
शैवर्वीं राजवीं मार्त्तीं विष्णुमायां महेश्वरीम् ।
हिंसा चैव न कर्त्तव्या कदाचिद्विष्णुपूजकै: ॥”६॥
अथोत्थानयात्रा ।
“एकादश्यान्तु कार्त्तिक्यां शुक्लायां पृथिवीपते ।
कृष्णमुत्थापयेद्भक्त्या पूजयित्वा जगद्गुरुम् ।
पूर्व्ववत् पूजयित्वा तु प्रातर्मन्त्रं समुच्चरेत् ॥”
मन्त्रस्तु ।
“ॐ उत्तिष्ठ देवदेवेश ! तेजोराशे जगत्पते ! ।
वीक्ष्यैतत् सकलं देव ! प्रसुप्तं तव मायया ॥
प्रफुल्लपुण्डरीकाक्ष ! श्रीहरे ! शयनेन वै ।
त्वया दृष्टं जगदिदं परमं सुखमेष्यति ॥
ये ते कार्त्ता: क्रिया: सर्व्वा: प्रवर्त्तन्ते ततो ध्रुवम् ।
इत्युत्थाप्य जगन्नाथं वेणुवीणादिनि:स्वनै: ॥
जयशब्दैस्तथा देवं नयेयुर्नृत्यमण्डपम् ॥
तैलेनाभ्यज्य तोयेन स्नापयेत् पुरुषोत्तमम् ।
पञ्चामृतैर्नारिकेलरसै: पञ्चरसैस्तथा ॥
सुगन्धामलकेनाथ यवकल्केन लेपयेत् ।
घर्षयेत्तन्मोद्वर्त्तैर्लेपयेद्गन्धचन्दनै: ॥
पुष्पवासिततोयैश्च कुशरत्नोदकैस्तथा ।
स्नापयित्वा जयेत् पापं बहुजन्मोपपादितम् ॥
महोपचारै: संपूज्य विष्णुं नीराजयेत्तत: ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् परया मुदा ॥”७॥
अथ प्रावरणयात्रा ।
“मार्गशीर्षे सिते पक्षे कुर्य्यात् प्रावरणोत्सवम् ।
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ॥
षष्ठ्योऽधिवासं कुर्व्वीत पञ्चम्यां निशि कर्म्मवित् ।
प्रभाते मण्डलं कुर्य्यात् पद्ममष्टदलान्वितम् ॥
दिक्पालान् पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ।
चण्डप्रचण्डौ च द्वारि चतुर्द्दिक्षु प्रपूजयेत् ॥
तन्मध्ये स्थापयेद्व्यक्तं क्षालयेदुष्णवारिणा ।
पूजयित्वा जगन्नाथं गन्धतैलेन दीपकम् ॥
दत्त्वा कृष्णाय भक्त्या तु गीतवाद्यैर्नयेन्निशाम् ।
प्रात: प्रपूजयेद्देवं नानाद्रव्यै: सुशोभनै: ॥
सप्तभि: सप्तभिर्द्देवान् वासोभि: परिवेष्टयेत् ।
सुखयंश्च सर्व्वाङ्गे शीतप्रावरणैर्द्विजा: ॥
दूर्व्वाक्षतै: प्रपूज्याथ कुर्य्यान्नीराजनां विभो: ।
भगवन्तं समुद्दिश्य ब्राह्मणेभ्य: प्रदापयेत् ॥
गुरुभ्यश्चान्यदेवेभ्यो दीनानाथेभ्य एव च ।
शीतप्रावरणं दद्यात् सकृत् परमया मुदा ॥
ददाति भगवान् प्रीतस्तस्मै परमदुत्तमम् ॥”८॥
अथ पुष्यस्नानयात्रा ।
“पुष्यस्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ।
पौषे मासि तु तत् कुर्य्यात् पुष्यस्नानोत्सवं हरे: ॥
चतुर्द्दशीनिशायान्तु कुम्भानामधिवासनम् ।
रात्रौ जागरणं कृत्वा प्रातर्वह्निं प्रकीरयेत् ॥
ब्रह्मविष्णुशिवेभ्यश्च प्रत्येकं समिधं क्रमात् ।
जुहुयात् पूजयित्वा तु तदन्ते पुरुषोत्तमम् ॥
पूजयेदुपचारैस्तु आदर्शे प्रतिविम्बितम् ।
तत: पुरुषसूक्तेन कुम्भांस्तानभिमन्त्रयेत् ।
क्रमात् देवस्य शिरसि स्नापयेद्विधिवत्तत: ॥”
सूक्तमुच्चरन् ।
“तत: पश्चात्तेनैव वासुदेवञ्च क्षालयेत् ।
सम्यक् शुद्धं पुनर्विप्र उपचारै: प्रपूजयेत् ॥
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥")
वृद्धिनामौषधम् । हस्तचतुष्कम् । इति मेदिनी ।
गे, १८ ॥ (यथा, मार्कण्डेये । ४८ । ३८ ।
"द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टनम् ।
चतुर्हस्तं धनुर्दण्डो नाड़िका युगमेव च ॥")
देवानां द्वादशसहस्रवत्सरेण चतुर्युगं भवति ।
मनुष्यमानेन चतुर्युगपरिमाणं विंशतिसहस्रा-
धिकत्रिचत्वारिंशल्लक्षम् । तत्र सत्ययुगस्य मानम्
१७२८००० वर्षाः । त्रेतायुगस्य १२९६०००
वर्षाः । द्वापरयुगस्य ८६४००० वर्षाः । कलि-
युगस्य ४३२००० वर्षाः । इति श्रीभागवतमतम् ॥
तेषां भारतवर्षवर्त्तित्वं विवरणञ्च यथा,—
"चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ॥
पूर्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयन् ॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
त्रेता त्रीणि सहस्राणि युगसंख्याविदो विदुः ।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥
द्वे सहस्रे द्वापरे तु सन्ध्यांशौ तु चतुःशते ।
सहस्रमेकं वर्षाणां दिव्यं कलौ प्रकीर्त्तितम् ॥
द्वे शते च तथान्ये द्वे संख्यातञ्च मनीषिभिः ।
एषा द्वादशसाहस्री युगसंख्या तु संज्ञिता ॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
तत्र संवत्सराः सृष्टा मानुषास्तान्निबोधत ॥
चत्वारिंशत्तथा त्रीणि कृतं युगमथोच्यते ।
विंशतिश्च सहस्राणि कालो ह्येष चतुर्युगः ॥
पृथक्त्वेनेह वक्ष्यामि युगानि तु निबोधत ।
नियुतानि दश द्वे च पञ्च चैवात्र संख्यया ॥
अष्टाविंशत्सहस्राणि कृतं युगमथोच्यते ।
प्रयुतञ्च तथा पूर्णं द्वे चान्ये नियुते पुनः ॥
षट्त्रिंशच्च सहस्राणि संख्यातानि तु संख्यया ।
त्रेतायुगस्य संख्येषा मानुषेण तु कीर्त्तिता ॥
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥
चत्वारि नियुतानि स्युर्वर्षाणान्तु चतुर्युगम् ।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया ॥
एतत् कलियुगं प्रोक्तं मानुषेण प्रमाणतः ।
एषा चतुर्युगावस्था मानुषेण प्रकीर्त्तिता ॥
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकेन च ।
एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ॥"
इति मात्स्ये १४८ अध्यायः ॥ * ॥
युगधर्म्मो यथा,—
"ध्यानं परं कृतयुगे त्रेतायां ज्ञानमध्वरः ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।
द्वापरे दैवतं विष्णुः कलौ रुद्रो महेश्वरः ॥
ब्रह्मा विष्णुस्तथा सूर्य्यः सर्व्व एव कलिष्वपि ।
पूज्यते भगवान् रुद्रश्चतुर्ष्वपि पिनाकधृक् ॥
आद्ये कृतयुगे धर्म्मश्चतुष्पादः सनातनः ।
त्रेतायुगे त्रिपादः स्याद्द्विपादो द्वापरे स्थितः ।
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति ॥"
इति कूर्म्मपुराणे युगधर्म्मकीर्त्तनं नाम २८
अध्यायः ॥ * ॥ युगावतारा यथा,—
"कृते युगे परं ज्ञानं कपिलादिस्वरूपधृत् ।
ददाति सर्व्वभूतात्मा सर्व्वभूतहिते रतः ॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः ।
दुष्टानां निग्रहं कुर्व्वन् परिपाति जगत्त्रयम् ॥
वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥
वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥
एवमेव जगत् सर्व्वं परिपाति करोति च ।
हन्ति चान्त्येष्वनन्तात्मा नास्त्यस्माद्व्यतिरेकि
यत् ॥"
इति विष्णुपुराणे ३ अंशे २ अध्यायः ॥ * ॥
युगधर्म्मान्तरं यथा,—
जैमिनिरुवाच ।
"कलौ युगे महाभाग ! समायाते सुदारुणे ।
भविष्यन्ति जनाः सर्व्वे कीदृशास्तद्वदस्व मे ॥
व्यास उवाच ।
आद्यं सत्ययुगं प्राहुस्ततस्त्रेताह्वयं युगम् ।
ततश्च द्वापरं विप्र ! कलिमन्त्यं विदुर्बुधाः ॥
कृते धर्म्मश्चतुष्पादः सर्व्वधर्म्मरता जनाः ।
वर्णाश्रमाचाररतास्तपोव्रतपरायणाः ॥
नारायणार्च्चनपराः शोकव्याधिविवर्जिताः ।
सत्योक्तिभाषिणः सर्व्वे सदया दीर्घजीविनः ॥
धनधान्यादिसम्पन्ना हिंसादम्भविवर्ज्जिताः ।
परोपकारिणश्चैव सर्व्वशास्त्रविदस्तथा ॥
एवंविधाः सत्ययुगे सर्व्वे लोका द्विजोत्तम ! ।
राजधर्म्मरताश्चैव भूपाला जनपालिनः ॥
अहो सत्ययुगस्यास्ति कः संख्यातुं गुणान् क्षमः ॥
अधर्म्माचरणं तत्र जनाः केचिन्न कुर्व्वते ॥ * ॥
त्रेतायुगे समायाते धर्म्मः पादोनतां गतः ।
अल्पक्लेशान्विता लोकाः केचित् केचिद्दयाश्रयाः ।
विष्णुध्यानरता लोका यज्ञदानपरायणाः ।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः ॥
क्षत्रा भूमिभुजः शूद्राः सर्व्वे ब्राह्मणसेविनः ।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः ॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः ।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः ॥
कालवर्षी तडित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः ।
वसुन्धरा च शस्याढ्या पुत्त्राश्च पितृसेविनः ॥*॥
त्रेतायुगस्यावसाने द्वापरे युग आगते ।
द्विपादो भगवान् धर्म्मः सुखदुःखान्विता नराः ॥
केचित् केचित् पापरताः केचिद्धर्म्मरतास्तथा ।
केचित् केचित् गुणैर्हीनाः केचित् केचिन्महा-
गुणाः ॥
अत्यन्तदुःखिनः केचित् केचित् चातिधनास्तथा ।
प्रतिग्रहे ब्राह्मणाश्च कदाचित् कुर्व्वते स्पृहाम् ।
भूभुजा धनलोभेन कदाचिद्दण्ड्यते प्रजाः ।
विष्णुपूजापरा विप्राः शूद्राश्च द्विजसेविनः ॥
तदा विष्णुर्व्यासरूपी वेदभागं चकार ह ॥*॥
कलौ युगे च विप्रेन्द्र ! सर्व्वपापैकमन्दिरे ।
एकपादोऽभवद्धर्म्मः सर्व्वे पापरता जनाः ॥
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राः पापपरायणाः ।
निजाचारविहीनाश्च भविष्यन्ति कलौ युगे ॥
विप्रा वेदविहीनाश्च प्रतिग्रहपरायणाः ।
अत्यन्तकामिनः क्रूरा भविष्यन्ति कलौ युगे ॥

परान्नलोलुपा नित्यं सर्वोत्तमपराङ्मुखाः ।
पाषण्डसङ्गशुश्रूषाश्च भविष्यन्ति कलौ युगे ॥
वित्तार्थं ब्राह्मणाः केचिन्महाकपटधर्म्मिणः ।
रक्ताम्बरा भविष्यन्ति जटिलाः श्मश्रुधारिणः ।
कलौ युगे भविष्यन्ति ब्राह्मणाः शूद्रधर्म्मिणः ॥
शूद्राश्च दीक्षागुरवो नित्यं ब्राह्मणधर्म्मिणः ।
कलौ यास्यन्ति निर्व्वृता उत्तमा अपि नीचताम् ॥
नीचाश्च धनसम्पन्ना यास्यन्त्युच्चपदं प्रति ।
प्रदास्यन्त्युपकारिभ्यो दानानि सकला जनाः ॥
यत्नादपि च नेष्यन्ति वृषला विप्रवर्त्तनम् ।
मित्रस्नेहाद्द्विषिष्यन्ति कुमाराश्च कलौ जनाः ॥
अधर्म्मबुद्धिदातारो धर्म्मबुद्धिविलोपिनः ।
परोक्षनिन्दकाः क्रूराः संमुखप्रियवादिनः ॥
परस्त्रीहिंसकाश्चैव मिथ्यावचनभाषिणः ।
भविष्यन्ति कलौ विप्राः परवित्ताभिलाषिणः ॥
गृहमायान्तमतिथिं समाराध्य विधानतः ।
धनलोभाद्वधिष्यन्ति नरा नरकभागिनः ।
स्त्र्युपजीविनश्चैव भविष्यन्ति कलौ युगे ॥
स्त्रीजिताः पुरुषाः सर्व्वे स्त्रियोऽप्यत्यन्तचञ्चलाः ।
दुर्नीतिव्याधिते तासां स्वामिनश्च न संशयः ।

जैमिनिरुवाच ।

मनःशुद्धिविहीनत्वात् सर्व्वेषां प्राणिनां मुने ! ।
अतः सर्व्वं त्वया प्रोक्तं मनो विस्मयदं मम ॥
कर्म्मी सर्व्वे भविष्यन्ति मनःशुद्धिविवर्जिताः ।
तेषां यथा भवेत् कर्म्म सफलं ब्रूहि तद्गुरो ! ।

व्यास उवाच ।

अनर्पितन्तु यत् कर्म्म तद्व्यर्थं निष्फलं खलु ।
शृणु च मनसा विप्र ! यदहं कथ्यते मया ॥
विष्णुभक्तिमतो पुंसो न किञ्चिद्विफलं भवेत् ।
इति ते कथितं सर्व्वं यत्त्वं ब्राह्मणसत्तम ! ।
यत् श्रुत्वा भक्तिभावेन नरो मोक्षमवाप्नुयात् ॥"
इति पाद्मे क्रियायोगसारे २५ अध्यायः ॥ * ॥

अपि च ।

"कृते धर्म्मश्चतुष्पाच्च सत्यं दानं तपो दया ।
धर्म्मपाता हरिः श्वेतः सन्तुष्टा ज्ञानिनो नराः ।
चतुर्वर्षसहस्राणि नरा जीवन्ति वै तदा ।
कृतान्ते क्षत्रियैर्विप्रा विट्शूद्राश्च जिता द्विजैः ।
शूरस्य प्रवनिः पुत्रो विष्णुः सर्व्वं चचार ह ॥*॥
त्रेतायुगे त्रिपाद्धर्म्मः सत्यदानदयात्मकः ।
नरा यज्ञपरास्तत्र क्षत्रियोद्भवं जगत् ।
रक्तो हरिर्व्रतैः पूज्यो नरा दशशतायुषः ।
तत्र विष्णुर्भीमरथः क्षत्रियो रावणान्तकृत् ॥*॥
द्विपाच्च द्वापरे धर्म्मः पीततां चाच्युते गते ।
चतुःशतायुषो लोका द्विजक्षत्रपराः प्रजाः ॥
नरा ह्यल्पबुद्धींश्च विष्णुर्व्यासस्वरूपधृक् ।
तद्वेदन्तु यजुर्वेदं चतुर्धा विभजत् पुनः ।
शिष्यानध्यापयामास नामतस्तान्निबोध मे ।
ऋग्वेदमथ पैलकं सामवेदञ्च जैमिनिम् ।
अथर्व्वाणं सुमन्तुन्तु यजुर्वेदं महामुनिम् ।
वैशम्पायनसंज्ञन्तु पुराणं सूतमेव च ।
अष्टादश पुराणानि येषु वै वर्णितेन हि ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा ।
भविष्यं नारदीयञ्च पुराणञ्चेति विस्तरम् ॥
मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्त्तमेव च ।
कौर्म्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम् ॥
अष्टादशं समुद्दिष्टं ब्रह्माण्डमिति संज्ञितम् ।
अन्यान्युपपुराणानि मुनिभिः कथितानि तु ॥
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम् ॥
कापिलं वामनञ्चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च ॥
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम् ।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥
पुराणं धर्म्मशास्त्रञ्च वेदा अङ्गानि यत्सुते ! ।
न्यायः शौनक ! मीमांसा आयुर्व्वेदार्थशास्त्रकम् ।
गान्धर्व्वञ्च धनुर्व्वेदो विद्या ह्यष्टादश स्मृताः ।
द्वापरान्ते स च हरिर्भुवो भारमपाहरत् ॥*॥
एकपादस्थिते धर्म्मे कृष्णताञ्चाच्युते गते ।
जनास्तदा दुराचारा भविष्यन्ति च निर्द्दयाः ॥
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः ॥
यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ! ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरन्तद्रजस्तमः ॥
यदा सदानृतं तन्द्रीनिद्राहिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥
यस्मिन् जनाः कामिनोऽपि शश्वत्कटुकभाषिणः ।
दस्युत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः ॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ।
अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥
तपस्विनो ग्रामवासा न्यासिनो नित्यलोलुपाः ।
ह्रस्वकाया महाहाराश्चौर्य्यमायोरुसाहसाः ॥
त्यक्ष्यन्ति भृत्याश्च पतिं भृत्यं भर्त्तार एव च ।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः ॥
उद्विग्नाश्चान्नदुष्काराः पिशाचसदृशाः प्रजाः ।
अस्नातभोजनेनाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम् ।
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक ! ।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ॥
शिरःकण्डूयनपरा आज्ञां भेत्स्यन्ति सत्पतेः ।
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः ॥
कलेर्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः मखम् ।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात् ॥
तस्माद्ध्येयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक ।"
इति गारुडे युगधर्म्माः । २२० अध्यायः ॥

युगः, पुं, (युज्यते, बलीवर्दौ अनेन । युज + घञ् । युजेर्घञन्तस्य नियातनात् ... इति काशिका । ६ । १ । १६० ।) ... च्छन्नम् । इति मेदिनी । गे, १८ । ... इति भाषा । (यथा,—
"नावेव नः पारयतं युगेव
नभ्येव न उपधीव प्रधीव ।"
इति ऋग्वेदे । २ । ३९ ॥
"युगा इव यथा रथस्य युगे नभ्या इ..."
तद्भाष्ये सायणः ॥ तथा च कथासरि...
६० । १२ ।
"तस्यैकदा वणिज्यार्थं गच्छतो मुहुर्मु...
भारवोढा युगं कर्षन् भारेण युगमध्य...

युगकीलकः, पुं, (युगस्य कीलकः ।) युग... कीलकः । जोयालेर खिल इति ... तत्पर्य्यायः । शम्या २ । इत्यमरः । २ । ८ ।...

युगन्धरः, पुं, (युगं धारयतीति । धारि + "सं... भृतृवृजिधारिसहितपिदमः ।" ३।२।४६। ... खच् । "अरुर्द्विषदजन्तस्य मुम् ।" ६।३।६७। ... मुम् ।) यत्र रथस्य युगकाष्ठमाबध्य... रथस्वामी यत्र बध्नन्ति तद्युगकाष्ठं ... धरति युगन्धरः । इति भरतः । तत्पर्य्या... कूबरः २ । इत्यमरः । २ । ८ । ५७ । ... विशेषः । यथा,—
"निषधो माल्यवान् विन्ध्यो हेमकूटो युग...
इति शब्दरत्ना...
(तुविषुत्रः । स च माद्रके यौध...
हरिवंशे । १६० । ३१ ।
"तुविषुतान्धरः पुत्र इति वंशः समाप्त...

युगपत्, व्य, एकदा । एककालीनम् । इति ... ४ । २२ ॥ (यथा, भागवते । ३ । ६ ।...
"कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरु...
त्रयोविंशतितत्त्वानां गणं युगपदावि...

युगपत्त्रः, पुं, (युगं पत्रमस्य ।) कोविदा... इति हेमचन्द्रः । ४ । २१८ । युग्मपर्णश्च...

युगपत्रकः, पुं, (युगपत्र + स्वार्थे कन् ।) को... वृक्षः । इत्यमरः । २ । ४ । २२ । (यथास्य प...
"कोविदारश्चमरिकः कुद्दालो युगपत्र...
कुद्दली ताम्रपुष्पश्च स्वल्पकः स्वल्पकेश...
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भ...

युगपत्रिका, स्त्री, (युगं पत्रमस्याः । कप्... अकारस्येत्त्वञ्च ।) शिंशपावृक्षः । इति ... शेषः ॥ (विवरणमस्याः शिंशपाशब्दे ज्ञ...

युगपार्श्वगः, पुं, (युगस्य पार्श्वं ग... गम् + डः ।) अभ्यासार्थं लाङ्गलपार्श्वे ... पाँटि बाँधा गरु इति भाषा । तत्पर्य्या... वाट् ४ । इत्यमरः । २ । ९ । ६४ ।

युगलं, क्ली, (युज्यते परस्परं मिथः... + वृषादिभ्यः कलच् । ... युग्मम् । इत्यमरः । २।५।१८ ॥ (यथा, ... ४ । २६ । २० ।
"प्रफुल्ल पादयुगलमाद्य चोत्सङ्गगानि...

न्तः, पुं, (युगस्यान्तो यत्र । प्रागयादिवत्
गमः ।) प्रलयोत्तरकालकाल: । यथा,—
ं रसान्तं परमं ज्योतिरारोहणाश्रयम् ।
संयुक्तानि सर्वाणि प्रणतिं शरणागतिम् ॥
ाम पतन्ती मध्ये शान्ति गतं मर्येति ति ।
ाम पतन्ती यन्मी शान्ति नमिं कश्चन ॥
ंचो हाममन्तानी मति मनमंशतम् ।
तं हि मर्तम: सिद्धं लाभधामधुकमम् ॥
ंती युगानां मन्तं याति परतरं तृप ।।
ाद्युगान्तमं जातु श्रियं गतद्यामये: ॥"
इति याज्ञोपाख्याने ८५ अध्याय: ॥
न्तः, पुं, (युगान्तमिवाभाति यस्य ।) पर्यं र-
न: । इति राजनिर्घण्ट: ॥ थि, युगनायक: ॥
यथ:, पुं, (युगस्य अंशाय: सुदीर्घ: इति ।)
सर: । इति धाराबली ।२८। युगविभागकथा ॥
द्या, स्त्री, (युगस्याद्यादिभूता ।) युगारम्भ-
ादि: । यथा । "अथ युगाद्या: । तास्र च ।
युगाद्या वर्षवृद्धिश्च सप्तमी पार्श्वतोप्रिया ।
देवदयसीशन्ते न तत्र तिथियुग्मता ॥'
इत्यनेन वचनेन ॥
ब्रह्मपुराणे ।
वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्तिके शुक्लपक्षे तु त्रेताय नवमेऽहनि ॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम् ।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम् ॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुता: ॥'
अत्र वैशाखादय: पौर्णमास्यन्ता एव । मत्स्य-
पुराणे तथैव तिथिकृत्याभिधानात् । शुक्ल-
पाश्विने कार्तिके नवमेऽप्यौत्सवेनेष्टसिद्धौ शुक्ल-
पक्ष इति वर्षं स्यात् । तेन भाद्रकृष्णत्रयोदशी
माघशुक्लपञ्चदशीचेति मैथिलोक्तं निरस्तम् ॥"
तासां प्रशंसामाह विष्णुपुराणम् ।
'वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे ॥
एता युगाद्या: कथिता: पुराणै-
रनन्तपुण्यास्तिथयश्चतस्र: ।
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च ॥'
उपप्लवे ग्रहणे ।
'पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्य: प्रयतो मनुष्य: ।
श्राद्धं कृतं तेन समा: सहस्रं
रहस्यमेतत् पितरो वदन्ति ॥'
स्नानमधिकृत्य भविष्ये ।
संवत्सरफलं तत्र नवम्यां कार्तिके तथा ।
मन्वादौ च युगादौ च मासत्रयफलं लभेत् ॥"
इति तिथ्यादितत्त्वम् ॥
ान्तः, पुं, (युगानामन्तो यत्र । युगानामन्तो
वा ।) प्रलय: । इति हलायुध: ॥ (यथा, महा-
भारते । ५ । १८ ६५ ।

"उदर्कयम् इत्युर्याम् शनैगम्
प्रवर्तयन् युगवन्द्युगानि ।
यदा धर्माद्यविनत् शैरदर्शी-
यादा गदा धार्तराष्ट्र: मघुज: ॥)
युगेऽपि च ॥
युग्मं, क्ली, (युज्यते इति । युज् + "युजिरुचि-
तिजां कुश्च ।" उणा० १।१४५ । इति मक् ।)
द्वयम् । योड़ा इति भाषा । तत्पर्याय: । द्वन्द्वम् २
युगलम् ३ युगम् ४ । इत्यमर: । २ । ५ । ३८ ॥
(यथा, रामायणे । २ । ९१ । ७६ ।
"पादुकोपानहाश्चैव युग्मान्यत्र सहस्रश: ॥")
द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशराशय: । यथा
"भूयोऽथ सौम्य: पृथयोऽङ्गना च
स्त्रीसोऽथ युग्मं विषम: समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमश: प्रदिष्टा: ॥"
इति ज्योतिस्तत्त्वम् ॥
(द्वितीया ।) मेलनम् । यथा,—
"युग्माग्निकृतभूतानि षण्मुन्योर्वसुरन्ध्रयो: ।
रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा ॥
प्रतिपदाप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम् ॥
द्वितीयातृतीययोश्चतुर्थीपञ्चम्यो: षष्ठीसप्तम्यो-
रष्टमीनवम्योरेकादशीद्वादश्यो: चतुर्दशीपौर्ण-
मास्यो: प्रतिपदमावास्ययोर्युग्मं मेलनम् । तत्त-
त्तिथिमात्रनिमित्तकं कर्मणि महाफलम् ।
एतत् प्रयोजनन्तु तिथिविशेषविहिते कर्मणि
तिथिरयुग्मविशेषनियमनम् । अतिथ्या कर्मानि-
र्वाहे गद्यायभावेनाप्तिमत्युग्मेत्युपवासा-
द्याचरणञ्च ।" इति तिथ्यादितत्त्वम् ॥ (द्वय-
विशिष्टे, त्रि । यथा, मनु: । ३ । ४८ ।
"युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्मात् युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ॥")
युग्मपत्र:, पुं, (युग्मं पत्रमस्य ।) रक्तकाञ्चनवृक्ष: ।
इति रत्नमाला ॥ (युग्मं पत्रम् ।) युगलपर्णी, स्त्री ॥
युग्मपत्रिका, स्त्री, (युग्मं पत्रमस्या: । "शेषाद्वि-
भाषा ।" ५ । ४ । १५४ । इति कप् । टापि अत
इत्वम् ।) शिंशपावृक्ष: । इति शब्दरत्नावली ॥
(विवरणमस्या: शिंशपाशब्दे ज्ञातव्य: ॥)
युग्मपर्ण: पुं, (युग्मं पर्णमस्य ।) कोविदारवृक्ष:
सप्तपर्णवृक्ष: । इति राजनिर्घण्ट: ॥
युग्मफला, स्त्री, (युग्मं फलमस्या: ।) इन्द्रचिर्भिटी ।
वृश्चिकाली । इति राजनिर्घण्ट: ॥ गन्धिका ।
इति रत्नमाला ॥
युग्मादर:, पुं, (युग्मस्यादर: ।) तिथिविशेषयोगेन
तिथिरयुग्मविशेषस्यादरणम् । यथा । "पञ्चमी
सप्तमी चैवेत्यादिना विशेषत: सायाह्नव्यापि-
तिथेरेवेत्यादुपवासेऽपि न रात्रियुग्मादर: ।"
इति तिथ्यादितत्त्वम् ॥ अस्य विवरणं युग्मशब्दे
द्रष्टव्यम् ॥
युग्मादरणं, क्ली, (युग्मस्यादरणम् ।) युग्मतिथि-
पूज्यता । यथा,—

"निमन्त्रणापिनी या तु नैव पूज्या सदा तिथि: ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥"
इति तिथ्यादितत्त्वम् ॥
युग्यं, क्ली, (युगाय हितम् । युग + "उगवादिभ्यो
यत् ।" ५ । १ । २ । इति यत् । युगमर्हतीति
वा । दण्डादित्वात् यत् । यद्वा, युज्यत इति ।
युज् + "युग्यं च पत्रे ।" ३ । १ । १२१ । इति
क्यबन्तो निपातित: ।) वाहनम् । यानम् ।
इत्यमर: ।२।८।५८ ॥ (यथा, महाभारते । ३ ।
५९ । ९ ।
"हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम् ।
आविष्ट: कलिना द्यूते जीयते स्म नलस्तदा ॥"
यथा च मनौ । ८ । २९३ ।
"यत्रापवर्तते युग्यं वैगुण्यात् प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥"
वाच्यलिङ्गेऽपि दृश्यते । यथा, "युग्यो गौ: ।
युग्योऽश्व: । युग्या हस्ती ।" इति काशिका ।
३ । १ । १२१ ॥)
युग्य:, पुं, (युगं वहतीति । युग + "तद्वहति रथ-
युगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत्प्रत्यय: ।)
युगवोढ़ा । इत्यमर: ।२।८।६४॥ ("रथं वहतीति
रथ्य: युग्य: प्रासङ्ग्य: ।" इति काशिका ॥)
युज् [ज्] त्रि, (युजिर् योगे + क्विन् । "युजेर-
समासे ।" ७ । १ । ७१ । इति नुमागम: ।)
योगकर्त्ता । मेलनकर्त्ता । इति मुग्धबोध-
व्याकरणम् ॥ (यथा, भट्टिकाव्ये । ६ । ११८ ।
"गुहाया निरगादाली सिंहो मृगमिव द्रावन् ।
भ्रातरं युद्भिय: संख्ये योधैश्चापूरयन्दिश: ॥"
युग्मम् । यथा, मनौ । ३ । २७७ ।
"युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते ।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्क-
लाम् ॥"
सम: । स च छन्दसि द्वितीयचतुर्थपादरूप: ।
यथा, छन्दोमञ्जर्य्याम् । ३ । १ ।
"त्रिपदे यदि सौ सलगा द्वे
भौ युजि भाद्गुरुकावुपचित्रम् ॥")
युञ्जी, [न्] पुं, वर्णसङ्करजातिविशेष: । स तु
गङ्गापुत्रकन्यायां वेशधारिणो जात: । यथा,—
"गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिण: ।
बभूव वेशधारी च पुत्रो युञ्जी प्रकीर्त्तित: ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥
युच्छ, प्रमादे । इति कविकल्पद्रुम: ॥ (भ्वा०-
पर०-अक०-सेट् ।) अन्त:स्थाद्यादि: पञ्चम-
स्वरी । प्रमादोऽनवधानता । युच्छति पापं
साधु: । ओष्ठ्यवर्गाद्यादिरिति रमानाथ: ।
पचादित्वादनि पुच्छो लाङ्गूलम् । ओष्ठ्यवर्ग-
शेषादिरिति त्रिलोचन: । सुच्छति । इति
दुर्गादास: ॥
युज, इर् ध ञ औ युतौ । इति कविकल्पद्रुम: ॥
(रुधा०-उभ०-सक०-अनिट् ।) इर्, अयुजत्
अयौक्षीत् । ध, युनक्ति युङ्क्ते घृतेनान्नं लोक: ।
औ, योक्ता । इति दुर्गादास: ॥

परान्नलोलुपा नित्यं तपोव्रतपराङ्मुखाः।
पाषण्डसङ्गनुमाश्च भविष्यन्ति कलौ युगे॥
वित्तार्थं ब्राह्मणाः केचिन्महाकपटधर्म्मिणः।
वल्काधरा भविष्यन्ति जटिलाः श्मश्रुधारिणः।
कलौ युगे भविष्यन्ति ब्राह्मणाः शूद्रधर्म्मिणः॥
शूद्राश्च दीक्षागुरवो नित्यं ब्राह्मणधर्म्मिणः।
कलौ यास्यन्ति निर्वृत्ता उत्तमा अपि नीचताम्॥
नीचाश्च धनसम्पन्ना यास्यन्त्युच्चपदं प्रति।
प्रदास्यन्त्युपकारिभ्यो दानानि सकला जनाः॥
यत्नादपि च नेष्यन्ति वृषला विप्रवर्त्तनम्।
मित्रस्नेहाद्दरिष्यन्ति कुत्सात्रश्च कलौ जनाः॥
अधर्म्मबुद्धिदातारो धर्म्मबुद्धिविलोपिनः।
परोक्षनिन्दकाः क्रूराः संमुखप्रियवादिनः॥
परश्रीहिंसकाश्चैव मिथ्यावचनभाषिणः।
भविष्यन्ति कलौ विप्राः परवित्ताभिलाषिणः॥
एकमायान्नमतिथिं समाराध्य विधानतः।
धनलोभाद्भविष्यन्ति नरा नरकभागिनः।
अलोभजीविनश्चैव भविष्यन्ति कलौ युगे॥
स्त्रीजिताः पुरुषाः सर्व्वे स्त्रियोऽप्यत्यन्तचञ्चलाः।
दुर्गीनिर्व्वाधिते नाशो स्वामिनश्च न संशयः॥
जैमिनिरुवाच।
मनःशुद्धिविहीनत्वात् सर्व्वेषां प्राणिनां मुने!।
अतः सर्व्वं त्वया प्रोक्तं मनो विस्मयदं मम॥
कलौ सर्व्वे भविष्यन्ति मनःशुद्धिविवर्जिताः।
तेषां यथा भवेत् कर्म्म सफलं ब्रूहि तद्गुरो!॥
व्यास उवाच।
अनर्पितन्तु यत् कर्म्म तद्भवेन्निष्फलं खलु।
कर्केन मनसा विप्र! सुदृढं कथ्यते मया।
विष्णुभक्तिमतां पुंसां न किञ्चिद्विफलं भवेत्।
इति ते कथितं सर्व्वं यत्कं ब्राह्मणसत्तम!।
यत् श्रुत्वा भक्तिभावेन नरो मोक्षमवाप्नुयात्॥"
इति पाद्मे क्रियायोगसारे २५ अध्यायः॥*॥
अपि च।
"कृते धर्म्मश्चतुष्पाच्च सत्यं दानं तपो दया।
धर्म्मपाता हरिः श्वेतः सन्तुष्टा ज्ञानिनो नराः।
चतुर्व्वर्षसहस्राणि नरा जीवन्ति वै तदा।
कृतान्ते क्षत्रियैर्विप्रा विट्शूद्राश्च जिता द्विजैः।
क्रूरस्य प्रहर्त्ता पुंसो विष्णुः स्वर्गं जघान ह॥*॥
त्रेतायुगे त्रिपाद्धर्म्मः सत्यदानदयात्मकः।
नरा यज्ञपराश्चासिंस्तथा याज्ञवं जगत्।
रक्तो हरिर्नरैः पूज्यो नरा दशशतायुषः।
तत्र विष्णुर्भगीरथः क्षत्रियो रावणादहन्॥*॥
द्विपाच्च द्वापरे धर्म्मः पीतताञ्चाच्युते गते।
चतुःशतायुषो लोका द्विजक्षत्रपराः प्रजाः।
तदा ह्युत्पत्तुरीष विष्णुर्व्यासस्वरूपधृक्।
तदेकन्तु यजुर्व्वेदं चतुर्धा व्यभजत् पुनः॥
शिष्यानध्यापयामास सामगत्वादिबोध मे।
अथर्व्वञ्च पैलस्यं साम वैशम्पायनं जैमिनिम्।
अथर्व्वाणं सुमन्तुं यजुर्व्वेदं महामुनिम्।
लैकव्यावर्त्तनन्तु पुराणं सूतमेव च।
अष्टादश पुराणानि वेदु वै धारितानि वि।
ब्राह्मञ्च ब्रह्मवैवर्त्तं ब्राह्मं सनत्कुमारादि च।
वंशानुचरितश्चैव पुराणं पञ्चलक्षणम्॥
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा।
भविष्यं नारदीयञ्च पुराणञ्चेति विस्तरम्॥
मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्त्तमेव च।
कौर्म्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम्॥
अष्टादशं समुद्दिष्टं ब्रह्माण्डमिति संज्ञितम्।
अन्यान्युपपुराणानि मुनिभिः कथितानि तु॥
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम्॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च॥
माहेश्वरं तथा साम्बं सौरं सर्व्वार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥
पुराणं धर्म्मशास्त्रञ्च वेदा अङ्गानि यन्मुने!।
न्यायः शौनक! मीमांसा आयुर्व्वेदार्थशास्त्रकम्।
गान्धर्व्वञ्च धनुर्व्वेदो विद्या ह्यष्टादश स्मृताः।
द्वापरान्ते स च हरिर्भुवो भारमपाहरत्॥*॥
एकपादस्थिते धर्म्मे कृष्णताञ्चाच्युते गते।
जनास्तदा दुराचारा भविष्यन्ति च निर्द्दयाः॥
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः॥
यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनाम्।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक!॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः।
कर्म्मणाञ्चापि काम्यानां द्वापरन्तद्रजस्तमः॥
यदा सदानृतं तन्द्रीनिद्राहिंसादिसाधनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥
यस्मिन् जनाः कामिनोऽपि शश्वत्कटुकभाषिणः।
दस्युत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः।
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः॥
तपस्विनो ग्रामवासा न्यासिनो नित्यलोलुपाः।
ह्रस्वकाया महाहारा चौर्य्यमायोरुसाहसाः॥
त्यक्ष्यन्ति भृत्याश्च पतिं भृत्यं भर्त्तार एव च।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः॥
उद्विग्नाश्चानलङ्काराः पिशाचसदृशाः प्रजाः।
अस्नातभोजनेनाग्निदेवतातिथिपूजनम्।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्॥
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक!।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः॥
शिरःकण्डूयनपरा आज्ञां भेत्स्यन्ति सत्पतेः।
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः॥
कलेर्द्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः फलम्।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्॥
तस्मात् ध्येयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक।"
इति गारुडे युगधर्म्माः। २२७ अध्यायः॥

युगः, पुं, (युज्यते, वर्त्तोरक्षौ ... युज् + घञ्। ... इति काशिका। ६। १। १६०।) ... युग्मम्। इति मेदिनी। गे, १८। ... इति भाषा। (यथा,—
"नावेव नः पारयतं युगेव
नभ्येव न उपधीव प्रधीव।"
इति ऋग्वेदे। २।
"युगा इव यथा रथस्य युगे नभ्या इव। तद्वाच्ये सायणः। तथा च कथार्ण... ६०। १२।
"तस्यैकदा वणिज्यार्थं गच्छतो ...
भारवोढ़ा युगं कर्षन् भारेण युगभग्न।
युगकीलकः, पुं, (युगस्य कीलकः।) कीलकः। जोयालेर खिल इति भाषा। तत्पर्य्यायः। शम्या २। इत्यमरः। २। ८। ५७।
युगन्धरः, पुं, (युगं धारयतीति। धारि + भृतृवृजिधारिसहितपिदमः।" ३। २। ४६। खच्। "अरुर्द्विषदजन्तस्य मुम्।" ६। ३। ६७। मुम्।) यत्र रथस्य ... रथस्याश्वा यत्र बध्यन्ते तद्युगकाष्ठं धरति युगन्धरः। इति भरतः। कूबरः २। इत्यमरः। २। ८। ५८। विशेषः। यथा,—
"निषधो माल्यवान् विन्ध्यो ...
इति ...
(वृष्णिपुत्रः। स च सात्यकेः पौत्रः। हरिवंशे। १६०। ३१।
"तूर्णेर्युगन्धरः पुत्र इति वंशः समाप्यते।
युगपत्, अ, एकदा। एककालीनम्। इत्यम... ४। २२। (यथा, भागवते। १। १६। ११।
"कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमु...
मयोर्विश्रसितस्त्वानां गत्वं युगपदाविश...
युगपत्रः, पु, (युगं पत्रमस्य।) को... इति हेमचन्द्रः। ४। ११८।
युगपत्रकः, पुं, (युगपत्र + स्वार्थे कन्।) ... वृक्षः। इत्यमरः। २। ४। २२। (यथास्य पर्य्या...
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्च अश्मन्तकः स्वल्पकेशरी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
युगपत्रिका, स्त्री, (युगं पत्रमस्याः। कप्। अकारस्येत्त्वञ्च।) शिंशपावृक्षः। इति त्रि... शेषः। (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यम्।)
युगपार्श्वगः, पु, (युगस्य पार्श्वं गच्छति। गम् + डः।) अभ्यासार्थं लाङ्गलपार्श्वे पाँटे बाँधा गरु इति भाषा। तत्पर्य्यायः। वाट् २। इत्यमरः। २। ९। ६२।
युगलं, क्ली, (युज्यते परस्परं संगच्छते इति। + वृषादिभ्यः कलच्। न्यङ्क्वादित्वात् कुत्वम्।) युग्मम्। इत्यमरः। ३। ५। १८। (यथा, ... ४। २६। २०।
"मत्पार्श्वं पादयुगलमाह चोत्तुङ्गवाचिनाव...

...न्तकः, पुं, (युगान्तस्य अन्तकः । प्रलयादित्यवत् तापकः ।) प्रलयकालादित्यसमः । यथा,—
"इदं स्थानं परमं प्रलयकालादित्यसमम् ।
...ज्वलयामि अस्त्राणि प्रदर्शय शरस्याग्निम् ॥
...दृश्यते परमो गन्धो नाति रुग्णं भवीसि मे ।
...दृश्यते परमो धर्म्मो नाति लौकिक कल्प ॥
...र्णवो हन्तमस्मात्तौ साधु तस्यांशकम् ।
...सर्व्वं हि महेशः क्षिप्तं लालकमद्भुतम् ॥
...माङ्गतो द्वतं सर्व्वं पार्थं परमं नृप ॥
...गुणाद्गुणगमं चाशु दिव्यं नमद्भुतासनैः ॥"
इति पाद्मोत्तरखण्डे ७४ अध्यायः ॥
...ल्माक्षः, पुं, (युगलमिवाक्षि यस्य ।) मत्कुण-वृक्षः । इति राजनिर्घण्टः ॥ त्रि, युगमात्रकः ॥
...शकः, पुं, (युगस्य अंशकः षड्भागः इति ।) वत्सरः । इति हारावली । २८ ॥ युगविभागकत्वात् ॥
[युगा]द्या, स्त्री, (युगस्याद्या आदिभूता ।) युगारम्भ-तिथिः । यथा । "अथ युगाद्याः । तास्तु च । 'युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥' इत्यनेन वचसा ॥ ब्रह्मपुराणे ।
'वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्त्तिके शुक्लपक्षे तु त्रेतायां नवमेऽहनि ॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम् ।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम् ॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः ॥'
अत्र वैशाखादयः पौर्णमास्यन्ता एव । ब्रह्म-पुराणे तथैव तिथिकृत्याभिधानात् । तत्र-वाचित्वे कार्त्तिके नवमेऽहनीत्यनेनैवोक्तिर्गौणी शुक्ल-पक्ष इति व्यर्थं स्यात् । तेन भाद्रकृष्णत्रयोदशी अन्यथाकृष्णपक्षीयेति मैथिलोक्तं निरस्तम् ॥ श्राद्धप्रशंसामाह विष्णुपुराणम् ।
'वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे ॥
एता युगाद्याः कथिताः पुराणे-
ष्वनन्तपुण्यास्तिथयश्चतस्रः ।
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च ॥'
उपप्लवे ग्रहणे ।
'पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति ॥'
स्नानमधिकृत्य भविष्ये ।
संवत्सरफलं तत्र नवम्यां कार्त्तिके तथा ।
मन्वादौ च युगादौ च मासत्रयफलं लभेत् ॥"
इति तिथ्यादितत्त्वम् ॥
युगान्तः, पुं, (युगानामन्तो यत्र । युगानामन्तो वा ।) प्रलयः । इति हलायुधः ॥ (यथा, महा-भारते । ५ । ४८ । ६५ ।
"उदीर्णवत् दग्धुमिवाशु सैन्यान्
प्रवर्त्तयन् युगान्तवद्युगान्ते ।
यदा धनञ्जयमिव पौरदेवा-
स्तदा तप्ता धार्त्तराष्ट्रः सपुत्रः ॥)
युगशब्दश्च ॥
युग्मं, क्ली, (युज्यते इति । युज् + "युजिरुचि-तिजां कुश्च ।" उणा० १ । १४५ । इति मक् ।) द्वयम् । योड़ा इति भाषा । तत्पर्यायः । द्वन्द्वम् २ युगलम् ३ युगम् ४ । इत्यमरः । ३ । ५ । ८ ॥ (यथा, रामायणे । ७ । ८१ । ७६ ।
"पादुकोपानहाश्चैव युग्मान्यत्र सहस्रशः ॥")
द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशराशयः । यथा
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥
(द्वितीया ।) मेलनम् । यथा,—
"युग्माग्नियुगभूतानि षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा ॥
प्रतिपदाप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम् ॥
द्वितीयातृतीययोश्चतुर्थीपञ्चम्योः षष्ठीसप्तम्यो-रष्टमीनवम्योरेकादशीद्वादश्योः चतुर्दशीपौर्ण-मास्योः प्रतिपदमावास्ययोर्युग्मं मेलनम् । तत्त-त्तिथिमात्रनिमित्तके कर्म्मणि महाफलम् । एतत् प्रयोजनन्तु तिथिविशेषविहिते कर्म्मणि तिथिसत्त्वविशेषनियमनम् । अतिथ्या कर्म्मानि-र्व्वाहे प्रत्यवायभावेनाग्निमत्प्रवेशादुपवासा-द्याचरणञ्च ।" इति तिथ्यादितत्त्वम् ॥ (द्वय-विशिष्टे, त्रि । यथा, मनुः । ३ । ४८ ।
"युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥")
युग्मपत्रः, पुं, (युग्मं पत्रमस्य ।) रक्तकाञ्चनवृक्षः । इति रत्नमाला ॥ (युग्मं पत्रम् ।) युगलपत्रे, क्ली ॥
युग्मपत्रिका, स्त्री, (युग्मं पत्रमस्याः । "शेषाद्वि-भाषा ।" ५ । ४ । १५४ । इति कप् । टापि अत इत्वम् ।) शिंशपावृक्षः । इति शब्दरत्नावली ॥ (विषयोऽस्याः शिंशपाशब्दे ज्ञातव्यः ॥)
युग्मपर्णः, पुं, (युग्मं पर्णमस्य ।) कोविदारवृक्षः सप्तपर्णवृक्षः । इति राजनिर्घण्टः ॥
युग्मफला, स्त्री, (युग्मं फलमस्याः ।) इन्द्रचिर्भिटी । वृश्चिकाली । इति राजनिर्घण्टः ॥ गन्धिका । इति रत्नमाला ॥
युग्मादरः, पुं, (युग्मस्यादरः ।) तिथिविशेषयोगेन तिथिसत्त्वविशेषस्यादरणम् । यथा । "पञ्चमी सप्तमी चैवेत्यादिना विशेषतः सायाह्नव्यापि-तिथेर्ग्रहणादुपवासेऽपि न रात्रियुग्मादरः ।" इति तिथ्यादितत्त्वम् ॥ अस्य विवरणं युग्मशब्दे द्रष्टव्यम् ॥
युग्मादरणं, क्ली, (युग्मस्यादरणम् ।) युग्मतिथि-पूज्यता । यथा,—
"विनष्टकादिशेषा या तु सैव पूज्या सदा तिथिः ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥"
इति तिथ्यादितत्त्वम् ॥
युग्यं, क्ली, (युगाय हितम् । युग + "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् । युगमर्हतीति वा । दण्डादित्वात् यत् । यद्वा, युज्यते इति । युज् + "युग्यं च पत्रे ।" ३ । १ । १२१ । इति क्यबन्तो निपातितः ।) वाहनम् । यानम् । इत्यमरः । २ । ८ । ५८ ॥ (यथा, महाभारते । ३ । ५९ । ६ ।
"हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम् ।
आविष्टः कलिना द्यूते जीयते स्म नलस्तदा ॥"
यथा च मनौ । ८ । २९३ ।
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥"
वाच्यलिङ्गोऽपि दृश्यते । यथा, "युग्यो गौः । युग्योऽश्वः । युग्यो हस्ती ।" इति काशिका । ३ । १ । १२१ ॥)
युग्यः, पुं, (युगं वहतीति । युग + "तद्वहति रथ-युगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत्प्रत्ययः ।) युगवोढा । इत्यमरः । २ । ८ । ६४ ॥ ("रथं वहतीति रथ्यः युग्यः प्रासङ्ग्यः ।" इति काशिका ॥)
युज् [ज्] त्रि, (युजिर् योगे + क्विन् । "युजेर-समासे ।" ७ । १ । ७१ । इति नुमागमः ।) योगकर्त्ता । मेलनकर्त्ता । इति मुग्धबोध-व्याकरणम् ॥ (यथा, भट्टिकाव्ये । ६ । ११८ ।
"गुहाया निरगाद्दन्ती सिंहो मृगमिव द्रावन् ।
भ्रातरं युङ्भियः संख्ये घोषेणापूरयन्दिशः ॥"
युग्मम् । यथा, मनौ । ३ । २७७ ।
"युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते ।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम् ॥"
समः । स च छन्दसि द्वितीयचतुर्थपादरूपः । यथा, छन्दोमञ्जर्य्याम् । ३ । १ ।
"विषमे यदि सौ सलगा दले
भौ युजि भाद्गुरुकावुपचित्रम् ॥")
युञ्जी, [न्] पुं, वर्णसङ्करजातिविशेषः । स तु गङ्गापुत्रकन्यायां वेशधारिणो जातः । यथा,—
"गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः ।
बभूव वेशधारी च पुत्रो युञ्जी प्रकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥
युच्छ, प्रमादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) अन्तःस्थाद्यादिः पञ्चम-स्वरी । प्रमादोऽनवधानता । युच्छति पापे साधुः । ओष्ठ्यवर्गाद्यादिरिति रमानाथः । पर्व्वादित्वादनि पुच्छो लाङ्गूलम् । ओष्ठ्यवर्ग-शेषादिरिति त्रिलोचनः । वुच्छति । इति दुर्गादासः ॥
युज, इर् ध प ञौ युतौ । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) इर्, अयुजत् अयौक्षीत् । ध, युनक्ति युङ्क्ते एतेनान्नं लोकः । ञौ, योक्ता । इति दुर्गादासः ॥

युज, कि संयमे। युतौ। इति कविकल्पद्रुमः। (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) अमाः-स्याद्यादिः। कि, योजयति योजति। संयमो बन्धनम्। इति दुर्गादासः॥

युज, इ क निन्दे। इति कविकल्पद्रुमः। (चुरा०-आत्म०-सक०-सेट्।) इ क, योजयते। इति दुर्गादासः॥

युज, य औ इ समाधौ। इति कविकल्पद्रुमः। (दिवा०-आत्म०-अक०-अनिट्।) समाधि-र्योग्यभावः। य इ, स्वयमर्थे नियुज्यते। इति हलायुधः। औ, योक्ता। इति दुर्गादासः॥

युजानः, पुं, सारथिः। इति संक्षिप्तसारोणादि-वृत्तिः॥

युजौ, [ज्] पुं, (युज्+क्विप्।) अश्विनीकुमारौ। इति त्रिकाण्डशेषः। नित्यद्विवचनान्तोऽयम्॥

युञ्जानः, पुं, (युज्+शानच्।) सारथिः। विप्रः। इति मेदिनी। ने, ११३॥ भावनासहकारेण सर्व्वज्ञः। यथा,—

"योगिनो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"

इति भाषापरिच्छेदे। ६५॥

"युक्तस्येति। योगाभ्यासवशतया वशीकृतसमाधि-समासादितो विविधसिद्धयुक्त इत्युच्यते अयमेव विशिष्टयोगवत्त्वात् युक्त इत्युच्यते। सर्व्वदेति चिन्तासहकारं विनेत्यर्थः। भानं सर्व्वविषयाणां प्रत्यक्षम्। अपरो युञ्जानः। विषयव्यावृत्तया मानससमाधिस्थः। अयञ्च युञ्जान उच्यते। चिन्ता ध्यानं तदेव कारणं तत्सहकारात् सूक्ष्मव्यवहितविप्रकृष्टान् अर्थान् मनः प्रत्यक्षीकरोतीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

युत्, स्त्री, निन्दा। यु इ क निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम्॥

युत्, [ध्] स्त्री, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः। २।८।१०६॥ (त्रि, युद्धकर्त्ता। यथा, भागवते। ६।१२।२३।

"इति ब्रुवाणावन्योन्यं धर्म्मजिज्ञासया नृप!।
युयुधाते महावीर्य्याविन्द्रवृत्रौ युधां पती॥")

युत, ऋ इ दीप्तौ। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अयुयोतत्। इ, योतते। इति दुर्गादासः॥

युतं, क्ली, (यु+क्तः।) हस्तचतुष्टयम्। इति मेदिनी। ते, ४७॥

युतः, त्रि, (यु+क्तः।) युक्तः। अपृथग्-भूतः। इति मेदिनी। ते, ४७। (यथा, भट्टिकाव्ये। ६।७।

"स्त्रीभिर्युतान्यप्सरसामिवौघै-
र्मरोः शिरांसीव महान्ति यस्याम्॥")

युतकं, क्ली, संशयः। युगम्। नारीवस्त्राञ्चलम्। युतम्। अञ्चलाग्रम्। यौतुकम्। इति विश्व-मेदिन्यौ। के, १४३॥ मैत्रीकरणम्। इति शब्दरत्नावली। स्त्रीवस्त्रभेदः। इति हेमचन्द्रः। संशयः। शूर्पाग्रम्। इति नानार्थरत्नमाला॥

युद्, [ध्] स्त्री, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः। २।८।१०६॥ (यथा, रामायणे। २।११।१०।

"यो न देवासुरैः सर्व्वैः शक्यः प्रसहितुं युधि।
तं पश्य सुरवर्गेशं शयितं तत्र भीतया॥")

युद्धं, क्ली, (युध्यते इति। युध्+भावे क्तः।) योध-नम्। लड़ाइ इति भाषा। तत्पर्य्यायः। आयो-धनम् २ जन्यम् ३ प्रधनम् ४ प्रविदारणम् ५ मृधम् ६ आस्कन्दनम् ७ संख्यम् ८ समीकम् ९ साम्प-रायिकम् १० समरम् ११ अनीकम् १२ रणः १३ कलहः १४ विग्रहः १५ संप्रहारः १६ अभिसम्पातः १७ कलिः १८ संस्फोटः १९ संयुगः २० अभ्यामर्दः २१ समाघातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५ समु-दायः २६ संयत् २७ समितिः २८ आजिः २९ समित् ३० युत् ३१। इत्यमरः।२।८।१०३-१०६॥ संरावः ३२ आक्रन्दः ३३ सम्परायकः ३४ विदारः ३५ दारणम् ३६ संवित् ३७ सम्परायः ३८। इति शब्दरत्नावली॥ तौर्य्यम् ३९ अमरीयम् ४० वलनम् ४१ आनर्त्तः ४२ अभि-मरः ४३ समुदयः ४४। इति जटाधरः॥ *॥ युद्धे वर्ज्जनीयानि यथा। वर्म्म १ चर्म्म २ बलम् ३ चरः ४ धूलिः ५ तूर्य्यस्वनः ६ सिंहनादः ७ ध्वजमण्डनम् ८ रक्तनदी ९ छिन्नच्छत्रम् १० रथः ११ चामरः १२ हस्ती १३ अश्वः १४ केतुः १५ विदीर्णकुम्भकहस्तिकुम्भमुक्ता १६ मुद्गरपर्णावस्थितसेना १७ शरपुष्पवृष्टिः १८। इति कविकल्पलता॥ *॥ अथ युद्धफलम्।

"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः।
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात्॥
इति यज्ञविदः प्राहुर्यज्ञकर्म्मविशारदाः।
तस्मात्तत् प्रवक्ष्यामि यत् फलं युद्धशौण्डिनाम्॥"

युद्धे मरणफलं यथा,—

"धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च।
यः शूरो वध्यते युद्धे विमर्द्दन् परवाहिनीम्॥
यस्य धर्म्मार्थकामौ च यशश्चैव सदाक्षयः।
परं हाभिमुखे हत्वा तयोः पश्चाधिरोहति॥
विष्णोः स्थानमवाप्नोति एवं युध्यन् रणाजिरे।
अश्वमेधानवाप्नोति चतुरस्तेन कर्म्मणा॥
यस्तु शस्त्रं समुत्सृज्य वीर्य्यवान् वाहिनीमुखे।
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते॥
राजा वा राजपुत्रो वा सेनापतिरथापि वा।
हतः क्षत्रिय यः शूरस्तस्य लोकोऽक्षयो ध्रुवः॥
यावन्ति तस्य गात्राणि भिन्दन्ति शस्त्रमाहवे।
तावतो लभते लोकान् सर्व्वकामदुहोऽक्षयान्॥
वीरासनं वीरशय्या वीरस्थानस्थितिः स्थिरा।
गवार्थे ब्राह्मणस्यार्थे गोत्राद्यर्थे च ये हताः।
ते गच्छन्त्यमरस्थानं ये स्युः सततिमन्तया॥
अभयो यः परं सैन्यं भयञ्च परिरक्षति।
पृष्ठस्थितः पालयति सोऽपि गच्छति सद्गतिम्॥
अतुल्यौजसो यदा मायावान् मन्यते युधि।
हतश्च लभते युद्धे न स्वर्गान्न निवर्त्तते॥

दंष्ट्रिभिः शृङ्गिभिश्चापि तथा म्लेच्छैः
काम्बोजैर्ये हता सर्व्वलोकं व्रजन्ति ते।
शस्त्रादिना शुचिर्द्दैवः क्वचित्र युद्धे
संग्रामान्निवर्त्ते रात्र्यन्त कार्य्येषु।
अयेन लभ्यते यदि धैर्य्येण च संयते।
सम्भूतो निपतेत् गात्रंकादा अतो न संग्र
यत् सिनोऽर्ण मार्गं शरमालिनो।
ईश्वरमाद्य तं वीरं दामभूर्ति दर्शन
बराशरःमदमाथि शरमायोगे दश।
नरिनाम्भिपाणिभि प्रम गतो श्रीय।
यत्र तत्र हताः शूराः शत्रुभिः परिवेष्टिताः
अक्षयान् लभते लोकान् यदि क्लीबो
न भवेत्। लभ्यते तत्रोर्द्ध्वैताकाथि सुराङ्ग
नाः परिपालिनि कार्ये का चिन्ता मरणे ते
वाक्याभिमुखमाला ये लोका न विर्णं
हतो गोष्ठामिविपार्थे नरमेधवर्णं दिना।

आशाभिघाते शरणागते च
राज्ञो विपत्तौ द्विजगोविपत्तौ।
क्रोशानुषङ्गाचनगोमये च
प्राणं शुभीनामपि धारणीयम्॥
यो वज्जनंदैवपणा च नियाः
स्वर्गप्रियो यत्र न वै प्रयाति।
अदीन तामेव गतिं प्रयाति
महाहवे स्वां तनुं संत्यजन्॥
सम्पीय पैनान् सुमहाद्रिर्देः
सोऽन्यच योगस्य पने निरासम्।
तते गुहा एकपदे प्रविष्टा
महाहवे स्वां तनुं संत्यजेद्यः॥
इमां गिरं वेदविदः शुभाचरी
शुभाचिता इषभिदा दिवौकसाम्।
यमसुरी यः मारते हृदस्थनि-
र्नं कथ्यते चेति च योऽपि वीरेः।

सदा पुण्यतमः स्वर्ग्यः सुयशः सर्व्वतो धन
सर्व्वेषामेव धर्माणां क्षत्रियस्य विशेषतः।
भूयश्चैव तु वक्ष्यामि रणधर्म्मं सनातनम्।
यादृशाय प्रवर्त्तेत यादृशं परिवर्ज्जयेत्।
आततायिनमायान्तमपि वेदान्तगं द्विजम्।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्।
कोदण्डशस्त्रपाणिषु प्रहरन्तं द्विजं यदि।
हन्यादातमातुरं भावं हत्वा न ब्रह्महा भवेत्।
ब्रह्महा जायते येषु हतैस्तं शृणुष्व मे।
वधःसंखेत्र नृपश्रेष्ठ। कायवृत्तौ दवाग्ने।
विरथं विगतं अश्वं विवर्णं विशस्त्रिणम्।
युद्धोत्साहहतं हत्वा ब्रह्महा जायते नरः।
विश्वस्तं विधमन्तञ्च तं भीतोऽक्ली
वर्णाश्रमायुतांस्तु हत्वा स ब्रह्महा भवेत्।
अभ्याहतो न हन्तव्यो बालो वृद्धो नपुंसकः।
तथाहं प्रवक्ष्यामि शृणु तद्वीरोऽपि भीरवः।
तस्मादेतान् परिहरेच्छूरो धर्म्मरता वरः।
सम्यगयशफलश्चैव हत्वासौ ब्रह्महा भवेत्।
शस्त्रनिक्षेप सन्देहेषु यतो भवति स्तृणैः।
आत्मदेहपरित्यागः कर्त्तुं युद्धे सुदुष्करः।

हा युध्यतेऽशुद्धो देहं त्यक्त्वा रणाजिरे ।
द्धी रणभग्नानां हते कश्चिन्महापघात् ॥
ामे युध्यतो लक्ष्मीः कीर्त्तिः स्यात् स्वर्गति-
स्तथा ।
स्य तेऽपि नश्यन्ति महामत्यान्महारणात् ॥
ान् सत्येन यत्किञ्चित् क्रियते तच्छुभप्रदम् ।
दानं व्रतं वापि संग्रामे नृपसत्तम ! ॥"
इत्याग्नेये वह्निपुराणे संग्रामप्रशंसा ॥ * ॥
र युद्धनिर्णयः ।
ायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः ।
ालमेकं युद्धस्य प्रवदन्ति मनीषिणः ॥
ोदये विगृह्णीयात् क्षोभो नात्मवधे यदि ।
ने च प्रहर्त्तव्यं शत्रौ न तु विपर्य्यये ॥
ं राजा न योद्धव्यं येऽपि शस्त्रास्त्रको-
विदाः ।
ा युद्धेषु हन्यन्ते शक्तेभ्यः शक्तिमत्तराः ॥
ायुद्धं समे देशे विषमे हस्तिसङ्गरः ।
श्वयुद्धं मरौ देशे पत्तियुद्धञ्च दुर्गमे ॥
ाये सर्व्वयुद्धं स्यान्नौकायुद्धं जलप्लुते ।
हत्य योधयेदन्यान् कामं विस्तारयेद्बहून् ॥
चीहतमनीकं स्याद्दर्पं हि बहुभिः सह ।
पि महाशतः शूरान् निघ्नन्ति परवाहिनीम् ।
ापि वा महत्सम्बद्धिताः स्वनिश्चयाः ॥"
य युद्धासननिर्णयः ।
म्यद्वारा विपद्यन्तु विगृह्यासनमुच्यते ।
रिं विगृह्य वा स्थानं विग्रहासनमुच्यते ॥
रेश्च विजिगीषोश्च विग्रहे हीयमानयोः ।
ाय यदवस्थानं सन्धायासनमुच्यते ॥
दासीने मध्यमे वा समाने प्रतिशत्रुणा ।
कीभूय यवस्थानं सम्भूयासनमुच्यते ॥
र्षां प्रीतिजननं निजराष्ट्रस्य सञ्चयम् ।
तन् प्रीत्यासनं नाम सर्व्वासनमहत्तरम् ॥"
ाथ द्वन्द्वयुक्तिः ।
राज्ञो बलं नहि बलं द्वन्द्वमेव बलं बलम् ।
ाल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत् ॥"
था च ।
एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
तं दशसहस्राणि तस्माद्दुर्गं विशिष्यते ॥
ाकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत् ॥
हैवरचितं द्वन्द्वं गिरिनद्यादिसंश्रियम् ।
ाकृत्रिममिदं श्रेयं दुर्लङ्घमरिभूभुजाम् ॥
ाकारपरिखारम्यं यद्वदेदिह ।
कृत्रिमं नाम विज्ञेयं सदालङ्घ्यन्तु वैरिणाम् ॥"
अथाकृत्रिमद्वन्द्वयुक्तिः ।
'अद्युच्चविस्तीर्णशिरा दुरारोहः सकाननः ।
जलशालासम्भारभोग्यद्रव्यसमाश्रयः ॥
गिरिनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम् ।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु यवस्थिताः ॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते ।
यद्दन्यधिरकालीनं दुर्लङ्घ्यविपिनादिकम् ।
तन्मध्यवर्त्तिनी भूमिर्द्वन्द्वविशेषमिष्यते ।
वनद्वन्द्वमिति ख्यातं यथापूर्व्वं महत्तरम् ॥"

कृत्रिमद्वन्द्वयुक्तिर्यथा,—
"यस्मिन्नास्ति गिरिर्नास्ति नद्यो वा गहनोदकाः ।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत् ॥
गर्त्तैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः ।
द्वन्द्वत्वेन समादिष्टाः परिखा बहुधाश्रयः ॥
विशालशालं सुघनं बहुकण्टकि सङ्कटम् ।
द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम् ॥
अधोऽधो बध्यमानोऽपि कन्दरोऽल्पजलं स्रवन् ।
द्वन्द्वत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभृताम् ॥
सर्व्वतः परिखां कृत्वा निबध्योपरि कन्दरम् ।
तज्जलप्लुतदेशत्वाज्जलद्वन्द्वं तदुच्यते ॥
स्थानमात्रे निम्नस्य भूप्रदेशस्य बन्धना ।
वर्षास्वपगते वारि जलद्वन्द्वं ततो भवेत् ॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत् ।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि ॥
अन्यत्र कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्विशेत् ।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत् ॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं तदाचरेत् ।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्द्विविधो रिपुः ॥
सर्व्वं हि त्रिविधं युद्धं समावादुमादिश्यते ।
प्रतिराजस्य राज्यान्तं प्रकटं गुप्त एव च ॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम् ।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः ॥"
अथ सामान्यतो गुणाः । तथा हि नीति-
शास्त्रम् ।
"सप्रवेशापसरणं द्वन्द्वमुत्तममुच्यते ।
अन्यत्र वन्दिशालेव न तादृग्बहुमाश्रयेत् ॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च ।
मनुष्यद्वन्द्वसंसर्गं वनद्वन्द्वञ्च तानि षट् ॥"
अन्ये तु ।
"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्धृद्वन्द्वं प्रकीर्त्तितम् ।
योद्धृशून्यं हि यद्युद्धं मृतकायसमं हि तत् ॥"
यथान्यत्रापि ।
"यावत्प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम् ।
त्रिंशच्चतुष्टयगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम् ॥"
गर्गस्तु ।
"यदन्यद्द्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम् ।
तेभ्य एवातिरिच्येत मन्त्रद्वन्द्वं विशेषतः ॥
अन्येषु दैवाद्भिन्नेषु मन्त्रद्वन्द्वान्न येन्नृपः ।
मन्त्रद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम् ॥
यदेव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत् ।
सप्रवेशापसरणं तद्युद्धमुत्तमं विदुः ॥"
इति युक्तिकल्पतरुः ॥
तद्वैदिकपर्य्यायः । रणः १ विवाक् २ विखादः ३
नदनुः ४ भरे ५ आक्रन्दे ६ आहवे ७ आजौ ८
पृतनाज्यम् ९ अभीके १० समीके ११ मम-
सत्यम् १२ नेमधिता १३ सङ्काः १४ समितिः १५
समनम् १६ मीळ्हे १७ पृतनाः १८ स्पृधः १९
मृधः २० पृत्सु २१ समत्सु २२ समर्य्ये २३
समरणे २४ समोहे २५ समिथे २६ सङ्खे २७
सङ्गे २८ संयुगे २९ सङ्गथे ३० सङ्गमे ३१ वृत्र-
तूर्य्ये ३२ पृक्षे ३३ आणौ ३४ शूरसातौ ३५
वाजसातौ ३६ समनीके ३७ खले ३८ खजे ३९
पौंस्ये ४० महाधने ४१ वाजे ४२ अज्म ४३
सद्म ४४ संयत् ४५ संवतः ४६ । इति षट्चत्वा-
रिंशत् संग्रामनामानि । इति वेदनिघण्टौ
२ । १७ ॥

युद्धरङ्गः, पुं, (युद्धे रङ्गो रागोऽस्य ।) कार्त्तिकेयः ।
इति शब्दचन्द्रिका ॥ (युद्धस्य रङ्गः । युद्ध-
स्थलम् । यथा, महाभारते । ७ । ९५ । १८ ।
"अन्योऽन्यं जघ्निरे क्रुद्धाः युद्धरङ्गगता नराः ॥")

युद्धसारः, पुं, (युद्धस्य सारः ।) घोटकः । इति
शब्दचन्द्रिका ॥

युध, य औ ङ युद्धे । इति कविकल्पद्रुमः ॥ (दिवा०-
आत्म०-अक०-हनने सक०-अनिट् ।) य ङ,
युध्यते । औ, योद्धा । संमुखस्थितयोर्द्वयोः
सांग्रामिकरीत्या परस्पराभिभवेच्छा युद्धम् ।
युध्यते योधः कदाचिदेकस्य सह भावविव-
क्षायां युध्यते योधः परेण । कदाचिद्धननेऽपि
युध्यते चौरं राजा हन्तीत्यर्थः । यो भक्त-
पिण्डस्य हते न युध्येदिति अक्ताङ्गावे क्विपि
तमिच्छतीति क्ये तं करोतीति कण्ड्वादित्वात्
क्ये वा साध्यम् । इति दुर्गादासः ॥

युधानः, पुं, (युध्यतेऽसौ । युध् + "युधिबुधिदृशः
किच्च ।" उणा० २ । ९० । इति आनच् । स च
कित् ।) क्षत्त्रियः । इत्युणादिकोषः ॥ (रिपुः ।
इत्युज्ज्वलदत्तः ॥)

युधिकः, त्रि, योद्धा । युधशब्दात् ष्णिकप्रत्ययेन
निष्पन्नः ॥

युधिष्ठिरः, पुं, (युधि संग्रामे स्थिरः । "गवि-
युधिभ्यां स्थिरः ।" ८ । ३ । ९५ । इति षत्वम् ।
"हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ ।
इति सप्तम्या अलुक् ।) पाण्डवराजः । स कुन्ती-
गर्भे धर्म्माज्जातः । तत्पर्य्यायः । अजातशत्रुः २
शल्यारिः ३ धर्म्मपुत्त्रः ४ अजमीढः ५ । इति
हेमचन्द्रः । ३ । ३७१ ॥ (मृगशापाभिभूतः
पाण्डुर्निरपत्यतया खिन्नचित्तः पुत्त्रार्थमेकदा
धर्म्मपत्नीं कुन्तीमुवाच । शुचिस्मिते ! अनपत्यो
हि न शुभलोकार्हः इति विचिन्त्य त्वं मदुपका-
रार्थं केनापि पुत्त्रमुत्पादयेति । एवमुक्ता कुन्ती
दृष्ट्वा च पत्युरागृहातिशयं धार्म्मिकपुत्त्रलाभाय
दुर्व्वाससः प्रदत्तमन्त्रबलेन धर्म्ममाहूय तेन सङ्गता
युधिष्ठिरं पुत्त्रमलभत । यदुक्तं महाभारते । १ ।
१२३ । ५—८ ।
"संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण च ।
लेभे पुत्त्रं वरारोहा सर्व्वप्राणभृतां हितम् ॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे ।
दिवा मध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते ॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् ।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी ॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः ।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति ।

युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ।” अथ गच्छति काले धृतराष्ट्रेण यौवराज्ये स्थापितोऽयं दयादाक्षिण्यादिगुणपरम्परया प्रजासु लब्धकीर्त्तिरर्ज्जुनेः सह सुखमुवास । अथ जतुगृहदाहानन्तरं त्यक्तराज्यो द्रुपदराज्यमभिगम्य द्रौपदीं अर्ज्जुनः परिणीय पुनः स्वराज्यमागतवान् । ततः कृष्णसहायो राजसूययज्ञकरणाय दुर्ज्जयान् जरासन्धप्रभृतिनृपतीन् हत्वा राजसूयेष्टिं समापयामास । ततोऽसूयापरवशदुर्य्योधनमतानुसारिणा कैतवपटुना शकुनिना सह द्यूतं कृत्वा पराजितोऽनुजैर्भीमादिभिः पत्न्या द्रौपद्या च सहितो द्वादशवर्षं वनवासाय एकवर्षमज्ञातवासाय च प्रस्थितो द्वैतवनमध्युवास । ततो द्वादशवर्षैर्वनवासजातं महत् कष्टमनुभूय अज्ञातवासार्थं त्रयोदशवर्षं विराटनगरमधिवसन् पुनः कृष्णसहायः स्वराज्यप्राप्त्यर्थं महतीं चेष्टां कृतवान् । ततोऽपि यर्त्त यदा विगुणमदो दुर्य्योधनो राज्यादिकं न दत्तवान् तदा लब्धसैन्यबलोऽसौ कुरुक्षेत्रे महत् युद्धं कृत्वा विनाश्य च दुर्य्योधनादीन् हस्तिनाधिपतिः सम्राट् बभूव । अथाश्वमेधादिना सुरगणान् परितोष्य षट्त्रिंशद्वर्षं राज्यसुखमनुभूतवान् । ततः प्रभासे विप्रशापात् यदुवंशक्षयमाकर्ण्यातिनिर्व्विसः षट्त्रिंशद्वर्षवयस्कं अर्ज्जुनपौत्रं परीक्षितं स्वराज्येऽभिषिच्य उत्तरामार्गेण स्वर्गारोहणं कृतवानिति । तथाच देवीभागवते । २ । ८ । १५-१७ ।

“देहत्यागं हरेः श्रुत्वा यादवानां क्षयं तथा ।
गमनाय मतिं चक्रे राजा हैमाचलं प्रति ॥
षट्त्रिंशद्वार्षिकं राज्ये स्थापयित्वोत्तरासुतम् ।
निर्ज्जगाम वनं राजा द्रौपद्या भ्रातृभिः सह ॥
षट्त्रिंशत्येव वर्षाणि कृत्वा राज्यं गजाह्वये ।
गत्वा हिमालये षट् ते जहुः प्राणान् पृथासुताः ॥”

अस्याख्यविशेषविवरणन्तु महाभारतादौ विस्तरशो द्रष्टव्यम् ॥)

युधीयः, त्रि, योद्धा । युधधातोरीयप्रत्ययेन निष्पन्नः ॥

युध्मः, पुं, (युध्यते इति युध्यते येनेति वा । युध् + “इषियुधीन्धिदसिश्याधूसूभ्यो मक् ।” उणा० १।१४४। इति मक् ।) संग्रामः । धनुः । इति मेदिनी ॥ बाणः । इत्युणादिकोषः ॥ योद्धा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । ५२ । ५ ।

“स इन्द्राणि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः ॥”

“युध्मः योद्धा ।” इति तद्भाष्ये सायणः ॥) शिवः । संग्रामः । शरभः । इति संक्षिप्तसारोणादिवृत्तिः ॥

युप, य इर् विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) विमोह आकुलीकरणम् । य, युप्यति । इर्, अयुपत् अयोपीत् । पुषादित्वात् ङ इत्यन्ये । इति दुर्गादासः ॥

युयुक्छुरः, पुं (युनक्तीति युक् योजनार्थः । तादृशः खुरो यस्य ।) शुद्रशाखः । इति शब्दचन्द्रिका ॥

युयुधानः, पुं, (युध्यतेऽसौ । युध + “युधिबुधिदृशः किच्च ।” उणा० २ । ९१ । इत्यानच् किच्चार्थं सन्वच्चार्थेच ।) सात्यकिः । यथा,—

“शैनेयस्तु शिनेर्नप्ता युयुधानश्च सात्यकिः ॥”

इति त्रिकाण्डशेषः ॥

इन्द्रः । क्षत्रियः । इति संक्षिप्तसारोणादिवृत्तिः ॥ त्रि, योद्धा च ॥

युवकः, पुं, युवा । युवन्शब्दात् कन्प्रत्ययेन निष्पन्नः ॥

युवगण्डः, पुं, (यूनो गण्ड आश्रयत्वेनास्त्यस्य । युवगण्ड + अर्शआद्यच् ।) यूनो गण्डस्थव्रणविशेषः । ययस्फोड़ा इति भाषा । यथा,—

“युवगण्डो यवगण्डः स्यात् वयस्फोटाह्वये द्वयम् ॥”

इति शब्दरत्नावली ॥

युवजानिः, पुं, (युवतिर्जाया यस्येति । “जायाया निङ् ।” ५।४।१३४। इति निङ् ।) युवतीपतिः । यथा,

“युवजानिर्धनुष्पाणिर्लक्ष्मीवान् शत्रुघातिनः ।
रामो यज्वद्विषो हन्ति कानकत्वङ्निकोशसः ॥”

इति भट्टिः । ५ । १३ ॥

युवतिः, स्त्री, (युवन् + “यूनस्तिः ।” ४ । १ । ७७। इति तिः ।) प्राप्तयौवना ॥ (यथा, अभिज्ञानशाकुन्तले ४ अङ्के ।

“ शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥”)

युवती, स्त्री, (यु + शतृ + ङीप् । इति सिद्धान्तकौमुदी । ४ । १ । ७७ । उगितश्चेति ङीप् । इत्युज्ज्वलदत्तः । १ । १५६ ।) प्राप्तयौवना । यथा, बृहत्संहितायाम् । ७५ । ४ ।

“यो यं विचिन्तयति याति स तन्मयत्वं यस्मादतः सुभगयैव गता युवत्यः ॥”)

तत्पर्य्यायः । युवतिः २ यूनी ३ तरुणी ४ तलुनी ५ दिक्करी ६ धनिका ७ धनीका ८ मध्यमा ९ दृष्टरजाः १० मध्यमिका ११ । इति शब्दरत्नावली ॥ ईश्वरी १२ वर्या १३ । इति हेमचन्द्रः । ३ । ५११ ॥ वयस्था १४ । इति राजनिर्घण्टः ॥ तस्या लक्षणादि यथा,—

“आषोड़शाद्भवेद्वाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥”

इति कालिदासः ॥

“बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते ॥”

योग्या युवती । इति राजवल्लभः ॥ स्त्रीनामान्यम् । यथा । प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृतेति भागुरिः । प्राप्तयौवना युवतिरिति वात्स्यायनः । इत्यमरटीकायां भरतः । २ । ६ । ८ ॥ हरिद्रा । इति शब्दचन्द्रिका ॥

युवनीडा, स्त्री, (युवनीडार्जिता ।) ... इति राजनिर्घण्टः ॥

युवनाशः, पुं, सूर्य्यवंशीयराजविशेषः । गौरीगर्भे प्रसेनजितो जातः ... यथा,—

“तस्याः प्रसेनजित्पत्नी ... गौरी नामाभिशप्ता सा नदीभूता ... तस्यां प्रसेनजिज्जज्ञे युवनाशं महीपतिम् ... मान्धातुः ... सर्वे तद्यौवनाश्वस्य मान्धातुः ...”

इति वह्निपुराणे गणभेदनाम ...

युवनाश्वजः, पुं, (युवनाश्वात् जातः ।) मान्धातृराजः । इति हेमचन्द्रः । ३ ।

युवराजः, पुं, भाविनृपविशेषः । मैथिलः २ ... ३ । इति ... राजपुत्रः । तत्पर्य्यायः । कुमारः २ दारकः ३ । इत्यमरः । २ । ७ । ११ ॥ बालो राजा यूनो वा राजा युवराजः चोरास इति सः । कुमारपर्य्यायः स्यात् कुमार कुमाल तु ... भर्त्तृदारकः पुत्रः भर्त्ता च बालो वा भर्त्तृदारकः । दारको भेदे निगमः । इति भरतः ॥ (यथा, १ । ७१ । १६ ।

“मयि जाते यः पुत्रः ... युवराजो महाराज ! ...

युवा, [न्] त्रि, (यौतीति । “श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्द्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति ।” ... युवशितचिराक्षिध्वज्जिद्युप्रतिदिवः ।” १ । १५६ । इति कनिन् ।) तरुणः । मनौ । २ । १२० ।

“ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थ...

प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रति... मिष्टः । निसर्गबलशाली । इति मेदिनी ॥

युवा, [न्] पुं, (यौतीति । ... यौवनावस्थाविशिष्टः । षोड़शवर्षात् पर्य्यन्तवयस्कः । इति केचित् ॥ सप्ततिवर्षपर्य्यन्तवयस्कः । यथा,—

“आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते । वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः ...”

इति ...

(“आषोड़शाद्भवेद्बालः ...

इति हारीते प्रथमे स्थाने ...

तत्पर्य्यायः । वयस्थः २ तरुणः ३ । २।६।४२ । वयःस्थः ४ तलुनः ५ । इ... रत्नावली ॥ गर्भरूपः ६ वेटकः ७ । ... धरः ॥

युष, भजने । इति कविकल्पद्रुमः ॥ ... इयम् । (पर०-सक०-सेट् ।) योषि... इति दुर्गादासः ॥

युष्मद्, (योषति भजतीति । युष + “... मदिक् ।” उणा० १ । १३८ । इति

वर्त्तनामयुष्मच्छब्दः। तस्य त्रिषु लिङ्गेषु समानि रूपाणि। (एकविंशतिविभक्तिषु तस्य रूपाणि।) यथा। त्वम् १ युवाम् २ यूयम् ३। त्वाम् ४ युवाम् ५ युष्मान् ६। त्वया ७ युवाभ्याम् ८ युष्माभिः ९। तुभ्यम् १० युवाभ्याम् ११ युष्मभ्यम् १२। त्वत् १३ युवाभ्याम् १४ युष्मत् १५। तव १६ युवयोः १७ युष्माकम् १८। त्वयि १९ युवयोः २० युष्मासु २१। (द्वितीयाचतुर्थीषष्ठीनामेकवचनद्विवचनबहुवचनविभक्तिषु तस्य रूपान्तराणि यथा। द्वितीयैकवचने त्वा। चतुर्थीषष्ठ्योरेकवचने ते। आसां द्विवचने वाम्। आसां बहुवचने वः। श्लोकपादे वाक्यादौ च-वा-हा-ह-एव-शब्दयोगे अदर्शनार्थदृश्यर्थधातुयोगे च न स्युः।) इति व्याकरणम्। यथा,—

"युष्मत्कृते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि याति यातु।
नीतानि नाशं जनकात्मजार्थं
दशाननेनापि दशाननानि॥"

इति मुक्तिवादे गदाधरः॥)

[यू]... स्त्री, यूषः। इति हेमचन्द्रः। ३। ६८॥

[यूक]ः, पुं, (यौतीति। यु+"वलियुधूनीभ्यो दीर्घश्च।" उणा॰ ३। ४७। इति कन् दीर्घश्च।) मत्कुणः। इति जटाधरः॥ (यथा, सुश्रुते सूत्रस्थाने ३१ अध्याये।

"यूका ललाटमायान्ति वलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम्॥")

[यू]का, स्त्री, (यूक+स्त्रियां टाप्।) मत्कुणः। यूषी इति उकुण इति च भाषा। तत्पर्य्यायः। केशकीटः २ स्वेदजः ३ षट्पदः ४। इति राजनिर्घण्टः॥ षाली ५ बालकृमिः ६। इति जटाधरः॥ (यथा, मनौ। १। ४५।

"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
ऊष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम्॥"

क्रिमिविशेषः। तद्यथा,—

"नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः।
द्विधा ते कोटपिड़काः कण्डूगण्डान् प्रकुर्व्वते॥"

इति माधवकरसंग्रहीतरुग्विनिश्चये क्रिम्यधिकारे॥

"क्रिमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः।
बाह्या यूकाः प्रसिद्धाः स्युः किक्षुलूकास्तथापराः॥
सप्तधा हि भवेद्बाह्याः षड्धा चान्तःप्रसूद्भवाः।
तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे तृणाम्॥
रूक्षादति बलात् स्वेदाधिमाया शोषणादपि।
कफधातुप्रसूद्भूतास्तीक्ष्णा यूका भवन्ति हि॥
यूकाः सूक्ष्माः पराः श्वेतास्तृतीयाश्चर्म्मणि स्थिताः।
सूक्ष्मातिविकटा स्थाच्चर्म्माभाश्चर्म्मयूकिका॥
चतुर्थी विष्कुली नाम चर्त्तुला मूत्रसम्भवा।
मत्कुणाश्चाथ पञ्चम्यो बाह्योपद्रवकारिणः॥
यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी।
चर्म्मयूका नेत्रचर्म्मे सूक्ष्मे रोमणि षष्ठिका॥"

इति हारीते चिकित्सितस्थाने पञ्चमेऽध्याये॥ यूकानाशकौषधं यथा, कामरत्ने।

"विड़ङ्गगन्धोत्पलकल्कयोगात्
गोमूत्रसिद्धं कटुतैलमेतत्।
अभ्यङ्गयोगेन शिरोरुहाणां
यूकादिलीक्षाप्रचयं निहन्ति॥
गोमूत्रेण बलामूललेपो यूकानिवारणः।
पारदं मर्द्दयेन्निष्कशण्यधुस्तूरजद्रवैः॥
नागवल्लीद्रवैश्चाथ वस्त्रखण्डं प्रलेपयेत्।
तद्वस्त्रं वेष्टयेन्मौलौ धार्य्यं यामत्रयं तथा॥
यूका पतन्ति निःशेषान्मस्तकान्नात्र संशयः।
द्विनिशानवनीतेन लेपान्मौलौ प्रकण्डुनुत्॥
नीलोत्पलं तिलं यष्टि सर्षपं नागकेशरम्।
धात्रीफलं समं पिष्ट्वा लेपो यूकाविनाशनः॥
निशागन्धकगोमूत्रं विड़ङ्गकटुतैलकम्।
पारदेन समं मर्द्द्य लेपो यूकानिवारणः॥"

इति केशस्य यूकादिनिवारणम्॥

परिमाणभेदः। यथा, मार्कण्डेये। ४९। ३७।

"परमाणुः परं सूक्ष्मं त्रसरेणुर्म्महीरजः।
बालाग्रञ्चैव लिक्षाश्च यूका चाथ यवोदरम्॥")

यूतिः, स्त्री, (यु+"ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च।" ३।३।९७। इति क्तिन् निपातनाद्दीर्घत्वञ्च।) मिश्रणम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ७। ६९।

"करोमि वो वह्नियूतीन् पिबध्वं पाणिभिर्द्दृशः॥")

यूथं, क्ली, (यु मिश्रणे+"तिथपृष्ठगूथयूथप्रोथाः।" उणा॰ २। १२। इति थक्प्रत्ययेन निपातितम्।) सजातीयसमूहः। इत्यमरः। २।५।४१॥ (यथा, रामायणे। २। ५४। ४१।

"वत्र कुञ्जरयूथानि मृगयूथानि चैव हि।
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव !॥")

यूथनाथः, पुं, (यूथस्य नाथः।) वन्यकरिणां समूहस्य ईश्वरः। तत्पर्य्यायः। यूथपः २। इत्यमरः। २। ८। ३५॥

यूथपः, पुं, (यूथं पातीति। पा+कः।) अरण्यहस्तिनां प्रधानम्। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। ९। १५। २८।

"घोरमादाय परशुं सतूणं चर्म्मकार्म्मुकम्।
अन्वधावत दुर्म्मर्षो मृगेन्द्र इव यूथपम्॥"

प्रधानमात्रे च। यथा, महाभारते। १।१८५।

"राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम्॥")

यूथभ्रष्टः, पुं, (यूथाद्भ्रष्टश्चलितः।) यूथात् पलायितहस्ती। इति शब्दमाला॥ (यूथभ्रष्टमात्रे, त्रि। यथा, श्रीमद्भागवते। ४। २८। ४६।

"यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्च्चती।
आसीत् संविग्नहृदया यूथभ्रष्टा मृगी यथा।")

यूथिका, स्त्री, (यूथं पुष्पवृन्दमस्या अस्तीति। यूथ+ठन्। टाप्।) पाठा। इति राजनिर्घण्टः। अम्लानकः। इति मेदिनी। के, १४४॥ पुष्पविशेषः। युँइ फुल इति भाषा॥ (यथा, मेघदूते। १। २८।

"विश्रान्तः सन् व्रजवननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि॥")

तत्पर्य्यायः। गणिका २ अम्बष्ठा ३ मागधी ४। सा पीता चेत् हेमपुष्पिका। इत्यमरः। २। ४।७१॥ यूथी ५ प्रहसन्ती ६। इति त्रिकाण्डशेषः॥ शिखण्डिनी ७ वासन्ती ८। इति रत्नमाला॥ बालपुष्पिका ९ बहुगन्धा १० भृङ्गानन्दा ११। अस्या गुणाः। स्वादुत्वम्। शिशिरत्वम्। शर्करार्त्तिपित्तदाहव्रणानानात्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु।
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम्।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम्॥"

इति भावप्रकाशः॥

(तथा च सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।

"पटोलशेलूसुनिषण्णयूथिका
वटादिशुक्ताङ्कुरमिन्दुवारजम्॥")

यूथी, स्त्री, (यूथ+अर्शआद्यच्। ततो ङीष्।) यूथिका। इति शब्दरत्नावली॥

यूथीनः, पुं, (यूथं पातीति। यूथ+खः।) यूथपः। इति शब्दचन्द्रिका॥

यूनिः, स्त्री, योगम्। मिश्रणम्। इति सिद्धान्तकौमुदी॥

यूनी, स्त्री, (युवन्+ङीप्। "श्वयुवमघोनामतद्धिते।" ६। ४। १३३। इति वस्य उत्वम्।) युवती। इति शब्दरत्नावली॥ (यथा,—

"यूनी काममयी दुनोति हृदयं वैधव्यभावादधूः॥"

इति कलापे श्वयुवमघोनाञ्चेतिसूत्रे कुलचन्द्रः॥)

यूपः, पुं क्ली, (यौति मिश्रयतीति। यूयते युज्यतेऽस्मिन्निति ऋग्भाष्ये सायणः। १। ५१। १४। यद्वा, यु+"कुयुभ्यां च। उणा॰ ३।२७। इति पः दीर्घत्वञ्च।) यज्ञे पशुबन्धनकाष्ठम्। इत्यमरः। २। ४। ४१॥ तस्य परिमाणादिर्यथा। स्मृतौ।

"चतुर्हस्तो भवेद्यूपो यज्ञस्तम्भसमुद्भवः।
वर्त्तुलः शोभनः सूक्ष्मः कर्त्तव्यो दृषमौलिकः॥"

भविष्ये।

"बिल्वस्य बकुलस्यैव कर्णो यूपः प्रशस्यते।"

इति सामवेदिवृषोत्सर्गतत्त्वम्॥

यूपः, पुं, (यु+पः। दीर्घश्च।) जयस्तम्भः। यागस्तम्भः। इत्युणादिकोषः॥ (यथा, रघुवंशे। ६। ३८।

"संग्रामनिर्व्विष्टसहस्रबाहु-
रष्टादशद्वीपनिखातयूपः।
अनन्यसाधारणराजशब्दो
बभूव योगी किल कार्त्तवीर्य्यः॥")

यूपकटक:, पुं, (यूपस्य कटक इव।) यज्ञसमाप्ति-सूचकं पशुबन्धार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूप: तस्य शिरसि वलयाकृतिर्डमवकाष्ठनिर्म्मितो य: काष्ठविकार: स:। यूपमूले निहितलौहवलय इति केचित्। इति भरत:॥ तत्-पर्य्याय:। चषाल: २। इत्यमर:।२।७।१८॥

यूपकर्णः, पुं, (यूपस्य कर्ण इव।) यूपैकदेश:। तत्पर्य्याय:। घृतावनि: २। इति हेमचन्द्र:। ३।४८५॥

यूपद्रु:, पुं, (यूपाय द्रु:।) खदिरवृक्ष:। इति त्रिकाण्डशेष:॥

यूपद्रुम:, पुं, (यूपाय द्रुम:।) खदिरवृक्ष:। इति शब्दरत्नावली॥ रक्तखदिर:। इति राजनिर्घण्ट:॥

यूपवल: पुं, (यूपो वल्य उपवेशनार्थमस्य।) यष्टी। इति शब्दमाला॥

यूपाग्रं, क्ली, (यूपस्याग्रम्।) यूपस्याग्रभाग:। तत्पर्य्याय:। तर्म्म २। इत्यमर:।२।७।१८॥

यूष, वधे। इति कविकल्पद्रुम:।(भ्वा०-पर०-सक०-सेट्।) षकारी। यूषति। इति दुर्गादास:॥

यूषं, पुं, क्ली, (यूष्+क:।) मुद्गादिक्वाथरस:। इत्यमर:।२।९।४४॥ यूषोऽस्त्र्यादि:। अर्द्धर्च्चादित्वात् क्लीबत्वम्। इति भरत:॥ *॥ अथ मुद्गयूषगुणा:।

"मुद्गयूषोऽपरो रुच्य: शुद्धानां व्रणिनामपि।
पथ्यो कफास्रपित्तघ्नो ज्वरघ्नश्च प्रशान्तिकृत्॥
अथैतस्यैव धर्म्मसमर्पणं कटुकैर्विना।
[illegible] कटुकै: संस्कृतं हितम्।
स तु दाडिममृद्वीकायुत: स्याद्रागखाण्डव:।
रुचिकृल्लघुपाकश्च दोषाणामविरोधकृत्॥"*॥
मसूरयूषगुणा:।
"मसूरयूष: संग्राही शीतो स्वादु: प्रमेहजित्।
पित्तश्लेष्मज्वरहरस्तथा [illegible]॥"*॥
कुलत्थयूषगुणा:।
"कुलत्थयूषोऽनिलहा श्वासपीनसनाशन:।
तूणीप्रतूणीकासार्शोगुल्मोदावर्त्तनाशन:॥"*॥
अस्यैव चणकयूषगुणा:।
"चणकाद्यो गुरुर्मेदी वातघ्नो रोचनो मत:॥"
अथ खडयूष:।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकै:।
सुपक्वं खडयूषोऽयमयं काम्बलिकोऽपर:॥"*॥
खडकाम्बलिकयूषगुणा:।
"रुच्यौ [illegible]।
[illegible] यूषौ [illegible]॥"
इति राजवल्लभ:॥ *॥
अपि च। अथ यूषस्य निरुक्तिमाह।
"[illegible]।
[illegible]।
[illegible]॥"
[illegible]।
"[illegible]।
[illegible]॥"

चयसर्व:। यूषार्थं पलमितं तत् कल्कीकृतं शुण्ठी पिप्पली च समुदिताईकर्षमिता कल्कीकृता उभयमपि प्रस्थमितेन वारिणा पचेत्। तद्भवो यूष:।

"यूषो बल्यो लघु: पाके रुच्य: कण्ठ्य: कफापह:॥"

अथ मुद्गयूषविधि:। वृन्दटीकायां तन्त्रान्तरे।
"मुद्गानां द्विपलं तोये प्रस्थमर्द्धाढकोन्मिते।
पादस्थं मर्द्दितं पूतं दाडिमस्य पलेन तत्॥
युक्तं सैन्धवविश्वाह्वधान्यकै: पादकार्षिकै:।
कणाजीरकयोश्चूर्णात् कार्षिकेनावचूर्णितम्।
संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मत:॥"*॥
अथ मुद्गयूषगुणा:।
"मुद्गानामुत्तमो यूषो दीपन: शीतलो लघु:।
शस्तोऽर्द्धयन्तृप्यतृड्दाहकफपित्तज्वरास्रहृत्॥"*॥
अथ मुद्गामलकयूषगुणा:।
"मुद्गामलकयूषस्तु भेदी पित्तानिलापह:।
तृड्दाहशमन: शीतो मूर्च्छाश्रममदापह:॥"
मसूरयूषगुणा: पूर्व्ववत्। इति भावप्रकाश:॥
(तथा च।

"कुलत्थयूषो मधुर: कषाय:
कफं सपित्तं विनिहन्ति शीघ्रम्।
मेहाश्मरी पायुजमेदहन्ता
सन्दीपनो मूत्रविशोधनश्च॥
आढक्ययूषं मधुरञ्च शीतं
विशोधनो वातनिवारणश्च।
श्लेष्मापहं पित्तहरं नराणां
क्रिमिं निहन्यादपि दाहयुक्तम्॥

शीतलं मधुरं मौद्गं यूषं पित्तविकारजित्।
वातदोषहरं प्रोक्तं ज्वराणां शमनं परम्॥
माषरो माषको यूषो हंसी स्वादु: प्रमेहजित्।
पित्तवृद्धिज्वरघ्न: स्यात्तथातीसारनाशन:॥
कषायं कटुकञ्चोष्णं वातघ्नं पुष्टिदोषहृत्।
रक्तपित्तं निहन्त्याशु चणानां यूषमुच्यते॥
सर्व्वं धान्यं कफघ्नञ्चाप्यथ्यं स पित्तहृत्।
पक्वं मर्द्दितं तत्र शस्यते तैलपाचने॥
पथ्यानि चैव शस्तानि कौलत्थान्युचितानि च।
मसूराद्भिर्युक्ता यव्या: कलायाद्याश्च वर्ज्जिता:॥"
इति यूषविधि:॥*॥
इति हारीते प्रथमस्थाने नवमेऽध्याये॥
"देय: पञ्चनमथापि मुद्गयूष: कृताकृत:।
स तु दाडिममृद्वीकायुत: स्याद्रागखाण्डव:॥"
"पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ।
पित्तघ्नौ दीपनौ हृद्यौ क्रिमिकुष्ठज्वरापहौ॥
श्वासकासप्रतिश्याय प्रसेकारोचकज्वरान्।
हन्ति मूलकयूषस्तु कफमेदोगलामयान्॥
कुलत्थयूषोऽनिलहा श्वासपीनसनाशन:।
तूणीप्रतूणीकासार्शोगुल्मोदावर्त्तनाशन:॥
दाडिमामलकैर्यूषो हृद्य: संशमनो लघु:।
प्राणाग्निजननो मूर्च्छामेदोघ्न: पित्तवातजित्॥
मुद्गामलकयूषस्तु ग्राही पित्तकफे हित:।

यवकोलकुलत्थानां यूष: कण्ठ्योऽनिलापह:।"
इति सुश्रुते सूत्रस्थाने ४५ अध्याय:।)

यूष:, पुं, (यूषतीति। यूष्+क:।) [illegible]
इति शब्दरत्नावली॥

येष, ऋ ङ यत्ने। इति कविकल्पद्रुम:।(भ्वा०-आत्म०-अक०-सेट्।) ऋ, अयियेषत्। ङ, येषते यियेषे। इति दुर्गादास:॥

योक्ता, [ऋ] त्रि, योगकर्त्ता। इ[illegible] कर्त्तरि तृन्प्रत्ययेन निष्पन्नम्। (यथा, वाजसनेयसंहितायाम्। ३०।१४।
"मन्यवेऽयस्तापं क्रोधाय निसरं
शोकायाभिसर्त्तारम्।"
"योक्तारं योगकर्त्तारम्।" इति तद्भाष्यम्।)

योक्त्रं, क्ली, (युज्यतेऽनेनेति। युज्+ [illegible] "युजस्तुदेति।" ३।२।१८२। इति ष्ट्रन्।) युगेन सह दृढ़ाबद्ध आबध्यते यया। योत् दड़ि इति भाषा। तत्पर्य्याय:। योत्रम् २। इत्यमर:।२।९।१३॥ (ऋग्वेदे।५।३३।२।
"सत्वं न इन्द्र धियमानो अर्कैर्हरीणां वृषन् योक्त्रमश्रे:।"
"योक्त्रं नियोजनरज्जुं अश्र: आश्रयसि।" इति तद्भाष्ये सायण:। मन्थनरज्जु:। यथा, रामायणे।१।४५।१८।
"ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम्।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजस:॥")

योग:, पुं, (युज समाधौ+ [illegible]) सन्नहन:। उपाय:। ध्यानम्। युक्ति:। इत्यमर:।३।३।२२॥ (यथा, देवीभागवते।३।१५।११।
"स्त्रीयान् गुणान् प्रविततान् प्रवदंस्तदा सौ प्रेमदाममुपचकार च योगयुक्त:।"
"योगयुक्त: प्रेमयुक्त:।" इति तट्टीकायां नीलकण्ठ:।) द्रव्यम्। इति [illegible]।८।११ अस्य प्रमाणं योगदानशब्दे द्रष्टव्यम्।) अप्राप्तप्राप्ति:। वपु:स्थैर्य्यम्। प्रयोग:। भादि:। भेषजम्। विश्रब्धघातक:। कार्म्मणम्। इति मेदिनी॥ नैयायिक:। इति हेमचन्द्र:॥ चार:। द्रव्यम्। इति त्रिकाण्डशेष:॥*॥ (येन भावं युज्यते योग:। यथा,—
"तैलं निशेषामृतवह्निनिम्बहिंस्राभयारग्वधकपिप्पलीभि:।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगे॥
सिद्धं पिबेद्दिनि प्रथमं वक्ष्ये हनीयमदे प्रयुक्तमेतद् दूरस्थानामपि यत्रावहेत योग:।" इत्युत्तरतन्त्रे [illegible] प्रकृतिभेदोक्तम्।) अथ सर्व्वसिद्धि- [illegible] नामानि। यथा,—

…ख्या: षोडिशाद्रुदात् षोडशाह्वः षोडशन-
क्षत्रा।
…ः शुक्लो च पुनः भरण्येव च ॥
…ी इष्टिर्दैवेन चाणाशी ह्यन्नकाधा।
…वारुण् ध्रुवोयाणो यदीयात् यतिपः शिवः।
…: माघः शुभः शुभी लक्ष्मी वैधृतिस्तथा।"
…ी चान्द्रांशमात्रा यथा,—
…दिपञ्च तथैवहं शुभवर्गो नगः परम्।
…ादी पञ्च विष्कम्भे च शूले च नाडिकाः ॥
…व्याघातयोः षट् च नव वर्षन्त्यथोः।
…लितदतिपातौ च समग्रौ परिवर्जयेत् ॥
…यथापंनामानो योगाः कार्येषु शोभनाः ॥"
…प विष्कम्भादियोगानयनक्रमः।
…ोष्टुयोगनिभाख्यो योगा भयोगभाजिताः।
…ाध्याच अश्विन्या नाम्नो शुभाशुभोद्गताः ॥"
इति सर्वसिद्धान्तः ॥
…ष्कम्भादिसप्तविंशतियोगानामकालनिर्णयः। सनु-
…धनमाह।

"…कलाः सर्वोऽन्तरालाद्युताः
…गणेन भयोगमिती प्रमात्।
…च हृता चरातेभ्यविलिप्तिका
…तत्वेन गतागत नाडिकाः ॥"

…ति भास्करीयसिद्धान्तशिरोमणौगणिता-
…ायः ॥ * ॥ यस्य यद्दस्य नक्षत्रं प्राप्नु-
…ष्यते तस्य यता: कार्याः। तथा चन्द्रार्कयो-
…गस्य कलाः कार्याः। उभयत्र प्रत्येकेन
…दि प्रथमस्थाने गतभानि। द्वितीयस्थाने गत-
…ोगाः। अथ याम्यशिष्टानि गतानि खम्ब-
…ारेष्वुतानि गम्यानि स्युः तेषां गतानां गम-
…न्यो विकलाः स्वस्वगतिभिर्भाज्याः। यल्लभ्यते
…ा गतनाडिका भवन्ति। यदीयाणां विकला
…क्ताख्येष्या घटिका भवन्ति। इति मिता-
…राणाम्नी सत्प्रसटीका ॥ आनन्दयोगो
…था। भीमपराक्रमे।
"अश्विनी सह सूर्येण सोमे मृगशिरस्तथा।
…पश्या भौमवारेण बुधे हस्तः प्रकीर्त्तितः ॥
…पशुराधा गुरोर्वारे विश्वदैवस्तु भार्गवे।
…ारुणं शनिसंयुक्तमानन्दोऽयं प्रकीर्त्तितः ॥"
…योगवरा यथा। दीपिकायाम्।

"भूमिपुत्रार्कयोरह्नि नन्दा मघ-
द्वारुणार्द्रान्त्यचित्रादिमूलाश्विभिः।
भार्गवेशाद्वयोरह्नि भद्रा
भवेत् फल्गुयुग्मोडुसंयुता ॥
सोमपुत्रस्य वारे जया स्यान्मृगो-
पेन्द्रगुर्विन्द्रयाम्याभिजिद्वाजिभिः।
गीष्पतेरह्नि रिक्ता च युक्ता यदा
विश्वशक्राग्नियुक्पित्र्यादित्यसुभिः ॥
सूर्यसुतस्य दिने यदि पूर्णा
ब्रह्मदिनाधिपतिद्वयिभिः स्यात्।
योगवराश्विभिरेव समेताः
सर्व्वसमीहितसिद्धिनियुक्ताः ॥"

…प्रथमेव चामृतयोगः ॥ * ॥ अथामृतयोगः।

"इन्द्रगुरुकरस्त्रवार्योऽम्भास्कवारे
शशिसुतविधिसुतौ चन्द्रसुतौ भास्कसुतौ।
दिनकरसुतसूर्यौ मन्दगौरावयारे
गुरुसुतमन्त्रचारोवारुणयोगादि सौरि
द्दशनविधिशततारकाभिषभं सौम्यवारे
शतदर्शिनभदुष्टाभिषभं सौरवारे।
भगदुरुतरुणयो विधुसैवे नितान्ते
श्रवणकराग्न्ययोगो सौरिवारे महानि ॥
यदि विदितयोगानो दिनं पापग्रुभं भवेत्।
दशमीरन्तनयोगेन भास्करेण समौ यथा ॥
सर्वेष्टाविशेषेण पर्व स्यात्कुभयोगकम् ॥
अन्यं सिद्धियोगाच यद्यस्मिन् दिने भवेत्।
तद्दिनस्तु भवेद्दुष्टं मधुरपिण्डया विषम्।"* ॥
अथ सिद्धिदग्धपापयमघण्टयोगाः। यथा,—
"नन्दाद्याः सिद्धियोगा भृगुकुजबुधजीवार्कसौम्य-
वारैः प्रशस्ताः।
सूर्य्याद्यासादिदग्धदहनगुणिनिनिलयमौरुकादि-
वारैः प्रदग्धाः ॥"

राजमार्त्तण्डे।

"माघा नन्दादिरुभी रामा षट्पञ्चगुणयणाधा।
दग्धर्क्षे निपयः मन्द इत्यादिमभिनन्दैः ॥"

अपि च।

"द्वादशतंयुता भवेद्दुभदा सोमेन चैकादशी
भौमे चापि युता गदैव दशमी नेष्टा तृतीया
बुधे।
षष्ठी गिश्चत्प्रदा सुरगुरौ शुक्रे द्वितीया तथा।
सर्व्वारम्भविनाशविजन्मनो सूर्यात्मजे सप्तमी ॥
चामो॰कादि विषास्वाधयमशहुमस्वाद्दि
विवाषतुर्कं
सोयं विशाभिजिद्धं त्वष्ट कृष्णदियहे स्वमयं
विश्वदन्ती।
भाद्दे गता विशाखा यमधनतुरगान्त्यानि जैवे-
ऽह्नि पित्र्यं
रोहिण्यार्द्रा यमेन्द्रश्रुतभमथ भृगोरह्नि पुष्या-
भ्रयेन्द्री ॥
सौरादे हस्तयुग्मार्य्यमयमजलश्रुकर्णौषुप्या-
धनानि
चन्द्रोरहर्क्षसंयुक्ते स्वपञ्चपतिदिने सौम्यवारे
ऽर्य्यमापि ॥"* ॥

अथोत्पातादियोगाः।

"रव्यादिदिवसैर्युक्ता विशाखादिचतुष्कतुः।
उत्पाता मृत्यवः काणा अमृतानि यथा-
क्रमम् ॥"

अथ करकचायोगः।

"वाजिचित्रोत्तराषाढ़ा मूलपाष्णीष्यभान्तकाः।
सूर्यादिवारसंयुक्ता योगाः करकचाः स्मृताः ॥"

अथ मृत्युयोगः।

"आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा ॥"

अथ यमघण्टादीनां वर्ज्यकालनिर्णयः।

"यमघण्टे त्यजेदष्टौ मृत्यौ द्वादश नाडिकाः।
अन्येषां पापयोगानां मध्याह्नात् परतः शुभम् ॥"

अथ शुभयन्त्रेण करकचादिशान्तिः।

"अन्येषु च सर्वेषु दुर्योगाणां परित्यजेत्।
अर्थोगाच विगच्छन्ति चन्द्रशुद्धिबला इत्ते ॥
करकचा मृत्युयोगाच दिनं दग्धं तथा परे।
शुभे चन्द्रे प्रणश्यन्ति इत्या नग्नदशा इव ॥"* ॥
विरुद्धयोगानां देशविशेषे प्रतिप्रसवो यथा।
श्रीपतिः।

"विरुद्धसंज्ञाञ्जितियारयोगा
नगाश्चवाराश्चभवाश्च ये ये।
हूणाङ्गवङ्गेषु खशेषु वर्ज्याः
शेषेषु देशेषु न ते विरुद्धाः ॥"

इति ज्योतिस्तत्त्वम् ॥ * ॥

अथ क्रियायोगः। सूतय ऊचुः।

"दुःखाम्बुमग्नाः पुरुषाः प्राप्य नक्र महालयम्।
उत्तरेयुर्भवाम्भोधिं तथा त्वमद्य विचिन्तय ॥
इत्युक्तः स तदा प्राह क्रियायोगं महात्मनाम्।
नराणामुपकाराय दुःखविच्छित्तिकारकम् ॥

वह्निरुवाच।

आराधयध्वं विश्वेशं जगतां कारणं परम्।
केशवमतिरापेणा एवमुक्तं प्रयाणस्य ॥
इत्या पूजानमस्कारैः शुश्रूषाभिरहर्निशम्।
व्रतोपवासैर्विविधैर्ब्राह्मणानाञ्च तर्पणैः ॥
तैस्तैश्चात्मप्रियैः कामैर्यं त्यक्तेनापि तुष्टिदाः।
भवेद्दुरपरिच्छेदादाराधयत केशवम् ॥
तमिश्टात्स्नगाधियस्तत्कर्म्माख्यस्तदाश्रयाः।
तद्रूपस्तन्मनसः सर्व्वस्मिन् स इति स्थितः ॥
समस्तान्यथ कर्म्माणि तत्र सर्व्वात्मनात्मनि।
संन्यस्यध्वं स यः कर्त्ता समस्तावरणत्रयः ॥

परः पराणां परमः स एको
नरोत्तमो यस्य पदं भिन्नम्।
चराचरं विश्वमिदं समस्ता-
दचिन्त्यरूपन्त्वपरिग्रहं यत् ॥

समाराध्य जगन्नाथं क्रियायोगेन वाड़वाः।
वर्षो मोक्षं परं जन्मतसात्मोक्षकारणम् ॥
संसारार्णवमग्नानां विषयाक्रान्तचेतसाम्।
विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम् ॥
उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवम्।
भुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम् ॥
यूयमेकाग्रचित्ता हि संश्रिता मधुसूदनम्।
जन्मन्यजरामाहं संसारं सन्तरिष्यथ ॥
क्रियायोगपराश्चेह मुक्तिकार्य्याण्यनेकशः।
समाराध्य जगन्नाथं राजानो मोक्षमाप्नुयुः ॥"

इति वह्निपुराणम् ॥ * ॥

अथ योगसाधनम्। केशिध्वज उवाच।

"योगस्वरूपं खाण्डिक्य! श्रूयतां गदतो मम।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा ॥
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुने।
चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥
आत्मभावं नयत्येवं तद्ब्रह्मध्यायिनं मुने।
विकार्य्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥
एवमत्यन्तवैशिष्ट्ययुक्तधर्म्मोपलक्षणः ।
यस्य योगः स वै योगी मुमुक्षुरभिधीयते ॥
योगयुक् प्रथमं योगी युञ्जानः सोऽभिधीयते ।
विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिमान् ॥
यद्यन्तरायदोषेण दूष्यते चास्य मानसम् ।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्व्वस्य जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मा च यो-
ऽचिरात् ॥
ब्रह्मचर्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमु-
क्तिदाः ॥
एकं भद्रासनादीनां समास्थाय गुणैर्युतः ।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥
प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥
शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्य्यात् स्थितं चेतः शुभाश्रये ॥
श्रीखाण्डिक्य उवाच ।
कथ्यतां मे महाभाग ! चेतसो यः शुभाश्रयः ।
यदाधारमशेषं तद्धन्ति दोषमलोद्भवम् ॥
श्रीकेशिध्वज उवाच ।
आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ॥
त्रिविधा भावना विप्र विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च यथा चैवोभयात्मिका ॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥
अक्षीणेषु समस्तेषु विशेषज्ञानकर्म्मसु ।
विश्वमेतत् परं चान्यद्भेदभिन्नदृशां नृप ! ॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ॥

न तद्योगयुजा शक्यं नृप ! चिन्तयितुं यतः ।
ततः स्थूलं हरे रूपं चिन्तयेद्विश्वगोचरम् ॥
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ।
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥
गन्धर्व्वयक्षदैत्याद्याः सकला देवयोनयः ।
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ॥
भूप भूतान्यशेषाणि भूतानां ये च हेतवः ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादञ्च बहुपादमपादकम् ।
मूर्त्तमेतद्धरे रूपं भावनात्रितयात्मकम् ॥
एतत् सर्व्वमिदं विश्वं जगदेतच्चराचरम् ।
परं ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्म्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्व्वगा ।
संसारतापानखिलानवाप्नोत्यतिसन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्व्वभूतेषु भूपाल ! तारतम्येन लक्ष्यते ॥
अप्राणवत्सु स्वल्पाल्पा स्थावरेषु ततोऽधिका ।
सरीसृपेऽपि तेभ्योऽपि अतिशक्त्या पतत्रिषु ॥
पतत्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिकाः ।
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः ॥
तेभ्योऽपि नागगन्धर्व्वा यक्षाद्या देवता नृप ! ।
शक्रः समस्तदेवेभ्यस्ततश्चापि प्रजापतिः ॥
हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः ।
एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ! ॥
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ॥
अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः ।
समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ॥
तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत् ।
समस्तशक्तिरूपाणि तत् करोति जनेश्वर ! ॥
देवतिर्य्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ।
जगतामुपकाराय न सा कर्म्मनिमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥
तद्रूपं विश्वरूपस्य तस्य योगयुजो नृप ! ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्व्वकिल्बिषनाशनम् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्ते स्थितो विष्णुर्योगिनां सर्व्वकिल्बिषम् ।
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयः सचित्तस्य सर्व्वगस्य तथात्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये च पुरुषव्याघ्र ! चेतसो ये व्यपाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्म्मयोनयः ॥
मूर्त्तं भगवतो रूपं सर्व्वापाश्रयनिस्पृहम् ।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते ॥
तच्च मूर्त्तं हरे रूपं यादृक् चिन्त्यं नराधिप ! ।
तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥
प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥
समकर्णान्तविन्यस्तचारुकर्णविभूषणम् ।

कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितव
वलीत्रिभङ्गिना मग्ननाभिना चोदरे
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भु
समस्थितोरुजङ्घञ्च सुस्थिराङ्घ्रिवर
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्म्मलवा
किरीटहारकेयूरकटकादिविभूषित
शार्ङ्गशङ्खगदाखड्गचक्राक्षवलया
चिन्तयेत्तन्मयो योगी समाधायात्म
तावद्यावद्दृढीभूता तत्रैव नृप धा
व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म्म
नापयाति यदा चित्तात् सिद्धां मन्ये
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं ब
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसू
सा यदा धारणा तद्वदवस्थानवती
किरीटकेयूरमुखैर्भूषणै रहितं स्म
तदेकावयवं देवं चेतसा हि पुनर्बु
कुर्य्यात्ततोऽवयविनि प्रणिधानपरो
तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिःस्पृ
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद
तस्यैव कल्पनाहीनं स्वरूपग्रहणं
मनसा ध्याननिष्पाद्यं समाधिः सो
विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभ
क्षेत्रज्ञः करणी ज्ञानं करणं तेन त
निष्पाद्य मुक्तिकार्य्यं वै कृतकृत्यं नि
तद्भावभावमापन्नस्ततोऽसौ परमा
भवत्यभेदी भेदश्च तस्याज्ञानकृतो
विभेदजनकेऽज्ञाने नाशमात्यन्तिकं
आत्मनो ब्रह्मणो भेदमसन्तं कः क
इत्युक्तस्ते मया योगः खाण्डिक्य! प
इति विष्णुपुराणे ६ अंशे ७ अध्या

ब्रह्मज्ञानयोगो यथा ।

"सुखं योगासनं कृत्वा बभूव संयु
पुलकाङ्कितसर्व्वाङ्गः साश्रुनेत्रोऽति
दत्त्वा सुषुम्णां मध्याच्च पिङ्गलां
नाडीषट्कञ्च योगेन निरुध्य च प्र
मूलाधारं स्वाधिष्ठानं मणिपूरमना
विशुद्धं परमाज्ञाख्यं षट्चक्रञ्च निर
लङ्घनं कारयित्वा च तं षट्चक्रं प्र
ब्रह्मरन्ध्रं समानीय वायुवद्धं चकार
निरुध्य वायुं मेध्यान्तमानीय पूरय
तं वायुं भ्रामयित्वा च योजयामास
एवं कृत्वा तु निष्पन्दो यो दत्तो ह
जजाप परमं मन्त्रं तं सर्व्वेशारम्भ
मुहूर्त्तञ्च जपं कृत्वा ध्यायं ध्यायं प
ददर्श हृदयाम्भोजे सम्बं तेजोमयं
तत्तेजसोऽन्तरे रूपमतीवसुमनोहर
द्विभुजं मुरलीहस्तं भूषितं पीतवास
स्मितमुखस्थलन्यस्तज्वलन्मकरकुण्ड
ईषद्धास्यं प्रसन्नास्यं भक्तानुग्रहकात
नवीनजलदाकारश्यामसुन्दरविग्र
स्थितं जन्तुषु सर्व्वेषु निर्लिप्तं साक्षि

योगः
योगः

ज्ञानानां पूर्णमानं ज्ञानदायि सनातनम् ।
शिवरूपं सर्वेषां मौलरूपं सनातनम् ॥
सर्वाधारं सर्वेशं सर्वशक्तिसमन्वितम् ।
सर्वेशानं सर्वदृक् सर्वज्ञानस्वरूपकम् ॥
सर्वसम्मतरूपञ्च सर्वसत्त्वगुणं वरम् ।
हृदयं सकलञ्च हृदि सन्निधेय च ।
ध्यायेच्च परमात्मानं सुखाय परमेश्वरम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० अध्यायः ॥
अथ ध्यानयोगः । हरिरुवाच ।
“अथ योगं प्रवक्ष्यामि भुक्तिमुक्तिप्रदं परम् ।
ध्यायिभिः प्रोच्यते ध्येयो ध्यानेन हरिरीश्वरः ॥
तत् शृणुष्व महेशान ! सर्वपापविनाशनम् ।
विष्णुः सर्वेश्वरोऽनन्तो षडूर्म्मिपरिवर्ज्जितः ॥
वासुदेवो जगन्नाथो ब्रह्मात्मा ऽहमेव तु ।
देहिदेहस्थितो नित्यः सर्व्वदेहविवर्ज्जितः ॥
देहधर्म्मविहीनश्च क्षराक्षरविवर्ज्जितः ।
षड्विधेषु स्थितो द्रष्टा श्रोता घ्राता त्वगीन्द्रियः ॥
तद्धर्म्मरहितः स्रष्टा नामगोत्रविवर्ज्जितः ।
मन्ता मनःस्थितो देवो मनसा परिवर्ज्जितः ॥
मनोधर्म्मविहीनश्च विज्ञानाख्य एव च ।
बोद्धा बुद्धिस्थितः साक्षी सर्वबोधविवर्ज्जितः ॥
बुद्धिधर्म्मविहीनश्च सर्व्वः सर्व्वगतोऽमलः ।
सर्व्वप्राणविनिर्मुक्तः प्राणधर्म्मविवर्ज्जितः ॥
प्राणिप्राणो महाशान्तो भयेन परिवर्ज्जितः ।
अहङ्कारादिहीनश्च तद्धर्म्मपरिवर्ज्जितः ॥
तत्साक्षी तन्नियन्ता च परमानन्दरूपकः ।
जाग्रत्स्वप्नसुषुप्तिस्थस्तत्साक्षी तद्विवर्ज्जितः ॥
तुरीयः परमो धाता दृग्रूपो गुणवर्ज्जितः ।
मुक्तो बुद्धो जनव्यापी सत्य आत्माऽहं शिवः ॥
एवं ये मानवा विप्रा ध्यायन्तीशपरं परम् ।
प्राप्नुवन्ति च तद्रूपं नात्र कार्य्या विचारणा ॥
इति ध्यानं मया ख्यातं तव शङ्कर ! सुव्रत ! ।
पठेद्य एतत् सततं विष्णुलोकं स गच्छति ॥”
इति गारुडे १४ अध्यायः ॥
अथाष्टाङ्गयोगः ।
“भक्तिरष्टाङ्गविज्ञानात् संक्षेपात्तद्वदे शृणु ।
यमाः पञ्च स्वहिंसाद्या अहिंसा प्राण्यहिंसनम् ॥
सत्यं भूतहितं वाक्यमस्तेयं स्वाग्रहं परम् ।
अमैथुनं ब्रह्मचर्य्यं सर्व्वत्यागोऽपरिग्रहः ॥
नियमाः पञ्च शौचाद्या बाह्यमाभ्यन्तरं द्विधा ।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥
स्वाध्यायः स्यान्मन्त्रजापः प्रणिधानं हरेर्यजिः ।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ॥
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ।
अगर्भात् सगर्भस्थः प्राणायामस्ततोऽधिकः ॥
एवं द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ।
कुम्भको निश्चलत्वात् स रेचकाद्रेचकस्त्रिधा ॥
लघुर्द्वादशमात्रः स्याच्चतुर्व्विंशतिकः परः ।
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारश्च रोधनम् ।
ब्रह्मात्मचिन्ता ध्यानं स्याद्धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥

अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ।
विज्ञानमानन्दो ब्रह्म तत्त्वमसि केवलम् ॥
अहं ब्रह्मास्मि तद्ब्रह्म अशरीरमनिन्द्रियम् ।
अहं मनो बुद्धिमहदहङ्कारादिवर्ज्जितम् ॥
जाग्रत्स्वप्नसुषुप्त्यादिमुक्तं ज्योतिस्तुरीयकम् ।
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ॥
योऽसावादित्यपुरुषः सोऽसावहमखण्ड ॐ ।
इति ध्यायन् विमुच्येत ब्रह्मणो भवबन्धनात् ॥”
इति गारुडे १८ अध्यायः ॥ * ॥
अपि च ।
“एतत्ते कथितं ज्ञानं योगश्चैवं निबोध मे ।
यं प्राप्य ब्रह्मणो योगी शाश्वतान्यतां व्रजेत् ॥
प्राणापानादिना स्थेयो योगिनां न हि दुर्लभः ।
कुर्व्वीत तन्मये यत्नं तस्योपायं शृणुष्व मे ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥
यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमेन जयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहशार्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी च्छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वन्निषिद्धः पवनः किल्बिषं न नृणां तनुम् ॥
तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्राप्तिस्तथा संवित् प्रसादश्च महीपते ।
स्वरूपं शृणु वै तेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणामिष्टदुष्टानां जायते फलसंक्षयः ।
चेतसो विकषायत्वं यत्र सा ध्वस्तिरुच्यते ॥
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्वकालिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानातीन्दुसूर्य्यर्क्षग्रहाणां ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदम् ।
तदा संविदिति ख्याता प्राणायामस्य सा स्थितिः ॥
यान्ति प्रसादं येनास्य मनः पञ्च च वायवः ।

इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युञ्जतश्च यथायोगं यादृग्विहितमासनम् ॥
पद्ममर्द्धासनं चापि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि ॥
समः समासनो भूत्वा संहृत्य चरणावुभौ ।
संवृतास्यस्तथा चोरू सम्यग्विष्टभ्य चाग्रतः ॥
पार्ष्णिभ्यां लिङ्गवृषणावस्पृशन् प्रयतः स्थितः ।
किञ्चिदुन्नामितशिरा दन्तैर्दन्तान्न संस्पृशेत् ।
संपश्यन्नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥
रजसा तमसो वृत्तिं सत्त्वेन रजसस्तथा ।
संछाद्य निर्म्मले सत्त्वे स्थितो युञ्जीत योगवित् ॥
इन्द्रियाणीन्द्रियार्थेभ्यः प्राणादीन् मन एव च ।
निगृह्य समवायेन प्रत्याहारमुपक्रमेत् ॥
यस्तु प्रत्याहरेत् कामान् कूर्म्मोऽङ्गानीव सर्व्वशः ।
स स्वात्मरतिरेकस्थः पश्यत्यात्मानमात्मनि ॥
स बाह्याभ्यन्तरं शौचं निष्पाद्याकण्ठनाभितः ।
पूरयित्वा बुधो देहं प्रत्याहारमुपक्रमेत् ॥
प्राणायामा दश द्वौ च धारणा साभिधीयते ।
द्विधारणा स्मृतो योगो योगिभिस्तत्त्वदर्शिभिः ॥
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ।
सर्व्वे दोषाः प्रणश्यन्ति स्वस्थश्चैवोपजायते ॥
वीक्षते च परं ब्रह्म प्राकृतांश्च गुणान् पृथक् ।
व्योमादिपरमाणूंश्च तथात्मानमकल्मषम् ॥
इत्थं योगी जिताहारः प्राणायामपरायणः ।
जितां जितां शनैर्भूमिमारोहेत यथा गृहम् ॥
दोषान् व्याधिं तथा मोहमाक्रान्ता भूरनिर्ज्जिता ।
विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्ज्जिताम् ॥
प्राणानामुपसंरोधात् प्राणायाम इति स्मृतः ।
धारणेत्युच्यते चेयं धार्य्यते यन्मनोऽनया ॥
शब्दादिभ्यः प्रवृत्तानि यदक्षाणि जितात्मभिः ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततः स्मृतः ॥
उपायश्चात्र कथितो योगिभिः परमर्षिभिः ।
येन व्याध्यादयो दोषा न जायन्ते हि योगिनः ॥
यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥
प्राग्नाभ्यां हृदये चाथ तृतीये च तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥
किञ्चित्तस्मात् परस्मिंश्च धारणा परमा स्मृता ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥
नाध्मातः क्षुधितः श्रान्तो न च व्याकुललोचनः ।
युञ्जीत योगं राजेन्द्र ! योगी सिद्ध्यर्थमात्मनः ॥
नातिशीते न चैवोष्णे न द्वन्द्वे नानिलात्मके ।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ॥
सशब्देऽग्निजलाभ्यासे जीर्णे गोष्ठे चतुष्पथे ।
शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे ॥
सभये कूपतीरे वा चैत्यवल्मीकसञ्चये ।
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर् [illegible]
सत्त्वस्यानुपपत्तौ च दे [illegible]
नासतो दर्शनं योगे तस्मात् [illegible] ॥
दोषानेतानना [illegible] ५९ [illegible] वै ।

विज्ञाय तस्य ये दोषा जायन्ते तान्निबोध मे ।
बाधिर्य्यं मूकताचापि स्तुतेर्म्मं कर्णमन्धता ।
जायते चापि मूढत्वं प्राज्ञस्यापि योगिनः ।
प्रमादाद्वोगिनो दोषा यथैते स्युश्चिकित्सितम् ।
तेषां नाशाय कर्त्तव्यं योगिनां तं निबोध मे ।
स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत् ।
वातगुल्मप्रशान्त्यर्थं गुदावर्त्ते तथो दधि ।
यवागूं वापि पवने वायुग्रन्थौ परिक्षिपेत् ।
तद्वत् कम्पे महाशैलं स्थिरं मनसि धारयेत् ।
विघाते वचसो वाचि बाधिर्य्ये श्रवणेन्द्रिये ।
तथैवाम्रफलं ध्यायेत् तृष्णार्त्तो रसनेन्द्रिये ।
[illegible]
कौम् ।
[illegible] योगी योगे [illegible] ।
[illegible] काष्ठेन ताड़-
येत् ।
[illegible]
[illegible]
[illegible]
चितम् ।
[illegible]

दयावासमध्यनाशाय भावयति यथेच्छया ।
अपरिग्रह इत्युक्तो योगसिद्धेस्तु साधनम् ।
चान्द्रायणादिना यत्तु शरीरस्य च शोषणम् ।
तत्तपः कथितं पुत्र ! स्वाध्यायमधुना शृणु ।
प्रणवः शतरुद्रीयं तथान्यच्छिरःशिखा ।
एतेषां यो जपः पुत्र ! स्वाध्याय इति कीर्त्तितः ।
यदृच्छालाभसन्तुष्टः सन्तोष इति पठ्यते ।
बाह्ये चाभ्यन्तरे चापि शुद्धिः शौचं विधीयते ।
स्तुतिस्मरणपूजाभिर्वाङ्मनः कायकर्म्मभिः ।
मयि भक्तिर्दृढा पुत्र एतदीश्वरपूजनम् ।
यमाश्च नियमाः प्रोक्ताः संक्षेपान्न तु विस्तरात् ।
यमैश्च नियमैर्युक्तो योगी मोक्षाय संस्तुतः ।
[illegible]
[illegible]
[illegible]
दण्डं ताण्डवं शूलं खड्गं मुद्गरमेव च ।
मकरं त्रिपथं काष्ठं स्थाणुर्वा स्वस्तिकार्णकम् ।
भौमं वीरासनं चापि वाराहं मृगचैलिकम् ।
क्रौञ्चं नालिकं चापि सर्व्वतोभद्रमेव च ।
इत्यासनानां संख्यासप्तविंशतिसंख्यया ।
योगसंसिद्धिदेतोस्तु कथितानि तवानघ ! ।
एकासनगतं बद्धा गुरुभक्तिपरायणः ।
इन्द्रियाणि जयेत् प्राणायामाभ्यासक्रमयोगतः ।
अन्तश्चराणां वायूनां वाह्याभ्यन्तररोधनम् ।
प्राणायाम इति प्रोक्तो द्विविधः स च कथ्यते ।
अगर्भश्च सगर्भश्च तयोराद्योऽजपः स्मृतः ।
द्वितीयः सजपः प्रोक्तो पुनं चाहृतिमात्रभिः ।
रेचकः शून्यकश्चैव पूरकः कुम्भकस्तथा ।
एवं चतुर्व्विधो भेदः प्राणायामेऽत्र सूरिभिः ।
जन्तूनां नाडयः प्रोक्ताः गतागमनयोग्ययाः ।
रेचनाद्रेचकः प्रोक्तः शून्यकस्तु यथास्थितः ।
पूरकः पूरणाद्वायोस्तन्निरोधाच्च कुम्भकः ।
दक्षिणो दक्षिणे भागे पिङ्गला नाड़िका
स्मृता ।
पिङ्गलोमिहिरेति ख्याता भानुस्तत्राधिदैवतम् ।
दक्षिणेतरगा या च इड़ा सा नाड़िका स्मृता ।
इड़ेयमिहिरेति ख्याता चन्द्रस्तत्राधिदैवतम् ।
एतयोरुभयोर्म्मध्ये सुषुम्ना नाम विश्रुता ।
पद्मसूत्रनिभा नाड़ी कालाख्या तत्र दैवतम् ।
ततः शून्यं विरामर्थं मध्ये स्वात्मनि योजयेत् ।
[illegible] विनिर्द्दिशेत् ।
[illegible] निरन्तरमुपागमम् ।
[illegible] कल्पयेत्तु ।
[illegible] निरोधयेत् ।
[illegible] कीर्त्तितश्च ।
[illegible] समाचरेत् ।
[illegible] तोषयेत् ।
[illegible] इत्यागमम् ।
[illegible] भवेत् ।
[illegible] द्विजः ।
[illegible] भवेत् ।
[illegible] ।

विज्ञाय वह्निमार्गं तु यहुत्यात्तु [illegible]
सौम्ये नाकर्षयेद्वायुं [illegible]
धारयन्नियतप्राणो योगैश्वर्य्यमवाप्नुयात् ।
जायते वत्सरार्द्धाद्योगी जरामरणवर्जितः ।
वायुमाकर्षयेद्वाह्यं वामया यदि योग[illegible]
नाभिनासान्तराध्यायं क्षिः प्राणेश यो[illegible]
[illegible]
मनःस्थैर्य्यं भवेत्तस्य । त्रिषु स्थानेषु [illegible]
अङ्गुष्ठनाभिनासासु वायुं योगी [illegible]
अपानं कटिदेशे तु पृष्ठतो वै [illegible]
सदा तत्रैव सर्व्वेष एव वायुजयक्रमः ।
रेचकः पूरकश्चैव कुम्भकश्च न सिद्ध्यति ।
निरालम्बे मनः कृत्वा यथायथं [illegible]
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
निग्रहः प्रोच्यते यस्तु प्रत्याहार.
यद्यत् पश्यति तत्सर्व्वं पश्येदात्मवदात्मनि ।
प्रत्याहारः स वै [illegible]
कर्म्मेन्द्रियाणां सर्व्वेषां पञ्चमादेशो [illegible]
यदि तत्र स्थिरो लोको मनो वा [illegible]
उद्घातान् दश पञ्चैव कारयेद्धारणा [illegible]
प्राणवायुं निरुध्यैव मनः सर्व्वात्मना [illegible]
देवांश्च सिद्धान् गन्धर्व्वांश्चारणान् [illegible]
[illegible]
षण्मासाभ्यासयोगेन सप्तज्योतिः [illegible]
दृष्टे न स्यात्पुनर्मृत्युः सर्व्वत्र प्रभ[illegible]
स्फोटाख्या नाड़िका प्रोक्ता मूर्द्धे [illegible]
[illegible]
उच्चार्य्य विन्दुसत्त्वं तु तस्याम्नि गुणा[illegible]
भूतं भव्यं भविष्यच्च वर्त्तमानञ्च दूरत[illegible]
ध्यानं यत्तद्वदेवूनं स्फोटाख्यं शाश्वत[illegible]
ललाटे मूर्द्ध्नि हृदये यदा प्रियमथापरे[illegible]
शुद्धस्फटिकसङ्काशं जटाजूटेन्दुशेखरं
पञ्चवक्त्रं दशभुजं सर्पयज्ञोपवीतिनम्[illegible]
ध्यायेदात्मनि विभुं ध्यानं ।
ततोऽमनस्कं भवति न शृणोति न पश्य[illegible]
न जिघ्रति न स्पृशति न जिघ्रति [illegible]
गुह्योदरादिस्थानेषु वायुं नाशौ [illegible]
देहोऽपहतिति योगीन्द्रः परात्मन्यैक[illegible]
जरामरणनिर्म्मुक्तः शिव एव भवेत्पु[illegible]
गमनागमनाभ्यां यो दोषो वै विप्रो[illegible]
स्वात्मनोऽमनोभावः समाधिरभिधीय[illegible]
न दृष्टस्तु न चिन्ता न स्मृत्यादि [illegible]
न चाद्यन्तरं पुत्र ! न चाप्यस्थि [illegible]
न स्थूलं न कृशं चापि न ह्रस्वं नापि [illegible]
न शुक्लं नापि वा पीतं न कृष्णं नापि [illegible]
तथा शून्यपदनिलयं निराकारं निरा[illegible]
आकाशं सर्व्वभूतानां परमात्मनं [illegible]
सर्व्वाधारमनन्तमाद्यं ज्योतिर्म[illegible]
प्रधानपुरुषातीतमाकाशं दहरं [illegible]
परमं सर्व्वभूतानामीश्वरं ब्रह्म [illegible]
आदिमध्यान्तरहितमनाद्यन्त [illegible]
[illegible] मम ब्रह्मणो [illegible]

ङ्काराग्नौ तथात्मानं संस्थाप्य परमात्मनि ।
काशे देवमीशानं ध्यायीताकाशमध्यगम् ।
रणं सर्व्वभावानामानन्दैकरसाश्रयम् ॥
ाणं पुरुषं शम्भुं ध्यायेन्मुच्येत बन्धनात् ।
सभक्तिं विना यस्तु संसारं तर्त्तुमिच्छति ॥
ो यथा स्वलाङ्गूलैः समुद्रं तर्त्तुमिच्छति ।
ा विना शम्भुसेवां संसारतरणं न हि ॥
वसौख्यप्रदः शम्भुर्नान्या वाचन देवता ।
ात् सर्व्वप्रयत्नेन महादेवं प्रपूजयेत् ॥
ा गुहायां प्रहतं जगत्संमोहनालये ।
चिन्त्य परमं व्योम सर्व्वभूतैककारणम् ॥
वनं सर्व्वभूतानां यत्र लोकः प्रलीयते ।
ानन्दं ब्रह्मणः सूक्ष्मं यत्पश्यन्ति मुमुक्षवः ।
मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
ातुं तिष्ठन्सदैवेन सोऽनुते परमेश्वरम् ॥
कलक्षं द्विलक्षं वा त्रिलक्षं न तथात्मकम् ।
र्व्वोपाधिविनिर्म्मुक्तं समाधिरभिधीयते ॥
ह्ये चाभ्यन्तरे पुत्र ! यत्र यत्र मनः क्षिपेत् ।
त्र तत्रात्मनो रूपमानन्दमनुभूयते ॥
स्थाप्य मयि चात्मानं परं ज्योतिषि निर्गुणे ।
पूर्णे तिष्ठतः साक्षात्तस्य चाद्भवो भवेत् ॥
र्णः परिपूर्णश्च जरामरणवर्ज्जितः ।
ात्प्रसादाद्भवेद्योगी नान्यथा क्रौञ्चसूदन ! ॥
स्मात् सर्व्वं परित्यज्य कर्म्मजालं सुदुष्करम् ।
ैवैकं शरणं गच्छेद्ध्यानं नाशयान्धदम् ॥
ाह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ये च
सङ्कराः ।
द्भक्तिभावना पूता यान्ति मत्परमं पदम् ॥
गतः प्रलये प्राप्ते नष्टे च कमलोद्भवे ।
द्भक्ता नैव नश्यन्ति सेच्छाविग्रहधारिणः ॥
ोगिनां कर्म्मिणां चैव तापसानां यतात्मनाम् ।
इहैव गतिस्तेषां नान्यदस्तीति निश्चयः ॥”
ति-श्रीसूतसंहितायां शिवमाहात्म्यखण्डे-शङ्करस्कन्द-
ंवादे यमनियमप्राणायामादिकथनं १२ अः ॥
अथ योगान्तराया यथा,—
“योगान्तरायास्तस्याथ जायन्ते युञ्जतः पुनः ।
शक्तिरभ्यासतस्तेऽपि प्रणिधानेन वै गुरोः ॥”
एतदुवाच ।
“आलस्यं प्रथमं पश्चाद्व्याधिपीडा प्रजायते ।
प्रमादः संशयस्थाने चित्तस्येहानवस्थितिः ॥
अश्रद्धादर्शनं भ्रान्तिर्दुःखञ्च त्रिविधं ततः ।
दौर्म्मनस्यमयोग्येषु विषयेषु च योग्यता ॥
दशधाभिप्रजायन्ते मुनेर्योगान्तरायकाः ।
आलस्यञ्च प्रवृत्तिश्च गुरुत्वात् कायचित्तयोः ॥
व्याधयो धातुवैषम्यात् कर्म्मजा दोषजास्तथा ।
प्रमादस्तु समाधेस्तु साधनानामभावनम् ॥
इदं वेत्युभयस्पृक्तं विज्ञानं स्थानसंशयः ।
अनवस्थितचित्तत्वमप्रतिष्ठा हि योगिनः ॥
लब्धायामपि भूमौ च चित्तस्य भवबन्धनात् ।
अश्रद्धाभावरहिता वृत्तिर्वै साधनेषु च ॥
साध्ये चित्तस्य हि गुरौ ज्ञानाचारशिवादिषु ।
विपर्य्ययज्ञानमिति भ्रान्तिदर्शनमुच्यते ॥

अनात्मन्यात्मविज्ञानमज्ञानात् तस्य सन्निधौ ।
दुःखमाध्यात्मिकं प्रोक्तं तथा चैवाधिभौतिकम् ॥
आधिदैविकमित्युक्तं त्रिविधं सहजं पुनः ।
इच्छाविघातात् सञ्जोभश्चेतसस्तदुदाहृतम् ॥
दौर्म्मनस्यं निरोद्धव्यं वैराग्येण परेण तु ।
तमसा रजसा चैव संस्पृष्टं दुर्म्मनः स्मृतम् ॥
तदा मनसि सञ्जातं दौर्म्मनस्यमिति स्मृतम् ।
हठात् स्वीकरणं कृत्वा योग्यायोग्यविवेकतः ॥
विषयेषु विचित्रेषु जन्तोर्विषयलोलता ।
अन्तराया इति ख्याता योगस्यैते हि योगि-
नाम् ॥
अत्यन्तोत्साहयुक्तस्य नश्यन्ति न च संशयः ।
प्रनष्टेष्वन्तरायेषु द्विजाः पश्चाद्धि योगिनः ॥
उपसर्गाः प्रवर्त्तन्ते सर्व्वे ते सिद्धिसूचकाः ।
प्रतिभा प्रथमा सिद्धिर्द्वितीया श्रवणा स्मृता ॥
वार्त्ता तृतीया विप्रेन्द्रास्तुरीया चेह दर्शना ।
आस्वादा पञ्चमी प्रोक्ता वेदना षष्ठिका स्मृता ।
स्वल्पषट्सिद्धिसन्त्यागात् सिद्धिदाः सिद्धयो
मुनेः ।
प्रतिभा प्रतिभावृत्तिः प्रतिभाव इति स्थितिः ॥
बुद्धिर्व्विवेचना वेद्यं बुध्यते बुद्धिरुच्यते ।
सूक्ष्मे व्यवहितेऽतीते विप्रकृष्टे त्वनागते ॥
सर्व्वत्र सर्व्वदा ज्ञानं प्रतिभानुक्रमेण तु ।
श्रवणात् सर्व्वशब्दानामप्रयत्नेन योगिनः ॥
ह्रस्वदीर्घप्लुतादीनां गुह्यानां श्रवणादपि ।
स्पर्शस्याधिगमो यस्तु वेदना तूपपादिता ॥
दर्शना दिव्यरूपाणां दर्शनञ्चाप्रयत्नतः ।
संविद्दिव्यरसे तस्मिन्नास्वादो ह्यप्रयत्नतः ॥
वार्त्ता च दिव्यगन्धानां तन्मात्रा बुद्धिसंविदा ।
विन्दन्ते योगिनस्तस्मादाब्रह्मभुवनं द्विजाः ॥
जगत्यस्मिन् हि देहस्थं चतुःषष्टिगुणं समम् ।
औपसर्गिकमेतेषु गुणेषु गुणितं द्विजाः ॥
सन्त्याज्यं सर्व्वथा सर्व्वमौपसर्गिकमात्मनः ।
पैशाचे पार्थिवञ्चाप्यं राक्षसानां पुरे द्विजाः ॥
याक्षे तु तैजसं प्रोक्तं गान्धर्व्वे श्वसनात्मकम् ।
ऐन्द्रे व्योमात्मकं सर्व्वं सौम्ये चैव तु मानसम् ॥
प्राजापत्ये त्वहङ्कारं ब्राह्मे बोधमनुत्तमम् ।
आद्ये चाष्टौ द्वितीये च तथा षोडशरूपकम् ॥
चतुर्व्विंशत् तृतीये तु द्वात्रिंशच्च चतुर्थके ।
चत्वारिंशत् पञ्चमे तु भूततन्मात्रात्मकं स्मृतम् ॥
गन्धो रसस्तथा रूपं शब्दः स्पर्शस्तथैव च ।
प्रत्येकमष्टधा सिद्धं पञ्चमे तच्छतक्रतोः ॥
तथाष्टचत्वारिंशच्च षट्पञ्चाशत् तथैव च ।
चतुःषष्टिगुणं ब्राह्मं लभते द्विजसत्तमाः ॥
औपसर्गिकमाब्रह्म भुवनेषु परित्यजेत् ।
लोकेष्वालातवद्योगी योगवित् परमं सुखम् ॥
स्थूलता ह्रस्वता बाल्यं वार्द्धकं यौवनं तथा ।
नानाजातिस्वरूपञ्च चतुर्भिर्देहधारणम् ॥
पार्थिवांशं विना नित्यं सुरभिर्गन्धसंयुतः ।
एतदष्टगुणं प्रोक्तमैश्वर्य्यं पार्थिवं महत् ॥
जले निवसनं यद्वद्भूम्यामिव विनिर्गमः ।
इच्छेच्छक्तः स्वयं पातुं समुद्रमपि नातुरः ॥

यत्रेच्छति जगत्यस्मिन् तत्रास्य जलदर्शनम् ।
यद्यद्वस्तु समादाय भोक्तुमिच्छति कामतः ॥
तत्तद्रसान्वितं तस्य त्रयाणां देहधारणम् ।
भाण्डं विनाथ हस्तेन जलपिण्डस्य धारणम् ॥
अव्रणत्वं शरीरस्य पार्थिवेन समन्वितम् ।
एतत् षोडशकं प्रोक्तमाप्यमैश्वर्य्यमुत्तमम् ॥
देहादग्निविनिर्म्माणं तत्तापभयवर्ज्जितम् ।
लोकं दग्धमपीहाप्यदग्धं स्वविधानतः ॥
जलमध्ये हुतवहस्याधाय परिरक्षणम् ।
अग्निनिग्रहणं हस्ते स्मृतिमात्रेण चागमः ॥
भस्मीभूतविनिर्म्माणं यथापूर्व्वं स्वकामतः ।
द्वाभ्यां रूपविनिष्पत्तिर्विना तैस्त्रिभिरात्मनः ॥
चतुर्व्विंशात्मकं ह्येतत् तैजसं मुनिपुङ्गवाः ।
मनोगतित्वं भूतानामन्तर्निवसनं तथा ॥
पर्व्वतादिमहाभारस्कन्धेनोद्वहनं पुनः ।
लघुत्वञ्च गुरुत्वञ्च पाणिभ्यां वायुधारणम् ॥
अङ्गुल्यग्रनिपातेन भूमेः सर्व्वत्र कम्पनम् ।
एकेन देहनिष्पत्तिर्वातैश्वर्य्यं स्मृतं बुधैः ॥
छायाविहीननिष्पत्तिरिन्द्रियाणाञ्च दर्शनम् ।
आकाशगमनं नित्यमिन्द्रियार्थैः समन्वितम् ॥
दूरे च शब्दग्रहणं सर्व्वशब्दावगाहनम् ।
तन्मात्रलिङ्गग्रहणं सर्व्वप्राणिनिदर्शनम् ॥
ऐन्द्रमैश्वर्य्यमित्युक्तमेतैरुक्तः पुरातनः ।
यथाकामोपलब्धिश्च यथाकामविनिर्गमः ॥
सर्व्वत्राभिभवश्चैव सर्व्वगुह्यनिदर्शनम् ।
कामानुरूपनिर्म्माणं वशित्वं प्रियदर्शनम् ॥
संसारदर्शनञ्चैव मानसं गुणलक्षणम् ।
छेदनं ताडनं बन्धं संसारपरिवर्त्तनम् ॥
सर्व्वभूतप्रसादश्च मृत्युकालजयस्तथा ।
प्राजापत्यमिदं प्रोक्तमाहङ्कारिकमुत्तमम् ॥
अकारणजगत्सृष्टिस्तथानुग्रह एव च ।
प्रलयश्चाधिकारश्च लोकवृत्तप्रवर्त्तनम् ॥
असादृश्यमिदं व्यक्तं निर्म्माणञ्च पृथक् पृथक् ।
संसारस्य च कर्त्तृत्वं ब्राह्ममेतदनुत्तमम् ॥
एतावत् तत्त्वमित्युक्तं प्राधान्यं वैष्णवं पदम् ।
ब्रह्मणा तद्गुणं शक्यं वेत्तुमन्यैर्न शक्यते ॥
विद्यते तत् परं शैवं विष्णुना नावगम्यते ।
असंख्येयगुणं शुद्धं को जानीयाच्छिवात्मकम् ॥
उत्थाने सिद्धयश्चैता ह्युपसर्गाश्च कीर्त्तिताः ।
निरोद्धव्याः प्रयत्नेन वैराग्येण परेण तु ॥
नाशातिशयतां ज्ञात्वा विषयेषु भयेषु च ।
अश्रद्धया त्यजेत् सर्व्वं विरक्त इति कीर्त्तितः ॥
वैतृष्ण्यं पुरुषे ख्यातं गुणवैतृष्ण्यमुच्यते ।
वैराग्येणैव सन्त्याज्याः सिद्धयश्चौपसर्गिकाः ॥
औपसर्गिकमाब्रह्म भुवनेषु परित्यजेत् ।
निरुध्यैव त्यजेत् सर्व्वं प्रसीदति महेश्वरः ॥
प्रसन्ने विमला मुक्तिर्वैराग्येण परेण वै ।
अथवानुग्रहार्थञ्च लीलार्थं वा तदा मुनिः ॥
अनिरुध्य विचरेद्यः सोऽपि वै सुखी भवेत् ।
क्वचिद्भूमिं परित्यज्य आकाशे क्रीडते श्रिया ॥
उद्गिरेच्च क्वचिद्वेदान् सूक्ष्मानर्थान् समासतः ।
क्वचिच्छ्रुते तदर्थेन श्लोकबन्धं करोति सः ।

अनिद्दत्तवारयन्तु कुर्य्यादन्यं सहस्रशः ।
अमरश्रिसम्बद्धस्य ततत्रानम विन्दति ।
प्रसादं स्मावरात्मच हस्तामलकवद्भवेत् ।
वह्नयाम त्रिमुखेन विज्ञानानि सहस्रशः ।
उत्पद्यन्ते सुनिश्रेष्ठा मुनेस्तस्य महात्मनः ।
अभ्यासेनैव विज्ञानं विशुद्धञ्च स्थिरं भवेत् ।
तेजोऽव्याप्ति मन्वादि सर्व्वं पश्यति योगवित् ।
देवविमानेस्थानि विमानानि सहस्रशः ।
पश्यति ब्रह्मविष्ण्विन्द्रयमाग्निवरुणादिकान् ।
ग्रहनक्षत्रताराच भुवनानि सहस्रशः ।
पातालतलसंस्थाश्च समाधिस्थः स पश्यति ।
आत्मविद्याप्रदीपेन स्वयोगाचलनेन तु ।
प्रसादामृतपूर्णेन सत्त्वपात्रस्थितेन तु ।
तमो निहत्य पुरुषः पश्यति ह्यात्मनीश्वरम् ।
तस्य प्रसादाद्धर्म्मश्च ऐश्वर्य्यं ज्ञानमेव च ।
वैराग्यमपवर्गश्च नात्र कार्य्या विचारणा ।
न शक्यो विस्तराद्वक्तुं वर्षाणामयुतैरपि ।
योगे पाशुपते विप्रा माहात्म्यञ्च मुनीश्वराः ॥"
इति लिङ्गपुराणे ६ अध्यायः ।)
अथ [illegible]योगः ।
श्रीभगवानुवाच ।
"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥
निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु ।
तेष्वनिर्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥
तावत् कर्म्माणि कुर्व्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥
स्वधर्म्मस्थो यजन् यज्ञैरनाशीःकाम उद्धव ।
न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥
अस्मिँल्लोके वर्त्तमानः स्वधर्म्मस्थोऽनघः शुचिः ।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिञ्च यदृच्छया ॥"
इति श्रीभागवते । ११ । २० । ६—११ ॥ * ॥
[illegible]योगः २ कर्म्मयोगः ३ ज्ञानकर्म्मसंन्यास-
योगः ४ [illegible]योगः ५ ध्यानयोगः ६ विज्ञान-
योगः ७ ब्रह्मयोगः ८ राजगुह्ययोगः ९ विभूति-
योगः १० भक्तियोगः ११ क्षेत्रक्षेत्रज्ञविवेक-
योगः १२ गुणत्रययोगः १३ पुरुषोत्तमयोगः १४
[illegible]योगः १५ मोक्षयोगः १६ एते
योगाः श्रीभगवद्गीतायां प्रकाशिताः ॥ * ॥
([illegible] । [illegible]
३९ [illegible] ।
"न [illegible] योगो न [illegible]
[illegible] ।
[illegible] ।
"[illegible] ।
[illegible] ।")
योगक्षेमं, क्ली, ([illegible])
[illegible] ।
[illegible] ।

योगक्षेमेऽन्यथा चेत्तु पापी बलवतामियात् ।"
इत्यङ्गिराः ।
"अनागतस्य चानेता आगतस्य च रक्षकः ।
तावानपि यदान्योऽस्ति तदा स्वामी न दोष-
भाक् ।"
इति-प्रायश्चित्ततत्त्वम् ।
(तथा च गीतायाम् । ९ । २२ ।
"अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।"
"योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं
वहामि ।" इति शङ्कराचार्य्यः । "योगं धनादि-
लाभं क्षेमञ्च तत्पालनं मोक्षं वा तैरप्रार्थित-
मपि अहमेव वहामि प्रापयामि ।" इति
श्रीधरस्वामी । योगश्च क्षेमश्च इतीतरेतरद्वन्द्वे
पुलिङ्गद्विवचनप्रयोगो भवति ।) यथा,—
"योगक्षेमकरं तस्या सीताया लक्ष्मणं ततः ।
न्यस्याश्रुपदो रामो जगाम गजविक्रमः ॥"
इति भट्टिकाव्ये । ५ । ५० ।
"अलब्धलाभादेरलब्धस्य साधनं योगः शरीरादे-
र्लब्धस्य पालनं क्षेमः ।" इति तट्टीकायां
भरतः । "योगक्षेमौ शरीरस्थितिपालने ।"
इति तत्रैव जयमङ्गलः ।
योगचरः, पुं, (योगेषु चरतीति । चर + "चरेष्टः ।"
३ । २ । १६ । इति टः ।) हनूमान् । इति
शब्दरत्नावली ।
योगजं, क्ली, (योगात् जायते इति । जन् + डः ।)
अगुरु । इति भावप्रकाशः । योगजाते,
त्रि ।
योगजः, पुं. (योगेभ्यो जायते इति । जन् + डः ।)
अलौकिकसन्निकर्षविशेषः । स च युक्तयुञ्जान-
भेदतो द्विविधः । यथा,—
"अलौकिकस्तु सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्ष्यते ।
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ।"
इति भाषापरिच्छेदे । ६२—६६ ॥ * ॥
"योगज इति । योगाभ्यासजनितधर्म्मविशेषः ।
श्रुतिपुराणादिसमावेद्य इत्यर्थः । युक्तेति ।
युक्तयुञ्जानरूपयोगिद्वैविध्यात् धर्म्मस्य द्वैविध्य-
मिति भावः । युक्तस्येति । योगाभ्यासवशात्
तमीश्वर-समाधि-समासादित-विविधसिद्धियुक्त
इत्युच्यते । अत एव सिद्धिर्योगस्थात् युक्त इत्यु-
च्यते । सर्व्वदेति । चिन्तासहकारं विनैवेत्यर्थः ।
भानं सर्व्वविषयाणां प्रत्यक्षम् । अपरो युञ्जानः ।
[illegible]सत्त्वा भावनसमाधियुक्तः अयञ्च
युञ्जान उच्यते । चिन्ता ध्यानं सहैव कारणं
तादृशकारात् [illegible]
सर्व्वं मनः [illegible] ।" इति
सिद्धान्तमुक्तावली ।

योगदानं, क्ली, (योगेन दानम् ।) [illegible]
यथा,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत्तत् सर्व्वं विनिवर्त्तयेत् ॥"
इति मानवे ८ अः ।
"योगाधमनेति । योगशब्दश्छलवाची ।
बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते ।
अन्यत्रापि निःक्षेपादौ यत्र छद्म
वस्तुतो निक्षेपादि न कृतं तत् सर्व्वं
येत् ।" इति तट्टीकायां कुल्लूकभट्टः ।
योगनाविकः, पुं, मत्स्यविशेषः । [illegible]
शारीटः २ । इति हारावली ।
योगनिद्रा, स्त्री, (योगश्चित्तवृत्तिनिरो-
समाधिस्तद्रूपा निद्रा ।) दुर्गा । यथा,
"या निद्रान्तःस्वभावस्था [illegible]
विभज्य पुरुषं याति योगनिद्रेति सोच्यते ।"
इति कालिकापुराणे ६ अः ।
(अपि च मार्कण्डेये देवीमाहात्म्ये ।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् ॥"
योगेन समाहलोपायादिना साध्या
वीराणां निद्रा । यथा, कामन्दकीयनीति-
सारे । १५ । ४३ ।
"मार्गे च दुर्गे विनिविष्टसैन्यो
विधाय रक्षां विधिवद्विधिज्ञः ।
असङ्गमार्गस्थितवीरयोधः
सेवेत साध्वीं सुखयोगनिद्राम् ॥"
योगपट्टं, क्ली, (योगस्य पट्टं वस्त्रम् ।
योगार्थं पट्टमिति वा ।) यद्वस्त्रेण पृष्ठ-
भवति तत् । यथा,—
"पादुके योगपट्टञ्च तर्ज्जन्या रौप्यधार-
न जीवत्पितृकः कुर्य्यात् ज्येष्ठे भ्रातरि
[illegible]
लक्षणं यथा,—
"एकजान्वोः समायोगे वस्त्रं बन्धयेद्यदा ।
परिवेष्ट्य यदूर्द्ध्वं मुक्तिस्तद्योगपट्टकम् ॥"
इति माघे कार्त्तिकमाहात्म्ये २ अः ।
(योगपट्टकम् । उत्तरीयविशेषः । यथ
[illegible] ।
"अभावे धौतवस्त्रस्य शाणक्षौमाविकानि
कुतपो योगपट्टं वा द्विवासा येन वा
इत्याह्निक[illegible]
योगपट्टकं, क्ली, (योगस्य पट्टकम् ।)
धार्म्मिकोत्तरीयविशेषः । योगपाटा इति
यथा,—
"त्रिविधं योगपट्टमाद्यं [illegible]
द्वितीयं [illegible] तृतीयं [illegible]
चतुर्म्मासप्रविस्तारं दैर्घ्येण [illegible]
चतुर्म्मासं चतुरङ्गुलमात्रम् ।" इति
मिश्रोदयधृतसिद्धान्तशेखरः ।
योगपीठं, क्ली, (योगस्य योगार्थं वा
नम् ।) देवानां योगासनम् । यथा,—

सकलं योगपीठन्तु पद्मं पद्मं विचिन्तयेत् ।
[धर्म्म]ादीन् मासनानीह चत्वार्य्यपि विचिन्तयेत् ॥
[यो]गपीठं पृथग्ध्यात्वा सकलेन चतुष्कलान् ।
[स]ध्यात्वा ततः पश्चात् पूजयेदासनं ततः ॥
[ध्य]ानेन योगपीठस्य ध्यात्वा यद्दीयते जलम् ।
[त]ेन पुष्पधूपादि तत् सर्व्वोपतिष्ठते ॥
[सर्व्वे] देवाः सगन्धर्व्वाः सचराचरगुह्यकाः ।
[तो]षिताः पूजिताश्च स्युर्योगपीठस्य पूजने ॥"

इति कालिकापुराणे ५६ अध्यायः ॥

[योग]माया, स्त्री, (योग एव माया ।) भगवती । [स]ा च विष्णुमाया । यथा, —

"ततश्च शौरिर्भगवत्प्रचोदितः
सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजा
या योगमायाजनि नन्दजायया ॥"

इति श्रीभागवते १० स्कन्धे ३ अध्यायः ॥

[योग]रङ्गः, पुं, (योगेन रङ्गो रागो यस्य ।) नारङ्गः । इति राजनिर्घण्टः ॥ (नारङ्गशब्देऽस्य विवृति-र्ज्ञेया ॥)

[योग]राजगुग्गुलुः, पुं, (योगराजाख्यो गुग्गुलुः ।) वातरोगादीनामौषधविशेषः । यथा,—

"नागरं पिप्पलीमूलं चव्यं मरिचचित्रकम् ।
भृष्टं हिङ्गजमोदा च सर्षपौ जीरकद्वयम् ॥
रेणुकेन्द्रयवौ पाठा विडङ्गं गजपिप्पली ।
कटुकातिविषा भार्गी वचा मूर्व्वा च पद्मकम् ॥
देवदारु वचा कुष्ठं रास्ना मुस्ता च सैन्धवम् ।
एला त्रिकटवः पथ्या धान्यकञ्च विभीतकम् ॥
धात्री च समभागैरेव चव्यकारोहिताम्यपि ।
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ॥
यावन्त्येतानि चूर्णानि तावद्भागश्च गुग्गुलुः ।
संमर्द्य सर्पिषा पश्चात् सर्व्वं संमिश्रयेत् ततः ॥
एवं सिद्धं ततः कुर्य्यात् धारयेत् घृतभाजने ।
गुटिकाद्यकमात्रास्तु खादेत्ताश्च यथोचितम् ॥
यथोचितानि दोषकालबलादपेक्षया ॥
परिभाषा च ।
आदौ प्रत्येकभागं स्यात् ततः सर्व्वार्ह-
मात्रकम् ।
ततः [illegible] गुग्गुलुं [illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]

मथुना मेदसो वृद्धिं कुष्ठं निम्बक्तेन च ॥
छिन्नाक्वाथेन वातास्रं घोरं शूलकलान्
मतान् ।
पाटलाक्वाथसहितो विषं मूषकसम्भवम् ।
त्रिफलाक्वाथसंयुक्तो दारुणां नेत्रवेदनाम् ।
पुनर्नवादिः क्वाथेन हन्ति सर्व्वोदराण्यपि ॥ ●।
अत्र रास्नादिक्वाथो यथा,—
रास्ना पुनर्नवा शुण्ठी गुडूच्येरण्डजं समम् ।
समधातुगते वाते सामे सर्व्वाङ्गगे पिबेत् ॥
इति योगराजो गुग्गुलुः ॥" इति भावप्रकाशः ॥

योगरूढः, पुं, (योगार्थप्रतिपादको रूढः ।) योगार्थसहभावेन रूढार्थबोधकशब्दः । यथा, "योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा ॥" "ते शब्दाः पुनस्त्रिधा भवन्ति । योगरूढाः पङ्कजादयः । पङ्कजनिकर्त्तृत्वेः पङ्कजनिकर्त्तृमभि-धाय चैव योगेनापि पद्मार्थ एव प्रतिपाद्यते न कुमुदाद्यर्थ इति । योगार्थपुरस्कारेणापि रूढार्थं धत्तेति योगरूढः । एवं ईश्वरसङ्केत-महिम्ना झटिति पद्मस्यैव रूढेः ।" इत्यलङ्कार-कौस्तुभे २ किरणः ॥ ("योगरूढं नाम लक्षयति । 'स्वान्तर्निविष्टस्वार्थस्वार्थबोधप्रत्ययः । योगरूढं न यथैवं विनाश्यस्यास्ति शास्त्रधीः ॥' समास स्वावयवशक्तिलभ्यार्थेन समं स्वार्थस्या-न्वयबोधकत् समास योगरूढं यथा पङ्कजपद-समानाधिकरणादि नहि शक्तिनिर्देशात् पङ्कादि-शब्दानां शक्तिलभ्येन पङ्कजनिकर्त्रादिना सम्बं [illegible] पद्मादेरन्वयानुभावयं पङ्कजनित्वा-दिनः पङ्कजनिकर्त्तृ पद्मानित्वानुभावात् सर्व्वसिद्ध-त्वात् । एतांस्तु विशेषो पङ्कजादि [illegible] वाचकादिपदं योगार्थविनाकृतस्य रूढार्थस्यैव रूढार्थविनाकृतस्यापि योगार्थस्य बोधकं सम्भवे-दिति रूढौ योगार्थस्य [illegible] समर्थं भौमार्थादिकादौ एतादृशार्थस्य रूढादेर-योगलेशाभावादबोधात् । योगरूढन्तु पङ्कजादि-पदसमुदायशक्त्या रूढार्थेन [illegible] स्वावयवलभ्यार्थैरूढाभावस्तिरस्कृतं कुमुदादि-[illegible] । अतएव पङ्कज-कुमुदनिष्ठ पङ्कजनिकर्त्तृत्वेन भूमौ पङ्कज-[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

धातकर्म्मत्वविशिष्टार्थो मतीवपङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढिरेवास्तु नतु योगरूढिरिति साम्प्रतं अन्यत्र कृप्तशक्तिभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कज-निकर्त्त्रादिसंभवसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायशक्यत्वादनन्यलभ्यस्यैव शब्दार्थ-त्वात् । यद्यपि कर्त्तृवाचकडप्रत्यये एव पद्मत्व-विशिष्टस्य लक्षणया लाभसम्भवात् पङ्कज-भागस्य तत्र शक्तिकल्पना प्रकारान्तरालभ्यस्यैव शब्दशक्त्यभिधुक्तत्वात् कृतिवर्त्तमानत्वयोरि-दैकपदार्थयोरपि कर्त्तृपदयोःसंयोगान्वयस्य सम्भवित्वात् तथाव्यवयवानां शक्तिरपहे यद्यपि वा पद्मादौ तदर्थस्यान्वयबोधविरोधिबोधाभावात् पङ्कजसक्तीत्यादिनः पद्मसक्तीत्याद्यनुभवार्थ-सवाद्यं पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढिरपेया इत्यथा प्रकृत्यर्थांशस्यैव प्रत्य-यार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया कृप्त त्वयोस्त्वापिनस्यापि पदस्यास्तित्वादिना पदा-न्वयादुपपत्तिः । अतएव पङ्कजादिपदाद्योग-शक्तिकस्य पुंसः पङ्कजसक्तीत्यादितो नापि कर्त्तृसक्तीत्याकारको शान्तबोधः प्रत्ययमात्रोप-स्थाप्यस्य कर्त्तृत्वस्यान्वये निराकाङ्क्षत्वादिति वदन्ति । किन्त्वेकैकावयवबोधावधृतशक्तिकानां वस्तादिप्रत्येकपदानामेव मिलितानुपस्यस्या तत-दर्थानुभावकत्वमालङ्कारिकादिसमुदायस्यापि तत्तदर्थे शक्तिर्मिलितेन वादिप्रत्येकपदेन शक्ति-मर्द्दं विनापि एतादिसमुदायकादिवानुभवात् तत्र रूढार्थे शक्तिरिति न युक्तेऽपि समासं कादि-प्रत्ययमात्रस्य पद्मादौ शक्तिसत्त्वानुपपत्तेः पङ्क-जादिसमुदायात् पद्मादेरनुभवस्य सर्व्वसिद्ध-त्वात् । एवं निवसितिरूढिवादादपि निपातोक्ता-स्तादौ समुदायस्य शक्तिकल्पनः सासामस्त्या-विशिष्टस्मादिति वाच्यम् सर्व्वोऽसावपशक्तिः [illegible] [illegible] [illegible] [illegible]-रिवादौ [illegible] पदाविशार्थबोधकमपि [illegible] तत्सत्यामासेति ।

पङ्कजादिपदेभ्यः [illegible] योगार्थस्य [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पद्माम्नायै यदपि पद्मान्यधर्मिकपङ्कजातत्ता-भावबोधानार्थं प्रति पङ्कजपदं पद्मत्वमिति रूढ्या शक्तत्वेन न विरोधित्वं तादृश्यबोधस्यापि कर्दमजातिसम्बन्धसादृश्येन कैरवादेरवगमात् नापि पङ्कजपदसमभिव्याहारबोधं प्रति तथा विरोधित्वं रूढ्या पद्मत्वमपि समुदायस्य उभयथा दर्शितमेव वा पङ्कजपदात् पङ्कजातत्वेन कुमुद-बोधस्य सर्वैरनगमात् तथाच्चयबद्धका पङ्कज-पदजन्यपद्मान्यधर्मिकपङ्कजातत्त्वान्वयबोधं प्रति रूढ्यावत्वेन प्रतिबन्धकत्वम्। तत्र कुमुद तत्र पद्मत्वेन रूढिमत्पदार्थो तादृश्येन कुमुदस्य बोधो न स्यादिरोधिना रूढिधिय: सत्त्वादिति चार्थं पद्मान्यधर्मिकत्वेन पद्मत्वावच्छिन्नविशे-षणाकमकोत्तमात्। पद्मस्येव कुमुदस्यापि कुमुदादपत्वयोर्दमापाम्बयबद्धका पङ्कजातं कुमुदमितिकारणबोधोभावे तु कुमुदादिपदत्व शापाकत्वं नापि प्रतिवर्धं विदितयोगम्। तत्र तत्र

[illegible]

पङ्कजनकर्तृषु पद्मादिपदानां शक्तिमत्त्वेऽपि पङ्कजपदात् सादृश्येन बोध: परन्तु पद्मत्वमात्रेण योगार्थसमर्थादया पङ्कजातत्वप्रकारकबोधसा-मान्यं प्रत्येव पद्मत्वविशिष्टे रूढिज्ञानस्य लाघ-वेन विरोधित्वात् पद्मान्यधर्मिकत्वादेर्गौरवेण प्रतिबन्धकोपप्रविष्टत्वादतो योगरूढं नामैव नास्ति युधिष्ठिरादिशब्दादपि रथस्थिरत्वादिकं योगार्थं परित्यज्यैव वैयाकरणादिप्रकारेण कुन्ती-पुत्राद्यवगमात्। यदुक्तमभियुक्तै:।

या हरितरुणतृत्वार्था सेयमत्रोपपादिता।
अन्वतृत्वायां तु तत्रैव यत्र रूढिर्न्विरोधिनी।
पङ्कजं मनसादेवी पद्मनाभी युधिष्ठिर:।

इति। तदेतद्वैयाकरणमतं पङ्कजमन्नोत्यादित: पङ्कजातं पद्ममन्नोत्यादनुभवस्य न्यायमीमां-सादिषकलतन्त्रसिद्धत्वेन गौरवस्य प्रामाणि-कत्वाद्नादेयमन्यथा व्यवधानशक्तेरपि प्रतिबध्य-तायामप्रवेशापत्तिरपि पङ्कजातत्वप्रकारक-मान्वयामान्यं प्रत्येव रूढिधिय: प्रतिबन्धकत्वस्य सम्भवात्। तस्मिन् सत्येव पदविषमन्नोत्यादितो इत्यभिर्ह्य पदोत्पमिव इत्याभिन्ने पदमिह जातं पदमपि प्रतीयेत नामार्थयोरभेदान्वये तस्य नाम्नो: समानविभक्तिकत्वस्यागत्यादिति चेत् कथं पविभक्तिकनामार्थस्य नामान्तरार्थान्वये वृत्तिमदेकदेशान्वयेनैव समानविभक्तिकनामा-न्तरेण सार्थकत्वस्य तन्त्रताया: स्वीकार्यत्वा-दिति।

यद्राशाकुतं योग्यं समिधानं प्रपद्यते।
तेन तेनान्वित: स्वार्थ: पदै: समधिगम्यते।

इति रूढ्यर्थयोगार्थयोर्युगपदुपस्थितौ तयो-दराकाङ्क्षादिसाचिव्यादन्वयबुद्धिस्तत एव योगार्थस्य रूढ्यर्थस्य वा नान्यथान्वयो यतु तयोरेव मिथ: साकाङ्क्षत्वं तत्र योगार्थस्य बोधने रूढिधिय: प्रतिबन्धकत्वं वा प्रमाणा-भावात् यत्र यत्र योगरूढिलभ्यार्थयोस्तात्-पर्यादन्वयाद्विरोधित्वमत्थाहा न प्रथमप्रत्ययोक्त योगार्थसमर्थादया पङ्कजातत्वेन कुमु-दादे: समन्वयबोधो च पद्मत्वेन सामान्यमत्रस्य बोधो भवत्वेवेति मणिकारमतं दर्शयति।

“रूढ्यर्थस्य वा यत्र पराकाङ्क्षादिनिश्चय:।
तदैव तत्र योगार्थस्यान्वयो भविता ततः॥”

[illegible]

योगरूढं त्रिधा मतम्।

“[illegible] त्रिविधं भवेत्।
योगरूढं [illegible]॥”

[illegible]

पङ्कजादियोगरूढस्य सामासिक इति शाब्दिकम्। ॥ ७ ॥)

योगवाह:, पुं, (योगस्य वाह:। [illegible] तीति। वह् + णिच् + अण् वा।) विसर्ग:। जिह्वामूलीय:। उपध्मानी। व्याकरणम्॥

योगवाही, स्त्री, (योगं वाहयतीति। व + अण्। ततो ङीष्।) क्षारविशेष:। “स्वर्ज्जिका स्वर्ज्जिकासुग्नी योगवाही च” इति [illegible]

पारदश्च। (पुं, [illegible]) प्रयोग:। यथा,—

“योगवाहिरसा: सर्व्वे [illegible]”

[illegible]

योगसार:, पुं, (योगस्यौषधप्रयोगस्य सर्व्वरोगहरणोपाय:। यथा,—

धन्वन्तरिरुवाच।

“सर्व्वरोगहरं दिव्यं योगसारं वदाम्यहम्। शृणु सुश्रुत! संक्षेपात् प्राणिनां [illegible] निमेषादिहेतुि:कालचिन्ताभि: कषायकटुतिक्ताम्लरूक्षाहारादिभोजनै: चिन्ताव्यवायव्यायामभयशोकप्रजागरै: उच्चैर्भाष्यतिभाराद्यैः कर्म्मयोगातियोगतः। वायु: कुप्यति पर्य्यन्ते जीर्णान्ने दिवसे [illegible] उष्णाम्लक्षारकटुकाजीर्णभोजनै: तीक्ष्णातपाग्निसन्तापमद्यक्रोधनिषेवणै: विदाहकाले भुक्तस्य मध्याह्ने चार्द्धरात्रे ग्रीष्मकालेऽर्द्धरात्रेऽपि पित्तं कुप्यति [illegible] स्वाद्वम्ललवणस्निग्धगुरुशीतातिभोजनै: नवान्नपिच्छलानूपमांसाशनस्निग्धैर्जलै: व्यवायो दिवास्वप्नव्यायामरहितादिभि: कफ: प्रदोषे भुक्ते च वसन्ते च प्रकुप्यति। माधुर्य्यमम्लत्वं शोषस्तोदविदाहभोजना [illegible] खरता सुप्तता हर्षे रोमहर्षणभोजना [illegible] व्यायामसङ्गविघ्नेन ग्रामसञ्चरणम्। वायोर्लिङ्गानि तैर्युक्तं रोगं वाताज्ञं दाहोष्मदाहपक्तिश्चोषरागपरिस्रवा:। कट्वम्लरसता [illegible] हारिद्रं वर्णितमत्र पित्तलिङ्गानि [illegible] स्नेहोपदेहमाधुर्य्यचिरकारित्वमेव च। शैत्यकण्डूगौरवं च [illegible] कफलिङ्गानि [illegible] [illegible] दोषधातुमलाधारो देहिनां देह उच्यते। तेषां समत्वमारोग्यं क्षयवृद्धी विपर्य्यय: [illegible] [illegible] वातपित्तकफा दोषा [illegible] वायु: शीतो लघु: सूक्ष्म: [illegible]

[illegible] मधुरो रस: स्निग्धो गुरु: [illegible]

यो वायुः पित्तं पक्काशयस्थितम् ।
यं स्थानं कण्ठोरस्तद्धसन्धयः ।
यायाश्च कफपित्तादिसंश्रयः ।
: पित्तं स्यादूष्मसवला: कफम् ।
चपर्य्यस्ता: समायेयां प्रयोजिता: ।
गिण्यां शान्तै सुम्यानां सुखहेतवः ।”
इत्यादि गारुडे १७२ अध्यायः ।
सार: । शिवस्तवात्मको ग्रन्थविशेषः ।)
, स्त्री, (योगेनाधमनम् ।) छलेन वन्ध-
यथा,—
ाधमनविक्रीतं योगदानप्रतिग्रहम् ।
वाप्युपधिं पश्येत् तत् सर्व्वं विनिवर्त्तयेत् ।”
इति मनुः ।

विवरणं योगदानशब्दे द्रष्टव्यम् ।
ः, पुं, (योगेन ऋतुयोगेन आरूढः ।)
रूढः । इति राजनिर्घण्टः ।
रूढ़:, त्रि, (योगं विषयनिवृत्तिं शमादिकं वा
आरूढ़: ।) इन्द्रियभोग्येषु शब्दादिषु तत्साधन-
कर्म्मसु चानासक्तः । तस्य लक्षणं यथा,—
“यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्जते ।
सर्व्वसङ्कल्पसंन्यासी योगारूढ़स्तदोच्यते ॥”
इति श्रीभगवद्गीतायाम् । ६ । ४ ॥
“कीदृशोऽयं योगारूढ़ो यस्य शमः कारण-
मुच्यते इत्यत्राह यदेति । इन्द्रियार्थेषु इन्द्रिय
भोग्येषु शब्दादिषु तत्साधनेषु च कर्म्मसु यदा
नानुषज्जते आसक्तिं न करोति । तत्र हेतुः
आसक्तिमूलभूतान् सर्व्वान् भोगविषयान्
कर्म्मविषयांश्च सङ्कल्पान् संन्यसितुं त्यक्तुं शीलं
यस्य सः । तदा योगारूढ़ उच्यते ।” इति तट्टी-
कायां श्रीधरस्वामी ।
[illegible]साधनं, स्त्री, (योगसाधनं योगसाधनमासन-
[illegible]मिति वा ।) अष्टाङ्गम् । ध्यानासनम् । इति
हेमचन्द्रः । ३ । ५०२ । (तत्तु पद्मासनादि ।
यथा, भट्टिकाव्ये । ७ । ७७ ।
“इत्युक्ता सर्व्वं स्वानुबन्धा योगासनानि वै ।”
“योगासनानि पद्मासनानि ।” इति तट्टीकायां
जयमङ्गलभरतमल्लिकौ ।)
[illegible]:, पुं, (योगिनां इष्टोऽस्त्यस्य इति ।)
[illegible] । इति राजनिर्घण्टः ।
[illegible]गिनी, स्त्री, (योगोऽस्त्यस्या इति । योग + इनिः ।
ङीप् ।) योगयुक्ता नारी । (यथा, मार्कण्डेये ।
५२ । ३१ ।
[illegible] इमे मन्त्रवादिन्यो योगिन्यो ज्ञातुमिच्छ ।”)
[illegible] भगवत्याः सखीरूपा आवरणदेवता । सा
[illegible] कोटिविधा । तासां मध्ये चतुःषष्टिः प्रधानाः ।
[illegible] यथा । नारायणी १ गौरी २ शाकम्भरी ३
भीमा ४ रक्तदन्तिका ५ भ्रामरी ६ पार्व्वती ७
दुर्गा ८ कात्यायनी ९ महादेवी १० चण्डघण्टा
११ महाविद्या १२ महातपा १३ सावित्री १४
ब्रह्मवादिनी १५ भद्रकाली १६ विशालाक्षी १७
रुद्राणी १८ कृष्णपिङ्गला १९ अग्निज्वाला २०
रौद्रमुखी २१ कालरात्रिः २२ तपस्विनी २३

मेघस्वना २४ सहस्राक्षी २५ विष्णुमाया २६
जलोदरी २७ महोदरी २८ मुक्तकेशी २९
घोररूपा ३० महाबला ३१ श्रुतिः ३२ स्मृतिः
३३ धृतिः ३४ तुष्टिः ३५ पुष्टिः ३६ मेधा ३७
विद्या ३८ लक्ष्मीः ३९ सरस्वती ४० अपर्णा ४१
अम्बिका ४२ योगिनी ४३ डाकिनी ४४
शाकिनी ४५ हाकिनी ४६ हाकिनी ४७
लाकिनी ४८ त्रिदशेश्वरी ४९ महाषष्ठी ५०
सर्व्वमङ्गला ५१ लज्जा ५२ कौशिकी ५३
ब्रह्माणी ५४ माहेश्वरी ५५ कौमारी ५६
वैष्णवी ५७ ऐन्द्री ५८ नारसिंही ५९ वाराही
६० चामुण्डा ६१ शिवदूती ६२ विष्णुमाया ६३
मातृका ६४ । इति दृष्टमन्दिकेश्वरपुराणोक्त-
दुर्गापूजापद्धतिः । अपि च ।
“ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी तथैव च ।
कौमारी वैष्णवी दुर्गा नारसिंही च कालिका ॥
चामुण्डा शिवदूती च वाराही कौशिकी तथा ।
माहेश्वरी शाङ्करी च जयन्ती सर्व्वमङ्गला ॥
काली कपालिनी मेधा शिवा शाकम्भरी तथा ।
भीमा शान्ता भ्रामरी च रुद्राणी चाम्बिका
तथा ॥
क्षमा धात्री तथा स्वाहा स्वधापर्णा महो-
दरी ।
घोररूपा महाकाली भद्रकाली भयङ्करी ॥
क्षेमङ्करी चोग्रचण्डा चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चण्डी महामोहा प्रियङ्करी ॥
बलविकरिणी देवी बलप्रमथिनी तथा ।
मनोन्मथिनी देवी च सर्व्वभूतस्य दमिनी ॥
उमा तारा महानिद्रा विजया च जया तथा ।
पूर्व्वोक्ता: शैलपुत्राद्या योगिन्यो च याः
क्रमात् ॥
ताभिराभिश्च सहिताश्चतुःषष्टीश्च योगिनीः ।
पूजयेत्कुलशास्त्रः सर्व्वकामार्थसिद्धये ॥”
इति कालिकापुराणे ६२ अध्यायः ॥ * ॥
अष्टयोगिन्यो यथा,—
“ततोऽष्टपत्रमध्यस्य पूजयेदष्टयोगिनीः ।
शैलपुत्रीं चण्डघण्टां स्कन्दमातरमेव च ।
कालरात्रिञ्च पूर्व्वादिचतुर्दिक्षु प्रपूजयेत् ॥
चण्डिकामथ कुष्माण्डीं तथा कात्यायनीं शुभाम् ।
महागौरीं चाग्निकोणे नैरृत्यादिषु पूजयेत् ॥”
इति तत्रैव ५३ अध्यायः ॥ * ॥
तिथिविशेषे दिग्विशेषावस्थितयोगिन्यो यथा,—
“ब्रह्माणी संस्थिता पूर्व्वे प्रतिपन्नवमीतिथौ ।
माहेश्वरी चोत्तरे च द्वितीयादशमीतिथौ ।
[illegible]दिने च कौमारी एकादशीतिथौ ।
नारायणी च नैरृते चतुर्थीद्वादशीतिथौ ।
[illegible] वाराही दक्षिणे तथा ।
[illegible] दक्षिणे स्थिता ।
[illegible] चामुण्डा वायुगोचरे ।
[illegible] महालक्ष्मीशिगोचरे ।
[illegible] ॥”
[illegible] ॥ * ॥
इति [illegible] ५८ अध्यायः ॥ * ॥

अपि च ।
“प्रतिपन्नवमी पूर्व्वे रामा रुद्राश्च पावके ।
शरत्रयोदशी याम्ये वेदा मामाश्च नैरृते ।
षष्ठी चतुर्द्दशी पश्चात् वायव्यां तुनिपूर्णिमा ।
द्वितीया दशमी चैव ऐशान्यां चाष्टमी कुहूः ॥
वामे शुभकरी देवी स्मृता दक्षिणे स्थिता ।
वधबन्धकरी चाग्रे पृष्ठे सर्व्वार्थसाधनी ॥”
इति ज्योतिस्तत्त्वम् ॥ * ॥

तत्कालयोगिनी यथा,—
“यस्यां दिशुदयं याति ततो यामार्द्धभुक्तिका ।
भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥
प्राची धनेश्वरहुताशनकौणपेय-
वायव्यवारुणयमाधिपशङ्करेषु ।
रामु क्रमाद्विवसति प्रतिपन्नवम्यो:
पृष्ठे स्थिता शुभकरी गिरिराजपुत्री ॥”
इति समयामृतम् ॥ * ॥

अथ योगिनीसाधनम् । भूतडामरे ।
“अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वार्थसाधनं नाम देहिनां सर्व्वसिद्धिदम् ॥
अतिगुह्या महाविद्या देवानामपि दुर्लभा ।
यासामभ्यर्च्चनं कृत्वा यक्षेशोऽभूद्धनाधिपः ॥
तासामाद्यां प्रवक्ष्यामि सुराणां सुन्दरीं प्रिये ।
यस्या आराधनेनैव राजत्वं लभते नरः ॥
अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभम् ।
शयनस्य समासाद्य कुर्य्यादाचमनं ततः ॥
प्रणवान्ते सहस्रारे हूँ फट् दिग्बन्धनं चरेत् ।
प्राणायामं ततः कुर्य्यात् मूलमन्त्रेण मन्त्रवित् ।
षडङ्गं मायया कुर्य्यात् पद्ममष्टदलं लिखेत् ॥
तस्मिन् पद्मे महामन्त्रं जीवन्यासं समाचरेत् ।
पीठे देवीं समावाह्य ध्यायेद्देवीं जगत्प्रियाम् ।
पूर्णचन्द्रनिभां गौरीं विचित्राम्बरधारिणीम् ।
पीनोत्तुङ्गकुचां रामां सर्व्वेषामभयप्रदाम् ॥
इति ध्यात्वा च गन्धेन दद्यात् पाद्यादिकं शु[illegible]
पुष्पधूपं निवेद्यैव नैवेद्यं मूलमन्त्रतः ।
गन्धचन्दनताम्बूलं सकर्पूरं सुशोभनम् ॥
प्रणवान्ते भुवनेशी आगच्छ सुरसुन्दरि !
वह्निजाया अर्च्चमन्त्रं [illegible] दिने दिने
सहस्रैकप्रमाणेन ध्यात्वा देवीं सदा बुधः ।
मासान्ते चाद्य दिवसं बलिपूजां सुशोभ[illegible]
कृत्वा च प्रजपेन्मन्त्रं निशीथे याति सुन्[illegible]
सुदृढ़ं साधकं मत्वा याति सा साधका[illegible]
सुप्रसन्ना साधकाय सदा [illegible]
दृष्ट्वा देवीं साधकेन्द्रो दद्यात् पाद्यादि[illegible]
सुचन्दनं सुमनसो [illegible]
मातरं भगिनीं वापि भार्य्यां वा भ[illegible]
यदि माता तदा [illegible]
भूमिस्थं [illegible] दिने [illegible]
[illegible] याति सं लोके [illegible]
तदा ददाति [illegible]
[illegible]
[illegible]
[illegible]

यत् यत् प्रार्थयते सर्व्वं ददाति सा दिने दिने ।
आढ्यवत् पाति तं लोके कामनाभिर्मनोगतैः ॥
भार्य्या स्याद्यदि सा देवी साधकस्य मनोहरा ।
राजेन्द्रः सर्व्वराजानां संसारे साधकोत्तमः ॥
स्वर्गे मर्त्ये च पाताले गतिः सर्व्वत्र निश्चितम् ।
यद्यद्ददाति सा देवी कथितुं नैव शक्यते ॥
तया सार्द्धञ्च संभोगं करोति साधकोत्तमः ।
अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवम् ॥१॥
ततोऽन्यत् साधनं वक्ष्ये निर्मितं ब्रह्मणा पुरा ।
नदीतीरं समासाद्य कुर्य्यात् स्नानादिकं ततः ॥
पूर्व्ववत् सकलं कार्य्यं चन्दनैर्मण्डलं लिखेत् ।
स्वमन्त्रं तत्र संलिख्यावाह्य ध्यायेन्मनोहराम् ॥

कुरङ्गनेत्रां शरदिन्दुवक्त्रां
बिम्बाधरां चन्दनगन्धलिप्ताम् ।
चीनांशुकां पीनकुचां मनोज्ञां
श्यामां सदा कामदुघां विचित्राम् ॥

एवं ध्यात्वा जपेद्देवीमगुरुधूपदीपकैः ।
गन्धं पुष्परसञ्चैव ताम्बूलादींश्च मूलतः ॥
तारं माया गच्छ मनोहरे पावकवल्लभा ।
जप्त्वायुतं प्रतिदिनं जपेन्मन्त्रं प्रसन्नधीः ॥
मासान्ते चाद्य दिवसे कुर्य्याच्च जपमुत्तमम् ।
आनिशीथं जपेन्मन्त्रं ज्ञात्वा च साधकं दृढम् ॥
गत्वा च साधकाभ्यासे सुप्रसन्ना मनोहरा ।
ततोऽर्चिता प्रसन्ना सा पृच्छति प्रार्थितं च यत् ॥
स्वर्णशतं साधकाय ददाति सा दिने दिने ।
सावशेषं व्ययं कुर्य्यात् स्थिते तत्तु न दास्यति ॥
अन्यस्त्रीगमनं तस्य न भवेत् सर्व्वमीरितम् ।
अव्याहतगतिस्तस्य भवतीति न संशयः ॥
इयं ते कथिता विद्या सुगोप्या या सुरासुरैः ।
तव स्नेहेन भक्त्या च वक्ष्येऽहं परमेश्वरि ! ॥२॥
अतोऽन्यत् साधनं वक्ष्ये शृणुष्वैकमनाः प्रिये ।
गत्वा वटतलं देवीं पूजयेत् साधकोत्तमः ॥
प्राणायामं षडङ्गञ्च मायया च समाचरेत् ।
सद्योमांसं बलिं दत्त्वा पूजयेत्तां समाहितः ।
अर्घ्यं सुच्छिद्ररक्तेन दद्यात्तस्यै दिने दिने ।
प्रफुल्लवदनां गौरीं पक्वबिम्बाधरां प्रिये ॥
रक्ताम्बरधरां बालां सर्व्वकामप्रदां शुभाम् ।
एवं ध्यात्वा जपेन्मन्त्रमयुतं साधकोत्तमः ॥
सप्तदिनं समभ्यर्च्य चाष्टमे विधिवच्चरेत् ।
कायेन मनसा वाचा पूजयेच्च दिने दिने ॥
तारं माया तथा कूर्च्चं रक्त कर्म्मणि तद्विधिः ।
आगच्छ कनकाम्ले तु वह्निः स्वाहा महामनुः ।
आनिशीथं जपेन्मन्त्रं बलिं दत्त्वा मनोहरम् ॥
साधकेन्द्रं दृढं मत्वा आयाति साधकालये ।
साधकेन्द्रोऽपि तां दृष्ट्वा दद्यादर्घ्यादिकं ततः ॥
ततः सपरिवारेण भार्य्या स्यात् कामभोजनैः ।
वस्त्रभूषादिकं दत्त्वा याति सा निजमन्दिरम् ॥
एवं भार्य्या भवेन्नित्यं साधकाद्दृढरूपतः ।
आत्मभार्य्यां परित्यज्य भजेत्ताञ्च विचक्षणः ॥३॥
ततः कामेश्वरीं वक्ष्ये सर्व्वकामफलप्रदाम् ।
प्रणवं भुवनेशानी चागच्छ कामेश्वरि ततः ॥
वह्निजाया महामन्त्रं साधकानां सुखावहम् ।

पूर्व्ववत् सकलं कृत्वा भूर्ज्जपत्रे सुशोभने ॥
गोरोचनाभिः प्रतिमां विनिर्म्माय सलक्षणाम् ।
शय्यामारुह्य प्रजपेन्मन्त्रमेकमनास्ततः ॥
सहस्रैकप्रमाणेन मासमेकं जपेद्बुधः ।
घृतेन मधुना दीपं दद्याच्च सुसमाहितः ॥
कामेश्वरीं शशाङ्कास्यां चलत्खञ्जनलोचनाम् ।
सदा लोलगतिं कान्तां कुसुमास्त्रशिलीमुखाम् ।
एवं ध्यात्वा जपेन्मन्त्रं निशीथे याति सा सदा ।
दृष्ट्वा तु साधकः श्रेष्ठामाज्ञां देहीति तां वदेत् ॥
स्त्रीभावेन सदा तस्यै दद्यात् पाद्यादिकं ततः ।
सुप्रसन्ना तदा देवी साधकं तोषयेत् सदा ॥
अन्नाद्यैरतिभोगेन पतिवत् पालयेत् सदा ।
नीत्वा रात्रौ सुखैश्वर्य्यैर्दत्त्वा च विपुलं धनम् ॥
वस्त्रालङ्काररत्नादीन् प्रभाते याति निश्चितम् ।
एवं प्रतिदिनं तस्य सिद्धिः स्यात् कामरूपतः ॥४॥
ततः पटे विनिर्म्माय पुत्तलिं ध्यानरूपतः ।
सुवर्णवर्णां गौराङ्गीं सर्व्वालङ्कारभूषिताम् ॥
नूपुराङ्गदहाराढ्यां रम्याञ्च पुष्करेक्षणाम् ।
एवं ध्यात्वा जपेन्मन्त्रं दत्त्वा च पाद्यमुत्तमम् ॥
सचन्दनेन पुष्पेण जातीपुष्पेण यत्नतः ।
गुग्गुलुं धूपदीपौ च दद्यान्मूलेन साधकः ॥
मन्त्रस्तु ।
तारं माया तथागच्छ रतिसुन्दरिपदं ततः ।
वह्निजाया चाष्टसहस्रं जपेन्मन्त्रं दिने दिने ॥
मासान्ते दिवसं प्राप्य कुर्य्यात् पूजादिकं शुभम् ।
घृतदीपं तथा गन्धं पुष्पं ताम्बूलमेव च ॥
तावन्मन्त्रं जपेद्विद्वान् यावदायाति सुन्दरी ।
ज्ञात्वा दृढं साधकेन्द्रं निशीथे याति निश्चितम् ॥
ततस्तामर्च्चयेद्भक्त्या जातीकुसुममालया ।
सुसन्तुष्टा साधकेन्द्रं तोषयेदतिभोजनैः ॥
भूत्वा भार्य्या च सा तस्मै ददाति वाञ्छितं वरम् ।
भूषादिकं परित्यज्य प्रभाते याति सा ध्रुवम् ॥
साधकाज्ञानुरूपेण प्रयाति सा दिने दिने ।
निर्ज्जने प्रान्तरे देवि ! सिद्धिः स्यान्नात्र संशयः ॥
त्यक्त्वा भार्य्यां भजेत्ताञ्च अन्यथा नश्यति ध्रुवम् ॥५॥
ततोऽन्यत् साधनं वक्ष्ये स्वरूपे शिवसन्निधौ ।
वैरादं सुवनेशीं चागच्छ पद्मिनि वल्लभा ॥
साधकस्य महामन्त्रं पूर्व्ववत् सकलं ततः ।
मण्डलं चन्दनैः कृत्वा मूलमन्त्रं लिखेत्ततः ॥
पद्मानना श्यामवर्णा पीनोत्तुङ्गपयोधराम् ।
कोमलाङ्गीं स्मेरमुखीं रक्तोत्पलदलेक्षणाम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मासान्ते पूर्णिमां प्राप्य विधिवत् पूजयेत् सदा ॥
आनिशीथं जपेन्मन्त्रं दृढाभ्यासेन साधकः ।
सर्व्वत्र कुशलं ज्ञात्वा सा याति साधकालयम् ॥
भूत्वा भार्य्या साधकं हि साधयेद्विविधैरपि ।
भोगैर्दिव्यैर्भूषणाद्यैः पद्मिनी सा दिने दिने ॥
पतिवत् पाति तं लोके नित्यं स्वर्गे च सर्व्वदा ।
त्यक्त्वा भार्य्यां भजेत् ताञ्च साधकेन्द्रः सदा प्रिये ॥६॥
ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता ।
ज्ञात्वा यां साधिता विद्या वशा चातिवला प्रिये ॥
मन्त्रस्तु ।

प्रणवान्ते महामाया नटिनि नात
महाविद्येयं कथिता गोपनीया प्र
अशोकमूलं गत्वा चार्च्चं पूर्व
मूलमन्त्रेण सकलं कुर्य्याच्च सुस
त्रैलोक्यमोहिनीं गौरीं
विचित्राभरणां रम्यां
एवं ध्यात्वा जपेन्मन्त्रं सहस्रं दि
मांसोपहारैः संपूज्य धूपं दीपं नि
गन्धचन्दनताम्बूलं दद्यात्तस्यै सदा
मासमेकञ्च तां भक्त्या
मासान्ते दिवसं प्राप्य कुर्य्याच्च
अर्द्धरात्रौ भयं दत्त्वा किञ्चित्
सुदृढं साधकं मत्वा याति सा
विद्याभिः सकलाभिश्च
वरं वरय शीघ्रं त्वं यत्ते मनसि वर्त्
तत् श्रुत्वा साधकश्रेष्ठो
मातरं भगिनीं वापि भार्य्यां वा
कृत्वा सन्तोषयेद्भक्त्या यदि सा तु
माता स्याद्यदि सा देवी पुत्रवत्
स्वर्णशतं सिद्धिद्रव्यं ददाति सा दि
भगिनी यदि सा कन्यां देवस्य
राजकन्यां समानीय ददाति सा दि
अतीतानागतां वार्त्तां सर्व्वां
भार्य्या स्यात् यदि सा देवी ददाति
अन्नाद्यैरुपचारैश्च ददाति कामभो
स्वर्णशतं सदा तस्मै ददाति सा पु
यत् यत् वाञ्छति तत् सर्व्वं
महाविद्यां प्रवक्ष्यामि सावधानाव
कुङ्कुमेन समालिख्य भूर्ज्जपत्रे स्त्रियं
ततोऽष्टदलमालिख्य कुर्य्यात्प्राणादि
जीवन्यासादिकं कृत्वा ध्यायेत् तत्र
शुद्धस्फटिकसङ्काशां नानारत्नविभू
मञ्जीरहारकेयूररत्नकुण्डलमण्डिता
एवं ध्यात्वा जपेन्मन्त्रं सहस्रन्तु दि
प्रतिपद्दिनमारभ्य पूजयेत् कुसुमादि
धूपदीपविधानैश्च त्रिसन्ध्यं पूजयेन्नर
पूर्णिमां प्राप्य गन्धाद्यैः पूजयेत् सा
घृतदीपं तथा धूपं नैवेद्यञ्च मनोरम
रात्रौ च दिवसे जप्यं कुर्य्याच्च प्रसन्न
प्रभातसमये याति साधकस्यान्तिकं
प्रसन्नवदना भूत्वा तोषयेदतिभोजनैः
देवदानवगन्धर्व्वविद्याधरयक्षराक्ष
कन्याभी रत्नभूषाभिः साधकेन्द्रं सु
चर्व्यं चोष्यादिकं द्रव्यं दिव्यं ददाति स
स्वर्गे मर्त्ये च पाताले यद्वस्तु विद्यते
आनीय दीयते सर्व्वं साधकाज्ञानुरू
स्वर्णशतं सदा तस्मै ददाति सा दिने
साधकाय वरं दत्त्वा याति सा निज
तस्या वरप्रसादेन चिरजीवी निराम
सर्व्वज्ञः सुन्दरः श्रीमान् सर्व्वगो भव
रेमे सार्द्धं तया देवि साधकेन्द्रो दिवा
मन्त्रस्तु ।

...र्द्धं माया सदा नित्यमङ्गाद्गन्धमेति सैद्धतये ।
...द्गुभाया मता: प्रोक्ता: सर्वसिद्धिप्रदायका: ॥
...दा सदृगर्भो ह स्यात् सर्वसिद्धिप्रदा प्रिये ।
...न्यात् गुरुगृहा विना नव श्रेयान प्रकी-
र्त्तिता ॥ ८ ॥

ईश्वर उवाच ।

...न्त साधनं पूर्व्वं यत्प्रोक्तं गुरुवत्तम् ।
...मान् भाति प्रवर्त्तेत विधिना तेन या प्रभो ।
...माधिकारिण: किं वा समासेन वदस्व मे ॥

ईश्वर उवाच ।

...मामि साधयेद्धीमान् ध्वविद्यानी जितेन्द्रिय: ।
...दा ध्यानपरो भूत्वा गुरुवाक्यमयोनियुक्त: ॥
...उपाष्टे प्रान्तरे चापि कानने च विशेषत: ।
...मासैकमयं प्राप्य साधयेत् गुरुमादित: ।
...केन विधिना सम्यक् भविष्यति न संशय: ॥
...ईश्वाच सेवया: सर्व्वं परं साधाधिकारिण: ।
...नारकप्रसत्तो भूत्वा विनाप्यनाधिकारिण: ॥"
इति मतसारे योगिनीसाधनप्रकरणं समाप्तम् ॥
दशविधदशान्तर्गतदशाविशेष: । यथा,—
"मनस्थं पूर्व्वं तथा यत्र तत्र विनिर्द्दिशेत् ।
मङ्गलेन फल: शेषो मङ्गलादिविनिश्चय: ॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा ।
उल्का सिद्धा सङ्कटा च योगिन्यष्टौ प्रकीर्त्तिता: ॥
...सर्व्वं मङ्गला धत्ते शेषाद्यैकैकवर्द्धिका: ।
पुनश्चाष्टाविंशत्यन्ते चक्रवत् परिवर्त्तनात् ॥"
अपि च ।
"रोहिण्यादौ स्थिताश्चैता मङ्गलाद्या यथाक्रमम् ।
उल्का सिद्धा सङ्कटा च अश्विन्यादिक्रमे पुन: ॥"
एतासामन्तर्दशा ।
"दशाघस्तु षट्त्रिंशद्भागं कृत्वा विनिर्द्दिशेत् ।
यत्तु यस्या हि वर्षं तद्भागं प्रकीर्त्तितम् ॥"
फलं यथा,—
"मङ्गला मङ्गलं धत्तेऽतुलभोगं सुखं तथा ।
भोगजाम्बपदप्राप्ति वृद्धे तस्य दिने दिने ॥
पिङ्गला विविधं दु:खमर्थचिन्तादिसम्भवम् ।
ददाति नाशं प्रभुभ्यो धनधान्यगजादिकम् ॥
धन्या च सततं दत्ते सर्व्वत्र विजयादिकम् ।
प्रभुभ्यो रक्षते नित्यं माटवत् परिपालयेत् ॥
भ्रामरी विविधं दु:खमन्त:सम्भ्रमसम्भवम् ।
अकस्मात्तस्य दुर्द्दैवं विधिना प्रेरितं भवेत् ॥
भद्रिका विविधान् धत्ते सम्मानादिमनोरथान् ।
तुष्टा चेद्भद्रिका नित्यं दुर्गन्ध: सुगन्धायते ॥
उल्का व्याधिकरी प्रोक्ता नित्यं नानाभयप्रदा ।
उल्का यदि समायाति सुगन्धो दुर्गन्धायते ॥
सिद्धा च साधयेत् सर्व्वं मन्त्रारम्भधनादिकम् ।
यस्य तुष्टा भवेत् सिद्धा लक्ष्मीस्तस्य करे स्थिता ॥
सङ्कटा सङ्कटं दत्ते भुङ्क्ते धान्यधनादिकम् ।
सैव माया सदा नित्यं गृही कृष्ण: फणी यथा ॥"
इत्युद्बोधचन्द्रिका ॥
योगी, [न्] पुं, (योग: अस्त्यस्येति । योग + इनि: । यद्वा, युज समाधौ । युजिर् योगे वा + "संपृचानुरुधेति ।" ३। २।१४२। इति घिनुण् ।) योगयुक्त: । तस्य लक्षणादि यथा,—
"सर्व्वं नाहं करोमीति बुद्धिमान् मनसि तथा ।
ममता भावना यस्य स योगी परिकीर्त्तित: ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४५ अध्याय: ॥
अपि च ।
"आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्ज्जुन ! ।
सुखं वा यदि वा दु:खं स योगी परमो मत: ॥"
इति श्रीभगवद्गीतायाम् ६ अध्याय: ॥
अन्यच्च ।

ऋषय ऊचु: ।

"भगवन् ! दैत्यारिघ्न ! हिरण्याक्षनिषूदन ! ।
चत्वारो ह्याश्रमा: प्रोक्ता योगी नाम क उच्यते ॥
सर्व्वकर्म्माणि संन्यस्य समाधिमचलं श्रित: ।
य आस्ते निश्चलो योगी स संन्यासी न पञ्चम: ॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यं श्रुतिदर्शितम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्पर: ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिक: ॥
उदासीनसाधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणायत्त: साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्य्याधनादिकम् ।
एकाकी यस्तु विचरेदुदासीन: स मौक्षिक: ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मत: ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सांन्यासिक: स विज्ञेयो वानप्रस्थाश्रमे स्थित: ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रिय: ।
ज्ञानाय वर्त्तते भिक्षु: प्रोच्यते पारमेष्ठिक: ॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनि: ।
सम्यग्दर्शनसम्पन्न: स योगी भिक्षुरुच्यते ॥
ज्ञानसंन्यासिन: केचिद्वेदसंन्यासिन: परे ।
कर्म्मसंन्यासिन: केचित् त्रिविधा: पारमेष्ठिका: ॥
योगी च त्रिविधो ज्ञेयो भौतिक: सांख्य एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमुत्तममास्थित: ॥"
इति कौर्म्मे २ अध्याय: ॥
(तेषां स्त्रीसङ्गनिषेधो यथा,—
"यदि सङ्गं करोत्येव बिन्दुस्तस्य विनश्यति ।
आयु:क्षयो बिन्दुहानादसामर्थ्यञ्च जायते ॥
तस्मात् स्त्रीणां सङ्गवर्ज्जं कुर्य्यादभ्यासमादरात् ।
योगिनोऽङ्गस्य सिद्धि: स्यात् सततं बिन्दुधारणात् ॥"
इति दत्तात्रेयसंहिता ॥
तेषां पथ्यं यथा, हठयोगप्रदीपिकायाम् ।
"गोधूमशालियवषष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि ।
शुण्ठीपटोलकफलादिकपञ्चशाकं
मुद्गादिदिव्यमुदकञ्च यमीन्द्रपथ्यम् ॥"
तेषामपथ्यं यथा, तत्रैव ।
"कट्वम्लतिक्तलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमत्स्यमद्यम् ।
आजादिमांसदधितक्रकुलत्थकोल-
पिण्याकहिङ्गुलशुनाद्यमपथ्यमाहु: ॥")
योगीश्वर:, पुं, (योगिनामीश्वर: ।) याज्ञवल्क्य-मुनि: । (इति हेमचन्द्रे योगिशब्ददर्शनात् । ३ । ५१ ।) यथा,—
"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषत: ॥"
"योगिनां सनकादीनां ईश्वर: श्रेष्ठस्तं याज्ञ-वल्क्यं संपूज्य ।" इति मिताक्षरा ॥ त्रि, यतिनां श्रेष्ठ: । (यथा, मार्कण्डेये । ८९ । २८ ।
"यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वरा: क्लेशविमुक्तिहेतून् ॥")
योगीश्वरी, स्त्री, (योगिनामीश्वरी ।) दुर्गा । यथा,—
"योगिन: शक्राद्यो देवा: सनकाद्यास्तपोधना: ।
तेषां स्वामी तथा योगी ईश्वरी प्रभुपालना ॥
आत्मेन्द्रियमनादीनां संयोगो योग उच्यते ।
तेषां वा योजनाद्योगी योगेश्वर्य्यविबोधना ॥"
इति देवीपुराणे ४५ अध्याय: ॥
योगेश:, पुं, (योगस्य ईश: ईश्वर: ।) याज्ञ-वल्क्य: । इति हेमचन्द्र: । ३ । ५१ ॥ (योगे-श्वरे, त्रि । यथा, भागवते । ४ । १९ । ६ ।
"कपिलो नारदो दत्तो योगेशा: सनकादय: ।
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुका: ॥")
योगेश्वर:, पुं, (योगानां ईश्वर: ।) श्रीकृष्ण: । यथा,—
"ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म्मवर्म्मणि ।
स्वां काष्ठामधुनोपेते धर्म्म: कं शरणं गत: ॥"
इति श्रीभागवते १ स्कन्धे १ अध्याय: ॥
(शिव: । यथा, महाभारते । १३ ।१४।३२३ ।
"नमस्ते भगवन् देव ! नमस्ते भक्तवत्सल ! ।
योगेश्वर ! नमस्तेऽस्तु नमस्ते विश्वसम्भव ! ॥"
देवहोत्रतनय: । यथा, भागवते । ८ । १३।३२।
"देवहोत्रस्य तनय उपहर्त्ता दिवस्पते: ।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥"
योगेश्वरी, स्त्री, वन्ध्याकर्कोटकी । इति भाव-प्रकाश: ॥ (योगानामीश्वरी । दुर्गा । यथा,—
"त्वञ्च योगेश्वरी तथा— ।" इति चण्डीकव-चम् ॥ योगयुक्ते, त्रि । यथा, मार्कण्डेये ।९७।८ ।
"प्रजापते: काश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलि: ॥")
योगेष्टं, क्ली, (योगे सन्धिच्छिद्रादिपूरणे इष्टम् ।) सीसकम् । इत्यमर: । २ । ९ । १०५ ॥ (तथास्य पर्य्याय: ।
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
योग्यं, क्ली, (योज्यते इति । युज् + णिच् + ण्यत् ।) ऋद्धिनामौषधम् । वृद्धिनामौषधम् । इत्य-मर: । २ । ४ । ११२ ॥
योग्य:, त्रि, (योगाय प्रभवति । योग + "योगाद्-यच्च ।" ५ । १ । १०२ । इति यत् ।) प्रवीण: । योगार्ह: । (यथा, रघु: । ६ । २९ ।

"कान्ता गिरा सूनृतया च योग्या
त्वदेव कन्यास्ति ! तपोऽनुमीया ।")

उपायो । ध्यानः । इति मेदिनी हेमचन्द्रश्च ।
(यथा, मार्कण्डेये । ७१ । १० ।
"अपत्नीको नरो भूप न योग्यो निजकर्म-
णाम् ।"

योधनसाधनभूतः । यथा, ऋग्वेदे । १ । ६ । ६ ।
"वानस्य वा केशिना योग्याभिः ।"
"योग्याभिर्योजनसाधनभूताभी रज्जुभिः ।" इति
सायनः । प्रकटादिपोषकौषः । यथा, ग्राम-
यवनाध्याये । १।७।१ । १९ ।
"योग च हि योग्यं प्रयच्छन्ति वै यत्रा
कर्मेष्यं यदशाचीनम् ।"
"योग्यं योजनीयमतद्रव्यादिकम् ।" इति
भट्टाचम् ।) पुष्पनक्षत्रं, पुं । इति मेदिनी ।
ये, ३८ ।

योग्यता, स्त्री, (योग्यस्य भावः । योग्य+तल् ।
टाप् ।) क्षमता । इति लोकप्रसिद्धिः । (यथा,
मार्कण्डेये । ११७ । ८ ।
"नवात्वाव्यायोग्यापि योग्यता नास्ति कामतः ।
योग्यायोग्यता नास्ति कावत्या हि
योग्यता ।")
[illegible] । न तु पदार्थानां
[illegible] । इति मानिक-
[illegible] । [illegible] तत्पदार्थे तत्पदार्थवत्ता ।
यथा,—
"[illegible] योग्यता परिकीर्तिता ।"
इति भाषापरिच्छेदः ।
"योग्यता [illegible] पदार्थं इत्यादिना ।
[illegible] योग्यता इत्यर्थः ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] इति [illegible] ,"
इति [illegible] ।

योग्य[illegible], स्त्री (योग्य + टाप् ।) [illegible] । (यथा,
[illegible] । ८ । १६ ।
"[illegible]
[illegible] ।"
"[illegible]
[illegible] ।" इति [illegible] ।) [illegible] ।
इति मेदिनी । ३ । ३८ । [illegible] । [illegible]
[illegible] । [illegible] । [illegible] । [illegible] ।

सङ्कुः खलूरिका । इति हेमचन्द्रः । ३ । ४५२ ।
(यथा, सुश्रुते सूत्रस्थाने ९ अध्याये ।
"अथातो योग्यासूत्रीयमध्यायं व्याख्यास्यामः ।
अधिगतसर्वशास्त्रार्थमपि शिष्यं योग्यां कार-
येत् । स्नेहादिषु छेद्यादिषु च कर्मपथमुप-
दिशेत् । सुबहुश्रुतोऽप्यकृतयोग्यः कर्मस्वयोग्यो
भवति । तत्र पुष्पफलालाबुकालिन्दकत्रपुसै-
र्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शये-
दुत्कर्तनपरिकर्तनानि चोपदिशेत् । दृतिबस्ति-
प्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्याम् ।
सरोम्णि चर्मण्याततेऽवलेख्यस्य । मृतपशुसिरा-
सूत्पलनालेषु च वेध्यस्य । घुणोपहतकाष्ठवेणु-
नलनालीशुष्कालाबुमुखेष्वेष्यस्य । पनसबिम्बी-
बिल्वफलमज्जमृतपशुदन्तेष्वाहार्यस्य । मधू-
च्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य । सूक्ष्म-
घनवस्त्रान्तयोर्मृदुचर्मान्तयोश्च सीव्यस्य । पुस्त-
मयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्याम् । मृदु-
मांसपेशीषूत्पलनालेषु च कर्णसन्धिबन्धयोग्याम् ।
मृदुषु मांसखण्डेष्वग्निक्षारयोग्याम् । उदक-
पूर्णघटपार्श्वस्रोतस्यलाबुमुखादिषु च नेत्रप्रणि-
धानबस्तिव्रणबस्तिपीडनयोग्यामिति । भवत-
श्चात्र ।
एवमादिषु मेधावी योग्यार्हेषु यथाविधि ।
द्रव्येषु योग्यां कुर्वाणो न प्रमुह्यति कर्मसु ॥
तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्मसु ।
यस्य यत्रेह साधर्म्यं तत्र योग्यां समा-
चरेत् ॥"
(युवती । यथा,—
"निदाघशरदोर्बाला प्रौढा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ।"
योग्या युवती । इति राजवल्लभः ।)

योजनं, क्ली, (युज्यते मनो यस्मिन्निति । युज्+
ल्युट् ।) परमात्मा । चतुःक्रोशी । योगः । इति
मेदिनी । ने, ११६ । ७ । (यथा, हरि-
वंशे । १४६ । ११ ।
"गान्धारकन्या यदने शुभाङ्गी
इव मया योजनमर्धितानाम् ।")
चतुःक्रोश्यर्थे यथा,—
"हस्तमात्राङ्गुलिकः षडङ्गुलद्वयकः प्रयः स्मृतः ।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रकः ॥
तच्चतुष्कं योजनं स्यादित्यादि मानशास्त्रम् ।
[illegible] योजनं भवति ।
[illegible] योजनम् । यथा,—
[illegible]-
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।"
इति लीलावती ।

योजनगन्धा, स्त्री, (योजनं गन्धोऽस्याः ।
[illegible] इति वा ।) कस्तूरी । स-
त्यवती । इति मेदिनी । ३, [illegible]
देवीभागवते । २ । २ । [illegible]
"[illegible]
जाता योजनगन्धा तु [illegible]

योजनगन्धिका, स्त्री, सत्यवती । [illegible]
कस्तूरी । इत्यमरः । [illegible]
[illegible] स्वार्थे कप्रत्ययेन [illegible]

योजनपर्णी, स्त्री, (यो[illegible]
पर्णं यस्याः ।) मञ्जिष्ठा । [illegible]

योजनवल्लिका, स्त्री (योजनवल्ली+
टाप् ।) मञ्जिष्ठा । [illegible]

योजना, स्त्री, योजनक्रिया । [illegible]
धातोरनप्रत्ययेन सिद्धम् ।

योजनवल्ली, स्त्री, (योजनं
वल्ली यस्याः सा ।) मञ्जिष्ठा ।
४ । ८१ । (तथास्याः पर्याय[illegible]
[illegible]
मण्डूकपर्णी भण्डीरी भण्डी [illegible]
रसायनवल्ला काला [illegible]
भण्डीतकी [illegible]
इति भावप्रकाशस्य पूर्वखण्डे [illegible]

योजितं, त्रि, कारितयोजनम् ।
कर्मणि क्तप्रत्ययेन सिद्धम् । [illegible]
वते । ४ । २१ । २२ ।
"अहं दण्डधरो राजा प्रजाना[illegible]
[illegible]

योटकः, पुं, योटनम् । [illegible]
[illegible]
वर्णयोटक-योनियोटक-वर्गयोटक-
योटकः । तत्र राशियोटके [illegible]
मद्दिकादशविषमसप्तकयो[illegible]
श्रीपतिसंहितायाम् ।
"षड्टकं त्रिकोणञ्च द्विद्वादशं
परस्परं [illegible]
षड्टके मर्त्युदोषो वैधव्यं [illegible]
त्रिकोणे पुत्रहानिः [illegible]
पुत्रवस्याष्टमे कन्या [illegible]
शुभं षड्टकं प्रोक्तं [illegible]
नवपञ्चमे ।
पुंसो यस्मात् [illegible]
धर्मे स्थिता सुतवती [illegible]
द्विद्वादशे धनवती [illegible]
रिपुके स्थिता धनवती
योटके समके [illegible]
सिंहघटौ सदा वर्ज्यौ [illegible]
राशियोटकमाह दीपिकायाम् ।
एकराशौ च दम्पत्योः शुभं [illegible]
चतुर्दशके चैव [illegible]
इति राशियोट[illegible]
षड्योटके षडष्टयोः [illegible]
राश्यधिपयोर्द्वयोः [illegible]
[illegible] दोषादिः [illegible]

।विरोधे षष्ठरिपुभावे चाधिरेव रोगादिः ।
। षड्योटकविचारः ॥ * ॥ अन्ये योटकाः
श्चभयान्न लिखिताः । इति ज्योतिषम् ॥
ग्रन्तरे जोटकशब्दश्चवर्गतृतीयादिश्च ॥
पुं, (यूयते म्रायते अनेनेति । यु+बाहु-
ात् तुः ।) परिमाणम् । इत्युणादिकोषः ॥
स्त्री, (यूयते अनेनेति । यु+“दाम्नीशस यु
सु तुद सि सिच मिह-पतदंश-नहः करणे ।”
२ । १८२ । इति ष्ट्रन् ।) योक्त्रम् । इत्यमरः ।
९ । १३ ॥ (यथा, गो॰ रामायणे । २ ।
। २९ ।
रतायामिवहयः सा योक्त्राय पशवो यथा ॥”)
[ऋ] पुं, (युध्यतीति । युध्+तृच् ।) युद्ध-
ा । तत्पर्य्यायः । भटः २ योधः ३ । इत्य-
ः । २ । ८ । ६१ ॥ (यथा, हरिवंशे भविष्य-
र्वणि । २ । १८ ।
ाधिष्यते पुरीं योद्धा छिद्रं यदि लभेत सः ॥”)
पुं, (युध्यतीति । युध्+अच् ।) योद्धा ।
ग्रमरः । २ । ८ । ६१ ॥ (यथा, कथासरित्
गरे । १२ । २२ ।
ङ्कलमिलितैश्चान्यैर्योधास्तैः सैनिकैः सह ।
न्युर्वं तृसेश्वरं चण्डमहासेनान्तिकञ्च तत् ॥”)
, स्त्री, युद्धम् । (यथा, मार्कण्डेये ।१३५।१७।
ोधनेषु स्वरूपेण दमो यस्य दुरात्मनः ।
दमो वारयत्येव हन्ति तस्य रिपोर्गुरुम् ॥”)
खम् ॥ युधधातोर्भावे करणे चानट् (ल्युट्)
ययेन निष्पन्नम् ।
ंराव, पुं, (योधानां संरावः ।) अन्योन्यं
धानां युद्धायाह्वानम् । तत्पर्य्यायः । क्रन्द-
म् २ । इत्यमरभरतौ ॥
ः, पुं, (युध्+भावे घञ् । योधं युद्धं करो-
ति । योध+ष्ठः ।) योद्धा । योधशब्दात्
ियप्रत्ययेन निष्पन्नः ॥
ः, पुं, (यवस्य नल इव नलः काण्डोऽस्य ।
ृषोदरादिः ।) शस्यविशेषः । तत्पर्य्यायः ।
यनालः २ जूर्णाह्वयः ३ देवधान्यम् ४
ोम्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः ।
। ७४४ ॥
ः, पुं, स्त्री, (यौति संयोजयतीति । यु+
वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।” उणा॰
। ५१ । इति निः ।) आकरः । इति मेदिनी ।
, ११ ॥ कारणम् । (यथा, उत्तररामचरिते । ६ ।
“अपयो रामसौमाहुर्याविसुमकटसयोः ।
सा योनिः सर्व्ववैराणां सा हि लोकस्य
निर्ऋतिः ॥”)
जलम् । इति हेमचन्द्रः । ३ । २४९ ॥ (कुश-
द्वीपस्थनदीविशेषः । यथा,मार्कण्डेये ।१२१।७१।
“धूतपापा नदी नाम योनिश्चैव पुनः स्मृता ।
सीता द्वितीया विज्ञेया सा चैव हि निशा-
स्मृता ॥”
ता तमास्वविशेषः । यथा, महानिर्व्वाणतन्त्रे ।

“सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम् ।
तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा ॥”)
प्राणिनामुत्पत्तिस्थानम् । इति त्रिकाण्डशेषः ॥
तत्तु चतुरशीतिलक्षप्रकारम् । यथा,—
“चतुरशीतिलक्षाणि चतुर्भेदाश्च जन्तवः ।
अण्डजाः स्वेदजाश्चैव उद्भिज्जाश्च जरायुजाः ॥
एकविंशतिलक्षाणि ह्यण्डजाः परिकीर्त्तिताः ।
स्वेदजाश्च तथैवोक्ता उद्भिज्जास्तत्प्रमाणतः ॥
जरायुजाश्च तावन्तो मनुष्याद्याश्च जन्तवः ।
सर्व्वेषामेव जन्तूनां मानुषत्वं सुदुर्लभम् ॥”
इति श्रीगरुड़पुराणे प्रेतकल्पे धर्म्मप्रकटनो नाम
२ अध्यायः ॥ * ॥ अन्यच्च ।
“जलजा नव लक्षाणि स्थावरा लक्षविंशतिः ।
कृमयो रुद्रसंख्याकाः पक्षिणां दशलक्षकम् ॥
त्रिंशल्लक्षाणि पशवश्चतुर्लक्षाणि मानुषाः ।
सर्व्वयोनिं परित्यज्य ब्रह्मयोनिं ततोऽभ्यगात् ॥”
इति-वृद्धविष्णुपुराणम् ॥ * ॥
अपि च ।
“स्थावरास्त्रिंशल्लक्षाश्च जलजो नवलक्षकः ।
कृमिजा दशलक्षाश्च रुद्रलक्षाश्च पक्षिणः ॥
पशवो विंशलक्षाश्च चतुर्लक्षाश्च मानवाः ।
एतेषु भ्रमणं कृत्वा द्विजत्वमुपजायते ॥”
इति-कर्म्मविपाकः ॥
(“भूतानाञ्चतुर्व्विधा योनिर्भवति जरायुण्ड-
स्वेदोद्भिदः । तासां खलु चतसृणामपि योनीना-
मेकैका योनिरपरिसंख्येयभेदा भवति भूता-
नामाकृतिविशेषापरिसंख्येयत्वात् । तत्र जरा-
युजानामण्डजानां प्राणिनामेते गर्भकरा भावा
यां यां योनिमापद्यन्ते तस्यां तस्यां योनौ तथा
तथा रूपा भवन्ति । तद्यथा कनकरजतताम्र-
त्रपुसीसान्यासिच्यमानानि तेषु मधूच्छिष्ट-
विम्बेषु । ते यदा मनुष्यविम्बमापद्यन्ते तदा
मनुष्यविग्रहेण जायन्ते । तस्मात् समुदाया-
त्मकः सन् गर्भो मनुष्यविग्रहेण जायते मनुष्यो
मनुष्यप्रभव इत्युच्यते तद्योनित्वात् ।” इति
चरके शारीरस्थाने तृतीयेऽध्याये । * ।)
-भगम् । इत्यमरः ।२।६।७६ ॥ तत्पर्य्यायः । वरा-
ङ्गम् २ उपस्थः ३ स्मरमन्दिरम् ४ । इति राज-
निर्घण्टः ॥ रतिगृहम् ५ जन्मवर्त्म ६ अधरम् ७
अवाच्यदेशः ८ प्रकृतिः ९ अपथम् १० स्मर-
कूपकः ११ अप्रदेशः १२ प्रकृतिः १३ पुष्पी १४
संसारमार्गकः १५ संसारमार्गः १६ गुह्यम् १७
स्मरागारम् १८ स्मरध्वजम् १९ रत्यङ्गम् २०
रतिकुहरम् २१ कलत्रम् २२ अधः २३ ।
इति शब्दरत्नावली ॥ रतिमन्दिरम् २४ स्मर-
गृहम् २५ कन्दर्पकूपः २६ कन्दर्पसम्बाधः २७
कन्दर्पसन्धिः २८ स्त्रीचिह्नम् २९ । इति जटा-
धरः ॥ स तु गर्भस्थायाः सप्तभिर्मासैर्भवति ।
इति सुखबोधः ॥ * ॥ तस्य लक्षणं यथा,—
“शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ।
वामोन्नतश्चेत् कन्याः पुत्रदो दक्षिणोन्नतः ॥
आखुरोमा गूढ़मणिः सुश्लिष्टः संहतः पृथुः ।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः ॥
कुरङ्गखुररूपो यश्चुल्लिकोदरसन्निभः ।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः ॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति ।
चिपिटः कर्परकारः किङ्करीपददो भगः ॥
वंशवेतसपत्राभो गजरोमोच्चनासिकः ।
विकटः कुटिलाकारो लम्बगल्लस्तथाऽशुभः ॥”
इति काशीखण्डे ३७ अध्यायः ॥ * ॥
अपि च ।
“शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च
कीर्त्तिता ।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥” * ॥
अथ योनिरोगाधिकारः ।
“तत्र योनिरोगाणां निदानान्याह ।
‘मिथ्याहारविहाराभ्यां दुष्टैर्दोषैः प्रदूषितात् ।
आर्त्तवाद्बीजतश्चापि दैवाद्वा सुभगे गदाः ॥’
रोगिणीनां योनीनां नामान्याह ।
‘उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता ।
वातला योनयो रुग्णा वातदोषेण पञ्चधा ॥
पञ्चधा पित्तदोषेण तत्रादौ लोहितक्षरा ।
प्रस्रंसिनी वामिनी च पुत्रघ्नी पित्तला तथा ॥
अत्यानन्दा कर्णिनी च चरणानन्दपूर्व्विका ।
अतिपूर्व्वापि सा ज्ञेया श्लेष्मला च कफादिमाः ॥
षण्डाण्डिनी च महती सूचीवक्त्रा त्रिदोषिणी ।
पञ्चैता योनयः प्रोक्ताः सर्व्वदोषप्रकोपतः ॥’
अथ नासां लक्षणान्याह ।
‘सा फेनिलमुदावर्त्ता रजःकृच्छ्रेण मुञ्चति ।
वन्ध्या नष्टार्त्तवा ज्ञेया विप्लुता नित्यवेदना ॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम् ।
वातला कर्कशा स्तब्धा शूलनिस्तोदपीड़िता ॥
चतसृष्वपि चाद्यासु भवत्यनिलवेदनाः ॥’
अनिलवेदनास्तोदादयः ॥ वातलायां त्वति-
शयिता वातवेदना बोद्धव्या । वातला इत्य-
न्वयात् ॥ * ॥
‘सदाहं चरते रक्तं यस्याः साः लोहितक्षरा ।
प्रस्रंसिनी संसते च क्षोभिता दुःप्रजायिनी ॥’
क्षोभिता विमर्द्दिता संसते स्वस्थानात् च्यवते
दुःप्रजायिनी दुष्टप्रजननशीला ।
‘सवातमुद्गिरेद्बीजं वामिनी रजसा युतम् ।
स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंश्रयात् ॥’
पुत्रशब्दोऽत्रापत्योपलक्षकः ।
‘अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता ।
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥’
अत्यानन्दामसन्तोषं ग्राम्यधर्म्मेण विन्दति ।
कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते ॥’
कर्णिका मांसस्य कर्णिकारो ग्रन्थिः ॥
‘मैथुने चरणापूर्व्वं पुरुषादतिरिच्यते ।’
अतिरिच्यते रजो मुञ्चति इत्यर्थः ।
‘बहुशश्चातिचरणा तयोर्बीजं न विन्दति ॥’
बहुशः वारं वारं अतिरिच्यते तयोः चर-
णातिचरणयोः ।
‘श्लेष्मला पिच्छिला योनिः कण्डूयुक्तातिशीतला ।

चतसृष्वपि चाद्यासु शेषलिङ्गाच्छ्रयो भवेत् ।
अनार्त्तवास्तनी षण्डी खरस्पर्शा च मैथुने ।'
अस्तनी ईषत् स्तनौ यस्याः सा अत्र तस्याः षण्डी । अण्डिनीमाह ।
'महामेढ्रग्रहीताया बालाया अण्डिनी भवेत् ।'
महामेढ्रः पुरुषः तेन गृहीताया बालायाः सूक्ष्मयोनिच्छिद्राया अण्डिनी अण्डवल्लम्बमाना योनिर्भवति ।
'विवृतातिमहायोनिः सूचीवक्त्रातिसंवृता ।
सर्वलिङ्गसमुत्थानात् सर्वदोषप्रकोपजा ।
चतसृष्वपि चाद्यासु सर्वलिङ्गनिदर्शनम् ।'
असाध्या योनीराह ।
'पञ्चासाध्या भवन्तीह योनयः सर्वदोषजाः ।'
पञ्च षण्डीप्रभृतयः । * ।
अथ योनिकन्दस्य निदानमाह ।
'दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा ।'
वाताद्याः कुपिता यदा यथा निदानकुपिता वाताद्याः । * । रूपमाह ।
"पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥"
लकुचाकृतिसन्निभं लकुचाकाराकारम् । गुह्यकमत्र विधेयं बोद्धव्यम् । * । वातजादिभेदेन रूपभेदमाह ।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकं तु तम् ।
तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।
सर्वलिङ्गसमायुक्तं सन्निपातात्मकं भवेत् ॥" * ।
अथ योनिरोगाणां चिकित्सा । तत्र वन्ध्याचिकित्सा । तस्या लक्षणमाह । वन्ध्या नष्टार्त्तवा ज्ञेयेति । ततः प्रथमतो नष्टार्त्तवाचिकित्सा ।
'आर्त्तवादर्शने नारी मत्स्यान् सेवेत नित्यशः ।
काञ्जिकञ्च तिलान् माषानुदश्विच्च तथा दधि ।
इक्ष्वाकुबीजदन्तीचपलागुडदमनकिण्वयवशूकैः ।
सगुडकृतैर्वर्त्तिर्योनिगता कुसुमसञ्जननी ।'
इक्ष्वाकुः कटुतुम्बी । चपला पिप्पली । दमनो मदनफलम् । किण्वं सुराबीजम् ।
'पीतं ज्योतिष्मतीपत्रं राजिकोषासनं त्र्यहम् ।
शीतेन पयसा पिष्टं कुसुमं जनयेद्ध्रुवम् ।'
ज्योतिष्मती कटभीत्याख्यविशेषः करही इति लोके । पयसा दुग्धेन । * । अथ वन्ध्याचिकित्सा ।

'पक्वा सिता चामलका मधूकं
वटस्य शृङ्गं नवकेशरञ्च ।
दलक्ष्मचूर्णैरसनैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते ।'

अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम् ।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि ।
पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया ।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ।
कुरण्टमूलं धातक्याः कुसुमानि वटाङ्कुराः ।
नीलोत्पलं पयोयुक्तमेतद्गर्भप्रदं ध्रुवम् ।

यावता पिबति पार्श्वपिप्पलं
क्षीरकेण सहितं हिताशना ।
श्वेतया विशिखपुङ्खया युतं
सा सुतं जनयतीह नान्यथा ॥"

श्वेतकुसुमया शरपुङ्खया सह ।
"पत्रमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी ।
पीत्वा पुत्रमवाप्नोति वीर्य्यवन्तं न संशयः ।
शूकरशिम्बीमूलं मध्वा वा दधि पलस्य सपयस्कम्
पीत्वाथोभयलिङ्गीबीजं कन्यां न सूते स्त्री ।
पुत्रमञ्जारीमूलं पिष्ट्वाक्रान्ताशालिङ्गिनीसहिता ।
एतद् गर्भेऽहदिनं पीत्वा कन्यां न सर्वथा सूते ।
पुत्रमञ्जारी पतञ्जिया तस्या मूलम् । दृशालिङ्गिनी पञ्चगुरिया । * । गर्भप्रदभेषजकथनावसरे गर्भाजनकमपि भेषजमाह ।
'पिप्पलीविडङ्गटङ्कणसमचूर्णं या पिबेत् पयसा ।
ऋतुसमये नहि तस्या गर्भः संजायते क्वापि ।

आरनालपरिपेषितं त्र्यहं
या जवाकुसुममत्ति पुष्पिणी ।
सतुपुराणगुडसुहिसेविनी
सा दधाति नहि गर्भमङ्गना । * ।

तासु योनिषु चाद्यासु स्नेहादिक्रम इष्यते ।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ।'
वस्तिरत्रोत्तरवस्तिः । क्रमचिकित्सा ।
'नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः ।
तिलतैलं पचेन्नारी पिचुं तस्य विधारयेत् ।
विप्लुतायां सदा योनौ यथा तेन प्रशाम्यति ।'
नतं तगरम् ।
'वातला कर्कशा स्तब्धामल्पस्पर्शा तथैव च ।
कुम्भीस्वेदैरुपचरेदन्तर्वेश्मनि संवृते ।
धारयेद्वा पिचुं योनौ तिलतैलस्य सा सदा ।
पित्तलानाञ्च योनीनां सेकाभ्यङ्गपिचुक्रियाः ।
शीताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च ।
प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत् ।
पिधाय वेशवारेण ततो बन्धं समाचरेत् ।
शुण्ठीमरिचकृष्णाभिर्धान्यकाजाजिदाडिमैः ।
पिप्पलीमूलसंयुक्तैर्वेशवारः स्मृतो बुधैः ।
धात्रीरसं सितायुक्तं योनिदाहे पिबेत् सदा ।
स्वर्णक्रान्ताभवं मूलं पिबेद्वा तण्डुलाम्बुना ।
योन्यास्तु पूयस्राविण्याः शोधनद्रव्यनिर्म्मितैः ।
सगोमूत्रैः सलवणैः पिण्डैः संपूरणं हितम् ।'
शोधनद्रव्याणि त्रिवृत्प्रभृतीनि ।
'दुर्गन्धां पिच्छिलां वापि चूर्णैः पञ्चकषायजैः ।
पूरयेद्धारयेद्राजवृक्षादिक्वथिताम्बुना ॥"
पञ्च कषायाः । वचावासापटोलप्रियङ्गुनिम्बाः । राजवृक्षादि धवखदिरा ।
"पिप्पल्यामरिचैर्माषैः शताह्वाकुष्ठसैन्धवैः ।
वर्त्तिस्तुल्या प्रदेशिन्या योनौ श्लेष्मविशोधिनी ।
तुल्या प्रदेशिन्या दैर्घ्येण परिणाहेन च ।
कर्णिकायां वर्त्तयो देयाः शोधनद्रव्यनिर्म्मिताः ।
गुडूचीत्रिफलादन्तीक्वथितोदकधारया ।
योनिं प्रक्षालयेत्तेन तत्र कण्डूः प्रशाम्यति ।
सहपुष्पं सखदिरं पथ्या जातीफलं तथा ।

निम्बी पूगञ्च संचूर्ण्य वस्त्रपूतं नि
योनिर्भवति संकीर्णा न मदेच्च वर्ष
कपिकच्छूभवं चूर्णं कारयेद्विनिता
योनिः सङ्कीर्णा याति
नीरजस्वियं लब्ध्वा सुपुष्टी सुरभि
वामकः मैत्रवधापि यन्त्रारो
एषां चूर्णं घृते क्षिपेत् भक्ष्या
हत्वा सादेरयवाग्ड़
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला
मेदे पयस्या काकोली
अजमोदा हरिद्रे द्वे प्रियङ्गुकटुरो
उत्पलं कुमुदं द्राक्षा काकोल्यौ
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपा
शतावरीरसं क्षीरं घृताच्च द्विगु
सर्पिरेतन्नरः पीत्वा स्त्रीषु नित्यं
पुमान् जनयते वीरान्

या चैवास्थिरगर्भा स्यात्
अल्पायुषं वा जनयेत् या च कन्या
योनिरोगे रजोदोषे परिस्रावे
प्रजावर्द्धनमायुष्यं सर्वग्रहनिवारणम्
नाम्ना फलघृतं ख्यातमश्विभ्यां
अनुक्तं लक्ष्मणामूलं क्षिपन्त्यत्र
जीवद्वत्सैकवर्णाया घृतञ्चात्र गृह्यं
आरण्यगोमयेनेह वह्निज्वाला च
मेदे मेदा महामेदा तयोरभावे
द्विगुणा देया । पयस्यात्र
काकोलीयुगलाभावे अश्वगन्धा द्विगु
प्रियङ्गुस्थाने केचिद्विङ्गु पठन्ति ।
काकोलीयुक्ता पुनः काकोल्यावित
क्षीरकाकोल्यौ द्वैगुण्यार्थं एतस्य
पाठो नानातन्त्रेषु नानाविधः । तत्र
तगरजीवकर्षभका एवाधिकाः ।
भयोरभावे विदारीकन्दो द्विगुणो दे
घृतं सकलयोनिरोगेषु । * ।

अथ योनिकन्दस्य चिकित्सा ।

[illegible]
पूरयेद्योनिमेतेषां चूर्णैः
त्रिफलायाः कषायेण सक्षौद्रेण च
प्रमदा योनिकन्देन बाधिता
अथ प्रसङ्गात् गुर्व्विण्या रोगाणां चि
'ह्रीबेरातिविषामुस्तमोचरसैः शृतं
दद्याद्गर्भे प्रचलिते प्रदरे कुक्षिरुजि
कुक्षिरुक् उदरव्यथा । चलितगर्भस्रा
वादिकायः । * ।

अथ गर्भस्रावपातयोर्निदानम्
'ग्राम्यधर्माध्वगमनयानासनप्रपीडनैः
ज्वरोपवासोत्पतनप्रहाराजीर्णधारणैः
वमनाच्च विरेकाच्च कृत्सनार्द्धपानका
तीक्ष्णक्षारोष्णकटुकातिरुक्षनिषेवणा
वेगाभिघातादिषमादासनाच्च्यवनाद्व
गर्भं पतति रक्तस्य सशूलं दर्शनं भवे

গোপালতাপনী।

[illegible] অন্তর্গত গোপালতাপনী নামে এই উপনিষৎখানি দুইটী টীকার সহিত মুদ্রিত হইয়াছে। এই উভয় [illegible] ও দ্বিতীয়টী শ্রীবিশ্বেশ্বরপণ্ডিতের প্রণীত। পূজ্যপাদ গোস্বামীর ব্যাখ্যাটী সম্পূর্ণ ভক্তিরসের আধার স্বরূপ। [illegible] উপনিষৎখানি শেষোক্ত টীকার সহিত মুদ্রিত হইয়াছিল তথাপি তাহাতে ভক্তিজ্ঞান-লাভাকাঙ্ক্ষী পবিত্রাত্মা বৈষ্ণ[illegible] নিমিত্ত ভক্তিপ্রধান গ্রন্থেরই অনুশীলন করিয়া থাকেন, কিন্তু, বিশ্বেশ্বরপণ্ডিতের টীকাটী [illegible] জ্ঞানপ্রধান গ্রন্থ ইহা অবশ্য স্বীকর্তব্য; কিন্তু, গোপালতাপনী গ্রন্থ পূর্ব্বোক্ত বিভাগ [illegible] প্রয়োজন। বিশেষত এই তাপনীগ্রন্থ ভক্তিজ্ঞান-পরায়ণ মহাত্মা বৈষ্ণবদিগেরই পরম [illegible] উপাদেয়, অথচ ঐরূপ যথার্থ টীকা এ প্রদেশে কুত্রাপি মুদ্রিত হয় নাই, এই জন্য [illegible] গোস্বামীর ভক্তিরসপূর্ণ টীকার বিশেষ অনুযায়ী জানিয়া এই উভয়বিধ টীকার সহিত এই গ্র[illegible] দেবীভাগবতের গ্রাহকের পক্ষে ॥০ মাত্র।

[illegible] মুদ্রিত হইয়াছে। ইহার মূল্য শব্দকল্পদ্রুম অথবা দেবীভাগবতের গ্রাহক [illegible] একত্রে লইলে তাঁহাদের পক্ষে ১৲ এক টাকা।

শ্রীহরিচ[illegible]

[illegible]

र्भपातनात् नियमे गर्भे पातनशीलं द्रव्यं समात्। र्भस्य स्रावपातयोः पूर्व्वरूपमाह। गर्भे पतत्यादि। पततिस्रावेण पातेन वा पतिष्यति स्रावपातयोरवधिमाह।

आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥'

आचतुर्थात् मासात् चतुर्थमासपर्य्यन्तम्। गर्भस्य विद्रवः। शोणितरूपगर्भः। स्रवति शोणितमिति भोजवचनात्। स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य। गर्भपातस्य दृष्टान्तं दर्शयति।

'गर्भोऽभिघातविषमासनपीड़नाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन॥'

यथा वृक्षलग्नं पक्वं फलमभिघातेनाकाल एव पतति तथा गर्भोऽप्यभिघातादिना अकालेऽपि पतति॥ * ॥ अथ गर्भस्रावस्य चिकित्सा।

'गुर्व्विण्या गर्भतो रक्तं स्रवेद्यदि मुहुर्मुहुः।
तन्निरोधाय सुस्निग्धमुत्पलादिशृतं पिबेत्॥'

उत्पलादिगणमाह।

'उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा।
श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः॥
संशीलितो हरत्येव दाहं तृष्णां ज्वरामयम्।
रक्तपित्तञ्च मूर्च्छाञ्च तथा छर्द्दिमरोचकम्॥'

अथ गर्भपातस्य उपद्रवानाह।

'प्रसंस्रमाने गर्भे स्याद्दाहः शूलञ्च पार्श्वयोः।
पृष्ठरुक् प्रदरानाहौ मूत्रसङ्गश्च जायते॥'

प्रसंस्रमाने पतति॥ * ॥ अथ गर्भस्य स्थानान्तरगमने चोपद्रवानाह।

'स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च जायते।
आमपक्वाशयादौ तु क्षोभः पूर्व्वेऽप्युपद्रवाः॥'

पूर्व्वेऽप्युपद्रवाः पार्श्वशूलादयः॥ * ॥ तच्चिकित्सामाह।

'स्निग्धशीताः क्रियास्तेषु दाहादिषु समाचरेत्।
कुशकाशोरुबूकाणां मूलैर्गोक्षुरकस्य च॥
शृतं दुग्धं सितायुक्तं गर्भिण्याः शूलहृत् परम्।
श्वदंष्ट्रामधुकक्षुद्राम्लानैः सिद्धं पयः पिबेत्।
शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम्॥'

अम्लानः पुष्पजातिः। अयं वाणपुष्प इति गौड़ादौ प्रसिद्धः।

'मृत्कोष्ठागारिका गेहसम्भवात्र च मृत्तिका।
समङ्गा धातकीपुष्पं गैरिकञ्च रसाञ्जनम्॥
तथा सर्ज्जरसश्चैतान् यथालाभं विचूर्णयेत्।
तच्चूर्णं मधुना लिह्याद्नारी प्रदरशान्तये॥'

मृत्कोष्ठागारिकासम्भवा मृत्कोष्ठागारिका वरटी तन्निर्म्मितगृहभवा मृत्तिका। समङ्गा लज्जालुः।

'कसेरूत्पलशृङ्गाटकल्कं वा पयसा पिबेत्।
पक्वं वचारसोनाभ्यां हिङ्गुसौवर्च्चलान्वितम्।
आनाहे तु पिबेत् दुग्धं गुर्व्विणी सुखिनी भवेत्॥'

सौवर्च्चलं सौचार इति लोके।

'तृणपञ्चकमूलानां कल्केन विपचेत् पयः।
तत् पयो गुर्व्विणी पीत्वा मूत्रसङ्गाद्विमुच्यते॥
शालीक्षुकुशकाशैः स्यात् शरेण तृणपञ्चकम्।
एषां मूलं तृषादाहपित्तास्रकृन्मूत्रगदं हरेत्॥'* ॥

अथ प्रसूताया योनेः क्षतादेश्चिकित्सा।

'तुम्बीपत्रं तथा लोध्रं समभागं सुचूर्णयेत्।
तेन लेपो भगे कार्य्यः शीघ्रं स्याद्योनिरक्षता॥
पलाशोडुम्बरफलं तिलतैलसमन्वितम्।
योनौ विलिप्तं विधिना गाढ़ीकरणमुत्तमम्॥"

इति भावप्रकाशः॥ * ॥

अथ कुयोनिप्राप्तिकारणानि।

"हरिष्कृणुमति गाश्ची ये गोविन्दं नार्च्चयन्ति ये।
लभन्ते नात्मविद्याञ्च सुतीर्थविमुखाश्च ये॥
सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुप्तसदारकाः॥
प्रशस्तञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाश्चौरा ये चान्ये वकवृत्तयः।
बालवृद्धातुरस्त्रीषु निर्द्दयाः सत्यवर्ज्जिताः॥
अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
याधाचरणसम्पन्ना वर्णादिधर्म्मवर्ज्जिताः।
देवोपदेवद्गुजरक्षोयक्षादिसेविनः॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः।
देवतोच्छिष्टपतितशूद्रश्राद्धान्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पाषण्डधर्म्माचरणाः पुरोधोवृत्तिजीविनः॥
पितृमातृस्वसापत्यस्वदारत्यागिनश्च ये।
ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्म्मदूषकाः॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
महाक्षेत्रेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः॥
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाच्यतिर्य्यग्वृक्षकुयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥
तस्मात् त्यक्ता निषिद्धार्थं विहितं कर्म्म कारयेत्।
यज्ञं दानं तपस्तीर्थं मन्त्रं देवं गुरुं भरेत्॥
नाचरेत् कुत्सितं कर्म्म मनसा च कदाचन।
विपाकं कर्म्मणां दृष्ट्वा योनिकोटिषु दुःसहम्॥
चतुर्भिरपि वर्णैस्तु सेव्यो धर्म्मो निरन्तरम्॥"

इति पाद्मोत्तरखण्डे १८ अध्यायः॥ * ॥

योनिदुष्टाया अशाध्वीत्वं यथा,—

"साध्वी स्त्री मातृतुल्या च सर्व्वथा हितकारिणी।
असाध्वी वैरतुल्या च शश्वत्सन्तापदायिका॥
सुखदुष्टा योनिदुष्टा चैवासाध्वीति विश्रुता॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २ अध्यायः॥ * ॥

पापपुण्यफलं अधमोत्तमयोनिप्राप्तिर्यथा,—

"पापपुण्यफलं लोके प्रत्यक्षं खलु दृश्यते।
देवदानवमानुष्यतिर्य्यक्त्वं कृमियोनिता॥
नानायोनिषु जन्मानि नानाव्याधिप्रपीड़िताः।
मरणं बालवृद्धानामन्धत्वं कुब्जता तथा॥
ऐश्वर्य्यं सुदरिद्रत्वं पाण्डित्यं मूर्खता तथा।
एताश्चराचरे लोके भवन्ति कथमन्यथा॥"

इति पाद्मोत्तरखण्डे २१ अध्यायः॥ * ॥

पक्षियोनिप्राप्तिकारणं यथा,—

"इति श्रुतकथो विप्र! सारसं प्राह वानरः।
सम्यग्वेत्ति भवान् नूनं त्वं कथं पक्षितां गतः।
वृत्तान्तमेतं कथय श्रोतुमिच्छामि सारस!॥

सारस उवाच।

कथयिष्यामि तत् कर्म्म येनाहं दुर्गतिं गतः।
पक्षियोनिं गतो येन तत् सर्व्वं श्रोतुमर्हसि॥
धान्यखारीशतं साग्रमुत्सृष्टं हि त्वया पुरा।
बहुभ्यो ब्राह्मणेभ्यश्च नर्म्मदायाः परिग्रहे॥
पौरोहित्यमदाल्लोभाद्वञ्चयित्वा द्विजांस्तथा।
किञ्चिद्दत्त्वा तु तेभ्यश्च गृहीतमखिलं मया॥
विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात्।
पतितः कालसूत्रेऽहं नरके रक्तकर्द्दमे॥
वक्तुमत्र न शक्नोमि दुःखं वानर! नारकम्।
दैवात् कथमपि प्राप्त उत्तारो नरकाम्बुधेः॥
मया यदि तथापीह शकुनत्वमुपस्थितम्।
अपहृत्य पुरा कांस्यभाजनं भगिनीगृहात्॥
द्यूतकर्म्मे मया दत्तं तेन मे सारसी गतिः॥
इयञ्च ब्राह्मणी पूर्व्वं कांस्यचौरी सुदारुणा।
तेनेह सारसी जाता मद्भार्य्या सहधर्म्मिणी॥"

इति तत्रैव १९। २० अध्यायौ॥ * ॥

पापिनां नरकभोगानन्तरं स्थावरादियोनिप्राप्तिर्यथा,—

"स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम्॥
सहस्रभागप्रथमा द्वितीयानुक्रमास्तथा।
सर्व्वे ह्येते महाभाग यावन्मुक्तिसमाश्रयाः॥"

इति विष्णुपुराणे २ अंशे ५ अध्यायः॥

"पापिनां नरकभोगानन्तरं स्थावराद्यासूत्तरोत्तरमुत्कृष्टासु नवधा भिन्नासु योनिषु जन्मक्रममाह। स्थावरा इति। अब्जा मत्स्यादयः। धार्म्मिका नरेष्वेव पुण्यविशेषेण केचिन्मोक्षिणश्च सुखवश्च यथाक्रमं भवन्तीति शेषः। तेषाञ्च पूर्व्वबाहुल्यमुत्तरोत्तराल्पत्वञ्चाह सहस्रेति। द्वितीयानुक्रमाः द्वितीयोऽनुक्रम उद्देशो येषां द्वितीयस्थानेऽनुक्रान्ता ये कृमयस्ते सहस्रभागप्रथमाः सहस्रभागाः सहस्रगुणाः प्रथमाः प्रथमनिर्द्दिष्टाः स्थावरा येषां ते। कृमिभ्यः सहस्रगुणमधिकाः स्थावराः। तत्सहस्रतमभागाः कृमयः इत्यर्थः। पञ्चम्यन्तपाठेऽपि द्वितीयस्थानेऽनुक्रान्तात् कृमिवर्गात् सहस्रगुणाः स्थावरा इत्येवार्थः। तथा सर्व्वे ह्येत इति। यथा स्थावराः स्थानान्तरनिर्द्दिष्टेभ्यः कृमिभ्यः सहस्रगुणमधिकाः। तथा कृमयः स्थानान्तरनिर्द्दिष्टेभ्योऽब्जेभ्यः सहस्रगुणमधिकाः। एवं पक्ष्यादिष्वपि द्रष्टव्यम्। मोक्षं सम्यगाश्रयन्ते इति मोक्षसमाश्रयाः सुखवो ज्ञाननिष्ठाः तत्पर्य्यन्तमेवं पूर्व्वपूर्व्व[illegible]रोत्तरन्यूनत्व-[illegible]

क्रमः । ततः परं मुक्तिः । एतच्च संसारिजीव-बाहुल्यकथनं मोक्षस्य दुर्लभत्वख्यापनार्थम् । अयञ्च नवधा निर्द्दिष्टो जन्मक्रमः प्रायिक एव । तदुक्तमादित्यपुराणे ।
"जन्मक्रमेणापि मानुष्यं प्राप्यन्ते पुण्यगौरवात् ।
विचित्रा गतयः पुंसां कर्म्मणां गुरुलाघवैः ॥"
इति तट्टीका ॥

कुयोनिमोचनं यथा,—
वाराह उवाच ।
"येन गर्भं न गच्छेत तन्मे शृणु हि माधवि ! ।
कथयिष्यामि ते ह्येवं सर्व्वधर्म्मविनिश्चयम् ॥
कृत्वापि विपुलं कर्म्म आत्मानं न प्रशंसति ।
कुर्व्वंस्तु बहुकर्म्माणि शुद्धेनैवान्तरात्मना ॥
कृत्वापि मम कर्म्माणि मत्प्रियाणि वसुन्धरे ! ।
नैव कुर्व्वन्त्यहङ्कारं क्रोधञ्चैव न गच्छति ॥
समं पश्यति चित्तेन लाभालाभविवर्ज्जितः ।
पञ्चानामिन्द्रियाणाञ्च समर्थो निग्रहे रतः ॥
कार्य्याकार्य्यं विजानाति सर्व्वधर्म्मेषु निष्ठितः ।
शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च यः ॥
यो दरिद्रो निरालस्यः सत्यवागनसूयकः ।
स्वदारनिरतो नित्यं परदारविवर्ज्जितः ॥
सत्यवादी विशुद्धात्मा नित्यं भागवतप्रियः ।
संविभागी विशेषज्ञो नित्यं ब्राह्मणवत्सलः ॥
प्रियवादी द्विजानाञ्च मम कर्म्मपरायणः ।
कुयोनिन्तु न गच्छेत मम लोकाय गच्छति ॥"

वियोनिमोचनं यथा,—
"अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
यो वियोनिं न गच्छेत मम कर्म्मपरायणः ॥
जीवहिंसानिवृत्तस्तु सर्व्वभूतहितः शुचिः ।
सर्व्वत्र समतायुक्तः समलोष्टाश्मकाञ्चनः ॥
वाक्ये क्षिप्तोऽपि वदति याम्यो दान्तः शुभे रतः ।
स्वयं नैव विजानाति परेषामहितं क्वचित् ॥
सत्यञ्च संचरेत् शीतदयञ्च न जल्पति ।
सर्व्वेषु निरतो यः पर्य्येति ज्ञाननिश्चयः ॥
निन्द्यञ्च दर्शनात् किञ्चित् परोक्षेऽपि न च
क्षिपेत् ।
ऋतुकालेऽभिगच्छेत अपत्यार्थं स्वकां स्त्रियम् ॥
ईदृशास्तु नरा भद्रे ! मम कर्म्मपरायणाः ।
ते वियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि ॥"

तिर्य्यग्योनिमोचनं यथा,—
वाराह उवाच ।
"गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे ! ।
तिर्य्यग्योनिगमनाच्चापि यो न गच्छति किञ्च-
नम् ।
आरम्भात् चतुर्दश्यां मैथुनं यो न गच्छति ।
सुरा परस्य पानानि यश्चैव न विक्रुष्यति ॥
दारांश्च वन्दति च यो मम नित्यमनुव्रतः ।
दैवं सेवेत मनुजः शिवमाहात्म्यपूजकः ॥
प्राणैश्च जीवति च यः प्रतिमानी गुणान्वितः ।
अनुग्रः सर्व्वकार्य्येषु अनन्यो नियतव्रतः ॥
रिक्तं चाऽङ्कुशमौलि कौमारव्रतसंस्थितः ।
सर्व्वभूतदयायुक्तः सर्व्वत्र च समन्वितः ॥
मतिमान्नैव लप्येत परार्थेषु कदाचन ।
ईदृशीं बुद्धिमास्थाय मम कर्म्माणि कुर्व्वते ।
तिर्य्यग्योनिं न गच्छेत मम लोकाय गच्छति ॥"
इति वराहपुराणे योनिगर्भमोचननामाध्यायः ॥

योनिकन्दः, पुं, (योनौ कन्द इव ।) योनिरोगविशेषः । तस्य निदानं यथा,—
"दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्व्वाताद्याः कुपिता यदा ॥"
वाताद्याः कुपिता यथा । यथा निदानकुपिता वाताद्याः । रूपमाह ।
'पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥'
लकुचाकृतिसन्निभं लकुचाकाराकारम् । गुडकमञ्च विशेष्यं बोद्धव्यम् । * । वातजादिभेदेन रूपभेदमाह ।
'रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तत् ॥
तिलपुष्पप्रतीकाशं कण्डूमत् कफात्मकम् ।
सर्व्वलिङ्गसमायुक्तं सान्निपातात्मकं भवेत् ॥'
अस्य चिकित्सा । योनिशब्दे द्रष्टव्या ।" इति भावप्रकाशः ॥

योनिजं, त्रि, (योनेर्ज्जायते इति । जन्+डः ।) योनिनिःसृतशरीरादिकम् । यथा,—
"सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा ।
योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम् ॥"
इति भाषापरिच्छेदः ।
"योनिजादीति । योनिजमयोनिजञ्चेत्यर्थः । योनिजमपि जरायुजमण्डजञ्च । जरायुजं मानुषादीनां अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिज्जादिकम् । स्वेदजाः कृमिदंशाद्याः । उद्भिज्जास्तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् ।" इति सिद्धान्तमुक्तावली ॥

योनिदेवता, स्त्री, (योनेर्द्देवता ।) पूर्व्वफल्गुनीनक्षत्रम् । इति हेमचन्द्रः ॥

योनिमुद्रा, स्त्री, (योन्याकृतिर्मुद्रा हस्तभङ्गी ।) भगवत्याः पूजायां प्रदर्शनीयाङ्गुलीरचितयोन्याकारमुद्राविशेषः । यथा,—
"पञ्च प्रणामान् कृत्वाथ ॐ ह्रीं श्रीमिति मन्त्रकैः ।
अन्येषां पुरतश्चैव अधिकाख्या यथेच्छया ।
योनिमुद्रां ततः पश्चात् दर्शयित्वा विसर्ज्जयेत् ॥
द्वौ पाणी प्रसृतीकृत्य कृत्वा तूत्तानमञ्जलिम् ।
अङ्गुष्ठाग्रद्वयं न्यस्य कनिष्ठाग्रद्वयोस्ततः ॥
अनामिकायां वामस्य तर्ज्जनीं पुरो न्यसेत् ।
दक्षिणस्यानामिकायां कनिष्ठां दक्षिणस्य च ॥
अनामिकायाः पृष्ठे तु मध्यमे विनियोजयेत् ।
द्वे तर्ज्जन्यौ कनिष्ठाग्रे तदग्रेणैव योजयेत् ॥
योनिमुद्रा समाख्याता देव्याः प्रीतिकरी सदा ।
त्रिवारं दर्शयेदन्ते मूलमन्त्रेण साधकः ।
तां मुद्रां शिरसि न्यस्य मण्डलं विन्यसेत्ततः ॥"
इति कालिकापुराणे ५९ अध्यायः ॥ * ॥
पारिभाषिकयोनिमुद्रा यथा । मन्त्रमुक्तावल्याम् ।
"उपविश्यासने मन्त्री प्राङ्मुखो ...
षट्चक्रं चिन्तयेद्देवि ! ...
चतुर्द्दलं स्यादाधारं स्वाधिष्ठानम् ...
नाभौ दशदलं पद्मं सूर्य्यसंख्यदलं हृदि ।
कण्ठे स्यात् षोड़शदलं ...
सहस्रदलमाख्यातं ब्रह्मरन्ध्रे महेश्वरि ।
आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दर...
त्रिकोणमध्ये देवेशि ! कामबीजं
कामबीजोद्भवं तत्र स्वयम्भुलिङ्गमुत्तमम् ।
तस्योपरि पुनर्ध्यायेत् चित्कलां ...
ध्यायेत् कुण्डलिनीं दे...
चित्कलया कुण्डलिनी तेजोरूपा
आधारादीनि पद्मानि भित्त्वा तेन ...
हंसेन मनुना देवीं ब्रह्मरन्ध्रं नयेत् ...
सदाशिवेन देवेशि ! रममाणं रतेन ...
अमृतं जायते देवि ! तदुत्थात्
तद्रुद्रवामृतं देवि ! लाक्षारसस...
तेनामृतेन देवेशि ! तर्पयेत् परदेवता...
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया ।
आनयेत्तेन मार्गेण मूलाधारं पुनः सु...
ततस्तु परमेशानि ! जपमालां ...
चिन्तयेत् विसतन्त्वाभा ब्रह्मनाड़ी...
तया संग्रथिता ध्येया ...
अनुलोमविलोमेन मन्त्रवर्णविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् पञ्चाशतं ...
कुर्य्याद्वर्णमयीं मालां ...
परमार्थं मेरुरूपं लङ्घनं नैव कारये...
सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं ...
अष्टोत्तरशतं मूलमन्त्रं ध्यानेन संजपे...
वर्गाणामष्टवर्णांश्च अष्टवारं जपेत् सुधीः ।
अ क च ट त प य श इत्यष्टवर्ग...
योनिमुद्रा महेशानि ! तव स्नेहात् ...
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति ...
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ।
इति ज्ञानानन्दतरङ्गि...

योनिरोगः, पुं, (योनेः रोगः ।) भगन्दरः । सुश्रुते । २ । ४५ ।
"शूलोदावर्त्तातिसारप्रवाहिकायोनिरोगावरक्तपित्तश्रमक्लमहरम् ।" * ।)
निदानादिर्योनिशब्दे द्रष्टव्यः ॥

योन्यर्शः, [स्] क्ली, (योनिजातमर्शः ।) जातरोगविशेषः । तत्पर्य्यायः । कन्दः इति त्रिकाण्डशेषः ॥ (यथा,—
"केचित्तु भूयांसमेव देशमुपदिशन्त्यर्शसामपत्यपथं गलमुखनासिकाकर्णत्वक्च ।" इति चरके चिकित्सास्थाने अध्याये ।)

योषा, स्त्री, (यौति मिश्रीभवतीति । यु बाहुलकात् सः । इत्युज्ज्वलदत्तः । ३ । स्त्रियां टाप् ।) नारी । इत्यमरः । २ । (यथा, देवीभागवते । १ । १५ । ...

यथा दारुमयी योषा नटादीनां प्रचेष्टते ।
था स्वकर्म्मवशगो देही सर्व्वत्र वर्त्तते ॥")
त्, स्त्री, (योषति पुमांसं युष्यते पुंभिरिति
। युष्+"हृसृरुहियुषिभ्य इतिः ।" उणा०
। ९९ । इति इतिः ।) नारी । इत्यमरः । २ ।
। २ ॥ (यथा, मेघदूते । १ । ६९ ।
गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
द्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥")
स्या अवध्यत्वं यथा, वह्निपुराणे ।
तं प्रेक्ष्य भरतं क्रुद्धं शत्रुघ्नो वाक्यमब्रवीत् ।
अवध्याः सर्व्वभूतानां योषितः क्षम्यतामिति ॥"
षित्प्रिया, स्त्री, (योषितां प्रिया ।) हरिद्रा ।
इति भावप्रकाशः ॥
षिता, स्त्री, (योषित्+टाप् ।) नारी । यथा,
"स्त्री वधूरबला नारी प्रिया रामा जनिर्ज्जनी ।
योषा योषिद्योषिता च जोषिज्जोषा च
जोषिता ॥"
इति शब्दरत्नावली ॥
यथा, मुण्डकोपनिषदि । २ । १ । ५ ।
"तस्मादग्निः समिधो यस्य सूर्य्यः
सोमात् पर्ज्जन्य ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥")
क्तिकः, पुं, (युक्तिं करोतीति । युक्ति+ठण् ।)
र्म्मसचिवः । इति शब्दरत्नावली ॥ युक्ति-
योग्ये, त्रि ॥
गिकः, त्रि, (योगस्यायमिति । योग+अण्+
स्वार्थे कन् ।) योगसम्बन्धी । इति सिद्धान्त-
कौमुदी ॥
गिकः, त्रि, (योगाय प्रभवतीति । योग+
"योगाद्यच्च ।" ५ । १ । १२९ । इति ठञ् ।)
प्रकृतिप्रत्यययोगलभ्यार्थवाचकः । यथा । योगाय
प्रभवति । इति योग्यः यौगिकः । इति सिद्धान्त-
कौमुदी ॥ "योगरूढ़ाश्च रूढ़ाश्च यौगिका-
श्चेति ते त्रिधा । आदित्यादिशब्दा यौगिकाः
अदितेरपत्यानीति ढक्प्रत्ययेन केवलं योगार्थ
एव ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ ✱ ॥
"यौगिकं नाम लक्षयति विभजते च ।
'योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् ।
समासस्तद्धितान्तञ्च कृदन्तञ्चेति तत्त्रिधा ॥'
यन्नाम स्वान्तर्गतविष्टशब्दानां योगलभ्यस्यैव
यादृशार्थस्यान्वयबोधं प्रतिहेतुस्तन्नाम तादृ-
शार्थे यौगिकम् । योगरूढ़न्तु कृष्णसर्पादिपदं
योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु
लभ्यमात्रस्य । तच्च यौगिकं त्रिविधं समास-
स्तद्धितान्तं कृदन्तञ्चेति । द्वन्द्वोऽपि समासः स्वव-
टकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिरा-
द्यर्थस्यान्वयबोधकतया यौगिक एव । सर्व्वञ्चेदं
रूढ़ान्यत्वेन विशेषणीयं नातः कृष्णसर्पादौ
वासुदेवादौ पङ्कजादौ च योगरूढ़ेऽतिप्रसङ्गः ।
मामको श्वश्रूः गृहेत्यादौ ठीवादेः स्त्रीत्व-
वाचित्वे तादृशं नाम यौगिकमेव अन्यथा तु

स्त्रीत्वादिमति तत्तदर्थे रूढ़मेव नाम्नो विभा-
गस्य व्याघातः ॥ यौगिकेषु समासं लक्षयति ।
'यादृशस्य महावाक्यस्यान्तस्थादिर्व्विशार्थके ।
यादृशार्थस्य धीहेतुः स समासस्तदर्थकः ॥'
यादृशमहावाक्योत्तरन्त्वतलादिः स्वार्थस्य यादृ-
शार्थावच्छिन्नविषयताशालिबोधे हेतुस्तादृशं
तद्वाक्यं तथाविधार्थे समासः । पाचकादिकन्तु
पाककर्त्राद्यर्थकं वाक्यमपि स्वघटकानेकनाम
लभ्यतादृशार्थकत्वविरहान्न महावाक्यम् । प्रकृ-
त्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययो-
ग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यम् । तेन
उपकुम्भादौ नाथापितैवा नीलघटत्वत्वमित्यादौ
नीलघटत्वादिभागेऽतिप्रसङ्गः । चौरपायीत्यादि
कस्तु प्रकृत्यर्थावच्छिन्नकृदर्थस्यान्वयबोधे समर्थो-
ऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पान
शीलसामान्यस्याप्रत्ययात् । राज्ञः पुरुषत्वमित्या-
दितो राजन्येव पुरुषभावः प्रतीयते न तु राज-
पुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वित
स्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न
प्रसङ्गः । पायंपायमित्यादिणमन्तभागस्तु स्वार्था-
वच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु
त्वादिप्रत्ययार्थस्य प्रश्यायेत्यादौ समासव्यप-
देशोऽत्ववादिशब्दसंस्कारप्रयोजनको गौणः ॥"
✱ ✱ ✱ ✱ ✱ ✱
"यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति ।
'यन्नाम तद्धितं यच्च यत्क्रमं सन्नदर्थकम् ।
यद्द्वयं यत्क्रमं तत्र तद्धितान्तं निगद्यते ॥'
यद्यपि नामोत्तरतद्धितत्वं तद्धितोत्तरनामत्वं
वा प्रत्येकं बहुगुड़ो द्राक्षेत्यादौ दाक्षिरित्यादौ
व्याप्यापकमेव तद्धितान्ते नाम्नि तथापि यादृशं
नाम यच्च तद्धितं यादृशानुपूर्व्यवच्छिन्नं सदा-
दृशार्थस्यान्वयबोधे समर्थं तादृशानुपूर्व्यवच्छिन्नं
तद्द्वयमपि तादृशार्थे तद्धितान्तं नामेत्यर्थः
पचतितरामित्यादिकन्तु नामैव न प्रागेव तु
तद्धितान्तं तस्यापि लक्ष्यत्वे यः शब्दस्तद्धितं
यच्चेति पठनीयं टावादेरपि तद्धितत्वोपगमा-
दजाद्याश्वौत्यादेर्नासंग्रह इति वदन्ति ।
कृदन्तं नाम लक्षयति ।
'यद्धात्वर्थान्वितस्वार्थधीकृत् कृद्यादृशं भवेत् ।
तद्धातूत्तरगं तन् कृत् कृदन्तं नाम तादृशम् ॥'
यद्धात्वर्थान्वितस्वार्थान्वयबोधं प्रति यादृशानु-
पूर्व्यवच्छिन्नस्य यत्कृतो निश्चयः कारणं तद्धा-
तूत्तरगं तत् कृदेव तादृशानुपूर्व्यवच्छिन्नं सत्
कृदन्तं नाम । यथा पाठकपाच्यमानादि तद्धि
धात्वर्थेनान्वितस्य स्वार्थकर्त्रादेः कर्म्मत्वादा-
वन्वयबोधं प्रति द्वितीयाद्यंश तादृशानुपूर्व्वि-
कत्वेन निश्चीयमानं हेतुः चैत्रेण ग्रामस्य
गन्तव्यमित्यादौ धात्वर्थे स्वार्थमिष्टसाधनत्वादिकं
बोधयदपि तथादिकं धात्वर्थनिष्ठविषयतानिरू-
पितस्वार्थविषयताकबोधजनकत्वेन धात्वर्था-
न्वितस्वार्थकमेव भावकृतामपि स्वरूपार्थकत्वं
युक्तमादितमेव ॥" इति शब्दशक्तिप्रकाशिका ॥

अगुरुः । तत्पर्य्यायो यथा,—
"अयोगुरुः मसृद्दिष्टो यौगिको लौहनामभिः ॥"
इति गारुडे २०५ अध्यायः ॥)
यौजनशतिकः, त्रि, (योजनशतं गच्छतीति ।
योजनशत+"क्रोशशतयोजनशतयोरुपसंख्या-
नम् ।" ५।१।७४। इत्यस्य वार्त्ति० इति । ठञ् ।)
योजनशतगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥
(योजनशतादभिगमनमर्हतीति वाक्ये योजन-
शताभिगमनकर्त्ता । इति काशिका ॥)
यौजनिकः, त्रि, (योजनं गच्छतीति । योजन+
"योजनं गच्छति ।" ५ । १ । ७४ । इति ठञ् ।)
एकयोजनगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥
यौट, ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयु-
यौटत् । यौटति काष्ठं तक्षा । इति दुर्गादासः ॥
यौड़, ऋ सम्बन्धे । इति कविकल्पद्रुमः । (भ्वा०-
पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयु-
यौड़त् । यौड़ति काष्ठं तक्षा । इति दुर्गादासः ॥
यौतकं, क्ली, (युतकयोर्व्वधूवरयोरिदम् । युतक+
अण् । युतकमेवेति । स्वार्थे अण् वा ।) यौतु-
कम् । इति हलायुधरायमुकुटौ । २ । ८ । २८ ॥
(यथा, मनुः । ९ । १३१ ।
"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव
सः ॥"
अस्य विशेषविवरणन्तु यौतुकशब्दे द्रष्टव्यम् ॥)
यौतवं, क्ली, परिमाणम् । इत्यमरः । २ । ९ । ८५ ॥
यौतुकं, क्ली, यौतकम् । विवाहकाले दम्पत्योर्लब्धं
धनम् । उपचारात् अन्नप्राशनादिसंस्कारकाल-
लब्धमपि । युतकं योनिसम्बन्धः तत्र भवमिति
अणि यौतकम् । युतयोर्व्वधूवरयोरिदमिति वा
कणि यौतकम् ॥ यौतकमुकारमध्यमपि ।
यौतकं यौतुकञ्च तत् । इति वाचस्पतिः ॥ यौत-
कादि तु यद्देयं स दायो हरणञ्च तदित्यत्रामर-
टीकायां भरतः ॥ ✱ ॥ स्त्रिया यौतकधनस्याधि-
कारक्रमो यथा,—
"यत्तु दुहितृमात्राधिकारार्थं गौतमवचनम् ।
'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च ।'
यच्च नारदस्य ।
'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ॥'
यच्च कात्यायनस्यापि ।
'दुहितॄणामभावे तु रिक्थं पुत्त्रेषु तद्भवेत् ॥'
यच्च याज्ञवल्क्यस्य ।
'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥'
तानि पूर्व्वोक्तदेवलवचनविरोधेन यौतकधन-
मात्रविषयाणि । अतएव मनुः । ९ । १३१ ॥
'मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ॥'
यौतकं परिणयनलब्धम् । यु मिश्रणे इति धातो-
र्युत इति पदम् । मिश्रता च स्त्रीपुंसयोरेकशरी-
रता तच्च विवाहाद्भवति । अस्थिभिरस्थीनि
मांसैर्म्मांसानि त्वचा त्वचमिति श्रुतेः । अतो
विवाहकाललब्धं यौतकम् । ततश्च परिणयन-
लब्धं स्त्रीधनं दुहितुरेव न पुत्त्रायाम् । तत्रैव

क्रमार्थं गौतमवचनम्। स्त्रीधनं दुहितॄणाम-प्रत्तानामप्रतिष्ठितानाञ्च। प्रथममप्रत्तानां तदभावे प्रत्तानां तदभावे समूढानाम्। स्त्रीधनं दुहितॄणामिति सामान्यतः प्राप्तत्वात्। अप्रत्तानामित्यादेस्तु क्रमार्थत्वात्। तथा, याज्ञवल्क्यः।

‘अप्रजःस्त्रीधनं भर्त्तुर्ब्राह्म्यादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥’

तत्र ब्राह्मादिषु विवाहेषु यच्छ्रमध्यधिधनं स्त्रिया तत् तस्यां मृतायां प्रथमं दुहितॄणामेव तत्रापि प्रथमं कन्यायास्तदभावे प्रत्तायास्तदभावे परिणीतायाः सर्व्वदुहितृभावे च पुत्त्रस्याधिकारः अप्रजःस्त्रीधने भर्त्तुरधिकारात्। इत्यस्मिन्ना अप्रत्तापदेन अप्रत्ताद्यभावे समूढाया अप्यधिकारः सूचितः।

‘ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥’

अस्याः स्याद्दत्तमिति पराचीनं पूर्व्वत्रानुषज्यते। तेन विवाहेषु यद्धनं दत्तमिति सम्बन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयत्वम्, तथा यमः।

‘आसुरादिषु यद्दत्तं विवाहेषु प्रदीयते।’

विवाहक्रियायां पूर्व्वापरीभूतायां यद्दत्तं प्रदीयते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते।” इति दायभागः॥ “ऊढाया यौतकधने प्रथमं कुमारी तदभावे वाग्दत्ता अधिकारिणी। एतयोरभावे ऊढयोः पुत्त्रवतीसम्भावितपुत्त्रयोर्युगपदधिकारः। एकाभावे चापरायाः। एतयोरभावे बन्ध्याविधवयोस्तुल्याधिकारः। एकाभावे चापरायाः। ततः पुत्त्रदौहित्रपौत्त्रप्रपौत्त्रसपत्नीपुत्त्रपौत्त्रप्रपौत्त्राणां क्रमेणाधिकारः। गन्ध-र्व्वमते सपत्नीपुत्त्रानन्तरं दौहित्रस्याधिकार इति विशेषः। ततो ब्राह्मादिविवाहपञ्चकसमयलब्धयौतकधने भर्त्ता भ्राता माता पिता चेति क्रमः। आसुरादिविवाहत्रयसमयलब्धयौतकधने माता पिता भ्राता भर्त्ता चेति क्रमः। ततो देवरः ततो देवरपुत्त्रभर्त्तृश्वशुरपुत्त्रौ भगिनीपुत्त्रः ततो भर्त्तृभागिनेयः ततो भ्रातृपुत्त्रः ततो जामाता ततः श्वशुरः ततो भ्रातृश्वशुरः ततः आसन्नसपिण्डक्रमेण सपिण्डाः ततः सकुल्याः ततः समानोदकाः।” इति तट्टीकायां श्रीकृष्णतर्कालङ्कारः॥

यौधिष्ठिरं, त्रि, (युधिष्ठिरस्य इदमिति। युधिष्ठिर+अण्।) युधिष्ठिरसम्बन्धि

“... च यौधिष्ठिरी ... ।

अदारयत संग्रामे मघवा इव दानवम्॥”

वासुदेवस्य पत्नीविशेषे, स्त्री। यथा, हरिवंशे। १६०। २०—२१।

“कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिरः।
कापाली गरुडश्चैव जज्ञाते चित्रयोधिनौ॥
एवमादीनि पुत्त्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुताः॥”)

यौधेयः, पुं, (योधमर्हतीति। योध+ढञ्। यद्वा, “पार्श्वादियौधेयादिभ्यामणञौ।” ५। ३। ११७। इति स्वार्थे अञ्।) योद्धा। इति सिद्धान्तकौमुदी॥ (युधिष्ठिरपुत्त्रः। स च शैव्यराजदौहित्रः। यथा, महाभारते।१।९५।७६।

“युधिष्ठिरस्तु गोवासनस्य शैव्यस्य देविकां नाम कन्यां स्वयम्वरे लेभे। तस्यां पुत्त्रं जनयामास यौधेयं नाम॥” नृगराजपुत्त्राः यौधेया इति ख्याताः। यथा, हरिवंशे।३१।२५।

“दृषद्वत्यास्तु संजज्ञे शिविरौशीनरो नृपः।
शिवेस्तु शिवयस्तात! यौधेयास्तु नृगस्य च॥”)

यौनं, क्ली, (योनेरिदमिति। योनि+अण्।) योनिसम्बन्धाधीनपापम्। यथा। बौधायनः।

“संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनात् सद्यो हि शयना-सनात्॥”

समन्तुः। अध्येतैर्यौनमौखस्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति। इयात् कुर्य्यात्। एतदेवेति द्वादशवार्षिकमित्यर्थः। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। इति प्रायश्चित्तविवेकः॥ (उत्पत्तिकारणम्। यथा, महाभारते। १३। १०२। २५।

“यत्राग्नियौनाश्च वसन्ति लोका
अब्‌योनयः पर्व्वतयोनयश्च॥”

उत्तरापथजातजातिविशेषे, पुं। यथा, महाभारते। १२। २०७। ४३।

“उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौनकाम्भोजगान्धाराः किराता बर्व्वरैः सह॥”)

यौवतं, क्ली, (युवतीनां समूहः। युवति+ “भिक्षादिभ्योऽण्।” ४। २। ३८। इति अण्। पुंवद्भावाभावश्च।) युवतिसमूहः। इत्यमरः।२। ६। २२॥ (यथा, गीतगोविन्दे। १०। १५।

“रतिसुख कलावती रुचिरचित्रलेखे भुवा-वहो विबुधयौवतं वहसि तन्वि! पृथ्वीगता॥”

युवतिभिः कृतमिति। नृत्यविशेषः। यथा, सङ्गीतदामोदरे।

“मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम्॥”)

परिमाणम्। इति अमरटीकायां भरतः॥

... क्ली, (युवन्+“हायनान्तयुवादिभ्योऽण्।” ५। १। १३०। इति अण्।) यूनो भावः। ... । तारुण्यम् २। इत्यमरः। वयः ३ ... ॥ तत्तु षोडशवर्षमारभ्य सप्तति-

“... उदिताम्भस्तद्वत्तस्य उक्तं।
हह: स्यात् सप्तमैरूर्द्धं गरीयान् गतो, ...
...

नवयौवनलक्षणं यथा,—
“दरोद्भिन्नस्तनं किञ्चित् चलाक्षं ...
मनागभिस्फुरद्धासं नवं यौवनमुच्यते॥’

(... ...
मातृपितृश्चिन्त्वेति ...
सर्व्वाविनयानामेकैकमप्येषामायतनम्।
समवायः। यौवनारम्भे च प्रा...
प्रक्षालननिर्म्मलापि कालुष्यमुपयाति
अनुपजातबहुलापि सरागैव
दृष्टिः। अपहरति च वात्येव
शुष्कपत्त्रमुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया
पुरुषं प्रकृतिः। ...
सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।
यौवनकषायितात्मनश्च सलिलानीव
विषयस्वरूपास्वाद्यमानानि ...
पतन्ति मनसः। नाशयति च ...
मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु।”
कादम्बर्य्यां चन्द्रापीडं ...

नवयौवनकारकमौषधं यथा,—
“अश्वगन्धानागबलागुडमांसविशेषितम्
रूपं भवेद्यथा तद्वत् नवयौवनकारकम्॥”
इति गारुडे १८ ...

यौवनकण्टकं, पुं, क्ली, (यौवने ... दुःखदत्वात्।) युवगण्डः। इति ... वयस्फोड़ा इति भाषा॥

यौवनपिड़का, स्त्री, (यौवने पिडका।) मुखे जातः क्षुद्रस्फोटकः। वयस्फोड़ इति भाषा॥ (यथा, सुश्रुते निदानस्थाने।

“यौवनपिडका पद्मिनी कण्टका ... ।”) तल्लक्षणं यथा,—

“शाल्मलीकण्टकप्रख्याः ...
जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिकाः॥”

इति सुश्रुते। १। १६

अस्याश्चिकित्सा मुखदूषिकाशब्दे द्रष्टव्या॥

यौवनलक्षणं, क्ली (यौवनस्य लक्षणं चि-ह्नम्।) लावण्यम्। स्तनः। इति मेदिनी। ... तारुण्यचिह्नम्॥

यौवनाश्वः, पुं, (युवनाश्वस्यापत्यमिति। ... अण्।) मान्धातृराजः। इति त्रिकाण्ड...। अपि च।

“यौवनाश्वोऽथ मान्धाता चक्रवर्त्त्यभवन्नृपः
सप्तद्वीपवतीमेकः शशासाप्रतिमस्तदा।
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः।
सर्व्वदेवमयं देवं सर्व्वात्मकमतीन्द्रियम्।
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः।
धर्म्मो देशश्च कालश्च सर्व्वमेतद्यदात्मकम्।
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
तत् सर्व्वं यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥”

लिङ्गमलामातापुंसः ।
...पुंस्त्व्येव सोतिनम् ।
...र धीअपि वदिरे चलिम्।"
...ती ६ वर्णः ।
(सौतमात्र+वर्ण वत् ।)
...ति लघाधर: ।
...इ+अम् । "तमिलाल्लि च
६ । ६ । ८ । इति प्रक्रीति
मुद्राणमलिं । मुद्राणमिलिं
लिमलम् । इति मुग्धबोध-
रा. वमामलितासरं । ११८ ।

मनसा मिलितेश्च मनवाम्।
तो सौदामोभवालदिवः।")
पाद+"मुद्राणमासीमवानवली
ति मम्। "तमिलानि वेति।"
मुद्राकादेशः।) मुद्रामुमातिर,
सीन मलवेन लिमलम्। इति
मू। मुद्राणां अतिलिति-
गीत्युद्रमाणामप्रयोगोत्य
दोर्षिंभलि गीभलि च लिमम्
मान् तेषु मरेषु लायमवम
स्तुरेव। लिमगादेरमेव मुद्रा-
मवने परे लमादी द्विवचने
चने परे काद्धेयमावस्यानम्,
तिक्रममाच मुद्रामादीरेकार्थ
मत्रौ मद्भूति अवर्धमावमात-
शामलिक्रान्त: अतिलं अतिली
तिमा अतिलां अतिलान्।
साभ्यां अतिलाभि:। अति-
अतिलाभ्यम्। अतिलत् अति
। अतिलव अतिलयो: अति-
यि अतिलयो: अतिलासु। ● ।
अतिलं अतियुवौ अतियूयम्।
वां अतियुवान्। अतियुवया
तियुवाभि:। अतियुभ्यं अति-
भ्यम्। अतियुवत् अतियुवाभ्यो
तव अतियुवयो: अतियुवयाम्।
तियुवयो: अतियुवासु। ● ।
अतिलं अतियुवां अतियुयम्।
युवां अतियुवान्। अतियुवया
तियुवाभि:। अतियुभ्यं अति-
युवाभ्यम्। अतियुवत् अति-
युवान्। अतितव अतियुवयो:
अतियुवयि अतियुवयो: अति-
शामलिक्रान्त: अवर्थं अतिमां
तिमां अतिमां अतिमान्।
माभ्यां अतिमाभि:। अतिमह्यं
अतिमभ्यम्। अतिमत् अति-
मत्। अतिमम अतिमयो:
अतिमयि अतिमयो: अति-
ावामतिक्रान्त: अवर्थं आवाभ्यां

अतिवदम्। अत्मानौ अत्मानौ अत्मायान्।
अत्मानया अत्मायाभ्यां अत्मायाभि:। अति-
मह्यं अत्मायाभ्यां अत्मायभ्यम्। अत्मायत्
अत्मायाभ्यां अत्मायत्। अतिमम अत्मायो:
अत्मायाम्। अत्मायि अत्मायो: अत्मा-
यासु। ● । अस्मानतिक्रान्त: अत्महं अत्मा
अतिवदम्। अत्मा अत्मा अत्मान्।
अत्मया अत्माभ्यां अत्माभि:। अतिमह्यं
अत्माभ्यां अत्मत्। अत्मत् अत्माभ्यां
अत्मत्। अतिमम अत्मयो: अत्मायाम्।
अत्मयि अत्मयो: अत्मासु। इति
दुर्गादास:।

र

र, रेफ:। यथा। वर्णात् कारमकारी रादेफ:।
इति वचापरंसिंमारचावकी। रेफान्
कारच। रवार:। इति प्रक्रियाकौमुदी। न तु
सम्प्रविंगलमवर्ण:। तमोधारम्भात् मद्रां।
इति मुग्धबोधव्याकरणम्। ● । (तदा च
शिक्षायाम्। १०।
"स्पृमुदे मा जटूनरा राना अतुरुणा:
मुणा:।")
तस्य स्वरूपं यथा,—
"रेफच चणाणाङ्गि! कुण्डलीद्रयसंयुतम्।
रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा।
पञ्चप्राणमयं वर्णं त्रिविन्दुसहितं सदा।"
इति कामधेनुतन्त्रे ६ पटल:। ● ।
तस्य वेशनप्रकारो यथा,—
"इनत: कुण्डली रेखा वामादृष्टगताऽप्यध:।
पुनर्दक्षगता रेखा ततोऽधोगता चोदैत:।
भवानी शङ्करी वह्निस्तासु तिष्ठन्ति नित्यश:।
अर्द्धमात्रा प्रकृत्या महाशक्ति: प्रकीर्त्तिता।"
अपि च।
"ऊर्द्धाध:क्रमतो रेखा त्रिकोणाधोगता च या।
विधिरीश: केशवश्च तासु तिष्ठन्ति नित्यश:।
ऊर्द्धस्थिता तु या मात्रा सा शक्ति: परि-
कीर्त्तिता।
तस्य मध्यगता रेखा वह्निरूपा च सा स्मृता।
निर्गुणोऽसौ सदा वर्णो न कदाचित् गुणोभवेत्।"
अस्य ध्यानं यथा,—
"ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोच-
नाम्।
रक्तवर्णाम्बरभूषां रक्तपुष्पोपशोभिताम्।
रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम्।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम्।
एवं ध्यात्वा मसरूपां तन्मन्त्रं दशधा जपेत्।"
तत्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं देवि! आत्मादितत्त्वसंयुतम्।
सर्व्वतेजोमयं वर्णं सततं प्रणमाम्यहम्।"
इति वर्णोद्धारतन्त्रम्। ● ।

तस्य नामानि यथा,—
"रो रक्त: क्रोधिनी रेफ: पावको जको मन:।
प्रकाशादर्शनी दीप्ती रक्तकृष्णापरं वशी।
भुजङ्गेशो मति: सूर्य्यो धातुरक्त: प्रकाशक:।
दारको रेवतीदासं कुण्डलो वह्निमण्डलम्।
उग्ररेखा मुखग्रन्थो वेदकण्ठपरा पुरा।
प्रकृति: सुगन्धो मन्नवन्ध मायको धनम्।
श्रीकण्ठ उग्रा ज्वलनं गुरो त्रिपुरसुन्दरी।
अविन्दुर्मोलिनी ज्वाला शैशैनी विश्वतो-
मुखी।"
इति नानातन्त्रशास्त्राणि।
(छन्द:शास्त्रोक्तगणविशेष:। यथा, छन्दो-
मञ्जर्य्याम्। १। ८। "र-लमध्य:।" मध्यगतमध्यो
र: भवति। मत्पिट्ट आधुनिकं चिह्नम् ।s।
मन्दादी कल्याणस्य प्रयोगे दाहो भवति।
यदुक्तं वृत्तरत्नाकरटीकायाम्।
"यो मङ्गलं स्तनु दाहं नगनमय मतो म: सुखं
मस्तु नैरम्।"
धातुबन्धविशेष:। यथा, कविकल्पद्रुमे।
"——————पो नगादि र वैदिक:।"
"वैदिको वेदेष्वेव प्रयुक्तो न तु भाषाया-
मित्यर्थ:। यथा, शालिं स्तुतो जगाति।")
र:, पुं, (राति तर्द्धं गतभ्रोति। रा+ड:।)
पावक:। तीक्ष्ण:। इति मेदिनी। रे, १।
कामसंविद्:। इति मन्दरमाला।
रंह:, [स्] क्ली, (रमते येन इति। रम+
"रमेय।" उणा॰ ४। २१४। इति असुन्।
हुगागमश्च धातो:। "अधिरहिभ्यामसुन्
इति अन्दो रह:। इति धातुप्रदीप:।" इत्यु-
ज्ज्वलदत्त:।) वेग:। इत्यमर:। १। १। ६०।
(यथा, रघुवंशे। २। ३४।
"अलं महीपाल! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्तिरंह:
शिलोच्चये मूर्च्छति मारुतस्य।"
महादेव:। यथा, महाभारते। १३। ८। १५।
"हरिनेत्राय मुण्डाय कृशायोत्तरणाय च।
भास्कराय सुतीर्थाय देवदेवाय रंहसे।"
विष्णु:। यथा, महाभारते हरिवंशपर्व्वणि
२५२। १८।
"नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे।
प्रयाता: प्रागुदिशं पुण्यां विपुलं कश्यमाश्र-
मम्।")
रक, क स्वादे। आपने। इति कविकल्पद्रुम:।
स्वादो रसोपादनम्। क, राकयति मोदकं
बालक:। इति दुर्गादास:।
रक्तं, क्ली, (रज्यते अङ्गमनेनेति। रञ्ज+क्त:।)
कुङ्कुमम्। ताम्रम्। (अस्य प्रमं[illegible] ,—
"रक्तं परिष्ठं [illegible] तार्क्ष्यं [illegible] ।"
इति [illegible])
प्राचीनामलकम्। [illegible] ते, ४८।
पद्मकम्। ([illegible]

"रक्तं कोकनदं पद्ममव्यमव्यन्दलोहितम् ॥"
इति रत्नमाला ।)

सिन्दूरम् । हिङ्गुलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति रत्नमाला ।)

(रक्तचन्दनभेदः । तत्पर्य्यायो यथा,—
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम् ॥"
इति रत्नमाला ।)

शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः । तत्पर्य्यायः । रुधिरम् २ असृक् ३ लोहितम् ४ अस्रम् ५ क्षतजम् ६ शोणितम् ७ । इत्यमरः । २ । ६ । ६४ ॥ पलङ्कारम् ८ रोहितम् ९ रङ्गकम् १० । इति शब्दरत्नावली ॥ कीलालम् ११ अङ्गजम् १२ रौधिरम् १३ स्वजम् १४ । इति जटाधरः ॥ त्वग्जम् १५ शोणम् १६ लोहम् १७ चर्म्मजम् १८ । इति राजनिर्घण्टः ॥ * ॥ अथ रक्तस्य स्वरूपमाह ।

"यदा रसो यकृद्याति तत्र रञ्जकपित्ततः ।
रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः ॥
रक्तं सर्व्वशरीरस्थं जीवस्याधार उत्तमः ।
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥
जीवस्याधार उत्तम इति । यत आह ।
जीवो वसति सर्व्वस्मिन् देहे तत्र विशेषतः ।
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणा-
दिति ॥

वीर्य्ये रक्ते मले च शरीरारम्भके । वाग्भटोक्तपरिमाणमिते शुद्धे जीवो वसति न तु दुष्टे प्रवृद्धे रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात् । पित्तवद्भवेत् । अम्लं भवेदित्यर्थः ॥ * ॥ अथ रक्तस्य स्थानमाह ।

यकृत् प्लीहा च रक्तस्य मुख्यं स्थानं तयोः
स्थितम् ।
अन्यत्रापि स्थितवतां रक्तानां पोषकं भवेत् ॥"
इति भावप्रकाशः ॥

रक्तदोषनाशकौषधं यथा,—
"ब्रह्मयष्टिफलं पिष्टं वारिणा तत्तु लेपतः ।
तेन दृष्टं रक्तदोषः प्रशमयति न संशयः ॥"
इति गारुडे १९२ अध्यायः ॥

("स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति ॥ भवतश्चात्र ।
रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् ।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते ।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"
"रसाद्रक्तं ततो मांसम् ॥"
"तत्र फेनिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि च वातेन दुष्टम् । नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाणामस्कन्दि च पित्तदुष्टम् । गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च । सर्व्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टम् । पित्तवद्रक्तेनातिकृष्णञ्च । द्विदोषलिङ्गं संसृष्टम् ।"
"इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात् ॥"
"त्वग्दोषा ग्रन्थयः शोथा रोगाः शोणितजाश्च ये ।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥"
"देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥
इति सुश्रुते सूत्रस्थाने चतुर्द्दशोऽध्याये ॥ * ॥
"शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ।
सम्यक्साध्या न सिद्ध्यन्ति रक्तजांस्तान् विभावयेत् ॥"
अरुणाभं भवेद्वातात् फेनिलं विशदं तनु ।
पित्तात् पीतासितं रक्तं स्त्यायत्यौष्ण्याच्चिरेण च ।
ईषत् पाण्डु कफाद्दुष्टं पिच्छिलं तन्तुमद्घनम् ।
द्विदोषलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥"

"तपनीयेन्द्रगोपाभं पद्मालक्तकसन्निभम् ।" — [illegible]

"नात्युष्णशीतं लघुदीपनीयं
रक्तेऽपनीते हितमन्नपानम् ।
तदा शरीरं ह्यनवस्थितासृ-
गग्निर्विशेषेण च रक्षितव्यः ॥
प्रसन्नवर्णेन्द्रियमिन्द्रियार्था-
निच्छन्तमव्याहतपक्तिवेगम् ।
सुखान्वितं पुष्टिबलोपपन्नं
विशुद्धरक्तं पुरुषं वदन्ति ॥"
इति चरके सूत्रस्थाने २४ अध्यायः ॥)

रक्तः, पुं, लोहितवर्णः । इत्यमरः । १ । ५ । १५ ॥ कुसुम्भः । हिज्जलः । इति राजनिर्घण्टः ॥ (बन्धूकः । तत्पर्य्यायो यथा,—
"बन्धूको बन्धुजीवश्च रक्तो माध्याह्निकोऽपि
च ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

रक्तः, त्रि, अनुरक्तः । नील्यादिरञ्जितः । लोहितः । इति मेदिनी । ते, ४८ । क्रीडारतः । इति धरणिः ॥ * ॥ रक्तवर्णवस्तूनि यथा,—
"शोणानि भौमनीलस्त्रीशुनाम्रकुङ्कुमतक्षकाः ।
गुञ्जेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः ॥
हयग्राधरजिह्वास्यह्वाससिन्दूरधातवः ।
हिङ्गुल कुक्कुटशिखा तेजः सारसमस्तकम् ॥
माणिक्यं हंसचञ्च्वौ शुकमर्कटयोर्मुखम् ।
चकोरकोकिलपारावतनेत्रमसृगाशयः ॥
कुसुम्भकिंशुकाशोकजपाबन्धूकपाटलाः ।
कमलं दाडिमीपुष्पं बिम्बकिम्पाकपल्लवौ ॥
ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम् ।
सेना मत्तचकोरचरणं इत्यादयः ॥" * ॥
रक्तनीलवाचकानि यथा,—
"लोहितनीलौ पुष्करहरिविद्रुमकमलकल्याणरत्नानि ।
सिन्दूरभूषणोत्पलधनञ्जयाम्भोजिनीदलानि ॥"
यथा । पुष्करं पद्माकाशयोः । हरिः सूर्य्यकपयोः । विद्रुमः प्रवालं [illegible] कमलं पद्मपानीयामृतयोः । कल्याणं [illegible] मित्रनीलयोः । सिन्दूरभूषणं [illegible] गजयोः । उत्पलकुमुदमञ्जिष्ठाः [illegible] रयोः विषाचियोः । धनञ्जयोऽग्नि [illegible] टकिनोः ।
"कमलानिचयच्छविः सान्ध्य [illegible]
रत्नाकरानीकः सदाभिलषत्सिन्धु [illegible]
कमलानिकरच्छविः सूर्य्यक्षौ ।
तस्यो मालाभर्तौ च । काकः
[illegible] तस्यान्यच । रूपभृत् [illegible]
"सदा सिन्दूरच्छविता [illegible]
स्फुटशोभमानाभिरिन्द्रचापादिभिः [illegible]
[illegible] सुगन्धमधुरः सिन्दूरमञ्जरी [illegible]
प्रवालपत्रच्छायः कनकाभ्युदितश्च [illegible]
रक्तपीतवाचकानि यथा,—
"रक्तपीतौ हरिद्रा [illegible]

[illegible] नवहेमसुधाकरोदरा:
हरिचन्दनयोः । शुचिः [illegible]
पुष्करं जलपद्मयोः । प्रतपनं हंसदर्पं
कामः स्फटिके सूर्य्यकान्ते च । चक्र-
वाकयोः । नवहंसः नवहंस प्रथमपक्षे [illegible]
पद्मः चित्रनागे पद्मे च । अर्कः [illegible]
कमलं जलाम्बुजयोः । कोकनदं [illegible]
"सुकुन्दरादिभिर्माभो रत्नैरपि रत्नैः
अर्केन्दौ कमलशोभाभिः [illegible]
भानोः परस्मात् सुवर्णादिभिः ॥ [illegible]
सितरक्तौ यथा । रविमित्रं चन्द्रः [illegible]
भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च
रत्नं सूर्य्यकान्तोऽपि पद्मरागो च । [illegible]
दन्तवक्त्रं अधरश्च । अलकशोभा वक्त्र-
शोभा चेति पक्षे पद्मकान्तिः । हास-
शोभा सरोजवक्त्रशोभा पक्षे सरोजः
कुसुदादिशोभा कुसुदवक्त्रशोभा [illegible]
दाडिमादिभ्यः । इति
शेषखण्डे उद्दिष्टवर्णनं नाम १० [illegible]

रक्तकः, पुं, (रक्तं रक्तवर्णं कायति कै + कः ।) बन्धूकवृक्षः । रक्तवर्ण-वस्त्रम् । अनुरागी । इति मेदिनी । [illegible] विनोदी । इति शब्दरत्नावली । [illegible] रक्तैरण्डः । इति राजनिर्घण्टः । [illegible] शिरीषः । यथा, अथर्व्ववेदे । ४ । १०० [illegible]
"पीतको हरितः प्रोक्तः [illegible]
पक्वतालनिभो मालो कषायः परि[illegible]
रक्त एव स्वार्थे कन् । लोहितवर्णः ।
यथा, बृहत्संहितायाम् । ८ । ४६ ।
"अलसस्तु जनः प्रमादिनि
भ्रमरं रक्तकपुष्पशोभनाय ॥")

रक्तकन्दः, पुं, (रक्तः रक्तवर्णः कन्दोऽस्य ।) [illegible] इति हेमचन्द्रः । ४ । १३२ । [illegible] रक्तालुः । इति राजनिर्घण्टः ॥

न्दल:, पुं. (रक्तं रक्तवर्णं कन्दलं नवाङ्कुरो
ऽस्य।) प्रवालम्। इति त्रिकाण्डशेष: ॥
गुणादयोऽस्य प्रवालशब्दे विज्ञेया: ॥)
…, क्ली, (रक्तं रक्तवर्णं कमलम्।) रक्त-
ोत्पलम्। तत्पर्याय:। कोकनदम्२ रक्ताम्भो-
म् ३ अरुणकमलम् ४ शोणपद्मम् ५ रक्तोन्-
लम् ६ अरविन्दम् ७ रविप्रियम् ८ रक्त-
ारिजम् ९। (रक्तकमलम् १०। इति गारुडे
रखण्डे १३ अध्याय: ॥) अस्य गुणा:। कटु-
म्। तिक्तत्वम्। मधुरत्वम्। शिशिरत्वम्।
क्तदोषहरत्वम्। पित्तकफवातशमनत्वम्।
न्तर्पणकारित्वम्। वृष्यत्वञ्च। इति राज-
र्घण्ट: ॥ तत्पर्यायगुणा:।
विशेषत: सितं पद्मं पुण्डरीकमिति स्मृतम्।
क्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥
त्वलं कमलं शीतं मधुरं कफपित्तजित्।
सादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम् ॥"
इति भावप्रकाश: ॥
कम्बलं, क्ली. (कम्बलं जलमात्रपर्णेनास्त्यस्येति।
र्शे आद्यच्। रक्तं रक्तवर्णं कम्बलमुत्पल-
मिति।) रक्तोत्पलम्। यथा,—
"चन्दनागुरुकर्पूरकुङ्कुमैश्च सुगन्धिभि:।
मलै: कुमुदै: पुष्पै: कह्लारै रक्तकम्बलै: ॥
लैश्चैरपूपैश्च शोभनैर्गुडमिश्रितै:।
र्वैर्दृष्टलिराजानं भक्तेन दिवसत्तम: ॥"
इति गारुडोत्तरखण्डे १६ अध्याय: ॥
करवीरक:, पुं, (करवीर+स्वार्थे कन्। ततो
क्त: रक्तवर्ण: करवीरक:।) लोहितवर्णकर-
वीरपुष्पवृक्ष:। लाल् कनेल् इति हिन्दी
भाषा। तत्पर्याय:। रक्तप्रसव: २ गणेश-
कुसुम:३ चण्डीकुसुम:४ क्रूर:५ भूतद्रावी६ रवि-
प्रिय:७। अस्य गुणा:। कटुत्वम्। तीक्ष्णत्वम्।
शोधनत्वम्। व्रणदोषकण्डूनिकुष्ठविषहर-
त्वञ्च। इति राजनिर्घण्ट: ॥ तत्पर्यायगुणा:।
करवीर: श्वेतपुष्प: शतकुम्भोऽश्वमारक:।
द्वितीयो रक्तपुष्पश्च चण्डाली लगुडस्तथा ॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम्।
वीर्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम् ॥"
इति भावप्रकाश: ॥
काञ्चन:, पुं. (रक्त: रक्तवर्ण: काञ्चन:।)
…नामख्यातपुष्पवृक्षविशेष:। तत्पर्याय:।
…दल: २ चमरिक: ३। इति शब्दरत्नावली ॥
…काल: ४ ताम्रपुष्प: ५ कुद्दार: ६। इति
…धर: ॥
…ता, स्त्री, (रक्त: रक्तवर्ण: काण्ड: यस्या:
…।) रक्तपुनर्नवा। इति राजनिर्घण्ट: ॥
…रक्तपुनर्नवाशब्दे विवृतम्।)
…, क्ली, (रक्तं काष्ठं यस्य।) पत्तङ्गम्।
… राजनिर्घण्ट: ॥ लोहितचन्दनञ्च ॥
…, क्ली, (रक्तं रक्तवर्णं कुमुदम्।) रक्त-
…म्। इति जटाधर: ॥

रक्तकुसुम:, पुं. (रक्तानि रक्तवर्णानि कुसुमा-
न्यस्य।) पारिभद्र:। धन्वनवृक्ष:। इति राज-
निर्घण्ट: ॥
रक्तकेशर:, पुं, (रक्ता: केशरा: किञ्जल्का: यस्य।)
पारिभद्र:। इति रत्नमाला ॥
रक्तकैरवं, क्ली, (रक्तं रक्तवर्णं कैरवम्।) रक्त-
कुमुदम्। इति जटाधर: ॥ (यथास्य पर्याय:।
"तदल्पगन्धं सौगन्धं हल्लकं रक्तकैरवम् ॥"
इति वैद्यकरत्नमाला ॥)
रक्तकोकनदं, क्ली, (रक्तं रक्तवर्णं कोकनदम्।)
रक्तोत्पलम्। इति जटाधर: ॥ (विशेषोऽस्य
रक्तोत्पलशब्दे ज्ञातव्य: ॥)
रक्तखदिर:, पुं, (रक्त: रक्तवर्ण: खदिर:।)
रक्तवर्णखदिरवृक्ष:। तत्पर्याय:। रक्तसार: २
सुसार: ३ ताम्रसारक: ४ बहुशल्य: ५ याज्ञिक: ६
कुष्ठनोदन: ७ यूपद्रुम: ८ असखदिर: ९
खर: १०। अस्य गुणा:। कटुत्वम्। उष्णत्वम्।
कषायत्वम्। गुरुत्वम्। तिक्तत्वम्। आमवाता-
स्रवातव्रणभूतज्वरनाशित्वञ्च। इति राज-
निर्घण्ट: ॥ तत्पर्यायगुणाश्च।
"खदिरो रक्तसारश्च गायत्री दन्तधावन:।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञिय: ॥
खदिर: शीतलो दन्त्य: कण्डूकासारुचिप्रणुत्।
तिक्त: कषायो मेदोघ्न: कृमिमेहज्वरव्रणान्।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत् ॥"
इति भावप्रकाश: ॥
रक्तगन्धकं, क्ली, (रक्तं रक्तवर्णं गन्धकम्।)
बोलम्। इति राजनिर्घण्ट: ॥
रक्तगुल्म:, पुं, (रक्तजो गुल्म: इति मध्यपदलोपी
कर्मधारय:।) स्त्रीणां रक्तजगुल्मरोग:। तदौ-
षधं यथा,—
"हिमवर्चोविकटुकं चूर्णं पीतं हरेच्छिव !।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ! ॥"
इति गारुडे १९६ अध्याय: ॥
(तथास्य निदानादिकं यथा,—
"शोणितगुल्मस्तु खलु स्त्रिया एव भवति न
पुरुषस्य गर्भकोष्ठार्त्तवागमनवैशिष्ट्यात्। पार-
तन्त्र्याद्वैशारद्यात् सततमुपचारानुरोधा-
द्वेगानुदीर्णानुपरुन्धत्या आमगर्भे वाप्यचिरात्
पतिते तथाप्यचिरप्रजाताया ऋतौ वा वात-
प्रकोपनान्यासेवमानाया वात: प्रकोपमाप-
द्यते। स प्रकुपितो योन्या मुखमनुप्रविश्यार्त्त-
वमुपरुणद्धि मासि मासि तदार्त्तवमुपरुध्यमानं
कुक्षिं वर्द्धयति। तस्या: शूलकासातीसार-
च्छर्द्यरोचकाविपाकाङ्गमर्दनिद्रालस्यस्तैमित्य-
कफप्रसेका: समुपजायन्ते स्तनयोश्च स्तन्यमोष्ठयो: स्तनमण्ड-
लयोश्च कार्ष्ण्यं ग्लानिश्चक्षुषोर्मूर्च्छा हृल्लासो
दौहृदं श्वयथुश्च पादयोरीषच्चोद्गमो रोमराज्या
योन्याश्चाटालत्वमपि च योन्या दौर्गन्ध्यमास्राव-
श्चोपजायते। केवलश्चास्या गुल्म: स्पन्दते
तामगर्भिणीमित्याहुर्मूढा: ॥" इति चरके
निदानस्थाने तृतीयेऽध्याये। सुश्रुते च।

"न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञा: ॥"
इति सुश्रुते उत्तरतन्त्रे ४२ अध्याय: ॥
तथा च। रक्तगुल्मस्तु स्त्रिया एव प्रजायते।
यथा,—
"ऋतौ वा नवसूता वा यदि वा योनिरोगिणी।
सेवते वातलानिस्त्री क्रुद्धस्तस्या: समीरण: ॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम्।
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च ॥
हृल्लासदौर्हृदस्तन्यदर्शनं क्षामतादिकम्।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान्।
रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान् ॥
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये।
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदना: ॥
न चाङ्गैर्गर्भवद्गुल्म: स्फुरत्यपि तु शूलवान्।
पिण्डीभूत: स एवास्या: कदाचित् स्पन्दते
चिरात् ॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते।
स्वदोषसंश्रयो गुल्म: सर्व्वो भवति तेन स: ॥
पाकं चिरेण भजते नैव वा———— ॥"
इति वाभटे निदानस्थाने एकादशेऽध्याये ॥०॥
तथास्य चिकित्सा।
"सरक्तगुल्मे न च पाचनन्तु
न चिह्नपानं कटिचालनञ्च।
न चैव संस्वेदनमर्द्दनञ्च
न वा क्रमेशीतमवनं हितञ्च ॥
रोधाञ्जनं खदिरमागधिका समङ्गा
क्वाथोऽम्ब्विलमसमं घृतसंप्रयुक्तम्।
गुल्मं सरक्तमपि चाय निहन्ति शीघ्रं
छर्द्द्याश्च विनिहन्ति च कुष्ठरक्तम् ॥
क्षीरमांसं प्रशस्तं घृतसौवर्चलान्वितम्।
रक्तगुल्मविनाशाय यकृत्पित्तघ्नेऽपि वा ॥
न चिह्नसंयुतं पथ्यं न चोष्णं न विदाहि च।
रक्तेऽपि चलति गुल्मे मांसानि जाङ्गलानि च ॥"
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ॥)
अन्यत् गुल्मशब्दे द्रष्टव्यम् ॥ ० ॥
रक्तघ्न:, पुं. (रक्तं हन्तीति। हन्+"अमनुष्य-
कर्तृके च।" ३। २। ५३। इति टक्।)
रोहितकवृक्ष:। इति जटाधर: ॥ (रोहितक-
शब्देऽस्य विवृतिर्ज्ञेया ॥)
रक्तघ्नी, स्त्री, (रक्तं हन्तीति। हन्+टक्। ङीप्।)
दूर्वाविशेष:। गाँडिया दूर्वा इति भाषा ॥ यथा,
"मर्वौषधिश्च गण्डाली रक्तघ्नी रक्तपित्तहा ॥"
इति शब्दचन्द्रिका ॥
रक्तचन्दनं, क्ली, (रक्तं रक्तवर्णं चन्दनम्।) रक्त-
वर्णचन्दनकाष्ठम्। (यथा भागवते। ८।१९।९।
"व्रतानि … … …र्णवाक्यनिशीनाम्।
… … …। दिदृक्षमाणाम् ॥")
… … …

नम् ४ कुचन्दनम् ५। इत्यमरः। २। ६। १३२॥ ताम्रसारम् ६ ताम्रवृक्षः ७ चन्दनम् ८। इति रत्नमाला॥ लोहितम् ९ शोणितचन्दनम् १० रक्तसारम् ११ ताम्रसारकम् १२ क्षुद्रचन्दनम् १३ अर्कचन्दनम् १४। इति राजनिर्घण्टः॥ रक्ताङ्गम् १५ प्रवालफलम् १६। इति भावप्रकाशः॥ पत्त-ङ्गम् १७ पत्तगम् १८ रक्तबीजम् १९। इति शब्दरत्नावली। अस्य गुणाः। अतिशीतलत्वम्। तिक्तत्वम्। ईषद्गतासदोषभूतपित्त-कफकासज्वरभ्रान्तिवमनमपुष्णनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"रक्तं शीतं गुरु स्वादु च्छर्द्दितृष्णास्रपित्तहृत्। तिक्तनेत्रहितं वृष्यं ज्वरव्रणविषापहम्॥"

इति भावप्रकाशः॥

अन्यच्च।

"रक्तपित्तहरं बल्यं चक्षुष्यं रक्तचन्दनम्॥"

इति राजवल्लभः॥

रक्तचित्रकः, पुं, (रक्तो रक्तवर्णश्चित्रकः।) क्षुपविशेषः। राङ्गचिता इति भाषा। तत्पर्यायः। कालः २ व्यालः ३ कालमूलः ४ अतिदीप्यः ५ मार्ज्जारः ६ अग्निः ७ दाहकः ८ पावकः ९ चित्राङ्गः १० महाङ्गः ११। अस्य गुणाः। प्रमेहकायकरत्वम्। रुचत्वम्। कुष्ठघ्नत्वम्। लोहवेधकत्वम्। रसनियामकत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

रक्तचूर्णं, क्ली, (रक्तं रक्तवर्णं चूर्णम्।) सिन्दूरम्। इति हारावली। ४४॥ रक्तवर्णचूर्णमात्रञ्च॥

रक्तजन्तुकः, पुं, (रक्तः रक्तवर्णो जन्तुः। ततः स्वार्थे कन्। अथवा रक्ता आयक्ता जन्तवोऽस्मिन्।) भूनागः। इति राजनिर्घण्टः॥ रक्तवर्णजन्तुमात्रञ्च॥

रक्तजिह्वः, पुं, (रक्ता रक्तवर्णा शोणितपानादौ आसक्ता वा जिह्वा यस्य।) सिंहः। इति शब्दमाला॥ रक्तवर्णजिह्वायुक्ते, त्रि॥

रक्तझिण्टी, स्त्री, (रक्ता रक्तवर्णा झिण्टी।) रक्तवर्णझिण्टीपुष्पवृक्षः। तत्पर्यायः। कुरबकः २। इत्यमरः॥ (विशेषोऽस्याः कुरबकशब्दे ज्ञातव्यः॥)

रक्ततुण्डः, पुं, (रक्तौ तुण्डो यस्य।) शुकपक्षी। इति राजनिर्घण्टः॥ लोहितमुखयुक्ते, त्रि॥

रक्ततुण्डकः, पुं, (रक्ततुण्डो यस्य। कन्। भूनागः।) इति राजनिर्घण्टः॥

रक्ततृणा, स्त्री, (रक्तानि तृणान्यस्याम्।) गोमूत्रिका। इति राजनिर्घण्टः॥

रक्तत्रिवृत्, स्त्री, (रक्ता त्रिवृत्।) रक्तवर्णत्रिवृता। लाल तेउडी। इति भाषा॥ तत्पर्यायः। कालिन्दी २ त्रिपुटा३ ताम्रपुष्पिका४ कुवर्णा ५ मसूरी ६ अचला ७ काकनासिका ८। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। यकृच्छोथ-

विषमज्वरहारित्वम्। कृमिकारित्वञ्च। इति राजनिर्घण्टः॥ (अस्या विशेषो यथा,—

"तयोर्मूलतरं विद्धि मूलं यदरुणप्रभम्। सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तत् शुभम्॥"

इति चरके कल्पस्थाने सप्तमेऽध्याये॥

"अरुणाभं त्रिवृन्मूलं श्रेष्ठं मूलविरेचने॥"

इति सुश्रुते सूत्रस्थाने ४४ अध्यायः॥)

रक्तदन्तिका, स्त्री, (रक्ता दन्ताः अस्याः) रक्तदन्ता+स्वार्थे कन्। टापि अत इत्वम्।) चण्डिका। यथा,—

"भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्। रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्ये। ९१। ४०॥

रक्तदला, स्त्री, (रक्तानि दलान्यस्याः।) नलिका। चिविल्लिका। इति राजनिर्घण्टः॥

रक्तदृक्, [श्] पुं स्त्री, (रक्ता दृक् दृष्टिरस्य।) कपोतः। इति केचित्॥ रक्त वर्णचक्षुर्विशिष्टे, त्रि॥

रक्तधातुः, पु, (रक्तो रक्तवर्णो धातुः।) गैरिकम्। इति त्रिकाण्डशेषः॥ (अस्य पर्यायो यथा,—

"गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा। सुवर्णगैरिकन्त्वन्यत्ततो रक्ततरं हि तत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।) ताम्रम्। इति राजनिर्घण्टः॥ रक्तवर्णधातुमात्रञ्च॥

रक्तनालः, पुं, (रक्तो नालोऽस्य।) जीवशाकः इति राजनिर्घण्टः॥ (विवरणमस्य जीवशाकशब्दे विज्ञेयम्॥)

रक्तनासिकः, पुं, (रक्ता नासिकास्य।) पेचकः। इति शब्दरत्नावली॥ लोहितनासायुक्ते, त्रि॥

रक्तपः, पु, (रक्तं पिबतीति। पा+कः।) राक्षसः। इति मेदिनी। पे, २१॥ रक्तपानकर्त्तरि, त्रि॥

रक्तपक्षः, पु, (रक्तौ पक्षौ यस्य।) गरुडः। इति केचित्॥

रक्तपत्रिका, स्त्री, (रक्तानि पत्राण्यस्याः। स्वार्थे कन्। टापि अत इत्वञ्च।) नाकुली। रक्तपुनर्नवा। इति राजनिर्घण्टः॥ लोहितपत्रञ्च।

रक्तपदी, स्त्री, क्षुद्रक्षुपविशेषः। यथा,—

"शमीपत्रा रक्तपदी समङ्गाञ्जलिकारिका॥"

इति जटाधरः॥

रक्तपद्मः, पुं क्ली, (रक्तो रक्तवर्णो पद्मः।) रक्तवर्णकमलम्। तत्पर्यायः। रक्तसरोरुहम् २ रक्तोत्पलम् ३ कोकनदम् ४। इत्यमरः। १। १०। ४२॥ अस्य प्रमाणं यथा,—

"सैषा ललितकान्ताख्या देवी मङ्गलचण्डिका। वरदाभयहस्ता च द्विभुजा गौरदेहिका॥ रक्तपद्मासनस्था च जटामुकुटमण्डिता॥

रक्तकौशेयवस्त्रा च स्मितवक्त्रा शुभानना। नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा॥"

इति। ...

रक्तपल्लवः, पुं, (रक्ताः पल्लवा यस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ लोहितपल्लव...

रक्तपा, स्त्री, (रक्तं पिबतीति। पा+कः। स्त्रियां टाप्।) जलौका। इति मेदिनी। पे, २१॥ शोणितपानकर्त्री...

रक्तपाकी, स्त्री, (पच्यते इति। पा-कः। रक्तः रक्तवर्णः पाके यस्याः।) ... राजनिर्घण्टः॥

रक्तपाता, स्त्री, (रक्तं पातयतीति। पत-+णिच्+अच्। स्त्रियां टाप्।) जलौका। शब्दरत्नावली॥

रक्तपादः, पुं, (रक्तौ पादावस्य।) ... इति हेमचन्द्रः॥ (यथा, रामायणे।

"रक्तोगमस्योपरि ...

कपोता रक्तपादाश्च ...

तथा च याज्ञवल्क्यः। १। १७१।

"चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च। मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्॥"

लोहितचरणयुक्ते, त्रि॥

रक्तपादी, स्त्री, (रक्ताः पादा ...) लज्जालुः। (अस्याः पर्यायो यथा,—

"लज्जालुः स्यात् शमीपत्रा समङ्गा ...

रक्तपादी नमस्कारी नाम्ना खदिरिका ...

इति भावप्रकाशस्य ...)

हंसपदी। इति राजनिर्घण्टः॥

रक्तपायिनी, स्त्री, (रक्तं पातुं ... पा+णिनि। स्त्रियां ङीप्।) जलौका। राजनिर्घण्टः॥

रक्तपायी, [न्] त्रि, (रक्तं पातुं ... पा+णिनिः।) रक्तपानशीलः। ...

रक्तपारदं, क्ली, (रक्तं रक्तवर्णं पारदम्) ... तम्। इति हारावली। १५५॥ ...

रक्तपिण्डं, क्ली, (रक्तं रक्तवर्णं ... जवापुष्पम्। इति शब्दरत्नावली।

रक्तपिण्डकः, पुं, (रक्तपिण्डमिवेति। ... इवार्थे कन्।) रक्तालुः। इति राज...

रक्तपित्तं,क्ली,(रक्तदूषकं पित्तमिति। मध्य... कर्म्मधारयः। "रक्तञ्च पित्तञ्च ... मिति द्वन्द्व इति सुश्रुतः। रक्तञ्च तत् ... रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधार... भरतः।") रोगविशेषः। तस्य विवर...

धन्वन्तरिरुवाच।

"अथातो रक्तपित्तस्य निदानं प्रव... भयशोकातिमाक्षकट्वम्ललवणादिविदाहि... कोद्रवोद्दालकैश्चान्यैस्तद्युक्तैरतिसेवितैः। कुपितं पित्तलैः पित्तं द्रव रक्तञ्च ...

...मधुरं ... म्लकाञ्जिकम् ।
...ज्वरः पित्तात् संसर्गात्तृष्णादिभिः ॥
...त्रिवृत्तूर्णं वर्म च समादिशन्ती ।
...मात्र ग्रीष्मौ यस्तत्र तत्र ॥
...नरासर्पिः शौणिता मधुरौरिव ।
...प्रदिग्धं कारः स्थानौ भ्रमः श्रमः ॥
...लोहितो मत्स्यगन्धास्यश्च विस्वरः ।
...रक्तपित्तभेदेषु ॥
...दृष्टिर्नितालौ वर्णभासविवर्जनम् ।
...ऽस्मिन् भवति भविष्यति ॥
... नासाक्षिकर्णमेढ्रयोनिगुदेभ्यः ।
...रोमकूपेभ्यः समस्तेभ्यः प्रवर्तते ॥
... साध्यं कफाद्द्व्यसात् मर्दिवेगसाध्यम् ।
...स्य पित्तस्य विरेको हि परौषधम् ॥
...वर्णो कफो यस्य तत्र तस्यापि शुद्धिमत् ।
...धाः स्यादधो यस्य विरुद्धे स्वैरसौरिताः ॥
...विसृष्टधारा वा ये निरामान् कफादयः ।
...धो यास्यश्च मार्गात् तत् प्रवर्तनसाधनम् ॥
...औषधश्च पित्तस्य वमनं तद् चौषधम् ।
...रपि च रोगस्य प्रात्मभित्तरस्य तत् ॥
...यथा च विनाशस्य मधुरा यत्र वैषम्यम् ।
...प्रादानसंसृष्टसमाख्यमुपनायनम् ॥
...प्रतिलोमत्वादगाध्यादौषधाय च ।
...हि संशोधनं किञ्चिदस्य च प्रतिलोमगम् ॥
...धनं प्रतिलोमश्च रक्तपित्ते विनिश्चितम् ।
...शमेवोपशमनं सर्वशोधनमिष्यते ॥
...दृष्टमाह दोषेषु सर्वेषां यद्धन्तं विषम् ।
...न दोषोऽस्य गमनं शिवाख्य इव लक्ष्यते ।
...पद्धास्य विकृतं फलमप्येतु चाधिकम् ॥”

इति गारुडे १५६ अध्यायः ॥ * ॥

...औषधं यथा,—

...त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु ।
...मोदकः सन्निपातान्तो रक्तपित्तज्वरापहः ॥
...शायां विद्यमानायामाशायां जीवितस्य च ।
...रक्तपित्ती चयी कार्यो किमर्थमवसीदति ॥
...शस्त्रपकल्कद्रौकापथ्याकाथः सशर्करः ।
...दाढ्यः कासमन्वासरक्तपित्तनिवर्हणः ॥”

इति गारुडे १७१ अध्यायः ॥ * ॥

अपि च । “तत्र रक्तपित्तस्य निदानपूर्व्विकां संप्राप्तिमाह ।

‘घर्म्मव्यायामशोकाध्वव्यवायैरतिसेवितैः ।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ।
पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् ॥’
तीक्ष्णं मरिचादि । उष्णोऽग्नितापादिः । क्षारो यवक्षारादिः । विदग्धं दूषितम् । स्वगुणैः स्वकारणैर्गुणैस्तीक्ष्णादिभिः । गुणैरिति बहुत्वेन तीक्ष्णाम्लपक्वकट्वादिघर्म्मादयो गृह्यन्ते । विदहति दूषयति ॥ * ॥ रक्तपित्तस्य सामान्यलक्षणमाह ।

‘ततः प्रवर्त्तते रक्तमूर्द्ध्वं चाधो द्विधापि वा ।’
रक्तमित्युपलक्षणम् । तत्संसर्गि पित्तञ्च । अत एव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः ॥ रक्तेन सह पित्तमिति रक्तपित्तं राजदन्तं पित्तमिति कर्म्मधारय इति चरकः ॥ मार्गानाह ।

‘ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः ।
कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते ॥’
कुपितमतिकुपितम् ॥ * ॥ पूर्ब्बरूपमाह ।

‘सदनं शीतकामित्वं कण्ठधूमायनं वमिः ।
लोहगन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति ॥’
विशिष्टं रूपमाह ।

‘सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितम् ।
श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम् ॥
रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् ।
मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम् ।
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥’
सपाण्डु ईषत्पाण्डु । पिच्छिलं मयूरपिच्छवद्विशुक्लम् । कृष्णं कज्जलाभम् । मेचकं स्निग्धकृष्णवर्णम् । अञ्जनं स्रोतोऽञ्जनं तदाभम् ॥ * ॥ संसर्गविशेषेण मार्गभेदमाह ।

‘ऊर्द्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् ।
द्विमार्गं कफवाताभ्यामुभाभ्यां सम्प्रवर्त्तते ॥’ * ॥
उपद्रवानाह ।

‘दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता दाहमूर्च्छा
भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीड़ा ।
तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनञ्च
द्वेषो भुक्तेरविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥’
उपसर्गा उपद्रवाः । विकृतिर्मांसप्रक्षालनाभत्वादिः ॥ * ॥ साध्यत्वादिकमाह ।

‘एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् ॥
ऊर्द्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् ।
व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ॥’
साध्यमाह ।

‘एकमार्गं बलवतो नातिवेगं न चोत्थितम् ।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ॥’
सुखे काले हिमशिशिरयोः ॥ * ॥ असाध्यमाह ।

‘मांसप्रक्षालनाभं क्वथितमिव च यत् कर्द्दमाम्भोनिभं वा
मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् ।
यत् कृष्णं यच्च नीलं भृशमपि कुणपं यत्र चोक्ता विकारा-
स्तद्वर्ज्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥’
उक्ता विकारा दौर्ब्बल्यादयः । सुरपतिधनुषा तुल्यं नानावर्णम् ।

‘येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ॥’
येन रक्तपित्तेन उपहतो मनुष्यः दृश्यं घटपटादिकं वियच्च रक्तं पश्यति स न भवति वियच्चापि तद्वदसाध्यमसंशयम् ॥ * ॥ अरिष्टमाह ।

‘लोहितं छर्द्दयेद्यस्तु बहुशो लोहितेक्षणः ।
लोहितोद्गारदर्शी च म्रियते रक्तपित्तकः ॥’
लोहितोद्गारदर्शी चाधिमहिम्नोद्गारमपि लोहितं पश्यति इत्यर्थः ॥ * ॥ अथ रक्तपित्तस्य चिकित्सा ।

‘पित्तास्रं स्तम्भयेन्नादौ प्रवृत्तं बलिनोऽश्नतः ।
हृत्पाण्डुग्रहणीरोगप्लीहगुल्मज्वरादिकृत् ॥
शालिषष्टिकनीवारकोरदूषप्रशान्तिकाः ।
श्यामाकाश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥’
प्रियङ्गुः कङ्गुः ।

‘मसूरमुद्गचणकाः समकुष्ठाढ़कीफलाः ।
प्रशस्ताः सूपयूषार्थे कल्पिता रक्तपित्तिनाम् ।
दाड़िमामलकं विद्वानम्लार्थे चापि दापयेत् ।
पटोलनिम्बवेत्राग्रप्लक्षवेतसपल्लवाः ॥
शाकार्थे शाकमाख्यातो मण्डूकीयादयो हिताः ।
पारावतान् कपोतांश्च लावान् रक्ताक्षवर्त्तकान् ॥
शशान् कपिञ्जलानैण्यान् हरिणान् कालपुच्छकान् ।
रक्तपित्तहरान् विद्यान्मांसार्थेषु प्रयोजयेत् ॥
ईषदम्लाननम्लांश्च घृतभृष्टान् समैन्धवान् ।
कषाद्युग्मे पृथक्शाके दद्याच्छागपयो रसम् ॥
पथ्यं सलिलयुक्तेन ससितासाजशक्तुभिः ।
धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ।
रक्तपित्तं ज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ॥’
धान्याकादेर्हिमः ॥ * ॥

‘ह्रीवेरमुत्पलं धान्यं चन्दनं यष्टिकाह्वया ।
उशीरञ्च दशघ्नैषां क्वाथं समधुशर्करम् ॥
पाययेत्तेन सद्यो हि रक्तपित्तं प्रशाम्यति ।
रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा ॥ * ॥
पुराणं पीतमानीय कुष्माण्डस्य फलं दृढ़म् ।
तद्धीजाधारबीजत्वक्शिरामुक्तं समाचरेत् ॥
ततस्तस्य तुलां नीत्वा पचेज्जलतुलाद्वये ।
सशिराग्रेऽर्द्धशिष्टे तु वस्त्रतः शीतलीकृते ॥
तानि कुष्माण्डखण्डानि पीड़येद्दृढ़वाससा ।
यत्नतस्तज्जलं नीत्वा पुनःपाकाय धारयेत् ॥
कुष्माण्डं शोषयेद्धर्म्मे ताम्रपात्रे ततः क्षिपेत् ।
क्षिप्वा तत्र घृतप्रस्थं कुष्माण्डं तेन भर्ज्जयेत् ॥
मधुवर्णं तदालोक्य तज्जलं तत्र निःक्षिपेत् ।
सितायाश्च तुलां तत्र क्षिप्वा तल्लेहवत् पचेत् ॥
सुपक्वे पिप्पलीशुण्ठीजीरकाणां द्वे पले पृथक् ।
पृथक् पलार्द्धं धन्याकपत्रैलामरिचं त्वचम् ॥
चूर्णमेषां क्षिपेत्तत्र घृतार्द्धं चौद्रमावपेत् ।
एतत् पलमितं खादेद्यथावह्निबलं यथा ॥
खण्डकुष्माण्डलेहोऽयं रक्तपित्तं विनाशयेत् ।
पित्तज्वरं तृषां दाहं प्रदरं क्षयतां व[illegible]
स्वरभेदं सहृद्रोगं कासं श्वासं [illegible]
नाशयत्येव ह्येषोऽयं ह्येषो[illegible]

इति [illegible] ॥ * ॥

‘शतावरीगलकल्कं [illegible]
क्षीरतुल्यं घृतं पचेत् [illegible]

घृतमिदं पचेत्तत्तु पलार्द्धं लेहयेत् सदा।
रक्तपित्तं अम्लपित्तं क्षयं श्वासञ्च नाशयेत्॥'
शतावरीपाकः। इति रक्तपित्ताधिकारः॥"
इति भावप्रकाशः॥

(तत्रास्य सनिदानपूर्व्वरूपलक्षणं सम्प्राप्तिश्च। "पित्तं यथा भूतं लोहितपित्तसंज्ञां लभते तद्यथानुव्याख्यास्यामः। यदा जन्तुर्यववकोद्दालककोरदूषकप्रायाण्यन्नानि नित्यं भुङ्क्ते भृशोष्णतीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थक्षारसूपोपहितं दधिमण्डोदश्वित्कट्वराम्लकाञ्जिकोपहितं वाराहमाहिषाविकमत्स्यगव्यपिशितं पिण्याकं पिण्डालकशाकोपहितं मूलक-सर्षपलशुनकरञ्जशिग्रुकखरयूषभूस्तृणक-सुमुखसुरसकुठेरकगण्डीरकालक-पर्णासक्षवकफणिज्झकोपदंशं सुरासौवीरतुषोदकमैरेयमेदकमधूलककुवलबदराम्लप्रायानुपानं पिष्टान्नोत्तरभूयिष्ठमुष्णाभितप्तो चातिमात्रमतिवेलं वा पयसा समश्नाति रौहिणीकशाकं कपोतं वा सर्षपतैलक्षारसिद्धं कुलत्थमाषपिण्याकजाम्बवलकुचपक्वैः शौक्तिकैर्वा सह क्षीरमाममतिमात्रमथवा पिबत्युष्णाभितप्तस्तस्यैवमाचरतः पित्तं प्रकोपमापद्यते। लोहितञ्च स्वप्रमाणमतिवर्त्तते। तस्मिन् प्रमाणातिवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदैव यकृत्प्लीहप्रभवाणां लोहितवहानां स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य प्रतिपद्यते तदेव लोहितं दूषयति। संसर्गाल्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितमित्याचक्षते। तस्येमानि पूर्व्वरूपाणि। तद्यथा। अनन्नाभिलाषो भुक्तस्य विदाहः शुक्ताम्लगन्धश्च उद्गारश्छर्द्देरभीक्ष्णमागमनं छर्दितस्य बीभत्सता स्वरभेदो गात्राणां सदनं परिदाहश्च मुखाद्धूमागम इव लोहलोहितमत्स्यामगन्धित्वमपि चास्यस्य रक्तहरितहारिद्रत्वमङ्गावयवशकृन्मूत्र-स्वेदलालासिङ्घाणकास्यकर्णमलपिड़कोलिकापिड़कारामसंवेदना लोहितनीलपीतश्यावानामर्च्चिष्मताञ्च रूपाणां स्वप्ने दर्शनमभीक्ष्णमिति लोहितपित्तपूर्व्वरूपाणि। उपद्रवास्तु खलु दौर्ब्बल्यारोचकाविपाकश्वासकासज्वरातीसारशोफशोषपाण्डुरोगस्वरभेदाः। मार्गौ पुनरस्य द्वौ ऊर्द्ध्वञ्चाधश्च तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्द्ध्वं प्रपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते। बहुवाते तु शरीरे वातसंसर्गादधः प्रपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते। बहुवातश्लेष्मणि तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रपद्यते। तौ मार्गौ प्रपद्यमानं सर्व्वेभ्य एव स्रोतोभ्यः शिरोभ्यः प्रच्यवते शरीरस्य। तत्र ऊर्द्ध्वभागं साध्यं विरेचनोपक्रमणीयत्वात् बह्वौषधत्वाच्च। अधोभागं याप्यं वमनोपक्रमणीयत्वादल्पौषधत्वाच्च। उभयभागं त्वसाध्यं वमनविरेचना [illegible]। रक्तपित्तरोगस्य तु

पुरा दक्षयज्ञोद्ध्वंसे रुद्रकोपामर्षाग्निना प्राणिनां परिगतशरीरप्राणानामनुज्वरमभवत्। तस्याशुकारिणो दावाग्नेरिवापतितस्यात्ययिकस्याशु प्रशान्त्यै यतितव्यं मात्रां देशं कालञ्चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुरशिशिरतिक्तकषायैरभ्यवहार्य्यैः प्रदेहपरिषेकावगाहसंस्पर्शनैर्वमनाद्यैर्वा तत्रावहितेनेति।"

संक्षेपतोऽस्योपशमनोपायो यथा,—

"साध्यं लोहितपित्तं तद्यदूर्द्ध्वं प्रतिपद्यते।
विरेचनस्य योगित्वाद्बहुत्वाद्भेषजस्य च॥
वमनं नहि पित्तस्य हरणे श्रेष्ठमुच्यते।
यश्च तत्रान्वगो वायुस्तच्छान्तौ चावरं मतम्॥
स्याच्च योगावहन्तत्र कषायं तिक्तकानि च।
तस्मादयाप्यं समाख्यातं यदुक्तमनुलोमगम्॥
रक्तपित्तन्तु यन्मार्गौ द्वावपि प्रतिपद्यते।
असाध्यमपि तज्ज्ञेयं पूर्व्वोक्तादपि कारणात्॥
नहि संशोधनं किञ्चिदस्त्यस्य प्रतिमार्गगम्।
प्रतिमार्गञ्च हरणं रक्तपित्ते विधीयते॥
एवमेवोपशमनं सर्व्वशो नास्य विद्यते।
संसृष्टेषु च दोषेषु सर्व्वजिच्छमनं मतम्॥
इत्युक्तं त्रिविधोदर्कं रक्तं मार्गविशेषतः॥
एभ्यस्तु खलु हेतुभ्यः किञ्चित् साध्यं न सिध्यति।
प्रेष्योपकरणाभावात् दौरात्म्याद्वैद्यदोषतः॥
अकर्म्मतश्च साध्यत्वं कश्चिद्रोगोऽतिवर्त्तते।
तत्र साध्यत्वमेकं स्यात् साध्ययाप्यपरिक्रमात्॥
रक्तपित्तस्य विज्ञानमिदं तस्योपदेक्ष्यते।
यत् कृष्णमथवा नीलं यद्वा शक्रधनुष्प्रभम्॥
रक्तपित्तमसाध्यन्तद्वाससो रञ्जनञ्च यत्।
भृशं पूतिमात्रञ्च सर्व्वोपद्रववच्च यत्॥
बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत्॥
येन चोपहतो रक्तं रक्तपित्तेन मानवः।
पश्येद्दृश्यं वियच्चैव तच्चासाध्यमसंशयम्॥
तत्रासाध्यं परित्यज्यं याप्यं यत्नेन यापयेत्।
साध्यञ्चावहितः सिद्धैर्भेषजैः साधयेद्भिषक्॥
कारणं नाम निर्वृत्तिं पूर्व्वरूपाण्युपद्रवान्।
मार्गौ दोषानुबन्धञ्च साध्यत्वं न च हेतुमत्॥
निदाने रक्तपित्तस्य व्याजहार पुनर्व्वसुः।
वीतमोहरजोदोषलोभमानमदस्पृहः॥"

इति चरके निदानस्थाने द्वितीयेऽध्याये॥ *॥

अथास्य चिकित्सायां रसाः।

"सूतं गन्धं माक्षिकञ्चैव लौहं
सर्व्वं पिष्ट्वा भेकपर्णीरसेन।
लौहे पात्रे गोमयैः पाचयित्वा
रात्रौ दद्यात् रक्तपित्तप्रशान्त्यै॥"

इति सुधानिधीरसः॥

रसाभ्रशुल्वलौहञ्च माक्षिकं रसतालकम्।
गन्धकञ्च समं कुर्य्यात् यष्टिद्राक्षाम्लतादवैः॥
दिनैकं मर्द्दयेत् खल्वे सिताक्षौद्रयुतां वटीम्।
माषमात्रां निहन्त्याशु रक्तपित्तं सुदारुणम्।
ज्वरं दाहं तृषां वान्तिं शोथं पित्तान्तको रसः॥

इति रक्तपित्तान्तको रसः॥

शर्कराग्निसमंयुक्तं त्रिकत्रययुतन्त्वथ।
रक्तपित्तं निहन्त्याशु अम्लपित्तहरं पर(म्)
इति शर्करान्तं लौ(ह)

इति वैद्यकरसेन्द्रसारसंग्रहे रक्त...

अथास्य पथ्यापथ्यविधिः।

"अधोगते छर्द्दनमूर्द्ध्वगामे
विरेचनं स्यादुभयत्र लङ्घनम्।
पुरातनाः षष्टिकशालिकोद्रव-
प्रियङ्गुनीवारयवप्रशातिकाः॥
मुद्गा मसूराश्चणकास्तु वर्त्तु-
लकुष्ठकाश्चिङ्गटवर्म्मिमत्स्याः।
शशः कपोतो हरिणैणलाव-
शरालिपारावतवर्त्तकाश्च॥
रक्ता उरभ्राश्च सकालपुच्छाः
कपिञ्जलाश्चापि कषायवर्गः।
गवामजायाश्च पयो घृतञ्च
घृतं माहिष्याः पनसं पियालम्।
रम्भाफलं कर्कटतण्डुलीय-
पटोलवेत्राग्रमहार्द्रकाणि।
पुरातकुष्माण्डफलञ्च मोच-
फलानि सद्योजजलानि वाता।
स्वादूनि बिम्बानि च दाड़िमानि
खर्ज्जूरधात्रीमिषिनारिकेलम्।
कशेरुशृङ्गाटकसम्बराणि
कपित्थशालूकपरूषकाणि।
भूनिम्बशाकं पिचुमर्द्दपत्रं
तुम्बीकलिङ्गानि च लावणम्।
द्राक्षा सिता माक्षिकमेव चाज्य-
शीतोदकञ्चोद्भिदवारि वारि।
सेकोऽवगाहः शतधौतसर्पि-
रभ्यङ्गयोगः शिशिरप्रदेहः।
हिमानिलश्चन्दनमिन्दुपादाः
कथा विचित्राश्च मनोऽनुकूलाः।
धारागृहं भूमिगृहं सुशीतं
वैदूर्य्यमुक्तामणिधारणञ्च।
रम्भोत्पलाम्भोरुहपत्रशय्या
क्षौमाम्बरञ्चोपवनं सुशीतम्।
प्रियङ्गुकाचन्दनरूषिताना-
मालिङ्गनञ्चापि वराङ्गनानाम्।
पद्माकराणां सरितां ह्रदानां
चन्द्रोदयानां हिमवद्दरीणाम्।
सुशीतलानां गिरिनिर्भराणां
स्मृतिः प्रशस्तानि च कीर्त्तितानि।
प्रशीरनीरं हिमवालुका च
मित्रं नृणां शोणितपित्तरोगे॥"

अथापथ्यानि।

"व्यायामाध्वनिषेवणं रविकरक्रोधं च
कर्म्माणि

क्षोभो [illegible]
स्वेदासृक्स्रुतिधूमपानसुरतक्रोधाः कुलत्थी
वार्त्ताकं तिलमाषसर्षपदधिक्षाराणि कैर..."

इति वैद्यकपथ्यापथ्यविधौ रक्तपित्ताधिकार...

ा, स्त्री, (रक्तमिव पिबतीति । पा + क्विप् । टाप् ।) जलौका । इति शब्द-
ा ॥ जोंकिया पोका इति भाषा ॥
गुणाः जलौकाशब्दे ज्ञातव्याः ॥)

ा, स्त्री, (रक्ता रक्तवर्णा पुनर्नवा ।)
र्पुनर्नवाशाकः । तत्पर्यायः । क्रूरा २
पंनिका ३ रक्तकाण्डा ४ वर्षकेतुः ५
वा ६ रक्तपत्रिका ७ वैशाखी ८ रक्त-
:९ शोथघ्नी १० पुष्पिका ११ विश्वमल्ला १२
॥१३ प्रावृषेण्या १४ सारिणी १५ वर्षा-
६ शोफघ्नः १७ भौमः १८ पुनर्भवः १९
० नवः २१ । अस्य गुणाः । तिक्तत्वम् ।
त्वम् । शोफरक्तप्रदरदोषपाण्डुपित्तनाशि-
इति राजनिर्घण्टः ॥

, पुं, (रक्तं पुष्पमस्य ।) करवीरः । इति
रः ॥ (अस्य पर्यायो यथा,—
रः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
ी रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥"
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वृक्षः । इति शब्दमाला ॥ रक्तकाञ्चन-
। दाडिमवृक्षः । वकवृक्षः । इति रत्न-
॥ बन्धूकवृक्षः । पुन्नागवृक्षः । इति
निर्घण्टः ॥ (रक्तवर्णपुष्पविशिष्टे, त्रि ।)
बृहत्संहितायाम् । १५ । १४ ।
ग्निदैवते रक्तपुष्पफलशाखिनः सलिल-
सुताः ।
समापयवकाः पुरन्दरदुमाशभक्ताश्च ॥")

:, पुं, (रक्तं पुष्पमस्य । कन् ।) पलाश-
। (अस्य पर्यायो यथा,—
श: किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
श्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥"
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शकवृक्षः । इति जटाधरः ॥ पर्प्पटः ।
शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥

, स्त्री, (रक्तं पुष्पं अस्याः ।) शाल्मलि-
। इति जटाधरः ॥ (अस्याः पर्यायो
—
शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
प्या स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वा । तत्पर्यायो यथा,—
र्नवा परारक्ता रक्तपुष्पा शिलाटिका ॥"
री । तत्पर्यायो यथा,—
दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ॥"
इति भावप्रकाशः ॥)

का, स्त्री, (रक्तपुष्पा + कन् । टापि अत
।) लज्जालुः । इति शब्दचन्द्रिका ॥
पुनर्नवा । भूपाटलिः । इति राजनिर्घण्टः ॥

, स्त्री, (रक्तं पुष्पं अस्याः । ङीष् ।)
शीवृक्षः । इति जटाधरः ॥ जवा । आवर्त्त-
ता । नागदमनी । करुणीवृक्षः । उष्ट्र-
ी । इति राजनिर्घण्टः ॥ (धातकी ।
तत्पर्यायो यथा,—
"धातकी रक्तपुष्पी स्यात् कुञ्जरा मद्यवासिनी ॥"
इति वैद्यकरत्नमालायाम् ॥)

रक्तपूरकं, क्ली, (रक्तं पूरयतीति । पूर + ण्वुल् ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ (विवरणमस्य वृक्षाम्लशब्दे ज्ञातव्यम् ॥)

रक्तप्रसवः, पुं, (रक्तः रक्तवर्णः प्रसवः पुष्पमस्य ।) रक्तकरवीरः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रक्तफलः, पुं, (रक्तं लोहितवर्णं फलमस्य ।) वटवृक्षः । इति जटाधरः ॥ (अस्य पर्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफला, स्त्री, (रक्तं पक्वदशायां लोहितवर्णं फलमस्याः ।) बिम्बिका । इत्यमरः । २ । ४ । ११८ ॥ (अस्याः पर्यायो यथा,—
"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
स्वर्णवल्ली । इति राजनिर्घण्टः ॥ (अस्याः पर्यायो यथा,—
"स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफेनजः, पुं, (रक्तफेनात् जायते इति । जन + डः ।) वामपार्श्वस्थक्लोम । तत्पर्यायः । पुप्फुसः २ । इति हेमचन्द्रः । ३ । २६८ ॥

रक्तबिन्दुः, पुं, (रक्तानां बिन्दुः ।) रक्तकणा । यथा,—
"रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥)

रक्तबीजः, पुं, (रक्तवर्णं बीजमस्य ।) दाडिमः । इति राजनिर्घण्टः ॥ (अरिष्टकफलः । रीठा इति ख्यातः । तत्पर्यायो यथा,—
"अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः ।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
रक्तं शोणितं बीजं कारणमस्य ।) असुरविशेषः । स च शुम्भनिशुम्भसेनापतिः देव्या हतश्च । यथा,—
"पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्द्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्य्यबलविक्रमाः ॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह-
सत्वरा ।
उवाच कालीं चामुण्डे ! विस्तरं वदनं कुरु ॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥
भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥
देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ।
नीरक्तश्च महीपाल ! रक्तबीजो महासुरः ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ! ।
तेषां मातृगणो जातो ननर्त्तासृङ्मदोद्धतः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
(महिषासुरपिता दानवो रम्भ एव जन्मान्तरे रक्तबीजो जातः । यथा, देवीभागवते । ५ । २ । ४४—४८ ।
"एतं रम्भं समानीय यथास्ते परमं प्रियम् ।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये ॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा ।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम् ॥
वार्य्यमाणापि यक्षैः सा प्रविवेश हुताशनम् ।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम् ॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबलः ।
रम्भोऽप्यन्यद्वपुः कृत्वा निःसृतः पुत्रवत्सलः ॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः ।
अभिषिक्तस्तु राज्येऽसौ हयारिरसुरोत्तमैः ॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान् ।
अवध्यस्तु सुरैर्दैत्यैर्मानवैश्च नृपोत्तम ! ॥")

रक्तबीजका, स्त्री, (रक्तो रक्तवर्णो बीजोऽस्याः । कन् + टाप् ।) तरटीवृक्षः । इति राजनिर्घण्टः ॥

रक्तमञ्जरः, पुं, (रक्ता रक्तवर्णा मञ्जरी । सा विद्यतेऽस्येति । "अर्शआदिभ्यः अच् ।" ५।२।१२७। इत्यच् ।) निचुलवृक्षः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य निचुलशब्दे ज्ञातव्याः ॥)

रक्तमत्स्यः, पुं, (रक्तो रक्तवर्णो मत्स्यः ।) रक्तवर्णो मत्स्यविशेषः । यथा,—
"यो रक्ताङ्गो नातिदीर्घो न चाल्पो
नातिस्थूलो रक्तमत्स्यः स उक्तः ।
शीतो गुरुः पुष्टिकृद्दीपनोऽसौ
नाशं धत्ते किञ्च दोषत्रयस्य ॥"
इति राजनिर्घण्टः ॥

रक्तमूलक:, पुं, (रक्तं रक्तवर्णं मूलमस्य । कन् ।) देवसर्षपक: । इति राजनिर्घण्ट: ॥

रक्तमत्ता, स्त्री, (रक्तं मत्तं यस्या: । टाप् ।) जलौका: । इति राजनिर्घण्ट: ॥

रक्तमेह:, पुं, (मेहनं मेह: रक्तस्य मेह: ।) प्रमेहरोगविशेष: । तस्य लक्षणं यथा,—

"विस्रमुष्णं सलवणं रक्ताभं रक्तमेहत: ।"

[illegible] । अस्यौषधम् । यथा,—

"[illegible]
[illegible]
[illegible]
[illegible]
[illegible] पृथक् पृथक् ।
[illegible] भवेत् ।
[illegible] गुग्गुलो: ।
[illegible] शुभा ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।"

इति भावप्रकाश: ॥

[illegible]

रक्तयष्टिका, स्त्री, (रक्तयष्टि+कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्ट: ॥ (अस्या: पर्य्यायो यथा,—

"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि ।
ताम्रवल्ली चित्रपर्णी काण्डीरी रक्तयष्टिका ॥"

इति वैद्यकरत्नमालायाम् ॥

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा काल-
मेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रक्तयावनाल:, पुं, (रक्तवर्ण: यावनाल: ।) सुवर्णयावनाल: । इति राजनिर्घण्ट: ॥

रक्तरेणु:, पुं, (रक्ता: रेणवोऽस्मिन्निति ।) सिन्दूरम् । (अस्य पर्य्यायो यथा,—

"सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम् ।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) पलाशकलिका । इति मेदिनी । णे, १०५ ॥ पुन्नाग: । इति राजनिर्घण्ट: ॥

रक्तरेणुका, स्त्री, (रक्ता: रेणव: परागा अस्याम्, कप् । टाप् च ।) पलाशकलिका । तत्पर्य्याय: । चञ्चुरिका २ । इति शब्दमाला ॥

रक्तरैवतकं, क्ली, (रक्तवर्णं रैवतकम् ।) महापारेवतम् । इति राजनिर्घण्ट: ॥

रक्तलशुन:, पुं, (रक्तवर्णो लशुन: ।) रक्तवर्णलशुनविशेष: । तत्पर्य्याय: । महाकन्द: २ यवन: ३ दीर्घपत्रक: ४ पृथुपत्र: ५ स्थूलकन्द: ६ यवनेष्ट: ७ । अस्य गुणा: ।

"यवनस्य मधुरं कटु कन्दं
नालमम्लमुदितन्ति कषायम् ।
पत्रमत्र कटुकन्ति बीजकं
रुच्यं लवणमस्थि वदन्ति ॥"

इति राजनिर्घण्ट: ॥

रक्तला, स्त्री, (रक्तं लाति गृह्णातीति । ला+क: । टाप् ।) काकतुण्डी । इति राजनिर्घण्ट: ॥ (विशिष्टोऽस्या: काकतुण्डीशब्दे ज्ञातव्य: ॥)

रक्तलोचन:, पुं, (रक्ते लोचने लोचने यस्य ।) कपोत: । इति हेमचन्द्र: । ४ । ४०५ ॥ लोहितलोचनयुक्ते, त्रि ॥

रक्तवटी, स्त्री, (रक्ता वटी वटिकेव ।) मसूरिका । इति शिवाक्षदीप: ॥

रक्तवटी, स्त्री (रक्ता वटीव ।) मसूरिका । इति जटाधर: ॥ (मसूरिकाशब्देऽस्या गुणा-दयो ज्ञेया: ॥)

रक्तवर्ण: पुं, (रक्तावर्णो लोहितवर्णो यस्य: [illegible] ।) [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] ।
इति [illegible] ॥

रक्तवर्णं, [illegible] (रक्त: [illegible] ।) [illegible] । इति [illegible] ॥ (रक्तवर्णविशिष्टे, त्रि । यथा, [illegible] । [illegible] ।

"शिलाशिला: पीतकरक्तवर्णा
भवन्ति येऽनेकविधाश्च शिल"।

रक्तवर्द्धन:, पुं, (रक्तं [illegible] वृध्+णिच्+ल्यु: ।) वार्त्ताकु: । (पारावत: । तत्पर्य्यायो यथा,—

"पारावत: कलरव: कपोत: [illegible]"

इति भावप्रकाशस्य पूर्ब्बखण्डे [illegible]

रक्तवर्षाभू:, स्त्री, (रक्तवर्णा वर्षाभू: ।) पुनर्नवा । इति राजनिर्घण्ट: ॥

रक्तवसन:, पुं, (रक्तं वसनमस्य ।) इति हेमचन्द्र: । ३ । ४७१ ॥

रक्तवात:, पुं, (रक्तप्रधानो वात: ।) अस्यौषधम् । यथा, गारुडे [illegible]

"नारिकेलस्य वै मूलं [illegible]
[illegible]"

रक्तवालुकं, क्ली, (रक्ता वालुका चूर्णं [illegible] रम् । इति हारावली ॥

रक्तवालुका, स्त्री, (रक्ता वालुका [illegible] रम् । इति शब्दरत्नावली ॥

रक्तवृन्ता, स्त्री, (रक्तवर्णं वृन्तं यस्या: ।) शेफालिका । इति [illegible] (शेफालिकाशब्देऽस्या गुणादयो [illegible]

रक्तवृष्टि:, स्त्री, (रक्तानां वृष्टि: ।) [illegible] ग्रम् । तत्तु उत्पातविशेष: । तस्यां [illegible] योग: । यथा । ज्ञानचिन्तामणौ ।

"रक्ते प्रश्नोद्योगे [illegible]
धान्यहिरण्यलवणजकुसुमाद्यं [illegible]"

[illegible]

रक्तशालि:, पुं, (रक्तवर्ण: शालि: ।) धान्यविशेष: । (यथा, सुश्रुते [illegible] अध्याये । [illegible]
कपोतकप्रमोदकलमकाशिकादि [illegible] ।") तत्पर्य्याय: । ताम्रशालि: २ शोणशालि: [illegible] अस्य गुणा: । मधुरत्वम् । लघुत्वम् । बलावहत्वम् । [illegible] त्वम् । पथ्यत्वम् । त्रिदोष [illegible] त्वञ्च । इति राजनिर्घण्ट: ॥ (यथा,

"रक्तशालिर्वरस्तेषु बल्यो वर्ण्य: [illegible]
चक्षुष्यो मूत्रल: स्वर्य: [illegible]
विषज्वरश्वासकासदाहवह्निहर: [illegible]"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे [illegible]

रक्तशासनं, क्ली, (रक्तं रक्तवर्णं [illegible] शास्ति । शास्+ल्यु: ।) सिन्दूरम् । [illegible] वली ॥

रक्तशिग्रु:, पुं, (रक्तवर्ण: शिग्रु: ।) [illegible] मधुशिग्रु: । तत्पर्य्याय: । रक्त [illegible] बहुलच्छद: ३ सुगन्ध: ४ [illegible] मधुरादि: च । अस्य गुणा: । [illegible] मधुरत्वम् । रसायनत्वम् । [illegible] शोथनिष्कृन्तनादित्वम् । इति राजनिर्घण्ट: ॥

शीर्षकः, पुं, (रक्तं रक्तवर्णं शीर्षं अग्रमस्य । न् ।) सरलद्रवः । इति रत्नमाला ॥

…श्टङ्गिकं, क्ली, विषम् । इति राजनिर्घण्टः ॥

…संज्ञं, क्ली, (रक्तमिति संज्ञास्य ।) कुङ्कुमम् । …ति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य कुङ्कुम-शब्दे विज्ञेयाः ।)

…सन्दंशिका, स्त्री, (रक्ताय रक्तपानाय सम्यक् …शतीति । दन्श+ण्वुल् । टापि अत इत्वञ्च ।) …लौका । इति राजनिर्घण्टः ॥

…सन्ध्यकं, क्ली, ("रक्तं सन्ध्येवेति रघुनाथः । …रक्तान् सन्धीन् अकति गच्छति व्याप्नोतीति । …ः । इति रायमुकुटभरतमल्लिकौ ।") रक्त-…कारम् । तत्पर्यायः । हल्लकम् २ । इत्य-…रः । १।१०।३६ ॥

…सरोरुहं, क्ली, (रक्तं सरोरुहम् ।) रक्त-…ग्रम् । इत्यमरः । १ । १० । ४१ ॥

…सर्षपः, पुं, (रक्तवर्णः सर्षपः ।) राजिका । …ति राजनिर्घण्टः ॥

…सहा, स्त्री, (रक्तं सहते इति । सह्+ अच्+टाप् ।) रक्ताम्लानः । इति राज-निर्घण्टः ॥

…सारं, क्ली, (रक्तवर्णः सारोऽस्य ।) रक्त-चन्दनम् । (यथास्य पर्य्यायः ।

'रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् । …प्रलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥'

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) …पत्तङ्गम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो …था,—

'पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा । …पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥")

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

…सारः, पुं, (रक्तः सारो यस्य ।) अम्बष्ठकः । …रक्तखदिरः । इति राजनिर्घण्टः ॥ (अस्य …पर्य्यायो यथा,—

"खदिरो रक्तसारश्च गायत्री दन्तधावनः । …कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ …रक्तं सारो यस्येति । शोणितसारयुक्ते, त्रि । …यथा, हरिवंशसंहितायाम् । ६८ । ६० ।

"…नास्योऽरक्तपाणीनिष्कानेत्रान्तपादकर-चरणैः ।

…रक्तैस्तु रक्तसारा बहुधनधान्यपुत्रयुताः ॥")

…सौगन्धिकं, क्ली, (रक्तवर्णं सौगन्धिकम् ।) …रक्तकह्लारम् । इति जटाधरः ॥

…स्रावः, पुं, (रक्तं स्रावयतीति । स्रु+णिच्+ अण् ।) वेतसाम्लः । इति जटाधरः ॥ (रक्तस्य …स्रावः ।) रक्तपतनम् । (यथा, हरिवंशसंहिता-याम् । ८० । ३५ ।

"कलशो नैर्ऋतभागे रक्तस्रावोऽथ मस्तकोपहः । …अपराद्धे समेक्तं विनश्यति चर्मकारभयम् ॥")

…रक्तांशा, स्त्री, (रक्ताः वशीभूताः अंशा यत्र ।) …रागिणीविशेषः । इति हलायुधः ॥

रक्ता, स्त्री, (रक्त+टाप् ।) गुञ्जा । (अस्याः पर्य्यायो यथा,—

"रक्ता सा काकचिञ्ची स्यात् काकनन्ती च रक्तिका ।

काकादनी काकपीलुः सा स्मृता काकवल्लरी ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) लाक्षा । मञ्जिष्ठा । उष्ट्रकाण्डी । इति राज-निर्घण्टः ॥

रक्ताकारः, पुं, (रक्तवर्ण आकारः अवयवोऽस्य ।) प्रवालः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य प्रवालशब्दे विज्ञेयः ॥)

रक्ताक्तं, क्ली, (रक्तेन रक्तवर्णेन अक्तं म्रक्षितम् ।) रक्तचन्दनम् । इति जटाधरः ॥ शोणित-मिश्रिते, त्रि ॥

रक्ताक्षः, पुं, (रक्ते लोहिते अक्षिणी यस्य । "अस्त्रोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) महिषः । पारावतः । चकोरः । क्रूरः । इति मेदिनी । षे, ४४ ॥ सारसः । इति राजनिर्घण्टः ॥ (अब्दविशेषः । यथा, हरहत्-संहितायाम् । ८ । ५१ ।

"रक्ताक्षमब्दं कथितं तृतीयं यस्मिन् भयं दंष्ट्रिकृतं गदाश्च ॥")

रक्तवर्णचक्षुर्युक्ते, त्रि । (यथा,रामायणे । २ । ८८ । १६ ।

"कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः । सुखभागी न दुःखार्हः शयितो भुवि राघवः ॥"

अयन्तु सदा सश्रीयुक्तो भवेत् । यथा, ज्योतिः-सागरे ।

"न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् । न दीर्घबाहुमैश्वर्य्यं न सौख्यं प्रहसन्मुखम् ॥")

रक्ताङ्गं, क्ली, (रक्तवर्णमङ्गमस्य ।) विद्रुमः । कुङ्कुमम् । इति मेदिनी । गे, ४८ ॥ (रक्तचन्द-नम् । यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ।

"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् । तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥")

रक्ताङ्गः, पुं, (रक्तमङ्गं यस्य ।) मङ्गलग्रहः । कम्पिल्लः । इति मेदिनी । गे, ४७ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"कम्पिल्लकस्तु रक्ताङ्गो गुण्डारोचनिकेति च ॥"

"कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥) प्रवालः । मत्कुणः । इति राजनिर्घण्टः ॥ मण्डलम् । इति शब्दरत्नावली ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । १७ ।

"ऋषभो वेगवान्नागः पिण्डारकमहाहनू । रक्ताङ्गः सर्व्वसारङ्गः समृद्धः पटवासकौ ॥")

रक्ताङ्गी, स्त्री, (रक्ताङ्ग+ङीष् ।) जीवन्ती । इति मेदिनी । गे, ४८ ॥ मञ्जिष्ठा । इति भाव-प्रकाशः ॥

रक्तातिसारः, पुं, (रक्तं अत्यन्तं सरत्यस्मात् । स +घञ् ।) रोगविशेषः । "तस्य संप्राप्तिमाह ।

'पित्तकृन्ति यदात्यर्थं द्रव्यमश्नाति पैत्तिके ।

तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः ॥'

तस्य चिकित्सा ।

'वत्सकतरुत्वगार्द्रा दाडिमफलसम्भवा त्वक् । त्वग्युगलं पलमानं विपचेदष्टाङ्गसम्मिते तोये ॥ अष्टमभागं शेषं क्वाथं मधुना पिबेत् पुरुषः । रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतम् ॥

इति कुटजदाडिमक्वाथः ॥ * ॥

'गोदुग्धनवनीतन्तु मधुना सितया सह । लीढ़ं रक्तातिसारे तु ग्राहकं परमं महत् ॥'

इति नवनीतावलेहः ॥ * ॥

'शीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना । रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत् ॥'

चन्दनमत्र श्वेतम् । इति चन्दनकल्कः ।" इति भावप्रकाशः ॥ (तथा च ।

"यस्तु रक्तशुद्धविरेचने शोणदाहमतिरिच्यते । रक्तातिसार इति विज्ञेयो वैद्यैर्मेधामतिभिः ॥ धन्वनागरमुस्ता च वालकं बालबिल्वकम् । बलानागबला चेति क्वाथो रक्तातिसारिणाम् ॥ दाडिमञ्च कपित्थञ्च पथ्याजम्ब्वाम्रपल्लवान् । पिष्ट्वा देया मस्तुयुक्ता रक्तातिसारवारणाः ॥ गुडेन पक्वं दातव्यं बिल्वं रक्तातिसारिणे । मस्तुने मधुयुक्ता वा दध्ना रक्तातिसारहा ॥

वत्सकातिविषनागराभया
पेषितञ्च मधुमस्तुसंयुतम् ।
लेह एव मधुना च मानुषि
रक्तवाहमति वारयत्यपि ॥

कुटजत्वक् च पाठा च बिल्वं बिल्वञ्च धातकी । मधुना सहितं चूर्णं देयं रक्तातिसारहम् ॥ इति रक्तातिसारः ।" इति हारीते चिकित्-सितस्थाने तृतीयेऽध्याये ।)

रक्ताधारः, पुं, (रक्तस्याधारः ।) चर्म्म । इति राजनिर्घण्टः ॥

रक्तापहं, क्ली, (रक्तमपहन्तीति । हन्+डः ।) बोलम् । इति राजनिर्घण्टः ॥

रक्तापामार्गः, पुं, (रक्तवर्णः अपामार्गः ।) रक्तवर्णापामार्गक्षुपः । राङ्गा आपाङ् इति वङ्गभाषा । लाल चिरचिरी इति हिन्दी भाषा । तत्पर्य्यायः । क्षुद्रापामार्गः २ वाशट्टकः ३ दुग्धिनिका ४ रक्तविट् ५ कल्यपत्रिका ६ । अस्य गुणाः । शीतलम् । कटुत्वम् । कफवात-प्रणकण्डूविषनाशित्वम् । संग्राहित्वम् । वान्ति-कारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्याय-गुणाः । अथ आरक्तचिरचिरा ।

"रक्तोऽन्यो वशिरो हस्तपर्णो धामार्गवोऽपि च । प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥ अपामार्गोऽरुणो वातविष्टम्भी कफहृद्धिमः । रूक्षः पूर्ब्बगुणैर्न्यूनः कथितो गुणवेदिभिः ॥ अपामार्गफलं स्वादु रसे पाके च दुर्ज्जरम् । विष्टम्भि वातलं रूक्षं रक्तपित्तप्रसादनम् ॥"

इति भावप्रकाशः ॥

रक्ताम्बरं, क्ली, (रक्तं रञ्जितमम्बरम् ।) काषाय-वस्त्रम् । यथा,—

"प्रवीणरतिसमावीतां रक्ताम्बरपरिच्छदाम् ।
रक्तालङ्कारसंयुक्तां गुञ्जाहारविभूषिताम् ॥"
इति तन्त्रसारधृतसमुच्छिष्टचाण्डालिनीध्यानम् ॥
तद्युक्ते, त्रि ॥

रक्ताम्रः, पुं, (रक्तवर्णः आम्रः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ (विवरणमस्य कोशाम्रशब्दे ज्ञातव्यम् ।)

रक्ताम्लानः, पुं, (रक्तेन रक्तवर्णेन आ सम्यक् म्लायति इति । म्लै + क्तः । समधिकरक्तवर्णत्वात्तथात्वम् ।) रक्तवर्णपुष्पविशेषः । तत्पर्यायः । रक्तसहा २ अपरिम्लानः ३ रक्ताम्लानकः ४ रागप्रसवः ५ रक्तप्रसवः ६ कुरवकः ७ रामालिङ्गनकामः ८ बधूलप्रसवः ९ सुभगः १० भ्रमरानन्दः ११ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । वातामयशोथज्वरानाहशूलकाश्मश्वासादिप्रशमनत्वम् । वर्ण्यत्वञ्च । इति राजनिर्घण्टः ॥

रक्तार्म, [न्] क्ली, (रक्तं अर्म्मच्छतीति । ऋ + मन् ।) नेत्ररोगभेदः । तस्य लक्षणं यथा,—
"पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते ।"
इति माधवकरः ॥

रक्तार्बुदः, पुं, क्ली, (रक्तानामर्बुदमत्र ।) रोगविशेषः । यथा, शातातपीयकर्म्मविपाके ।
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः ।
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥"
इति मलमासतत्त्वम् ॥ * ॥
"रक्तार्बुदमाह ।
'दोषप्रदुष्टं रुधिरं शिराश्च
सङ्कोच्य संपीड्य ततस्त्वपाकम् ।
सास्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराचितमाशु वृद्धिम् ॥
स्रवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरात्मकञ्च ।
रक्तक्षयोपद्रवपीडितत्वात्
पाण्डुर्भवेदर्बुदपीडितश्च ॥'
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्कोच्य संपीड्य संहतोऽत्र मांसादयो: यद्यप्यर्बुदेषु दूष्यत्वं रक्तेऽपि तु विशिष्टो रक्तदुष्टिः एवं मांसार्बुदे विशिष्टो मांसदुष्टिर्बोद्धव्या । ततो मांसपिण्डमुन्नह्यति उद्गतं करोति । अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम् । ईषत्पाकश्चैकदेशपाकेन । रक्तक्षयोपद्रवपीडितत्वात् रक्तक्षयोपद्रवाः पाण्डुत्वादयः । तैः पीडितत्वात् अर्बुदपीडितः ॥ * ॥ अथार्बुदस्य चिकित्सा ।
'स्यादर्बुदानां न यतो विशेषः
शरीरदेशान्तरहेतुरूपैः ।
अतोऽर्बुदेष्वर्बुदरोगनाशि
विधानविद्भूरि चिकित्सितं च ॥
अर्बुदेषु शोथप्रशमनविधानाद्यसुक्रियाः ।
अनुसन्धाय कर्त्तव्यं वैद्यैरर्बुदशान्तये ॥
तत्र चादौ हरिद्रादिचूर्णं च ।

गृहधूमेन संयुक्तो लेपः सिद्धोऽर्बुदापहः ॥
वटदुग्धकुष्ठलोमकलितं बद्धं वटस्य पत्रेण ।
अर्बुदमपि भारत्यामिव दृश्यमानायामिव मर्दनं
गच्छेत् ॥
शिग्रुमूलकयोर्बीजं दन्तीजं सुरसा यवम् ।
तक्रेणाम्लरिपुं पिष्ट्वा लिम्पेदर्बुदशान्तये ॥'
दन्तीजं मर्षपम् । सुरसा तुलसी । यवं इन्द्रयवम् । अश्वरिपुं करवीरम् ।" इति भावप्रकाशः ॥

रक्तार्शः, [स्] क्ली, (रक्तजनितमर्शः ।) अर्शोरोगविशेषः । तस्य लक्षणमाह ।
"रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः ।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढविट्प्रतिपीडिताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट्श्यावं कठिनं रूक्षमधो वायुर्न वर्त्तते ।
तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसाम् ॥
कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकम् ।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् ॥
शिथिलं श्वेतपीतञ्च विट्स्निग्धं गुरु शीतलम् ।
यद्यर्शसां घनञ्चासृक् तन्तुमत्पाण्डु पिच्छिलम् ।
गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणम् ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥
गुदे कीला अर्शांसि । पित्ताकृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः । आकारेण च वटप्ररोहादिसदृशाः । दुःखैः रोगैः । सकृपाण्ड्वासुशीतप्रायेणादिभिः कलुषेन्द्रियः आकुलसर्व्वेन्द्रियः । रक्तजस्यापि वातोल्बणस्य लक्षणमाह । तत्र रक्तार्शसि अनुबन्धः उल्बणत्वम् । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम् । पित्तोल्बणस्य लक्षणं रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विता इत्यादिनैवोक्तम् । रक्तपित्तयोः समानलिङ्गत्वात् ॥ * ॥ कफोल्बणस्य लक्षणमाह । सपिच्छं पिच्छिलार्द्रस्तिमितमार्द्रचर्म्मावगुण्ठितमिव । तस्य चिकित्सा ।
रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टेऽस्रे निगृह्यमाणे हि शूलानाहाद्यामयाः ॥
चन्दनकिराततिक्तकधन्वयवासाः सनागराः
क्वथिताः ।
रक्तार्शसां प्रशमनाः दार्व्वीत्वगुशीरनिम्बा वा ॥
चन्दनमत्र रक्तचन्दनम् । इति चन्दनादिक्वाथः ॥
नवनीततिलाभ्यासात्
केशरनवनीतशर्कराभ्यासात् ।
दधिसरमथिताभ्यासात्
गुदजाः शाम्यन्ति रक्तवहाः ॥
रसस्तु यदि यो भागो यवः क्षुद्रगुनः सहः ।
मथितं चारादिकम् । निम्बं वत्सपूर्वं दधि ।
समार्द्रकमिदं शीरं नवनीतं नवं पिबन् ।
सिताकेशरसंयुक्तं रक्तार्शःसु सुखी भवेत् ॥
पयसा सहैव दुग्धैः सर्पिस्तद्वत्कोमलरागाम् ।
पौरसमन्दाररसैः पुरैरोपनुद्यमन्येन ॥

सम ... भाक्षितीर
पिष्ट्वा प्रयोपयो ...
समङ्गा ... । मोचा
निर्यासो ... । चन्दनम ...
... ।
भाविता ...
... सुरक्तं ...
... ॥
...
क्रियाम ... कुर्वीत ...
...
...
यथास्वं दोषनाशनमर्शः ...
इति
(यथा चास्य लक्षणानि ।
"रक्तार्शांसि
... पित्तलक्षणानि च
पुरीषशोणितानि भवन्ति
...
तानि योगेनेपदवा भवन्ति ।" ...
स्थाने हितोपदेशाध्याये । अथास्य ...
...
मातुलिङ्गात् अथवेष नवनीतं
सितानागरसंयुक्तं नवनीतं ...
केशरं मातुलुङ्गस्य ...
भवेत् कुष्ठाकारवेष्टं ...
रसेन रक्तगुदजान् प्रशमयति
समङ्गा शाल्मलीपुष्पं चन्दनं
नीलोत्पलमथोशीरं पिष्ट्वा ...
कुटजमूलकेशरमुस्तं
खदिरधातकीमूलतर्पणं यः ।
पिबति स पयसोमरणं
गुदजैरपगतविबन्धम् ।'
इति ...
इति हारीते चिकित्सितस्थाने १२
रक्तालुः, पुं, (रक्तः रक्तवर्णः आलुः ...) वर्णालुविशेषः । शङ्करकन्द ... तत्पर्यायः । रक्तपिण्डालुः २ लोहितः ३ रक्तकन्दः ४ लोहितालुः ... गुणाः । शीतत्वम् । मधुरत्वम् । दाहनाशकत्वम् । रुच्यत्वम् । ... गुरुत्वञ्च । इति राजनिर्घण्टः ॥
रक्तिका, स्त्री, (रक्ता ... + "अत इनिठनौ ।" ५।२।११५ ।) गुञ्जा । (अस्याः पर्यायो यथा,—
...
काकादनी ...
इति ...
"रक्ता सा काकचिञ्ची स्यात्
...
काकादनी काकपीलुः सा स्मृता ...
इति भावप्रकाशस्य पूर्व्वखण्डे ...

...लिका। इति राजनिर्घण्टः॥ रक्तिका-
...रुमारभ्य॥
..., पुं, (रक्तो रक्तवर्णं एरण्डः।) रक्त-
...ण्डः। लाल भाराण्डा इति भाषा॥ तत्पर्य्यायः।
...व्याघ्रः २ शीघ्रः ३ लोहितः ४ उरुबूकः ५
...तः ६ हस्तकर्णः ७ लोहितैरण्डः ८। अस्य
...णाः। मधुरत्वम्। पाके शीतलत्वम्। कटु-
...म्। पित्तदाहहरत्वम्। वृष्यत्वम्। तीक्ष्णो-
...विपर्ययत्वञ्च। इति राजनिर्घण्टः॥
...ण्डः, पुं, (रक्तवर्णः एरण्डः।) वृक्षविशेषः।
...ल भेरण्डा इति भाषा॥ तत्पर्य्यायः। व्याघ्रः २
...हिस्तकर्णः ३ वातुः ४ उरुबूकः ५ नाग-
...र्णः ६ चञ्चुः ७ उत्तानपत्रकः ८ कारपर्णः ९
...वक: १० स्निग्धः ११ व्याघ्रदलः १२ रक्तकः
...१३ चित्रबीजः १४ हस्तैरण्डः १५। अस्य
...णाः। श्वयथुपवनज्वरकासादिवातवृद्धाभिः-
...मज्वरारोचकनाशित्वम्। लघुत्वञ्च। इति
...जनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"...शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
...पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः॥
...रक्तोऽपरो रुबूकः स्यादुरुबूको रुबुस्तथा।
...व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः॥
...एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्।
...शूलशोथकटीवस्तिशिरःपीडोदरज्वरान्॥
...ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान्॥
...एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
...मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम्॥
...वातार्य्यग्रदलं गुल्मवस्तिशूलहरं परम्।
...कफवातक्रिमीन् हन्ति वृद्धिं सप्तविधामपि॥
...एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्।
...यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
...तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः॥"

इति भावप्रकाशः॥

...र्व्वारुः, पुं, (रक्तः रक्तवर्णः एर्व्वारुः।) इन्द्र-
...वारुणी। इति राजनिर्घण्टः॥ (विशेषो-
...ऽस्येन्द्रवारुणीशब्दे विज्ञेयः॥)

...त्पलं, क्ली, (रक्तं रक्तवर्णमुत्पलम्।) रक्त-
...पद्मम्। तत्पर्य्यायः। रक्तसरोरुहम् २ कोक-
...नदम् ३। इत्यमरः। १। १०। ४२॥ (यथा,
...बृहत्संहितायाम्। २८। ८।
"...विन्द्याच्च सिन्दुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः॥"
तथास्य गुणाः।
"धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यत् रक्तोत्पलादिकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

...त्पलः, पुं, (रक्तोत्पलमिव पुष्पमस्यस्य। अर्शआद्यच्।) शाल्मलिवृक्षः। इति राज-
निर्घण्टः॥

...त्पलाभः, पुं, (रक्तोत्पलस्य आभेव आभास्य।) शोणवर्णः। इति जटाधरः। तद्-
युक्ते, त्रि॥

रक्तोपलं, क्ली, (रक्तमुपलम्।) गैरिकम्। इति हारावली। ११५॥ (गुणादयोऽस्य गैरिकशब्दे ज्ञेयाः॥)

रक्ष, लि पालने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लि, रक्षितोऽस्ति। इति दुर्गादासः॥

रक्षः, [स्] क्ली, (रक्ष्यतेऽस्मादिति। रक्ष+ "सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) राक्षसः। इत्यमरः। १। १। ६२॥ तद्विशेषो यथा,—
"दृष्ट्वा तु निरतान् यज्ञानवायान् रौगिन्ता धृष्टा
दया न जायते यस्य स रक्ष इति मे मतिः॥"
इत्याग्नेये यमशर्म्मिलोपाख्याननामाध्यायः॥
रक्षोघ्नौषधं यथा,—

मनुरुवाच।

"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा।
अगदानि समाचक्ष्व तानि धर्म्मभृताम्बर॥

मत्स्य उवाच।

बिल्वका रोहिणी चैव रक्तमाला महौषधी।
तथामलकवन्दाकं या च चित्रपटोलिका॥
काकोली क्षीरकाकोली पीलुपर्णी तथैव च।
केशिनी वृश्चिकाली च महानागा शतावरी॥
तथा गरुड़वेगा च जले कुमुदिनी तथा।
स्थले चोत्पलिनी या च महाभूमिलता च या।
उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव।
विशेषान्मरकतादयस्त कीटपक्षविशेषतः॥
जीवजाताश्च मणयः सर्व्वे धार्य्या विशेषतः।
रक्षोघ्नाश्च यशस्याश्च तथा वेतालनाशनाः॥"

इति मात्स्ये २१९ अध्यायः॥

रक्षःसभं, क्ली, (रक्षसां राक्षसानां सभा। क्लीबत्वमभिधानात्।) रक्षःसमूहः। इत्यमरः। २। ५। २३॥

रक्षकः, त्रि, (रक्षतीति। रक्ष+ण्वुल्।) रक्षाकर्त्ता। यथा,—
"गोरक्षः सहदेवश्च नकुलो हयरक्षकः।
वैराटे कुरुदायादौ नराणां मातुलक्रमः॥"

इति पुराणम्॥

रक्षणं, क्ली, (रक्ष+भावे ल्युट्।) रक्षा। यथा,
"इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम्।
पाययित्वा स्तनं माता संन्यवेशयदात्मजम्॥"

इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥

रक्षणारकः, पुं, मूत्रकृच्छ्ररोगः। इति शब्द-रत्नावली॥ क्वचित् पुस्तके रक्षणीरकोऽपि पाठः॥

रक्षणिः, स्त्री, त्रायमाणा लता। इति राज-निर्घण्टः॥

रक्षा, स्त्री, (रक्षणमिति। रक्ष+"गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) रक्षणम्। (यथा, कुमारे। २। २८।
"मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता॥")
जतु। इति मेदिनी। षे, २३॥ भस्म। इति शब्दरत्नावली॥ यशोदाकृता रक्षा यथा,—

"रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः।
गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम्॥
रक्षां च चक्रुः शकृता द्वादशाङ्गेषु नामभिः।
गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक्॥
न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्व्वत॥
अव्यादजोऽङ्घ्रिमणिमांस्तव जान्वथोरू
यज्ञोऽच्युतः कटितटं जठरं हयास्यः।
हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं
विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम्॥
चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्
त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च।
कोणेषु शङ्ख उरुगाय उपर्य्युपेन्द्र-
स्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात्॥
इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु।
श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु॥
पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः।
क्रीड़न्तं पातु गोविन्दः शयानं पातु माधवः॥
व्रजन्तमव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः।
भुञ्जानं यज्ञभुक् पातु सर्व्वग्रहभयङ्करः॥
डाकिन्यो यातुधान्यश्च कुष्माण्डा येऽर्भकग्रहाः।
भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः।
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः॥
स्वप्नदृष्टमहोत्पाता वृद्धबालग्रहाश्च ये।
सर्व्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः॥"
इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥ *॥
अथ पौर्णमास्यां रक्षाबन्धनम्। राखीबाँधा इति भाषा। यथा,—
"पौर्णमास्यां हरे रक्षाबन्धनं विधिपूर्व्वकम्।
ब्रजराजकुमारत्वात् केचिदिच्छन्ति साधवः॥"
तत्र भद्रादिसद्भावे तामतिक्रम्यैव कुर्य्यात्।
तथा च स्मृत्यन्तरे।
"भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा।
श्रावणी नृपतिं हन्ति ग्रामान् दहति फाल्-
गुनीति॥"

विधिश्च भविष्योत्तरे।
"उपाकर्म्मदिने प्रोक्तमृषीणाञ्चैव तर्पणम्।
ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्॥
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम्।
वस्त्रैर्व्विचित्रैः कार्पासैः क्षौमैर्व्वा मलवर्ज्जितैः।
विचित्रं ग्रथितं सूत्रं स्थापयेद्भाजनोपरि॥
उपलिप्तगृहमध्ये दत्त्वा चतुष्के न्यसेच्छुभं पीठम्।
तत्रोपविष्टो राजा सामात्यः सपुरोहितः ससुहृत्॥
तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण।
येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥"
वैदिकश्च। यदा बध्न दाक्षायणा हिरण्यः
शतानीकाय सुमनस्यमानाः तन्मया बध्नामि
शतं शारदायायुष्मान् जरदष्टिर्यथासम्।
"ब्राह्मणैः क्षत्त्रियैर्व्वैश्यैः शूद्रैश्चान्यैश्च मानवैः।
कर्त्तव्यो रक्षणाचारो विप्रान् संपूज्य शक्तितः।
अनेन विधिना यस्तु र...

स सर्व्वदोषरहितः सुखं संवत्सरं वसेदिति ॥”
अथ तद्दिननिर्णयार्थं उपाकर्म्मदिननिर्णयः क्रियते । यदाह स्मृत्यन्तरे ।
“उपाकर्म्म तु कुर्व्वन्ति ते सामऋग्यजुर्व्विदः ।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्व्वसु ॥”
तथा च । सामवेदिनां भाद्रस्य हस्तानक्षत्रं ऋग्वेदिनां श्रावणस्य श्रवणनक्षत्रं यजुर्व्वेदिनां श्रावणी पूर्णिमोपाकर्म्मकालः । उपक्रमकच्छिका-कीर्त्तनरूपं कर्म्म उपाकर्म्म । अत्र करणाभावे भाद्रे श्रावणेऽपि विधेयम् ।
“अष्टश्लोषधयस्तस्मिन् मासे न हि भवन्ति तत् ।
तदा भाद्रपदे मासि श्रावणेऽपि तदिष्यते ॥”
इति ब्रह्मपुराणवचनात् ॥
श्रावणपञ्चम्युक्तत्वः । तदाह गर्गः ।
“यदि स्यात् श्रावणं पर्व्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य च ॥” इति ।
अत्र भूतविद्धा पूर्णिमा च निषिद्धा । तथा च कालिकापुराणे ।
“चतुर्द्दश्यां समुत्पन्नावसुरौ मधुकैटभौ ।
वेदान् स्वीकुर्व्वतः पद्मयोनेस्तौ जह्रतुः श्रुतीः ॥
हत्वा तावसुरौ देवः पातालतलवासिनौ ।
आहृता ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम् ॥
संप्राप्तवान् श्रुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः ।
अतो भूतयुते तस्मिन्नोपाकरणमिष्यते ।
आसुरं वर्ज्जयेत् कालं वेदाहरणमुद्दयेति ॥”
व्यासोऽपि ।
“श्रवणेन तु यत् कर्म्म उत्तराषाढसंयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥
धनिष्ठासंयुतं कुर्य्याच्छ्रावणं कर्म्म यद्भवेत् ।
तत् कर्म्म सफलं विद्यादुपाकरणसंज्ञकमिति ॥”
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
(रक्षाकर्म्म यथा । उदकुम्भाद्यापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात् तद्यथाः ।
“कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च ।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः ।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ।
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः ।
दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः ॥
पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा ।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ।
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ।
सोमो व्यानमपानन्ते पर्ज्जन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः ।
बलमिन्द्रो बलपतिर्म्मनुर्म्मन्ये मतिन्तथा ।
कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु ।
प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलम् ।
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं खानि ते पान्तु देहन्तव वसुन्धरा ॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् ।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ ॥
एता देहे विशेषेण तव नित्या हि देवताः ।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्वताम् ।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः ।
पितामहकृता रक्षा स्वस्त्यायुर्व्वर्द्धतां तव ॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥”
इति स्वाहा ॥
एतैर्व्वेदात्मकैर्मन्त्रैः कृत्या व्याधिविनाशनैः ।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥”
इति सुश्रुते सूत्रस्थाने पञ्चमेऽध्याये ॥)

रक्षापत्रः, पुं, (रक्षार्थं पत्रमस्य ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥ भूर्ज्जत्वचि, स्त्री ॥

रक्षिका, स्त्री, (रक्षैव । रक्षा+स्वार्थे कन् । टापि अत इत्वम् ।) रक्षा । यथा,—
“अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् ।
स सर्व्वदोषरहितः सुखं संवत्सरं वसेत् ॥”
इति हरिभक्तिविलासे १५ विलासः ॥

रक्षितं, त्रि, (रक्ष+क्तः ।) कृतरक्षणम् । तत्-पर्य्यायः । त्रातम् २ त्राणम् ३ अवितम् ४ गोपायितम् ५ गुप्तम् ६ । इत्यमरः ।३।१।१०४॥
(यथा, मनुः । ११ । २३ ।
“कल्पयित्वास्य वृत्तिञ्च रक्षेदेनं समन्ततः ।
राजा हि धर्म्मषड्भागं तस्मात् प्राप्नोति रक्षितात् ॥”
क्ली, भावे क्तः । रक्षा ॥ * ॥ स्त्रियां टाप् । अप्सरोविशेषः । यथा, महाभारते ।१।६५।५०।
“अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ।
अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा ॥”)

रक्षिता, [ऋ] पुं, (रक्षतीति । रक्ष+तृच् ।) रक्षाकर्त्ता । यथा,—
“न्यायवर्त्ती लोकज्ञो देशोत्पत्तिविशारदः ।
कृतज्ञस्तु भृत्यानां श्रेयः स्यादेव रक्षिता ॥”
इति मात्स्ये १८९ अध्यायः ॥

रक्षिवर्गः, पुं, (रक्षिणां वर्गः समूहः ।) राजाङ्ग-रक्षकगणः । तत्पर्य्यायः । अनीकस्थः २ । इत्य-मरः । २ । ८ । ६ ॥

रक्षोघ्नं, क्ली, (रक्षो राक्षसं हन्तीति । हन्+टक् ।) काञ्जिकम् । इति हेमचन्द्रः ॥ हिङ्गु । इति राजनिर्घण्टः ॥

रक्षोघ्नः, पुं, (रक्षो हन्तीति । हन्+टक् ।) भल्लातकवृक्षः । इति त्रिकाण्डशेषः ॥ श्वेत-सर्षपः । इति रत्नमाला । रक्षोघ्नमन्त्रो यथा,—
“स्थाने हृषीकेश तव प्रकीर्त्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्व्वे नमस्यन्ति च सिद्धसंघाः ॥”
इति भगवद्गीतायाम् । ११ । ३६ ॥
“स्थाने इत्ययं युक्तमित्यर्थे । हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक यतस्त्वमेवाद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकीर्त्त्या महत्या कीर्त्त्या [illegible] जगत् [illegible] मैव प्रकृष्टं [illegible] मित्यर्थः । तथा सर्व्वं जगत् [illegible] यत्र रक्षांसि भीतानि इति [illegible] सर्व्वात्मा दिशः पलायन्ते इति [illegible] यथा सर्व्वे सिद्धाः [illegible] नमस्यन्ति चेति यत्तदपि युक्तमे[illegible] प्रकीर्त्त्या इत्यन्वयः । स्थाने [illegible] अयं श्लोको रक्षोघ्नमन्त्रः प्रख्यात[illegible] तट्टीकायां मधुसूदनसरस्वती । ([illegible] त्रि । यथा सुश्रुते । १ । १ । [illegible] धूपयेद्रक्षोघ्नैश्च मन्त्रै रक्षां कुर्व्वीत [illegible]

रक्षोघ्नी, स्त्री, (रक्षो हन्तीति । ङीप् ।) वचा । इति रत्नमाला ।

रक्षोजननी, स्त्री, (रक्षसां जननी ।) इति त्रिकाण्डशेषः । रात्रि[illegible]

रक्षोहा, [न्] पुं, (रक्षो हन्तीति । गुग्गुलुः । इति राजनिर्घण्टः । [illegible] स तु ऋग्वेदस्य १० मण्डलस्य १६२ ऋषिः । राक्षसहन्तरि, त्रि । ऋग्वेदे । १० । ८७ । ६ ।
“शिप्रः स उच्यते [illegible]
“रक्षोहा रक्षोहन्ता ।” तद्भाष्ये

रक्ष्यः, पुं, (रक्ष+ [illegible] मह् ।” ३ । ३ । ९० । इति यङ् ।) [illegible] इत्यमरः । ३ । २ । ८ ॥

रख, सर्पणे । इति कविकल्पद्रुमः । ([illegible] सक०-सेट् ।) रखति । इति दुर्गादासः ॥

रखि, इ सर्पणे । इति कविकल्पद्रुमः । ([illegible] सक०-सेट् ।) इ, रङ्खति । [illegible]

रगि, इ गतौ । इति कविकल्पद्रुमः । ([illegible] सक०-सेट् ।) इ, रङ्गति । इति दुर्गा[illegible]

रग, क स्वाद व्यापने । इति [illegible] (चुरा०-पर०-सक०-अक०-च-सेट् ।) [illegible] रागयति । इति दुर्गादासः ॥

रग, म ए शङ्के । इति कविकल्पद्रुमः । (पर०-अक०-सेट् ।) म, रगयति । ए, शङ्कः शङ्का । रगति दोषी कुरङ्ग[illegible] दुर्गादासः ॥

रघ, इ क भासि । इति कविकल्पद्रुमः । (पर०-अक०-सेट् ।) इ क, रङ्घयति । दीप्तौ । इति दुर्गादासः ॥

रघि, इ ङ गमने । इति कविकल्पद्रुमः । (आत्म०-सक० सेट् ।) इ, रङ्घते । ङ, [illegible] इति दुर्गादासः ॥

रघुः, पुं, (लङ्घति ज्ञानसीमां प्राप्नोतीति । [illegible] + “लङ्घिबंह्योर्नलोपश्च ।” उणा० [illegible] इति कुः नलोपश्च । “ब्रह्ममूलमध्यात्[illegible] मधुलोनां वा लो रत्वमापद्यते [illegible]

[illegible]

इति रघुवंशे महाकाव्ये । १ । ५५ ।

[illegible]

१ च रघुवंशे । ५ सर्गे ।

“अथ [illegible] रघुः [illegible]
[illegible] ।
[illegible]
[illegible] ।”
“मन वाजिनवमेधसा
[illegible] यशः ।
[illegible]
पुनर्दं [illegible] रघुः ।” ७ ।

[illegible] । यथा,

“रघुरपि यातं नरपति च यातम्
सम च टीका जाति च याता ।”

[illegible] “रघोः यातं यद्दे यद्दे ।” इत्याद्युदाहृतौ ।

[illegible]ति च ।

[illegible]रङ्घयतीति । राजा प्रभुः । [illegible] ‘राजा [illegible]’ इति रघुः ।” इति उणादिकोषे उज्ज्वलदत्तः । १ । २९ । ७ । रघु-[illegible] । मत [illegible] । यथा, रघुवंशे । १ । ९ ।

‘रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।”

[illegible] द्रुतं गच्छतीति । शीघ्रगामिनि, त्रि । यथा, भट्टौ । ४ । ३० । २९ ।

“धन्वी स यातो रघुनन्दनाम: ।”
“रघुः शीघ्रगामी ।” इति तट्टीकायां भरतः ।”)

[illegible]कारः, पुं· (रघुं तदाख्यं काव्यं करोतीति । कृ+“कर्मण्यण् ।” ३ । २ । १ । इति अण् ।) कालिदासः । इति त्रिकाण्डशेषः । (यथा, आर्यासप्तशत्याम् । ३९ ।

पूर्णविभिन्नवर्णा [illegible]रघुकारे:।

[illegible] ।”

[illegible]

रघुनन्दनः, पुं, (रघुं [illegible]) श्रीरामः । इति [illegible] । (यथा, [illegible] । १ । ३ । ७३ ।

“[illegible] ।
[illegible] ।”

[illegible]

“[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।”

इति प्रसन्नराघवम् ।

[illegible])

रघुनाथ:, पुं, (रघूणां नाथः । [illegible]) श्रीरामः । इति शब्दरत्नावली । (यथा, रघुः । १५ । ४९ ।

“रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना ।
महौजसा संयुगे [illegible] ।”)

रघुपतिः, पुं, (रघूणां पतिः ।) श्रीरामः । यथा,

“यदुपते: क्व गता मथुरा पुरी
रघुपते: क्व गतोत्तरकोशला ।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय ।”

इति [illegible] ।

(कियाचित् पण्डितानां नाम । यथा, रघुनाथशिरोमणिः अयम् नैयायिकः [illegible] । रघुनाथ [illegible] टीकाकारः । रघुनाथ तर्कवागीशः । रघुनाथ [illegible] । रघुनाथ [illegible] । अयं हि [illegible] प्रियभक्तः आसीत् । [illegible] । अयं खलु [illegible]

[illegible]

इति रघुवंशे महाकाव्ये । १ । ९ ।

([illegible] ।

[illegible] । यथा,—

“[illegible]
रामः ।”

इति रामायणम् ।

रघुवंशतिलकः, पुं, (रघुवंशे तिलक इव शोभाकरत्वात् ।) श्रीरामः । यथा,—

“जयति रघुवंशतिलकः कौशल्याहृदयनन्दनो
रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ।”

इति रामायणम् ।

रघुवरः, त्रि, (रघुषु वरः श्रेष्ठः ।) रघुश्रेष्ठः । यथा, रामायणे ।

“रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्मिकम् ।”

रघूद्वहः, पुं (उद्वहतीति । उत्+वह+अच् । रघूणां उद्वहः श्रेष्ठः ।) श्रीरामः । इति शब्दरत्नावली ।

रङ्कुः, पुं, (रमते सुखमस्मिन् । रम्+“बाहुलकात् रञ्जेरपि कुः ।” इति कुः । उज्ज्वलदत्तः । १ । ३० ।) हरिणः । मृगः । इति मेदिनी । के, ११ ।

रङ्कु, पुं, (रमते इति । रम्+बाहुलकात् कुः ।) मृगविशेषः । रङ्कवः । १ । ५ । १० । म हु [illegible] । इति राजनिर्घण्टः ।

रङ्गं, क्ली पुं, (रज्यतीति । रञ्ज+अच् । रज्यते अस्मिन् । रञ्ज+अधिकरणे घञ् वा ।) धातुविशेषः । रांङ्ग इति भाषा । तत्पर्यायः । वङ्गः २ त्रपुम् ३ आलूकम् ४ नागम् ५ मधुरम् ६ हिमम् ७ गुरुपत्रम् ८ पिच्चटम् ९ पूतिगन्धम् १० । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । हिमत्वम् । कषायत्वम् । लवणरसत्वम् । मेहघ्नत्वम् । कृमिवातमूत्रहरत्वम् । कान्तिकरत्वम् । रसायनत्वम् । सद्दीप्तौ यथा,—

“श्वेतं गुरु मधु मसृणं स्निग्धमुष्णं हिमम् ।
सपवनकरं कान्तं मधुवेदनाहरम् ।
खुरकं मिश्रकाख्यं द्विविधं वङ्गमुच्यते ।
उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतम् ।”

इति राजनिर्घण्टः ।

तस्याशुद्धस्य दोषमाह ।

"वङ्गो विधत्ते खलु शुद्धिहीन-
स्तथा क्षयकश्च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं
पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥
विषोपमं रक्तविकारहन्द्वं
क्षयञ्च तक्कृच्छ्र कफज्वरञ्च ।
मेहाश्मरीविद्रधिसुख्यरोगान्
नाशोऽपि कुर्य्यात् कथितान् विकारान् ॥"

तस्य शोधनमभिधीयते ।

"वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्यान्नविद्रुधेऽपि च त्रिधा ॥
तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ * ॥

अथ वङ्गस्य मारणविधिः ।

"मृत्पात्रे द्राविते वङ्गे चिञ्चाश्वत्थत्वचो रजः ।
क्षिप्त्वा वङ्गचतुर्थांशमयोदर्व्या प्रचालयेत् ।"
चिञ्चा अम्लिका । रजश्चूर्णम् । अयोदर्व्वी कर-छुली ।

"ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्द्दयेत् ॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ।
तालेन दशमांशेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"

एवं मारितस्य वङ्गस्य गुणाः ।

"वङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रिमीन् ।
निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"
इति भावप्रकाशः ।

(अपराञ्च ।
"वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदः श्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रङ्गः, पुं, (रञ्ज + घञ् ।) रागः । (यथा, महा-भारते । १ । ११ । १० ।

"यथो यथा रङ्गवशं प्रयाति
तथा च तेषां वहनश्रुतेति ।")

नृत्यम् । (यथा विष्णुपुराणे । ५ । २ । ५० ।
"रङ्गोरवोरे केशिनः कृष्णाख्यो मारुतस्तथा ।
यस्य मार्द्दितक्रोधस्य पर्व्वतो च यो द्विजः ॥"
रज्यते अस्मिन् रङ्गो च । रञ्ज + अधि-करणे घञ् ।) रङ्गभूमिः । इति मेदिनी । गे, ४१ । (यथा, हरिवंशे । १० । ४१ । १० ।
"युद्धेष्वा ... रङ्गं गतः कारणः ॥")
... । इति हेमचन्द्रः । (यथा, ... ।

"इयं रङ्गप्रवेशेन कलानाञ्चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरमैपुण्यमाश्रिता ॥"
लक्षणया नाट्यस्थानस्थितो जनः । यथा, अभि-ज्ञानशकुन्तले १ प्रस्तावनायाम् ।
"सूत्रधारः । आर्य्ये ! साधु गीतम् । अहो रागापहृतचित्तवृत्तिरालिखित इव विभाति सर्व्वतो रङ्गः । तदिदानीं कतमं प्रयोगमाश्रित्यै-नमाराधयामः ॥" रणमार्गः । यथा, देवी-भागवते । ७ । २९ । ३ ।
"अवतार्य्य सदा रङ्गे तां भार्य्यां नृपसत्तमः ॥")
टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥

रङ्गकाष्ठं, क्ली, (रङ्गं रञ्जितं काष्ठमस्य ।) पत्त-ङ्गम् । इति राजनिर्घण्टः ॥

रङ्गजं, क्ली, (रङ्गात् जायते इति । जन् + डः ।) सिन्दूरम् । इति रत्नमाला ॥

रङ्गजीवकः, पुं, (रङ्गेण रञ्जनकार्य्येण जीवतीति । जीव् + ण्वुल् ।) चित्रकारः । इति शब्द-रत्नावली ॥ नाट्यकारश्च ॥

रङ्गदः, पुं, (रङ्गं द्यति छिनत्तीति । दो + कः ।) टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥

रङ्गदा, स्त्री, (रङ्गद + टाप् ।) स्फटी । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा ।
रङ्गदृढा रङ्गदा च दृढा रङ्गापि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रङ्गदायकं, क्ली, (रङ्गस्य दायकम् ।) कङ्कुष्ठम् । इति राजनिर्घण्टः ॥

रङ्गदृढा, स्त्री, (रङ्गवत् दृढा ।) स्फटी । इति राजनिर्घण्टः ॥

रङ्गपत्री, स्त्री, (रङ्गं रङ्गार्थं पत्रमस्याः । ङीष् ।) नीलीवृक्षः । इति राजनिर्घण्टः ॥

रङ्गपुष्पी, स्त्री, (रङ्गं रञ्जितं पुष्पमस्याः ।) नीलीवृक्षः । इति राजनिर्घण्टः ॥

रङ्गबीजं, क्ली, (रङ्गं बीजं उत्पत्तिकारणमस्य ।) रूप्यम् । इति शब्दरत्नावली ॥

रङ्गभूतिः, स्त्री, (रङ्गस्य रागस्य नीरिमुखः भूतिः शोभात्र ।) कोजागरपूर्णिमा । इति शब्द-रत्नावली ॥

रङ्गभूमिः, स्त्री, (रङ्गस्य भूमिः ।) मल्लभूमिः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३४ । ८ ।
"वसुघे समाने च तदर्थं वदतां वरः ।
रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥"
रङ्गभूमिविवरणं यथा, अश्ववैद्यके । ७ । ११-१२ ।
"प्राप्तां शुक्तिकाश्चैव पाषाणोदकसंयुताम् ।
हस्तकाष्ठसमायुक्तां रङ्गभूमिन्तु वर्ज्जयेत् ॥
समाञ्च निम्नाञ्चैव किञ्चित् पांशुसमन्विताम् ।
एकान्ते विजने रम्ये रङ्गभूमिन्तु कारयेत् ॥")
नाट्यभूमिश्च ॥

रङ्गमल्ली, स्त्री, (रङ्गाय रागाय मल्ली ।) वीणा । इति शब्दरत्नावली ॥

रङ्गमाणिक्यं, क्ली, (रङ्गं रञ्जितं माणिक्यम् ।) माणिक्यरत्नम् । इति राजनिर्घण्टः ॥

रङ्गमाता, [ऋ] स्त्री, (रङ्गस्य ... कुट्टनी । लाक्षा । इति मेदिनी । ते, ...

रङ्गमातृका, स्त्री, (रङ्गमातृ + स्वार्थे ... लाक्षा । इति त्रिकाण्डशेषः ॥

रङ्गलासिनी, स्त्री, (रङ्गेण रागेण ... अस्याः इति । लस + णिनि ।) ... इति शब्दचन्द्रिका ॥

रङ्गशाला, स्त्री, (रङ्गस्य शाला ।) ... इति शब्दरत्नावली । नाट्यघर ...

रङ्गाङ्गा, स्त्री, (रङ्गं रङ्गार्थमङ्गमस्याः ... इति राजनिर्घण्टः ॥

रङ्गाजीवः, पुं, (रङ्गो ... तीति । जीव् + अच् । यद्वा, ... जीवोऽस्य ।) चित्रकरः । इत्यमरः । २ । ... नटः । इति हेमचन्द्रः । ३ । ५ ...

रङ्गावतारकः, पुं, (रङ्गे सङ्गीतस्थाने ... तीति । तॄ + ण्वुल् । यद्वा ... तारयतीति । तॄ + णिच् + ण्वुल् ... तारी । तत्पर्य्यायः । शैलूषः २ ... वेशी ४ भरतपुत्रकः ५ धात्रेयु ... जीवः ७ जायाजीवः ८ नटः ९ ... कृशाश्वी ११ । इति हेमचन्द्रः । ... गीतवाद्यादिना तद्गुणतया ... प्रायश्चित्तविवेकः ॥ ... शरण्यजीवी । इति कुल्लूकभट्टः ॥ प्रायश्चित्तं यथा,—
"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदा ... कीशकोटावपन्नञ्च पदा स्पृष्टञ्च काम ...
इत्युपक्रम्य,—
"कर्म्मारस्य निषादस्य रङ्गावतारक ... सुवर्णकर्त्तुर्वेणस्य शस्त्रविक्रयिणस्त ...
इत्यादुक्ता,—
"य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परि ... तेषान्त्वगस्थिरोमाणि वदन्त्यन्नं मनी ... भुक्तातोऽन्यतमस्यान्नममत्या ... मत्या भुक्त्वा चरेत् कृच्छ्रं ...
इति मानवे ॥

रङ्गावतारी, [न्] पुं, (रङ्गमवतरती ... णिनिः ।) नटः । इति जटाधरः । ... याज्ञवल्क्यसंहितायाम् । २ । ७२ ।
"स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिश ... रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियः ...

रङ्गारिः, पुं, (रङ्गस्य तदाख्यधातो ... करवीरः । इति रत्नमाला ॥

रङ्गिणी, स्त्री, (रङ्गोऽस्त्यस्याः इति ... इनिः । स्त्रियां ङीप् ।) शतमूली ... जटाधरः । कैवर्त्तिका । इति ... रङ्गविशिष्टे, त्रि ॥

रङ्कः, [स्] क्ली, (रंह्यते प्राप्यते इति ... + "अघिरघिभ्यामसुन् ।" इति उणा ... ज्ज्वलदत्तः । ४ । २१२ ।) रंहः । वेग । भरतादिरूपकोषः ॥ (यथा, रघुवंशे ।

।, मघो सुरारौ सगदृप्तदानवे निरङ्कुशस्य
यस्य ।”)
[क रुद्धम् । इति कविकल्पद्रुमः ।
रत्न चुरा०-पर०-सक०-सेट् ।) रचयति ।
न दुर्गादासः ।
स्त्री, (रचि + भावे ल्युट् ।) निर्म्माणम् ।
नम् । यथा, रघुवंशे । १ । ६ ।
च राय कुमारपतिधरः मन्दमंसुद्दिं गिरां
तेि पदवन्द एव प्रकरः श्लाघ्यो दुरूहदृते ।
रोऽकरमनुपमेयरचनैराधार्य्यगीतार्थैः
र्य कोऽपि न विबुधः सुरपितो धीयो कवि-
क्ष्मापतिः ।”
स्त्री, (रच्यते इति । रच + णिच् + “ण्यास-
न्थो युच् ।” ३ । ३ । १०७ । इति युच् ।)
मप्रकारादिः यथावत्स्थापनम् । तत्प-
यः । परिस्पन्दः २ । इत्यमरः । २ । ६ ।
७१ । परिस्यन्दः ३ । इति भरतः । (यथा,
हितोपदेशे । ३ । १२८ ।
धाममहारचना इव विष्णुपदेन च ।
स्वाख्यानमीषध्दिव दिविषदो दयितान्विते ।”)
ग्रन्थैस्थापनम् । तत्पर्य्यायः । निवेशः २
तिः ३ । इति हेमचन्द्रः । ३ । ४११ ।
यथा, महाभारते । ८ । ४६ । १० ।
च दृष्टस्य रचनामन्तरस्य यथागतः ।”)
र्मितिः । कृतिः । यथा,—
साधारणचमत्कारकारिणी रचना हि
र्मितिः ।” इत्यलङ्कारकौस्तुभे १ किरणः ।
र्य्यायः । सन्दर्भः २ गुम्फः ३ ग्रन्थनम् ४ ।
न्थनम् ५ । इति हेमचन्द्रः । ३ । ३१७ ।
रचनः । यथा, श्रीमद्भागवते । ३ । ८ । १० ।
“दैवाहतार्थरचना ऋषयोऽपि देव
युष्मत्प्रसङ्गविमुखा इह संसरन्ति ।”
दैवाहताः सर्व्वतः प्रतिहताः अर्थानां
चनाः अर्थार्थोद्यमाः येषाम् ।” इति तट्टी-
यां श्रीधरस्वामी । रचयतीति । रचि + ल्युः ।
प् । विश्वकर्म्मणो भार्य्या । यथा, श्रीमद्भाग-
ते । ६ । ६ । ४४ ।
वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका ।
मन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान् ।”)
तः, त्रि, कृतः । रचधातोः कर्म्मणि क्तप्रत्य-
न निष्पन्नः । यथा,—
शिरः सद्ब्रह्मीयोऽभिनवरचनैर्मोरपदवैः
प्रयाणपदद्योतिर्विरचयति निर्व्याजविजयम् ।”
इति पुष्पदन्तकृतस्तुतिः ।
स्त्री, (रज्यतीति । रञ्ज + घञ् । निपा-
तात् सिद्धम् ।) क्षौद्रतृणम् । इति शब्द-
रत्नावली ।
, पुं, (रज्यतेऽनेनेति । रञ्ज + घञ् । निपातना-
त्साधुः ।) परागः । (यथा, गी० रामायणे ।
१ । ५८ । २८ ।
“मधुप्रमत्तैर्मधुपैः स्मरान्तरविनिःसृतः ।
विवाहइव वीतासा वायुर्वाति मनोहरः ।”)

रेणुः । (“अर्थाः पारदपोतिताः ।” इति
उज्ज्वलदत्तः । ४ । १६१) गुणभेदः ।
आर्त्तवम् । इति शब्दरत्नावली ।
(स्कन्दस्य सेनापतिविशेषः । यथा, महाभारते ।
९ । ४५ । ७१ ।
“इत्थं बाहुः सुबाहुश्च रजः कोकिलकस्तथा ।”
वसिष्ठपुत्रः । यथा, विष्णुपुराणे । १ । १ । १० ।
“तथा तस्य विरजो रजस्यापि प्रभृतयः ।”
वसिष्ठपुत्रः ऋषिभेदः । यथा, विष्णुपुराणे ।
१ । १० । १३ ।
“ऊर्ज्जायान्तु वसिष्ठस्य सप्ताजायन्त वै सुताः ।
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ।”)
रजः [स्] क्ली, (रज्यते रजयतीति । रञ्ज् + “भू-
रञ्जिभ्यां कित् ।” उणा० ४ । २१६ । इत्यसुन् ।)
स्त्रीणां मासि मासि योनिनिःसरद्रक्तम् । तत्-
पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ । इत्यमरः ।
२ । ६ । २१ । ऋतुः ४ कुसुमम् ५ रजम् ६ ।
इति शब्दरत्नावली । (यथा, मनौ । ४ । १०७ ।
“रजसा स्त्री मनोदुष्टा सन्न्यासेन द्विजोत्तमः ।”
अस्य स्वरूपं यथा,—
“हृन्नाभिसंस्था नाम शरीरस्थैव देहिनाम् ।
ऋतावृता प्रकृतेन रजस्तदभिधीयते ।
रजादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते ।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ।”
“नारीणां रजसि क्षीयमाणे शनैः शनैः
स्तनयोर्ध्नयोरभिवृद्धिर्भवति ।” इति सुश्रुते
सूत्रस्थाने १४ अध्यायः ।
“मासि मासि रजःस्त्रीणां रसजं स्रवति त्र्यहम् ।
वत्सराद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ।”
इति वाग्भटे शारीरस्थाने प्रथमेऽध्याये ।)
प्रकृतेर्गुणविशेषः । तत्तु रागद्वेषात्मकं दुःख-
हेतुः । रजोऽहङ्कारः पुंसिङ्गोऽपि । यथा,—
“रजोऽयं रजसा साई स्त्रीपुष्पगुणधूलिषु ।”
इत्यमरदत्तः । इति भरतः ।
महाभारतमते दुःखकरगुणः । तस्य धर्म्माः
कामः क्रोधः लोभः मानः दर्पश्च । इति मोक्ष-
धर्म्मः ।
“तथा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः
स्मृताः ।”
अभिसंरम्भो हिंसाभिनिवेशः । गीतायामधिक-
मस्ति । यथा च ।
“काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।”
इति श्रीमद्भगवद्गीतायाम् । ३ अध्यायः ।
अपि च ।
“सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।”
“रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय ! कर्म्मसङ्गेन देहिनम् ।”
“सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ।
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।”
“लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ! ।”
“कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ।
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।”
इति श्रीमद्भगवद्गीतायाम् । १४ अध्यायः ।
“सत्त्वं रजस्तम इति छादन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ।
प्रभूतश्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः ।
यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ।
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः ।
यदा मदानृतं तन्द्री निद्रा हिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ।”
इति गारुडे २२७ अध्यायः ।
परागः । इति मेदिनी । से, ३२ । (यथा,
भागवते । ४ । २४ । २२ ।
“पद्मकोषरजो दिक्षु विधिवत्पवनोत्सवम् ।”)
रेणुः । अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ।
(यथा, माघे । २ । ४६ ।
“पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ।”)
निषिद्धानिषिद्धरजो यथा,—
“आयुष्मान् न हैवं यथा सम्मार्ज्जनीरजः ।
तथाजरथस्वानां गवाश्चैव रजः शुभम् ।
अशुभञ्च विजानीयात् खरोष्ट्राजाविकेषु च ।
गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः ।
एतद्रजो महाशस्तं महापातकनाशनम् ।
अजाश्वः खररजो यत्तु सम्मार्ज्जनीरजः ।
एतद्रजो महापापं महाकिल्विषकारणम् ।”
इति गारुडे ११४ अध्यायः ।
(रात्रिः । इति निघण्टुः । १ । ७ । उदकम् ।
यथा, ऋग्वेदे । १ । ५६ । ५ ।
“वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव
आतासु वर्हणा ।”
‘रज उदकम् ।’ इति तद्भाष्ये सायणः ।
लुदकम् । यथा, तत्रैव । १० । ८२ । ४ ।
“असूर्ते सूर्ते रजसि निषत्ते ये भूतानि सम-
कृण्वन्निमानि ।”
“रजसि लोके ।” इति तद्भाष्ये सायणः ।
ज्योतिः । यथा, तत्रैव । १० । ३२ । २ ।
“वीन्द्र यासि दिव्यानि रोचना विपार्थिवानि
रजसा पुरुष्टुत ।”
“रजसा कार्य्येण ज्योतिषा । विद्युद्वदेव
यदा रजःशब्दाधर … पार्थिवान्
लोकान् ।” इति तद्भाष्ये

रजःप्रभ:, पुं, (रजसि दिने। प्रौ + "अधिकरणे शेतेः।" ३। २। १५। इति अच्।) कुक्कुरः। इति शब्दमाला। (भूमिशायिनि, त्रि। रजःशयी। यथा, वाजसनेयसंहितायाम्।
[illegible]
"रजःप्रभा रजतमयीति।" तद्भाष्ये महीधरः।)
रजःसारथि:, पुं, (रजसो सारथिरिव।) वायुः। इति शब्दरत्नावली।
रजत:, पुं, [illegible]
[illegible]

वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्पते।
यथार्थ्यपितृभोज्यादौ पितॄणां राजतं मतम्।
शिवनेत्रोद्भवं यस्मात्तत् पितृवल्लभम्।
अमङ्गलं तद्यत्नेन देवकार्य्येषु वर्ज्जितम्॥"
इति मात्स्ये १७ अध्यायः॥
रजतद्युति:, पुं, (रजतस्येव द्युतिरस्य।) हनूमान्। इति शब्दरत्नावली॥
रजतप्रस्थ:, पुं, (रजतकल्पमयः महत् शुभ्रो वा प्रस्थः सानुरस्य।) कैलासपर्व्वतः। इति त्रिकाण्डशेषः॥
रजताचल:, पुं, (रजतप्रधानोऽचल इव। शाकपार्थिवादिवत् समासः।) रौप्यपर्व्वतः। तस्य परिमाणं दानविधिश्च यथा,—
"राजतो नवमस्तद्वद्दशमः शर्कराचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रसादादमरो याति सोमलोकं द्विजोत्तम॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः॥
अशक्तो विंशतेरूर्द्ध्वं कारयेत् शक्तितः सदा।
विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत्॥
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानतः।"
पूर्व्ववत् रजताचलम्।
"कलधौतमयांस्तद्वल्लोकेशान् स्थापयेद्बुधः॥
ब्रह्मविष्ण्वर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मयः।
राजतं स्यादयद्यस्यान्यत् सर्व्वं तदपि काञ्चनम्।
शेषञ्च पूर्व्ववत् कुर्य्यात् होमजागरणादिकम्।
दद्यात्तु प्रभाते तु गुरवे रौप्यपर्व्वतम्॥
विष्कम्भशैलान् ऋत्विग्भ्यः पूज्य वस्त्रविभूषणैः।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्विमत्सरः॥
पितॄणां वल्लभं यस्मात् हरीन्द्रस्य शिवस्य च।
रजतं पाहि तस्मान्नः शोकसंसारसागरात्॥
इत्थं निवेद्य यो दद्यात् रजताचलमुत्तमम्।
गवामयुतदानस्य फलं प्राप्नोति मानवः॥
सोमलोके गन्धर्व्वैः किन्नराप्सरसाङ्गणैः।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम्॥"
इति मात्स्ये ० अध्यायः॥
(कैलासपर्व्वतः। यथा, महाभारते।
"रजताचलमध्ये तु कुवेरेश्वर ईरितः॥")
रजताद्रि:, पुं, (रजतमयत्वात् शुभ्रो वा अद्रिः। शाकपार्थिववत् समासः।) कैलासपर्व्वतः। इति हेमचन्द्रः। ४। ९४॥
रजनं, क्ली, (रज्यते इति। रन्ज् + "रञ्जेः क्युन्।" उणा० २। ८१। इति क्युन्। "रजनरजकरजनञ्च।" [illegible] इति [illegible]) रागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। (यथा, महाभारते। [illegible]
"[illegible]")
[illegible] पुं, [illegible]
[illegible]

"रजनी वै कौशेय: [illegible]
यमयात्॥")
रजनि:, स्त्री, (रजनि [illegible]
बाहुलकादनिः। [illegible]
रात्रिः। इत्यमरटीका। (
सरित्सागरे। १८। १३१॥
"रजनं [illegible]
आमन्त्री [illegible]
रजनी, स्त्री, (रजनि + [illegible]
रात्रिः। (यथा, महाभारते।
"सा [illegible]
[illegible]
हरिद्रा। (अस्याः पर्य्याया
"हरिद्रा पीतिका [illegible]
मेहघ्नी रजनी पीता [illegible]
इति [illegible]
यथा, मनौ। १२। ६१।
"अथवा: [illegible]
[illegible]
[illegible]
[illegible]
अनुका। इत्यमरः। १। ६। [illegible]
वृहत्संहितायाम्। ३३। ८।
[illegible]
नीलिनी। इति मेदिनी। ने, ११।
रौप्यधनदीभिः। यथा, माघे।
"अनुमती [illegible]
[illegible]
रजनीकर:, पुं, (रजनीं करोति।
चन्द्रः। इति शब्दरत्नावली।
[illegible]
"[illegible]
[illegible]
रजनीगन्धा, स्त्री, (रजन्यां गन्धो
[illegible])
पुष्पविशेषः। इति लोकप्रसिद्धः।
रजनीचर:, पुं, (रजन्यां चरति।
"चरेष्टः।" ३। २। १६। इति
इति शब्दरत्नावली। (यथा,
"न तथा [illegible]
तथा च।
"[illegible]
[illegible]
[illegible]
[illegible]
इति [illegible]
चौरः। यामिकभटः। ([illegible]
यथा, [illegible]
"[illegible]
रजनीजलं, क्ली, (रजन्या जलम्।
इति हारावली। ९७॥

:, पुं, (रजसः स्त्रियाः पुष्पस्य
..।) पुष्पितवृक्षः। इति शब्दचन्द्रिका।
...दूर्व्वां... विस्तरं ज्ञातव्यम्।)
ं, क्ली, (रजसः गुणम्।) प्रदीपः।
ः।१।४।१६॥ (यथा, शान्तरक्षि-
।१४।३११।
...प्राप्नुवन्ति महान्ति रजोगुणे।
...शान्त भुञ्जानं प्रत्यादिश विदेह मा॥")
ता, स्त्री, (रजसा दायते दिवागौ
...) दिवाकिंशुकम्। इति शब्दरत्नावली।
, पुं, (रजोभिः ...। रजस् +
...: मादक... तु विशेषी-
।" ... ...
...) मेघः। निशम्। रजसादि-
।१।१०४॥
, पुं, (रजोधारयतीति। रजस् + "रजः-
...विषयिणो वलच्।" ५।२।११२।
वलच्।) महिषः। इति मेदिनी। ले,
॥ (अस्य पर्य्यायो यथा,—
...पौराणादिः स्यात् बालस्य रजसवलः।
...: कालकायोऽथ जुलायो यमवाहनः॥"
आयवधस्य पूर्व्वस्मिन् द्वितीये भागे॥
रजोयुक्तः। यथा, भागवते।७।१३।१२।
प्रयान् यदीयसी कावेर्या वह्निमाहुतिम्।
...ललितस्याम्॥"
...युक्तः। पृथ्वायुः। यथा, मनुः।
००।
...रोगाधकसमाविद्रं रोगायतनमातुरम्।
...भूतावासमिमं त्यजेत्॥")
ला, स्त्री, (रजोऽस्त्यस्याः। "रजःकृष्या-
...ति।" ५।२।११२। इति वलच्। टाप्।)
...युक्ता। तत्पर्य्यायः। स्त्रीधर्म्मिणी २
...३ आत्रेयी ४ मलिनी ५ पुष्पवती ६
...मती ७ उदक्या ८। इत्यमरः।२।६।२०॥
८ पुष्पहासा १०। इति शब्दरत्ना-
। पुष्पिता ११ अवीरा १२ विषयी १३
...१४। इति जटाधरः॥ म्लाना १५
...१६। इति राजनिर्घण्टः॥ ॥ अथ
...स्वलाया प्रायश्चित्तम्। "काश्यपः।
...स्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि।
...रात्रं निराहारा पञ्चगव्येन शुध्यति॥
...स्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
...रात्रेण विशुद्धिः स्यात् व्यासस्य वचनं यथा॥
...स्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
...रात्रं निराहारा पञ्चगव्येन शुध्यति॥
...स्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
...रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
...कामतश्चरेदेवं ब्राह्मणी सर्व्वजातिषु॥'
...ति रजस्वलाया ब्राह्मण्याः सवर्णरजस्वला-
...र्श एकरात्रोपवासः पञ्चगव्यपानं कामतः।
...कामतस्त्र्यहम्। नक्तव्रतम्। असवर्णरज-
...स्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः।

अकामतस्त्र्यहम्। अनन्तु चतुर्थ्यांद्यामाम
अर्द्धं वाम।
'ब्राह्मणीक्षत्रियाभ्यां संस्पृष्टा ...।
अतिकृच्छ्रं ताम्रचारि प्रायश्चित्तं समाचरेत्॥
निराहारवती स्यात् पञ्चगव्येन शुध्यति।
तां विना तु अतिकृच्छ्रं प्राजापत्यन्तु कारयेत्॥'
इति वचनान्तरदर्शनात् इत्यत्र कामतः॥
अत्र विकल्पोऽपि नास्ति। अत्राह बृहस्पतिः।
'पतितान्त्यजचाण्डालैः संस्पृष्टा स्त्री रजस्वला।
तान्यहानि अतिकृच्छ्रं प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रं तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥'
चतुर्थेऽहनीति शुद्धिकालात् पूर्व्वम्। व्यासः।
'रजस्वला यदा स्पृष्टा श्वजम्बुकरासभैः कचित्।
निराहारा भवेत्तावद् यावत् कालेन शुध्यति॥'
अत्रापि दुष्टजन्तुरात्रिभेदव्यवस्था। वृद्ध-
शातातपः।
'रजस्वला तु ये नार्य्योदकमीक्ष्य' स्पृशति यदि।
स्नात्वा पञ्चगव्यं प्राश्य पूर्ब्बेण शुद्ध्यति पुनः॥'
पञ्चगव्यपानं स्नानञ्च। शौनकसिद्धः। ब्रह्म-
कूर्म्मपुराणः।
'अशौचापवित्तौ भूत्वा यौवनस्थाश्च विशेषतः।
पञ्चगव्यं पिबेत् प्रायश्चित्तकृच्छ्रविधिः स्मृतः॥'
तदशक्तौ पुरातनं दानम्।" इति प्रायश्चित्त-
तत्त्वम्॥ ॥ अपरञ्च।
'शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नाता दैवपैत्र्ययोः।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति॥'
इति शुद्धितत्त्वम्॥
तस्यां गमने पापं यथा,—
"प्रथमे दिवसे कामात् यो हि गच्छेद्रजस्वलाम्।
ब्रह्महत्याचतुर्थांशं लभते नात्र संशयः॥
स पुमान् हि कर्म्मार्हो दैवे पैत्रे च कर्म्मणि।
अधमः स च सर्व्वेषां निन्दितश्चाधमस्तरः॥
द्वितीयदिवसे नारीं यो व्रजेच्च रजस्वलाम्।
कामतः परिपूर्णाञ्च ब्रह्महत्या लभेद्ध्रुवम्॥
व्याजीवनं नाधिकारी पितृविप्रसुरार्च्चने॥
ब्रह्मघ्नोऽयम्... स्यादित्याङ्गिरसभाषितम्॥
तृतीयदिवसे नारीं यो हि गच्छेद्रजस्वलाम्।
स मूढ़ो भ्रूणहत्याञ्च लभते नात्र संशयः॥
पूर्ब्बवत् पतितः सोऽपि न चार्हः सर्व्वकर्म्मसु।
असत्पुत्रो चतुर्थेऽह्नि न गच्छेत्तां विचक्षणः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः॥
अपि च।
"अपूर्व्ये ऋतुकाले तु यो भिगच्छेद्रजस्वलाम्।
रेतसा पितरस्तस्य दह्यन्ते नात्र संशयः॥
एकस्तु पुरुषो याति द्वितीयां काममोहितः।
तृतीयां वा चतुर्थीञ्च सदा स पुरुषाधमः॥
ऋतुकाले तु सर्व्वासां पितृभ्यो भोग इष्यते।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः॥
न गच्छति च यः क्रोधात् मोहाद्वा पुरुषाधमः।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषस्तरन्॥"
इति वाराहे गुह्यकर्म्मवर्णनं नामाध्यायः॥

(अपि च।
"रजस्वलाभिगमनं गदस्य दारुणम्।
रजस्वलाभिगमनं पुंस्त्वस्य भञ्जनम्।
...विन्देत् वर्ज्जयेत् कर्म्मवित्तः॥"
तथा च।
"रजस्वलाभिगमाच्च नलिनाक्षिप्रदाचना।
... ...
... ...
... ...
... ...
रजस्वलां प्राप्तवती ... ।
... ...॥"
इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)
रजिः, पुं, चन्द्रवंशीयराजविशेषः। यथा। "पुरू-
रवसो ... । स राज्ञोऽप्यनर-
युवदेवे। तस्मो यच पुत्रादन्यत्प्रयामास।
...प्रसिद्धाः। रजिः पञ्च
पुत्रशतान्यतुलबलपराक्रमाण्यासन्।" इति विष्णु-
पुराणे ४ अंशे। ८।९ अध्यायौ॥ (राज्यम्।
कन्याविशेषे, स्त्री। यथा, ऋग्वेदे।४।२६।६।
"सं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा
शच्या सचाहन्।"
"रजिं रजनाख्यां कन्यां वा राज्यं वा।" इति
तद्भाष्ये सायणः। रज्जुः। यथा, ऋग्वेदे।१०।
१००।१२। "रजिष्ठया रज्या पश्व आ
गोस्तुतूर्षति पर्य्यग्रं दुवस्युः॥"
"रजिष्ठया ऋजुतमया रज्या रज्ज्वा।" इति
तद्भाष्ये सायणः॥)
रजोबलं, क्ली, (रज इव बलति संवृणोतीति।
बल + अच्।) अन्धकारः। इति त्रिकाण्डशेषः॥
रजोरसं, क्ली, अन्धकारः। इति शब्दरत्नावली॥
रजोहरः, पुं, (रजो हरतीति। हृ + "हरते-
रनुद्यमनेऽच्।" ३।२।९। इति अच्।) रजकः।
इति शब्दमाला॥
रज्जुः, स्त्री, (सृज्यते रज्यते इति। सृज् + "सृजे-
रसुम् च।" उणा० १। १६। इति उः।
असुमागमश्च। धातुसकारलोपश्च। आगम-
सकारस्य जश्त्वम्। दकारः। तस्यापि चुत्वम्।
जकारः। इत्युज्ज्वलः। अप्राप्तिमतेऽचार-
ज्ज्वादीनामिति कथनात् न रुट्।) बन्धन-
साधनवस्तु। दड़ी इति भाषा॥ तत्-
पर्य्यायः। शुल्बम् २ वराटकः ३ वटी ४ गुणः ५
इत्यमरः।२।१०।२७॥ शुल्बा ६। इति
भरतधृतरत्नकोषः॥ शुल्वम् ७ शुल्वः ८ शुल्वा ९
शुल्बी १० सुत्रम् ११ वराटः १२ वटाकरः १३
वटीगुणः १४। इति टीकान्तरम्॥ (तस्या
यासु मूर्त्तिषु षडभिमूर्च्छन्ति रसाः ।
तेषां षण्णां रसानां सोमगुणातिरेकान्मधुरो
रसः पृथिव्यग्निभूयिष्ठत्वादम्लः सलिलाग्नि-
भूयिष्ठत्वाल्लवणो वाय्वग्निभूयिष्ठत्वात् कटुको
वाय्वाकाशातिरेकात्तिक्तः पवनपृथिव्यतिरेकात्
कषायः । एवमेषां रसानां षट्त्वमुपपन्नम् ॥"
इति च चरके सूत्रस्थाने २६ अध्यायः ॥
तथाच ।
"दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः ।
त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते ॥
अविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा ।
रसभेदत्रिषष्टिस्तु धीमता धीमतावचारयेत् ॥
एकैकेनानुगमनं भागशो यदुदीरितम् ।
दोषाणां तत्र मतिमान् त्रिषष्टिन्तु प्रयोजयेत् ॥
यथाक्रमं प्रवृत्तानां द्विकेषु मधुरो रसः ।
यथानुक्रमतो योगानन्यांश्चतुर एव च ॥
नीचानुगच्छति रसो लवणः कटुको द्वयम् ।
तिक्तः कषायमन्वेति ते द्विका दश पञ्च च ॥
तद्यथा । मधुराम्लः । मधुरलवणः । मधुर-
तिक्तः । मधुरकटुकः । मधुरकषायः । एते
पञ्चानुक्रान्ता मधुरेण ॥ अम्ललवणः । अम्ल-

कटुकः । अम्लतिक्तः । अम्लकषायः । एते
चत्वारोऽनुक्रान्ता अम्लेन ॥ लवणकटुकः ।
लवणतिक्तः । लवणकषायः । इति त्रयोऽनु-
क्रान्ता लवणेन ॥ कटुतिक्तः । कटुकषायः ।
इत्येतावनुक्रान्तौ कटुकेन ॥ तिक्तकषाय एक
एवानुक्रान्तस्तिक्तेन । इति पञ्चदशद्विकसंयोगा
व्याख्याताः ॥
आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति ।
षडम्लो लवणस्त्वादौ त्रिकं रसः कटुः ॥
मधुराम्ललवणः । मधुराम्लकटुकः । मधुराम्ल-
तिक्तः । मधुराम्लकषायः । मधुरलवणकटुकः ।
मधुरलवणतिक्तः । मधुरलवणकषायः । मधुर-
कटुकतिक्तः । मधुरकटुकषायः । मधुरतिक्त-
कषायः । इत्येते त्रिकसंयोगा दशानामादौ
मधुरः प्रयुज्यते । अम्ललवणकटुकः । अम्ल-
लवणतिक्तः । अम्ललवणकषायः । अम्लकटु-
कषायः । अम्लकटुकतिक्तः । अम्लतिक्तकषायः ।
एवमेषां षण्णामादावम्लः प्रयुज्यते । लवणकटु-
तिक्तः । लवणकटुकषायः । लवणतिक्तकषायः ।
एवमेषां त्रयाणामादौ लवणः प्रयुज्यते ॥ कटु-
तिक्तकषायः । एवमेकस्यादौ कटुकः प्रयुज्यते ॥
एवमेते त्रिकसंयोगा विंशतिसंख्याताः ॥ चतु-
ष्कान् वक्ष्यामः ।
चतुष्करससंयोगान्मधुरो दश गच्छति ।
चतुरोऽम्लस्तु गच्छेच्च लवणस्त्वेकमेव तु ॥
मधुराम्ललवणकटुकः । मधुराम्ललवणतिक्तः ।
मधुराम्ललवणकषायः । मधुराम्लकटुतिक्तः ।
मधुराम्लकटुकषायः । मधुरलवणतिक्तकटुकः ।
मधुराम्लतिक्तकषायः । मधुरलवणकटुतिक्तः ।
मधुरलवणकटुकषायः । मधुरलवणतिक्तकषायः ।
एवमेषां दशानामादौ मधुरः प्रयुज्यते ॥
अम्ललवणकटुकतिक्तः । अम्ललवणकटुकषायः ।
अम्ललवणतिक्तकषायः । अम्लकटुतिक्तकषायः ।
एवमेषां चतुर्णामम्लः ॥ लवणकटुतिक्तकषायः ।
एवमेकस्यादौ लवणः । एवमेते चतुष्करससंयोगाः
पञ्चदशकीर्त्तिताः ॥ पञ्चकान् वक्ष्यामः ।
पञ्चकान् पञ्चमधुर एकमम्लस्तु गच्छति ।
मधुराम्ललवणकटुतिक्तः । मधुराम्ललवणकटु-
कषायः । मधुराम्ललवणतिक्तकषायः । मधु-
राम्लकटुतिक्तकषायः । मधुरलवणकटुतिक्त-
कषायः । एवमेषां पञ्चानां पञ्चकरससंयोगाना-
मादौ मधुरः प्रयुज्यते ॥ अम्ललवणकटुतिक्त-
कषायः । एवमेकस्यादावम्लः प्रयुज्यते ।
एवमेते षट्पञ्चकसंयोगा व्याख्याताः ॥ षट्कमेकं
वक्ष्यामः । एकस्तु षट्कसंयोगः मधुराम्ललवण-
कटुकतिक्तकषायः । एवमयमेकषट्संयोगः ॥
एकैकश्च षड्रसा भवन्ति । मधुरोऽम्लो लवणः
कटुकस्तिक्तः कषाय इति । भवति चात्र ।
एवा त्रिषष्टिर्व्याख्याता रसानां रसचिन्तकैः ।
दोषभेदे त्रिषष्टिस्तु प्रयोक्तव्या विचक्षणैः ॥"
इत्युत्तरतन्त्रे सुश्रुतेन त्रिषष्टितमेऽध्याय उक्तः ॥
"रसास्तु प्रधानं कस्मादागमादागमो हि शास्त्र-

भ्रूविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्ज्जनम् ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ।
अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः ।
उग्रतावेगरोमाञ्च स्वेदवेपथवो मदः ।
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः ।”

यथा,—

“कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ।”

वीरस्य ।

“उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ।
आलम्बनविभावाश्च विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ।
सञ्चारिणस्तु धृतिमतिगर्व्वस्मृतितर्करोमाञ्चाः ।
स च दानधर्म्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात् ।”

यथा,—

“क्षुद्राः सन्त्रासमेते विजहित हरयः ! क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे ! तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ।”

भयानकस्य ।

“भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ।
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरा तस्य तदत्रोद्दीपनं पुनः ।
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ।
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिमृत्य्वाद्या व्यभिचारिणः ।”

यथा,—

“ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम् ।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।”

बीभत्सस्य ।

“जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ।
[illegible]

तत्रैव कृमिपातादिरुद्दीपनमुदाहृतम् ।
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ।
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ।”

यथा,—

“उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्त्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ।”

अद्भुतस्य ।

“अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ।
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ।”

यथा,

“चित्रं महानेष बतावतारः
क्व कान्तिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्य्यमहो प्रभावः
काप्याकृतिर्नूतन एष सर्गः ।”

शान्तस्य ।

“निर्व्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।”

तथा च ।

“शान्तः शमस्थायिभाव उत्तमप्रकृतिर्म्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ।
निर्व्वेदहर्षस्मरणमतिभूतदयादयः ।”

यथा,—

“अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ।”

इति काव्यप्रकाशसाहित्यदर्पणे । विशेषविस्तृतिस्तु साहित्यदर्पणे तृतीयपरिच्छेदे द्रष्टव्या । तन्त्रशास्त्रेऽपि साधकानामुपासनासौकर्य्यार्थं रसास्वादः रसप्रकारश्च कथ्यते । यथा,—

भैरव उवाच ।

“क्रियाकाण्डप्रकथने तत्त्वं बहुतरं भवेत् ।
किञ्चित्तत्त्वमेतेषां संक्षेपात् कथयामि ते ।
काव्यशास्त्रे नव रसा योगे चाष्टौ रसाः स्मृताः ।
अष्टादशप्रकारा हि विद्यायाः परिकीर्त्तिताः ।
भक्तियोगे नव रसा नवतो विषये स्मृताः ।

रसमाद्या रमा देवि ! [illegible]
भेदं रसानां वक्ष्यामि [illegible]
शृङ्गारवीरकरुणाद्भुतहास्य[illegible]
बीभत्सः शान्तको रौद्रो [illegible]
यमश्च नियमश्चैव आसनं प्राणसंयम[illegible]
प्रत्याहारो धारणा च ध्यानं [illegible]
योगशास्त्रे महादेवि च [illegible]
छन्दः पाठो च वेदस्य मुखं [illegible]
शिक्षा शास्त्रं महेशानि ! तथा
ज्योतिषं देवि तन्त्रं निरुक्तं [illegible]
अङ्गानि [illegible]
धर्म्मशास्त्रं पुराणञ्च विद्या [illegible]
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्व[illegible]
अर्थशास्त्रसमायुक्ता [illegible]
श्रवणं कीर्त्तनं ध्यानं स्मरणं पादसेव[illegible]
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवे[illegible]
इत्थं देवि नव रसा भक्तियोगे प्रकी[illegible]
सगुणब्रह्मनिष्ठाभावाश्चातुर[illegible]
कथिताः परमेशानि विषये नवतो [illegible]
स्वाहाः [illegible]
एतेषु रसभावज्ञा ये ते वै रसिकाः [illegible]
तन्त्रविधिर्व्वेदविधिर्योगविधि[illegible]
बाह्यमानसिकी पूजा विधिश्च परमे[illegible]
पुरश्चर्य्याविधिर्देवि ! कर्म्मकाण्डानि [illegible]
विधा तस्य विधिर्देवि ! प्रातः [illegible]
अनुभूय रसान् सर्व्वान्
साधकः स्थिरचित्तेन [illegible]

इति वामकेश्वरतन्त्रे चतुःपञ्चाश[illegible]

देव्युवाच ।

“मन्त्रप्रकथनं नाथ ! देव प्रकथनं [illegible]
तत्तद्वाक्यानां वचनैश्चित्तं मोहयसीव मे ।
साम्प्रतं संशयच्छेदकारकं ब्रूहि मे प्रभो ।
आश्चर्य्याख्यानमेतं हि श्रवणात् कौतुकं म[illegible]

भैरव उवाच ।

तन्त्रोक्तं वेदवाक्यञ्च सर्व्वशास्त्रस्य कारण[illegible]
भेदं रसानां वक्ष्यामि शृणुष्वावहिता [illegible]
शृङ्गारो वीरको धैर्यस्त्रिंशो करुणा[illegible]
शृङ्गारादिश्चादिश्च अपि शृङ्गारतो [illegible]
शृङ्गारस्तु यदा देवी परमात्मैकरूपकः [illegible]
तदैव परमा शान्ती बहुत्वं संप्रपद्यते ।
तेषां प्रकरणार्थेषु शृणु प्राणाधिके ! [illegible]
पादं विना शरीरस्य न गतिर्व्विद्यते प्रि[illegible]
छन्दसा वेदमार्गे तु प्रविशेत् कदाचन [illegible]
अलङ्कारं विनाच्छन्दो न शोभेत प्रियं [illegible]
चक्षुः परोक्षभेदः स्यात् ज्योतिःशास्त्रं [illegible]
चन्द्रसूर्य्यस्य ग्रहणात् ज्योतिः प्रत्यक्ष[illegible]
वेदशाखा निरुक्तं स्यात् शाखाभिन्नं [illegible]
गानकार्य्ये श्रूयमाणे भक्तिर्भवति [illegible]
तदैव गानकृत्यञ्च सुखनाशिकयोर्भवेत् [illegible]
गानं विना न शुद्धं स्यात् शुद्धं गानेन [illegible]
शिक्षाशास्त्रं नाटकादि शब्दव्याकरणं [illegible]
अविनाभावसम्बन्धात् द्वयोरेव [illegible]

: दद्रुकण्डूश्च: रक्तदोषापहारकः ।
...रङ्गं वेदना तत्र निर्दिष्टं पुरम् ।
...न जीवन: प्रसारार्थविचारकम् ।
...दशरथादिभिः समुत्पादितः ।
...त्पाति शिवेन प्रदत्तं रसनं प्रिये ॥
...पदौ जीव ज्वालार्कसन्निभः ।
...र्ण चतुर्णां शार्दूलं रसायनम् ।
...लाभको हिंदि दुर्लभो च माधव: ।
...रसैन कृतादिपलप्रस्थैः ।
...भादिना देवि । दक्षाभ्यहानादिना ।
...दपो वनिताद्यं पुनर्विज्ञानदर्शनाम् ।
...कत्पूर्णं देवि । तत्रापि रसायनम् ।
...र्न दशांशाकृत् मयथा गन्धकीलनम् ।
...र्न: पादर्दोषो देवी नष्टानिर्देशं ।
...भि सया भक्तो रसोनायस्य जायते ।
...न योगं शतवत्स सर्वादिको भवेद्यतिः ।
...नदेव सर्वदानि । पूर्वेव वर्जितं सदा ।
...पूर्व रसान् सर्वान् पञ्चपञ्चाशन: प्रिये ।
...पदे कर्मयोगेषु निष्कामो भवति प्रिये ॥
...भाषि पलमात्रं तेन हन्यति देवता ।
...दी देवं समाश्रित न च कर्मे परिवर्जित् ।
...का क्रिया समाप्तैव देवीयोगादिवर्जिता ।
...तज्ज्ञानरसानन्दात् जीवन्मुक्तो भवेद्ध्रुवम् ॥"
इति वामकेश्वरतन्त्रे चतुःपञ्चाशत् पटलः ।
...स्य परब्रह्मस्वरूपत्वमप्युक्तम् । यथा,—
रसो वै सः ।" इति श्रुतिः । सन्ध्यासमीरेऽपि ।
...पो ज्योती रसोऽमृतं ब्रह्म ।"अत्र भाष्यक-
...कैव दलायुधः । "स एव ब्रह्मस्वरूपो भर्गो रसः
...दर्शनाद्यादिषु सारांशः च स एव रस-
...र्पेण प्रतीयते । तथा च योगियाज्ञ-
...क्यः ।
...दर्शनादिष्वाधारत्वं रसरूपेण तिष्ठति ॥"
...दिजनचन्द्रगीतायामपि ।
"रसोऽहमप्सु कौन्तेय इति ॥")
...यम् । (यथा, सुदाराक्षसे ९ अङ्के ।
...ये सत्वेषु रसेषु च प्रयोजिताः तेरव ते
पातिताः ॥")
...वीर्यम् । गुणः । रागः । (यथा,—
"कविता कोमलवनिता
रचयति रसिकं रसेन मिलिता ।
सा यदि दुर्जनहस्ते
पतिता प्रतिपदमसा संभ्रममया ॥"
इत्युद्भटः ॥)
...द्रवः । इत्यमरः । ३ । ३ । २२६ ॥ गन्धरसः ।
(तत्पर्यायो यथा,—
"विहानं गोलः पिण्डकश्च पिण्डो बोलो रसो
रसः ॥")
...जलम् । (यथा, रघौ । १ । १८ ।
"प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥")
पारदः । इति मेदिनी ॥ ("तत्र रसप्राधान्य-
माह ।

...सारोपमोऽसौ त्रिदोषघ्नः रसायनः ।
...द्विषशमनो योगवाही महारसः ॥
...सुहृत् शिवतुल्यः सर्वलोकहितः सदा ।
...निर्जितधातुः रसः सर्वशास्त्रसम्मतः ॥
...प्रोक्तः सर्ववर्णानां व्याधिनाशकः ।
...शिवरसो धनं कीर्तिः सुखानि प्रयच्छति ॥"
अथ रसपर्यायमाह ।
"रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः ।
शिवबीजो रसः ख्यातः नामान्येवं रसस्य तु ॥"
मतान्तरम् ।
"शिववीर्यं रसः सूतः पारदश्च रसेन्द्रकः ।
रसानि रसनामानि तथान्यानि यथा प्रिये ॥"
यथा प्रिये इत्यनेन शिवपर्यायाण्यपि रस-
वाचकानि ॥ * ॥ अथ रसपूजनम् ।
"अतः सुकीर्णं बहिरन्तरे यो
मध्याहृतसूर्यप्रतिमप्रकाशः ।
प्रकाशयेत् ध्रुवः परिमालरश्च
शिवो न योज्यो रसवत्संविद्धि ॥
भागो वह्निः भागो वह्निस्थानेषु विषं गिरिः ।
चाञ्चल्यमित्येते दोषा निसर्गाः पारदे स्थिताः ॥
मलं पुरं तथा नागं दाहं मौर्यं च नाशनम् ।
मरणं जडता स्फोटं कृमिरोगे क्रमादिमान् ॥
तस्मादस्य संशुद्धिं विदध्याद्भिषजां वरः ।
शुद्धोऽयममृतं साक्षाद्दोषयुक्तो रसो विषम् ॥"
"प्रातः मध्याह्नं सायं पञ्चविंशद्दिनेषु च ।
पञ्चैव वा सप्तैव पलार्द्धं कर्षमेव च ॥
कर्षार्धं मितं न वर्णयेत् रससंस्कारं उत्तमः ।
प्रयोगेषु च सर्वेषु यथालाभं प्रकल्पयेत् ॥
शुचिर्हि विष्णुं परिविधाय कुर्यात्
सनत्कुमारादिकृतार्चनञ्च ।
गुणोदयावाप्तसदर्थोऽसिद्धान्
दृष्टि च वेदाङ्गुलिसंभवाय ॥
शुभरसे निजमानयुक्तौ
विधाय रक्षां स्थिरधारबुद्धिः ।
अनन्यचित्तः शिवभक्तियुक्तः
समाचरेत् कर्मरसस्य तज्ज्ञः ॥"
"अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥"
इति रसामलः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे । विवृतविवृतिरस्य पारदशब्देऽभिहिता ॥
शिलारसः । तत्पर्यायो यथा,—
"कपिनामा कपितैलं कपिसं कपिजलः ।
तुरुष्को सुक्तिरसश्च पिण्याकः पिण्डको रसः ॥"
हिङ्गुलम् ॥ तत्पर्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति वैद्यकरत्नमालायाम् ॥)
रसकः, पुं, (रस + संज्ञायां कन् ।) निष्क्वाथ-
मांसः । इति हेमचन्द्रः । ३ । ७० ॥
रसकर्पूरं, क्ली, कर्पूररसः । रसकापूर इति
भाषा । यथा, "तत्र पारदस्य संक्षिप्तं शोधनं
कर्मयम् ।

शुद्धकर्मदं शुभाम् प्रत्येकं गैरिकं सुधीः ।
इष्टिका खटिका तद्वत् स्फटिका सिन्धुजन्म च ॥
वल्मीकमृत्तिकाक्तं भाण्डरञ्जकमित्यपि ।
सर्वाण्येतानि संचूर्ण्य वाससा चापि शोधयेत् ॥
खटिका खड़ी । स्फटिका फिटकरी । सिन्धु-
जन्म सैन्धवम् । वल्मीकं तन्मृत् । वल्मीक
उरउर । भाण्डरञ्जनं गालिभाट । भाण्डरञ्जक
मलिका कालिमाटी ।
एभिश्चूर्णैः समं पारदं वासरं विमर्दितम् ।
तच्चूर्णमर्दितं सूतं स्थालीमध्ये विनिक्षिपेत् ।
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्
समाम् ।
तयोर्मुखं लिप्त्वा मृद्भिर्दृढमधोर्ध्वकम् ।
संशोष्य मृद्भिर्दृढं भूयः संशोष्य मृद्भिरेव ।
सन्धिलिप्तौ मृदा ताभ्यां स्थाल्यौ पुनरपि विधारयेत् ।
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
अङ्गारोपरि सद्यस्कं दद्यात्तु व्रतवृत्तिषु ।
ऊर्ध्वस्थाल्यां सुसंलग्नं भूत्वा सङ्गतं रसम् ।
कर्पूरवत् सुविमलं सद्योऽवन्युग्मनुत्तरम् ।
तं देवकुसुमसन्तप्तकस्तूरीकुङ्कुमैर्युतम् ।
खादन् हरति विरम्यं कार्यं भोगदं भवति ।
विरहति वहिर्दीप्तिं पुष्टिं वीर्यं बलं विपुलम् ।
रसपति रसकौतुकं रसकर्पूरस्य सेवकः
सततम् ॥"
इति भावप्रकाशः ॥ * ॥
अपि च ।
"गैरिकतुरघोलटिकाभैरवगड़नं रसं कृत्वम् ।
प्रतिकं दद्यात्तु मात्रायां मोपरि धृतं स्थाप्यः ॥
कुड्यमितोऽथ तद्रूपं देया पञ्चीकरास्य पान-
सुरी ।
अथ सतव्योमुंद्रा तता तदथो चुलायनो
ज्वालः ॥
अर्द्धलयट्कप्रमितैर्द्वाभिरनुलादिदुर्बलस्थले: ।
अग्निं क्रमेण दद्यादग्रदग्धेन समेना द्विनिषम् ।
तदनु ततो यन्त्रवरादयुक्त्या कर्पूरसन्निभं सुमम् ।
आदाय काचकुम्भे निधाय तदमादरं दद्यात् ॥
संमर्द्य चाय काष्ठैर्दृढंमीयसंमितैः पचेत् घसम् ।
पुनीन्ध समवकमध्यं वितस्तिचतुराङ्गुलायकाग्नस्तु
कर्षयं क्रमदहनं तदधः प्रज्वालयेन्मध्यम् ।
अधिधवलसुपरिलग्नं युक्त्या संगृह्य रसचंद्र-
यत्नात् ॥
यवं वल्लार्द्धं वा गुडेन जीर्णेन रोगिणे दद्यात् ।
दुग्धौदनमु पथ्यं देयं ससौ च ताम्बूलम् ॥
हरति समस्तं रोगं कर्पूराख्यो रसो नृणाम् ॥
फिरङ्गकरिकेशरी सकलकुष्ठदावानलो-
ऽखिलव्रणविनाशकृत् प्रबलगर्भपूर्तिप्रदः ।
सुवर्णसमवर्णकृत् बलकुसुमाग्रतेजस्करः
समस्तगदतस्करो रसपतिः स कर्पूरकः ॥"
मतान्तरम् ।
"टङ्कणं मधु लाक्षाय ऊर्णा गुञ्जायुतो रसः ।
मर्दयेत् भङ्गजद्रावैर्दिनैकं भावयेत् पुनः ।
भातो भसलमाप्नोति शुद्धकर्पूरसन्निभः ॥

रसपारदं पारदापसुषीग्रमिति सङ्केतः। गडूणं साम्भरिलोण इति भाषा। शेषं स्पष्टम्। इत्यायुर्वेदप्रकाशः। (अपरञ्च।
"पिष्टं पांशुपटु प्रगाढममलं वल्ल्युन्मना नैकशः
सूतं धातुगतं खटीकवलितं मृत्संपुटे रोधयेत्।
यन्त्रस्थलवणस्य तस्य च तले प्रज्वाल्य वह्निं
हठात्
घस्रं ग्राह्य सचेन्दुकुन्दधवलं भस्मोपरिस्थं घनैः।
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रयुक्तं भवेत्।
क्षुद्रं रेचयति द्वियाममसकृत् पेयं जलं शीतलम्॥
एतद्धन्ति च वत्सरावधि विषं याम्माधिकं
मासिकम्।
श्लेष्मोत्थं गरलं खगेन्द्रकुटिलीऽब्दुतश्च तात्का-
लिकम्॥"
इति सुधानिधिरसः॥ * ॥ रसकर्पूरमिति रस-
मञ्जरीकारः। श्वेतभस्म इति चन्द्रिका। इति
वैद्यकरसेन्द्रसारसंग्रहे आरग्मारोग्याधिकारे।)
रसकेशरं, क्ली, कर्पूरम्। इति हारावली।
(कर्पूरशब्देऽस्य विवरणं ज्ञातव्यम्॥)
रसगन्धं, क्ली, बोलम्। इति राजनिर्घण्टः।
रसगन्धः, पुं, गन्धरसः। यथा,—
"रसगन्धो गन्धरसो गन्धारं मधिवर्द्धनम्॥"
इति त्रिकाण्डशेषः॥
रसगन्धकः, पुं, (रसगन्ध+स्वार्थे कन्।) गन्ध-
रसः। इति शब्दचन्द्रिका। गन्धकः। इति
राजनिर्घण्टः॥
रसगर्भं, क्ली, रसाञ्जनम्। इत्यमरः॥ (तत्पर्यायो
यथा, भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।
"रसाञ्जनमाख्यं शैलं रसगर्भञ्च तार्क्ष्यजम्॥")
हिङ्गुलम्। इति राजनिर्घण्टः॥
रसघ्नः, पुं, (रसं रसस्य दोषावहशक्तिं हन्तीति।
हन+टक्।) टङ्कणः। इति राजनिर्घण्टः॥
रसजं, क्ली, (रसाज्जायते इति। जन्+डः।)
रक्तम्। इति शब्दचन्द्रिका॥
रसजः, पुं, (रसाज्जातः। जन्+डः।) गुडः।
इति राजनिर्घण्टः॥ (यथा, मनुः। ११। १४४।
"अन्नाद्यजानां सत्त्वानां रसजानाञ्च सर्व्वशः॥")
मद्यकीटः। इति हेमचन्द्रः॥ (रसजाते, त्रि।
यथा,—
"रसजं पुरुषं विद्यादसं रक्षेत् प्रयत्नतः।
अन्नात् पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः॥"
इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये।)
रसज्ञा, स्त्री, (रसं जानातीति। ज्ञा+कः। टाप्।)
जिह्वा। इत्यमरः॥ (गङ्गा। इति काशीखण्डे।
२९। १४६॥) रसवेत्तरि, त्रि॥ (यथा, रघौ।
९। ३६।
"यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥")
रसज्येष्ठः, पुं, (रसेषु ज्येष्ठः।) मधुररसः। इति
हेमचन्द्रः। शृङ्गाररसश्च।
रसतेजः, [स्] क्ली, (रसात् रसधर्म्मं वा तेजो
यस्य।) रक्तम्। इति हेमचन्द्रः॥
रसदालिका, स्त्री, (रसं दालयति इति। दल+
णिच्+ण्वुल्। टापि अत इत्वम्।) पुण्ड्रेक्षुः।
इति राजनिर्घण्टः॥
रसदायी, [न्] पुं, (रसं प्रापयतीति। इ+
णिच्+णिनि।) मधुरजम्बीरः। इति राज-
निर्घण्टः॥
रसधातुः, पुं, (रसात्मको धातुः।) पारदः। इति
राजनिर्घण्टः॥ (अस्य पर्य्यायाद्यथा,—
"रसायनार्थिभिर्लोकैः पारदो रस्यते यतः।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः॥
पारदो रसधातुश्च रसेन्द्रश्च महारसः।
चपलः शिववीर्य्यञ्च रसः सूतः शिवाह्वयः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
रसधेनुः, स्त्री, (रसकल्पिता धेनुः।) दानार्थ-
इक्षुरसनिर्म्मितधेनुः। यथा,—
होतोवाच।
"रसधेनुं महाराज कथयामि समासतः।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे॥
रसस्य तु घटं राजन् संपूर्णमैक्षवस्य च।
तद्वत् संकल्पयेत् प्राज्ञश्चतुर्थांशेन वत्सकम्॥
इक्षुदण्डमयाः पादा रजतखुरसंयुताः।
सुवर्णशृङ्गाभरणां वस्त्रपुच्छां घृतस्तनीम्॥
पुष्पकम्बलसंयुक्तां शर्कराख्यजिह्विकाम्।
दन्ताः फलमयास्तस्याः पट्टताम्रमयीं शुभाम्॥
पुष्परोमाणं राजेन्द्र मुक्ताफलकृतेक्षणाम्।
सप्तव्रीहिसमायुक्तां चतुर्दिक्षु च दीपिकाम्॥
सर्व्वोपस्करसंयुक्तां सर्व्वगन्धादिवासिताम्।
चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत्॥
ब्राह्मणे वेदविदुषे श्रोत्रियायाहिताग्नये।
पुराणज्ञे विशेषेण साधुवृत्ताय धीमते॥
तादृशाय प्रदातव्या रसधेनुः कुटुम्बिने।
सर्व्वलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने॥
रसधेनुः प्रदातव्या सर्व्वकामेश्च निश्चदा।
दाता स्वर्गमवाप्नोति सर्व्वपातकवर्ज्जितः॥
दाता च याचको वाथ एककालमभोजनः।
सोमपानफलं तस्य सर्व्वक्रतुफलं लभेत्॥
दीयमानान्तु पश्यन्ति ते यान्ति परमां गतिम्।
धेनुञ्च पूजयित्वाथ गन्धधूपस्रगादिभिः॥
पूर्व्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत् सुधीः।
प्रार्थनापूर्व्वकं भक्त्या द्विजाग्र्याय निवेदयेत्॥
दश पूर्व्वान् परांश्चैव आत्मानञ्चैकविंशकम्।
प्रापयेत् परमं स्थानं स्वर्गान्नावर्त्तते पुनः॥
एषा ते कथिता राजन् रसधेनुरनुत्तमा।
ददस्व च महाराज परं स्थानमवाप्नुहि॥
य इदं पठते नित्यं शृणुयाद्वा भक्तितः।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोके महीयते॥"
इत्यादि वाराहपुराणे श्वेतोपाख्याने रसधेनु-
माहात्म्यं समाप्तम्॥
रसनं, क्ली, (रस्+भावे ल्युट्।) स्वादनम्।
ध्वनिः। इति मेदिनी॥ (यथा, बृहत्संहिता-
याम्। ४६। ८८।
"कम्पोऽद्रीणां गदितं रसनं दरणं क्षितेः॥")
रसनं, क्ली स्त्री, (रस्यते ... करणे ल्युट्।) जिह्वा। रसेन्द्रि-
यम्। रसनेन्द्रियम्। यथा,—
"(रसनादि यथाक्रमं जिह्वा ...
इन्द्रियं रसनं जिह्वाग्रवर्ति ...
इति ...
"प्रथमादिति पृथिव्या इत्येवं ...
द्विविधं नित्यमनित्यञ्च।
परमाण्वादिकं सर्व्वमनित्यम्।
नित्यमप्यनित्यम्। ...
मेदाद्। त्रिषु ...
विविधमिति। अयोनिजमेवैकम्।
अयोनिजं नरकजाते प्रसिद्धमिति।
रसनं जलीयम्। तथा हि ...
गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जक...
रसाभिव्यञ्जकोदकवत्। रसन...
चारवारणाय इयत्वं ... इत्यादि।
इत्येवमि निष्पुरीमादिरिति। द्विविधं ...
द्विविधं मुखाः। ...
सन्त्यौ याह्यः।" इति सिद्धान्तमुक्ता...
रसना, स्त्री, (रस+युच्। टाप् च।) ...
इत्यमरः॥ (यथा, भागवते। ८। ...
"प्राणञ्च तत्यादनरोमवोर्ये ...
श्रीमन्मुखस्य रसना तदिदं ...
तस्याः शुभलक्षणं यथा,—
"तीक्ष्णा दंष्ट्राः समाः ...
प्रत्यस्ता दीर्घा च विज्ञेया तासु ...
इति मात्स्ये ...
न्यायमते रसनेन्द्रियग्राह्यो रसो ...
सहितः। यथा,—
"रसस्तु रसनाग्राह्यो मधुरादि...
सहकारी रसज्ञाया नित्यतादि च ...
घ्राणस्य गोचरो गन्धो ...
तथा रसो रसज्ञायास्तथा शब्दो ...
इति भाषा ...
"तथा रस इति रसत्वादिसहित ...
सिद्धान्तमुक्तावली॥ *॥ रास्ना।
(अस्याः पर्य्यायो यथा,—
"रास्ना युक्तरसा रस्या सुवहा ...
एलापर्णी च सुरसा सुगन्धा श्रेय ...
इति भावप्रकाशस्य पूर्व्वखण्डे ...
गन्धभद्रा। इति शब्दचन्द्रिका।
हेमचन्द्रः। (यथा, रघौ। ७। ...
"कस्याश्चिदासीद्रसना तद ...
असुष्ठमूलार्पितसूत्रशेषा। ...
रज्जुः। इति संक्षिप्तसारोणादि ...
रसनाथः, पुं, (रसानां नाथः ...
पारदः। इति राजनिर्घण्टः॥
रसनायकः, पुं, (रसानां नायकः ...
विद्याविष्कारकत्वादस्य तथात्वम् ...
इति शब्दरत्नावली॥

लिट्, [ह्] पुं, (रसनया लेढ़ीति । लिह्+
प् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रसनया
हनकर्त्तरि, त्रि ॥
त्रिका, स्त्री, (रसो नेत्रमिव तदस्त्यस्या इति ।
सनेत्र+टन् ।) मनःशिला । इति हेमचन्द्रः ॥
मनःशिलाशब्देऽस्या गुणादयो ज्ञेयाः ॥)
ाकजः, पुं, (रसपाकात् जायते इति ।
जन्+डः ।) गुड़ः । इति राजनिर्घण्टः ॥
लः, पुं, (रसो जलं फले यस्य रसयुक्तं फल-
मस्येति वा । शाकपार्थिववत् मध्यपदलोपी
समासः ।) नारिकेलवृक्षः । इति शब्दरत्ना-
वली ॥ (नारिकेलशब्देऽस्य विशेषो विज्ञेयः ॥)
त्रं, क्ली, (रसात् रसे वा भवतीति ।)
र्+अच् ।) रक्तम् । इति राजनिर्घण्टः ॥
मञ्जरी, स्त्री, (रसानां मञ्जरीव ।) नायक-
नायिकाभेदकग्रन्थविशेषः । यथा,—
"विद्वज्जनमनोभृङ्गरसध्यासङ्गहेतवे ।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥"
इति तस्य द्वितीयः श्लोकः ॥
मयः, त्रि, रसस्वरूपः । रसात्मकः रसशब्दात्
मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ३ ।
१ । ३४ ।
"आधत्ताम्भो रसमयं कालमायांशयोगतः ॥")
मर्द्दनं, क्ली, (रसस्य पारदधातोर्मर्द्दनम् ।)
पारदपेषणम् । यथा,—
"इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः ।
दध्ना गुडेन सिन्धूत्थराजिकारट्टधूमकैः ॥"
अन्यच्च ।
"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥"
इति भावप्रकाशः ॥
रणं, क्ली, (रसस्य पारदस्य मारणम् ।)
पारदस्य मारणम् । यथा,—
सारं रसं लोहिं गन्धकं नवसादरम् ।
रेकं मर्द्दयेद्द्वैभागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताञ्च मृद्वस्त्रमुद्रया ।
लिप्य परितो मुष्टि मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीवालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तदप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तदूर्द्ध्वगं गन्धकं त्यजेत् ॥
अधस्थं मृतं सूतं दद्यात् तत्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥"
इति भावप्रकाशः ॥
मूर्च्छनं, क्ली, (रसस्य पारदस्य मूर्च्छनम् ।)
पारदस्य मूर्च्छाकरणम् । यथा,—
"त्रुटयं त्रिफलावन्ध्याकन्दैः सुदृढ़यान्वितैः ।
चित्रकार्य्यानिशाक्षारकन्याकनककद्रवैः ॥
सूतं कृतेन यथेष्ट वारान् सप्ताभिमर्द्दयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥"
इति भावप्रकाशः ॥
(तथास्य विवृतिः ।
"गन्धकेन रसं प्राज्ञः सुदृढ़ं मर्द्दयेद्भिषक् ।
कज्जलाभो यदा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
असौ रोगचयं हन्यादनुपानस्य योगतः ॥"
इति मूर्च्छनम् ॥ ● ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥)
रसराजः, पुं, (रसानां धातूनां राजा इति ।
"राजाहःसखिभ्यष्टच् ।"५।४।९१। इति टच् ।)
पारदः । रसाञ्जनम् । इति राजनिर्घण्टः ॥
रसलेहः, पुं, (रसान् अपरान् धातून् लेढ़ीति ।
लिह+पचाद्यच् ।) पारदः । इति राज-
निर्घण्टः ॥
रसवती, स्त्री, (रसो विविधस्वादरसो विद्यतेऽस्या-
मिति । रस+"रसादिभ्यश्च ।" ५ । २ । ९५ ।
इति मतुप् । मस्य वत्वम् ।) महानसम् ।
इत्यमरः ॥ (यथा, सांख्यतत्त्वकौमुद्याम् । ५ ।
"यथा धूमाद्वह्नित्वसामान्यविशेषः पर्व्वते अनु-
मीयते तस्य च वह्नित्वसामान्यविशेषस्य स्व-
लक्षणो वह्निविशेषो दृष्टो रसवत्याम् ॥*॥")
रसविशिष्टे, त्रि ॥ (यथा, आर्य्यासप्तशत्याम् ।४९८।
"रोषोऽपि रसवतीनां न कर्कशो वा चिरानु-
बन्धी वा ॥")
रसशोधनं, क्ली, (रसः शोध्यतेऽनेनेति । शुध्+
णिच्+ल्युट् । रसं पारदं शोधयत्यनेनेति वा ।)
टङ्कणः । इति हेमचन्द्रः ॥ (रसस्य शोधनम् ।)
पारदशुद्धिः । यथा,—
"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥
एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
वह्न्यौषधीकषायेण स्विन्नः स बली भवेत् ॥
सर्षपीचिञ्चिकावन्ध्याभृङ्गारैः स्विन्नो बली ।
ततः सपावकद्रावैः स्विन्नः स्याददितदीप्तिमान् ॥"
इति भावप्रकाशः ॥
(मतान्तरम् ।
"जयन्त्या वर्द्धमानस्य चार्द्रकस्य रसेन च ।
वायस्याश्चानुपूर्व्व्येवं मर्द्दनं रसशोधनम् ॥
एषां प्रत्येकशस्तावन्मर्द्दयेत् स्वरसेन च ।
यावच्च शुष्कतां याति सप्तवारं विचक्षणः ॥
उद्धृत्योष्णारनालेन मृद्भाण्डे क्षालयेत् सुधीः ।
सर्व्वदोषविनिर्म्मुक्तः सप्तकञ्चुकवर्जितः ॥
जायते शुद्धसूतोऽयं युज्यते सर्व्वकर्म्मसु ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥)
रससिन्दूरं, क्ली, (रसजातं सिन्दूरमिति ।)
औषधविशेषः । तस्य नामान्तरं सिन्दूररसः ।
यथा,—
"शुद्धसूतस्य गृह्णीयाद्द्विपण्भागचतुष्टयम् ।
शुद्धगन्धस्य भागैकं तावत् कृत्रिमगन्धकम् ॥
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्य्याद्दिनमेकं विवर्ज्जयेत् ॥
मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारत्रयं सम्यक् काचकूपीं प्रलेपयेत् ॥
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां
क्षिपेत् ।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
गृह्णीयादूर्द्ध्वसंलग्नं सिन्दूरसदृशं रसम् ॥"
इति भावप्रकाशः ॥
(मतान्तरम् ।
"पृथक् समं समं कृत्वा पारदं गन्धकन्तथा ।
नवसारं धूमसारं स्फटिकं याममात्रकम् ॥
निम्बूरसेन संमर्द्य काचकूप्यां निवेशयेत् ।
मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रलेपयेत् ॥
सप्तभिर्मृत्तिकावस्त्रैः पृथक्संशोष्य वेष्टयेत् ।
सच्छिद्रायां मृदस्थाल्यां कूपिकां तां निवेशयेत् ।
पूरयेत् सिकतापूरैरागलं मतिमान् भिषक् ।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात् ॥
प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु सूक्ताभमूर्द्ध्वलग्नं वलिं त्यजेत् ।
अधःस्थं रससिन्दूरं सर्व्वरोगेषु योजयेत् ॥"
इति रससिन्दूरम् ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥)
रसस्थानं, क्ली, (रसः स्थानमाधार उत्पत्ति-
स्थानं यस्य । रसस्य पारदस्य स्थानमित्येके ।)
हिङ्गुलम् । इति शब्दचन्द्रिका ॥ शरीरस्य
रसस्थलञ्च । तस्य प्रमाणं रसशब्दे द्रष्टव्यम् ॥
रसा, स्त्री, (माधुर्य्यादिरूपो विविधो रसोऽस्त्यस्या-
मिति । "अर्श आदिभ्योऽच् ।"५ । २ । १२७ ।
इति अच् । रसति शब्दायते इति वा । रस+
अच् । टाप् च ।) पृथिवी । इत्यमरः ॥
रसना । (तत्पर्य्यायो यथा, भावप्रकाशे ।१।१।
"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥")
पाठा । (अस्याः पर्य्यायो यथा, भावप्रकाशे ।१।१।
"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥"
शल्लकी । (अस्याः पर्य्यायो यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
महेरणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कङ्गुः । इति मेदिनी ॥ द्राक्षा । काकोली ।
इति शब्दरत्नावली ॥ (रसातलम् । यथा,
भागवते । १० । ६ । १२ ।
"रसा दिशश्च प्रतिनेदिरे जनाः
पेतुः क्षितौ वज्रनिपातशङ्कया ॥"
यथा च तत्रैव । १ । १३ । १६ ।

"द्वन्तो मे वितिवाभिः शायमाना रसा
गता ।"

"रसा रसातलं गता।"इति तट्टीकायां स्वामिपादाः । नदी । यथा, ऋग्वेदे ।१।११२।१२।
"याभी रसां क्षोदसोद्गः पिपिन्वथुः ।"
"रसां नदीम् ।" इति तद्भाष्ये सायणः ।)

रसाखनः, पुं, (खनतीति । खन् विदारे+अच् । रसाया भूमेः खनः ।) कुक्कुटः । इति शब्दचन्द्रिका ॥

रसाग्रजं, क्ली, (रसानां अग्रजं रसस्य अग्रे जायते इति वा । जन्+डः ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥

रसाञ्जनं, क्ली, (रसजातमञ्जनं इति मध्यपदलोपी कर्म्मधारयः ।) रसजाताञ्जनविशेषः । रसवत् इति भाषा ॥ तत्पर्य्यायः । रसगर्भम् २ तार्क्ष्यशैलम् ३ । इत्यमरः । रसोद्भूतम् ४ रसाग्रजम् ५ कृतकम् ६ बालभैषज्यम् ७ दार्व्वीक्वाथोद्भवम् ८ रसराजः ९ वर्य्याञ्जनम् १० रसगर्भम् ११ अग्निसारम् १२ । अस्य गुणाः । हिमत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । मधुरत्वम् । कटुत्वम् । रक्तपित्तविषच्छर्द्दिहिक्कापस्मारनाशित्वञ्च ।
"रौप्यान्तु जायमानायां तत्कियत्तु रसाञ्जनम् ।
तदभावे तु कर्त्तव्यं दार्व्वीक्वाथसमुद्भवम् ।"
इति राजनिर्घण्टः ॥

अपि च ।
"दार्व्वीक्वाथसमं क्षीरं पादं पक्त्वा यथाघनम् ।
तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम् ॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम् ।
रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ॥"
इति भावप्रकाशः ॥

रसाढ्यः, पुं, (रसेनाढ्यः युक्तः ।) आम्रातकः । इति राजनिर्घण्टः ॥ (आम्रातकशब्देऽस्य विवरणं ज्ञातव्यम् ।)

रसातलं, क्ली, (रसायाः तलं निम्नभागस्थलोकविशेषः ।) पातालम् । इत्यमरः ॥ (यथा, महाभारते । १२ । १७० । २६ ।
"अपाच वेदान् विविधान् रसातलगतो हरिः ॥")
पातालभेदः । यथा,—
"अतलं वितलञ्चैव नितलञ्च तलातलम् ।
महातलञ्च सुतलं सप्तमञ्च रसातलम् ॥
पातालभेदाः कथिता नामतः कीर्त्तिता अमी ।
तत्र पातालमेकैकं दशसाहस्रयोजनम् ॥"
इति शब्दमाला ॥
(रसातल विनाशकरणात्तो विनाशस्थानम् । यथा च देवीभागवते । ८ । २० । ८—१२ ।
"ततोऽधस्ताच्च विवरे रसातलसमाह्वये ।
दैतेया निवसन्त्येव दनवो दानवाश्च ये ॥
निवातकवचा नाम हिरण्यपुरवासिनः ।
कालेया इति च प्रोक्ताः प्रत्यनीका हरिभुजाम् ।

अहीनत्वौत्सुक्यैव महामायविनिर्ममिता ।
सकलेशस्य च हरेस्तेजसा हतविक्रमाः ॥
बिलेशया इव सदा विवरे निवसन्ति हि ।
ये वै वाग्भिः सरमया शक्रदूत्या निरन्तरम् ।
मन्त्रवर्णाभिरहराशाङ्किता बिभ्यति सा च ।")

रसादानं, क्ली, (रसानां आदानं ग्रहणम् ।) शोषणम् । इति हेमचन्द्रः ॥ (रसायाः दानम् ।) भूमिदानञ्च ॥

रसाधारः, पुं, (रसानां जलानां आधारः । रसां पृथिवीं धरति स्वाकर्षणेनेति वा । धृ+अण् ।) सूर्य्यः । इति शब्दरत्नावली ॥ रसस्याधारश्च ॥

रसाधिकः, पुं, (रसाय स्वर्णादीनां द्रवीकरणाय अधिकः प्रबलः ।) टङ्कणः । इति राजनिर्घण्टः ॥ अधिकरसश्च ॥

रसाधिका, स्त्री, (रसेन अधिका ।) काकोलीद्राक्षा । इति राजनिर्घण्टः ॥

रसाभासः, पुं, (रस इव आभासते इति । आ+भास्+अच् ।) अनौचित्यविशिष्टरसः । तस्य लक्षणं यथा,—
"अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः ।"
अनौचित्यञ्च रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यम् । तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते । उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च । बहुनायकविषयायां रतौ तथाशुभयनिष्ठायां प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते शृङ्गारे अनौचित्यम् । रौद्रे गुर्व्वादिगतकोपे । शान्ते च हीननिष्ठे । गुर्व्वादालम्बने हास्ये । ब्रह्मवधाद्युत्साहे । अधमपात्रगते तथा वीरे । उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र । तत्र रतेरुपनायकनिष्ठत्वे यथा मम ।
"स्वामी मुग्धतरो वनं घनमिदं बालाहमेकाकिनी
क्षोणीमावृणुते तमालमलिनच्छायातमः-
सन्ततिः ।
तन्मे सुन्दर ! मुञ्च कृष्ण ! सहसा वर्त्मेति
गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः
पातु वः ।"
बहुनायकनिष्ठत्वे यथा,—
"कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु ! पाण्डुरयं कपोलः ।"
अनुभयनिष्ठत्वे यथा,—
मालतीमाधवे नन्दनस्य मालत्याम् । यथा-दुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वमिति श्रीमल्लोचनकाराः । तन्नोदाहरणं यथा रत्नावल्याम् । सागरिकाया अन्योऽन्यदर्शनात् प्राक् वत्सराजे रतिः । प्रतिनायकनिष्ठत्वे यथा हयग्रीववधे । हयग्रीवस्य जलक्रीडावर्णने । अधमपात्रगतत्वे यथा,—
"जघनस्थलनद्धपत्रवल्ली-
र्गिरिमल्लीकुसुमानि कापि भिल्ली ।
अवचित्य गिरौ पुरो निषण्णा
स्वकचानुत्कचयाञ्चकार भर्त्रे ।"
तिर्य्यग्गतत्वे यथा,—
"मल्लीमतल्लीषु वनान्तरेषु
वल्ल्यन्तरे वल्लभमाह्वयन्ती ।
मधुद्विपस्त्री कमनाद्रमङ्गी
सङ्गीतमङ्गीकुरुते स्म भृङ्गी ।"
आदिशब्दात् तापसादयः । ...
"रसोनुयुक्तविप्रालजीवनयन,
...
मौख्याकर्षमपेतमीर्षुतमधुरीक्षो दिः ...
आघातः कटुकोक्तिभिः ...
...
...र्मस्फोटपटुर्धिहिरमसौ ... ...
...
भयानकाभासो यथा,—
"अग्रकुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यद्दिवसानि ...
स्त्रीनीचविषयमेव हि भयं रसज्ञैः
मन्यम् । इति साहित्यदर्पणे ३ ...

रसाम्लं, क्ली, (रसाम्लकोऽम्लो यत्र ।) ...
इति राजनिर्घण्टः ॥ चुक्रम्

रसाम्लः, पुं, (रसेन सह अम्लो यत्र ।)
इति राजनिर्घण्टः ॥

रसायकः, पुं, (रसं रसत्वमयति ... अय+ण्वुल् ।) तृणविशेषः । इति ... चन्द्रिका ॥

रसायनं, क्ली, कटिः । इति राजनिर्घण्टः । ... दुग्धं अयनं मूलं यस्येति ।) तक्रम् । ... चन्द्रः ॥ विषम् । (रसा ... प्राप्यन्ते अनेनेति । इ+ल्युट् ।) ... नाशकौषधम् । इति मेदिनी ॥ (यथा, ... २ । ६३ ।
"बाह्गुण्यमुपयुञ्जीत शक्यपेषं ...
भवन्त्यस्यैवमङ्गानि स्थाणूनि बलवन्ति च"
"न सुतेन विना कान्तां न
सुतकान्तासमायोगात् रसायनशरीरिणः ।"
इति राजनिर्घण्टः ॥

अथ रसायनाधिकारः । तत्र लक्षणमाह ।
"यज्जराव्याधिविध्वंसि वयस्तम्भकरं तथा ।
चक्षुष्यं बृंहणं वृष्यं भेषजं तद्रसायनम् ।"
रसायनस्य फलमाह ।
"दीर्घमायुः स्मृतिर्मेधामारोग्यं तरुणं वयः ।
देहेन्द्रियबलं कान्तिं नरो विन्देद्रसायनात् ।"
तद्विधिमाह ।
"पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम् ।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा ।
नाविशुद्धशरीरस्य युक्तो रासायनो विधिः ।
न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः ।"

नारदस्तानि ।
ं पयः पीतं प्रसमेकैकशो हिमः ।
सङ्कमथवा प्राक् पीतं ग्लापयेद्‌यः ॥
रुक्कराभ्यांः श्ययः प्रभाति
ोत्य बलीसमुक्त्य चूर्णम् ।
ो गुडुच्यास्तु समस्तवृन्दः
कः प्रयोगः सत्तु प्रसपृष्ट्याः ॥
ाजःप्रदान्यायमत्तान्यानि
ाष्टिसमंस्त्यपहंतानि ।
ानि चैतानि रसायनानि
ा विशेषेण च शरत्पृष्ठी ॥"
ीं शाखो। पथ्यो इति गौरि। गद्गाभि
प शाखा। तस्या अपि रसायनत्वात् ।
ेन गुडाचोला पिप्पल्या त्र्यचेन च ।
सिनया वापि युक्ता सिद्धं रसायनम् ॥
द्धर्कराचलौपनाम्धुक्तैः प्रमान् ।
मभया प्राश्या रसायनगुणैषिणा ॥
कर्षपयासंपलं गपस्य
रं पिबेद्‌यः पयसाहमासम् ।
ासपयं सर्पिगुर्षं पयो वा
ीर्णोऽपि भूयः स पुनर्नवः स्यात् ॥
ा मासमेकं स्वरसं पिबन्ति
दने दिने भृङ्गरजःसमुत्यम् ।
ीराशिनस्ते बलवीर्ययुक्ताः
मासतं जीवनमाप्नुवन्ति ॥
ुमावरी सुलितिका गुडूची
ाष्टलिकयां शतशतसरलो ।
रूनानि कृत्वा समभागयुक्ता-
न्याज्येन किंवा मधुनावलिह्यात् ॥
जराजनात्प्युविमुक्तदेहो
मदेश्वरो वीर्यबलादियुक्तः ।
विभाति देवप्रतिमः स नित्यं
प्रभामयो भूरिविशुद्धबुद्धिः ॥
पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
वीर्यस्य पुष्टिं वपुषो विधत्ते
बालस्य शस्यस्य यथाम्बुवृष्टिः ॥
अयःपलं गुग्गुलुरत्र योज्यः
पलत्रयं चौषपलानि पञ्च ।
पलानि चाष्टौ त्रिफलारसस्य
कर्षं लिहन् याव्यमरत्वमेव ॥"
गुग्गुलुः ।
"न केवलं दीर्घमिहायुरश्नुते
रसायनं यो विविधं निषेवते ।
गतिं स देवर्षिनिषेवितां शुभां
प्रपद्यते ब्रह्म तथैव चाक्षयम् ॥"
इति रसायनाधिकारे भावप्रकाशः ॥
ा च ।
भोपायोऽयिशक्तानां रसादीनां रसायनम् ।
वयसि मध्ये वा तत् प्रयोज्यं जितात्मनः ।
स्य मुखरक्तस्य विशुद्धस्य च सर्वथा ॥
शुद्धे शरीरे हि युक्तो रासायनो विधिः ।

प्राचीनस्तो वा मत्नि मनो यत्र रसायनः ॥"
"रसायनानां द्विविधं प्रयोगमृषयो विदुः ।
कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥
निर्वाते निर्भये हर्म्ये प्राप्तोपकरणे पुरे ।
दिशुदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥
घनभित्तिमुच्छालसौधसंद्धविराहिताम् ।
सम्यबैद्योपकरणां सुस्थां कारयेत् कुटीम् ॥
अथ पुण्येऽह्नि संपूज्य पूज्यांस्तां प्रविशेच्छुचिः ।
तत्र संशोधनैः शुद्धः सुखी जातबलः पुनः ॥
ब्रह्मचारी धृतियुतः श्रद्दधानो जितेन्द्रियः ।
दानशीलदयासत्यव्रतधर्मपरायणः ॥
देवतानुस्मृतौ युक्तो युक्तस्वप्नप्रजागरः ।
प्रियौषधः पेशलवाक् प्रारभेत रसायनम् ॥
हरीतकीमामलकं सैन्धवं नागरं वचाम् ।
हरिद्रां पिप्पलीं वेल्लं गुडेनोष्णाम्बुना पिबेत् ॥
स्निग्धः स्विन्नो नरः पूर्वं तेन साधु विरिच्यते ।
ततः शुद्धशरीराय कृतसंसर्जनाय च ॥
त्रिरात्रं पञ्चरात्रं वा सप्ताहं वा घृतान्वितम् ।
दद्याद्‌यावकमाशुद्धेः पुराणशकृतोऽथ वा ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत् ।
यस्य यद्‌यौगिकं पश्येत् सर्वमालोच्य सात्म्य-
वित् ॥"
"कुटीप्रवेशः क्षमिणां परिच्छदवतां हितः ।
अतोऽन्यथा तु ये तेषां सूर्य्यमारुतिकोविधिः ॥
वातातपसहा योगा वक्ष्यन्ते ते विशेषतः ।
सुखोपचारा भ्रंशेऽपि ये न देहस्य बाधकाः ॥"
इत्युत्तरस्थानीयवाग्भटे ३९ अध्याये ।
विशेषस्तु तत्तिमध्याये ज्ञातव्यः ॥ * ॥ रसः
पारदः तद्‌द्वारा तन्मारणीय-हरितालादिकच
अयनं आश्रय उपायो वा यस्य तत् । स्वर्णादि-
करणम् ।
अथ रसायने ईश्वर उवाच ।
"गोमूत्रं हरितालञ्च गन्धकञ्च मनःशिलाम् ।
समं समं गृहीत्वा तु यावत् शुष्यति पेषयेत् ॥
एकादशदिनं यावत् यत्नेन रचयेत् शुचिः ।
मन्त्रेण धूपदीपाद्यैर्नैवेद्यैर्‌विधिमिश्रितैः ॥
मन्त्रस्तु ओँ हरिहराय रसायनं सिद्धिं कुरु कुरु
स्वाहा । अयुतजपेन सिद्धिः ।
तद्‌वटीं गोलकं कृत्वा वस्त्रेणावेष्टयेत् पुनः ।
मृत्तिका लेपयेत्तस्य च्छायाशुष्कन्तु कारयेत् ॥
गर्त्ते कुण्डे विनिक्षिप्य पलाशकाष्ठवह्निना ।
ज्वालयेद्दशयामन्तु नान्यथा शङ्करोदितम् ॥
तद्भस्म जायते सिद्धिर्सिद्धिसिद्धिसमाकुलम् ।
ताम्रपात्रे अग्निमध्ये विन्दुमात्रं नियच्छति ॥
तत्क्षणाज्जायते स्वर्णं नान्यथा शङ्करोदितम् ।
दातव्यं गुरुभक्ताय न दद्याद्दुष्टमानसे ।
सिद्धपीठे भवेत्सिद्धिर्गोपयेत्तैलधनापनैः ॥
यस्मै कस्मै न दातव्यं दातव्यं शिवभक्तके ।
अभिसुरं द्विजातीनां साधकानां विशेषतः ॥
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम् ॥"
प्रकारान्तरम् ।
"आनीय बहुयत्नेन समलं तोलकद्वयम् ।

वसुधाढ्यं शिवधात्वं मायाबिन्दुसमन्वितम् ॥
जीगवयचाष्टशतं प्रजपेत् समर्पोपरि ।
ब्रह्मोतिनीशकमार्गं कृष्णधेनुसमुद्भवम् ॥
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत् ।
वस्त्रद्वयेन सूतेन दुग्धमध्ये विनिःक्षिपेत् ॥
उत्तापं ज्वालयेद्धीमान् मन्दमन्देन वह्निना ।
त्रिपुर्वशाहंवर्य्यन्तमहंशोषं भवेद्‌यदि ॥
तदैवोत्तोल्य तद्रूपं दुग्धं तोये विनिःक्षिपेत् ॥"
ततः परीक्षा कर्त्तव्या ।
"निर्धूमं पावके क्षिप्तं दृष्ट्वा उत्ताप्य यत्नतः ।
तत्रैव प्रक्षिपेन्मन्त्रं सर्वमन्त्रसमात्मकम् ॥
मार्द्दवं तोलकं ताम्रं दृष्ट्वा उत्ताप्य यत्नतः ।
गुञ्जाप्रमाणं तद्रूपं सत्यं सत्यं हि शङ्करि ! ।
रौप्यं भवति तद्रूपं नान्यथा शङ्करोदितम् ॥"
प्रकारान्तरम् ।
"कृष्णसर्पमेकं गृहीत्वा तस्य मुखे शिववीर्य्यं पूर-
यित्वा सर्पस्य मुखं गुदञ्च बद्धा नूतनमृण्मय-
स्थालीमध्ये संस्थाप्य स्थालीमुखं मृदादिना
संलिप्य निर्वातस्थाने प्रातरारभ्य पुनःप्रात-
र्यावत् वह्निना ज्वालं दद्यात् । ततः शुभक्षणे
स्थालीमुत्तोल्य सर्पभस्म विहाय शिववीर्य्यं
गृह्णीयात् । ततस्तोलकमितं ताम्रं गालयित्वा
तस्मिन् गालितताम्रे रत्तिकामात्रं तत् शिववीर्य्यं
दद्यात् तेन तत्क्षणादेव तत्ताम्रं सुवर्णीभूतम् ।
आदौ शिवार्चनं कृत्वा पश्चात् प्रयोग एव
कर्त्तव्यः ॥" इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेय-
संवादे रसायनं नाम त्रयोदशः पटलः ॥)
रसायनः, पुं, गरुडः । विडङ्गः । इति मेदिनी ॥
रसायनफला, स्त्री, (रसायनेन फलति या ।
फल् + अच् । टाप् ।) हरीतकी । इति
त्रिकाण्डशेषः ॥
रसायनश्रेष्ठः, पुं, (रसायनेषु श्रेष्ठः ।) पारदः ।
इति राजनिर्घण्टः ॥
रसायनी, स्त्री, (रसान् तैलादीन् अयते
प्राप्नोतीति । अय् + ल्युः । ङीप् ।) गुडूची ।
काकमाची । महाकरञ्जः । गोरक्षदुग्धा ।
मांसच्छदा । इति राजनिर्घण्टः ॥ (मञ्जिष्ठा ।
अस्याः पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रसालं, क्ली, (रसं आलातीति । आ + ला +
कः ।) सिह्लकम् । बोलम् । इति मेदिनी ॥
रसालः, पुं, (रसं आलाति गृह्णाति । आ + ला +
कः ।) इक्षुः । आम्रः । इत्यमरः ॥ (यथा,
साहित्यदर्पणे १०परिच्छेदे अतिशयोक्त्यलङ्कारे ।
"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नबकुलरसालमुकुलश्रियः ॥")
पनसः । इति शब्दरत्नावली ॥ कुन्दरुष्कम् ॥
गोधूमः । पुण्ड्रकनामेक्षुः । इति राजनिर्घण्टः ।

रसालसा, स्त्री, (रसेन अलसा ।) माडी । इति शब्दचन्द्रिका ॥

रसाला, स्त्री, (रसान् आलातीति । आ+ला +कः । टाप् ।) रसना । दूर्व्वा । विदारी । इति मेदिनी ॥ द्राक्षा । इति शब्दरत्नावली । शिख-रिणी । तत्पर्य्यायः । मार्ज्जिता २ । इत्यमरः ॥ तस्याः करणप्रकारो यथा,—

"आर्द्धो माहिषमम्लमसुरहितं दध्याढकं शर्कराशुभ्रा प्रस्थयुगोन्मिता शुचिपटे किञ्चिच्च कश्चित् क्षिपेत् ।
दुग्धेनार्द्धघनेन म्लयशनवत्याल्यां दृढं स्रावये-देलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च सद्यूषयेत् ॥
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं
श्रीकृष्णेन पुरा पुनःपुनरियं प्रीत्या समा-स्वादिता ।
एषा येन वसन्तवर्ज्जितदिने सेया परं नित्यश-स्तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां बलम् ॥
योऽत्रि तथा शरदि ये रविशोषिताङ्गा
ये च प्रमत्तवनितासुरतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ।
रसाला शुक्रला बल्या रोचनी वातपित्तजित् ।
दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा ।
रक्तपित्तं तृषां दाहं प्रतिश्यायं विनाशयेत् ॥"
इति राजनिर्घण्टः ।

अपि च ।

"दध्नोऽर्द्धाढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः प्रस्थं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्म्माष-कान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा धृत्वा शुभ्रपटे शनैः करतलेनोन्मथ्य विस्रा-वयेत् ॥
न्यस्तं मृण्मयभाजने रसमथ कर्पूरधूपिते कर्पूरेण सुगन्धितं तदखिलं संलोड्य संस्थाप-येत् ।
सम्यग्ये मधुरेश्वरेण रचिता सैषा रसाला स्वयं
भोक्तृणां मदनप्रदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥"
इति भावप्रकाशः ॥

रसालिका, स्त्री, शीर्णवाला । इति शब्दचन्द्रिका । बालाकुलिया इति भाषा ॥

रसाली, स्त्री, (रसान् आलाति या । आ+ला+कः । ङीष् ।) पुण्ड्रेक्षुः । इति राज-निर्घण्टः ॥

रसाशाला, स्त्री, गन्धाशोरणा । इति राज-निर्घण्टः ॥

रसास्वादः, पुं, (रसस्य आस्वादः ।) असमा-धानकालेऽपि निर्व्विकल्पकाख्यानन्दास्वादनम् । समाध्यारम्भसमये सवि-कल्पानन्दास्वादनं वा । इति वेदान्तसारः ॥*॥ "चतुर्थं विघ्नमाह असङ्गेति । उक्तलक्षणनिर्व्विकल्प-समाधौ मोक्षे द्वितीयः शब्दानुविद्धसविकल्पको-विदुषस्त्रिपुटो य आनन्दो बाह्यशब्दादि-विषयप्रपञ्चपरित्यागप्रयुक्तो न तु चैतन्यप्रयुक्तः । यथा निधिरक्षणाय प्रवृत्तस्य निधिपरि-पालकभूतप्रेतादिशान्तस्य निधिप्राप्तेः अभावेऽपि भूताद्युपद्रवनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति तथा सविकल्पकसमाधावसङ्गत्वलक्ष-लक्षणेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्ट-बाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेण स्वादयति तदास्वादनमित्यर्थः । तमुदाहरणमाह समाधीत्यादि । निर्व्विकल्पक-समाध्यारम्भकाले अनुभूय मानसविकल्प-कानन्दत्यागासहिष्णुतया पुनस्तस्यैवास्वादनं रसास्वाद इत्यर्थः ।" इति सुबोधिन्याख्या तट्टीका ॥

रसास्वादी, [न्] पुं, (रसं मधु आस्वादयितुं शीलमस्य । आ+स्वद्+णिनिः ।) भ्रमरः । इति शब्दमाला । रसास्वादविशिष्टे, त्रि ॥

रसाढ्य, पुं, (रसः आढ्यः आख्या यस्य ।) सरलद्रवः । इति रत्नमाला ॥

रसिकः, पुं, (रसोऽस्त्यस्येति वा । रस+ठन् ।) सारसपक्षी । इति राजनिर्घण्टः ॥ तुरङ्गः । हस्ती । इति सारस्वतः ॥ सरसे, त्रि । इति मेदिनी ॥ (यथा, भागवते । १ । १ । ३ ।

"पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥")

रसिका, स्त्री, (रसिक+टाप् ।) रसाला । इक्षुरसः । इति मेदिनी ॥ काञ्ची । रसना । इति विश्वः ॥

रसिकेश्वरः, पुं, (रसिकानां रसज्ञानामीश्वरः ।) श्रीकृष्णः । यथा,—

"वृन्दावनान्तरे रम्ये रासोत्सवसमुत्सुकम् ।
रासमण्डलमध्यस्थं नमामि रसिकेश्वरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३२ अध्यायः ॥
(रसिकश्चेश्च ।)

रसितं, क्ली, (रस शब्दे+भावे क्तः ।) मेघ-निर्घोषः । इत्यमरः ॥ रतम् । स्वर्णादिलिप्ते, त्रि । इति मेदिनी ॥

रसुनः, पुं, (रस+उनन् ।) लशुनः । इति शब्द-चन्द्रिका ॥(विवरणमस्य रसोनशब्दे ज्ञातव्यम्॥)

रसेन्द्रः, पुं, (रसानां धातुरसानामिन्द्रः श्रेष्ठः ।) पारदः । इति राजनिर्घण्टः ॥ (यथा, भाव-प्रकाशे । १ । १ ।

"असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्-सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"
अस्य पर्य्यायादिकं रसशब्दे द्रष्टव्यम् ॥)

रसोत्तमः, पुं, (रसेषु उत्तमः । यद्वा, रसः उत्तमोऽस्य ।) मुद्गः । इति राजनिर्घण्टः ॥ मत्स्यरसश्च ।

रसोद्भवं, क्ली, (रसात् ... उत्+भू+अच् ।) हिङ्गुलः ... निर्घण्टः ॥ रसजाते, त्रि ।

रसोनः, पुं, (रसेनैकेनोनः ।) ... निर्घण्टः ॥ (तन्नामनिरुक्तिर्यथा,—

"राहोरमृतचौर्य्येण
...कस्य कणा भूमौ ते
द्विजा नाश्नन्ति तमतो
...
इति वाभट्टे उत्तरस्थाने ॥
"अथ ... वक्ष्यामि
रसेश्च पञ्चभिर्युक्तो
"रसा वामादिरमणो ...
...
इति हारीते
अथास्य गुणाः ।
"रसोनो बृंहणो वृष्यः ...

रसे पाके च कटुकस्तीक्ष्णो मधुरो
भग्नसन्धानकृत् कण्ठ्यो गुरुः ...
बलवर्णकरो मेधाहितो नेत्र्यो
इति च भावप्रकाशस्य ...
अन्यद्विवरणमस्य रसोनकशब्दे
द्रष्टव्यम् ॥)

रसोनकः, पुं, (रसोन+स्वार्थे कन् ॥) तत्पर्य्यायः ।

"लशुनस्तु रसोनः स्यादुग्रगन्धो ...
अरिष्टो म्लेच्छकन्दश्च ...
तस्योत्पत्तिर्यथा,—

"यदामृतं वैनतेयो
सदा ततोऽपतद्बिन्दुः सुरसोऽमृत...
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः
तस्माद्रसोन इत्युक्तो द्रव्याणां ...
अस्यावयवगुणाः ।
"कटुकश्चापि मूलेषु ...
नाले कषाय उद्दिष्टो नालाग्रे ...
बीजे तु मधुरः प्रोक्तो ...
अस्य भक्षणगुणाः ।
"रसोनो बृंहणो वृष्यः स्निग्ध ...
रसे पाके च कटुकस्तीक्ष्णो मधुरो ...
भग्नसन्धानकृत् कण्ठ्यो गुरुः ...
बलवर्णकरो मेधाहितो नेत्र्यो ...
हृद्रोगजीर्णज्वरकुक्षिशूल-
विबन्धगुल्मारुचिकासशोथान् ...
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ...
मद्यं मांसं तथाम्लञ्च हितं लशुन...
व्यायाममातपं रोषमतिनीरं पयो ...
रसोनमश्नन् पुरुषस्त्यजेदेतान् निरन्त...
इति भा...

(तथास्याप्या विकृतिर्यथा,—
"अश्नमयते जातः सुरासवो ...

र वैनतेयस्य चञ्चुना त्रिदिवं गतः ॥
मध्यमस्यापि श्रमवेगप्रधाविते ।
ढ़े वैक्लवं प्राप्ते च्युता स्नस्तविन्दवः ॥
सन्दूषिते देहे पतितास्तत्र संस्थिताः ।
तु कालवशाज्जातं दुर्भिक्षं द्वादशाब्दि-
कम् ॥
ष्काः कानने सर्व्वा वृषकाष्ठप्रतानिकाः ।
ाच कानने सर्व्वे प्रकृष्टं गहनं गताः ॥
मध्ये जरायस्तो गतिहीनोऽतिजर्ज्जरः ।
ः सरयिन्तुखः शीर्यदन्तावलीमुखः ॥
स्थैः क्षुधापन्नैः ऋषिभिस्तत्र विस्मृतः ।
पि क्षुधातुरः सर्व्वां पर्य्यटन्नुर्व्वरां महीम् ॥
चित् पुण्ययोगेन दृष्टवान् विटपान् शुभान् ।
शैवालसङ्काशान् शाद्वलान् बहुलान्
भुवि ।
संपीडनेनापि भुक्तवान् शाद्वलानपि ॥
ाशानन्तरे शुष्कान् विटपान् तदनन्तरम् ।
वान् कन्दकान् सोऽपि मासमेकं तथा
ऋषिः ॥
तु सुभिक्षे सञ्जाते सर्व्वे चैकत्र संस्थिताः ।
पि वृद्धो युवा भूत्वा गतस्तत्र च यत्र ते ॥
दृष्ट्वा विस्मयापन्नाः पप्रच्छुः किं कृतं त्वया ।
कथान् सोऽपि किञ्चिच्च यथा तैः शापित-
स्ततः ॥
यथा खादितं द्रव्यं तदभक्ष्यं द्विजातिभिः ।
न्धमपि विज्ञेय तस्माज्जातं रसोनकम् ॥"
न रसोनकं नाम विख्यातं भुवनत्रये ।
टाल्ननिभं शीर्षं शोभपर्णं समुद्धरेत् ॥
ा पुटे सुनिर्गन्धं धारयेत्पक्षमात्रके ।
मापिदर्शनात्तेन म्रियते दीर्यते भुवि ॥
ांस शिशिरे चैव कारयेन्मात्रया युतम् ।
मठं शीरके द्वे च अजमोदाकटुत्रयम् ॥
नर्णौवर्ध्दलोपेतं वातरोगे विशेषतः ।
ानुपुङ्गरसेनापि शूलानाहे प्रकीर्त्तितः ॥"
इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥
स्याप्यत् द्विजाभक्ष्यत्वकारणादिकं रसोनशब्दे
ष्टव्यम् ॥)
र्णं, स्त्री, (रसवत् पारद इव उपलम् ।)
ौक्तिकम् । इति त्रिकाण्डशेषः ॥
स्त्री, (रस+"हनिकुषिनीरमिकाशिभ्यः क्थन् ।"
णा० २ । २ । इति नप्रत्ययः ।) स्वम् ।
ति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
, स्त्री, (रसात् भुक्तान्नादिपरिपाकात् आगत-
मति । रस+यत् ।) रक्तम् । इति शब्द-
चन्द्रिका ॥ (यथा, महाभारते ।१६।५०।३२।
"यमेव गन्धिनी रस्यं नष्टं सर्वं शब्दवत् ॥"
गयुक्ते, त्रि । यथा, भगवद्गीतायाम् । १७ ।८।
"रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः ॥")
ा, स्त्री, (रसाय हिता । रस+यत् । टाप् ।)
रास्ना । (अस्याः पर्य्यायो यथा,—
"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।

एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पाठा । इति राजनिर्घण्टः ॥

रंह, तु क गतौ । इति कविकल्पद्रुमः ॥ (अदन्त
चुरा०-पर०-सक०-सेट् ।) रंहयति रंहा-
पयति । इति दुर्गादासः ॥

रंहः, [स्] क्ली, (रम+"रमेश्च ।" उणा०
४ । २१३ । इति असुन् हुगागमश्च । "अथि
रहिभ्यामसुन् इत्यत्र रंह इति धातुप्रदीपः ।"
इत्युज्ज्वलः ।) वेगः । तत्पर्य्यायः । तरः २
रयः ३ स्यदः ४ जवः ५ । इत्यमरः ॥ रंहः ६
जवनः ७ । इति तट्टीका ॥ (यथा, रघुः ।
२ । ३४ ।
"न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥")

रह, त्यजि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट् ।) रहति सुखं दीनः । इति दुर्गा-
दासः ॥

रह, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) इ, रंहते । इति दुर्गा-
दासः ॥

रह, तु क त्यागे । इति कविकल्पद्रुमः ॥ (अदन्त
चुरा०-पर०-सक०-सेट् ।) रहयति शोकं
धीरः । इति दुर्गादासः ॥

रहः, [स्] क्ली, (रमन्तेऽस्मिन् । रह+"इणि ह
च ।" उणा० ४ । २१४ । इति असुन्प्रत्ययः ।
हकारस्यान्तादेशः । "रह त्यागे अस्मादसुनि
रह इति धातुप्रदीपः ।" इत्युज्ज्वलः ।)
निर्ज्जनम् । तत्पर्य्यायः । विविक्तः २ विजनः ३
छन्नः ४ निःशलाकः ५ रहः ६ उपांशुः ७
इत्यमरः ॥ (यथा, रघौ । ३ । ३ ।
"तदाननं मृत्सुरभि क्षितीश्वरः
रहस्युपाघ्राय न तृप्तिमाययौ ॥")
तत्त्वम् । रतिः । गुह्यम् । इति मेदिनी ॥

रहः, [स्] व्य, विजनम् । इत्यमरः ॥
"रहो निधुवनेऽपि स्यादन्तो गुह्ये नपुंसकम् ॥"
इति रभसश्च ॥
"देशादन्यत्र रहोऽव्ययं शब्दान्तरं वास्ति सुरत-
वाचकम् ।" इत्युज्ज्वलः । ४ । २१४ ॥)

रहस्यं, त्रि, (रहसि भवम् । रहस्+दिगादि-
त्वात् यत् । इत्युज्ज्वलः । ४ । २१४ ।) गोप-
नीयम् । रहसि भवम् । इति मेदिनी अमरश्च ॥
रहस्यरोमपर्य्यायनिषेधो यथा,—
"न सर्पशब्दैः क्रोडेन स्नानि स्नानि न संस्पृशेत् ।
रोमाणि च रहस्यानि नाशिष्टेन सहा व्रजेत् ॥"
इति कौर्म्मे १५ अध्यायः ॥

रहस्या, स्त्री, (रहस्य+टाप् ।) नदीभेदः ।
इति मेदिनी ॥ (यथा, महाभारते ।६।८।१८।
"रहस्यां शतकुम्भां च सरयूं च नरेश्वर ! ॥")
रास्ना । पाठा । इति राजनिर्घण्टः ॥

रहितं, त्रि, (रह+क्तः ।) वर्ज्जितम् । यथा,—
"जातकस्वकारौ च धर्म्मे च नरासनकम् ।

गुरोश्चाङ्गहितं कृत्वा जपकर्म्म समाचरेत् ॥"
इति तन्त्रसारः ॥
अपि च ।
"दिग्घोऽब्दसाम्यिरहितो जन्मचान्द्रो भगो-
गितः ।
भं भवेदब्दवेशेऽत्र योगोऽप्येवं विचिन्तयेत् ॥"
इति जातकपद्धतिः ॥

रा, ल दाने । ग्रहणे । इति कविकल्पद्रुमः ॥
(अदा०-पर०-सक०-अनिट् ।) ल, राति ।
इति दुर्गादासः ॥

राः, स्त्री, (रा+सम्पदादित्वात् क्विप् ।) विभ्रमः ।
दानम् । इत्येकाक्षरकोषः ॥ काञ्चनम् । इति
शब्दरत्नावली ॥

राः, [रै] पुं, (रा दाने+"रातेर्डैः ।" उणा०
२ । ६६ । इति डैः ।) धनम् । (यथा, भाग-
वते । ३ । २५ । ३८ ।
"आत्मानमनु ये चेह ये रायः पशवो
गृहाः ॥")
स्वर्णम् । इत्यमरः ॥ शब्दः । इति शब्दरत्ना-
वली ॥ (स्त्री, श्रीः । यथा, ऋग्वेदे । १० ।
१११ । ७ ।
"स चन्तयद्गुषसः सूर्य्येय चित्रामस्य केतवो
रामविन्दन् ॥"
"चित्रां नानावर्णां रां रायं श्रियमविन्दन् अल-
भन्त ।" इति तद्भाष्ये सायणः ॥)

राका, स्त्री, (रा दाने+"कृदाधारार्च्चिकलिभ्यः
कः ।" उणा० ३ । ४० । इति कः । बहुल-
वचनादेव न ह्रस्वः ।) नदीविशेषः । (सा च
शाल्मलीद्वीपस्थानां नदीनामन्यतमा । यथा,
भागवते । ५ । २० । १० ।
"तेषु वर्षाद्रियो नद्यश्च सप्तैवाभिज्ञाताः । सुरसः
शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पा-
वर्षः सहस्रश्रुतिरिति । अनुमतिः सिनीवाली
सरस्वती कुहूः रजनी नन्दा राकेति ॥")
कच्छूरोगः । नवजातरजःस्त्री । (रायते दीयते
देवेभ्य हविर्यस्याम् । इति निघण्टटीकायां देव-
राजयज्वा । ५ । ५ । २१ ।) सम्पूर्णेन्दुतिथिः ।
इति मेदिनी ॥ (यथा, ऋग्वेदे । २ । ३२ । ४ ।
"राकामहं सुहवां सुष्टुती हुवे
शृणोतु नः सुभगा बोधतुत्मना ॥"
"संपूर्णचन्द्रा पौर्णमासी राका ।" इति सायणः ॥
राक्षसीविशेषः । सा च खरस्य शूर्पणखायाश्च
जननी । यथा, महाभारते । ३ । २७४ । १-८ ।
मार्कण्डेय उवाच ।
"पुलस्त्यस्य तु यः क्रोधादर्द्धदेहोऽभवन्मुनिः ।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत ॥
बुबुधे तन्तु सक्रोधं पितरं राक्षसेश्वरः ।
कुवेरस्तत्प्रसादार्थं यतते स्म सदा नृप ! ॥
स राजराजो लङ्कायां निवसन्नरवाहनः ।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः ।
ऋषिं भरतशार्दूल ! नृत्तगीतविशारदाः ॥

दुर्मेधसां च राज्ञां च मालिनी च शिवा
पते।
[illegible] राक्षस! [illegible] सम-
क्षमाः॥
[illegible]
[illegible]
[illegible] राक्षसेश्वरौ।
[illegible] शुचि॥
[illegible]
[illegible] यथा॥")
राक्षसः, पुं, [illegible] राक्षसः।
[illegible] १ [illegible] २ [illegible] ३
[illegible] ५ [illegible] ६ [illegible] ७ [illegible]
[illegible] ८ [illegible] ९ [illegible] १० [illegible]
[illegible] ११ [illegible] १२ [illegible] १३ [illegible] १४
[illegible] १५ [illegible] १६ [illegible] १७
[illegible] १८ [illegible] १९ [illegible] २०
[illegible]

[illegible]

रोधनं रक्तमाल्यस्त्रीरक्तमद्यामिषप्रियम्।
दृष्ट्वा च रक्तं मांसं वा लिहानं दशनच्छदौ।
हसन्तमप्रकाले च राक्षसाधिष्ठितं वदेत्॥"
इति वाग्भटे उत्तरस्थाने चतुर्थेऽध्याये॥)
अष्टप्रकारविवाहान्तर्गतविवाहविशेषः। यथा,
"आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्॥"
इत्युद्वाहतत्त्वम्॥
(तल्लक्षणान्तरञ्च यथा, मनुः। ३। ३३।
"हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं
गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥"
राक्षसविवाहस्तु क्षत्रियस्यैव प्रशस्तः। यथा,
तत्रैव। ३। २४।
"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥"
निन्द्यप्रजोत्पत्तिजनकतया तु आचारापेक्षया
राक्षसादिविवाहस्य गर्हितत्वमाह तत्रैव।
३। ४१—४२।
"इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नॄणां तस्मान्निन्द्यान् विव-
र्जयेत्॥"॥
अहोविशेषे, पुं, क्ली। यथा, हरिवंशसंहि-
तायाम्। ८। ४।
"रक्तादिके द्वादशमे मुहूर्ते यत्
तथाद्यमध्ये परिधाविशेषम्।
प्रमाण्यमानक्षमनः परं यत्
क्षपाङ्गमेतं प्रागमर्थमिमाह॥")
राक्षसः, [illegible], त्रि॥
राक्षसी, स्त्री, (राक्षस + ङीप्।) कौणपी।
[illegible] यथा, रघुः। १२। ६१।
"[illegible] राक्षसीष्वरा।
[illegible] सतीव[illegible]॥")
दंष्ट्रा। [illegible] यावत्। इति हेमचन्द्रः॥
[illegible] यावत्। इति
[illegible] यथा,—
"[illegible]
[illegible] परम्।
[illegible]
येत्।
[illegible]॥"
इति तिथ्यादितत्त्वम्॥
[illegible], पुं, ([illegible]।) राक्षसः।
इति त्रिकाण्डशेषः॥ ([illegible]
[illegible] ३। ३३३। १८।
"[illegible]
[illegible]॥"
[illegible]
[illegible]

राख, ऋ शोषालमर्थयोः। इ॰,
(भ्वा॰-पर॰-अक॰-सक॰-सेट्।
[illegible]
निवारणञ्च। ऋ, अरराखत्।
राखः॥
रागः, पुं, (रञ्जनमिति। रञ्ज +
भावे करणे वा घञ्। "घञि च भावक-
रणयोः।" ६। ४। २७। इति [illegible]
मात्सर्य्यम्। लोहितादिः। (
२। ३०।
"रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलञ्चकार।"
क्लेशादिः। अनुरागः। (
प्रथाम्। २७०।
"तावन्मेव हिमः [illegible]
[illegible]
कथं इव कामिनी[illegible]
गान्धारादिः। नृपः। इति मेदिनी
सर्गः। इति शब्दरत्नावली।
(यथा, कुमारे। ४। १६।
"तमिमं कुरु दक्षिणेतरं
चरणं निर्मितरागमेहि मे।"
रक्तिमन्विद्। रञ्जनम्। [illegible]
माला। प्रीतिः। यथा,—
"वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते"
इति भगवद्गीतायां [illegible]
तस्य लक्षणं यथा,—
"सुखमयाधिकं चित्ते सुखमेव [illegible]
यन्तु प्रत्ययोत्कर्षात् [illegible]
[illegible]
(अभिमतविषयाभिलाषः।
गतः। यथा,—
"अविद्यास्मितारागद्वेषाभिनिवेशाः
क्लेशाः। रागोऽभिमतविषयाभिलाषः [illegible]
[illegible]
"सुखानुशयी रागः।" इति [illegible]
[illegible] यथा। भरतमते
च रागः षड्विधः। तेषां [illegible]
भैरवः १ कौशिकः २ हिन्दोलः [illegible]
श्रीरागः ५ मेघः ६।
तेषां पञ्च रागिण्यः। [illegible]
प्रत्येकमेतेषां षट् रागिण्यः। [illegible]
अष्टौ पुत्राः। [illegible]
सोमेश्वरमते षड्रागा [illegible]
वसन्तः २ पञ्चमः ३ भैरवः ४ [illegible]
नारायणः ६। इति
[illegible]
"[illegible]
[illegible]
[illegible]
[illegible]

...तथापि द्वाय एव तु हयरी ।
...न्ति ते रागाः सर्व्वे सन्तीति निश्चितम् ।
...रन: पूर्व्वे पश्चिमे दक्षिणे तथा ।
...न्ते ये देशास्तत्सामीप्यं प्रचारता ।”
... । अङ्गवङ्गकलिङ्गगौडमगधमृजिनद्राविड़-
पत्तनगौडाङ्गगौवीरकीरकाश्मीरगाभी-
...सिन्धुपालन्धरमगमरुधनिषधमत्यदी-
...इयमालवजानवमरुरपचोलोक्तकु-
...लघरिडेनवेरल-कोशलमगियालमल्ल-
...ललयानकिल्लागगुज्जरातगुज्जरकालञ्जर-
...बलोक्तावन्तिदिकाचोमापालखौराष्ट्र-
...यदरममाकीकगवधन्यकामरूपघरिगर्भ-
...र्मेटवाटकीकटदेवेन्द्रनटग्रननाटभोटक-
...घाटकर्णाटकुन्तिकावन्तिककनकाल-
...भोजकाम्बोजतोणतुखारविदारयली-
...मगेषविदेहगान्धेकचचरीकत्रिगर्तान-
...शेषु रागाः प्रचरन्तीति ।
...श्रवणमात्रेण रज्जन्ते सकलाः प्रजाः ।
...रञ्जनाद्वितोस्तेन राग इति स्मृतः ॥”* ॥
...रागाः ।
...मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
...श्च ततः पश्चाद्वसन्तस्तदनन्तरम् ॥
...लश्चाथ कर्णाट एते रागाः षडेव तु ॥६॥
...प्रधानिन्यो तत्र क्रमशः कथिता मया ॥
...मालश्री चैव रामकिरी च सिन्धुड़ा ।
...वरी भैरवी च मालवस्य प्रिया इमाः ॥६
...ली च पुरवी कानड़ा माधवी तथा ।
...केदारिका चापि मल्लारदयिता इमाः ॥६
...री शुभगा चैव गौरी कौमारिका तथा ।
...रारी च वैरागी श्रीरागस्य प्रिया इमाः ॥६
...च पञ्चमी चैव ललिता पटमञ्जरी ।
...री च विभाषा च वसन्तस्य प्रिया इमाः ॥६
...री दीपिका चैव देशकारी च पाहिड़ा ।
...ड़ी मोरहाटी च हिन्दोलस्य प्रिया इमाः ॥६॥
...का चाथ भूपाली रामकेली गड़ा तथा ।
...रा चापि कल्याणी कर्णाटस्य प्रिया इमाः ॥६॥३६॥* ॥

अथ कालनियमः ।

...भाषा ललिता चैव कामोदा पटमञ्जरी ।
...कौरी रामकेली वेलोयारी च गुर्ज्जरी ॥
...रारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
...वी चाथ कौमारी रागिण्यो दश पञ्च च ।
...ः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥
...ड़ी मायूरी कोड़ा वैरागी चाथ धानश्री ।
...वली मोरहाटी सहिता रागयोषितः ।
... मध्याह्नकाले तु यथा भारतभाषितम् ॥
...रारी दीपिका चैव कल्याणी पुरवी तथा ।
...ड़ा मारवी चैव गौरी केदारपाहिड़ा ॥
...री मालश्री नाटी भूपाली सिन्धुड़ा तथा ।
...राह्णे ताश्च रागिण्यः प्रगायन्ति चतुर्द्दश ॥
...या वस्तुभूयाढ्या रागास्ते मालवादयः ।
प्रदोषे चापराह्णे च रजन्यां गानगोचराः ॥
दशदण्डात् परं रात्रौ सर्व्वेषां गानमीरितम् ।
मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥
श्रीपञ्चम्यां समारभ्य यावत् शयनोत्सवं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥
शक्रोत्थानं समारभ्य यावद्दुर्गामहोत्सवम् ।
गीयते नट्टपैर्नित्यं मालश्री सा मनोहरा ॥
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वशः ।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ॥
रागचालापवेदाद्यैः तत्तत्कालस्तदनन्तरम् ।
नाट्यपद्धौ प्रगालस्था नृपाज्ञायां न दूषणम् ॥
रागाः षड्च रागिण्यः षट्त्रिंशच्चारु-
विग्रहाः ।
ध्यानतः प्रवक्ष्यदनात् प्रज्ञायं समुपाश्रते ।”* ॥
अथ ध्यानम् ।

“नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥ १ ॥
नीलोत्पलं कर्णयुगे वहन्ती
श्यामा सुकेशी च सुमध्यभागा ।
ईषत्सहासा मुखरम्यपद्मा
सा धानश्री पद्मसुचारुनेत्रा ॥ १ ॥
करे धृता चामुजयुग्मरम्या
हंसाननञ्चाप विलोकयन्ती ।
कण्ठस्फुरन्मौक्तिकरत्नहारा
सा मालश्री संकथिता विचित्रा ॥ २ ॥
प्रतप्तचामीकरचारुवक्त्रा
कर्णावतंसं कमलं वहन्ती ।
पुष्पं धनुः पुष्पशरैर्दधाना
चन्द्रानना रामकिरी प्रदिष्टा ॥३॥
महेन्द्रनीलद्युतिरम्बुजाक्षी
प्रवादयन्ती कपिलाश्रयन्तम् ।
विचित्ररत्नाभरणा सुकेशी
सा सिन्धुड़ा कान्तसमीपसंस्था ॥४॥
जवाप्रसूनद्युतिबिम्बवक्त्रा
सकञ्चपद्मं करयोर्दधाना ।
चौर्मांशुकाच्छादितगात्रयष्टि-
राशावरी रङ्गकिला विदग्धा ॥५॥
सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्च्चयन्ती ।
तालप्रयोगप्रतिरङ्गगीते-
गौरीतनुर्भैरविका सतीयम् ।”६॥* ॥

अथ मल्लारः ।

“विहारशीलोऽतिसुकान्तदेहः
कान्ताप्रियो धार्म्मिकशीलयुक्तः ।
कामातुरः पिङ्गलनेत्रयुग्मो
मल्लाररागः प्रियकृत् सुवेशः ॥१॥
सङ्गीतिलोतुङ्गलतानिकुञ्जे
कृतस्थितिः कान्तसमागमाय ।
वेलावती चम्पकमालिनी सा
दाला विचित्राभरणा नियुक्ता ॥१॥
रहःसु कान्तप्रियमागमत्तं
रम्यं वहन्ती कुचकुम्भयुग्मे ।
दूर्व्वादलश्यामतनुः सकामा
पुरानने: सा पुरवी नियुक्ता ॥२॥
अशोकवृक्षस्य तले नियुक्ता
वियोगिनी चाम्रकलापिताङ्गी ।
विभूषिताङ्गी कटिलेव बाला
सा कानड़ा हैमलतेव तन्वी ॥३॥
मंगृह्य मंगृह्य गले दधाना
प्रसूनमाला दयितेन बाला ।
गौरी स्वकान्ताननचुम्बितास्या
सा सुन्दरी माधविका नियुक्ता ॥४॥
सुकच्छपीं वादयति स्वभर्त्तुः
गानार्थमभ्यस्यति सम्मुखेन ।
सदैव ताला विहिता च माला
कोड़ा कला तानवती मता सा ॥५॥
स्वाला समुत्तीर्यवती सुदेहा
केशप्रतिम्यन्दितवारिबिन्दुः ।
निष्पीड़यन्ती तिमिरांशुकान्तं
केदारिका रक्तपयोधरश्रीः ।”६॥* ॥
अथ श्रीरागः ।

“लीलावतारेण वनान्तराणि
चिन्वन् प्रसूनानि वधूसहायः ।
विलासवेशो द्युतिदिव्यमूर्त्तिः
श्रीराग एव प्रथितः पृथिव्याम् ॥१॥
सन्ध्यासकाले गृहमध्यदेशे
प्रवादयन्ती द्व पिनाकयन्त्रम् ।
धाराधराधातुविचित्रिताङ्गी
गान्धारिका गन्धसरं निधत्ते ॥ १ ॥
रसनया सुविचारकौतुकं
विदधती कविकोविदकौतुकम् ।
शुकविलाप्तनभावनतत्परा
भगवती सुभगा समुदाहृता ॥२॥
पुष्पोद्याने साहमालीकलापैः
क्रीड़न्त्येवं कोकिलाकाकलीषु ।
रामा श्यामा सद्गुणाश्च सीमा
गौरी गौरी गौरवालोकदिष्टा ॥३॥
अट्टालिकायां स्फुटकौमुदीभिः
प्रकाशितायां रजनीविहारम् ।
अट्टाय कान्तेन समं वसन्ती
कौमारिकां कामकला वहन्ती ॥४॥
गौरीपादाम्भोजमभ्यर्च्चयन्ती
गन्धोद्धृतं गन्धमाल्यं दधाना ।
नानारत्नोपायनैर्भक्तिभावै-
र्वेलोयारी कथ्यते बालिकेयम् ॥५॥
उल्लासयन्ती धम्मिल्ले रहःस्थान् प्रायवन्धुना ।
मालतीकुसुमस्रग्भिर्वैरागी रागिणी स्मृता ।”६

अथ वसन्तः ।

“चूताङ्कुरैरेव कृतावतंसो
विघूर्णमानारुणनेत्रपद्मः ।
पीताम्बरः काञ्चनचारुदेही
वसन्तरागो युवतिप्रियश्च ॥१॥

मुहुर्मुहुर्मालतिमुञ्चीलयुक्ता
मुक्तालताकल्पितहारयष्टिः ।
चूताङ्कुरं पाणियुगे वहन्ती
कलारवाङ्गी मुदितेरितेयम् ॥१॥
संगीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
खर्वाङ्गिनी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेद्यैः ॥२॥
उरसि कैरवपञ्चस्रजं शुभां
विदधती प्रथमोत्थितचारुवेशम् ।
विलुलितालकवल्लितभाङ्गी
भासुरा ललिता कथिता बुधैः ॥३॥
सखीकलापैः परिहास्यमाना
वियोगिनी कान्तवियोगदेहा ।
पीनस्तनी चैव धरातनुमा
श्यामा सुकेशी पटमञ्जरीयम् ॥४॥
कर्णोत्पललम्बिमधुव्रताक्षी
कर्णोति या मञ्जुलकुन्तलानि ।
कान्तान्तिकं गन्तुमनाः प्रदोषे
सा गुर्ज्जरी वेशकलोचिताङ्गी ॥५॥
आध्यापयन्ती निजशिष्यवृन्दं
सङ्गीतशास्त्राणि विवेचनाभिः ।
मनोहरा हारलताभिरामा
समस्तभाषाकुशला विधिज्ञा ॥"६॥ ॥

अथ हिन्दोलः ।

"छायाभिलाषेण मतङ्गपुत्र्या
उत्थापितस्तत्तनुमालिवृन्दैः ।
उक्तीलसङ्गीतरसैर्विदग्धो
हिन्दोलरागः कथितो रसज्ञैः ॥१॥
मयूरकेकाश्रवणोत्सुकान्ती
मयूरिकाशृङ्खलितं किरन्ती ।
मयूरकान्तीव क्षितिं दधाना
मायूरिका संकथिता गुणज्ञैः ॥१॥
प्रदीपकाले स्वगृहं प्रविष्टा
प्रदीपहस्ताञ्चितगात्रयष्टा ।
धीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम् ॥२॥
मार्ग सखीभिर्विजने वसन्ती
विचित्रवस्त्रोज्ज्वलितप्रसङ्गा ।
निरीक्ष्यमाणाननदर्पणा या
सा देशकारी कथिता गुणज्ञैः ॥३॥
भर्त्तुर्दधाना चरणारविन्दं
निषेधयन्ती परदेशयानम् ।
प्रकामदाम्पत्यसुखे निमग्ना
सा पाहिड़ा संकथिता कवीन्द्रैः ॥४॥
कर्णे दधाना सुरपुष्पयुग्मं
स्फुरत्सुरश्मोज्ज्वलमोहराङ्गी ।
स्वैरागमा चारुविलोलनेत्रा
वराङ्गनेयं कथिता वराटी ॥५॥
उन्मत्तभावे प्रथमापराधे
मानं पुनः कर्त्तुमनाश्रितेव ।
मञ्जुलभाषाभिरियं वदन्ती
सा मोरहाटी कविभिर्निरुक्ता ॥"६॥

अथ कर्णाटः ।

"कृपाणपाणिर्मृगनाभिलिप्तो
मयूरकण्ठाभिसुकण्ठकान्तिः ।
स्फुरत्प्रिलम्बितरतः प्रयाणः
कर्णाटरागो कथितः पुराणैः ॥१॥
चित्रं नटन्ती भ्रमरप्रमत्तं
संप्रार्थयन्ती नटिनं नगानाम् ।
सुगीतगानेषु मनो दधाना
नटी सुनाटीपरिधानदेहा ॥१॥
स्तनाग्रतः पुष्पलताभिरूढा
चम्पकश्रीर्मर्मगृहं वहन्ती ।
वनानि प्रम्लानतनोति सान्ध्या
भूपालिका सा परिपूर्णरीया ॥२॥
आध्यापयन्ती शुकसारसारीः
श्रीराम रामेति सुपेशलाक्षीः ।
वामकराङ्कस्थितवीणयोष्ठी
श्रीरामकेली कथिता कवीन्द्रैः ॥३॥
विशिष्टवैदग्ध्यवती समस्तान्
कलाविलासान् विनोदयन्ती ।
दृप्तोन्नतमा परिपूर्णदेहा
वड़ा प्रलम्बस्तनभारनम्रा ॥४॥
भर्त्तुः समं माधवि सञ्चरन्ती
पयोविहारेण सरोवराणि ।
विचिन्वती सौरभमोदमाना
कामोदरागिण्युदिता गुणज्ञैः ॥५॥
आधृता नटकृत्यपरिश्रमेण
बाला लीलाभिः सुदती शतारता ।
नटीनां कल्याणी कलयति मनाक्ती
एवमस्थानं सुखरिता किङ्किणीकलापम् ॥"६॥

अथ रागरागिणीनां भावनिरूपणम् ।

"मालवः श्रीश्च हिन्दोलो मल्लारस्तदनन्तरम् ।
गायन्ति गायका धीर सानन्दैन चतुष्टयम् ॥
वसन्तो रागः कर्णाटो द्वौ पौरौ भवतः क्रमात् ॥
धानसी मालसी चैव भैरवी माधवी तथा ।
सुभगा पञ्चमी नाटी वेलोयारी च गुर्ज्जरी ॥
कामोदा चापि कल्याणी कोड़ा केदारिका
तुड़ी ।
कौमारी मायूरी चैव देशकारी च सिन्धुड़ा ॥
रामकेली च भूपाली रागिण्यश्चेति विंशतिः ।
आनन्दाया इति प्रोक्ता गीयन्ते गानकोविदैः ॥
पुरवी कानड़ा गौरी रामकिरी च दीपिका ।
आशावरी विभाषा च वड़ारी च गड़ा तथा ।
एताश्च नव रागिण्यो वीराणि गानसत्तमम् ॥
वेलावली च गान्धारी ललिता पटमञ्जरी ।
वैराटी रागिणी चापि मोरहाटी च पाहिड़ा ।
करुणाश्रा विजानीयात् सर्व्वेता रागयोषितः ॥
रागेषु रसभावेन षट्‌त्रिंशद्रागिणीषु च ।
करुणानन्दवीरेषु गायनार्थं मतत्रयम् ॥"
इति संगीतदामोदरे शिवनारदसंवादे १ । २
अध्यायौ । (तथा च संगीतदर्पणे ।

अथ रागाणामुत्पत्तिः ...
"(प्रा)गादि ...
... अथ रागाः ...

... श्रीरागो ...
... भैरवेण ...

... रागो ...
... ...
अथ रागिण्यः ।
"मधुमाधवी ...

वेलावली ...
धनाश्रीमालवश्रीश्च ...
देशकारी भैरवञ्च ...
इमे रागाः प्रतीयन्ते ...
गुर्ज्जरी कौशिकश्चैव ...
देशा गुणकिरी चैव भैरवी ...
कौराटी च तथा ज्ञेया ...
वैराटी तोड़िका चैव ...
गान्धारी कामरूपी च तथा ...
मधुरामगणी ...
श्रीरागो ...
नट्टकल्याणसंज्ञश्च आड़ाना...
सर्व्वे नाटाश्च केदारी कर्णाट...
बड़हंसी मल्हारी च ...
अमी रागाश्च विज्ञेया ...
यथोक्तकाले एवैते गेयाः ...
रागाश्रया सदा गेया न तु ...
...

अथ ऋतवः ।
"श्रीरागो रागिणीयुक्तः शिशिरे ...

वसन्तः ससहायस्तु वसन्ते ...
भैरवः ससहायस्तु ऋतौ ग्रीष्मे ...
पञ्चमस्तु तथा गेयो रागिण्या ...
मेघरागो रागिणीभिर्युक्तो ...
नट्टनारायणो रागो रागिण्या ...
यथेच्छया वा गातव्याः सर्व्वर्त्तु...
इति रागाणां ऋतुनिर्णयः । ...
मतम् । * ।)

रागचूर्णः, पुं, कामदेवः । ...
मेदिनी । णे, १०६ । पञ्चचूर्ण...
रत्नावली । आधारः । इति ...

रागच्छदः, पुं, (रागेण छदः ।)
इति शब्दरत्नावली । रागोत्पादक...

रागदः, पुं, (रागं, ददातीति । ...
लैरखोत्थुपः । इति राजनिर्घण्टः । ...
त्रि ।

रागदालिः, पुं, (रागदा रागप्रदा ...
येन ।) मसूरः । इति राजनिर्घण्टः ।
मस्य मसूरशब्दे विज्ञेयम् ।)

, पुं, (रागविशिष्टं रक्तवर्णं पुष्पं यस्य ।)
। रक्ताम्लानः । इति राजनिर्घण्टः ॥
, स्त्री, (रागयुक्तं पुष्पं यस्याः । ङीप् ।)
इति राजनिर्घण्टः ॥ (गुणादयोऽस्य
ब्दे ज्ञातव्याः ॥)
:, पुं, (रागयुक्तो रक्तवर्णः प्रसवः पुष्पं
।) बन्धूकः । रक्ताम्लानः । इति राज-
ण्टः ॥
[न्] पुं, (रागेण युज्यते इति । युज्+
) माणिक्यम् । इति राजनिर्घण्टः । क्वचि-
पुस्तके रागदृक् इति पाठोऽपि विद्यते ॥
:, पुं, (रागो रज्जुरिव यस्य । नायकयोः
रानुरागबन्धकत्वात्तथात्वम् ।) कामदेवः ।
शब्दरत्नावली ॥
, स्त्री, (रागस्य जनिका लतेव ।) काम-
ली । इति जटाधरः ॥
:, पुं, (रागस्य वृन्त इव ।) कामदेवः ।
शब्दमाला ॥
ाषः, पुं, दाड़िमद्राक्षायुक्तसुद्गयूषः । अस्य
: । रुचिकारित्वम् । लघुपाकित्वम् । वात-
कफाविरोधित्वञ्च । इति राजवल्लभः ॥
या, सुश्रुते । १ । ४६ अध्याये कृतान्नवर्गे ।
य: पक्वतमश्चापि मुद्गयूषः कृताकृतः ।
दाड़िमद्राक्षायुक्तः स्याद्रागषाड़वः ।
च्यो लघुपाकश्च दोषाणामविरोधकृत् ॥"
स्य गुणाः ।
वो ह्रस्वा हृद्याः स्वाद्वा रोचनदीपनाः ।
ामच्छाश्रमच्छर्द्दिघ्ना रागषाड़वाः ॥"
इति च सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
ं, क्ली, (रागयुक्तं रक्तवर्णं सूत्रम् ।) तुला-
म् । पट्टसूत्रम् । इति मेदिनी । रे, २८४ ॥
ी, स्त्री, (रागविशिष्टमङ्गं यस्याः । ङीप् ।)
ष्ठा । इति राजनिर्घण्टः ॥
ा, स्त्री, (रागेण आढ्या ।) मञ्जिष्ठा ।
राजनिर्घण्टः ॥
:, त्रि, आर्द्रा रक्ता रागविशिष्टः । यथा,
ार्द्रा बभवती रक्ता यो हन्ति पिशुनो जनः ।
पीपायोऽपि रागार्द्रमौ राक्षसु रावहि ॥"
इति शब्दमाला ।
षि:, पुं, (रागेषु विषयाभिलाषेषु अद्वि-
।) बुद्धः । इति त्रिकाण्डशेषः ॥
णी, स्त्री, (रागोऽस्त्यस्या इति । राग+
नि: । ङीप् ।) विदग्धा नारी । इति जटा-
ः ॥ मेनकाया ज्येष्ठकन्या । यथा,—
रागिणी नाम संजाता ज्येष्ठा मेनासुता शुभे ।
ाही बहुबाणी पीतकुचवल्कला ॥"
इति वामनपुराणे ५८ अध्यायः ॥
ागिणीणी बल्ली । इति पुराणम् । षट्-
ाणाणां पत्नी । इति वचात्मुकः । ता तु
पूर्वमुदे भरतमते च त्रिंशत्सङ्ख्याः । सोमे-
मते कल्लिनाथमते च षट्त्रिंशत्सङ्ख्याः ।
ाणां विवरणं रागशब्दे द्रष्टव्यम् ॥

रागी, [न्] त्रि, (रञ्ज+"संपृचानुरुधेति ।" ३ । २ । १४२ । इति तच्छीलादिषु घिनुन् । यद्वा, रागोऽस्यास्तीति । राग+इनिः ।) अनुरक्तः । (यथा, मार्कण्डेये । २१ । ४१ ।
"त्वय्यस्या हृदयं रागि भर्त्ता चान्यो भविष्यति ।
यावज्जीवमतो दुःखं सुरभ्या नान्यथा वचः ॥")
कामुकः । इति विश्वः ॥ रक्ता । इति मेदिनी ॥
(विषयानुरागयुक्तः । स च द्विविधः । यथा, देवीभागवते । १ । १७ । ३७—३८ । ४१ ।
"द्विविधं सर्व्वलोकेषु सर्व्वत्र द्विविधो जनः ।
रागी चैव विरागी च तयोश्चित्तं द्विधा पुनः ॥
विरागी त्रिविधः कामं ज्ञातोऽज्ञातश्च मध्यमः ।
रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा ॥"
"रागो यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम् ।
दुःखं बहुविधं तस्य सुखञ्च विविधं पुनः ॥"
रक्तवर्णविशिष्टः । यथा, कथासरित्सागरे । २१ । ६ ।
"ईर्ष्याकषायभावेऽपि भङ्गुरभ्रुणि रागिणि ।
न सुखे तत्तयो राज्ञोऽन्तर्हिष्टप्रियाययोः ॥")
पुं, तृणधान्यविशेषः । तत्पर्य्यायः । श्यामकः २ बहुपत्रकशिशः ३ गुच्छकशिशः ४ । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । कषायत्वम् । शीतत्वम् । पित्तासनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥

राघ, ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ; अरराघत् । ङ, राघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

राघवः, पुं, (रघोरपत्यमिति । रघु+अण् ।) रामचन्द्रः । (यथा, रघुः । १२ । ३२ ।
"रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥"
अजः । यथा, रघुः । ८ । १६ ।
"यतिपार्थिवलिङ्गधारिणौ
ददृशाते रघुराघवौ जनैः ॥"
दशरथः । यथा, रामायणे । २ । ६४ । १ ।
"वधमप्रतिरूपं तु महर्षेस्तस्य राघवः ।
विलपन्नेव धर्म्मात्मा कौशल्यामिदमब्रवीत् ॥"
रघुवंशीयमात्रम् । यथा, तत्रैव । २ । ६४ । २५ ।
"अपि त्वद्य कुलं न स्यादराधयायां कुतो भवान् ॥")
समुद्र-मत्स्यविशेषः । इति मेदिनी । वे, ३८ । (यथा, कहले प्रथमपादे दुर्गसिंहः ।
"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥")

राघवपाण्डवीयं, क्ली, (राघवस्य रामस्य चरितान्वितं पाण्डवीयम् ।) रामायणम् । यथा,—
"कविनामपुराणानि राघवपाण्डवभारतम् ।
समासिद्धान्तमध्ये च अस्ति नास्ति कुमारि ते ॥"
इति भविष्यपुराणे रामजन्मप्रादुर्भावनामाध्यायः ॥

राघवः, पुं, हस्तकच्छपः । इति शब्दार्णवः ॥

राङ्कवं, क्ली, (रङ्कौ भवम् । रङ्कु+"रङ्कोरमनुष्येऽण् च ।" ४ । २ । १०० । इति अण् ।) मृगलोमजातवस्त्रादि । तत्पर्य्यायः । मृगरोमजम् २ । इत्यमरः । २ । ६ । १११ ॥ रङ्कुर्मृगभेदः तस्य जातार्थे अण् । यद्यपि मृगा इति रूढ्या मेषादिलोमजमपि कम्बलादि राङ्कवम् । इति तट्टीकायां भरतः ॥ (यथा, महाभारते । २ । ५० । २३ ।
"कौशिकं राङ्कवञ्चैव पट्टजं कीटजन्तथा ॥"
पुं, गौः । इति काशिका ॥ राङ्कवास्तृतं, त्रि । यथा, महाभारते । ६ । ४४ । २६ ।
"क्रौञ्चपारावतनिभैर्व्वदनैराङ्कवैरपि ॥")

राङ्गणं, क्ली, पुष्पविशेषः । रङ्गन् इति भाषा । अस्य गुणः । रक्तपित्तनाशित्वम् । इति द्रव्यगुणः ॥

राज, ऋ ञ ष दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सेट् ।) ऋ, अरराजत् । ञ, राजति राजते । ष, रेजतुः । इति दुर्गादासः ॥

राजकं, क्ली, (राज्ञां समूहः । राजन्+"गोत्रोक्षोष्ट्रोरभ्रराजेति ।" ४।२।३९ । इति वुञ् ।) नृपसमूहः । इत्यमरः । २ । ८ । ३ ॥ यथा, मार्कण्डेये । १०९ । ६ ।
"हृष्टपुष्टमतीवासीत् तस्मिन् राजन्यशेषतः ।
राजकं सकलं चोर्व्वी पौरजानपदो जनः ॥"
राजन्+स्वार्थे कन् ।) राजनि, पुं । (यथा, हरिवंशे भविष्यपर्व्वणि । २४ । ६ ।
"तवाङ्गं तिलशः कृत्वा स्वभ्यो दास्यामि राजक ॥"
राज्+ण्वुल् ।) दीप्तिकारके, त्रि ॥

राजकदम्बः, पुं, (कदम्बानां राजा । राजदन्तादित्वात् परनिपातः ।) कदम्बविशेषः । यथा,—
"कादम्बर्य्यः प्राहषेण्यो नीपो धूलीकदम्बकः ।
कदम्बप्रियको राजकदम्बोऽस्त्यपरोऽपि कः ॥"
इति जटाधरः ॥

राजकन्या, स्त्री, (राज्ञः कन्येव ।) केविकापुष्पम् । इति राजनिर्घण्टः ॥ नृपसुता च ॥ (यथा, भागवते । ९ । ४ । २३ ।
"वृतः स राजकन्याभिरेकः पञ्चाशता वरः ॥")

राजकर्कटी, स्त्री, चीनाकर्कटी । इति राजनिर्घण्टः ॥

राजकशेरुः, पुं, (कशेरूणां राजा । राजदन्तादित्वात् परनिपातः ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

राजकीयः, त्रि, (राज्ञ इदम् । राजन्+"राज्ञः कच ।" ४ । २ । १४० । इति छः ककारश्चान्तादेशः ।) राजसम्बन्धी । राजस्वत्वार्थं स्वर्णं छीयप्रत्ययेन सिद्धः । (यथा, कथासरित्सागरे । ५६ । २२८ ।
"तत्सर्व्वं राज्ञी च राजकीयं भरो दधौ ॥")

राजकुमारः, पुं, (राज्ञः कुमारः ।) राजपुत्रः । तत्र पर्य्यायोऽपि यथा,—
"कुमारे युवराजश्चैवापत्यदुर्योधनः ।

...द्यायी स्वरली राजभक्तिः शुभगताद्दयः ॥"
इति कविकल्पलतायाम् १ स्तवकः ॥

[राज]कुष्माण्डः, पु, वार्त्ताकी । इति जटा-धरः ॥

[राज]कोषातकी, स्त्री, (राजप्रिया कोषातकी ।) शाकविशेषः । घिया तोरइ इति हिन्दी-भाषा ॥ तत्पर्य्यायः । हस्तिपर्णिका २ पीत-पुष्पिका ३ धामार्गवः ४ केशफला ५ महाजाली ६ सुपीतकः ७ । अस्या गुणाः । शीतत्वम् । ज्वरघ्नत्वम् । कफवातहरत्वञ्च । इति मदनविनोदः ॥

[राज]खर्ज्जूरी, स्त्री, (राजप्रिया खर्ज्जूरी ।) श्रेष्ठखर्ज्जूरी । पिण्डखर्ज्जूरिका । तत्पर्य्यायः । राजपिण्डा २ नृपपिण्डा ३ । अस्या गुणाः । शैत्यत्वम् । स्वादु हिमत्वम् । गुरुत्वम् । पित्त-दाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

[रा]जगामि, [न्] त्रि, (राजानं गच्छतीति । गम् + णिनिः ।) राजसम्बन्धि । यथा,—
"अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥"
इति मानवे ११ अध्यायः ॥
"राजनि वा स्तेनादीनां परेषां मरणफलदोषा-भिधानम् ।" इति कुल्लूकभट्टः ॥ अपि च ।
"अपुत्रस्य धनं पत्न्यभिगामि तदभावे मातृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्त्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि तद-भावे शिष्यगामि तदभावे सहाध्यायिगामि तदभावे ब्राह्मणधनवर्ज्जं राजगामि ।" इति दायभागधृतविष्णुवचनम् ॥

राजगिरिः, पुं, शाकभेदः । तत्पर्य्यायः । राजाद्रिः २ राजशाकिनी ३ राजशाकनिका ४ । अस्य गुणाः । रुच्यत्वम् । पित्तनाशित्वम् । शीतल-त्वम् । मूलस्य तु अतिशीतलत्वम् । अतिरुच्य-त्वञ्च । इति राजनिर्घण्टः ॥ (मगधदेशस्थः पर्व्वतविशेषश्च ।)

राजग्रीवः, पुं, (राजते इति । राज् + अच् । राजा दीप्तिशालिनी ग्रीवा यस्य ।) मत्स्य-विशेषः । पलुइ इति भाषा । यथा,—
"वलकी स्यात्तिनपत्री राजग्रीवो महामदः ।"
इति त्रिकाण्डशेषः ॥

राजघः, त्रि, तीक्ष्णः । इति त्रिकाण्डशेषः ॥ (राजानं हन्तीति । हन् + "राजघ उप-संख्यानम् ।" ३ । २ । ५५ । इत्यस्य वार्त्तिकोक्त्या कप्रत्ययेन साधु ।) राजहन्ता । यथा,—
"अमन्दस्मारिपुराजवीन्महे-
र्मिलन्नतापैर्नवयं ज्वलद्वपुः ।
प्रदक्षिणीकृत्य जयाय सृष्टया
रराज नीराजनया स राजघः ॥"
इति नैषधे । १ । १० ॥

राजचिह्नकं, क्ली, उपस्थः । इति शब्दचन्द्रिका ॥ चिह्नानां ध्वजोर्द्धुविमानकानां राजा इति सुप्-सुपा चिह्नम् ॥

राजजम्बूः, स्त्री, (जम्बूनां राजा । राजदन्ता-दित्वात् परनिपातः ।) पिण्डखर्ज्जूरम् । इति मेदिनी ॥ महाजम्बूः । इति राजनिर्घण्टः ॥

राजजक्ष्मा [न्] पुं, क्षयरोगः । "यच्चाते पूज्यते रोगराजत्वात् यक्ष्मा यक्ष क ड महि अन्तः-स्थादिः श्वासोमिति सन् चवर्गाद्धतीयादिरित्येके तदा जक्ष भक्षहसनयोरित्यस्य रूपं राजयक्ष्म-शब्दोऽप्यत्र ।" इत्यमरटीकायां भरतः ॥ (अस्य विवरणन्तु राजयक्ष्मशब्दे द्रष्टव्यम् ।)

राजतं, त्रि, (रजतस्य विकारः । रजत + "प्राणि-रजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अञ् ।) रजतनिर्मितम् । यथा,—
"सौवर्णं राजतं ताम्रं पित्र्यं पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥"
इति मात्स्ये १७ अध्यायः ॥
रजतं, क्ली । (यथा, गो॰ रामायणे । ६ । ४८ । १ ।
"तं तु सीता मृगं दृष्ट्वा वने काञ्चनसप्रभम् ।
हेमराजतचित्राभ्यां पार्श्वाभ्यां समलङ्कृतम् ॥")

राजतरुः, पुं, (तरूणां राजा । राजदन्तादित्वात् परनिपातः ।) कर्णिकारवृक्षः । आरग्वधः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । ६ । ५० ।
"मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ॥")

राजतरुणी, स्त्री, (राज्ञस्तरुणीव । सौन्दर्य्याति-शयवत्त्वात् ।) पुष्पविशेषः । तत्पर्य्यायः । महासहा २ वर्णपुष्पः ३ अम्लानः ४ अम्लातकः ५ सुपुष्पः ६ सुवर्णपुष्पः ७ । अस्या गुणाः । कषायत्वम् । कफकारित्वम् । चक्षुष्यत्वम् । हर्षदत्वम् । हृद्यत्वम् । सुरभित्वम् । सुखप्रलभ-त्वञ्च । इति राजनिर्घण्टः ॥

राजता, स्त्री, राजत्वम् । राज्ञो भाव इत्यर्थे राजन् शब्दात् तल्प्रत्ययेन सिद्धा ॥ (यथा, कथासरि-त्सागरे । ३६ । ९८ ।
"तेन मत्तामसुधन्वीमपि तुङ्गा स तां ययौ ।
रत्नकूटं स्वकार्य्यार्थं निर्व्याजा हि राजता ॥")

राजतालः, पुं, (राजस्ताल इव ।) गुवाकवृक्षः । इति शब्दरत्नावली ॥

राजतिमिशः, पु, सुखाशः । इति हारावली । १८१ ॥

राजत्वं, क्ली, राजता । राज्ञो भाव इत्यर्थे राजन् शब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथा-सरित्सागरे । २० । १९१ ।
"अथ राजत्वमियुक्तो स राजा निषिषेध तत् ॥")

राजदण्डः, पुं, (राज्ञो दण्डः ।) राजशासनम् । यथा,—
"अनेकाद्धवर्षस्य पञ्चवर्षाधिकस्य च ।
चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशुद्धये ॥
ततो न्यूनतरस्यास्य नापराधो न पातकम् ।
न चास्य राजदण्डोऽपि प्रायश्चित्तं न विद्यते ॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम् ॥

राजदन्तः, पु, दन्तानां राजा । ("राजदन्तादिषु परम् ।" २ । २ । ३१ । इति परनिपातः ।) उपरिश्रेणीस्थमध्यवर्त्तिदन्तद्वयम् । यथा,—
"राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ द्वि..."
इति हेमचन्द्रः ॥

राजदेशीयः, पुं, (ईषदूनो राजा । ...
"ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।" ...
इति देशीयर् ।) राजदेश्यः । राजक... इति व्याकरणम् ॥

राजधत्तूरकः, पुं, (धत्तूरकाणां राजा । राज-दन्तादित्वात् परनिपातः ।) हेमधुस्तूरः ॥ ... इति राजनिर्घण्टः ॥ तस्य पर्य्यायः ... धुस्तूरशब्दे द्रष्टव्यः ॥

राजधर्म्मः, पुं, (राज्ञो धर्म्मः ।) राज्ञः कर्म्म । यथा,—
"राजधर्म्मान् प्रवक्ष्यामि यथावृत्तो भवेत् ।
सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥
अराजके हि लोकेऽस्मिन् सर्व्वतो ...
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो ...
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः ...
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥
कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च ...
कुरुते धर्म्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व्वतेजोमयो हि सः ॥
तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम् ...
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥
तस्माद्धर्म्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टञ्चाप्यनिष्टेषु तं धर्म्मं न विचालयेत् ॥
तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः ॥
तस्य सर्व्वाणि भूतानि ...
भयाद्भोगाय कल्पन्ते स्वधर्म्मान्न चलन्ति च ...
तं देशकालौ शक्तिञ्च विद्याञ्चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्त्तिषु ॥
स राजा पुरुषो दण्डः स ...
चतुर्णामाश्रमाणाञ्च धर्म्मस्य प्रतिभूः स्मृतः ...
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ...
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः ॥
समीक्ष्य स धृतः सम्यक् सर्व्वा रञ्जयति प्रजाः ...
असमीक्ष्य प्रणीतस्तु विनाशयति सर्व्वतः ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् ...

…कः पुरोडाशं श्वा च लिह्याद्धविस्तथा ।
…[illegible] प्रवर्त्तेताधरोत्तरम् ॥
…जितो लोको दुर्लभो हि शुचिर्नरः ।
…हि भयात् सर्व्वं जगद्भोगाय कल्पते ॥
…रक्षांसि पतगोरगाः ।
…भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥
…र्व्ववर्णाश्च भिद्येरन् सर्व्वसेतवः ।
…कप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥
…ामो लोहिताक्षो दण्डश्चरति पापहा ।
…त्र न मुह्यन्ति नेता चेत् साधु पश्यति ॥
…ः संप्रणेतारं राजानं सत्यवादिनम् ।
…कारिणं प्राज्ञं धर्म्मकामार्थकोविदम् ॥
…ा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते ।
…ा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥
…हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः ।
…द्विचलितं हन्ति नृपमेव सबान्धवम् ॥
…दुर्गञ्च राष्ट्रञ्च लोकञ्च सचराचरम् ।
…रिक्षगतांश्चैव मुनीन् देवांश्च पीडयेत् ॥
…हायेन मूढेन लुब्धेनाकृतबुद्धिना ।
…शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ॥
…ना सत्यसन्धेन यथाशास्त्रानुसारिणा ।
…णेतुं शक्यते दण्डः सुसहायेन धीमता ॥
…राष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु ।
…त्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥
…वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ।
…स्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥
…तु विपरीतस्य नृपतेरजितात्मनः ।
…क्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥
…स्वे धर्म्मे निविष्टानां सर्व्वेषामनुपूर्व्वशः ।
…र्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता ॥
…यद्यत् सभृत्येन कर्त्तव्यं रक्षता प्रजाः ।
…द्वोऽहं प्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
…णान् पर्य्युपासीत प्रातरुत्थाय पार्थिवः ।
…विद्यवृद्धान् विदुषस्तिष्ठेत्तेषाञ्च शासने ॥
…श्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
…सेवी हि सततं रक्षोभिरपि पूज्यते ॥
…तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः ।
…नीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ॥
…वोऽविनयान्नष्टा राजानः सपरिच्छदाः ।
…स्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
…ो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः ।
…ासो यवनश्चैव सुमुखो निमिरेव च ॥
…स्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च ।
…रश्च धनैश्वर्य्यं ब्राह्मण्यञ्चैव गाधिजः ॥
…विद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् ।
…न्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ॥
…न्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
…तेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥
…श कामसमुत्थानि तथाष्टौ क्रोधजानि च ।
…सनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत् ॥
…मजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
…युज्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु ॥

मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥
द्वयोरप्येतयोर्मूलं यं सर्व्वे कवयो विदुः ।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥
दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥
सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः ।
पूर्व्वं पूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यसन्यधोऽधो व्रजति स्वर्य्यात्यव्यसनी मृतः ॥
मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्-
गतान् ।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान् ॥
अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम् ॥
तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानाञ्च कार्य्येषु विदध्याद्धितमात्मनः ॥
सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता ।
मन्त्रयेत् परमं मन्त्रं राजा षाड्गुण्यसंयुतम् ॥
नित्यं तस्मिन् समाश्वस्तः सर्व्वकार्य्याणि निःक्षि-
पेत् ।
तेन सार्द्धं विनिश्चित्य ततः कर्म्म समारभेत् ॥
अन्यानपि प्रकुर्व्वीत शुचीन् प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्त्तॄनमात्यान् सुपरीक्षितान् ॥
निवर्त्तेतास्य यावद्भिरितिकर्त्तव्यता नृभिः ।
तावतोऽतन्द्रितान् दक्षान् प्रकुर्व्वीत विचक्ष-
णान् ॥
तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥
दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् ।
वपुष्मान् वीतभीर्व्वाग्मी दूतो राज्ञः प्रशस्यते ॥
अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया ।
नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्य्ययौ ॥
दूत एव हि सन्धत्ते भिनत्त्येव च संहतान् ।
दूतस्तत् कुरुते कर्म्म भिद्यन्ते येन वा न वा ॥
स विद्यादस्य कृत्येषु निगूढेङ्गितचेष्टितैः ।
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम् ॥
बुद्ध्वा च सर्व्वं तत्त्वेन परराजचिकीर्षितम् ।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत् ॥
जाङ्गलं शस्यसम्पन्नमार्य्यप्रायमनाविलम् ।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥
सर्व्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।

एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥
त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्त्ताश्रयाप्चराः ।
त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः ॥
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः ।
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ॥
एकः शतं योधयति प्राकारस्थो धनुर्द्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ॥
तत् स्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥
तस्य मध्ये सुपर्य्याप्तं कारयेद्गृहमात्मनः ।
गुप्तं सर्व्वर्त्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥ ● ॥
तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम् ।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम् ॥
पुरोहितञ्च कुर्व्वीत वृणुयादेव चर्त्विजम् ।
तेऽस्य गृह्याणि कर्म्माणि कुर्य्युर्व्वैतानिकानि च ॥
यजेत राजा क्रतुभिर्व्विविधैराप्तदक्षिणैः ।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
स्याच्चाम्नायपरो लोके वर्त्तेत पितृवन्नृषु ॥
अध्यक्षान् विविधान् कुर्य्यात् तत्र तत्र विप-
श्चितः ।
तेऽस्य सर्व्वाण्यवेक्षेरन् नृणां कार्य्याणि कुर्व्व-
ताम् ॥
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् ।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ॥
न तं स्तेना न चामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥
न स्कन्दते न व्यथते न विनश्यति कर्हिचित् ।
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते शतसाहस्रमनन्तं वेदपारगे ॥
पात्रस्य हि विशेषेण श्रद्दधानतयैव च ।
अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम् ॥
समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः ।
न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन् ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानाञ्चैव पालनम् ।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम् ॥
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥
न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥
न च हन्यात् स्थलारूढं न क्लीवं न कृता-
ञ्जलिम् ।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ।
नायुध्यमानं पश्यन्तं न परेण समागतम् ॥
नायुधव्यसनप्राप्तं नार्त्तं नातिपरीक्षतम् ।
न भीतं न परावृत्तं सतां धर्म्ममनुस्मरन् ॥
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत् सर्व्वं प्रतिपद्यते ॥
यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्ज्जितम् ।
भर्त्ता तत् सर्व्वमादत्ते परावृत्तहतस्य तु ॥ * ॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः।
सर्व्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत्॥
राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः।
राज्ञा च सर्व्वयोधेभ्यो दातव्यमपृथग्जितम्॥
एषोऽनुपस्कृतः प्रोक्तो योधधर्म्मः सनातनः।
अस्माद्धर्म्मान्न च्यवेत क्षत्त्रियो घ्नन् रणे रिपून्॥
अलब्धञ्चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत्॥
एतच्चतुर्व्विधं विद्यात् पुरुषार्थप्रयोजनम्।
अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दानेन निःक्षिपेत्॥
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसंवार्य्यो नित्यं छिद्रानुसार्य्यरेः॥
नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्।
तस्मात् सर्व्वाणि भूतानि दण्डेनैव प्रसाधयेत्॥
अमाययैव वर्त्तेत न कथञ्चन मायया।
बुद्ध्येतारिप्रयुक्ताञ्च मायां नित्यं स्वसंवृतः॥
नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः॥
वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः।
तानानयेद्वशं सर्व्वान् सामादिभिरुपक्रमैः॥
यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः।
दण्डेनैव प्रसह्यैतांश्छनकैर्व्वशमानयेत्॥
सामादीनामुपायानां चतुर्णामपि पण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥
यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः॥
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्॥
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत्।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते॥
द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम्।
तथा ग्रामशतानाञ्च कुर्य्याद्राष्ट्रस्य संग्रहम्॥
ग्रामस्याधिपतिं कुर्य्याद्दशग्रामपतिं तथा।
विंशतीशं शतेशञ्च सहस्रपतिमेव च॥
ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम्।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिनम्॥
विंशतीशस्तु तत्सर्व्वं शतेशाय निवेदयेत्।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम्॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्॥
दशी कुलन्तु भुञ्जीत विंशी पञ्च कुलानि च।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम्॥
तेषां ग्राम्याणि कार्य्याणि पृथक् कार्य्याणि चैव हि।
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः॥
नगरे नगरे चैकं कुर्य्यात् सर्व्वार्थचिन्तकम्।
उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहम्॥
स ताननुपरिक्रामेत् सर्व्वानेव सदा स्वयम्।
तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः॥
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥
ये कार्य्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः।
तेषां सर्व्वस्वमादाय राजा कुर्य्यात् प्रवासनम्॥
राजकर्म्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च।
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्म्मानुरूपतः॥
पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम्।
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः॥ ● ॥
क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम्।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान्॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणाम्।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्॥
यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः॥
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा॥
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च॥
पत्रशाकतृणानाञ्च वैदलस्य च चर्म्मणाम्।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च॥
म्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम्।
न च क्षुधास्य संसीदेत् श्रोत्रियो विषये वसन्॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति॥
श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्म्यां प्रकल्पयेत्।
संरक्षेत् सर्व्वतश्चैनं पिता पुत्रमिवौरसम्॥
संरक्ष्यमाणो राज्ञा यं कुरुते धर्म्ममन्वहम्।
तेनायुर्व्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च॥
यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥
कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः।
एकैकं कारयेत् कर्म्म मासि मासि महीपतिः॥
नोच्छिन्द्यादात्मनो मूलं परेषाञ्चातितृष्णया।
उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीडयेत्॥
तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः।
तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमतः॥
अमात्यमुख्यं धर्म्मज्ञं प्राज्ञं दान्तं कुलोद्गतम्।
स्थापयेदासने तस्मिन् खिन्नः कार्य्येक्षणे नृणाम्॥
एवं सर्व्वं विधायेदमिति कर्त्तव्यमात्मनः।
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः॥
विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति॥
क्षत्त्रियस्य परो धर्म्मः प्रजानामेव पालनम्।
निर्द्दिष्टफलभोक्ता हि राजा धर्म्मेण युज्यते॥
उत्थाय पश्चिमे यामे कृतशौचः समाहितः।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां-
सभाम्॥ तत्र स्थितः प्रजाः सर्व्वाः प्रतिनन्द्य
विसर्ज्जयेत्। विसृज्य च प्रजाः सर्व्वा मन्त्रयेत् स-
गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः॥
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः।
स कृत्स्नां पृथिवीं भुङ्क्ते कोषहीनोऽपि
पार्थिवः॥
जडमूकान्धबधिरांस्तैर्य्यग्योनान् वयो-
ऽतिगान्। स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले-
भिन्दन्त्यवमता मन्त्रं तैर्य्यग्योनास्तथैव
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो
मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः
चिन्तयेद्धर्म्मकामार्थान् सार्द्धं तैरेक
परस्परविरुद्धानां तेषाञ्च समुपार्ज्जनम्
कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम्
दूतसम्प्रेषणञ्चैव कार्य्यशेषं तथैव
अन्तःपुरप्रचारञ्च प्रणिधीनाञ्च चेष्टितम्
कृत्स्नं चाष्टविधं कर्म्म पञ्चवर्गञ्च तत्त्व
अनुरागापरागौ च प्रचारं मण्डलस्य
मध्यमस्य प्रचारञ्च विजिगीषोश्च चे-
उदासीनप्रचारञ्च शत्रोश्चैव प्रयत्नत॥
एताः प्रकृतयो मूलं मण्डलस्य सम-
अष्टौ चान्याः समाख्याता द्वादशैव।
अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च
प्रत्येकं कथिता ह्येताः संक्षेपेण द्वि
अनन्तरमरिं विद्यादरिसेविनमेव च।
अरेरनन्तरं मित्रमुदासीनं तयोः पर
तान् सर्व्वानभिसन्दध्यात्
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन
सन्धिञ्च विग्रहञ्चैव यानमासनमेव च
द्वैधीभावं संश्रयञ्च षड्गुणां
आसनञ्चैव यानञ्च सन्धिं विग्रहमेव
कार्य्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रय
सन्धिन्तु द्विविधं विद्याद्राजा।
उभे यानासने चैव द्विविधः संश्र
समानयानकर्म्मा च विपरीतस्तथै
तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो
स्वयंकृतश्च कार्य्यार्थमकाले का-
मित्रस्य चैवापकृते द्विविधो विग्र
एकाकिनश्चात्ययिके कार्य्ये प्राप्ते
संहतस्य च मित्रेण द्विविधं
क्षीणस्य चैव क्रमशो दैवात् पूर्व्व
मित्रस्य चानुरोधेन द्विविधं स्मृत
बलस्य स्वामिनश्चैव स्थितिः का
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगु
अर्थसम्पादनार्थञ्च पीड्यमानस्य श
साधुषु व्यपदेशार्थं द्विविधः संश्र-
यदावगच्छेदायत्यामाधिक्यं ध्रुवमा
तदात्वे चाल्पिकां पीडां तदा सन्धिं

ये तत्काले।
प्रहृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम्।
च्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम्॥
मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
विपरीतश्च तदा यायाद्रिपुं प्रति॥
तु स्यात् परिक्षीणो वाहनेन बलेन च।
सीत प्रयत्नेन शनकैः सान्त्वयन्नरीन्॥
ारिं यदा राजा सर्व्वथा बलवत्तरम्।
द्विधा बलं कृत्वा साधयेत् कार्य्यमात्मनः॥
परबलानान्तु गमनीयतमो भवेत्।
तु संश्रयेत् क्षिप्रं धार्म्मिकं बलिनं नृपम्॥
हं प्रकृतीनाञ्च कुर्य्याद्योऽरिबलस्य च।
ेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा॥
तत्रापि संपश्येत् दोषं संश्रयकारितम्।
मेव तत्रापि निर्विशङ्कः समाचरेत्॥
पायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः।
स्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः॥
ति सर्व्वकार्य्याणां तदात्वञ्च विचारयेत्।
तानाञ्च सर्व्वेषां गुणदोषौ च तत्त्वतः॥
त्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः।
ते कार्य्यशेषज्ञः शत्रुभिर्नाभिभूयते॥
नं नाभिसन्दध्युर्मित्रोदासीनशत्रवः।
सर्व्वं संविदध्यादेष सामासिको नयः॥
तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः।
नेन विधानेन यायादरिपुरं शनैः॥
र्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।
गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम्॥
ष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम्।
यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः॥
ा विधानं मूले तु यात्रिकञ्च यथाविधि।
ास्पदञ्चैव चारान् सम्यग्विधाय च॥
ोध्य त्रिविधं मार्गं षड्विधञ्च बलं स्वकम्।
म्परायिककल्पेन यायादरिपुरं शनैः॥
त्रुसेविनि मित्रे च गूढ़े युक्ततरो भवेत्।
प्रत्यागते चैव स हि कष्टतरो रिपुः॥
ड्व्यूहेन तन्मार्गं यायात्तु शकटेन वा।
ाहमकराभ्यां वा सूच्या वा गरुड़ेन वा॥
ञ्च भयमाशङ्केत्ततो विस्तारयेद्बलम्।
ेन चैव व्यूहेन निविशेत सदा स्वयम्॥
ापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
तश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम्॥
ल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः।
ाने युद्धे च कुशलानभीरूनविकारिणः॥*॥
हतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
च्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥
न्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले॥
क्षेत्रांश्च मत्स्यांश्च पञ्चालान् शूरसेनजान्।
र्घान् लघूंश्चैव नरानग्रानीकेषु योधयेत्॥
हर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत्।
ष्टाश्चैव विजानीयादरीन् योधयतामपि॥
परुध्यारिमासीत राष्ट्रं चास्योपपीड़येत्।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम्॥
भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम्।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक्।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन॥
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत्॥
त्रयाणामप्युपायानां पूर्व्वोक्तानामसम्भवे।
तथा युध्येत संयत्तो विजयेत रिपून् यथा॥*॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान्।
प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च॥
सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत्तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम्॥
प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान्।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह॥
आदानमप्रियकरं दानञ्च प्रियकारकम्।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते॥
सर्व्वं कर्म्मेदमायत्तं विधाने दैवमानुषे।
तयोर्द्दैवमचिन्त्यन्तु मानुषे विद्यते क्रिया॥
सह वापि व्रजेद्युक्तः सन्धिं कृत्वा प्रयत्नतः।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम्॥
पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात्॥”
आक्रन्दः पार्ष्णिग्राहस्य नियामको राजा।
“हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम्॥६॥
धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः॥
आर्य्यता पुरुषज्ञानं शौर्य्यं करुणवेदिता।
स्थौललक्ष्यञ्च सततमुदासीनगुणोदयः॥”
स्थौललक्ष्यं बहुप्रदत्वम्।
“क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन्॥
आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥
सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम्।
संयुक्तांश्च वियुक्तांश्च सर्व्वोपायान् सृजेद्बुधः॥
उपेतारमुपेयञ्च सर्व्वोपायांश्च कृत्स्नशः।
एतत् त्रयं समाश्रित्य प्रयतेतार्थसिद्धये॥”
उपेतारं आत्मानम्। उपेयं प्राप्यम्॥*॥
“एवं सर्व्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः।
व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत्॥
तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः॥
विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत्।
विषघ्नानि च [illegible] नि धारयेत् सदा॥
परीक्षिताः [illegible] नैः।
वेशाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः॥
एवं प्रयत्नं कुर्व्वीत यानशय्यासनाशने।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु च॥
भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह।
विहृत्य तु यथाकालं पुनः कार्य्याणि चिन्तयेत्॥
अलङ्कृतश्च संपश्येदायुधीयं पुनर्ज्जनम्।
वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च॥
सन्ध्याञ्चोपास्य शृणुयादन्तर्व्वेश्मनि शस्त्रभृत्।
रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम्॥
गत्वा कक्षान्तरं त्वन्यत् समनुज्ञाप्य तं जनम्।
प्रविशेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पुनः॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनियोजयेत्॥”
इति मानवे ७ अध्यायः॥*॥
कालीकापुराणोक्तराजधर्म्मः ८५। ८६ अध्याययोः द्रष्टव्यः। महाभारतोक्तराजधर्म्मः शान्तिपर्व्वणि द्रष्टव्यः। पद्मपुराणोक्तराजधर्म्मः स्वर्गखण्डे १३८ अध्याये द्रष्टव्यः॥

राजधानकं, क्ली, (धीयतेऽत्रेति। धा + ल्युट्। ततः कन्। राज्ञां धानकं नगरम्।) राजपुरम्। इति शब्दरत्नावली॥

राजधानी, स्त्री, (धीयतेऽस्यामिति। धा + अधिकरणे ल्युट्। ङीप्। राज्ञां धानी नगरी।) राजधानिका। तत्पर्य्यायः। कोट्टः २ राजधानकम् ३। इति शब्दरत्नावली॥ स्कन्धावारः ४। इति हेमचन्द्रः॥ (यथा, रघुः।२।७०।
“तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वशिष्ठः॥”)

राजधान्यं, क्ली, (राजप्रियं धान्यम्।) श्यामाकः। इति राजनिर्घण्टः॥ (यथा, वृहत्संहितायाम्।१५।१२।
“ताड़ीभूयमणिरागश्येनगान्धर्व्वगन्धयुक्तिज्ञाः।
गणितपटुतन्तुवाद्याः शालाख्या राजधान्यानि॥”)

राजधुस्तूरकः, पुं, (धुस्तूरकाणां राजा। राजदन्तादित्वात् परनिपातः।) दृहद्धुस्तूरः। तत्पर्य्यायः। राजधूर्त्तः २ महाशठः ३ निस्त्रिंशपुष्पकः ४ भ्रान्तः ५ राजसर्षः ६। इति राजनिर्घण्टः॥ अस्य गुणाः धुस्तूरशब्दे द्रष्टव्याः॥

राजनामा, [न्] पुं, (राज्ञो नाम नाम यस्य।) पटोलः। इति राजनिर्घण्टः॥

राजनीतिः, स्त्री, (राज्ञां नीतिः।) राज्ञां नयः। यथा, [illegible] श्लोकः।
[illegible] निग्रहम्।
[illegible] सारसंग्रहम्॥”
[illegible]
[illegible] भागवतीसारः।
[illegible] री पावनगुणानम्॥
[illegible] वदितं सुखदस्य
[illegible]

परत्रेह च यच्छ्रेयः पुत्र तत् कर्म्म चाचर ।
यथा श्लाघ्यो प्रयास्यद्य यथा कीर्त्तिर्भवेत्तव ।
यथा नापयशोयोगस्तथा कुरु महामते ॥
एतदर्थं श्रियं दीप्तां काङ्क्षन्ति पुरुषोत्तमाः ।
येनेति हि गृहेऽस्माकं निवसन्ति सुनिर्वृताः ।
वृद्धो ज्ञातिर्गुणी विप्रः कीर्त्तिश्च यशसा सह ॥
तस्माद्यथा ते निवसन्ति पुत्र-
राज्यस्थितस्येह कुलीनमाद्याः ।
तथा यतस्वामलसत्त्वचेष्टया
यथा यशस्वी भवितासि लोके ॥
भूम्यां सदा ब्राह्मणभूषितायां
क्षेत्रान्वितायां दृढवाप्रितायाम् ।
शुश्रूषणासक्तसशूद्रवायां
कर्हिं प्रयान्तीह नराधिपेन्द्राः ॥
तस्माद्द्विजाग्र्याः श्रुतिशास्त्रयुक्ता
नराधिपांस्ते प्रतियाजयन्ते ।
दिव्यैर्यजन्तु क्रतुभिर्द्विजेन्द्रा
यज्ञाग्निधूमो न नृपस्य शान्तिः ॥
तपोऽध्ययनसम्पन्ना याजनाध्यापने रताः ।
सन्तु विप्रा वले पृथ्व्यास्त्वत्तोऽनुज्ञामवाप्य हि ॥
स्वाध्याययज्ञनिरता दातारः शस्त्रजीविनः ।
क्षत्रियाः सन्तु दैत्येन्द्र प्रजापालनधर्म्मिणः ॥
यज्ञाध्ययनसम्पन्ना दातारः कृषिकारिणः ।
पाशुपाल्यं प्रकुर्व्वन्तु वैश्या विपिनजीविनः ॥
ब्राह्मणक्षत्रियविशां सदा शुश्रूषणे रताः ।
शूद्राः सन्त्वसुरश्रेष्ठ तवाज्ञाकारिणः सदा ॥
यदा वर्णाः स्वधर्म्मस्था भवन्ति दितिजेश्वर ! ।
धर्म्मवृद्धिस्तदा स्याद्वै धर्म्मवृद्धौ नृपोदयः ॥
तस्माद्वर्णाः सधर्म्मस्थास्त्वया कार्य्याः सदा बले ! ।
तद्वृद्धौ भवतो वृद्धिस्तद्धानौ हानिरुच्यते ॥
इत्थं वचः श्राव्य महासुरेन्द्रो
बलिं महात्मा स बभूव तूष्णीम् ।
ततो यदाज्ञापयसे करिष्ये
इत्थं बलिः प्राह वचो महर्षे ॥"
इति वामने ७१ अध्यायः ॥ * ॥
अपि च ।
"एवं दत्त्वा ततो राज्यं मूर्द्ध्नि चाघ्राय धर्म्मवित् ।
उवाच मधुरं वाक्यं पुत्रं पुत्रवतां वरः ॥
राज्यस्थेनापि ते पुत्र कर्त्तव्यं शृणु तन्मम ।
यदीच्छेत् परमं धर्म्मं पितॄणां तारणं तथा ॥
दानवोऽर्च्चितं कर्त्तव्या हन्तव्या परदारिकाः ।
बालघाताश्च हन्तव्या हन्तव्या स्त्रीविघातकाः ॥
मा लोभं परद्रव्येषु अन्यायोपार्ज्जितेषु च ।
न चिरं तिष्ठते क्वापि सर्व्वं मान्याः कदाचन ॥
इत्थं लोकस्तु ते देयः कुलन्यायवशाच्चितः ।
विप्रोद्दिष्टेन न्यायसमाश्रयवचनं कुरु ॥
अमात्यो यद्वचो ब्रूयात् पुत्र कार्य्यविनिश्चयम् ।
अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥
प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणाः ।
तत् ते पुत्र कर्त्तव्यं मम प्रियहितैषिणा ॥
मद्यपानं वर्ज्जनीयं दोषो राजस्तु नश्यति ।
येन राजा विनश्यन्ति सम्यक्तोऽपि महाद्युतिः ॥
वञ्चयेत सुरापानं मृगया वर्ज्जयेत् सदा ।
वाक्यं रूक्षं न वक्तव्यं वृथा वाचन कदाचन ॥
राजगुह्यं न वक्तव्यं दूतभेदं विवर्ज्जयेत् ।
वर्ज्जयेदतिपारुष्यं सामन्तैश्च समागमम् ॥
अर्थदूषणकञ्चैव न कर्त्तव्यं कदाचन ।
अमात्यं नाप्रियं ब्रूयाद्दुष्टशीलेऽदक्षकर्म्मणि ॥
नाहं निवारणीयस्ते ममताय पथि स्थितः ।
एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥
ततः पितुर्व्वचः श्रुत्वा राजपुत्रो यशस्विनः ।
उभौ तु पादौ संगृह्य कारणं प्रत्युवाच तम् ॥"
इत्यादि श्रीवराहपुराणे भगवच्छास्त्रे शौकरवे तीर्थमाहात्म्ये आदित्यवरप्रदानरत्नमुक्तोपाख्यानं नामाध्यायः ॥ * ॥
अन्यच्च ।

मनुरुवाच ।
"राज्ञोऽभिषिक्तमात्रस्य किन्नु कृत्यतमं भवेत् ।
एतत् सर्व्वं समाचक्ष्व सम्यग्वेत्ति यतो भवान् ॥

मत्स्य उवाच ।
अभिषेकार्द्रशिरसा राज्ञा राजीवलोचन ।
सहायावरणं कार्य्यं तत्र राज्यं प्रतिष्ठितम् ॥
यदप्यल्पतरं कर्म्म तदप्येकेन दुष्करम् ।
पुरुषेणासहायेन किमु राज्यं महत् परम् ॥
तस्मात् सहायान् वरयेत् कुलीनान् नृपतिः स्वयम् ।
शूरान् कुलीनजातीयान् बलयुक्तान् श्रियान्वितान् ॥
रूपसत्त्वगुणोपेतान् सज्जनान् क्षमया युतान् ।
क्लेशक्षमान् महोत्साहान् धर्म्मज्ञांश्च प्रियंवदान् ॥
हितोपदेशकालज्ञान् स्वामिभक्तान् यशोऽर्थिनः ।
एवंविधान् सहायांश्च शुभकर्म्मसु योजयेत् ॥
गुणहीनानपि तथा विज्ञाय नृपतिः स्वयम् ।
कर्म्मस्वेव नियुञ्जीत यथायोग्येषु भारत ! ॥
कुलीनः शीलसम्पन्नो धनुर्व्वेदविशारदः ।
हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषणः ॥
निमित्ते शकुनज्ञाने वेत्ता चैव चिकित्सिते ।
कृतज्ञः कर्म्मणां शूरस्तथा क्लेशसहो ऋजुः ॥
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ।
राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियो यथा ।
प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते ॥
यथोक्तवादी दूतः स्याद्देशभाषाविशारदः ।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥
विज्ञातदेशकालश्च दूतः स्यात् स महीक्षितः ।
वक्ता नयस्य यः काले स दूतो नृपतेर्भवेत् ॥
प्रांशवो व्यायताः शूराः दृढभक्ता निराकुलाः ।
राज्ञः तु रक्षिणः कार्य्याः सदा क्लेशसहा हिताः ॥
अनाहार्य्योऽनृशंसश्च दृढभक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाथ तद्गुणा ॥
वाक्पटुश्चापि [illegible]
सन्धिविग्रहिकः कार्य्यो राज्ञा [illegible]
आयव्ययज्ञो लोकज्ञो [illegible]
[illegible]
सुरूपस्तरुणः प्रांशुर्दृढभक्तिः [illegible]
शूरः क्लेशसहश्चैव खड्गधारी [illegible]
शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्व्वक्लेशसहः [illegible]
निमित्तशकुनज्ञानहयशिक्षाविशारदः ।
हयायुर्व्वेदतत्त्वज्ञो भुवि भाषाविशेषवित् ।
स्वामिभक्तो महोत्साहः सर्व्वथा [illegible]
बलाबलज्ञो रथिनः स्थिरदृष्टिः [illegible]
शूरश्च कृतविद्यश्च सारथिः परिकी[illegible]
अनाहार्य्यः [illegible]
सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रश[illegible]
सूदशास्त्रविधानज्ञाः पराभेद्याः [illegible]
सर्व्वे महानसे धार्य्याः [illegible]
समः शत्रौ च मित्रे च [illegible]
विप्रमुख्यः कुलीनश्च धर्म्माधि[illegible]
कार्य्यास्तथाविधास्तत्र [illegible]
सर्व्वदेशाक्षराभिज्ञः सर्व्वशास्त्रविशा[illegible]
लेखकः कथितो राजन् [illegible]
शीर्षोपेतान् सुसम्पूर्णान्
[illegible]
अक्षरान् वै लिखेद्यस्तु [illegible]
उपायवाक्यकुशलः सर्व्वशास्त्रविशा[illegible]
बह्वर्थवक्ता चाल्पेन लेखकः [illegible]
वाक्याभिप्रायतत्त्वज्ञो [illegible]
अनाहार्य्यो नृपे भक्तो लेखकः [illegible]
पुरुषान्तरतत्त्वज्ञाः [illegible]
धर्म्माधिकरणे कार्य्या जनाहारक[illegible]
एवंविधास्तथा कार्य्या [illegible]
लोहवस्त्राजिनादीनां रत्नानाञ्च वि[illegible]
विज्ञाता फल्गुसाराणामनाहार्य्यः [illegible]
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकी[illegible]
आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा न[illegible]
व्ययद्वारेषु च तथा कर्त्तव्या दृष्टि[illegible]
परम्परागतो यः स्यादष्टाङ्गे तु चि[illegible]
अनाहार्य्यः स वैद्यः स्याद्धर्म्मात्मा च [illegible]
प्राणाचार्य्यः स विज्ञेयो वचनं तस्य [illegible]
राजन् राज्ञा सदा कार्य्यं यथाकार्य्यं [illegible]
हस्तिशिक्षाविधानज्ञो वनजातिविशा[illegible]
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रश[illegible]
एतैरेव गुणैर्युक्तः स्थानकश्च विशेषतः ।
गजारोहो नरेन्द्रस्य सर्व्वकर्म्मसु [illegible]
हयशिक्षाविधानज्ञश्चिकित्सितविशा[illegible]
अश्वाध्यक्षो महीभर्त्तुः [illegible]
अनाहार्य्यश्च शूरश्च तथा प्राज्ञः [illegible]
दुर्गाध्यक्षः स्मृतो राजन् उद्युक्तः [illegible]
वास्तुविद्याविधानज्ञो लघुहस्तो [illegible]
दीर्घदर्शी च शूरश्च स्थपतिः परि[illegible]

क्त पाणिमुक्ते ग्रमुक्ते मुक्तधारिते ।
चार्य्यो निरुद्देश: कुलशश्च विशिष्यते ॥
कुलोद्गत: शक्त: पितृपैतामह: शुचि: ।
मन्त:पुराध्यक्षो विनीतश्च तथेष्यते ॥
बमाधिकारेषु पुरुषा: सप्त तेऽपरे ।
ग्रन्दाधिकरणा: पुरुषा: सप्त तेऽपरम् ॥
:पुरचरा: कार्य्या राज्ञा सर्व्वेषु कर्म्मसु ।
नानातितत्त्वज्ञ: सततं प्रतिजाग्रता ॥
: स्यादायुधागारे दक्ष: कर्म्मसु चोद्यत: ।
ण्यपरिमेयाणि राज्ञां भृगुकुलोद्भव ॥
माधममध्यानि बुद्ध्वा कर्म्माणि पार्थिव: ।
माधममध्येषु पुरुषेषु नियोजयेत् ॥
र्म्मविपर्य्यासाद्राजा नाशमवाप्नुयात् ।
गं पौरुषं भक्तिं श्रुतं शौर्य्यं कुलं नयम् ॥
ा वृत्तिर्विधातव्या पुरुषाणां महीक्षिता ।
ान्तरविज्ञाने तत्त्वसारनिबन्धनात् ॥
भिर्म्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
णामपि नो कुर्य्यान्मन्त्रिमन्त्रप्रकाशनम् ॥
त् कस्यचिद्विश्वासो भवतीह सदा नृणाम् ।
यश्च सदा मन्त्रे कार्य्यं एकेन सूरिणा ॥
द्दा निश्चयावाप्ति: परबुद्ध्युपजीवनात् ।
स्येव महीभर्त्तुर्भूय: कार्य्यो विनिश्चय: ॥
ग्रणान् पर्य्युपासीत चर्य्यां नाम सुनिश्चिताम् ।
उत्क्राम्यतो मूढांस्ते हि लोकस्य कण्टका: ॥
ंश्च नित्यं सेवेत विप्रान् वेदविद: शुचीन् ।
गे हि शिक्षेद्विनयं विनीतात्मा हि नित्यश: ।
ग्रां वशगां कुर्य्यात् पृथिवीं नात्र संशय: ॥
वोऽविनयाद्भ्रष्टा राजान: सपरिच्छदा: ।
स्याश्चैव राज्यानि विनयात् प्रतिपेदिरे ॥
वेदेभ्यस्त्रयीविद्यां दण्डनीतिञ्च शाश्वतीम् ।
न्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकत: ॥
न्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
तेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजा: ।
त राजा क्रतुभिर्ब्बहुभिश्चाप्तदक्षिणै: ।
ार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
तुमासिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
त् स्वाध्यायपरो लोके वर्त्तेत पितृवन्नृषु ॥
त्तानां गुरुकुलात् द्विजानां पूजको भवेत् ।
ाणामक्षयो ह्येष विधिर्ब्राह्मो विधीयते ॥
: स्तेनाश्चामित्रा हरन्ति न च नश्यति ।
ाद्राज्ञा विधातव्यो ब्राह्मणेष्वक्षयो निधि: ॥
ीसमाधर्मे राजा ह्याहूय पालयेत् प्रजा: ।
निवर्त्तेत संग्रामात् क्षात्त्रव्रतमनुस्मरन् ॥
ामेभ्यनिवर्त्तित्वं प्रजानां परिपालनम् ।
ूषा ब्राह्मणानाञ्च राज्ञां निश्रेयसं परम् ॥
यानाञ्च कृपणानामातुराणाञ्च योषिताम् ।
ेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ॥
यमश्चबन्धानं तथा कार्य्यं विशेषत: ।
र्मप्रवृत्तान् राजा सत्कर्म्मे स्थापयेत् तथा ॥
ने च यथाकामं तैस्सभाजनभोजनम् ।
मेवमर्च्चयेद्राजा सत्कृत्यैतान् समानयेत् ॥
नेषु यमेशात्मेषि राज्यमालानमेव च ।

निवेदयेत् प्रयत्नेन देवत्वमिरमर्च्चयेत् ॥
हे प्रज्ञे वेदितव्ये च शश्वच्छक्ता च मानवै: ।
वक्रां ज्ञात्वा न सेवेत प्रतिबाधेत चागताम् ॥
नास्य च्छिद्रं परो विद्यात् विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मन: ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥
विश्वासयेच्चाप्यपरं तत्त्वभूतेन हेतुना ।
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।
दृढप्रहारी च भवेत् तथा शूकरवन्नृप: ॥
चित्राकारश्च शिखिवद्दृढभक्तस्तथाश्ववत् ।
भवेच्च मधुराभाषी तथा कोकिलवन्नृप: ॥
काकशङ्की भवेन्नित्यं नाज्ञातवसतिं वसेत् ।
नापरीक्षितपूर्व्वञ्च भोजनं शयनं स्पृशेत् ॥
वस्त्रं पुष्पमलङ्कारं यच्चान्यन्मनुजोत्तम ! ।
न गाहेज्जलसम्बाधं न चाज्ञातजलाशयम् ॥
अपरीक्षितपूर्व्वन्तु पुरुषैराप्तकारिभि: ।
नारोहेत् कुञ्जरं व्यालं न जातु तुरगं तथा ॥
नाविज्ञातस्त्रियं गच्छेत् नैव देवोत्सवे वसेत् ।
नरेन्द्रलक्ष्म्या धर्म्मज्ञ त्राता यत्तो भवेन्नृप: ।
सद्वृत्ताश्च तथा पुष्टा सततं प्रतिमानिता: ।
राज्ञा सहाया: कर्त्तव्या: पृथिवीं जेतुमिच्छता ।
यथार्हञ्चाप्युत्तमान् राजा कर्म्मसु योजयेत् ।
धर्म्मिष्ठान् धर्म्मकार्य्येषु शूरान् संग्रामकर्म्मसु ॥
निपुणानर्थकृत्येषु सर्व्वत्र च तथा शुचीन् ।
स्त्रीषु षण्डान् नियुञ्जीत तीक्ष्णान् दारुणकर्म्मसु ।
धर्म्मे चार्थे च कामे च भये च रविनन्दन ।
राजा यथार्हञ्च कुर्य्यादुपधाभि: परीक्षणम् ॥
समतीतोपधान् भृत्यान् कुर्य्याद्धस्तिवनेचरान् ।
तत्पादान्वेषणे यत्नांस्तदध्यक्षांश्च कारयेत् ॥
एवमादीनि कर्म्माणि नृपै: कार्य्याणि भार्गव ।
सर्व्वथा नेष्यते राज्ञस्तीक्ष्णोपकरणक्रिया: ॥
पापबाध्यानि कर्म्माणि यानि राज्ञां नृपोत्तम ।
सन्तस्तानि न कुर्व्वन्ति तस्मात्तान् विवर्जयेन्नृप: ।
नेष्यते पृथिवीशानां तीक्ष्णोपकरणक्रिया ।
यस्मिन् कर्म्मणि यस्य स्यात् विशेषेण च कौश-
लम् ।
तस्मिन् कर्म्मणि तं राजा परीक्ष्य विनियोजयेत् ॥
पितृपैतामहान् भृत्यान् सर्व्वकर्म्मसु योजयेत् ।
विना दायादकृत्येषु परीक्ष्य सुकृतान्नरान् ।
नियुञ्जीत महाभाग तस्य ते हितकारिण: ।
परराजगृहात् प्राप्तं जनसंग्रहकाम्यया ।
दुष्टान् वाप्यदुष्टान् वाऽऽश्रयीत प्रयत्नत: ।
दुष्टं विज्ञाय विश्वासं न कुर्य्यात्तस्य भूमिप: ।
वृत्तिं तस्यापि वर्त्तेत जनसंग्रहकाम्यया ॥
राजा देशान्तरं प्राप्तं पुरुषं पूजयेद्भृशम् ।
ममायं देशसंप्राप्तो बहुमानेन चिन्तित: ॥
तथाचारेण चारित्रं राजा विद्यात् नित्यश: ।
गुणिनां पूजनं कुर्य्यात् निर्गुणानाञ्च शासनम् ।
कथिता: सततं राजन् राजानश्चारचक्षुष: ।
स्वे देशे परे देशे ज्ञानशीलान् विचक्षणान् ।

अनाहार्य्यान् क्लेशसहान् नियुञ्जीत सदा चरान् ।
जनस्याविदितान् सौम्यांस्तथाज्ञातान् परस्परम् ॥
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्रजिताकारान् चारान् राजा नियो-
जयेत् ॥
नैकस्य राजा श्रद्दध्यात् चारस्यापि च भाषितं ।
द्वयो: सम्बन्धमाज्ञाय श्रद्दध्यान्नृपतिस्तत: ॥
परस्परस्याविदितौ यदि स्यातां चरावुभौ ।
तस्माद्राजा प्रयत्नेन गूढांश्चारान्नियोजयेत् ॥
राज्यस्य मूलमेतावत् या राज्ञश्चारदृष्टिता ।
चाराणामपि यत्नेन राज्ञा कार्य्यं परीक्षणम् ॥
विरज्यते तथा केन विज्ञेयं तन्महीक्षिता ।
अनुरागात् कथं लोके कर्म्म कार्य्यं महीक्षिता ॥
लोकरागापरागौ च भृत्यानाञ्च गुणागुणान् ।
सर्व्वं राज्ञां चरायत्तं तेषु यत्नपरो भवेत् ॥
कर्म्मणा केन मे लोके जन: सर्व्वोऽनुरज्यते ।
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ।
विरोधजनकं लोके वर्ज्जनीयं विशेषत: ॥

जनानुरागप्रभवा हि लक्ष्मी
राज्ञां मता भार्गववंशचन्द्र ।
तस्मात् प्रयत्नेन नरेन्द्रमुख्यै:
कार्य्योऽनुरागो भुवि मानवेषु ॥”

इति मात्स्ये २१५ अध्याय: ॥ * ॥

अपरञ्च ।

राजोवाच ।

“बहवो भूपतेर्धर्म्मास्तान् वक्तुं नहि शक्यते ।
तस्मात् समासतो वच्मि महाभाग निशामय ॥
पृथिवी वैष्णवी पुण्या सदा प्रियतमा हरे: ।
नारायणादृते नान्यो वसुमत्या: पतिर्भवेत् ॥
नारायणांशजो राजा मनुष्यो न कदाचन ।
अतस्तु दुर्नयं त्यक्त्वा सर्व्वो नीतिं समाचरेत् ॥
नीतिग्राही नृपो यस्तु विपत्तिर्नास्ति तस्य वै ।
चिरं भुनक्ति पृथिवीं कण्टकै: परिवर्ज्जित: ॥
यस्मै न रोचते नीतिर्भूपालाय दुरात्मने ।
भ्रष्टश्रीरचिरेणैव स भवेन्नात्र संशय: ॥
आयुर्ब्बलं यशो वित्तं विजयं सुखमिच्छता ।
मन्त्रित्वे पण्डितो राज्ञा नियोज्य: सर्व्वदैव हि ॥
अवज्ञया महीभर्त्तुस्त्यजन्ति सदसीं बुधा: ।
सभायां बुधहीनायां नीतिर्व्वसवती न हि ॥
ततो नीतौ विपन्नायां सहसा धरणीपते: ।
राजश्रियो विनश्यन्ति सकोषबलवाहना: ॥
ब्राह्मणान् गणकांश्चैव वेदांश्च वाग्मवालया ।
नृपा: कल्याणमिच्छन्तो न हिंसन्ति कदाचन ।
गतश्रीर्गणकद्वेष्टा वैद्यद्वेषाद्रुग्वर्ज्जित: ।
ब्राह्मणद्वेष्टा निष्कुल: स्यात् हितद्वेषात्तिलाभि-
भाक् ॥
राजान: शिशव: शीला: पुत्रा जनपदा यथा ।
यतो भूपा: पालयन्ति प्रजा: पुत्रानिवौरसान् ॥
पौरलोकमथ राजा पालयेत् पुत्रवत्सदा ।
पौरलोके सदा कुर्य्यात् यथा स्नेहं पिता निजे ॥
प्रजापीडाकरा ये च भूपाला अभिमानिन: ।
हिंस्रा निन्दकास्ते हिंसा योदृशेऽपि: ।

विवेकिनो महीपालाः पालयन्ति यथा प्रजाः।
तथा तानपि देवेशः पालयत्यनिशं हरिः॥
प्रजानां पालनं दानं देशेऽपि राज्ञां शुभावहे।
ताभ्यां ये वर्जिता भूपास्ते विज्ञेया नृपाधमाः॥
दुष्टानां शासनञ्चैव शिष्टानां प्रतिपालनम्।
प्रकुर्व्वन्तो महीपालाश्चिरं नन्दन्ति भूतले॥
न्यायेनोपार्ज्जितं वित्तं यत्नाद्रक्षेन्महीपतिः।
निर्व्वित्तो हि महीपालो विपत्तौ न हि निस्ता-रेत्॥
नृपाः कल्याणमिच्छन्तो निजराज्यशुभाशुभम्।
पश्यन्ति नित्यं विप्रेन्द्र! चलत्चारचक्षुषः॥
परचक्रभयं यावत् नायाति चिन्तयेद्भयम्।
आगते तु भये भूप आचरेन्निर्भयो यथा॥
भ्रातौ वापि च मित्रे वा पुत्रे वापि च मन्त्रिणि।
कुर्य्यात्मुखेन गाम्भीर्य्यं मनसा प्रेम केवलम्॥
मन्त्रिणो ज्ञातयः पुत्राः प्रजाश्च भ्रातरस्तथा।
गाम्भीर्य्यहीनं भूपालं मन्यन्ते न हि भूपवत्॥
तिष्ठन्ति प्रथमं दूरे वसन्ति पुरतस्तदा।
लोकाः श्रियं यदिच्छन्ति त्यक्तगाम्भीर्य्यभूपतेः।
एकस्य मन्त्रिणो राज्ञा चिरं राजत्वमिच्छता।
कर्त्तव्याः सकले राज्ये बहवो नैव भूसुर॥
अत्यन्तलब्धवृद्धीनां भृत्यानां सम्पदं हरेत्।
तस्यां सम्पदि भूपालो भृत्यमन्यं नियोजयेत्॥
मूर्खः स्त्रीविजितो राजा गीतवाद्यरतः सदा।
चतुरङ्गबलैर्हीनः सहसा विपदं व्रजेत्॥
आचारग्रहणं सत्त्वं स्ववाक्यप्रतिपालनम्।
गाम्भीर्य्यञ्चेति भूपानां लक्षणानि द्विजोत्तम!॥
स कथं नृपतिर्यस्तु प्रतापेन विवर्ज्जितः।
स कथं नृपतिर्येन न जिता परमेदिनी॥
जितायां परमेदिन्यां यावत् पादं प्रजेन्नृपः।
प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति चाक्षयम्॥
परभूमिजयाकाङ्क्षी हतो वा नृपतिर्युधि।
तदा गच्छेत् परं धाम वियुक्तः सर्व्वपातकैः॥
युधि प्राप्तजयो राजा प्राप्नोति परमं पदम्।
स साहसप्राप्तलक्ष्मीर्द्दिवीन्द्रसम्पदं लभेत्॥
त्यक्तशस्त्रं व्यक्तशस्त्रं पलायनपरायणम्।
योद्धारं युधि यो हन्यात् स भूपो यात्यधो-गतिम्॥
पलायनपरो युद्धे हन्ता च द्विजोत्तम!।
तावुभावपि तिष्ठेतां नरकेऽत्यन्तदुःखदे॥
युधि साहसवान् योद्धा हन्ता च महीसुर।
तिष्ठेतां तावपि स्वर्गे यावच्चन्द्रदिवाकरौ॥
बहुनात्र किमुक्तेन संक्षेपादुच्यते मया।
न चिरं तिष्ठते क्वापि सर्व्वं मा यसीदति॥"
इति कालिकापुराणे ८४ अध्यायः॥
[illegible] निर्व्वाहयुक्तेन स्यात्ययममात्यवचनं। शुक्रनीत्या-
[illegible] ममात्यो यद्वचो ब्रूयात् पुत्र कार्य्यमि-
[illegible] मव्ययमेव कर्त्तव्यं शरीरपरिरक्षणम्। राजन्+
[illegible] येन प्रमोदन्ति येन तुष्यन्ति बान्धवाः। इति
[illegible] कर्त्तव्यं मम प्रियहितैषिणा महान्देहे।
[illegible] वर्ज्जन दोषो राजस्तु तत्कर
[illegible] विनश्यति सम्पन्नोऽपि महानुत्तमः।

राजस्त्रज्ञ तरस्य पदेन पद्मा भवो बभाषे॥")
राजन्यः। (राजति दीप्यते इति। राज्+ "राजेरन्यः।" उणा० ३।१०० । इति अन्यः।) अग्निः। इत्युणादिकोषः। क्षीरिकावृक्षः। इति जटाधरः॥
राजन्यका, स्त्री, (राजन्यानां क्षत्रियाणां समूहः। राजन्य+"गोत्रोक्षोष्ट्रोरभ्रराजराजन्येति।" ४।२।३९। इति वुञ्।) क्षत्रियसमूहः। इत्यमरः॥ (यथा, रघुः। ७। ५६।
"रथो निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः।
निवारयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः॥")॥
राजन्यानां विषये देशे च पुं। इति काशिका॥ अत्र "राजन्यादिभ्यो वुञ्।" ४।२।५३। इति वुञ्प्रत्ययः॥)
राजन्वान्, [त्] त्रि, (राजा अस्त्यस्मिन्निति वा। राजन्+प्रशंसायां मतुप्। "राजन्वान् सौराज्ये।" ८।२।१४। इति निपातनात् नलोपाभावः।) सुराजयुक्तदेशः। इत्यमरः॥ "प्रजापालनादि-स्वधर्म्मपरायणराजयुक्ते देशे राजन्वान् राजा विद्यतेऽस्मिन् इति दोषाभवादिति प्रशंसायां मतुः। यदुक्तं तन्त्रान्तरे।
'भूमिर्निष्ठाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः॥' इति समस्ते वस्त्वर्थे भ्रमादयोऽपि यथा यथा लभ्यन्त एव। निपातनात्रलोपाभावः। न सौराज्ये राजा नस्य मुह्यन्तादिति परे। सुराज्ञि स्वधर्म्मपरत्वात् शोभना राजानोऽपीति मार्गायां मतीरिति अविधिः। देशे लोकेषु लक्षणं सुराज्ञि लोके इत्यर्थः।" इति तट्टीकायां भरतः॥ (यथा, रघुः। ६। २२।
"कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम्।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः॥")
राजपटोलः, पुं, (पटोलानां राजा। पर-निपातः।) मधुरपटोलः। इति रत्नमाला॥
राजपटोली, स्त्री, (राजप्रिया पटोली।) मधुर-पटोली। इति राजनिर्घण्टः॥
राजपट्टः, पुं, (राजप्रियः पट्ट इव।) मणि-विशेषः। लाजवर्द्दः। विराटजः २। इति त्रिकाण्डशेषः॥
राजपट्टिका, स्त्री, चातकपक्षी। इति हारा-वली॥
राजपथः, पुं, (राज्ञः पन्थाः। "ऋक्पूरब्धूःपथा मानक्षे।" ५।४।७४। इत्यः।) राजमार्गः। तस्य लक्षणं यथा,—
"धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः॥"
इति देवीपुराणम्॥
(यथा, कुमारसम्भवे। ७। ६२।

"[illegible]
[illegible]॥"
राजपर्णी, स्त्री, प्रसारिणी। इति राज-निर्घण्टः॥
राजपलाण्डुः, पुं, (पलाण्डूनां राजा।) पलाण्डुविशेषः। [illegible] लाल पेंयाज इति भाषा। तत्पर्य्यायः। [illegible] नृपाह्वः २ राजप्रियः ३ [illegible] दीर्घपत्रः ६ [illegible] ७ [illegible] ८ [illegible] महाकन्दः १० [illegible] ११ राजेष्टः १२। अस्य गुणाः। [illegible] इति राजनिर्घण्टः॥
राजपीलुः, पुं, (राजप्रियः पीलुः।) महापीलुः। इति राजनिर्घण्टः॥
राजपुत्रः, पुं, (राज्ञः पुत्रः।) इति अमरटीकायां भरतः। [illegible] राजनिर्घण्टः। वर्णसङ्करजाति[illegible] पुत इति भाषा। यथा,—
"वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः॥" इति पराशरपद्धतिः।
क्षत्रकन्यायां क्षत्रियाज्जातः। [illegible] कम्। राजनन्दनः। तत्पर्य्यायः। कुमारः २ भर्तृदारकः ३। इत्यमरः॥
"राजपुत्र! चिरं जीव मा जीव [illegible]
जीव वा मर वा साधो व्याध मा जीव मा मर॥"
तस्य रक्षणं यथा,—
"राजपुत्रस्य रक्षा च कर्त्तव्या [illegible]
आचार्य्यैश्चास्य कर्त्तव्यं [illegible]
धर्म्मकामार्थशास्त्राणि धनुर्वेदं [illegible]
रथे च कुञ्जरे चैनं [illegible]
शिल्पानि शिक्षयेच्चैनं [illegible]
मृषावाक्यसत्यवचन [illegible]
रक्षणं तस्य कर्त्तव्यं गुप्ते देशे [illegible]
अविनीतकुमारं हि कुलमाशु [illegible]
अधिकारेषु सर्व्वेषु विनीतं वि[illegible]
आदौ स्वल्पेषु ततः पश्चात् क्रमेणाथ [illegible]
मृगयापानमक्षांश्च वर्जयेत् पृथिवी[illegible]
एतान्यासेवमानास्तु विनष्टाः पृथि[illegible]
बहवो नृपशार्दूल तेषां संख्या [illegible]
वृथाटनं दिवास्वप्नं विशेषेण विवर्[illegible]
वाक्पारुष्यं न कर्त्तव्यं दण्ड[illegible]
परोक्षनिन्दा च तथा वर्जनीया म[illegible]
अर्थस्य दूषणं राजा द्विप्रकारं वि[illegible]
अर्थानां दूषणञ्चैव तथा चार्थेषु दूष[illegible]
प्राकारस्य तु भेदश्च दुर्गादीनामसं[illegible]
अर्थानां दूषणं प्रोक्तं विप्रकीर्ण[illegible]
अदेशकाले यद्दानमपात्रे दान[illegible]
अर्थस्य दूषणं प्रोक्तमसत्कर्मप्रवर्त्तन[illegible]
कामं क्रोधं मदं मानं लोभं दर्प[illegible]
वेदाध्ययनमेकस्य [illegible]

र्द्धं कला कार्य्यं अनलयं गत: ।
त्मर्थं कर्म्म राज्ञा कनपदं त्यजेत् ।
वक्तं मित्रं शत्रूवत्काहस्तौ त्यजेत् ।
निविशा शैथाम्नुज्याम्भनाद्दशिता: ।
ायपूर्व्वं हेतु यशस्वी भवेत् ।
सर्द्दं निग्रहानिवच तथा रिपो: ।
महाभाग नित्यं त्रिविधमुच्यते ।
: गुरु: पूर्व्वं भवेत्तथापि नाहत: ।
ो कलपदो दुर्गं सैन्यमेव च ।
यच्च धर्म्मार्थ समाङ्गं राज्यमुच्यते ।
ापि राज्यस्य मर्म्म स्वामी प्रकीर्त्तित: ।
षयाड्गानां राजा रक्ष्य: प्रयत्नत: ।
ा कर्म्मजा तथा तेन प्रयत्नत: ।
यत्नदैवस्य दीर्घमाहतेरेतयो: ।
तु कर्म्मज: शीघ्रमेव महीक्षिता ।
त्तदुना भाव्यं त्वदुग्रं परिभूयते ।
ादर्शेनापि सौम्यादुद्विजते जन: ।
र्य्यो भवति कार्य्ये भवति दारुण: ।
ाद्दयापेक्षो तस्य लोकद्वयं भवेत् ।
् महीपाल: परिहासं विवर्ज्जयेत् ।
िभवनीयः शूर्यं पर्गयशं गतम् ।
्च पर्व्वाणि भूपति: परिवर्ज्जयेत् ।
ारणादपि हलवद्यसनो भवेत् ।
य नरेन्द्रस्य नित्यमुद्दिग्रचेतस: ।
ागमायान्ति सदा दु:शीघ्रभावत: ।
ाभिभाषी स्यात् सर्व्वस्यैव महीपति: ।
महाभाग भ्रुकुटीं न समाचरेत् ।
मांग्मतो शेष स्थूललक्षेण भूभुजा ।
ास्य वशगा सर्व्वा भवति मेदिनी ।
त्रव भवेत् सर्व्वकर्म्मसु पार्थिव: ।
स्य नृपते: कर्म्मसाफल्यं भवेत् ।
े च कामे च मोहे पापे च कर्म्मणि ।
येन कर्म्मणि दीर्घसूत्र: प्रशस्यते ।
ितमन्त्रेण सदा भाव्यं द्विजोत्तम ।
ृतमन्त्रस्य श्रेया: सर्व्वापदो ध्रुवा: ।
ा तु कर्म्माणि जायन्ते यस्य भूपते: ।
नि महाभाग तस्य स्यात्तुसुधा वशे ।
सदा राज्यं तस्मान्मन्त्रं सुरक्षितम् ।
पृथिवीपालैर्मन्त्रभेदभयात् सदा ।
् साधितो मन्त्र: संयतानां सुखावह: ।
ेन वहवो विनष्टा: पृथिवीक्षित: ।
ेरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
विकारैश्च गृह्यतेऽन्तर्गतं मन: ।
ुप्रमन्त्रस्य वशे सर्व्वा वसुन्धरा ।
: महीभर्त्तु: सदा पार्थिवनन्दन ।
मन्त्रयेन्मन्त्रं न राजा वहुभि: सह ।
िहयमां नावं नापरीक्षितनाविकाम् ।
ञ भूमिं जयतो भवेयु: परिपन्थिन: ।
येद्दशे सर्व्वान् सामादिभिरुपक्रमै: ।
: स्यात् क्षर्षीभाव: प्रजानामनपेक्षया ।
ाज्ञा प्रकर्त्तव्यं स्वराष्ट्रपरिरक्षता ।
ाज्ञा स्वराष्ट्रं य: कर्षयत्यनपेक्षया ।

शौरिक्राद्भ्रश्यते राज्यात् जीविताच्च सबा-
न्धव: ।
भृतो वत्सो जातबल: कर्म्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत् ।
यो राष्ट्रमनुगृह्णाति राज्यं स परिरक्षति ।
संग्रामनुपयाधीत तु विन्दते स महत् फलम् ।
राष्ट्रादिरण्यं धान्यञ्च महीं राजा सुरक्षिताम् ।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता ।
नित्यं स्वै: परैश्चैव यथा माता यथा पिता ।
गोपितानि सदा कुर्य्यात् न विभागो प्रियाणि
च ।
अवमसुमयोहृत्यं पर्व्वं तैष्यस्यैव च ।
धर्म्मकर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ।
एवं महीं पालयतोऽस्य भर्त्तु-
र्लोकानुराग: परमो भवेच्च ।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्ति: ।”
इति मात्स्ये २०० अध्याय: ।
राजपुत्रिका, स्त्री, (राजपुत्री+संज्ञायां कन् ।)
शरारिपक्षी । शराली इति भाषा । यथा,—
“शरारिराटिराडिश्च हापुत्री राजपुत्रिका ।”
इति जटाधर: ।
राजकन्या च । (यथा, हरिवंशे । २५ । ४६ ।
“उत्पादयामास तत: पुत्रं वै राजपुत्रिका ।”)
राजपुत्री, स्त्री, (राज्ञ: पुत्रीव ।) कटुतुम्बी ।
रेणुका । जाती । राजरीति: । छुछुन्दरी ।
इति राजनिर्घण्ट: । मालती । यथा,—
“अतिमुक्तश्च जातिर्मालती सुमना अपि ।”
राजपुत्री मनोज्ञा——।” इति जटाधर: ।
राजकन्या च । (यथा, महाभारते ।१।७३।१।
“सुव्यक्तं राजपुत्री त्वं यथा कल्याणि ! भाषसे ।
भार्य्या मे भव सुश्रोणि ! ब्रूहि किं करवाणि
ते ।”)
राजपुष्प:, पुं, (पुष्पाणां राजा । राजदन्तादित्वात्
परनिपात: ।) नागकेशरपुष्पवृक्ष: । यथा,—
“चाम्पेय: केशरो नागकेशर: काञ्चनाह्वय: ।
महौषधं राजपुष्प: फलक: स्वरघातन: ॥”
इति शब्दचन्द्रिका ।
राजपुष्पी, स्त्री, (राजप्रियं पुष्पमस्या: । ङीप् ।)
करुणीवृक्ष: । इति राजनिर्घण्ट: ।
राजप्रिया, स्त्री, (राज्ञ: प्रिया ।) करुणीवृक्ष: ।
इति राजनिर्घण्ट: ।
राजफणिज्झक:, पुं, (राजते इति । राज्+अच् ।
राजो दीप्तिशाली फणिज्झक: ।) नागरङ्ग-
वृक्ष: । इति शब्दमाला ।
राजफलं, स्त्री, (राजाभिधेयं फलम् ।) पटोलम् ।
इति त्रिकाण्डशेष: ।
राजफला, स्त्री, (राजप्रियं फलमस्या: ।) जम्बू: ।
इति राजनिर्घण्ट: ।
राजवदरं, स्त्री, (राज्ञो ... ...गात् ।)
रक्तामलकम् । लवणम् ।

राजवदर:, पुं, (वदराणां राजा । राजदन्ता-
दित्वात् परनिपात: ।) नृपबदरी: । तत्प-
र्य्याय: । नृपश्रेष्ठ: २ नृपवदर: ३ राजवल्लभ: ४
पृथुकोल: ५ तनुबीज: ६ मधुरफल: ७ राज-
कोल: ८ । अस्य गुणा: । सुमधुरत्वम् । स्निग्ध-
त्वम् । दाहार्त्तिपित्तवातहरत्वम् । वृष्यत्वम् ।
वीर्य्यवृद्धिकरत्वम् । शोषश्रमनाशित्वञ्च । इति
राजनिर्घण्ट: ।
राजवीजी, [न्] त्रि, (राजा वीजी कारणं यस्य ।)
राजवंश्य: । इत्यमर: । २ । ७ । २ ।
राजभद्रिका, स्त्री, हापुत्रीपक्षी । यथा,—
“शोभलोर: पङ्ककीरो हापुत्री राजभद्रिका ।”
इति जटाधर: ।
राजभद्रक:, पुं, कृष्णम् । निम्ब: । इति राज-
निर्घण्ट: । पारिभद्रक: । इति साधुपाठ: ।
राजभूयं, क्ली, (राज्ञो भाव: । राजन्+भू+
क्यप् ।) राजत्वम् । यथा,—
“स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत् ।” इत्यमरकोषदर्शनात् ।
राजभोग्यं, क्ली, (राज्ञा भोक्तुं योग्यम् । भुज्+
ण्यत् । कुत्वञ्च ।) जातीकोषम् । प्रियालद्रुमे, पुं ।
इति शब्दचन्द्रिका ।
राजमण्डूक:, पुं, (मण्डूकानां राजा । राजदन्ता-
दित्वात् परनिपात: ।) हरद्रेक: । वड् बेङ् इति
भाषा । तत्पर्य्याय: । महामण्डूक: २ पीताङ्ग: ३
पीतमण्डूक: ४ वर्षाघोष: ५ महारव: ६ ।
इति राजनिर्घण्ट: ।
राजमल्ल:, पुं, राज्ञां मल्ल: । राजार माल् इति
भाषा । तत्पर्य्याय: । उत्सिक्त: २ उद्धत: ३ ।
इति त्रिकाण्डशेष: ।
राजमार्ग:, पुं, (राज्ञो मार्ग: ।) राजपथ: ।
तद्विवरणं यथा,—
“राजमार्गं सौधयुक्तं य: करोति पतिव्रते ।
वर्षाणामयुतं सोऽपि शक्रलोके महीयते ।”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्याय: ।
अपि च ।
“विंशद्धनूंषि विस्तीर्णो देवमार्गस्तु तै: कृत: ।
विंशं धनुर्योमिमार्ग: सीमामार्गो दशैव तु ॥
धनूंषि दश विस्तीर्ण: श्रीमान् राजपथ: कृत: ।
नृवाजिरथनागानामसम्बाध: सुसञ्चर: ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिता: ।
त्रिकरास्तोपरथ्यास्तु द्विकराप्युपरथ्यका ॥
जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
वृत्तीपादस्त्वर्द्धपाद: प्राग्वंश: पादक: स्मृत: ।
अवकर: परिवार: पादमात्र: समन्तत: ॥”
इति देवीपुराणे गोपुरराज... ...य: ।
(अन्नाभिधोत्सर्गे ... ... यथा,
मनु: । ९ । २८२ ...
“समुत्सृजेत् ... ...ादि ।
स द्वौ का... ...ो
वीति: ... ...ा,
५४...

"शास्त्रविद्यासम्पन्नौ राजमार्गविशारदौ ।
कुरुघ्ने महाराष्ट्रे राजयोन दुरात्मना ।")

राजमाषः, पुं, (माषाणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) वर्ब्बटः । बरबटी कड़ाइ इति भाषा । तत्पर्य्यायः । नीलमाषः २ नृपमाषः ३ नृपोचितः ४ । अस्य गुणाः । कफविनाशित्वम् । रुच्यत्वम् । वातकारित्वम् । [illegible] । इति राजनिर्घण्टः । सारकत्वम् । शुक्राम्लपित्तहरत्वम् । सुस्वादुत्वम् । रुच्यत्वम् । कषायत्वम् । विशदत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अपिच ।
"राजमाषो महामाषश्चपलश्च बलः स्मृतः ।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः ।
रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः ।"
इति भावप्रकाशः ॥ * ॥
[illegible] यथा । भारते ।
"विचारात् राजमाषाश्च [illegible] ।
[illegible] ।
[illegible] राजमाषाश्च [illegible] ।
[illegible] ।"
इति [illegible] ॥

राजदन्तः, पुं, (दन्तानां राजा । राजदन्तादित्वात् [illegible] ।) [illegible] । इति हेमचन्द्रः । ३ । २५० ।

राजयक्ष्मा, [न्] पुं, ([illegible] राजा [illegible] वा ।) क्षयरोगः । इति हेमचन्द्रः । अस्य पर्य्याय-[illegible] ॥
([illegible] । यथा, [illegible] । १ । ११६ ।
"[illegible] ।
[illegible] ।"
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।"
इति [illegible] ।)
[illegible] । यथा, [illegible] ।
[illegible] ।
"[illegible] ।
[illegible] ।"
[illegible] ।
[illegible] ॥ * ॥

निष्क्राम तदा यक्ष्मा गाधिकायादिभीषणः ।
दंष्ट्राकरालवदनः कृष्णाङ्गारसमप्रभः ।
अतिदीर्घः स्वल्पकेशः कृशो धमनिसन्ततः ।
अधोमुखो दण्डहस्तः कासं विश्वस्य सन्ततम् ।
कुर्व्वाणो निम्ननेत्रश्च योषासम्भोगलोलुपः ।
स चोवाच तदा दक्षं ब्रूत स्थास्याम्यहं मुने ॥
किं वा चाहं करिष्यामि तन्मे वद महामते ।
ततो दक्षस्तु तं प्राह सोमं यातु द्रुतं भवान् ।
सोममत्तु भवानित्थं सोमे त्वं तिष्ठ स्वेच्छया ।
मार्कण्डेय उवाच ।
इति तस्य वचः श्रुत्वा दक्षस्याथ महात्मनः ।
शनैः शनैस्ततः सोममाससाद स च द्रुतम् ॥
आसाद्य स तदा सोमं वल्मीकं पन्नगो यथा ।
प्रविवेशेन्दुहृदये छिद्रं प्राप्य महागदः ॥
तस्मिन् प्रविष्टे हृदये दारुणो राजयक्ष्मणि ।
शुशोच चन्द्रस्तस्यैव विषमां प्राप्तवांस्ततः ॥
उत्पन्न प्रथमं यस्मात्सोमे राजयक्ष्मा गदः ।
राजयक्ष्मेति लोकेऽस्मिंस्तस्य ख्यातिरभूत्
द्विजाः ॥
ततस्तेनाभिभूतश्च यक्ष्मणा रोहिणीपतिः ।
क्षयं जगामानुदिनं ग्रीष्मे शुष्का नदी यथा ॥
तथा चन्द्रे क्षीयमाणे सर्व्वौषध्यः क्षयं गताः ।
क्षयं जाताश्चौषधीषु न यज्ञः संप्रवर्त्तते ॥
यज्ञाभावात्तु देवानामन्नं सर्व्वं क्षयं गतम् ।
पर्ज्जन्याच्च ततो नष्टास्ततो वृष्टिर्न चाभवत् ।
वृष्ट्यभावे तु लोकानामाहारो नैव जायते ।
दुर्भिक्षमसमोपेते सर्व्वलोके द्विजोत्तमाः ।
राजधर्म्मादिकं किञ्चित्र लोकेषु प्रवर्त्तते ॥
क्षयहीनाः प्रजाः सर्व्वा लोभिनोऽपहतेन्द्रियाः ।
तासामेव तदा चक्रुः सर्व्वेषु क्षयतस्तथा ॥
तनदृष्ट्वा तदा भावं दिक्पालाः सपुरन्दराः ।
क्षयं सोमं परं देवाः सामरश्च महात्मना ॥
ततो दृष्ट्वा जगत् सर्व्वं व्याकुलं दस्युपीड़ितम् ।
प्रजाक्षमसमन्देशः सर्व्वे शक्रपुरोगमाः ॥
उपगम्य लोकेशं सदारं जगतां पतिम् ।
प्रणम्य यथायोग्यमुपविष्टास्ततः सुराः ॥
तान् प्रणतवतान् वीक्ष्य तथा लोकपितामहः ।
अभिमुखान् परस्येव कुशलं विनयानिव ।
पप्रच्छ दृष्टवीक्ष्य मुखमिन्द्रं कृतागमम् ।
ब्रह्मोवाच ।
आयातं भोः सुरगणाः किमर्थं यूयमागताः ।
दुःखितवदनैर्वाच युष्मान् यातीव लक्षये ।
विराजमानान् विराजतान् सुरान् सर्व्वेषु
कामकम् ।
कृत्वा कर्त्तरि लक्ष्मात् सर्व्वं पश्यामि दुःखित-
मान् ।
[illegible] वा यत्तु कथये ।
[illegible] वाच्यधर्म्मिणाम् ।
मार्कण्डेय उवाच ।
[illegible] लोकः प्रजानां च लोकत् ।
[illegible] सुराणां [illegible] ।
[illegible] ॥

यदस्माकं दुःखवीजं [illegible]
न कश्चित् संप्रवर्त्तन्ते यज्ञा [illegible]
देवा अतः ।
निराधारा निरातङ्काः प्रजा [illegible]

न च दानादिधर्म्माश्च [illegible]
नैव वर्षति पर्ज्जन्यः [illegible]
क्षीणाः सर्व्वास्तथौषध्यः [illegible]

दस्युभिः पीड़िता विप्रा वेदास्तु [illegible]
अत्रवैकल्यमासाद्य [illegible]
क्षीणेषु यज्ञभागेषु [illegible]
दुर्ब्बलाश्च क्रिया हीना [illegible]
रोहिण्या मन्दिरे [illegible]
दृश्यतां स [illegible]
यदैवान्विष्यते देवैश्चन्द्रो देवा [illegible]
कदाचिदपि देवानां यज्ञे [illegible]
कदाचिद्रोहिणीं यज्ञा नैव [illegible]
यदाऽन्यः कोऽपि न भवेत्तदा [illegible]
दृश्यते स कलाहीनः
इति सर्व्वत्र लोकेषु [illegible]
तं दृष्ट्वा कान्तिहीनांस्तु [illegible]
पाताकादुपावदुत्थाय
गात्रात् लोकेषु वायते [illegible]

स्वयं प्रवर्त्तते कस्मात् [illegible]
न जानीमस्तु तत् सर्व्वं [illegible]
मार्कण्डेय उवाच ।
एतत् सुराणां वचनं [illegible]

ब्रह्मोवाच ।
शृण्वन्तु देवताः सर्व्वा यदर्थं [illegible]
प्रवर्त्ततेऽधुना येन प्राणिनश्च [illegible]
सोमो दाक्षायणीः कन्याः [illegible]
अश्विन्याद्या वरवृषभीर्म्म [illegible]
परिणीय स ताः सर्व्वाः [illegible]
प्रवर्त्ततामुरागेण न सर्व्वासु [illegible]
अश्विन्याद्यास्ततः सर्व्वा [illegible]
षड्विंशतिरदारोषाः [illegible]
प्रवर्त्तते नियमतो [illegible]
तथा न तासु भवते [illegible]
अतो दक्षो महाबुद्धिः कान्ता [illegible]

बहुशस्तनमासाद्य [illegible]
अनुवक्ती यथाकामं [illegible]
सर्व्वं प्रवर्त्तितं तासु समं [illegible]
समप्रीतवं भार्य्यं तासु [illegible]
सं जगाम ततः स्यानं [illegible]
ततो दक्षे मुनिश्रेष्ठे [illegible]
चक्रे न भार्य्या ताः प्रजा [illegible]

ततो दक्षः पुनश्चन्द्रमुदय [illegible]

तिश्राथ वचनञ्चेदमब्रवीत् ॥
ते चन्द्र सर्व्वास्वासु भवान् यदि ।
त्वहं तुभ्यं तस्माद्द् कुरु समस्त-
सम् ॥
पुनर्द्दक्षे न समं वर्त्तते यदा ।
कदा दक्षं पुनर्गत्वानुवन् रुषा ॥
स कुरुते नैवासासु प्रवर्त्तते ।
करिष्यामः स्थास्यामश्च त्वदन्तिके ॥
त वचः श्रुत्वा कुपितस्य तदा मुनेः ।
न्द्रस्य मनः शापायोत्सुकतां गतम् ॥
युत्क्रमनसः कुपितस्य महात्मनः ।
न महारोगो नासिकाग्राद्विनिर्गतः ॥
च चन्द्राय दक्षेण मुनिना ततः ।
तस्य देहे चयितस्तेन चन्द्रमाः ॥
न्द्रे क्षयं याता ज्योत्स्ना तस्य महा-
त्मनः ।
सर्व्वज्योत्स्नासु सर्व्वौषध्यः क्षयं गताः ॥
ावाल्लोकेऽस्मिन् यज्ञः संप्रवर्त्तते ।
ादनाद्दृष्टिस्ततः सर्व्वप्रजाक्षयः ॥
ापभोगेन क्षीनानां भवतां तथा ।
समुत्पन्नं विकारस्य स्वगोचरे ॥
कथितं सर्व्वं यथाभूल्लोकविप्लवः ।
ान तच्छान्तिस्तत्प्रशुध्वं सुरोत्तमाः ॥"
कालिकापुराणे २० अध्यायः ॥ * ॥
ब्रह्मोवाच ।
भोः सुरगणा दक्षस्य सदनं प्रति ।
दय चन्द्रार्थे स च पूर्णो भवेद्यथा ॥
े जगत् सर्व्वं प्रकृतिस्थं भविष्यति ।
भवेत् शान्तिरोषधीनाञ्च सम्भवः ॥
मार्कण्डेय उवाच ।
ावचः श्रुत्वा देवाः शक्रपुरोगमाः ।
ष्मनसस्तदा दक्षनिवेशनम् ॥
यमुपस्थाय सर्व्वे मुनिवरं सुराः ।"
प्रजापतिं दक्षं प्रणम्य श्लक्ष्णया गिरा ॥
देवा ऊचुः ।
सीदतां ब्रह्मन्नस्माकं बहुदुःखिनाम् ।
महाबुद्धे त्राहि नः शोकसागरात् ॥
ब्रह्मसंशम्भु दक्षिणपरमात्मनः ।
रं परं ज्योतिर्विश्वरूपं गतोऽसि वै ॥
त् सर्व्वजगतां प्रजापालनकारणात् ।
ापतिश्चेति योगेशस्तनुरुभो वयम् ॥
सर्व्वजगतां दक्षाय कुशलात्मनाम् ।
ात्महितायास्तु नमस्तुभ्यं महात्मने ॥
चिन्त्यमानस्य योगिभिर्नियतात्मभिः ।
र सारभूतत्वं दक्षाय परमात्मने ॥
ाङ्गिरनाथदः पारगाभ्यां परायणः ।
ानसुतः तपसा तस्मै नित्यं नमो नमः ॥
तेषां वचः श्रुत्वा दक्षो यशस्वी तदा ।
प्रसन्नवदनः शक्रमाभाष्य सुव्रतः ॥
दक्ष उवाच ।
प्राक् महाभाग भवतां दुःखमागतम् ।
हेतुं यद् विभो श्रोतुमिच्छाम्यहन्तु तम् ॥

ममास्ति यदि कर्त्तव्यं भवतां दुःखहानये ।
तदहं यदि शक्नोमि करिष्यामि हितं समम् ॥
मार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य ब्रह्मसूनोर्महर्षिणः ।
जगाद गोष्पतिः शक्रो वीतिहोत्रोऽपि तं
मुनिम् ॥
क्षयं यातो निशानाथस्तस्मिन् क्षीणे क्षयं गताः ।
सर्व्वौषध्यो द्विजश्रेष्ठ तद्धानिर्यज्ञहानिकृत् ॥
यज्ञे विनष्टे सकलाः प्रजाः क्षुद्भयकातराः ।
वृष्ट्यभावान्महद्दुःखं प्राप्य नष्टाश्च काश्चन ॥
क्षयोऽयं रात्रिनाथस्य यस्ते कोपात् प्रवर्त्तते ।
स सर्व्वजगतो ब्रह्मन्नभवायैसुपस्थितः ॥
नाधुना तत्त्रिभुवने यत्र क्षुब्धन्तु किञ्चन ।
विप्लवं यान्ति विप्रेन्द्र सागराः स्थावराश्चराः ॥
न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः ।
आहारदुःखामिन्द्रीकाः प्रजाः क्षीणा भया-
तुराः ॥
एवं प्रवृत्ते विप्रेन्द्र विप्लवेऽस्मान् रसातलात् ।
दैत्या न यावदुत्थाय बाधन्ते तावदुद्धर ॥
प्रसीद दक्ष सततं तं पूरय तपोबलात् ।
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ॥
मार्कण्डेय उवाच ।
इति तेषां वचः श्रुत्वा प्रजापतिसुतस्तदा ।
उवाच तान् सुरगणान् हृदयाच्छल्यमुद्धरन् ॥
दक्ष उवाच ।
यस्मै वचो निशानाथे प्रदत्तं शापकारणम् ।
न केनापि निदानेन मिथ्या कर्त्तुं तदुत्सहे ॥
किन्तु मद्वचनं यस्मान्नैकान्तेन त्वया भवेत् ।
चन्द्रोऽपि वर्द्धते यस्मात् तमुपायमपेक्षते ॥
तत्राप्ययमुपायोऽस्ति मासार्द्धं यातु चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं स्वयं भार्य्यासु वर्द्धताम् ॥
तस्य तद्वचनं श्रुत्वा तं प्रसाद्य प्रजापतिम् ।
सर्व्वे सुरगणास्तत्र गता यत्रास्ति चन्द्रमाः ॥
एवमुक्ते तु वचने दक्षेण मुनिना द्विजाः ।
अथ चन्द्रं समादाय भार्य्याभिः सहितं तदा ।
जग्मुस्ते ब्रह्मसदनं मुदिताः सुरसत्तमाः ॥
तत्र गत्वा महाभागा यथा दक्षेण भाषितम् ।
तत्सर्व्वं कथयामासुर्ब्रह्मणे परमात्मने ॥
ब्रह्मा दक्षवचः श्रुत्वा देवानां सदनं तदा ।
चन्द्रभागं महाशैलं जगाम सहितः सुरैः ॥
तत्र गत्वा सुरश्रेष्ठः प्रजानां हितकाम्यया ।
स्नापयामास शुभ्रांशुं वृहल्लोहितपुष्करे ॥
भूतभव्यभवज्ज्ञानः पूर्व्वमेव पितामहः ।
एतदर्थं चकाराथ सरः पूर्णं जगत्प्रभुः ॥
तत्र स्नातस्य लोकस्य नीरोगत्वं प्रजायते ।
चिरायुश्च सततं वृहल्लोहितसंज्ञके ॥
तत्र स्नातस्य चन्द्रस्य शरीरात् तनुजं गदः ।
राजयक्ष्मा निःससार पूर्व्वरूपी यथोदितः ॥
निःसृत्य राजयक्ष्मा तु ब्रह्माणञ्च जगत्पतिम् ।
प्रत्युवाच किं करिष्ये क गच्छामीत्युवाच च ॥
स्थानं मर्माञ्च लोकेश ! कार्य्यं मम वदात्मनम् ।
निर्द्दिशस्वादृक्स्यं मे सदा त्वं जगतां यतः ॥

मार्कण्डेय उवाच ।
ततो ब्रह्मापि तं दृष्ट्वा निरीक्ष्येन्दुशरीरगैः ।
अमृतैर्लोमातिभुक्तैः क्षीणञ्चापि निशापतिम् ॥
दोर्भिः स्वयं तं गृहीत्वा गिरौ निष्पिष्य वै
मुहुः ।
अमृतं गालयामास शरीराद्राजयक्ष्मणः ॥
अमृतानि च गाल्याशु तदपूतं तदा जले ।
क्षीरोदस्य च चिक्षेप मध्ये रहसि लोकभृत् ॥
तस्मादथामृताद्दिन्दोः कलाः क्षीणाः पुराश्च
याः ।
तासां जग्राह लवशश्चूर्णान् क्षीरोदसागरात् ॥
कलामात्रावशेषस्य संसर्गाद्राजयक्ष्मणः ।
क्षीणाः कलाः पञ्चदश याः पूर्व्वममृतात्मिकाः ।
ता राजयक्ष्मगर्भस्थाश्चूर्णीभूतास्तु पीड़या ॥
तेनोष्णज्योत्स्नाकलाभिस्तु निवद्धं यत् कला-
पतेः ।
शरीरं तत्त्रिधाभूतं गर्भस्थं राजयक्ष्मणः ॥
ज्योतिश्चूर्णमभूत् ज्योत्स्ना लीना राजादि-
यक्ष्मणि ।
द्रवीभूताः सुधाः सर्व्वा गर्भे रोगस्य च स्थिताः ॥
यदा निर्गालयामास सुधां ब्रह्मा गदान्तरात् ।
तदा ज्योत्स्ना सुधा ज्योतिः सर्व्वं तस्माद्-
वहिर्गतम् ॥
क्षीरोदसागरे क्षिप्तं तत्सर्व्वं विधिना तदा ।
देवान् गिरौ परित्यज्य स्वयं गत्वा द्रुतं ततः ॥
ततोऽमृतानि प्रक्षाल्य कलापूर्णानि वारिधेः ।
ज्योत्स्नाश्चाप्याजगामासु गृहीत्वा तत्त्रयं
गिरिम् ॥
क्षीरोदाद्गिरिमागम्य चन्द्रभागं तदा विधिः ।
देवमध्ये कलापूर्णं सुधां ज्योत्स्नां न्यवीविशत् ॥
संस्थाप्य तत्त्रयं ब्रह्मा देवानां मध्यतस्ततः ।
जगाद राजयक्ष्माणं तत्स्थानादि निर्द्दिशन् ॥
ब्रह्मोवाच ।
सर्व्वदा यो दिवा रात्रौ सन्ध्यायां वनितारतः ।
सेवते सुरतं तस्मिन् राजयक्ष्मन् वसिष्यसि ॥
प्रतिश्यायश्वासकासयुक्तो यो मैथुनं चरेत् ।
स ते प्रवेश्यः सततं येऽन्यश्च तथाविधः ॥
छायाख्या मृत्युपुत्री या भवतः सदृशी गुणैः ।
सा तेऽस्तु भार्य्या सततं भवन्तमनुयास्यति ॥
क्षीणत्वं भवतः छायां सततं विषये कुरु ।
इयं गच्छ यथाकामं चन्द्रे त्वं विमुखो भव ॥
मार्कण्डेय उवाच ।
एवं विसृष्टो विधिना राजयक्ष्मा महागदः ।
पश्यतां सर्व्वदेवानामन्तर्द्धानं जगाम ह ॥
अन्तर्हिते महारोगे ब्रह्मा लोकपितामहः ।
चन्द्रं समपयामास कलापञ्चदशान्वितम् ।
तेन क्षीरोदधौतेन सुधापूर्णेन वाल्मृः ।
सज्योत्स्नैस्तु कलापूर्णैः पूर्व्ववच्चाकरोद्विधुम् ॥
स सोऽपि कलापूर्णः पूर्व्वव[illegible]ा ।
चन्द्रस्तदा सर्व्वदेवा [illegible]
अथ चन्द्रस्तदा पू[illegible]
उवाचेदं सुरग[illegible]

सोम उवाच ।
न स्थानं पूर्व्ववद्ब्रह्मन् शरीरे मम वर्त्तते ।
न वीर्य्यं वा तथोत्साहो विशेषेणाङ्गसञ्चयः ॥
नोत्सहे पूर्व्ववच्चेष्टां विधातुं सुतरामहम् ।
चेष्टाहीनस्त्वनुदिनं वर्त्तयं केन लोकभृत् ॥
ब्रह्मोवाच ।
यत्तस्य यक्ष्मणा सोम यदभूदङ्गसञ्चयः ।
पूर्व्वं विशीर्णो भवतस्तत्पूर्णमभवन्न हि ॥
अधुना भवतो देहचूर्णं निःसारितं मया ।
शरीरात् सान्द्रज्योत्स्ना यक्ष्मणा राज-
यक्ष्मणः ॥
तेषां प्रक्षालनविधौ लवणो यत् स्थितं जले ।
ज्योत्स्नायाश्च सुधायाश्च तेन क्षीणो भवान्
यतः ।
सर्व्वोऽङ्गसञ्चयो राजंस्तव सीदन्ति साम्प्रतम् ॥
अत्रोपायं विधास्यामि यथा नार्त्तिं समेष्यवान् ।
प्राजापत्यः पुरोडाशो हवनीयः पुरोऽध्वरे ॥
ऐन्द्रस्ततोऽनु चाग्नेयः प्रदेयः सर्व्वतः क्रतौ ।
ततोऽनु भवतो भागः पुरोडाशो मया कृतः ॥
तेन भागेन भुक्तेन नित्यं यज्ञहुतेन हि ।
पूर्व्ववत्ते समुत्साहः स्थानं वीर्य्यं भविष्यति ॥
यश्चामृतकणास्तोये क्षीरोदस्य स्थितास्तव ।
शरीरचूर्णं यावत्ते ज्योत्स्नायाश्चापि ये कणाः ।
वृद्धिं यास्यन्ति सततं क्षीरसागरमध्यगाः ॥
स्वारोचिषेऽन्तरे प्राप्ते द्वितीये शङ्करांशजः ।
दुर्व्वासा भविता विप्रः प्रचण्डश्चण्डभास्करः ॥
स महेन्द्रस्याविनयात् शापं दत्त्वा सुदारुणम् ।
करिष्यति त्रिभुवनं निःश्रीकं ससुरासुरम् ॥
श्रिया हीने ततो लोके भविता लोकविप्लवः ।
यथा तव क्षयात् सोम प्रवृत्तो लोकविप्लवः ॥
तस्मात्तत्प्रमाणेन तृतीये तु कृते युगे ।
भविष्यसि स्थास्यसि च यावद्युगचतुष्टयम् ॥
ततश्चतुर्थे सम्प्राप्ते सह देवैः कृते युगे ।
क्षीरोदं निर्म्मथिष्यामः शम्भुर्व्विष्णुरहं तथा ॥
मन्थानं मन्दरं कृत्वा सर्पराजं तथांशुकम् ॥
यज्ञभागेषु हीनेषु देवानार्थे वयं ततः ।
मथिष्यामः समं देवैः क्षीरोदं सह दानवैः ।
त्वच्छरीरामृतमिदं यत् स्थितं क्षीरसागरे ॥
तन्मथ्य ग्रहीष्यामो राशीभूतं तथाक्षयम् ।
सर्व्वौषध्यन्तरे कृत्वा त्वच्छरीरं तदा वयम् ।
क्षेप्स्यामः सागरजले शरीरार्थं विधो तव ॥
निर्म्मथ्य सागरं पश्चात् सहस्रार्थं यदामृतम् ।
तदा तव वपुस्तस्मिन्पूर्व्वं सम्भविष्यति ॥
लोको वीर्य्यानुकं कान्तमक्षयञ्च सुधात्मकम् ।
दृढाङ्गसन्धिकं चारु भविष्यति वपुस्तव ॥
मार्कण्डेय उवाच ।
सुधांशुमेवमाभाष्य ब्रह्मा लोकपितामहः ।
विधोः क्षयाय मासार्द्धं वृद्धये यत्नवान्भूत् ॥
यथा दृष्टेन गदितं मासार्द्धं यातु चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं यत्नं तन्नाकरोद्विधिः ॥
यतः षोडशधा चन्द्रं सुरश्रेष्ठो विभक्तवान् ।
स सुरान् सर्व्वान् समुवाचेदमद्भुतम् ॥

कलाः षोडश चन्द्रस्य तत्रैका प्रमाणदर्शिनि ।
तिष्ठत्वद्यावधि पराः क्षयं यान्तु क्षयं विना ॥
क्षयेण यदि रोगेण मासार्द्धं दशयाक्रान्तः ।
क्षयाय योक्ष्यते चन्द्रो लोपशान्तिः सदा भवेत् ॥
किन्त्वस्य या कला शम्भौ ज्योत्स्ना गच्छतु तां
प्रति ।
चतुर्द्दशकलासंख्याः प्रतिमासं सुरोत्तमाः ।
चतुर्द्दशकलासंस्थान्यमृतानि पिबन्तु वै ।
प्रतिपत्तिथिमारभ्य भवन्त्याश्चतुर्द्दशीम् ॥
तेजोभागाः सूर्य्यबिम्बं चतुर्द्दशतिथौ क्रमात् ।
प्रविशन्तु क्षयं तेन कृष्णपक्षे विधोर्भवेत् ॥
यातु शेषा कलादर्शे हरिभूषणे मताविता ।
तिष्ठतु प्रथमे भागे तिथौ सद्यो निशापतेः ॥
द्वितीये दर्शभागे तु रोहिण्या यातु मन्दिरम् ।
तृतीये तु सरस्वत्यां स्नात्वा सम्भुचितो विधुः ॥
चतुर्थे वक्तपूर्व्वोक्तितिथिभागे विभावसोः ।
मण्डलं यातु चन्द्रोऽयं सविमरथपोटकः ॥
यावत्कालेन हि कला प्रथमा क्षयमाप्नुयात् ।
एवमेवं कृष्णपक्षे तावत्सा प्रतिपत् भवेत् ॥
द्वितीयादौ कृष्णपक्षे वृद्धिह्रासक्षयाविधः ।
तिथीनां वृद्धिहेतुश्च शुक्ले कृष्णे तथा भवेत् ॥
ततः पुनः शुक्लपक्षे यावत् पूर्व्वा कलोदिता ।
वृद्धिमेति भवेत्तावत् प्रतिपत्तिथिरादितः ॥
ततो द्वितीयभागस्य या ज्योत्स्ना हरमूर्द्धनि ।
स्थितायां वै कलायान्तु गता सा पुनरेष्यति ॥
शुभाभिस्तु भवेत् पेयममृतं यद्दिने दिने ।
तद्वितीयादितिथिभिः पूर्व्वाभिः सदैव हि ॥
क्षयसतुपक्ष्यते चन्द्रो ज्योत्स्नायोगात् सुरो-
त्तमाः ।
यथा दिने दिने भागाः क्षयं यान्ति तथा
विधोः ॥
वृद्धिं गच्छन्त्यनुदिनं शुक्लपक्षेऽन्वहं सुराः ।
तेजोभागः सूर्य्यबिम्बात् पुनरेव समेष्यति ॥
प्रयास्यति कृष्णपक्षे यथाभागक्रमन्तथा ।
ज्योत्स्नाहरशिरश्चन्द्रात् प्रत्यहं पुनरेष्यति ॥
तेजोभागः सूर्य्यबिम्बादमृतं वत्स्यते स्वयम् ।
एवं वृद्धिः शुक्लपक्षे सुधांशोः संभविष्यति ॥
पक्षयोः शुक्लकृष्णाख्यं चन्द्रवृद्धिक्षयाद्भवेत् ।
यावत्कालेन यो भागं क्षयं वृद्धिञ्च यास्यति ॥
तावत्कालमभिव्याप्य तिथिः स्थास्यति सा पुनः ॥
चिरेण वृद्धिर्यदि वा क्षयो वा
द्रुतेन वृद्धिर्यदि वा क्षयो वा ।
द्रुतात्तिथीनां तु सदा क्षयः स्या-
च्चिरात्तु वृद्धिस्तिथिषु प्रवेशे ॥
क्षयं कथञ्च चन्द्रेण विना न संभविष्यति ।
तस्मात् तयोः प्रवृद्ध्यर्थं चन्द्रं रचन्तु देवताः ॥
आस्वादनीयः शुभांशुः कलाशेषोऽनुमासतः ।
अमावास्यापराह्णे तु पितृभी रोहिणीगृहे ॥
तस्यैवास्वादनात् कथं वृद्धिं यास्यति चान्वहम् ।
तेन कथेन पितरस्तृप्तिं यास्यन्ति वै पराम् ॥
श्रीमार्कण्डेय उवाच ।
ततः सुरगणाः सर्व्वे यथोक्तं विधिना तथा ।

चतुर्द्दशविभागांश्च चन्द्रस्य यथा…
ममार्द्देषोऽपि चन्द्रार्द्धं मन्दरं सागर…
जगाह शैवैर्व्विधिना शिरसा शूलिनः…
यमिनः परमं नियमक्रममयत्नम् ।
तत्सम्भवाश्चन्द्रकलाः प्राविशत् सा…
प्रविशन्ति यदा ज्योतिरानन्दमयी सा
योगिनान्तु तदा तेषां नित्यं तदैवेन ।
महादेवशिरःसंस्थो लोके नित्यं सुधांशु…
चन्द्रदारा भवेन्नालिरक्तौ तैरितो…
सनत्प्राप्ता महादेवः चन्द्रहा…
हिताय सर्व्वलोकानां जगाद त्रिद…
चन्द्रज्योत्स्नाममापोमादोषघ्नो …
सर्व्वौषधीषु शङ्करः प्रसंस्थे तदोऽभवत् ।
अम्बरेषु प्रवर्त्तेषु स्यात् स्यात् मासेषु …
परिपक्वान्ति पितरश्चाया कर्म्माणि भूरि…
अमृतं शक्ष्यया सर्व्वं यदेवेभ्यः पुराणम्…
तेन क्षयन्ति क्षीणा ये यज्ञभागेन देव…
यदेवाप्याययिती तव ज्योत्स्नाभिर्देवै…
यज्ज्योत्स्ना, विना भूते तव स्या…
क्षय…

यतोऽमृतस्य यज्ञस्य चन्द्रमाः
यतोऽस्य दम्भयापात् दर्शाय…
यद्यपि कृष्णपक्षेऽपि सुधा संधीयते हि…
तेजः सूर्य्य…
पुनश्च शुक्लपक्षे तु पीयोदेति यथा तत्…

यज्ञेषु यशिरश्चन्द्रात् सूर्य्यबिम्बादृष्यधर…
कलाः षोडश चन्द्रस्य तत्रैका प्रमदेह…
सितासितावुभौ पक्षौ शेषाकारदशवौ…
इति वः सर्व्वमाख्यातं विभक्तचन्द्रमा य…
सङ्कथा पर्व्वतश्रेष्ठे तथा तच्चन्द्रभागतः ।
यज्ञभागे स्थिते यस्माद्विचार्येमकरोद्विधुः…
कथे स्थितेऽपि पितर्यं तिथिवृद्धिक्षयौ य…
इदं पुण्यतमाख्यानं यः शृणोति सततं…
राजयक्ष्मा तस्य कुले न कदाचिद्भवि…
यक्ष्मणा परिभूतो यः शृणोति सततं त्रि…
अचिरात् यक्ष्मणा मुक्तः स भवेन्नरसत्त…
इदं स्वस्त्ययनं पुण्यं गुह्यात् गुह्यतरं पर…
यः शृणोत्येकचित्तः सन् स महापुण्यभा…
भवे…

इति कालिकापुराणे २१ अध्या…

राजयोग्यः, त्रि, (राज्ञो योग्यः ।) रा…
नृपोचितः । यथा,—
“त्रिकोणसप्तके सौम्ये पापे चोपचयस्थि…
राजयोग्या भवेन्नारी सुन्दरी कुलवर्द्धि…
इति जातक…

राजरङ्गं, क्ली, (राजयोग्यं रङ्गम् ।) र…
इति शब्दरत्नावली ॥

राजराजः, पुं, (राज्ञामपि राजा यस…
“राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ ।
टच् ।) कुबेरः । इत्यमरः । १ । १ ।
(यथा, किरातार्ज्जुनीये । ५ । ९१ ।

क्रा सपदि हितं प्रियं प्रियार्हे
स्वं गतवति राजराजसूत्ये ।
कण्टं किमपि पृथासुतः प्रदध्यौ
ते भृशमरतिं हि सद्वियोगः ॥”)
। (यथा, रामायणे ।२।८२।१४।
ति च श्रुत्वा राजराजस्य योषितः ।
ानि यानार्हा आसनं पर्य्यवारयन् ॥”)
। इति मेदिनी । जे, ३६ ॥
स्त्री, पिप्पलविशेषः । तत्पर्य्यायः ।
२ राजपुत्त्री ३ महेश्वरी ४ ब्रह्माणी ५
: ६ कपिला ७ पिङ्गला ८ । अस्य
त्त्वम् । शीतलत्वम् । लवणत्वम् ।
: । पाण्डुवातक्रिमिशोथपित्तनाशि-
त राजनिर्घण्टः ॥
, (राजा ऋषिरिव श्रेष्ठत्वात् ।)
दराजः । इति त्रिकाण्डशेषः ॥ तस्य
लिनाशनम् । यथा,—
स्य नागस्य दमयन्त्या नलस्य च ।
राजर्षेः कीर्त्तनं कलिनाशनम् ॥”
इति महाभारतम् ॥
[न्] पुं, (राज्ञो लक्ष्म चिह्नं यत्र ।)
। इति धनञ्जयकोषः ॥ (राजचिह्न-
॥)
स्त्री, (राज्ञो लक्ष्मीः ।) राजश्रीः ।
ोतिषतत्त्वे ।
प्रभावनिपुणः प्रमदाविलासः
ापन्नृपपूजितदेशलाभः ।
श्वलाभधनपूर्णमनोरथः स्यात्
दशा भवति निश्चलराजलक्ष्मीः ॥”
त्रि, (राजवंशे भवः । राजवंश+
राजवंशोद्भवः । तत्पर्य्यायः । राज-
। इत्यमरः । २ । ७ । २ ॥
न्] स्त्री, (राज्ञो वर्त्म पन्थाः ।) राज-
तत्पर्य्यायः । घण्टापथः २ संसरणम् ३
४ उपनिष्क्रमणम् ५ उपनिष्करम् ६
: ७ । इति हेमचन्द्रः । ४ । ५३ ॥
स्त्री, (राजते शोभते इति । राज्+
राजा वला इति कर्म्मधारयः ।)
: । इत्यमरः । २ । ४ । १५३ ॥ गन्ध-
तया इति भाषा ।
:, पुं, (राज्ञां वल्लभः ।) राजादनी ।
: । राजबदरः । इति राजनिर्घण्टः ॥
मदासकविराजकृतद्रव्यगुणग्रन्थविशेषः ।
—
रायणदासेन कविराजेन धीमता ।
क्रियते द्रव्यगुणोऽयं राजवल्लभः ॥”
इति तस्य द्वितीयश्लोकः ॥
वे, त्रि ॥ (यथा, मार्कण्डेये । ४८ । ४८ ।
ायो विना चैच्चैः परभूमिचरो वली ।
एषाक्रमीर्षो राजवल्लभसंश्रयः ॥”)
, स्त्री, (राजप्रिया वल्ली ।) सोमवल्ली ।
ामाला । उवा इति भाषा ॥

राजवान्, [न्] त्रि, (राजास्त्यस्येति । राजन्+मतुप् । मस्य वः ।) राजमात्रयुक्तदेशः । यथा,—
“सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥”
इत्यमरः । २ । १ । १३ ॥
(नृपविशिष्टः । यथा, महाभारते ।५।१।७।
“रराज सा राजवती सभाग्रा
ग्रहैरिव द्यौर्विमलैरुपेता ॥”)

राजवाहः, पुं, (राजानं वहतीति । वह्+अण् ।) घोटकः । इति शब्दचन्द्रिका ॥

राजवाह्यः, पुं, (राज्ञा वाह्यः ।) राजवाहकहस्ती । तत्पर्य्यायः । उपवाह्यः २ । इति हेमचन्द्रः ॥ विजयकुञ्जरः ३ । इति त्रिकाण्डशेषः ॥ राजवहनीये, त्रि ॥

राजवृक्षः, पुं, (वृक्षाणां राजा । राजदन्तादित्वात् परनिपातः ।) आरग्वधवृक्षः । इत्यमरः ॥ पियालवृक्षः । इति मेदिनी ॥ लङ्कास्थायी वृक्षः । इति शब्दचन्द्रिका ॥ लङ्कासिज् इति भाषा ॥

राजशणः, पुं, (राजः शोभमानः शणः ।) पट्टः । इति शब्दमाला ॥ पाट् इति भाषा ॥

राजशफरः, पुं, इल्लिशमत्स्यः । इति हारावली ॥

राजशय्या, स्त्री, (राज्ञः शय्या ।) राज्ञः शयनीयम् । तत्पर्य्यायः । महाशय्या २ । इति हेमचन्द्रः ॥

राजशाकः, पुं, (राजप्रियः शाकः । शाकानां राजा इति वा ।) वास्तूकम् । इति राजनिर्घण्टः ॥

राजशुकः, पुं, (शुकानां राजा । राजदन्तादित्वात् परनिपातः ।) पक्षिविशेषः । राजा सुगा इति हिन्दी भाषा । तत्पर्य्यायः । प्राज्ञः २ शतपत्त्रः ३ नृपप्रियः ४ । इति राजनिर्घण्टः ॥

राजशृङ्गं, क्ली, राजच्छत्त्रम् । तत्पर्य्यायः । कनकदण्डकम् २ । इति त्रिकाण्डशेषः ॥

राजशृङ्गः, पुं, मद्गुरमत्स्यः । इति हेमचन्द्रः ॥

राजसः, त्रि, (रजसो भवः । रजस्+अण् ।) रजोगुणोद्भवः । लक्षणं यथा,—
“आरम्भरुचिताधैर्य्यमसत्कार्य्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥”
आरम्भरुचिता फलार्थं कर्म्मानुष्ठानशीलता ॥ * ॥
संक्षेपतल्लक्षणं यथा,—
“येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ॥”
तत्कृतिर्यथा,—
“देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः ।
तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥”
तद्गतिप्रकारा यथा,—
“भल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥
राजानः क्षत्त्रियाश्चैव राज्ञश्चैव पुरोहिताः ।
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥
गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये ।
तथैवाप्सरसः सर्व्वा राजसीषूत्तमा गतिः ॥”
इति वामने १२ अध्यायः ॥
राजसाहारा यथा,—
“कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥”
राजसयज्ञो यथा,—
“अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥”
राजसतपो यथा,—
“सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥” * ॥
राजसदानं यथा,—
“यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥”
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥
राजसत्यागो यथा,—
“दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसत्यागं नैव त्यागफलं लभेत् ॥”
राजसज्ञानं यथा,—
“पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥”
राजसकर्म्म यथा,—
“यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥” * ॥
राजसकर्त्ता यथा,—
“रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥”
राजसी बुद्धिर्यथा,—
“यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥”
राजसी धृतिर्यथा,—
“यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्ज्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥”
राजससुखं यथा,—
“विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥”
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥ * ॥
राजसपुराणानि यथा,—
“ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥” ॥
राजसस्मृतयो यथा,—
“आत्रेयं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्मार्त्ता मताः ॥”
इति पाद्मोत्तरखण्डे २६ अध्यायः ॥

राजसदनं, क्ली, (राज्ञः सदनम् ।) राजगृहम् । तत्पर्य्यायः । सौधः २ । इत्यमरः । २ । २ । १० ॥ भूपालभवनम् ३ सुधामयम् ४ । इति शब्दरत्नावली ॥ तद्वेदा यथा,—
“सौधोऽस्त्री राजसदनमुपकार्य्योपकारिका ।

स्वस्तिकः सर्व्वतोभद्रो नन्द्यावर्त्तादयोऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ॥"
इत्यमरः । २ । २ । १० ॥

राजसभा, स्त्री, राज्ञः सभा । ("सभा राजामनुष्यपूर्व्वा ।" २ । ४ । २३ । इत्यत्र राजपर्य्यायस्यैव ग्रहणात् न क्लीवत्वम् ।) नृपतिसमाजः । इत्यमरः । ३ । ५ । ८ । (वाचस्पत्ये नपुंसकलिङ्गत्वोक्तिस्तु प्रामादिकी ।)

राजसर्पः, पुं, (सर्पाणां राजा । राजदन्तादित्वात् परनिपातः ।) सर्पविशेषः । तत्पर्य्यायः । भुजङ्गभोजी २ । इति हेमचन्द्रः । ४ । ३७० ॥

राजसर्षपः, पुं, (सर्षपाणां राजा श्रेष्ठत्वात् । परनिपातः ।) सर्षपविशेषः । राजसर्षा इति भाषा । राइ इति केचित् । तत्पर्य्यायः । क्षविका २ राजिका ३ खरी ४ क्षुतकः ५ क्षुतक इत्यत्र क्षवक इति वा पाठः । इति रत्नमाला । क्षवः ६ क्षुताभिजननः ७ । क्षुताभिजनन इत्यत्र क्षुधाभिजनन इति वा पाठः । इति हेमचन्द्रः । कृष्णा च तीक्ष्णगन्धा ९ राजी १० क्षवसर्षपाख्या ११ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । वातशूलगुल्मकण्डूकुष्ठव्रणापहत्वम् । पित्तदाहप्रदत्वञ्च । इति राजनिर्घण्टः । (चतुर्व्विंशतित्रसरेणुपरिमित-परिमाणविशेषः । यथा, मनुः । ८ । १३३ ।
"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥"
"अष्टौ त्रसरेणवो लिक्षैका परिमाणेन ज्ञेया तास्तिस्रो लिक्षा राजसर्षपो ज्ञेयः । ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः ।"
इति तट्टीकायां कुल्लूकः ।)

राजसायुज्यं, क्ली, (राज्ञः सायुज्यम् ।) राजत्वम् ।
"स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत् ——————— ।"
इत्यमरदर्शनात् ॥

राजसारसः, पुं, (राज्ञः सारस इव । राजा शोभाशाली सारस इव इति वा ।) मयूरः । इति शब्दमाला ॥

राजसी, स्त्री, (रजस इदमिति । रजस् + अण् । ङीप् ।) दुर्गा । इति शब्दरत्नावली । रजोगुणसम्बन्धिनी च । (यथा, गीतायाम् ।
"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥")

राजसूयः, पुं, ("राज्ञा कर्त्तव्यः सोमः सूयतेऽत्र ।" इत्यमरटीका । सु + अधिकरणे क्यप् । "राज्ञा सोतव्यः राजा वा इह सूयते ।" इति काशिका । "राजसूयसूर्य्य—।" ३ । १ । ११४ । इति निपातनात् दीर्घः ।) राजकर्त्तृकयज्ञविशेषः । तत्पर्य्यायः । क्रतुराट् २ क्रतूत्तमः ३ । इति शब्दरत्नावली । (अस्य [illegible] । ५ । ६ । ३१ । यथा, महाभारते । २ । २३७ । १६ ।
"यक्ष्यन्ति च नरव्याघ्रा निर्जित्य पृथिवीमिमाम्
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥"
राजसूयमन्त्रादिकं वाजसनेयसंहितायाम् ९ अध्यायस्य ३५ कण्डिकामारभ्य १० अध्यायस्य ३० कण्डिकापर्य्यन्तं द्रष्टव्यम् । युधिष्ठिरस्य राजसूययज्ञविवरणन्तु महाभारते सभापर्व्वणि विशेषतो द्रष्टव्यम् ।)

राजस्कन्धः, पुं, (राजः शोभाशाली स्कन्धो यस्य ।) घोटकः । इति त्रिकाण्डशेषः ॥

राजस्वं, पु क्ली, (राज्ञे देयं स्वं धनम् ।) राजधनम् । राजकरः । इति लोकप्रसिद्धम् ॥

राजस्वर्णः, पुं, (स्वर्णानां धुस्तूराणां राजा । राजदन्तादित्वात् परनिपातः ।) राजधुस्तूरकः । इति राजनिर्घण्टः ॥

राजहंसः, पुं, (हंसानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) चञ्चुचरणलोहितश्वेतवर्णहंसः । इत्यमरः । २ । ५ । २४ ॥ (यथा, कुमारे । १ । ३४ ।
"सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-
रादित्सुभिर्नूपुरशिञ्जितानि ॥")
कादम्बः । कलहंसः । नृपोत्तमः । इति मेदिनी ॥

राजहर्षणं, क्ली, (राजानमपि हर्षयतीति । हृष् + णिच् + ल्युः ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

राजहस्ती, [न्] पु, (राज्ञो हस्ती ।) राजगजः । तत्पर्य्यायः । मारीचः २ याजकगजः ३ मदोत्कटः ४ । इति हारावली । ४८ ॥

राजहासकः, पुं, (राजानमपि हासयतीति । हस् + णिच् + ण्वुल् ।) मत्स्यविशेषः । तत्पर्य्यायः । कातरः २ कातलः ३ राजीवः ४ । इति शब्दरत्नावली ॥

राजक्षवकः, पुं, सर्षपः । इति राजनिर्घण्टः ॥ (अस्य शाकगुणाः ।
"संग्राहि शीतलञ्चापि मधुरं वातविरोधि च ।
राजक्षवकशाकन्तु पटोलशाकवत् स्मृतम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

राजा, [न्] पुं, (राजते शोभते इति । राज् + "कनिन् युवृषितक्षिराजीति ।" उणा० १ । १५६ । इति कनिन् ।) प्रभुः । नृपतिः । (यथा, रघुः । ४ । १२ ।
"यथा प्रह्लादनात् चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")
क्षत्त्रियः । (यथा, मनुः । २ । ३२ ।
"शर्म्मवद्ब्राह्मणस्य स्यात् राज्ञो रक्षासमन्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥")
चन्द्रः । यक्षः । इन्द्रः । इति मेदिनी । उत्तरपदे टच् स्यात् । महाराजः । अथ नृपतेः पर्य्यायः । राट् २ पार्थिवः ३ क्ष्माभृत् ४ नृपः ५ भूपः ६ महीक्षित् ७ । इत्यमरः । पार्थः ८ नृपतिः १० भूपालः ११ महीपतिः १३ नाभिः ... भूमीन्द्रः १६ नरेन्द्रः १७ ... इति शब्दरत्नावली । प्रजेश्वरः ... इनः २१ दण्डधरः २२ ... स्कन्दः २४ स्कन्धः २५ भुभु... इति जटाधरः ॥ ... ।
"महता राजराज्येन पृथुर्वैन्य...
सोऽभिषिक्तो महातेजा ...
पित्रापरञ्जितास्तस्य ...
अनुरागात्ततस्तस्य नाम राजेत्यभा...
इति विष्णुपुराणे १ अंशे १३ ...
अपि च ।
"राज्ञी राजसिकं सर्व्वं कुरुते ...
... ।
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ११ ...
तस्य सर्व्वश्रेष्ठत्वं यथा,—
श्रीकृष्ण उवाच ।
"शृणु वत्स ! महाराज हे तात ! ...
भयत्राता च राजा च ...
अष्टमीश महेन्द्रोऽग्निस्त्वष सर्व्वे ...
यो राजा स पिता माता प्रजानां ...
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ...
पृथोरेवादौ राजा इति संज्ञा यथा ...
"देवैर्व्विप्रैस्तथा ...
राज्यस्यैवाधिकारे वै ...
तदा पित्रा प्रजाः सर्व्वाः ...
तेनानुरञ्जिताः सर्व्वाः सुखैर्मुदिरे ...
अनुरागात्तस्य वीरस्य नाम राजेत्य...
इति पाद्मे भूमिखण्डे २८ अध्या...
अथ राजलक्षणम् ।
"सोऽपि लक्ष्मपटे बालं दृष्ट्वा श्रीतिर...
नरेन्द्रलक्षणोपेतं चिन्तामास वैश्य...
तस्यास्यं चन्द्रबिम्बाभं शुभ ...
नीलाः केशाः कुञ्चिताश्च समा ...

राजीवनेत्रयुगलो बिम्बोष्ठपुटसंयुत...
चतुर्दंष्ट्रश्चतुष्किष्कुर्दीर्घबाहुर्दो ...
चतुर्लेखाकरो माल्यवरश्चैकवर्ण...
शिरालपादो गम्भीरः ...
इति मार्कण्डेयपुराणे ...
ध्यायः । ७ । अन्यच्च ।
"असितौ मृदुतरौ कमनीयरक्ता...
शिराङ्गुली ताम्रनखौ पादाङ्गुली ...

कूर्म्मोन्नतौ गूढगुल्फौ सुपार्ष्णी ...
मृदुलोमा समा जङ्घा तथा करिकर ...
ऊरवो जानवस्तुल्या नृपस्येति ...
लोमगर्त्ते नृपो दीर्घैर्भूपैश्च धनाढ्य ...
समाभ्यां क्षितिपः श्रोक्तः प्रलम्बैः ...
धर्मदर्शितः शब्दगुणाः ...

हस्त्रिचतुःपञ्चषड्धारादिभिरेव च ॥
ग्राावर्त्तवलितशुभाभिश्च नृपाः स्मृताः ।
: पुष्पगन्धिशुक्रा मधुगन्धे धनं बहु ॥
लस्फिक् सुखी स्याच्च सिंहस्फिक् भूपतिः
स्मृतः ।
सिंहकटी राजा निस्वः कपिकटिर्नरः ॥
षोन्नतकक्षाः स्युर्जिह्मा विषमकक्षकाः ।
मध्यगता नाभिः शूलधारां करोति हि ॥
ी नवाढ्यं कुर्य्याच्च नृपत्वं पद्मकर्णिका ।
हतैश्चुचुकैश्च भवन्ति सुभगा नराः ।
ना विषमैर्दीर्घैः पीतोपचितकैर्नृपाः ॥
नतञ्च हृदयमकम्प्यं मांसलं पृथु ।
णामधमानाञ्च खरलोम शिरालकम् ॥
ग्रीवश्च नृपतिर्लम्बकर्णोऽतिभक्षणः ।
जानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
वन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ।
हीनैः करच्छेदमशब्दैर्धनवर्ज्जिताः ॥
वाश्वक्रनखैस्तद्वद्भैश्च परतर्कताः ।
नैर्भूपा धनाढ्याश्च चाङ्गुष्ठैः सयवैस्तथा ॥
ाङ्गुलिश्च सधनास्तिस्रो रेखाश्च यस्य वै ।
ते: करतलगा मणिबन्धे समुत्थिताः ॥
ातपत्रशिबिका गजपद्मोपमा नृपे ।
भाङ्कुशपताकाभा म्टणालाभा निरीश्वरे ॥
माभाश्च गदाढ्यानां स्वस्तिकाभा नृपेश्वरे ।
काश्चितोमरधनुःकुन्ताभा नृपतेः करे ॥
सलैश्च धनोपेता ग्रवक्रैरधरैर्नृपाः ।
मोपमैश्च स्फुटितैरोष्ठैः रूक्षैश्च खण्डितैः ॥
वर्णैर्धनहीनाश्च दन्ताः स्निग्धा घनाः शुभाः ।
त्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा
शुभा ॥
त्णा दीर्घा च विज्ञेया तालु श्वेतं धनेश्वरे ।
ध्या च पद्मा वक्त्रं समं सौम्यञ्च संवृतम् ॥
पानाममलं श्लक्ष्णं विपरीतञ्च दुःखिनाम् ।
ङ्कुकर्णाश्च राजानो रोमकर्णाः शतायुषः ॥
राः स्निग्धावनद्धैश्च चासमैर्मांसलैर्नृपाः ।
ोम्टत्युश्चिपिटनाम ज्याभ्यो भाग्यवतां भवेत् ॥
ण्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे ।
र्हतैश्च ललाटैश्च सुधना उन्नतैर्नृपाः ॥
ाटोपस्तास्तिस्रो रेखाः स्युः शतवर्षिणाम् ।
पत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ ॥
त्राकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
डुमतश्चतुर्हस्तो रक्तः समस्तथा नृपः ॥"
ति गारुडे नरलक्षणं नाम ६६ अध्यायः ॥
पि च ।
"पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम् ।
सर्व्वाणि यो महीपालः सम्यङ्नित्यं परीक्षयेत् ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥
ष्पं पुष्पं विचिन्वीयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारण्ये न यथाङ्गारकारकः ॥
दुग्धो चौरस्तु धर्म्मात विक्रेतारो न भुञ्जते ।
परराष्ट्रं महीपालो कालयोगाच्च दूषयेत् ॥

गोधुक्क्षिन्ति यो धेन्वाः क्षीरार्थी लभते पयः ।
एवं राष्ट्रमयोगेन पीड्यमानं न वर्द्धते ॥
तस्मात् सर्व्वप्रयत्नेन पृथिवीमनुपालयेत् ।
पालकस्य भवेद्भूमिः कीर्त्तिरायुर्यशो बलम् ॥
अभ्यर्च्य विष्णुं धर्म्मात्मा गोब्राह्मणहिते रतः ।
प्रजाः पालयितुं शक्तः पार्थिवो यो जितेन्द्रियः ॥
ऐश्वर्य्यमधुवं प्राप्य राजा धर्म्मे मतिञ्चरेत् ॥"
इति गारुडे १११ अध्यायः ॥ * ॥
ब्रह्माभिषिक्तराजानो यथा,—
श्रीपराशर उवाच ।
"यदाभिषिक्तः स पृथुः पूर्व्वं राज्ये महर्षिभिः ।
ततः क्रमेण राज्यानि ददौ लोकपितामहः ॥
नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः ।
सोमं राज्ये दधाद्ब्रह्मा यज्ञानां तपसामपि ॥
राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम् ॥
प्रजापतीनां दक्षन्तु वासवं मरुतामपि ।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ ॥
पितॄणां धर्म्मराजानं यमं राज्येऽभ्यषेचयत् ।
ऐरावतं गजेन्द्राणामशेषाणां पतिं ददौ ॥
पतत्रिणाञ्च गरुडं देवानामपि वासवम् ।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि ॥
शेषन्तु नागराजानं म्टगाणां सिंहमीश्वरम् ।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥
एवं विभज्य राज्यानि दिशां पालाननन्तरम् ।
प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः ॥
पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशःपालं सुधन्वानं पुत्त्रं वै सोऽभ्यषेचयत् ॥
दक्षिणस्यां दिशि तथा कर्द्दमस्य प्रजापतेः ।
पुत्त्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥
पश्चिमायां दिशि तथा रजसः पुत्त्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानमभिषिक्तवान् ॥
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मतः प्रतिपाल्यते ॥
एते सर्व्वे प्रवृत्तस्य स्थितौ विष्णोर्म्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥
ये भविष्यन्ति येऽतीताः सर्व्वभूतेश्वरा द्विज ।
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ॥"
इति श्रीविष्णुपुराणे प्रथमेऽंशे २२ अध्यायः ॥ *
सूत उवाच ।
"एवं सृष्टासु सर्व्वासु स्थावरासु चरासु च ।
ब्रह्मा क्रमेण राज्यानि चादिशत्तपचक्रमे ॥
द्विजानां वीरुधाञ्चैव नक्षत्राणां ग्रहैः सह ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ॥
बृहस्पतिञ्च सर्व्वेषां ददावङ्गिरसामपि ।
भृगूणामाधिपत्ये च काव्यं राज्येऽभ्यषेचयत् ॥
आदित्यानां पुनर्व्विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवम् ॥
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनम् ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजम् ।

म्टगाणामथ शार्द्दूलं गरुडं पततां वरम् ।
गन्धर्व्वाणां चित्ररथं नागानामथ वासुकिम् ॥
गन्धानां मरुतञ्चैव भूतानाञ्च शरीरिणाम् ।
सर्व्वेषां दंष्ट्रिणां शेषं सर्पाणाञ्चैव तक्षकम् ॥
सागराणां नदीनाञ्च मेघानां वर्षितस्य च ।
आदित्यानामन्यतमं पर्ज्जन्यमभिषिक्तवान् ।
सर्व्वाप्सरोगणानाञ्च कामदेवं तथा प्रभुम् ॥
ऋतूनामधिमासानां दिवसानां तथैव च ।
पक्षाणाञ्च क्षपाणाञ्च मुहूर्त्ततिथिपर्व्वणाम् ॥
कलाकाष्ठाप्रमाणानां गतिरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुम् ॥
प्रजापतेर्व्विरजसः पूर्व्वस्यामभिषेचयन् ।
पुत्त्रं नाम्ना सुधामानं राजानञ्चाभ्यषेचयत् ॥
यथाप्रदेशं राजानं दक्षिणस्यां प्रजापतेः ।
कर्द्दमस्य शङ्खपदं पुत्त्रं राज्येऽभिषिक्तवान् ॥
पश्चिमस्यां दिशि तथा रजसः पुत्त्रमुत्तमम् ।
केतुमन्तं महात्मानं राजानं ह्यभ्यषेचयत् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
दिशुत्तरायां पुत्त्रन्तु राजानमभ्यषेचयत् ॥
मानुषाणामधिपतिं चक्रे वैवस्वतं मनुम् ।
तैरेव पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण परिरक्ष्यते ॥
स्वायम्भुवेऽन्तरे पूर्व्वं ब्रह्मणा तेऽभिषेचिताः ।
इन्द्रादिलोकपालास्तु पुनर्व्वैवस्वतेऽन्तरे ॥
राजसूयेऽभिषिक्तस्तु पृथुः पूर्व्वं महर्षिभिः ।
मनुभिर्व्विधिना तद्वत् सोऽधिराजः प्रताप-
वान् ॥"
इत्याग्नेये वह्निपुराणे वराहप्रादुर्भावनामाध्यायः ॥
राजकर्त्तव्यकर्म्माणि यथा,—
मदालसोवाच ।
"वत्स ! राज्याभिषिक्तेन प्रजारञ्जनमादितः ।
कर्त्तव्यमविरोधेन स्वधर्म्मस्य महीभृता ॥"
अविरोधेन धर्म्मशास्त्राविरोधेन ।
"व्यसनानि परित्यज्य सप्तमूलहराणि वै ।
आत्मा रिपुभ्यः संरक्ष्यो बहिर्म्मन्त्रविनिर्गमात् ॥
अष्टधा नाशमाप्नोति स्वचक्रस्यन्दनाद्यथा ।
तथा राजाप्यसन्दिग्धं बहिर्म्मन्त्रं विनिर्गमात् ॥
दुष्टादुष्टांश्च जानीयादमात्यानरिदोषतः ।
चरैश्चराणाथा शत्रोरन्वेष्टव्याः प्रयत्नतः ॥
विश्वासो न तु कर्त्तव्यो राज्ञा मित्राप्तबन्धुषु ।
कार्य्ययोगादमित्रेषु विश्वसीत नराधिपः ॥
स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना ।
भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना ॥
प्रागात्मा मन्त्रिणश्चैव ततो भृत्या महीभृता ।
जेयाश्चानन्तरं पौरा विरुध्येत ततोऽरिभिः ॥
यस्त्वेतानविजित्यैव वैरिणो विजिगीषते ।
सोऽजितात्मा जितामात्यः शत्रुवर्गेण बाध्यते ॥
तस्मात् कामादयः पूर्व्वं जेयाः पुत्त्र महीभृता ।
तज्जये हि जयो राज्ञो राजा नश्यति तैर्जितः ॥
कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ।
हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥
कामप्रसक्तमात्मानं स्मृत्वा दृष्ट्वा निपातितम् ।

निरर्थयेनथा क्रोधादनुद्वारं ह्रनाम्नजम् ।
ह्यनमेनं नथा लोभाच्चद्वाईनं हिजैर्हतम् ।
मानादनायुष: पुत्रं हृतं ह्र्यात् पुरञ्जयम् ।
एभिर्निर्जितं सर्व्वं मरुत्तेन महात्मना ।
सुत्वा [illegible] षड्दोषांश्च महीपति: ।
काककोकिलभृङ्गाणां बकव्यालशिखण्डिनाम् ।
हंसानां लोहकुक्कुटानां शिक्षेत चरितं नृप: ।"
काकात् सर्व्वशङ्किता । कोकिलात् माधुर्य्यम् । भृङ्गात् मधौक्या अर्थादानम् । बकात् प्रभु-गहर्षे दकाग्रतास् । व्यालात् दुष्पप्पर्पितम् । शिखण्डिनश्चित्रतां सर्पेग्रहणाय सकता रामा-नामाणोनतश्च । हंसस्य सारग्राहित्वम् । लोह-कुक्कुटात् [illegible] ।
"कौशिकस्य क्रियां कुर्य्याद्विपक्षे मनुजेश्वर: ।
चेष्टां पिपीलिकानाञ्च काले भूप: प्रदर्शयेत् ।"
कौशिकस्य उलूकस्य रात्रौ काकावस्कन्दनम् । पिपीलिकानां सैनावहुत्वं सर्वभक्षणञ्च ।
"ज्ञेयाग्निविस्फुलिङ्गानां बीजचेष्टा च शाल्मले: ।
चन्द्रसूर्य्यस्वरूपञ्च नीत्यर्थं पृथिवीक्षिता ।"
अग्निविस्फुलिङ्गात् दूरात् दाह: । बीजात् [illegible] स्वदेशकारणम् । उदयकाले चन्द्र: सुखदायी शोभनाश्च । एवं सूर्य्य: शीते सुखदायी ग्रीष्मकाले च । एवं कालादपवारेण सुखदु:ख-दायकम् ।
"बन्धकात् पद्मशरभशूलिन्या गुर्विणीस्तनात् ।
प्रज्ञा नृपेण चादेया तथा गोपालयोषित: ।"
बन्धकात् [illegible] । पद्मात् [illegible] क्लिन्नत्वञ्च । शरभात् बलादपि शत्रुजेतृत्व: । यथा शरभोऽदात्तः सर्वोत्तमं न सहते । शूलिन्या आश्रितपालनम् । गुर्विण्या स्तनात् आशीर्वादनम् । गोपालयोषित् [illegible] दर्शयित्वा [illegible] ।
"[illegible] महीपालकर्म्मणि ।
[illegible] भूतलम् ।
[illegible] महीपति: ।"
[illegible] ।
"[illegible] रश्मिभि: ।
[illegible] नृप: ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।"
[illegible] ।
"[illegible] ।
[illegible] ।"
[illegible] ।
"[illegible] ।

राज्यस्तस्य सुखं तात परत्रेह च शाश्वतम् ।
एतद्राज्ञ: परं कृत्यं तथैतद्वृद्धिकारणम् ।
स्वधर्म्मे स्थापनं नृणां चाल्यते न कुबुद्धिभि: ।
पालनेनैव भूतानां कृतकृत्यो महीपति: ।
सम्यक् पालयिता भागं धर्म्मस्याप्नोति वै यत: ।
एवमाचरते राजा चातुर्व्वर्ण्यस्य रक्षणे: ।
स सुखी विहरत्येव शक्रस्येति सलोकताम् ।"
इति मार्कण्डेयपुराणे मदालसोपाख्यानाध्याय: तट्टीका च । * । राजाभिषेकस्य विहित-नक्षत्राणि यथा,—
"पुष्यानुराधा ज्येष्ठा च रोहिणी चोत्तरात्रयम् ।
हस्ताश्विनी रेवती च नृपाभिषेचनोत्तमा: ।"
इति ज्योति:सारसंग्रह: ।
अस्य विवरणं अभिषेकशब्दे द्रष्टव्यम् । * ।
राज्ञि वर्णनीयानि यथा,—
"नृपे कीर्त्तिप्रतापाज्ञाद्दुष्टशास्तिविवेकिता: ।
धर्म्मप्रयाणसंग्राममृगयाटा: सचिवाचमा: ।
प्रजारागोऽरिसेनाद्दिग्जयोऽरिपुरशून्यता ।
कौदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यैश्वर्य्योद्यमादय: ।"
इति कविकल्पलतायाम् १स्तवके ३कुसुमम् । * ।
राजान्नभक्षणे दोषो यथा,—
वाराह उवाच ।
"शुद्धा भागवता भूत्वा मम कर्म्मपरायणा: ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन च ।
आपन्ना हि भुञ्जीत राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते नरके नरा: ।
भगवद्वचनं श्रुत्वा सा मही शंसितव्रता ।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम् ।
धरण्युवाच ।
श्रुणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ।
को नु दोषो हि राजान्ने तन्मे त्वं वक्तुमर्हसि ।
ततो भूम्या वच: श्रुत्वा सर्व्वधर्म्मविदां वर: ।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम् ।
वाराह उवाच ।
श्रुणु सुन्दरि ! तत्त्वेन शुद्धमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतै: सदा ।
यद्यप्येव समन्नेन राजा लोके प्रवर्त्तते ।
राजसस्तामसो वापि कुर्व्वन् कर्म्म सुदारुणम् ।
अपि वा नर्त्तितं तेन राजान्नन्तु वसुन्धरे ।
धर्म्मतत्त्वार्थकाचापि न तु मे रोचते भुवि ।
ततोऽहं संप्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राजान्नं भोज्यं वै शुद्धैर्भागवतै: शुभै: ।
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यप्रदत्तानि दत्त्वा भागवतेऽपि ।
लिङ्गं भागवतेभ्यश्च मम प्रागवर्त्तकम् ।
राजान्नस्तु वराकेऽहं न स पापेन लिप्यते ।
निरवद्या निरीहा च निरञ्जनपुरस्थिता ॥
पुण्यप्रदा पुण्यकरी पुण्यगर्भा पुरातनी ।
पुण्यरूपा पुण्यदेहा पुण्यगीता च पावनी ॥
पूर्णा पवित्रा परमा परा पुण्यविभूषणा ।
पुण्यदात्री पुण्यधरा पुण्या पुण्यप्रवाहिनी ॥
पुण्यदेहा पुण्यवती पूर्णिमा पूर्णचन्द्रमा ।
पौर्णमासी परा पद्मा पद्मजा पद्मगन्धिनी ॥
पद्मिनी पद्मवक्त्रा च पद्ममालाधरा सदा ।
पद्मोद्भवा परध्या च परमानन्दरूपिणी ॥
प्रकाशा परमाश्चर्य्या पद्मगर्भनिवासिनी ।
पावनी च तथा पूता पवित्रा परमाकला ॥
पद्मार्च्चिता पद्मसंस्था पद्ममाता पुरातनी ।
पद्मासनगता नित्या पद्मासनपरिच्छदा ॥
शुक्लपद्मासनगता रक्तपद्मासना तथा ।
पीतपद्मासनगता कृष्णपद्मस्थिता तथा ॥
पदार्थदायिनी पद्मवनवासपरायणा ।
प्रकाशिनी प्रगम्या च पुण्यश्लोका च पावनी ॥
फलघ्नी फलहरा फलिनी फलरूपिणी ।
फुल्लेन्दीलोचना फुल्ला फुल्लकोरकगन्धिनी ॥
फलिनी फालिनी फेया फुल्लच्छादितपातका ।
विश्वमाता च विश्वेशी विश्वा विश्ववरप्रिया ॥
ब्रह्मण्या ब्राह्मणी ब्राह्मी ब्रह्मज्ञा विमलामला ।
बहुला बाहुला वल्ली वल्लरी वनदायिनी ॥
विक्रान्ता विक्रमामाला वहुभाम्यविलोचना ।
विश्वामित्रा विष्णुसखी वैष्णवी विष्णुवल्लभा ॥
विरूपाक्षप्रिया देवी विभूतिर्विश्वतोसखी ।
वेदवेदरता वाणी वेदाक्षरसमन्विता ॥
विद्या विद्यावती वन्द्या वृहती ब्रह्मवादिनी ।
वरदा विप्रकृष्टा च वरिष्ठा च विशोधिनी ॥
विद्याधरी वसुमती विप्रहृष्टा विशोधिना ।
व्योमस्थानावती वामा विधात्री विबुधप्रिया ॥

बुद्धिर्विनाशिनी विद्या ब्रह्मरूपा वरानना ।
वाग्मिनी ब्रह्मजननी ब्रह्महत्यापहारिणी ॥
ब्रह्मविष्णुस्वरूपा च सदा विभववर्द्धिनी ।
विभाविनी व्यापिनी च व्यापिका परिचारिका ॥
विपत्सन्निहरा देवी विनयव्रतचारिणी ।
विपत्तिशोकसंहर्त्री विपञ्चीवाद्यतत्परा ॥
वेणुवाद्यपरा देवी वेणुश्रुतिपरायणा ।
सर्वेश्विनी बलकरी बलमूला विवस्वती ॥
विभाभा विभ्रिता चैव विकल्पपरिवर्जिता ।
बुद्धिदा बुद्धती देवी विधिविच्छिन्नसंशया ॥
विचित्राङ्गी विचित्राभा विच्छा विभववर्द्धिनी ।
विजया निजया वन्द्या वामदेवी वरप्रदा ॥
विषघ्नी च विशालाक्षी विज्ञानवित्तमानिनी ।
भद्रा भोगवती भव्या भवानी भयनाशिनी ॥
भूतधात्री भयहरी भक्तवश्या भयापहा ।
भक्तिदा भयदा भैरोभक्तदुर्गप्रदायिनी ॥
भागीरथी भानुमती भाग्यदा भगनिर्हिता ।
भवप्रिया भूततुष्टिर्भूतिदा भूतभूषणा ॥
भोगवती भूतिमती भव्यरूपा भ्रमिभ्रमा ।
भद्रिदा भक्तिसुलभा भाग्यवृद्धिकरी सदा ॥
भिक्षुमाता भिक्षुनिभा भया भवस्वरूपिणी ।
महामाया मातृप्रिया महानन्दा महोदरी ॥
मतिर्मुक्तिर्मोक्षा च महामङ्गलदायिनी ।
महापुण्या महादात्री मैथुनप्रियलालसा ॥
मनोज्ञा मानिनी मान्या मणिमाणिक्यधारिणी ।
सुविस्तृता मोहकरी मोहघ्नी मदोत्कटा ॥
मधुपानरता मत्ता मदाघूर्णितलोचना ।
मधुपानप्रमत्ता च मधुलुब्धा मधुव्रता ॥
माधवी मालिनी मान्या मनोरथपथातिगा ।
मोदैश्वर्यप्रदामत्ता महापद्मवनाश्रिता ॥
महाप्रभावा महती मत्स्याक्षी मीनलोचना ।
महाकाठिन्यसम्पूर्णा महाक्षी महती कला ॥
सुशिरूपा महासक्ता मणिमाणिक्यभूषणा ।
सुरापानविचित्राङ्गी सुखारञ्जितमानिका ॥
महापानपराधीशी मनोमदनवर्द्धिनी ।
महामाणिक्यरचिता महाभूषणभूषिता ॥
मायावती मोहघ्नी महाविद्याविधारिणी ।
महामेधा महाभूमिर्महामाया प्रिया सखी ॥
महोदरी महोत्साहा महामणिविभूषिता ।
महामोक्षप्रदायिनी महामङ्गलदायिनी ॥
यज्ञिनी यशोदा च यज्ञभागविहारिणी ।
योगविहारिणी यज्ञा यज्ञिस्वन्दितप्रिया ॥
यक्षेशी यक्षवरदा यज्ञीया यक्षेश्वरी ।
योगयोगिविनिहिता योगिनी योगबुद्धिदा ॥
योगयुक्ता यमाद्यष्टाङ्गयोगैकधारिणी ।
अनुरागवर्द्धिनी च अनुरागप्रदायिनी ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

वासुदेवप्रिया वामा वसन्तसमयप्रिया ।
वासन्ती वसुदा वन्द्या वेणुवादपरायणा ॥
वीणावाद्यप्रमत्ता च वीणानादविभूषणा ।
वेणुनादरता चैव वंशीनादविभूषणा ॥
शुभा शुभरतिः शान्तिः शैव्या शान्तिविग्रहा ।
शीतला शोभिता शोभा शुभदा शुभदायिनी ॥
शिवप्रिया शिवानन्दा शिवपूजासु तत्परा ।
शिवस्तुत्या शिवध्येया शिवनित्यपरायणा ॥
श्रीमती श्रीनिवासा च श्रुतिरूपा शुभव्रता ।
शुद्धविद्याजपकरी शुभकर्त्री शुभाश्रया ॥
शुभानन्दा श्रुतिः श्रोत्री शिवप्रेमपरायणा ।
शोषणी शुभवार्त्ता च शालिनी शिवनर्त्तकी ॥
षड्गुणाश्रपदाक्रान्ता षडङ्गश्रुतिरूपिणी ।
सरसा सुप्रभा सिद्धा सिद्धसिद्धिप्रदायिनी ॥
सैवासङ्गा सती सक्ता सक्तिरूपा सदाप्रिया ।
सम्पत्प्रदा स्तुतिः स्तुत्या स्तवनीया स्तवप्रिया ॥
स्थैर्यदा स्थैर्यगा सौख्या स्त्रैणसौभाग्यदायिनी ।
स्वप्नरूपा स्वधा स्वाहा सुधासेवप्रमोदिनी ॥
स्वर्गप्रिया सत्प्रभावा सर्वपातकनाशिनी ।
संसारतारिणी राधा सौभाग्यवर्द्धिनी सदा ॥
हरप्रिया हिरण्याभा हरिणाक्षी हिरण्मयी ।
हंसरूपा हरिद्राभा हरिवर्णा सुचिस्मिते ॥
क्षेमदा क्षालिता क्षेमा क्षुद्रघण्टाविधारिणी ।
अपरैकं प्रवक्ष्ये प्रौढे स्वराचरसमन्वितम् ।
स्तोत्रं सहस्रनामाख्यं स्वरव्यञ्जनसंयुतम् ।
अजया अतुलानन्दा अनन्तानन्ददायिनी ॥
अनन्ता अशोका च अलका अम्लतश्रवा ।
अनाथवत्सभावन्ता अयोनिसम्भवा प्रिये ॥
अच्युतलक्षणालुब्धा विच्छिन्नाशापराजिता ।
अनाथानामभीष्टार्थसिद्धिदानन्दवर्द्धिनी ॥
अणिमादिगुणाधारा अग्रगण्यालिकहारिणी ।
अचिन्त्यशक्तिरजयाद्भुतरूपा च हारिणी ॥
अद्रिराजसुता दूती अष्टयोगसमन्विता ।
अच्युता अनवच्छिन्ना अस्तुतशक्तिधारिणी ॥
अनन्तनीयरूपा च अनन्तान्तरूपिणी ।
अनन्तमहिमा पारा अनन्तसुखदायिनी ॥
अर्थदा अमरा अर्था अदा आनन्दवर्षिणी ।
अविद्याजालशमनी अप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहन्त्री अशेषगुणगुम्फिता ।
अज्ञाननाशिनी देवी अनन्तसिद्धिदायिनी ॥
अशेषपापसंहन्त्री अशेषदेवतामयी ।
अघोरा अमला देवी अज्ञानतिमिरप्रदा ॥
अष्टपदपरा देवी अभिरामविनोदिनी ।
अनवद्यापरिच्छिन्ना अज्ञानान्तकलङ्घिनी ॥
आरोग्यदात्री आनन्दा आपन्नार्तिविनाशिनी ।
आद्यरूपा आद्यन्ता आत्मविद्या सदा प्रिया ॥
आप्यायिनी च आलक्ष्या आमदामास्तप्रदा ।
इडानिरिङ्गदात्री इष्टपूर्त्तफलप्रदा ॥
इतिहासश्रुतिः श्वेता इन्द्रासनपदप्रदा ।
इरा च इन्द्रमा च इन्द्रादिपरिवन्दिता ॥
इन्दिरा इन्द्राणीव इन्द्रहार इधारिणी ।
इच्छाभीष्टप्रदा इन्द्रियप्रीतिदायिनी ॥

ईश्वरी ईशजननी ईशस्वैर्धात्री
उत्तुङ्गशक्तिसंयुक्ता उग्रमार्त्तण्ड
उत्तमश्लोकसंसेव्या
उषा उमा
ऊढा ऊर्ध्वविमर्शा
ऊर्ध्वधारा ऊर्ध्वगामी उग्र
ऋषिवृन्दस्तुता
ऋतम्भरा
ऋतुप्रिया ऋक्माता
ऋतुलक्षणरूपा च ऋतुमार्गानु
[illegible]
ऐश्वर्यतत्त्वरूपा
ओजस्विनी ओषधी च
ओङ्कारजननी देवि
औदार्यप्रकरा भद्रे
अंम्बरस्था च अम्बरा
अम्बुजाक्षी च अम्बाला
अंशुमाली अंशुमती
अन्तर्नामिसखा भद्रे
अर्थेशा अर्थदात्री च
इत्थं नामाम्बरं भद्रे
अथ वा सुन्दरं शुद्धं निर्मीयतां
कुटमा कदरा कान्ता
कमला कल्पलतिका
कमनीयकला कर्णा कर्पूरवर्तिका
कदम्बकुसुमाभासा सदा कोक
कालिन्दीकेलिकलिता कला
कान्तालोकनया
खड्गिनी खड्गधाराभा
खेलखेलनगामिनी
खेचरी खेचरी विद्या स्वर्गति
खण्डिताशेषपापौघा
ख्यातेन सन्दसन्दोहा
खरसन्तापशमनी खरदूषण
गुहागम्भीरगौरी गन्धर्व
गूढरूपा गुणवती गुर्वी गौरवा
ग्रहपीडाहरा गुप्ता गतिप्रभा
चाम्पेयलोचना चारु
चन्द्रचन्दनसिक्ताङ्गी चर्चिता
चारुचम्पकमालाढ्या
चारिताशेषवृजिना
शुक्लचन्दनसिक्ताङ्गी शुक्लाङ्गी शुक्ल
पीतचन्दनसिक्ताङ्गी
श्यामचन्दनसिक्ताङ्गी श्यामाङ्गी
शुक्लवस्त्रपरीधाना शुक्लकौशेय
रक्तवस्त्रपरीधाना रक्तकौशेय
पीतवस्त्रपरीधाना पीतकौशेय
श्यामपट्टपरीधाना श्यामपट्टोत्तरीया
वृन्दावनेश्वरी राधा श्यामकान्त
मन्त्रिणी मानिनी गोपी कालिन्दी
गोपीश्वरप्रिया भव्या सदा

त्रिपुरादेवी त्रिपुराज्ञाकरी सदा ॥
श्रिकर्षस्था त्रिपुरापरिचारिका ।
रयंस्था तु या राधा पद्मिनी परा ॥
भाग्यसम्पन्ना नानाभरणभूषिता ।
हस्रनामाख्यं कथितं तव भक्तित: ॥
त्रस्य मन्त्रस्य कवचस्य वरानने ।
पि च देवेशि प्रपठेद्यदि मानव: ॥
राधिकां विद्यां केवलं कमलेक्षणे ।
न देवेशि उपविद्यापि सिध्यति ॥
राधिका विद्या उपविद्यासु निश्चिता ।
र्यां महेशानि उपास्य यत्नत: स्वयम् ॥
रमेशानि राधामन्त्रेण सुन्दरि ! ।
म सहसाणि प्रकटे यत्तु शस्यते ॥
कालिका साक्षात् राधाप्रकृतिपद्मिनी ।
राधे गोविन्द इदसुक्ताय्यं यत्नत: ॥
वैष्णवी देवि सर्व्वत्रैव प्रकाशते ।
ो यस्तु देवेशि स्वयं त्रिपुरसुन्दरी ॥
रं विना होमं विना पूजां विना बलिम् ।
न्यं विना पुष्पं विना नित्योदितां क्रियाम् ॥
मं विना ध्यानं विना भूतविशोधनम् ।
पं विना दानं येन राधा प्रसीदति ॥
हस्रनामाख्यस्तोत्रमार्गेण पार्व्वति ।
देवार्थं मन्त्रं राधिकामन्त्रमेव च ॥
रके घोरे यावदिन्द्राश्चतुर्द्दश ।
ुरुसुखाच्छन्नं वैष्णवो भक्तितत्पर: ॥
रचरीं कुर्य्यादेकविंशतिसंख्यकम् ।
भिषेकसिक्तस्य ततो गुरुपदार्च्चनम् ॥
्र्णाभिषेकञ्च भवाब्धौ पारमिच्छति ।
तस्य दुर्ब्बुद्धेर्निरये पतनं भवेत् ॥
त्यं महेशानि सत्यं सत्यं वदाम्यहम् ।
सतरणं नास्ति विना पूर्णाभिषेचनम् ॥
मपुराणानि वेदवेदाङ्गशास्त्रत: ।
तं महेशानि सारं पूर्णाभिषेचनम् ॥
सर्व्वप्रयत्नेन कुर्य्यात् पूर्णाभिषेचनम् ।
पूर्णाभिषिकञ्च पठेत् राधास्तवं प्रिये ॥
टोक्तमहेशानि स भवेद्व्रजनन्दन: ।
सहस्रनामाख्यं न यस्य जपतो मनुम् ॥
ष्ठ्यन्तस्य देवेशि तस्य पापफलं शृणु ।
पाके स पच्येत यावदे ब्रह्मण: शतम् ॥
नां यथा श्रेष्ठा भवेद्भागीरथी प्रिये ।
नां यथा शम्भु: प्रकृतीनां यथा सती ॥
णां यथा विष्णुर्नक्षत्राणां यथा शशी ।
नाथ तथा श्रेष्ठं राधास्तोत्रमिदं प्रिये ॥
नादिकं यद्यद्बलिहोमादिकन्तथा ।
सास्तोत्रपाठस्य कलां नार्हति षोडशीम् ॥"
वासुदेवरहस्ये राधातन्त्रे द्वात्रिंशत् पटले
नामस्तोत्रम् ॥*॥) अथ राधाकवचम् ।

श्रीपार्व्वत्युवाच ।

ासवासिन् भगवन् भक्तानुग्रहकारक ।
काकवचं पुण्यं कथयस्व मम प्रभो ॥
स करुणा नाथ त्राहि मां दु:खतो भयात् ।
व शरणं नाथ शूलपाणे पिनाकधृक् ॥

श्रीमहादेव उवाच ।

शृणुष्व गिरिजे तुभ्यं कवचं पूर्व्वसूचितम् ।
सर्व्वरक्षाकरं पुण्यं सर्व्वहत्याहरं परम् ॥
हरिभक्तिप्रदं साक्षात् भुक्तिमुक्तिप्रसाधनम् ।
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारणम् ॥
सर्व्वत्र जयदं देवि सर्व्वशत्रुभयापहम् ।
सर्व्वेषाञ्चैव भूतानां मनोवृत्तिकरं परम् ॥
चतुर्द्धामुक्तिजनकं सदानन्दकरं परम् ।
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥
इदं कवचमज्ञात्वा राधामन्त्रञ्च यो जपेत् ।
स नाप्नोति फलं तस्य विघ्नास्तस्य पदे पदे ॥
ऋषिरस्य महादेवोऽनुष्टुप्छन्द: प्रकीर्त्तितम् ।
राधास्य देवता प्रोक्ता रां बीजं परिकीर्त्तितम् ॥
धर्म्मार्थकाममोक्षेषु विनियोग: प्रकीर्त्तित: ।
श्रीराधा मे शिर: पातु ललाटं राधिका तथा ॥
वृषभानुसुता दन्तान् चिबुकं गोपनन्दिनी ।
चन्द्रावली पातु गण्डं जिह्वां कृष्णप्रिया तथा ॥
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ।
बाहू द्वौ चन्द्रवदना उदरं सुबलस्वसा ॥
कटिं योगान्विता पातु पादौ सौभद्रिका तथा ।
नखान् चन्द्रमुखी पातु गुल्फौ गोपालवल्लभा ॥
नखं विधुमुखी पातु गोपी पादतलं तथा ॥
शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ।
जानुदेशं जया पातु हरिणी पातु सर्व्वत: ॥
वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ।
पूर्व्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम् ॥
उत्तरां हरिता पातु दक्षिणां वृषभानुजा ।
चन्द्रावली नैशमेव दिवा क्ष्वेडितमेखला ॥
सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ।
रौद्री प्रात: पातु मां हि गोपिनी रजनीक्षये ॥
हेतुदा सङ्गवे पातु केतमाला च दिवार्द्धके ।
शेषापराह्णसमये शमिता सर्व्वसन्धिषु ॥
योगिनी भोगसमये रतौ रतिप्रदा सदा ।
कामेशी कौतुके नित्यं योगे रत्नावली मम ॥
सर्व्वदा सर्व्वकार्य्येषु राधिका कृष्णमानसा ।
इत्येतत् कथितं देवि कवचं परमाद्भुतम् ॥
सर्व्वरक्षाकरं नाम महारक्षाकरं परम् ।
सर्व्वार्थसिद्धिस्तस्य स्यात् यद्यन्मनसि वर्त्तते ॥
राजद्वारे सभायाञ्च संग्रामे शत्रुसङ्कटे ।
प्राणार्थनाशसमये य: पठेत् प्रयतो नर: ।
तस्य सिद्धिर्भवेद्देवि न भयं विद्यते क्वचित् ॥
आराधिता राधिका च तेन सत्यं न संशय: ।
गङ्गास्नानात् हरेर्नामग्रहणात् यत् फलं लभेत् ॥
तत् फलं तस्य भवति य: पठेत् प्रयत: शुचि: ।
हरिद्रारोचना चन्द्रमण्डितं हरिचन्दनम् ॥
कृत्वा लिखित्वा भूर्ज्जे च धारयेत् मस्तके भुजे ।
कण्ठे वा देवदेवेशि स हरिर्नात्र संशय: ॥
कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरि: ।
संहारञ्चाहं नियतं करोमि कुरुते तथा ॥
वैष्णवाय च शुद्धाय विरागगुणशालिने ।
दद्यात् कवचमव्यग्रमन्यथा नाशमाप्नुयात् ॥"
इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे पञ्चरात्रे

सर्व्वरक्षाकवचं समाप्तम् ॥ * ॥ (राधातन्त्रोक्त-
राधिकाकवचं यथा,—

देव्युवाच ।

"देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
राधिकाकवचं देव कथयस्व दयानिधे ॥

ईश्वर उवाच ।

शृणु देवि वरारोहे कवचं जनमोहनम् ।
गोपितं सर्व्वतन्त्रेषु इदानीं प्रकटीकृतम् ॥
या राधा त्रिपुरा दूती उपविद्या सदा तु सा ।
उपविद्याक्रमाद्देवि कवचं शृणु पार्व्वति ॥
जपपूजाविधानस्य फलं सर्व्वस्वसिद्धिदम् ।
यत्र तत्र न वक्तव्यं कवचं गोपितं महत् ।
भक्तिहीनाय देवेशि द्विजनिन्दापराय च ।
न शूद्रयाजिविप्राय वक्तव्यं परमेश्वरि ॥
शिष्याय भक्तियुक्ताय शक्तिदीक्षारताय च ।
वैष्णवाय विशेषेण गुरुभक्तिपराय च ॥
वक्तव्यं परमेशानि मम वाक्यं न चान्यथा ॥
अस्य श्रीराधात्रैलोक्यमङ्गलकवचस्य गोपिका
ऋषिरनुष्टुप्छन्द: श्रीराधिका देवता महा-
विद्यासाधनगोप्यर्थे विनियोग: ॥
ॐ पूर्व्वे च पातु सा देवी रुक्मिणी शुभदायिनी ।
ह्रीं पश्चिमे पातु सत्या सर्व्वकामप्रपूरणी ।
याम्यां ह्रीं जाम्बवती पातु सर्व्वकामफलप्रदा ।
उत्तरे पातु भद्रा ह्रीं भद्रशक्तिसमन्विता ॥
ऊर्द्ध्वे पातु महादेवी क्लीं कृष्णप्रिया यशस्विनी ।
अधश्च पातु मां देवी ऐं पातालतलवासिनी ॥
अधरे राधिका पातु ऐं पातु हृदयं मम ।
नम: पातु च सर्व्वाङ्गं ईयुता च पुन: पुन: ।
सर्व्वत्र पातु मे देवी ईश्वरी भुवनेश्वरी ॥
ऐं ह्रीं राधिकायै ह्रीं ऐं शिर: पातु मां क्लीं
क्लीं राधिकायै क्लीं क्लीं दक्षबाहुं रक्षतु मम ।
ह्रीं ह्रीं राधिकायै ह्रीं ह्रीं वामाङ्गं रक्षतु
पद्मिनी पद्मगन्धिनी । ऐं ह्रीं राधिकायै ऐं
ऐं दक्षपादं रक्षतु मम । क्लीं क्लीं ऐं ऐं
राधिकायै ह्रीं ह्रीं ऐं ऐं क्लीं क्लीं ॐ
सर्व्वाङ्गं मम रक्षतु । क्लीं राधिकायै क्लीं
वामपादं रक्षतु सदा पद्मिनी । ह्रीं राधि-
कायै ह्रीं चक्षुर्युग्मं रक्षतु मम । ऐं राधि-
कायै ऐं कर्णयुग्मं सदा रक्षतु मम । ह्रीं
राधिकायै ह्रीं नासायुग्मं सदा रक्षतु मम ।
ॐ ह्रीं राधिकायै ॐ ह्रीं दन्तपंक्तिं सदा
पातु सरस्वती । ह्रीं भुवनेश्वरी ललाटं पातु
ह्रीं काली मे मुखमण्डलं सदा पातु । ह्रीं ह्रीं
ह्रीं महिषमर्द्दिन्यै ह्रीं ह्रीं महिषमर्द्दिनी
द्वारकावासिनी सहस्रारं रक्षतु सदा मम ।
ऐं ह्रीं ऐं मातङ्गी हृदयं सदा मम रक्षतु ।
ह्रीं ऐं ह्रीं उग्रतारा नाभिपद्मं सदा रक्षतु
मम । क्लीं ऐं क्लीं सुन्दरी क्लीं ऐं क्लीं
स्वाधिष्ठानं लिङ्गपद्मं रक्षतु मम । लं ऐं लं
षोडशी गुदमण्डलं रक्षतु मम । ऐं ऐं ऐं
कमला ऐं ऐं ऐं जठरं रक्षतु मम । दूं क्लीं
भैरवी दूर्गा: स्कन्धद्वयं रक्षतु मम । ह्रीं

धनपूर्वा श्रीं पातु रक्षतु मम। ऐं श्रीं ऐं श्रीकृष्णयं सदा पातु पृष्ठदेशं मम। ॐ महादेव: पातु सर्व्वाङ्गं मे ॐ नारायण: पातु सर्व्वाङ्गं सदा मम।
ॐ ॐ कृष्ण: पातु सदा गोपं रुक्मिणीनाथ:।
रुक्मिणी सत्यभामा च सेवा जाम्बवती तथा॥
लक्ष्मणा मित्रविन्दा च भद्रा नग्नजिता तथा।
एता: सर्व्वा युवतय: शोभनाढ्या: शुभोचिता:॥
रक्षेयुर्मां सन्तु दिक्षु सततं शुभदर्शना:।
ॐ नारायणश्च गोविन्द: शिर: पद्मदलेक्षण:॥
सर्व्वाङ्गं मे सदा रक्षेत् केशव: केशिहा हरि:।
इतीदं कवचं भद्रे त्रैलोक्यमङ्गलं शुभम्॥
पद्मिन्या: परमेशानि उपविद्याद्यमङ्गलम्।
य: पठेत् पाठयेद्वापि सततं भक्तितत्पर:॥
निराहारो जलत्यागी अयुतं वत्सरे सदा।
तदैव परमेशानि पद्मिनी वश्यतामियात्॥
एतत्ते कथितं देवि कवचं भुवि दुर्लभम्।
फलमूलजलं त्यक्त्वा पठेत् संवत्सरं यदि॥
पद्मिनी वश्यमायाति तदैव नगनन्दिनि।
अनेनैव विधानेन य: पठेत् कवचं परम्॥
विष्णुलोकमवाप्नोति नान्यथा वचनं मम।
संगोप्य पूजयेद्विद्यां महाविद्यां वरानने॥
प्रकटार्थमिदं देवि कवचं प्रपठेत् सदा।
महाविद्यां विना भद्रे य: पठेत् कवचं प्रिये।
तदैव सहसा भद्रे कुम्भीपाकं व्रजेत् प्रिये॥"
इति वासुदेवरहस्ये राधातन्त्रे एकत्रिंशत्पटल:॥) अथ राधास्तोत्रम्।
"स्तोत्रञ्च सामवेदोक्तं प्रपठेत् भक्तिपूर्व्वकम्।
राधा रासेश्वरी रम्या परमा च परात्मन:॥
रासोद्भवा कृष्णकान्ता कृष्णवक्ष:स्थलस्थिता।
कृष्णप्राणाधिदेवी च महाविष्णुप्रसूरपि॥
सर्व्वाद्या विष्णुमाया च सत्यासत्या सनातनी।
ब्रह्मस्वरूपा परमा निर्लिप्ता निर्गुणा परा॥
वृन्दावनेश्वरी विजया यमुनातटवासिनी।
गोलोकवासिनी गोपी गोपीशा गोपमातृका॥
सानन्दा परमानन्दा नन्दनन्दनकामिनी।
वृषभानुसुता शान्ता कान्ता पूर्णतमस्य च॥
काम्या कलावतीकन्या तीर्थपूता सतीनिभा।
सप्तत्रिंशच्च नामानि वेदोक्तानि शुभानि च॥
सारभूतानि पुण्यानि सर्व्वनामसु नारद:।
य: पठेत् संयत: शुद्धो विष्णुभक्तो जितेन्द्रिय:॥
इह वै निश्चलां लक्ष्मीं लब्ध्वा याति हरे: पदम्।
हरिभक्तिं हरेर्दास्यं लभते नात्र संशय:॥
भक्तो लक्षजपेनैव स्तोत्रसिद्धिर्भवेत् ध्रुवम्।
स्तोत्रस्मरणमात्रेण जीवन्मुक्तो भवेन्नर:॥
पदे पदेऽश्वमेधस्य लभते निश्चितं फलम्।
कोटिजन्मार्ज्जितात् पापात् ब्रह्महत्याशतादपि।
स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशय:॥
वन्ध्या काकवन्ध्या मृतवन्ध्या प्रसूयते।
शृणोति वर्षमेकं या शुद्धा हविष्यान्नभोजनी॥
शृणोति मासमेकं य: सर्व्वाभीष्टं लभेन्नर:।
सामवेदे कुमारं तमित्याह कमलोद्भव:॥"
इति नारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रे [illegible] श्रीराधिकाकोषं समाप्तम्॥

राधाकान्त:, पुं, (राधाया: कान्त:।) श्रीकृष्ण:। यथा,—
"गोलोके द्विभुज: कृष्णो राधाकान्त: सनातन:।
गोपाङ्गनादिभिर्युक्तो द्विभुजो गोलोकमन्दिरे॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १० अध्याय:॥

राधातनय:, पुं, (राधाया: सूतपत्न्यास्तनय:। तथा पालितत्वात् तथात्वम्।) कर्ण:। इति हेमचन्द्रे मर्त्यकाण्डे राधासुतशब्ददर्शनात्॥

राधाभेदी, [न्] पुं, (राधां चक्रविशेषं भिनत्तीति। भिद्+णिनि:।) अर्ज्जुन:। इति भूरिप्रयोग:॥

राधावेधी, [न्] पुं, (राधां चक्रविशेषं विध्यतीति। विध्+णिनि:।) अर्ज्जुन:। यथा,
"राधावेधी किरीटी जिष्णु: श्वेतवाहनो नर:।
कपिध्वजो गुडाकेश: शुभ्रवाह: कपिध्वज:।
बीभत्सु: कर्णजित्पार्थ: गाण्डीवी सात्त्विको धनु:॥"
इति हेमचन्द्र:। ३। १०४॥

राधासुत:, पुं, (राधाया: सूतपत्न्या: सुत:।) कर्ण:। यथा,—
"वैदिको वायवीयो च कर्णश्चाधिपोऽङ्गराट्।
राधासुतोऽर्कतनय: कालपृष्ठन्तु तद्धनु:॥"
इति हेमचन्द्र:। ३। १०५॥
(यथा, महाभारते। ८। ८६। २।
"पश्य चैनं समायुक्तं रथं कर्णस्य भारत।
श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च॥")

राधेय:, पुं, (राधाया अपत्यमिति। राधा+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) कर्ण:। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। १। १३४। ११।
"छत्रमुत्सृज्य राधेयो युद्धं घोरमिवान्तरा॥")

राध्य:, त्रि, (राध्यते इति। रध्+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्।) कमनीय:। रमधातो: कर्म्मणि ण्यप्रत्ययेन निष्पन्न:॥

रामं, क्ली, (रम्यतेऽनेनेति। रम्+घञ्।) वास्तूकम्। कुष्ठम्। इति मेदिनी। मे, २६॥ तमालपत्रम्। इति राजनिर्घण्ट:॥ (कृष्णं तम:। यथा, ऋग्वेदे। १०। ३। ३।
"सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्
रुशद्भिर्वर्णैरभिराममस्थात्॥"
"रामं कृष्णवर्णं शार्व्वरं तम: अभ्यस्थात्सायं होमकाले अभिभूय तिष्ठति।" इति तद्भाष्ये सायण:॥)

राम:, त्रि, (रमते इति। रम्+ण:। रम्यतेऽनेनेति। रम्+घञ् वा।) मनोज्ञ:। (यथा, ऋतुसंहितायाम्। १८। ५।
"गाव: प्रभूतपयसो नयनाभिरामा
रामा रतैरविरतं रमयन्ति रामान्॥")
सित:। असित:। इति मेदिनी। मे, २७॥

राम:, पुं, (रमते इति। रम [illegible]
"[illegible]" [illegible]
इति [illegible]) वसुदेव[illegible]।
बलदेव:। [illegible]
[illegible] [illegible]
[illegible] (यथा [illegible]
[illegible] निजाधि[illegible]
मर्त्यं भगवान् [illegible]
[illegible]
"प्रथमं [illegible]
[illegible] बौधुमेर
[illegible]: यदा राम: [illegible]
[illegible] [illegible]
स तं [illegible]
[illegible] पद पश्यारं [illegible]
स तेन [illegible]
[illegible]
[illegible]
राम राम महाभाग [illegible]
[illegible] [illegible] च [illegible]
[illegible]
राम उवाच।
यदि मे [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
तथा समीपे [illegible]
[illegible] पुण्यं [illegible]
[illegible]
राघव:। श्रीरामचन्द्र: [illegible]
अयोध्याधिपतिदशरथराजस्य [illegible]
[illegible] रावणादिवधार्थमवतीर्णो [illegible]
[illegible] विष्णोरंश: [illegible]
पुत्रत्वेन [illegible]
(यथा, भागवते। १। ११। १६।
"निशम्य प्रेममायान्तं [illegible]
अक्रूरश्चोपसेनश्च रामश्चाद्भुतविक्रम:॥")
अथो रामा यथा,—
"अघोरघोर [illegible]
भार्गवो राघवो गोपश्चयो राम: [illegible]"
इति [illegible]
वरुण:। घोटक:। पशुभेद:। [illegible]
मे, २६॥ (रम्+भावे घञ्। [illegible]
भागवते। ७। ६। १३।
"सर्व्वत्र तापत्रयदु:खिताक्ष
निर्विद्यते न स्वकुटुम्बराम:॥"
"स्वकुटुम्बे रामो रतिर्यस्य।" इति
श्रीधरस्वामी॥) रामचन्द्रस्य [illegible]
"रामचन्द्रो विश्वजयी [illegible]
विश्वामित्रेश्वरो यो हि देव राम: [illegible]"

[illegible]

ँ चतुर्दशे वर्षे प्रथम्यां सप्तदापदः ।
अरोध्यामं प्राप्य ववन्दे नियतो मुनिम् ॥'
इति चत्वात्वात् । तत्र न च चतुर्दशवर्षाणामितिरिति भगवतः प्रतिज्ञादानिः । पूर्णचतुर्दशे वर्षे रघुश्रेष्ठगमनस्य । तद्वावरं वध्यार्थं लङ्कायामागमनस्याप्रलाभाव । चैत्रशुक्लपञ्चम्यां नन्दिग्रामगमनेऽपि पञ्चदिनन्यूनत्वेवातिप्रसिद्धपञ्चैव । तदुत्तरदिनेऽयदिने एकायोध्यप्रवेशस्य लाभात् । अमान्तमानेन चैत्रशुक्लपञ्चम्यां नन्दिग्रामगमनेऽपि चतुर्दशवर्षातोहदिनाधिक्येन चतुर्दशवर्षसमाप्तिरिनेऽयोध्यागमे "मया प्राप्ता देवा" इति भरतप्रतिज्ञाहानिः । सा च प्रतिज्ञा चित्रकूटे रामसन्निधावयोध्याकाण्डोक्ता बहुम् । एतेन चैत्रकृष्णनवमि युद्धारम्भपाल्गुनप्रतिपदि रावणसंहार

[illegible]

'एकं पश्यति सर्वं हि सागरप्लवगाधिपः ।
दशाननप्रिया भार्याः सन्ति च दारागताः ।
अद्योऽन्तरे नवोनानि च योषितः सन्ति ।
सर्वं चयावधनिरं दृष्ट्वा प्रतिकूलम् ॥
रावणस्य दृष्टं सत्यं गतो दीप्तद्वारम् ।
सर्वं चैव महाभागः सर्वं प्रणाशधौतिनः ।
चिन्तां युधिष्ठिरो राजा चकाराऽकृतविक्रमः ॥'
इति । एतद्वैश्यापरकादिवसद्यदास्ताखण्डे स्येव वधेतव्या । चक्षित्वासेतदतः सौचितेव । सर्वत्राशेषमानतस्य प्रत्यावधो भाद्रस्य तिथौ चतुर्थ्यासत्यापूर्वेण । मानो वा नाम स्मृतेन । एतद्यासाल्वोनेन चतुर्दशेऽयान्वितमर्हे । पूर्णिमाप्रमाणेन कार्तिकमर्हे चतुर्थी नक्षत्रातिथिसम्पातिः । चाहता चैत्रशुक्लनवम्यामासाद्य भक्तयाद्य पक्षी चतुर्दशवर्षमासहिम वयसामुपगच्छति । तदनन्तरं तु चतुर्दशदिनातुवनम् मासाना चतुर्दशवर्षेषु हनुमपदस्त इव वा । मनात् दारदशमामुत्ता । वर्षोदधिं विचिचतोरिति चरदक्षालोक्षाकाण्डोक्त माण्डुलाहन्दो रावदलतरिनादन्दारः । ततश्चतुर्दशि विचितोरिति रामस्य लङ्कापर्यावसानम् । यस्तेन दशमी मासो हि तु चेयो प्रकृतेनि धौतोषितः पावकमानेन श्वरह्यदिवसः मारातन्यया । तच पूर्वचन्द्रदर्शने चैति रामोक्ता पौषशुक्लचतुर्दश्यां पूर्णिमायां वा चित्रकूटप्रस्थाने रामस्य । किन्तु हनुमतो लङ्काप्रवेशोत्तरं सीतादर्शनकाले निमयमाचेन च मौसरविहारधृत्वते नैकपञ्चदशविरितिरिति वाक्येन दौ मासौ रचितव्यौ मे पौषपत्ते मया हत इति रावणवाक्येन मार्गशुक्लचतुर्दश्युत्तरं हनुमतो लङ्काप्रवेशो दिनद्वयान्तरे लब्धत इति निरूपितं सुन्दरकाण्डे । ततो मार्गकृष्णाद्वन्द्वा रावणप्रस्थानस्यात्मोक्तत्वेन पौषपूर्णिमावस्थेयोचितं तत्प्रामिदिनस्य । ततो दशपञ्चदिनानि सेनानिवेशदूतप्रेषणादिना गतानि । ततो युद्धारम्भश्चात्र तदारभ्य माघश्रावणीभयामान्तं लङ्कापुराद् बहिः सैन्ययोः सङ्कुलं युद्धम् । ततो बहुराक्षसवधेन भीता राक्षसा लङ्कां प्रविष्टा इति तद्दिनेऽवहारः । तदुत्तरप्रतिपदि रात्राविन्द्रजिन्नुष्ठतमृत्युबन्ध

[illegible]

नवाम् ।
'अस्तागतं ततश्चैव ततस्तदर्शनोत् ।
तमाविनिधाय निशायां विजहार सबान्धवः ॥'
इति रात्रावेव युद्धम् । चतुर्दशी शारदिनसम्भावनात्र निश्चितमिन्द्रजितो मृतो ग्नन्यप्रतिकालीनं सुनिश्चितमेव नानो चतुर्दश्यां दूष्टा रामसेनया दृष्टस्यार्थं चक्षुर्यनाशा अवगम्यते । किञ्च । गतिविधुराशिदिनं सिन्धुसदृशं सदृशवर्णनामात्रेणैव सुबोधितनं वर्णोदामनुदा रावणसैन्योत्तरं निश्चयभावात्मकत्वमात्र इतुष्यत् तथा नदोत्तमोक्ता च निदर्शनोत्तरं सन्धिः प्रतियानस्य तदन्तरवर्षावसानपकम्प षोडश्यामारात्री प्रतिपादनपदोक्ता दशमादशमानामस्य दर्शीता च महिरोपात् । यथा माह ।
'ततो दृष्टं महायुद्धं सङ्कुलं कपिरक्षसाम् ।
सध्याह्ने प्रथमं युद्धं मारम्भं प्रतिपदभूत् ॥'
प्रतिपदि युद्धप्रतिपदोऽपर्दः । उत्तयुद्धेः ।
'ततो निशि मलामद्य मायावी प्रकलिद् यची ।
ववन्ध नागपाशैस्तौ राघवौ च हरिप्रभान् ॥'
ततः चिरकालगतुल्ययुद्धोत्तरम् । अन्यथा मस्तां निष्ठोभिव यदेत् । यथे द्वितीयेऽहि यदामितिचोक्ता दारदे समभोति रामायणोक्ता च भाद्रश्रावणोभयमासोत्तरप्रतिपदतद्दिने बोध्यम् ।
'पैनतेयस्तदाभ्येत्य तानि चासाविमोचयत् ।
द्वितीयेऽहनि धूम्राक्षं हनुमानिजघान वै ॥
तृतीयेऽहृत्यकंपनं मद्गाविचछिद चाङ्गदः ।
जघान हनुमान् भूयश्चतुर्थेऽकम्पनम् ।
प्रहस्तं पञ्चमीतिथ्यां नीलश्चिच्छेदमहति ।
रावणः परिभूतोऽभूत् षष्ठ्यां रामेण धन्विना ॥
अथ सप्तम्यां लङ्केश्वरः स्थितः कुम्भकर्णं महोदरम् ।
धैसहहरधातानाश्चधावनाद्येरबोधयन
जघान तं कुम्भकर्णं रामः ७

इदं बोधनं दिनद्वयेन । तं बोधितं कुम्भकर्णम् ।
सप्तमवासरे बोधनोत्तरं सप्तमवासरे इत्यर्थः ।
यत्तु बोधनं षष्ठ्यां रात्रौ सप्तम्याञ्चैतद्वध इति
तन्न । तदुत्थापने उक्तस्यातिप्रयासस्य रात्रि-
मात्रेणासम्भवात् । रावणमन्दिरगमनकाले
सूर्य्यप्रभया रावणमन्दिरस्यातिभास्वरत्ववर्ण-
नेन मल्लादिना सप्तम्यां युद्धासम्भवात् । इन्द्र-
जितो दिनत्रयेण वधोऽस्य यामषट्केनेत्यस्या-
सङ्गतत्वाच्च । एवञ्च भाद्रपूर्णिमायामेतद्वधः ।
'जघान लक्ष्मणोऽन्येद्युरतिकायं रणाङ्गणम् ।
बबन्धान्येद्युरिन्द्रारिर्ब्रह्मास्त्रेण उभौ कपीन् ॥
हनूमता समानीतो महौषधमहीधरः ।
तस्यानिलस्पर्शवशात् सर्व्वे हता समुत्थिताः ॥
अन्येद्युः कपिराट् कुम्भं निकुम्भं वायुजोऽवधीत् ।
तस्यां निशि रघुश्रेष्ठो जघान मकरेक्षणम् ।
मायासीतावधञ्चक्रे शक्रजिन्नगरर्द्धनि ।
तेन खिन्नोऽभवद्रामः आश्वस्तो लक्ष्मणेन सः ।
त्रयोदशाहे सौमित्रिस्त्रिदिनं योधयन् बली ॥
जघान शक्रजेतारं रामध्यानेन हेतुना ॥'
अन्येद्युः अन्येषु दिवसेषु । अत्रातिकायग्रहणं
त्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वो-
पलक्षणम् । लक्ष्मणग्रहणमङ्गदहनूमतोरप्युप-
लक्षणम् । 'एवं षड्भिर्दिनैः षण्णां वधः ।
पूर्व्वं क्रमेणैव तद्वधोक्तेः । अन्येद्युः सप्तम्याम् ।
प्रत्यागमनमष्टम्याम् । अन्येद्युर्नवम्याम् । तस्यां
निशि नवमीरात्रौ तदन्ते मायासीतावधः ।
ततो दशमीचतुर्थयाममारभ्य त्रयोदशीचतुर्थ-
यामपर्य्यन्तमिन्द्रजिद्वधः ।
'ततोऽश्वयुक्शुक्लचतुर्दश्यां रघूद्वह ।
दर्शेऽथ निर्ययौ राजा योद्धुं रामेण संयुगे ॥
चतुरङ्गबलैः सार्द्धं मन्त्रिभिर्दशकन्धरः ।
छत्रचामरसंयुक्तः सर्व्वाभरणभूषितः ॥
महारथगतो द्वाराद्दक्षिणान्निर्ययौ बहिः ।
आगतो रणधी राजा ब्रह्मघ्नो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः ।
तत्र युद्धं समभवद्वानराणाञ्च रक्षसाम् ॥
रामरावणयोश्चैव तथा सौमित्रिणा सह ॥
शक्तिक्षेपं संक्रुद्धः सोऽनुजं प्रति रावणः ।
वक्षसा धारयामास सौमित्रिस्तां वियद्गताम् ॥
तया स बाध्यमानः सन् पपात धरणीतले ॥
हनूमता जीवितोऽभूदोषध्यानयनात् पुनः ।
ततः क्रुद्धो महातेजा राघवो राक्षसान्तकः ॥
जघान राक्षसान् सर्व्वान् शरैः कालान्तको-
पमैः ।
भयात् पलायते रणे लङ्कां प्रति निशाचरः ॥
अमहाममयं यज्ञान्निर्व्विदान् समहं विभुः ।
निकुम्भिलां ततः प्राप्य होमञ्चक्रे जिगीषया ॥
ध्वंसितं वानरैश्चक्रेऽभिचारात्मकं रिपोः ।
पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम् ॥
दिनं सन्दधावाद्य राघवैर्निर्ययौ बहिः ॥'
इदं निर्गमनमाश्विनशुक्लप्रतिपदि ।
'ततः प्रवृत्तो दिव्यं रणं हर्षसंयुतम् ।
राघवाय स्वसूतेन प्रेषयामास भक्तिमान् ।
तन्तु मातलिनानीतमारुह्य रथसत्तमम् ।
स्तूयमानः सुरगणैर्युयुधे तेन रक्षसा ।
ततो युद्धमभूद्घोरं रामरावणयोर्महत् ।
सप्ताह्निकमहोरात्रं शस्त्रास्त्रैरतिभीषणैरिति ।'
ततो मातलिरथागमनदिनोत्तरम् । एवञ्च
नवम्यां तद्वधः । तदुक्तं कालिकापुराणे ।
'रामस्यानुग्रहार्थं वै रावणस्य वधाय च ।
रात्रावेव महादेवी ब्रह्मणा बोधिता पुरा ॥
ततस्तु त्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते ।
जगाम नगरीं लङ्कां यत्रासीद्राघवः पुरा ॥'
आगत इति शेषः । इदञ्चागमनं रामस्य
तदेव मातलिरथागमनम् ।
'तत्र गत्वा महादेवी तदा तौ रामरावणौ ।
युद्धे नियोजयामास स्वयमन्तर्हितात्मिका ॥
रावणानां वानराणां जगुध्वा सा मांसशोणि-
तम् ।
रामरावणयोर्युद्धं सप्ताहं सा अवीवृधत् ॥
अतीते सप्तमे रात्रे नवम्यां रावणं ततः ।
रामेण घातयामास महामाया जगन्मयी ॥
यावत्तयोः स्वयं देवी युद्धकेलिमुदैक्षत ।
तावत्तु अष्टरात्राणि सर्व्वैर्देवैः सुपूजिता ॥
निहते रावणे वीरे नवम्यां सकलैः सुरैः ।
विशेषपूजा दुर्गायाश्चक्रे लोकपितामहः ॥'
सकलैः सुरैरित्यस्य सहेति शेषः ।
'रामरावणयोस्तु युद्धपार्श्वेन्य भीतिदम् ।
तृतीयायान्तु लङ्कायाः पूर्व्वोत्तरदिशि स्थितम् ।
स्वातिनक्षत्रयुक्तायां भीतं सुरबलं महत् ।
शान्त्यर्थं वारयामास देवेन्द्रो वचनाद्धरेः ॥'
शान्त्यर्थं भयशान्त्यर्थम् ।
'ततस्तु श्रवणे नाथ दशम्यां चण्डिकां शुभाम् ।
विसृज्य चक्रे शान्त्यर्थं बलनीराजनं हरिः ॥'
रिपुजनितभयशान्त्यर्थमित्यर्थः ।
'नीराजितबलः शक्रस्तत्र रामं सलक्ष्मणम् ।
सभाज्य प्रययौ स्वर्गं सह देवैः शचीपतिः ॥
इति वृत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे ।
पुरा कल्पे यथा वृत्तं प्रतिकल्पं तथैव तु ।
प्रवर्त्तते स्वयं देवी देवानां नाशनाय वै ।'
स्वायम्भुवमन्वन्तरकल्पे पुरा कल्पे इत्यर्थः ।
प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः । जगद्भवसामा-
न्येन सर्व्वापि कल्पव्यवहारात् ।
'प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः ।
तथैव जायते युद्धं तथैव त्रिदशागमः ॥
एवं रामसहस्राणि रावणानां तथैव च ।
भवितव्यानि भूतानि तेषु देवी प्रवर्त्तते ।
तां पूजयन्ति सुराः सर्व्वे बलं नीराजयन्ति च ।
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥
बलनीराजनं राजा कुर्य्याद् बलविवृद्धये ॥' इति ।
इयञ्च ब्रह्मबोधिता महादेवी अपौ प्रविष्टा
सीतैव भगवच्छक्तिरूपेति प्रतिभाति । अतएव
ब्रह्मवैवर्त्ते प्रथमे प्रतिभागे । प्रतिकल्पं विष्णो-
र्घटितं कोऽदसमिति नारदमन्त्रे लक्ष्मणायम् ।
'स एव भगवान् प्रतिमन्वन्तरं मुने ।
वधाय दुष्टदैत्यानां भूमिभारहृतां मुने ।
कलिद्वापरयोः सन्धौ भविष्यति न संशयः
प्रतिकल्पं स्वेच्छयैव भविष्यति न संशयः ।'
षट्सप्ततौ रामोऽपि भविता ब्रह्मवो
इति ब्रह्मवैवर्त्ते प्रथमविभागस्थे राम
लक्ष्मणाख्ये । दिने इति जातावेकवचनं
दिनेष्वित्यर्थः । पूर्व्वं प्रतिमन्वन्तरमि-
त्युक्तं प्रतिचतुर्युगं रामावतार इति तु न यु-
क्तं चतुर्व्विंशतितमचतुर्युगे रामावतार
विंशतितमचतुर्युगे लक्ष्मणावतारस्य हरिवंशा-
ख्याने च प्रसिद्धत्वादिति दिक् । वर्ष-
रामायणमिति प्रसिद्धमस्त्येव ।
'रामः पञ्चदशे वर्षे षड्वर्षामपि मैथिलीम् ।
उपयेमे स्वयोध्यायां द्वादशाब्दानुवास च ।
सप्तविंशतिमे वर्षे वनवासमकल्पयत् ।
अष्टादश तु वर्षाणि सीतायास्तु तदाभव-
न्निरात्रमुदकाहारश्चतुर्थेऽह्नि फलाहरः ।
पञ्चमे चित्रकूटे तु रामो वासमकारयत् ।
अथ त्रयोदशे वर्षे पञ्चवट्यां महामनाः ।
रामो विरूपयामास घोरां शूर्पणखां ततः ।
ततो माघे सिताष्टम्यां मुहूर्त्ते वृन्दसंज्ञके ।
राघवाभ्यां विना सीतां जहार दशकन्धरः
माघे शुक्लचतुर्दश्यामिति पाठान्तरम् ।
'मार्गशुक्लदशम्यान्तु वसन्तौ राघवाज्ञया ।
सम्पातिर्दशमे मासे आचख्यौ वानरेषु ता
एकादश्यां महेन्द्राद्रौ पुप्लुवे शतयोजनम्
तत्रा निशीथे सीताया दर्शनं हि हनूमतः ।
द्वादश्यां शिंशपावृक्षे हनूमान् पर्य्यवस्थित-
स्तस्यां निशायां सीतायां विश्वासाकथनं
कृतः
अक्षादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत ।
वधो ह्यक्षकुमारस्य वनविध्वंसनं तथा ।
ब्रह्मास्त्रेण चतुर्दश्यां बद्धः शक्रजिता कपिः
वह्निना पुच्छयुक्तेन लङ्काया दहनं तथा ।
पौर्णमास्यां महेन्द्राद्रौ पुनरागमनं कपेः ।
मार्गासितप्रतिपदः पञ्चभिः पथि वासरैः ।
पुनरागम्य षष्ठेऽह्नि ध्वस्तं मधुवनञ्च तैः ।
सप्तम्यां प्रत्यभिज्ञानदानं शुद्धिनिवेदनम् ।
अष्टम्युत्तरफल्गुन्यां मुहूर्त्ते विजयाभिधे ।
मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य च ।
वासरे सप्तमेऽम्भोधौ स्कन्धावारनिवेशनम् ।
पौषशुक्लप्रतिपदस्तृतीया यावदम्बुधेः ।
उपस्थानं ससैन्यस्य राघवस्य बभूव ह ।
विभीषणश्चतुर्थ्यां वै रामेण सह सङ्गतः ।
समुद्रतरणार्थाय पञ्चम्यां मन्त्र उद्यमः ।
प्रायोपवेशनञ्चक्रे रामो दिनचतुष्टयम् ।
समुद्रवरलाभश्च सेतूपायप्रकीर्त्तनम् ।
सेतोर्दशम्यामारम्भस्त्रयोदश्यां समापनम् ।
चतुर्दश्यां सुवेलाद्रौ रामः सैन्यं न्यवेशयत् ।
पौर्णमास्यां द्वितीयायां त्रिदिनैः सैन्यतार
तृतीयायां दशम्यन्तं ततो युद्धनिवेशने ।

सैन्यप्राप्तिरेकादशी दिने।
सितायां द्वादश्यां सैन्यसंख्या कृता तु वै॥
कपीनान्तु सारासारोपवर्णनम्।
यावलङ्कायां दिवसैस्त्रिभिः॥
सैन्यसंस्थानं रणायोत्साहनं तथा।
पौषं माघशुक्लादिवासरे॥
द्वितीयादिदिनैः सप्तभिरेव तु।
वानराणाञ्च युद्धमासीत् सुदारुणम्॥
रात्राविन्द्रजिता रणे।
बभूव ह॥
दशम्यां गरुडोऽभ्यगात्।
कथितो दशम्यादिदिनद्वयम्॥
धूम्राक्षस्य वधः कृतः।
तेनैव निहतोऽकम्पनो रणे॥
यावत् कृष्णादिवासरम्।
नेन प्रहस्तस्य नीलेन विहितोऽवधः॥
तुमुले युद्धे रावणो द्रावितो रणात्॥
यावद्रावणेन प्रवोधितः।
समुत्तस्थौ तावद्युद्धचतुर्द्दिनम्॥
कर्णो दिनैः षड्भिर्नवम्यास्तु चतुर्द्दशीम्।
निहतो युद्धे बहुवानरभक्षकः॥
वास्यादिने शोकाद्धाहाकारो बभूव ह।
गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्ततः॥
न्तकप्रभृतयो निहताः पञ्च राक्षसाः।
म्याः सप्तमी यावदतिकायवधस्त्र्यहात्॥
म्या द्वादशी यावन्निहतो दिनपञ्चकात्।
म्भकुम्भावूर्द्धन्तु मकराक्षश्चतुर्द्दिनैः॥
गुनस्य द्वितीयायां कृष्णे प्रकाशिता
जितम्।
यायास्तु सप्तम्यां हरयः पञ्चवासरात्॥
ध्यानयने यत्रास्तद्राघीदवहारकः।
त्रयोदशी यावद्दिनैः षड्भिस्तु प्रकवित्॥
येन हतो युद्धे विश्रितोऽभिचरन् क्रमात्।
र्द्दश्यां दशग्रीवरणदीक्षाविधिः क्रमात्॥
मावास्यां ययौ वीरो युद्धाय दशकन्धरः।
शुक्लप्रतिपदः पञ्चमी दिनपञ्चकैः॥
णस्य प्रधानानां युध्यतामभवत् क्षयः।
षष्ठ्यष्टमी यावन्महापार्श्वादिमारणम्॥
शुक्लनवम्यान्तु सौमित्रेः शक्तिभेदनम्॥
गादिराञ्जनेयेन पश्चाणार्थसुपाहृतः॥
म्यामभवरोऽभूद्रात्रौ युद्धं नृरक्षसोः।
दश्यान्तु रामाय रथो मातलिसारथिः॥
दशदिने रामो द्वैरथे रावणं वधीत्।
दश्याः शुक्लपक्षस्य यावत् कृष्णचतुर्द्दशीम्॥
षशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्द्दशीम्।
शाशीतिदिनं युद्धं मध्ये पञ्चदशाहकम्॥
वधारः संग्रामस्तिष्ठप्रतिदिनान्यभूत्।
कारो रावणादीनाममावास्यादिनेऽभवत्॥
मासादितिथौ रामः सुवेलं पुनरागतः।
भिषिक्तो द्वितीयायां लङ्काराज्ये विभीषणः॥
ताशुद्धिस्तृतीयायां देवेभ्यो वरलम्भनम्।
वैशाखस्य चतुर्थ्यान्तु रामः पुष्पकमास्थितः॥
पूर्णे चतुर्द्दशे वर्षे पञ्चम्यां माधवस्य तु।
भरद्वाजाश्रमं रामः ससीतः पुनरागमत्॥
नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागमः।
सप्तम्यामभिषिक्तोऽसावयोध्यायां रघूत्तमः॥
जानकी रामसहिता रावणस्य निवेशने।
मनुमासान् स्थिता पञ्चदशवासरसंयुतेति॥'
यत्तु सर्व्वांशे अनिश्चितप्रामाण्यम्। कालिका-पुराणादिविरोधात्। इदं कल्पान्तरविषयमिति न युक्तम्। तद्विरोधादेव। तस्मात् क्रियाविरोधे पुराणेषु उपसंहार एव न्याय्यः। शाखान्तरोक्ताङ्गोपसंहारवत्। यथा कुम्भकर्णवधोऽत्र रामेणोक्तो भारते लक्ष्मणेन तादृशे विषये न तु कल्पभेदेन व्यवस्था। जन्मविषये एव तु हरिवंशोक्ता सेति बोध्यम्।" इति श्रीरामायण-टीकके लङ्काकाण्डे ११० सर्गः॥) तस्य परि-पूर्णतमत्वं यथा,—

"सर्व्वे चांशकलाः पुंसः कृष्णस्तु भगवान्
स्वयम्।
परिपूर्णतमो रामो ब्रह्मशापात् स्वविस्मृतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११६ अध्यायः॥

अथ श्रीराममन्त्राः।

"अनन्तोऽग्न्यासनः सेन्दुर्बीजं रामाय हृन्मनुः।
षडक्षरोऽयमादिष्टो भक्तानां कामदो मनुः॥"*

तस्य तारकब्रह्ममन्त्रो यथा,—

"सर्व्वेषां राममन्त्राणां मन्त्रराजः षडक्षरः।
तारकब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते॥"

तन्मन्त्रश्च रां रामाय स्वाहा। इति रामा-र्चनचन्द्रिकायाम् ४ पटलः॥ अस्य पूजा-प्रयोगः। प्रातःकृत्यादि वैष्णवोक्तपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि ॐ ब्रह्मणे ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि श्रीरामाय देवतायै नमः। ततः कराङ्गन्यासौ। रां अङ्गुष्ठाभ्यां नमः। रीं तर्ज्जनीभ्यां स्वाहा। रूं मध्यमाभ्यां वषट्। रैं अनामिकाभ्यां हुम्। रौं कनिष्ठाभ्यां वौषट्। रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ततो मन्त्रन्यासः। ब्रह्मरन्ध्रे रां नमः। भ्रूमध्ये रा नमः। हृदि मा नमः। नाभौ य नमः। लिङ्गे न नमः। पादयोर्मं नमः। ततो मूर्त्ति-पञ्जरादिविधिं विधाय देवं ध्यायेत्।

"कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्या-
सिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं
भजे॥"

एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय वैष्ण-वोक्तपीठशक्तीः पीठमन्त्रञ्च संपूज्य पुनर्ध्यात्वा वाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाया-वरणपूजामारभेत्। यथा देवदामपार्श्वे श्रीं सीतायै नमः। अग्रे ॐ शार्ङ्गाय नमः। दक्षिणवामपार्श्वयोः ॐ शरेभ्यो नमः। ॐ चापाय नमः तद्बहिः केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च रां हृदयाय नमः। इत्यादिना षडङ्गानि पूजयेत्। ततो दलेषु पूर्व्वादिदिक्षु ॐ हनुमते नमः। ॐ सुग्रीवाय नमः। ॐ भरताय नमः। ॐ विभीषणाय नमः। ॐ लक्ष्मणाय नमः। ॐ अङ्गदाय नमः। ॐ शत्रु-घ्नाय नमः। ॐ जाम्बवते नमः। दलाग्रेषु ॐ धृष्टाय नमः। ॐ जयन्ताय नमः। ॐ विजयाय नमः। ॐ सुराष्ट्राय नमः। ॐ राष्ट्र-वर्द्धनाय नमः। ॐ अकोपाय नमः। ॐ धर्म्म-पालाय नमः। ॐ सुमन्त्राय नमः। तद्बहि-रिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि-विसर्ज्जनान्तं कर्म्म समापयेत्॥ *॥ अस्य पुरश्चरणं षड्लक्षजपः। तथा च।

"ऋतुलक्षं जपेन्मन्त्रं दशांशं कमलैः शुभैः।
जुहुयादर्च्चिते वह्नौ ब्राह्मणान् भोजयेत्ततः॥"

अयं मन्त्रः षड्विधः। तथा च।

"स्वकामशक्तिवाक्लक्ष्मीतारादिः पञ्चवर्णकः।
षडक्षरः षड्विधः स्यात् चतुर्व्वर्गफलप्रदः॥
ब्रह्मा सम्मोहनः शक्तिर्दक्षिणामूर्त्तिरुच्यते।
अगस्त्यः श्रीशिवः प्रोक्तो मुनयोऽत्र क्रमादिमे॥
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः।
छन्दो गायत्रीसंज्ञञ्च श्रीरामश्चैव देवता॥
ध्यानपूजादिकं सर्व्वं पूर्व्ववच्च समाचरेत्॥"

तथा।

"जानकीवल्लभं ङेऽन्तं वह्नेर्जाया हुमादिकम्।
दशाक्षरोऽयं मन्त्रः स्याद्वशिष्ठस्तु ऋषिर्विराट्॥
छन्दस्तु देवता रामः सीतापाणिपरिग्रहः।
आद्यं बीजं द्विठः शक्तिः कामेनाङ्गक्रिया मता॥
शिरोललाटभ्रूमध्यतालुकर्णेषु हृद्यपि।
नाभ्यूरुजानुपादेषु दशवर्णान् न्यसेन्मनोः॥"*॥

ततो ध्यानम्।

"अयोध्यानगरे चित्ररत्नसौवर्णमण्डपे।
मन्दारपुष्पैरावद्धविताने तोरणान्विते॥
सिंहासनसमारूढं पुष्पकोपरि राघवम्।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः॥
संस्तूयमानं मुनिभिर्गन्धर्व्वैः परिशोभितम्।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम्॥
श्यामं प्रसन्नवदनं सर्व्वाभरणभूषितम्।
ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः॥"

अन्यत् सर्व्वं पूर्व्ववत्॥ *॥

"वह्निर्नारायणौ नाड्यौ जठरः केवल एव च।
द्व्यक्षरो मन्त्रराजोऽयं सर्व्वाभीष्टफलप्रदः॥
श्रीमाया मन्मथैकैकबीजाद्यन्तगतो मनुः।
चतुर्व्वर्णः स एव स्यात् षड्वर्णो वाञ्छितप्रदः॥
स्वाहान्तो हुं पदान्तो वा नमोऽन्तो वा

तथा।

"तारमायारमा[illegible]ङ्गजवाक्
अष्टवर्णो मन्त्र[illegible] स्यात्

रामश्चन्द्रभद्रान्तो मन्त्रोऽयं चतुरक्षरः ।
रामाय हृन्मनुः प्रोक्तो मन्त्रः पञ्चाक्षरः परः ।
पञ्चाशन्मातृकावर्णैः प्रत्येकपूर्व्वको मनुः ।
लक्ष्मीवाक्काममथादिश्च ताराद्यः स्यादनेकधा ।
तेन अं राम । आं राम । इत्यादि त्र्यक्षरः । तथा लक्ष्मीवाक्काममथादौ नामन्यतमदानेऽपि त्र्यक्षरः । तेन श्रीं राम । ऐं राम । क्लीं राम इति ।
"वह्निस्थं शयनं विष्णोरर्द्धचन्द्रविभूषितम् ।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ।
ब्रह्मा मुनिः स्याद्गायत्री छन्दो रामस्तु देवता ।"*।
एकाक्षरे तु द्वादशलक्षजपः पुरश्चरणम् । तथा च । भानुलक्षं जपेन्मन्त्रं इति वचनात् अन्येषां षड्लक्षजप इति विशेषः । ध्यानपूजादिकं षडक्षरवत् ।*। अथ श्रीरामचन्द्रप्रयोगः ।
"जातीप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
जातीप्रसूनैर्जुहुयाच्चन्दनाम्भःसमुक्षितैः ।
राजवश्याय कमलैर्धनधान्यादिसम्पदः ।
नीलोत्पलानां होमेन वशयेदखिलं जगत् ।
बिल्वप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
दूर्व्वाहोमेन दीर्घायुर्भवेन्मन्त्री निरामयः ।
रक्तोत्पलहुतान्मन्त्री धनमाप्नोति वाञ्छितम् ।
मेधाकामेन होतव्यं पलाशकुसुमैर्नरैः ।
तज्जप्तमम्भः प्रपिबेत् कविर्भवति वत्सरात् ।
तन्मिश्रितान्नं भुञ्जीत महदारोग्यवर्द्धनम् ।"*।
अथ श्रीरामचन्द्रस्तोत्रम् ।
श्रीहनूमानुवाच ।
"तिरश्चामपि राजेति समवायं समीयुषाम् ।
यथा सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहम् ।
सकृदेव प्रपन्नाय विशिष्टायैव यत् प्रियम् ।
विभीषणायाब्धितटे यस्तं वीरं नमाम्यहम् ।
यो महान् पूजितो व्यापी महाब्धेः करुणामृतम् ।
स्तुतं जटायुना येन महाविष्णुं नमाम्यहम् ।
तेजसाप्यायिता यस्य ज्वलन्ति ज्वलनादयः ।
प्रकाशते स्वतन्त्रो यस्तं ज्वलन्तं नमाम्यहम् ।
सर्व्वतोमुखता येन लीलया दर्शिता रणे ।
राक्षसेश्वरयोधानां तं वन्दे सर्व्वतोमुखम् ।
नृभावञ्च प्रपन्नानां हिनस्ति च यथा मृग ।
सिंहः सत्त्वेष्विवोत्कृष्टस्तं नृसिंहं नमाम्यहम् ।
यस्माद्बिभ्यति वातार्कज्वलनेन्द्राः समृत्यवः ।
भियं धिनोति पापानां भीषणं तं नमाम्यहम् ।
परस्य योग्यतापेक्षारहितो नित्यमङ्गलम् ।
ददात्येव निजौदार्य्यादिमं भद्रं नमाम्यहम् ।
यो मृत्युं निजदासानां मारयत्यखिलेष्टदः ।
तत्रोदाहृतयो व्यक्तो मृत्युमृत्युं नमाम्यहम् ।
यत्पादपद्मप्रणतो भवेदुत्तमपूरुषः ।
तमीशं सर्व्वदेवानां नमनीयं नमाम्यहम् ।
अहम्भावं समुत्सृज्य दासेनैव रघूत्तमम् ।
भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ।
नित्यं श्रीरामभक्तस्य किङ्करा यमकिङ्कराः ।
शिवमय्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ।
इदं हनूमता प्रोक्तं मन्त्रराजात्मकं स्तवम् ।
पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत् ।"
इति हनूमत्कल्पे मन्त्रराजात्मकं श्रीरामचन्द्रस्तोत्रं समाप्तम् ।*। अथ श्रीरामचन्द्रस्याष्टोत्तरशतकं नाम ।
वेदव्यास उवाच ।
"शृणु गाङ्गेय वक्ष्यामि रामस्याद्भुतकर्म्मणः ।
नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतम् ।
नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते ।
कैलासशिखरे रम्ये नानारत्नविचित्रिते ।
एकाग्रप्रयतो भूत्वा विष्णुमाराध्य भक्तितः ।
उपविष्टस्ततो भोक्तुं पार्व्वतीं शङ्करोऽब्रवीत् ।
पार्व्वत्येहि मया सार्द्धं भोक्तुं भुवनवन्दिते ।
तमाह पार्व्वती देवी जप्त्वा नाम सहस्रकम् ।
ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो ।
ततस्तां पार्व्वतीं प्राह प्रहसन् परमेश्वरः ।
धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्व्वति ।
दुर्लभा वैष्णवी भक्तिर्भागधेयं विनेश्वरि ।
रकारादीनि नामानि शृण्वतो मम पार्व्वति ।
मनः प्रसन्नतामेति रामनामाभिशङ्कया ।
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ।
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामभिस्तुल्यं रामनाम वरानने ।
रामेत्युक्त्वा महादेवि भुङ्क्ष्व सार्द्धं मयाधुना ।
ततो रामेति नामोक्त्वा सह भुक्त्वा च पार्व्वती ।
ततो भुक्त्वा महादेवी पतिना सह संस्थिता ।
पप्रच्छ श्रीमहादेवं प्रीतिप्रवणमानसा ।
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम् ।
तस्यान्यान्यपि नामानि सन्ति चेद्रावणद्विषः ।
कथ्यतां मम देवेश तत्र मे प्रीतिरुत्तमा ।
श्रीशङ्कर उवाच ।
शृणु नामानि वक्ष्यामि रामचन्द्रस्य पार्व्वति ।
लौकिका वैदिकाः शब्दा ये केचित् सन्ति पार्व्वति ।
नामानि रामचन्द्रस्य सहस्रं तेषु चाधिकम् ।
तेषु चात्यन्तमुख्यं हि नाम्नामष्टोत्तरं शतम् ।
विष्णोरेकैकनामानि सर्व्ववेदाधिकं फलम् ।
तादृङ्नामसहस्रेषु रामनाम परं मतम् ।
जपतः सर्व्ववेदांश्च सर्व्वमन्त्रांश्च पार्व्वति ।
तस्मात् कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ।
अस्य श्रीरामनामाष्टोत्तरशतनामस्तोत्रस्य ईश्वर ऋषिरनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।
श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ।
जानकीवल्लभो जैत्रो जितामित्रो जनार्द्दनः ।
विश्वामित्रप्रियो दान्तः शरण्यत्राणतत्परः ।
वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रयः ।
कौशलेयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता दशग्रीवशिरोहरः ।
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः ।
जामदग्न्यमहादर्पदलनस्ताडकान्तकः ।
वेदान्तसारो वेदात्मा भवरोगस्य भेषजम् ।
दूषणत्रिशिरोहन्ता त्रिमूर्त्तिस्त्रिगुणात्मकः ।
त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्त्तनः ।
त्रिलोकरक्षको धन्वी दण्डकारण्यपुण्यकृत् ।
अहल्याशापशमनः पितृभक्तो वरप्रदः ।
जितेन्द्रियो जितक्रोधो जितलोभो जगद्गुरुः ।
ऋक्षवानरसङ्घाती चित्रकूटसमाश्रयः ।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ।
सर्व्वदेवाधिदेवश्च मृतवानरजीवनः ।
मायामारीचहन्ता
सर्व्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः ।
सर्व्वपुण्याधिकफलस्तीर्थः सर्व्वाघनाशनः ।
आदिपुरुषो महापुरुषः परमः पुरुषस्तथा ।
पुण्योदयो दयासारः पुराणः पुरुषोत्तमः ।
स्मितवक्त्रो मितभाषी पूर्व्वभाषी च राघवः ।
अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः ।
मायामानुषचारित्रो महादेवादिपूजितः ।
सेतुकृत् जितवारीशः सर्व्वतीर्थमयो हरिः ।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्द्धरः ।
सर्व्वयज्ञाधिपो यज्ञो जरामरणवर्ज्जितः ।
शिवलिङ्गप्रतिष्ठाता सर्व्वाघगणवर्ज्जितः ।
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ।
परं ज्योतिः परं धाम पराकाशः परात्परः ।
परेशः पारगः पारः सर्व्वदेवात्मकः शिवः ।
इत्येतद्रामभद्रस्य नाम्नामष्टोत्तरं शतम् ।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्त्तितम् ।
यः पठेत् शृणुयाद्वापि भक्तियुक्तेन चेतसा ।
स सर्व्वैर्मुच्यते पापैः कल्पकोटिशतोद्भवैः ।
जलानि स्थलतां यान्ति शत्रवो यान्ति मित्रताम् ।
राजानो दासतां यान्ति वह्नयो यान्ति शीतताम् ।
आनुकूल्यञ्च भूतानि स्थैर्य्यं यान्ति चञ्चलाः ।
अनुग्रहं ग्रहा यान्ति
पठतो भक्तिभावेन जनस्य गिरिसम्भवे ।
यः पठेत् परया भक्त्या तस्य वश्यं जगद्
यद्यत् कामयते चित्ते तत्तदाप्नो
यः पठेद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
अस्नानेनापि कुर्व्वाणो न स पापैर्विलिप्यते ।
पुण्यकालेषु सर्व्वेषु पठतामन्यमाप्नुयात् ।
सर्व्ववेदेषु तीर्थेषु दानेषु च तपःसु च ।
तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते ।
पुण्यकालेषु सर्व्वेषु पठन्नामशताष्टकम् ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वैकुण्ठे वासमाप्नोति दशपूर्व्वैर्दशापरैः ।
रामं दूर्व्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो न

[illegible] इति ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥”
इति पद्मपुराणे [illegible]
[illegible] ॥ ७ ॥
अस्य ‘[illegible]’ [illegible] अध्यात्मरामा-
यणे । १ । ११ । १०—४२ ।

रामस्य स्तवः ।

[illegible] रामाभिधानकम् ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] सदा प्रभो ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] राम [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] सुतरां राम ! [illegible] सदा ।
[illegible] राम ! [illegible] मम ।
[illegible] सीता [illegible] ।
[illegible] ।
[illegible] रघुश्रेष्ठ ! [illegible] सदा प्रभो ।
[illegible] ।
[illegible] राम [illegible] ।
[illegible] राम [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] रघुनन्दन ! ।
[illegible] प्रभो ।
[illegible] प्रभो ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] रामचन्द्रं [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

[illegible] सदा [illegible] ।
[illegible] ।
[illegible] ।
सर्वेशः सद्गुरुः साक्षात् [illegible] सदा ।
[illegible] ध्यायामि रघुनन्दन ।
[illegible] ।
राम [illegible] सदा [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
पाहि पाहि जगन्नाथ मां माया नाशयेत्
हे ।” ७ ।)

अथ श्रीरामकवचम् ।

“ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोच-
नम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ।
सासितूणधनुर्बाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ।
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्वकाम-
दाम् ।”

अस्य श्रीरामकवचस्य बुधकौशिकऋषि-
[illegible] श्रीरामचन्द्रो देवता श्रीराम-
चन्द्रप्रीत्यर्थे जपे विनियोगः ।
ॐ शिरो मे राघवः पातु भालं दशरथा-
त्मजः ।
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ।
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ।
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
[illegible] पातु कबन्धारिः [illegible] सौमित्रिवन्दितः ।
पार्श्वौ कुलपतिः पातु कुक्षिमिक्ष्वाकुनन्दनः ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ।
गुह्यं जितेन्द्रियः पातु पृष्ठं पातु रघूद्वहः ।
सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ।
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ।
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ।
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ।
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ।
जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ।
भूर्जपत्रे लिखां विद्यां गन्धचन्दनचर्चिताम् ।
कृत्वा वै धारयेद्यस्तु सोऽभीष्टं समवाप्नुयात् ।
[illegible] तस्य जयो भवेत् ।
काकवन्ध्या च या नारी मृतवत्सा च या
भवेत् ।

[illegible] सा भवेद्यदि संयुता ।
[illegible] यो रामकवचं पठेत् ।
[illegible] सर्वत्र जयमङ्गलम् ।
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां
हरिः ।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ।
धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरौ शुभौ ।
[illegible] मां [illegible] रामलक्ष्मणौ ।
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ।
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ।
शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ।

आत्तसज्जधनुषाविषुस्पृशा-
वक्षयाशुगनिषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणा-
वग्रतः पथि सदैव गच्छताम् ।

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
[illegible] पातु सलक्ष्मणः ।
[illegible] ।
[illegible] रामलक्ष्मणौ ।
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ।
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ।
आपदामपहर्त्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्य-
हम् ।
[illegible] धन्वी [illegible] शुभा ।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम् ।
इत्यादि मम नामानि [illegible] यः सदा पठेत् ।
अश्वमेधायुतं पुण्यं स प्राप्नोति न संशयः ।”
इति ब्रह्मयामले [illegible] श्रीराम-
कवचम् । इति तन्त्रसारः ।

रामकरी, स्त्री, रामकली रागिणी । इति हला-
युधः ॥ (क्वचित् रामकिरीत्यपि पाठः । यथा,
सङ्गीतदर्पणे रागाध्याये ।

अथ रामकिरी ।

“[illegible] पूर्णा रामकिरी मता ।
[illegible] प्रथमा ज्ञेया [illegible] ।
[illegible] प्रोक्ता केचित् पञ्चमवर्जिता ।
त्रिविधा सा मता [illegible] सम्पूर्णा षाडवौडवा ।”
अस्या ध्यानम् ।

“हेमप्रभा भासुरभूषणा च
नीलं निचोलं दधती वसन्ती ।
कान्ते समीपे [illegible]
मानोन्नता रामकिरी [illegible]

उदाहरणम्

स रि ग म प ध [illegible] ।
ध म ग प [illegible] । ।

अथवा

स रि ग म ध नि स। षाड़वा।

इति रामकिरी।)

अस्य अन्यत् विवरणं रागशब्दे द्रष्टव्यम्॥

रामकर्पूरकः, पुं, (रामो रमणीयः कर्पूरः। ततः स्वार्थे संज्ञायां वा कन्।) श्यामख्यातत्वणम्। यथा,—

"सौगन्धिकञ्च सौगन्ध्यं रामकर्पूरके तृणे।"

इति शब्दरत्नावली॥

रामगिरिः, पुं, (रामाश्रितो गिरिः। रामो रमणीयो गिरिर्वा।) पर्व्वतविशेषः। चित्रकूटपर्व्वतः। इति कश्चित्॥ यथा,—

"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तं गमितमहिमा वर्षभोग्येन भर्त्तुः। यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥"

इति मेघदूतः॥१॥

रामचन्द्रः, पुं, (रामश्चन्द्र इवाह्लादकत्वात्।) श्रीरामः। इति शब्दरत्नावली॥ (लक्ष्मणभट्टसुतः स्वनामख्यातः कविविशेषः। स तु अयोध्यानगरे वैराग्यशृङ्गारार्थद्वयोर्पेतं सटीकं रसिकरञ्जनं नाम काव्यं प्रणीतवान्। तस्यादिमश्लोको यथा,—

"शुभारम्भेऽदम्भे मखिलमतिजिह्मेक्षितपतं मणिस्तम्भे रम्भे चलसकुचकुम्भे परिणतम्। अनालम्बे लम्बे पथि पदविलम्बेऽमितसुखं समालम्बे स्वम्बेरमवदनमम्बेचितसुखम्॥"

एतट्टीकान्तिमश्लोको यथा,—

"शृङ्गारवैराग्यपरं समस्त-
विश्वत्ययोध्यानगरे वसन्।
अब्दे वियद्वारणबाणचन्द्रे
श्रीरामचन्द्रोऽस्तु च तस्य टीकाम्॥
श्रीरामचन्द्रकविना काव्यमिदं यदपि विरतिदीक्षतया।
रसिकानामपि रतये शृङ्गारार्थोऽपि संग्रथितोऽत्र॥"

एतत्कविप्रणीतानि रोमावलीशतकप्रभृतीन्यन्यान्यपि काव्यानि दृश्यन्ते॥)

रामच्छर्द्दनकः, पुं, (रामं मनोज्ञं छर्द्दयति। छर्द्दि+ल्युः। स्वार्थे कन्।) मदनवृक्षः। इति भावप्रकाशः॥ क्वचित् पुस्तके रामाच्छर्द्दनकः इति च पाठः॥ (गुणादयोऽस्य मदनशब्दे विज्ञेयाः॥)

रामजननी, स्त्री, (रामस्य जननी।) बलदेवमाता। यथा,—

"रोहिणी रामजननी रोहिणिव वयस्यः॥"

इति शब्दरत्नावली॥

कौशल्या। रेवती च॥

रामठं, क्ली,(रम्यतेऽनेनेति। रम+"रमेर्वृद्धिश्च।" उणा॰ १।१०३। इति अठः वृद्धिश्च धातोः।) हिङ्गु। इत्यमरः।१।१०१॥ (यथा, सुश्रुते।१।११।

"तत्र वस्त्राङ्गने कुष्ठं रामठं नतदं मधु।
कुर्य्यात् शिरोविरेचनोपचन्दनेन प्रलेपनम्॥")

रामठः, पुं, (रम्+अठः। वृद्धिश्च।) अङ्कोठवृक्षः। इति रत्नमाला॥ (जनपदविशेषः। यथा, वृहत्संहितायाम्।१०।५।

"पौरव्ये पारतरामठलैलिकारणकचीनाश्च॥"

तद्देशवासिनश्च। यथा, महाभारते।२।३२।१२।

"रामठान् हारहूणांश्च प्रतीच्याश्चैव ये नृपाः।
तान् सर्व्वान् स वशे चक्रे शासनादेव पाण्डवः॥")

रामठी, स्त्री, (रामठ+स्त्रियां ङीप्।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

रामणः, पुं, तिन्दुकः। तिन्दुकः। इति राजनिर्घण्टः॥

रामणीयकं, त्रि, रमणीयम्। इत्यमरटीका॥ (यथा, महाभारते।१।२६।८।

"रामणीयकमागच्छन्मात्रा सह भुजङ्गमाः॥"

रामणीयकं रमणीयं द्वीपमिति शेषः॥

क्ली, रमणीयस्य भावः कर्म्म वा। रमणीय+"योपधाद्गुरूपोत्तमाद्वुञ्।" ५।१।१३२। इति वुञ्। रमणीयत्वम्॥ यथा, किराते।१।३९।

"पुरोपनीतं नृप! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः॥")

रामतरुणी, स्त्री, (रामा मनोहरा तरुणीव।) तरुणीपुष्पम्। इति राजनिर्घण्टः॥ सेउती इति भाषा॥

रामदूतः, पुं, (रामस्य दूतः।) हनूमान्। इति शब्दरत्नावली॥

रामदूती, स्त्री, (रामस्य दूतीव। विष्णुप्रियत्वात्।) तुलसीविशेषः। तत्पर्य्यायः। पर्णपुष्पी २ विशल्या ३ नागदन्तिका ४ काण्डली ५ सप्तपर्णी ६ भरण्याङ्गा ७ पविभ्रभका ८। इति शब्दचन्द्रिका॥

रामनवमी, स्त्री, (रामस्य जन्मतिथिरूपा नवमी। मध्यपदलोपिकर्म्मधारयः।) चैत्रशुक्लनवमी। सा च श्रीरामचन्द्रस्य जन्मतिथिः। यथा,—

"अगस्त्यसंहितायाम्।
'चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः।
पुनर्व्वसुऋक्षसंयुक्ता सा तिथिः सर्व्वकामदा॥
पुनर्व्वसुऋक्षसंयोगः स्वल्पोऽपि यदि लभ्यते।
चैत्रशुक्लनवम्यान्तु सा तिथिः सर्व्वकामदा॥
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः।
यत्किञ्चित् क्रियते कर्म्म तद्भवक्षयकारकम्॥
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम्।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः॥'
चैत्रपदं चान्द्रपरम्।
'मेषं पूषणि संप्राप्ते लग्ने च कर्कटाह्वये।
आविरासीत् सकलया कौशल्यायां परः पुमान्॥'

अत्र मेषस्थसूर्य्ये चान्द्रचैत्रशेष …
शस्तत्वात्। तथा।
'तस्मिन् दिने …
अपि देवान् व्यापीनो यावत् …
तेनैव स्यात् पुरश्चर्य्या दशम्यां …
अष्टमीनवमीयुविशेषेण दशाय …
लक्षणम्यो भवेत्तेन मतो रामः प्रणीतः।'
तथा।
'चैत्रशुक्ला तु नवमी पुनर्व्वसुयुता यदि।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत्॥
नवमी चाष्टमीविद्धा त्याज्या …
उपोषणं नवम्यान्तु दशम्यामेव …
एतद्वचनद्वयं काममाधवीयेऽपि।
पुण्या इत्यत्र महापुण्येति पाठः।
अष्टम्यान् सर्व्व …
मिति। अतएवाष्टमीविद्धा
नोपोष्या। इति माधवाचार्य्यः।
नतु विद्धा। यदा तु परदिने …
पारणयोग्या तदा दशमीयुता
वैष्णवैर्विष्णुपरायणैरितिमत्वात्।
अष्टमीविद्धैव ग्राह्या। यदा तु पूर्व्वे
विद्धा नवमी परत्र दशमीयुता …
दशमीदिने च न पारणयोग्या …
नवमीयोगाभावेऽष्टमीविद्धैव ग्राह्या।
दशम्यामेव पारणमिति नियमात्।
रामार्च्चनचन्द्रिकायाम्।
'दशम्यादिषु वृद्धिश्चेत् त्याज्या …
तदन्यथा तु सर्व्वथा व्रतं तत्रैव निश्चितम्।
दशम्यामेव शब्देन दशमी वेध वक्ष्यते।
निश्चित्यैवं विचार्य्यैव नवमीव्रतमाचरेत्।'
इति …
वस्तुतस्तु दशमीपारणसत्त्वे सर्व्वैरेव
नोपोष्या। विष्णुपरायणैरिति तु …
त्वेन भवितव्यमित्युपदेशपरं न तु …
परम्। अगस्त्यवाक्यस्य
देशात्। कर्त्तृभेदे विधिद्वयकल्पनापत्तेः
एव माधवाचार्य्येण सामान्यतः …
निषिद्धा।
'प्राप्ते श्रीरामनवमीदिने मर्त्त्यो विमूढधीः
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते।
यस्तु रामनवम्यान्तु …
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः।'
अत्र मर्त्त्ये इत्युपादानात् …
एवञ्च।
'कुर्य्याद्रामनवम्यां य उपोषणमनिन्दितः
मातुर्गर्भमवाप्नोति नैव रामो भवेत् स्वयम्।
तस्मात् सर्व्वात्मना सर्व्वे कार्य्ये
मुच्यन्ते पातकैः सर्व्वैर्यान्ति …'
इति फलश्रुतेर्नित्य…
सिद्धम्। अगस्त्यसंहितायाम्।
'प्रातर्यामत्रिजायाश्च तुलसीदलकोमलैः
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणा…

[illegible]

इति तिथ्यादितत्त्वम् ॥

[illegible]

"[illegible]
राजसाय इति [illegible]
[illegible]"

[illegible] इति भावप्रकाशः ॥

[illegible]

[illegible] इति शब्दरत्नावली ॥

[illegible]

इति शब्दचन्द्रिका ॥

[illegible]

रामो मखः विनुर्मानुर्विन्नामिश्रादराप्तवान् ।
जनकयागं ययौ यश्ची ताड़कां प्रवधाय च ।
विश्वामित्रस्य यज्ञे तु सुबाहुं मारयीद्बली ।
जनकस्य क्रतुं गत्वा उपयेमेऽथ जानकीम् ॥
ऊर्म्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् ।
शत्रुघ्नो वै कीर्त्तिमतीं कुशध्वजसुते च द्वे ॥
विश्वामित्रं प्रपूज्याथ गत्वा रामादयः स्थिताः ।
दृष्ट्वार्ज्जुनं मातुलञ्च शत्रुघ्नभरतौ गतौ ॥
तत्पश्चाद्वर्ज्जित राज्यं दातुं समुद्यतम् ।
रामाय न्यस्तुनाथ कैकेय्या प्रार्थितं तदा ।
चतुर्द्दशसमा रामो वने रामस्य वासिनः ॥
रामः सिद्धार्थमेतत् लक्ष्मणेन च सीतया ।
रामस्य हृदयं ज्ञात्वा महेन्द्रपुरं गतः ।
एवं ज्ञात्वा दशास्य चित्रकूटं गिरिं गतः ॥
[illegible]

[illegible]

मर्हितां राक्षसीभिश्च रावणेन च रक्षसा ।
मम भार्य्येति वदता विस्मयन्तीव राघवम् ॥
अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत् ।
रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि ।
अभिज्ञानञ्च मे देहि येन रामः स्मरिष्यति ।
तत् श्रुत्वा प्रददौ सीता वेणीरत्नं हनूमते ।
यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते ।
तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् ॥
हत्वाक्षं राक्षसांश्चान्यान् बन्धनं स्वयमागतः ।
मन्त्रैरिन्द्रजितो बाणैर्दृष्ट्वा रावणमब्रवीत् ॥
सा शर्म्मिष्ठा राजपुत्री दुःखशोकभयाकुला ।
नित्यं दासीशताकीर्णा देवयानीन्तु सेवते ॥
एकदा सा वनगता रुदती जाह्नवीतटे ।
विश्वामित्रं मुनिं सा तं ददर्श स्त्रीभिरावृतम् ।
व्रतिनं पुण्यगन्धाभिः सुरूपाभिः सुवासितम् ।
कारयन्तं व्रतं माल्यधूपदीपोपहारकैः ॥
निर्म्मायाष्टदलं पद्मं वेदिकायां सुचिह्नितम् ।
रम्भापोतैश्चतुर्भिस्तु चतुष्कोणं विराजितम् ॥
वाससा निर्म्मितगृहे स्वर्णपट्टैर्विचित्रिते ।
निर्म्मितश्रीवासुदेवं नानारत्नविभूषितम् ॥
पौरुषेण च सूक्तेन नानागन्धोदकैः शुभैः ।
पञ्चामृतैः पञ्चगव्यैर्यामक्तैर्हंसेरितैः ॥
स्नापयित्वा भद्रपीठे कर्णिकायां प्रपूजयन् ।
पञ्चभिर्दशभिर्व्वापि षोडशैरुपचारकैः ॥
पाद्यमध्वश्रमहरं शीतलं सुमनोहरम् ।
परमानन्दजनकं गृहाण परमेश्वर ॥
दूर्व्वाचन्दनगन्धाढ्यमर्घ्ययुक्तं प्रयत्नतः ।
गृहाण रुक्मिणीकान्त प्रपन्नस्य मम प्रभो ॥
नानातीर्थाद्भवं वारि सुगन्धि सुमनोहरम् ।
गृहाणाचमनीयं त्वं श्रीनिवास श्रिया सह ॥
नानाकुसुमगन्धाढ्यं सुग्रथितमुत्तमम् ।
वक्षःशोभाकरं चारु माल्यं जय सुरेश्वर ॥
तन्तुसन्तानसन्धानरचितं वसनं हरे ।
गृहाणावरणं शुद्धं निरावरण सप्रिय ॥
यज्ञसूत्रमिदं देव प्रजापतिविनिर्म्मितम् ।
गृहाण वासुदेव त्वं रुक्मिण्या रमया सह ॥
नानारत्नसमायुक्तं स्वर्णमुक्तादिभूषितम् ।
श्रिया सह देवेश गृहाणाभरणं मम ॥
दधिक्षीरगुडाज्यादिपूपजहड्डुकखण्डकान् ।
गृहाण रुक्मिणीनाथ समाधं कुरु मां प्रभो ॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम् ।
धूपं गृहाण वरद वैदर्भ्या प्रियया सह ॥
भक्तानां गेहसक्तानां संसारध्वान्तनाशनम् ।
दीपमालोकय विभो जगदालोकनादर ॥
श्यामसुन्दर पद्माक्ष पीताम्बर चतुर्भुज ।
प्रपन्नं पाहि देवेश रुक्मिण्या सहिताच्युत ॥
इति तासां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता ।
शर्म्मिष्ठा मिष्टवचना कृताञ्जलिरुवाच ताः ॥

शर्म्मिष्ठोवाच ।

राजपुत्रीं दुर्भगां मां स्वामिना परिवर्ज्जिताम् ।
त्रातुमर्हथ हे देव्यो व्रतेनानेन कर्म्मणा ॥
श्रुत्वा तु ता वचस्तस्याः कारुण्याच्च क्रियन्

क्रियम् ।
पूजोपकरणं दत्त्वा कारयामासुरादरात् ॥
व्रतं कृत्वा तु शर्म्मिष्ठा लब्ध्वा स्वामिनमीश्वरम् ।
सुत्वा पुत्रान् सुसन्तुष्टा बभूव स्थिरयौवना ॥
सीता चाशोकवनिकामध्ये सरमया सह ।
व्रतं कृत्वा पतिं लेभे रामं रावणनाशनम् ॥
कृष्णदत्तप्रसादेन कृत्वेदं द्रौपदी व्रतम् ।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना ॥
तथा रमा सिते पक्षे वैशाखे द्वादशीदिने ।
जामदग्न्याद्व्रतं चक्रे पूर्णं वर्षचतुष्टयम् ॥
मङ्गलं करे बद्धा भोजयित्वा द्विजान् बहून् ।
भुक्ता हविष्यं क्षीराक्तं सुमिष्टं स्वामिना सह ॥
प्रसूते पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता ।
सा पुत्रौ सुषुवे साध्वी मेघमालबलाहकौ ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ ॥

> व्रतवरमिति कृत्वा सर्व्वसम्पत्समृद्धा
> भवति विदिततत्त्वा पूजिता पूर्णकामा ।
> हरिचरणसरोजद्वन्द्वभक्तैकतानां
> व्रजति गतिमपूर्व्वां ब्रह्मविष्णेरगम्याम् ॥"

इति कल्किपुराणे रुक्मिणीव्रतम् ११ अध्यायः ॥

रुक्मिदर्पः, पुं, (रुक्मिणि भीष्मकपुत्रे दर्पो यस्य सः । तस्य रुक्मिनाशकत्वात् ।) बलदेवः । इति हलायुधः ॥

रुक्मिदारी, [न्] पुं, (रुक्मिणं दारयतीति । दृ + णिच् + णिनिः ।) बलदेवः । इति त्रिकाण्डशेषः ॥

रुक्मिभित्, [द्] पुं, (रुक्मिणं भिनत्तीति । भिद् + क्विप् ।) बलदेवः । इति हेमचन्द्रः । २ । १३८ ॥

रुक्मी, [न्] पुं, (रुक्मो वर्णविशेषोऽस्यास्तीति । रुक्म + इनिः ।) भीष्मकराजज्येष्ठपुत्रः । यथा,
"राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ।
तस्य पञ्चाभवन् पुत्राः कन्यैका रुचिरानना ॥
रुक्म्याद्यो रुक्मरथो रुक्मबाहुरनन्तरः ।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥"

इति श्रीभागवते १० स्कन्धे ५२ अध्यायः ॥

(रुक्मिणीहरणानन्तरं कृष्णेन सहास्य युद्धादिविवरणं हरिवंशे ११७ अध्याये तथा प्रद्युम्नेन सहास्य कन्यापरिणयप्रस्तावः अनिरुद्धेन सहास्य पौत्र्याः परिणयप्रस्तावः तु तत्रैव ११८ अध्याये विवृतम् ॥)

रुक्मिन् [न्] क्ली, मणम् । इति वैद्यकम् ।

रुग्णः, त्रि, भग्नः । भग्नः ।... रोगादिकभङ्गत्वेन भिन्नः । ... (भीरुकः । तद्यथा, वाग्भट्टः ।
"दोषधातुमलादीनां नैव शोधः क्लीव रजोगुणमयः सन्नो रुग्णः ...
इति भावप्रकाशस्य ...

रुग्णः, त्रि, (रुज् + क्तः । ... रोगादिना कुटिलीकृतः । तत्पर्य्यायः । ... इत्यमरः ॥ (यथा, रामायणे । २ । १९ ।
"तथा विधीनकृत शोकरुग्णा संसारमेव गतः मिता वै ।")
रोगी । इति राजनिर्घण्टः ॥

रुच, ङ ल दीप्तिप्रकाशयोः । इति (भ्वा०-आत्म०-अक०-सेट् ।) ...
रामविशेषः । तत्र पक्षानुरागस्तस्य ... लम् । ङ, रोचते चन्द्रं कुसुमं । ङ, इति दुर्गादासः ॥

रुचकं, क्ली, (रोचतेऽनेनेति । रुच् + ... नापि ।" उणा० २ । ३२ । इति वुन् ।) काचारम् । अम्लामरखम् । मङ्गल्यद्रव्यम् । (यथा,—
"सौवर्चलं स्याद्रुचकमन्यस्य च इत्यपि ।
तथास्य गुणाः ।
"रुचकं रोचनं भेदि दीपनं ...
सूक्ष्मं वातनुमातिपित्तलं विशदं लघु ।
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे ... माङ्गल्यद्रव्यम् । (यथा, माघे । १ ।
"हारेण च महार्हेण रुचकेन च ...
"रुचकेन मङ्गलद्रव्येण ।" इति मल्लिनाथः ।) ...
इति मेदिनी । के, १३१ । स्वर्ण ... शब्दरत्नावली । रोचना । ... हेमचन्द्रः । जयम् । इति हारावली । ... दिक् । यथा, बृहत्संहितायाम् । ११ ...

रुचके हारं न शुभदस्ततोऽन्यथा ...
"रुचकं मातुलुङ्गकम् ।" ...
२ । ३७ ।)

रुचकः, पुं, (रोचते इति । रुच् + वुन् ।) पूरः । निष्कः । दन्तः । कपोतः । इति ... (यथा, बृहत्संहितायाम् । ६८ । १ ।
"श्रीवैन भवति हंसः
सौरेण शशः कुजेन रुचकश्च ।"
पर्व्वतविशेषः । यथा, विष्णुपुराणे ।
"त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा ।"
स्तम्भः । यथा, बृहत्संहितायाम् । ५३ । २८ ।

“…दानुरक्तो रुचौ
…लोदयाभिरिदं बलं दिदेश: ।”)
…, (रुच् + क्विप् । पक्षे टाप् ।) दीप्तिः ।
… । इच्छा । (यथा, महाभारते ।१।४।११।
“तदै तस्मै न कन्यामभ्युपैति
मनसाहं कामयानः कामी ।”)
…शालुकशाक । इति शब्दरत्नावली ॥
…ी, (रोचते इति । रुच् + “इगुपधात्
कित् ।” उणा० ४ । ११८ । इति इन् । स च
…) अभिष्वङ्गः । अनुरागः । आसक्तिः ।
… । (यथा, किराते । १० । ६२ ।
“रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिशुचौ पृथात्मजे ।”
…ो रुचिकरो वत्सः प्रोक्तो वह्निदीपनः ।”
… वैद्यकराजवल्लभे क्षयरोगाध्याये ।)
…ताप: । गभस्तिः । किरणः । इत्यमर-
…। शोभा । इति मेदिनी ॥ (यथा,
… । ५ । ६० ।
…लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
…सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ।”)
…ना । इति हेमचन्द्रः ॥ गोरोचना । इति
…निर्घण्टः ॥ आलिङ्गनविशेषः । तल्लक्षणं
… । नायिकाया नायकस्य संमुखे जान्वो-
…पुंपविश्य वक्षसि पक्षौ दत्त्वा यदवस्थानम् ।
… कामशास्त्रम् ॥
…पुं, (रोचते शोभते इति । रुच् + इन् ।
कित् ।) प्रजापतिविशेषः । स च रौच्य-
पिता । यथा,—

मार्कण्डेय उवाच ।

…चिः प्रजापतिः पूर्व्वं निर्म्ममो निरहङ्कृतिः ।
…लमितशायी च चचार पृथिवीमिमाम् ॥
…ग्निमनिकेतमेकाहारमनाश्रयम् ।
…मुक्तसङ्गं तं दृष्ट्वा प्रोचुः स्वपितरो मुनिम् ॥

पितर ऊचुः ।

… कस्मात् त्वया पुत्त्र न कृतो दारसंग्रहः ।
…ापवर्गहेतुत्वाद्बन्धस्तेनानिशं विना ॥
…ि समस्तदेवानां पितॄणाञ्च तथार्हणाम् ।
…षीणामतिथीनाञ्च कुर्व्वन् लोकानवाप्नुते ॥
…होच्चारणतो देवान् स्वधोच्चारणतः पितॄन् ।
…भजत्यन्नदानेन भूताद्यानतिथीनपि ॥
…सं देवादृणाद्बन्धं बन्धमृषादृणादपि ।
…वाप्नोषि मनुष्यर्षिभूतेभ्यश्च दिने दिने ॥
…दुत्पाद्य सुतान् देवानसन्तर्प्य पितॄंस्तथा ।
…शरीरेश्च कथं मौढ्यात् सुगतिं गन्तुमिच्छसि ॥

रुचिरुवाच ।

…रिग्रहोऽतिदुःखाय पापायाधोगतेस्तथा ।
…अतो मया पूर्व्वं न कृतो दारसंग्रहः ॥
…आत्मनोऽनुदिवसं यदात्मा निग्रहैः ।
…मलपङ्कदिग्धोऽपि विद्याम्भोभिर्व्वरं हि तत् ।”
इत्यादि ॥

पितर ऊचुः ।

…युक्तं प्रक्षालनं कर्त्तुमात्मनो नियतेन्द्रियैः ।
…रिणु हेयाय मार्गोऽयं यत्र त्वं पुत्त्र वर्त्तसे ।”
इत्यादि ॥ * ॥

मार्कण्डेय उवाच ।

“स तेन पितृवाक्येन भृशमुद्विग्नमानसः ।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् ॥
कन्यामलभमानोऽसौ पितृवाक्याग्निदीपितः ।
चिन्तामवाप महतीमतीवोद्विग्नमानसः ॥
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ।
क्षिप्रं भवेत् पितॄणां यो ममाभ्युदयकारकः ॥
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः ।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवम् ॥
ततो वर्षशतं दिव्यं तपस्तेपे स वेधसम् ।
दिदृक्षुः सुचिरं कालं रुचिर्नियममास्थितः ॥
ततः प्रदर्शयामास ब्रह्मा लोकपितामहः ।
उवाच च प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितम् ॥
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम् ।
पितॄणां वचनात्तेन यत् कर्त्तुमभिवाञ्छितम् ॥
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छि-
तम् ।
प्रजापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ॥
सृष्ट्वा प्रजाः सुतान् विप्र समुत्पाद्य क्रियास्तथा ।
कृत्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ॥
स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् ।
कामञ्चेममभिध्याय क्रियतां पितृपूजनम् ॥
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् ।
पत्नीं सुतांश्च सन्तुष्टाः किं न दद्युः पितामहाः ॥

मार्कण्डेय उवाच ।

इत्यृषिर्व्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।
नद्या विविक्ते पुलिने चकार पितृतर्पणम् ॥
तुष्टाव च पितॄन् विप्रः स्तवैरेभिरथादृतः ।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मको रुचिः ॥”
रुचिकृतपितृस्तोत्रं यथा,—

रुचिरुवाच ।

“नमस्येऽहं पितॄन् भक्त्या ये वसन्त्यधिदैवतम् ।
देवैरपि हि तर्प्यन्ते ये श्राद्धेषु स्वधोत्तरैः ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्म्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैर्द्दिवि ।
तन्मयत्वेन वाञ्छद्भिरृद्धिमात्यन्तिकीं पराम् ॥
नमस्येऽहं पितॄन् मर्त्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकपुष्टिप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्द्धूतकल्मषैः ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतधारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान् ।
कव्यैरशेषैर्व्विधिवल्लोकद्वयफलप्रदान् ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्म्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे ये शूद्रैरपि भक्तितः ।
सन्तर्प्यन्ते जगत्यत्र नाम्ना ख्याताः सुका-
लिनः ॥
नमस्येऽहं पितॄन् श्राद्धे पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहारास्त्यक्तदम्भमदैः सदा ॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्व्विविधैर्नागैः कामानभीप्सुभिः ॥
नमस्येऽहं पितॄन् श्राद्धे सर्पैः सन्तर्पितान् सदा ।
तत्रैव विविधैर्म्मन्त्रैर्भोगसम्पत्समन्वितैः ॥
पितॄन्नमस्ये निवसन्ति साक्षाद्
ये देवलोकेऽथ महीतले वा ।
तथान्तरीक्षे च सुरादिपूज्या-
स्ते संप्रतीच्छन्तु मयोपनीतम् ॥
पितॄन्नमस्ये परमार्थभूता
ये वै विमाने निवसन्त्यमूर्त्ताः ।
यजन्ति यानस्तमला मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥
तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
पश्वात्मजान् व्यामबलं गृहाणि ॥
सूर्य्यस्य ये रश्मिषु चन्द्रबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमतो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ॥
ये खड्गमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्द्दिव्यमनोहरैश्च ।
कालेन शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव तेषाममरार्च्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धादिभोज्येषु मयाहृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्त्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।

यथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्वाण्यभितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्णाशयन्तस्त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः ।
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
ऊर्द्धमन्यथमा रक्षेत् कव्यवाहोऽनलोऽप्यधः ॥
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
विश्वो विश्वभुगाराध्यो धन्यो धर्म्मः सनातनः ।
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ॥
कल्याणः कल्यदः कर्त्ता कल्यः कल्यतराश्रयः ।
कल्यताहेतुरनघः षडिमे ते गणाः स्मृताः ॥
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा ।
विश्वपाता तथा धाता सप्त चैते गणाः स्मृताः ॥
महान्महात्मा महितो महिमावान्महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यो विभूतिदः ।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ।
एकत्रिंशत् पितृगणा यैर्व्याप्तमखिलं जगत् ।
ते मेऽत्र तृप्तास्तृप्यन्तु यच्छन्तु च सदा हितम् ॥"
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवः ॥

मार्कण्डेय उवाच ।

"एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥
तद्दृष्ट्वा सुमहत्तेजः समाच्छाद्य स्थितं जगत् ।
जानुभ्यामवनीं गत्वा रुचिः स्तोत्रमिदं जगौ ॥
अर्च्चितानाममूर्त्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणां तथान्येषां तान् नमस्यामि काम-
दान् ॥
मन्वादीनाञ्च नेतारः सूर्य्याचन्द्रमसोस्तथा ।
तान् नमस्याम्यहं सर्व्वान् पितॄनप्सूदधावपि ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्न्योर्नभसस्तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः ॥
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वायम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥
सोमाधारान् पितृगणान् योगमूर्त्तिधरांस्तथा ।
नमस्यामि तथा सोमं पितरं जगतामहम् ॥
अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहम् ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥
ये तु तेजसि ये चैते सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥

श्रीमार्कण्डेय उवाच ।

एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥
निवेदितञ्च यत्तेन पुष्पगन्धानुलेपनम् ।
तद्भूषितानथ स तान् ददृशे पुरतः स्थितान् ॥
प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥
ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमम् ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥
साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजाव-
तीम् ॥

पितर ऊचुः ।

अत्रैव सद्यः पत्नी ते भविष्यति मनोरमा ।
तस्याञ्च पुत्रो भविता भवतो मुनिसत्तम ! ॥
मन्वन्तराधिपो धीमान् त्वन्नाम्नैवोपलक्षितः ।
रुचे रौच्य इति ख्यातिं प्रयास्यति जगत्त्रये ॥
तस्यापि बहवः पुत्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ।
क्षीणाधिकारो धर्म्मज्ञ ततः सिद्धिमवाप्स्यसि ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगान् दास्यामो ज्ञानमुत्तमम् ॥
शरीरारोग्यमैश्वर्य्यं पुत्रपौत्रादिसन्ततिम् ।
प्रदास्यामो न सन्देहो यच्चान्यदभिवाञ्छितम् ॥
तस्मात् पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितॄणाञ्चाक्षयां तृप्तिं स्तव्याः स्तोत्रेण मानवैः ॥
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम् ।
पठिष्यति द्विजाग्र्याणां भुञ्जतां पुरतः स्थितः ॥
स्तोत्रश्रवणसम्प्रीत्या सन्निधाने परे कृते ।
अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ॥
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ।
अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा ॥
अश्राद्धार्हैरुपहृतैरुपहारैस्तथा कृतम् ।
अकालेऽप्यथवाऽदेशे विधिहीनमथापि वा ॥
अश्रद्धया वा पुरुषैर्दम्भमाश्रित्य वा कृतम् ।
अस्माकं प्रीतये श्राद्धं तथाप्येतदुदीरणात् ॥
यत्रैतत् पठ्यते श्राद्धे स्तोत्रमस्मत्सुखावहम् ।
अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी ॥
हेमन्ते द्वादशाब्दानि तृप्तिमेतत् प्रयच्छति ।
शिशिरे द्विगुणाब्दानि तृप्तिं स्तोत्रमिदं शुभम् ॥
वसन्ते षोडशसमास्तृप्तये श्राद्धकर्म्मणि ।
ग्रीष्मे च षोडशैवैतत् पठितं तृप्तिकारकम् ॥
विकलेऽपि कृते श्राद्धे स्तोत्रेणानेन साधिते ।
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ॥
शरत्कालेऽपि पठितं श्राद्धकाले प्रयच्छति ।
अस्माकमेतत् पुरुषैस्तृप्तिं ...
यस्मिन् गृहेऽपि लिखितमेतत्ति...
सन्निधानं कृते श्राद्धे
तस्मादेतत्त्वया श्राद्धे
श्रावणीयं महाभाग
इति मार्कण्डेयपुराणे ...

मार्कण्डेय उवाच ।

"ततस्तस्मान्नदीमध्यात् समुत्तस्थौ
प्रम्लोचा नाम तन्वङ्गी ...
सा चोवाच महात्मानं रुचिं ...
प्रश्रयावनता सुभ्रूः प्रम्लोचा वै वरा...
अतीवरूपिणी कन्या मत्सुता वरु...
जाता वरुणपुत्रेण पुष्करेण महा...
तां गृहाण मया ...
मनुर्मेधामतिस्तस्यां समुत्पत्स्यति वै ।"

मार्कण्डेय उवाच ।

तथेति तेन चाप्युक्ता
उज्जहार ततः कन्या
नद्याश्च पुलिने तस्मिन् स मुनिर्मुनिसत्तम
जग्राह पाणिं विधिवत्
तस्यां तस्य सुतो जज्ञे
रौच्योऽभवत् पितुर्नाम्ना
तस्य मन्वन्तरे देवास्तथा सप्तर्षयो...
तनयाश्च नृपाश्चैव ते सम्यक् कथिता...
धर्म्मवृद्धिस्तथारोग्यं धनधान्यसुतो...
नृणां भवत्यसन्दिग्धमस्मिन् मन्वन्तरे...
पितृस्तवं तथा श्रुत्वा ...
सर्व्वान् कामानवाप्नोति ...
इति मार्कण्डेयपुराणे रौच्यमन्वन्तर...
...वहे ९८ । ९० अध्यायौ ।

रुचितं, त्रि, (रोचते इति । रुच् + "कुषिकुटिभ्यः कितच् ।" उणा० । इति कितच् ।) मिष्टम् । (रुच् + क्तः । अभिलषितः । यथा, भारते । ५ । १०० । १६ ।
"मातले रुचिरचापि रुचितं ...
क्ली, रुच् + भावे क्तः । इच्छा । यथा, महाभारते । १ । ९६ । ४१ ।
"ववाते यथामेषां रुचितं ...
रुचिफलं, क्ली, (रुचिजनकं फलम् ।) ...फलम् । इति राजनिर्घण्टः ।
रुचिरं, क्ली, (रोचते इति । रुच् + ... मुदीति ।" उणा० १ । ५१ । ...) ...कम् । कुङ्कुमम् । लवङ्गम् । इति ... निर्घण्टः । (पुं, ...) ... ६० । २१ ।
"पुत्राः ...
रुचिरः श्वेतकेतुश्च ...
रुचिरं, त्रि, (रुच् + किरच् ।) इत्य...मरः । (यथा, कुमारसम्भवे ...
"उन्नमितभ्रूलतया ...

त्र् कवि न मद्यादम: ई त्र्प्रभाद-
मालोला: ॥")
त्। इत्युणादिकोष: ॥
, स्त्री, (रोचते इति । रुच्+किरच् ।
ाप् ।) गोरोचना । इति राजनिर्घण्ट: ॥
।रक्षाद्रयविशेष: । यस्य मस्तकोरा-
ादिकं शब्दः कल्पद्रुमे द्रष्टव्यम् ।)
हक:, पुं, (रुचिर: सुन्दरोऽलक: ।)
।हक: । इति राजनिर्घण्ट: ॥
ः, पुं, (रुचिर: सुन्दरोऽश्वो यस्य ।)
।विशेष: । स तु देवापे: श्वशुर: । यथा,—
ो भूपालकन्यामानौ मवन्ये कुल मे यथ: ।
।राश्वसुतो शान्तो देवापि मे महोदय ।"
इति कल्किपुराणे १८ अध्याय: ॥
।रुधोटकश्च ॥
, त्रि, (रुच्यते इति । रुच्+"रुचि-
भ्यां किष्यन् ।" उणा० ४ । १०८ । इति
यन् ।) मित्रवन्धु । इत्युणादिकोष: ॥ (यथा,
ते । १ । ९६ । पुष्यर्णी ।
उत्काको वासका मान्त्रा रुचिष्यानल-
दीपनो ।")
भप्रेतम् । इति संक्षिप्तसारोणादिवृत्ति: ॥
था, हरिवंशे । २५४ । ६० ।
एवाँ कामये तनुवां मनुष्योऽसि पदे-
भि: ॥
एव रुचिष्यो मे वरो दानवसत्तम ! ॥")
, स्त्री, (रुचि+कृदिकारादिति ङीष् ।)
।ि: । यथा । रुक् रुचौ रुचय: समा: ।
देकार्थसंग्रह: ॥
स्त्री, (रोचते इति । रुच्+"राजसूयसूर्य-
मोदेति ।" ३ । १ । ११४ । इति क्यप्प्रत्ययेन
।पातितम् ।) सौवर्चलम् । इति राजनिर्घण्ट: ॥
, पुं, (रुच्+क्यप् ।) कतकवृक्ष: । शालि-
न्यम् । इति राजनिघण्ट: ॥ मति: । इति
।मचन्द्र: । ३।९८१ ॥ सुन्दरे, त्रि । इत्यमर: ॥
रुचिकर: । यथा,—
पकं वर्णकरं रुच्यं मांसवृद्धिबलप्रदम् ।
पत्तापरोधि वातघ्नं हृद्यं गुल्मशूलीमनम् ॥"
इति वैद्यकराजवल्लभे द्रव्यगुणाख्यायाम् ॥)
कन्दः, पुं, (रुच्य: कन्दो यस्य ।) शूरण: ।
इति राजनिर्घण्ट: ॥
, ओ भ ओ भङ्गे । इति कविकल्पद्रुम: ॥
. तुदा०-पर०-सक०-अनिट् ।) ओ, रुग्ण: । भ,
रुजति रोगो देहम् । औ, रोक्ता । इति
दुर्गादास: ॥
, क हिंसे । इति कविकल्पद्रुम: ॥ (चुरा०-
पर०-सक०-सेट् ।) क, रोजयति । इति दुर्गा-
दास: ॥
ा, स्त्री, (रुज्+क्विप् । पक्षे टाप् ।) रोग: ।
भङ्ग: । इति मेदिनी । जे, १४ ॥ (पीड़ा ।
यथा, महाभारते । ८ । ६४ । १६८ ।
"निपातात् तव शस्त्राणां शरीरे याभवद्रुजा ।
गया ते माद्यं वर्णी यामोढ़ं भृगुनन्दन ! ॥")
मेथी । इति हेमचन्द्र: । ४ । २४४ ॥ कुष्ठम् ।
इति राजनिर्घण्ट: ॥

रुजाकरं, क्ली, (रुजां रोगं करोतीति । कृ+
ट: ।) कर्मरङ्गफलम् । इति शब्दचन्द्रिका ॥

रुजाकर:, पुं, (रुजां करोतीति । कृ+ट: ।)
व्याधि: । यथा । व्याधिव्याधी रुजाकर: । इति
हेमचन्द्र: । २ । २२६ ॥ (व्याधिकारके, त्रि ॥)

रुजासह:, पुं, (रुजां सहते इति । सह+अच् ।)
धन्वनवृक्ष: । इति राजनिर्घण्ट: ॥

रुट, ङ स्तेये । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-
सक०-सेट् ।) पञ्चमस्वरी । ङ, रुण्टते धनं
चौरेण । इति दुर्गादास: ॥

रुट, ऌ ङ दीप्तिप्रतिहत्यो: । इति कविकल्पद्रुम: ॥
(भ्वा०-आत्म०-सक०-अक० च-सेट् ।) ऌ,
अरुटत् । ङ, रोटते । प्रतिहति: शोकादिना
पातनं पुनर्घर्षणं वा । इति दुर्गादास: ॥

रुट, क दीप्तौ । दुर्नौ । इति कविकल्पद्रुम: ॥
(चुरा०-पर०-अक०-सेट् ।) क, रोटयति ॥
इति दुर्गादास: ॥

रुट् [ष्] स्त्री, (रुष्+क्विप् ।) क्रोध: । इत्य-
मर: ।१।७।२६ ॥ (यथा, भागवते । ३।१८।३० ।
"स तु ब्रह्म ऋषेर्वंशे गतासुसुरगं रुषा ।
विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागत: ॥")

रुट, उपघाते । इति कविकल्पद्रुम: ॥ (भ्वा०-
पर०-सक०-सेट् ।) रोटति लोकं शोक: ।
इति दुर्गादास: ॥

रुट, ङ गत्यालस्यस्तेयखोटे । इति कविकल्पद्रुम: ॥
(भ्वा०-पर०-सक०-अक० च-सेट् ।) पञ्चमस्वरी ।
ङ, रुण्ठते । आलस्यं मन्दीभाव: । स्तेयं
चौर्य्यम् । खोट: खोड़नम् । इति दुर्गादास: ॥

रुठ, ऌ ङ प्रतीघाते । इति कविकल्पद्रुम: ॥
(भ्वा०-आत्म०-सक०-सेट् ।) ऌ, अरुठत् ।
ङ, रोठते । प्रतीघात: शोकादिना पतनं
पुनर्घर्षणं वा । इति दुर्गादास: ॥

रुड़्, [ध्] स्त्री, (रुध क्रुधि+क्विप् ।) रुट् ।
इति व्याकरणम् ॥

रुण्डकरा, स्त्री, सुखसन्दोह्या गौ: । इति शब्द-
चन्द्रिका ॥

रुण्ड:, पुं, कबन्ध: । इति जटाधर: ॥ (छिन्नमार-
हस्त: । यथा, कथासरित्सागरे । ६५ । ११ ।
"तेनारोप्य स्थलं पृष्ठ: स रुण्ड: पुरुषोऽभ्यधात् ।
निकृत्तहस्तचरणो नद्यां क्षिप्तोऽस्मि शत्रुभि: ॥")

रुण्डिका, स्त्री, (रुण्ड: कबन्धोऽस्त्यत्रेति । रुण्ड+
ठन् ।) युद्धभूमि: । द्वारपिण्डिका । विभूति: ।
इति शब्दरत्नावली ॥

रुतं, क्ली, (रु+क्त: ।) पशुपक्ष्यादीनां शब्द: ।
तत्पर्य्याय: । वाशितम् २ । इत्यमर: ॥ वासि-
तम् ३ । इति शब्दरत्नावली ॥ (यथा, शिशु-
पालवधे । १६ । २५ ।
"अनुहुङ्कुरुते घनध्वनिं
न तु गोमायुरुतानि केशरी ॥")

रुद, अ क इर् रोदे । इति कविकल्पद्रुम: ॥
(अदा०-पर०-अक०-सेट् ।) रोदोऽश्रुविमो-
चनम् । अ क, रोदिति लोक: शोकात् । इर्,
अरुदत् अरोदीत् । रोदिष्यमाणमात्मानमिति
भट्टौ । आह्वानविशिष्टरोदनक्रियाव्याप्यत्वात्
सकर्म्मकत्वमिति जयमङ्गला । इति दुर्गादास: ॥

रुदथ:, पुं, (रोदितीति । रुद् रोदने+"रुदि-
विदिभ्यां ङित् ।" उणा० ३ । ११६ । इति
अथ: । स च ङित् ।) कुक्कुर: । इत्युणादिकोष: ॥
शिशु: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

रुदन्तिका, } स्त्री, (रोदनं रुत् । अन्ति अदि
रुदन्ती } बन्धने+अच्+ङीष् । स्वार्थे कन्
च ।) क्षुद्रक्षुपविशेष: । तत्पर्य्याय: । सवणीया २
सञ्जीवनी ३ अमृतस्रवा ४ रोमाञ्चिका ५
महामांसी ६ चणपत्री ७ सुधास्रवी ८ । अस्या
गुणा: । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषा-
यत्वम् । कृमिरक्तपित्तकफश्वासमेहनाशित्वम् ।
रसायनत्वञ्च । अस्य स्वरूपं यथा,—
"चणपत्रसमं पत्रं क्षुपश्चैव तथाकृति: ।
शिशिरे जलविन्दूनां स्रवन्तीति रुदन्तिका ॥"
इति राजनिर्घण्ट: ॥
अस्य गुणा: ।
"रुदन्ती वह्निकृद्दृष्या पित्तघ्नी च रसायनी ॥"
इति राजवल्लभ: ॥
(रोदनशीले, त्रि । यथा,—
"धरित्रि पुष्पाञ्जलिरेष तुभ्यं
सुता मदीयास्तव पालनीया: ।
इतीव रम्भा नमिताग्रमौलिना
भृशं रुदन्ती मकरन्दविन्दुना ॥"
इति प्रसिद्धम् ।)

रुदितं, क्ली, (रुद्+क्त: ।) क्रन्दनम् । इत्यमर: ॥
तद्वति, त्रि ॥ (यथा, महाभारते । १३।२३।६ ।
"केशकीटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितञ्चावधूतञ्च तं भागं रक्षसां विदु: ॥")

रुद्धं, त्रि, (रुध्+क्त: ।) नदीप्राकारादिना
कृतवेष्टनम् । तत्पर्य्याय: । वेष्टितम् २ वल-
यितम् ३ संवीतम् ४ आवृतम् ५ । इत्यमर: ॥
(यथा, मेघदूते । ३८ ।
"रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभि: ॥")

रुद्र:, पुं, (रोदयतीति । रुद्+णिच्+"रोदेर्णि
लुक् च ।" उणा० २ । २२ । इति रक् । णेश्च
लुक् ।) आदित्यपत्रवृक्ष: । इति राजनिर्घण्ट: ॥
शिव: । (यथा, महाभारते । १३ । १७ ।४६ ।
"त्रिजटश्चीरवासाश्च रुद्र: सेनापतिर्विभु: ॥")
गणदेवताविशेष: । इत्यमर: ॥ अयं अग्नि-
मूर्त्ति: । यथा रुद्राय अग्निमूर्त्तये नम: । इति
तिथ्यादितत्त्वे शिवपूजापद्धति: ॥ स च ब्रह्मण:
क्रोधरूप: सृष्टिकाले भ्रूमध्याज्जात: । तत्-
गण: भूतप्रेतपिशाचादि: । अयमेवान्ते संहार-
कर्त्ता । इति भागवतम् ॥ * ॥ अथैकादश-
रुद्रनामानि यथा । अज: १ एकपात् २ अहि-
ब्रध्न: ३ पिनाकी ४ अपराजित: ५ त्र्यम्बक: ६

महेश्वरः ७ वृषाकपिः ८ शम्भुः ९ हरणः १० ईश्वरः ११ । इति महाभारते दानधर्म्मः । * ।
अपि च ।
"अजैकपादहिर्ब्रध्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः ।
वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृताः ॥"
इति जटाधरः । * ।

अन्यच्च ।
"अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च वीर्य्यवान् ।
त्वष्टुश्चाप्यात्मजः पुत्त्रो विश्वरूपो महातपाः ॥
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥"
इति गारुडे ६ अध्यायः ।

अग्निपुराणे त्वष्टृस्थाने कृत्तिवासाः । * । अपरञ्च ।
"अजैकपदहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥
एतेषां मानसानान्तु त्रिशूलवरधारिणाम् ।
कोटयश्चतुरशीतिस्तत् पुत्त्राश्चाक्षया मताः ॥
दिक्षु सर्व्वासु ये रक्षां प्रकुर्व्वन्ति गणेश्वराः ।
पुत्त्रपौत्त्रसुतास्त्वेते सुरभीगर्भसम्भवाः ॥"
इति मात्स्ये ५ अध्यायः । * ।

तस्य उत्पत्तिर्यथा,—
"प्रजाः स्रष्टुमनास्तेपे तपः परमदुश्चरम् ।
तस्यैवं तप्यमानस्य न किञ्चित् समवर्त्तत ॥
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः ॥
ततस्तेभ्योऽश्रुबिन्दुभ्यो भूताः प्रेतास्तदाभवन् ।
सर्व्वांस्तानग्रजान् दृष्ट्वा ब्रह्मात्मानमनिन्दत ॥
तदा प्राणमयो रुद्रः प्रादुरासीत् प्रभोर्मुखात् ।
सहस्रादित्यसङ्काशो युगान्तदहनोपमः ।
रुरोद सुस्वरं घोरं देवदेवः स्वयं शिवः ।
रोदमानं तदा ब्रह्मा मारोदीरित्यभाषत ।
रोदनादिह रुद्रेति लोके ख्यातिं गमिष्यसि ॥
अन्यानि सप्त नामानि पत्नीः पुत्त्रांश्च शाश्वतान् ।
स्थानानि चैषामष्टानां ददौ लोकपितामहः ॥
भवः शर्व्वस्तथेशानः पशूनाम्पतिरेव च ।
भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणश्चन्द्र इत्येता अष्टमूर्त्तयः ॥
स्थानेषु तेषु ये रुद्रं ध्यायन्ति मनुजाधिप ।
तेषामष्टतनुर्देवो ददाति परमं पदम् ॥
सुवर्च्चला तथैवोमा विकेशी च शिवा तथा ।
स्वाहा दिशा च दीक्षा च रोहिणीति च पत्नयः ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चैषां सुताः स्मृताः ॥"
इति कौर्म्मे १० अध्यायः । * ।

विष्णुरुद्रयोरभेदो यथा,—
"सदैव देवो भगवान् महादेवो न संशयः ।
मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात् ।
मोहादवेदनिष्ठत्वात् ते यान्ति नरकं नराः ॥
वेदानुवर्त्तिनं रुद्रं देवं नारायणन्तथा ।
एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते ॥"
इति च तत्रैव ११ अध्यायः । * ।
कल्पभेदे तस्योत्पत्तिनामस्थानभार्य्यादीनि यथा,
"चुकोप च ततो ब्रह्मा ज्वलन्निव हुताशनः ।
ततः कोपं स्वपुत्त्रेभ्यः सततमन्वार्थमित्यपि ॥
विचार्य्य परिवर्त्तन्तं नियन्तुमुपचक्रमे ।
यत्नान्नियम्यमानोऽपि स कोपः परमेष्ठिनः ॥
भ्रुवोर्म्मध्यादयोद्भूतः कुमारो नीललोहितः ।
जातमात्रः कुमारोऽसौ रुरोद भगवान् भवः ॥
ब्रह्मोवाच कथं पुत्त्र रोदिषि त्वं महाबल ।
तन्मे कथय कामन्ते सद्यः सम्पादयाम्यहम् ॥
रुद्र उवाच ।
नामानि कुरु मे ब्रह्मन् ! स्थानानि च जगद्गुरो ।
पत्नीश्च देहि भगवन् ततः शान्तिर्भविष्यति ॥
ब्रह्मोवाच ।
जानामि त्वां देवदेवं पूर्व्वं दत्तं वरं मम ।
सर्व्वं कर्त्तुं भवान् जातस्त्वं हि सर्व्वेश्वरेश्वरः ॥
जातमात्रो रोदिषि त्वं ततो रुद्र इति स्मृतः ।
नामान्यन्यानि ते देव विधास्ये शृणु पुत्त्रक ॥
शतधन्वा मनुर्म्मन्युरुग्ररेता महान् शिवः ।
भवः कालो महिनसो वामदेवो धृतव्रतः ॥
एतानि तव नामानि ये स्मरन्ति नरा भुवि ।
तेषां सदैव कल्याणं करिष्यसि महामते ॥
स्थानानि च प्रवक्ष्यामि तेषु वासो विधीयताम् ।
इन्द्रियाण्यसुहृद्व्योम वायुरग्निर्जलं मही ।
तपश्चन्द्रश्च सूर्य्यश्च स्थानान्येतानि ते भव ॥
धृतिर्धीरशिलोमा च नियुत् सर्पिरिलम्बिका ।
इरावती स्वधा दीक्षा योषितस्तव सुन्दरी ॥
प्रजाः सृज महाभाग जगदेतत् प्रपूरय ॥
इत्यादिष्टः स भगवान् ब्रह्मणा नीललोहितः ।
ससर्ज्ज स प्रजा वह्नीर्भूतप्रेतपिशाचकान् ।
कुष्माण्डान् विकृताकारान् भैरवान् भीमनादिनः ॥
तान् दृष्ट्वा तु तदा ब्रह्मा जगद्विनाशकान् बहून् ।
वारयामास पुत्त्र त्वं मा स्राक्षीरीदृशीः प्रजाः ॥
तपसा विष्णुमाराध्य विहरस्व यथासुखम् ।
इति ते कथितो राजन् ! रुद्रसर्गः प्रजापतेः ॥
यं श्रुत्वापि नरः सद्यो जह्याद्भूतकृतं भयम् ॥"
इति पाद्मे सृष्टिखण्डे रुद्रसर्गः ८ अध्यायः । * ।
प्रकारान्तरं यथा,—
"कथितस्तमसः सर्गो ब्रह्मणोऽयं महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः ॥
रुरोद वै सुस्वरं सोऽथ द्रवंश्च द्विजसत्तम ॥
किं रोदिषीति तं ब्रह्मा रुदन्तं . . .
नाम देहीति तं सोऽथ प्रत्युवाच . . .
रुद्रस्त्वं देव नाम्नासि मारोदीर्धैर्य्यमाप्नुहि ।
एवमुक्तः पुनः सोऽथ सप्तकृत्वो रुरोद ह ।
ततोऽन्यानि ददौ तस्मै . . .
स्थानानि चैषामष्टानां पत्नीः . . .
भवं शर्व्वमथेशानं तथा पशुपतिं द्विज ।
भीममुग्रं महादेवमुवाच स पितामहः ॥
चक्रे . . .
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम . . .
सुवर्च्चला तथैवोषा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च . . .
सूर्य्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह ।
पत्न्यः स्मृता महाभाग तदपत्यानि . . .
येषां सूतिप्रसूतैश्च इदमापूरितं जगत् ।
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ . . .
एवंप्रकारो रुद्रोऽसौ सतीं भार्य्यामविन्दत ।
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ।
हिमवद्दुहिता साभूत्मेनायां द्विजोत्तम ।
उपयेमे पुनश्चोमामनन्यां भगवान् हरः ।
देवौ धाता विधातारौ भृगोः
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ।"
इति विष्णुपुराणे १ अंशे ८ अध्यायः ।
("द्वितीये हि युगे . . .
दिव्यं सहस्रवर्षाणामसुरा अजिताः ।
तपोविघ्नं शमीकर्त्तुं तपोविघ्नं महत् . . .
पश्यन् समर्थश्चोपेक्षाञ्चक्रे दक्षः प्रजापतिः ।
पुनर्माहेश्वरं भागं ध्रुवं दक्षः प्रजापतिः ।
प्राप्तो न कल्पयामास प्रोच्यमानः सुरैः . . .
पाशुपत्यव्रतो यश्च प्रोच्यते . . .
यज्ञसिद्धिस्ततस्ताभिर्दीक्षितैव स ददर्श ।
अथोत्तीर्णव्रतो देवो बुद्ध्वा दक्षव्यतिक्रमम् ।
रुद्रो रौद्रं पुरस्कृत्य भावमात्मविदात्मनः ।
सृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् . . .
बालं क्रोधाग्निसन्तप्तमसृजत् प्रभुस्ततः ।
ततो यज्ञः स विध्वस्तो व्यथिताश्च . . .
दाहव्यथा परीताश्च भ्रान्ता भूतगणा . . .
इति चरके चिकित्सास्थाने तृतीयेऽध्याये ।
रुद्रगीता वराहपुराणे द्रष्टव्या । * ।
कर्म्मपुरुषविशेषः । यथा, विष्णुपुराणे ३ । १५ । १२२ ।
"तस्य पुत्त्रास्तु चत्वारस्तेषां नामानि . . .
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च वीर्य्यवान् ।
श्रमनामख्यातः कविविशेषः । स च . . .
पुत्त्रः भावविलासप्रणेता । कविरयं . . .
पुत्त्रस्य भावसिंहमहीपतेः सभायां
स च . . .
राजस्य मोदकः पूर्व्वपुरुषः । तस्य . . .
विलासे । १३४—१३६ ।

"अन्यापदेशविनिवेशपविदग्धबुद्धि-
श्रीभावसिंहनरसिंहनियोगयोगात् ।
सम्पादितो विविधभावविकाशभाजां
प्रीत्यै भृशं भवतु भावविलास एषः ॥
…गानां समुद्देश रुद्रेण ग्रथिता गुणैः ।
…ला श्लोकमालेयं केषां न कुरुते श्रियम् ॥
…द्याविलासपुत्रस्य न्यायवाचस्पतेरियम् ।
…व्यासापविदग्धानां मुदं निर्म्मातु निर्म्मितिः ॥")
…कवचं, क्ली, (रुद्रस्य कवचम् ।) शिवनाम-
…पेण सर्व्वाङ्गरक्षकम् । यथा,—
…ध्यामि रुद्रकवचमाद्यं शापस्य रक्षणम् ।
…घोराघं महादेव रक्षार्थं देवनिर्म्मितम् ॥
…रुद्रो मामग्रतः पातु पृष्ठतः पातु शङ्करः ।
…पर्द्दी दक्षिणे पातु वामपार्श्वे तथा हरः ॥
…वः शिरो मे च पातु ललाटे नीललोहितः ।
…घ्रामकः पातु मुखे पातु महेश्वरः ॥
…देवो नासिकायाञ्च जिह्वायां शम्भुरव्ययः ।
…कण्ठस्तु गले पातु बाह्वोः पातु पिनाकधृक् ॥
…हृदयं मे महादेव ईश्वरस्तु तथोदरम् ।
…भौ कृष्णो कटिस्थाने पातु सर्व्वं प्रजापतिः ॥
…रू पातु महादेवः पादौ पातु महेश्वरः ।
…र्व्वं रक्षतु भूतेशः सर्व्वगात्राणि यत्नतः ॥
…शुं शूलपाशाद्यं दिव्यास्त्रं रौद्रमेव च ।
…नमस्काराय देवेश रक्ष मां जगदीश्वर ॥
…पेभ्यो महतीभ्यो रोगशोकार्द्देषु च ।
…भ्यो नरकेभ्यश्च पाहि मां भक्तवत्सल ॥
…न सङ्कटैर्यत्र व्याधिः कामः क्रोधः क्षमी
दमः ।
[illegible] …पि त्वमस्तु भुवनेश्वर ॥
…तिरहं मतिश्चैव त्वं बुद्धिस्त्वं परायणः ।
… मनसा वाचा त्वयि भक्तिर्दृढास्तु मे ॥
…तिरुद्रकवचं पठतः पापनाशनम् ।
…देवप्रसादेन दुर्व्वासःपरिकीर्त्तितम् ॥
…तस्य पापदेहोऽपि भयं तस्य न विद्यते ।
…प्नोति सुखमारोग्यं पुण्यमायुष्यवर्द्धनम् ॥
…र्थी लभते पुत्रं धनार्थी लभते धनम् ।
…र्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नु-
यात् ॥
… [illegible] भवेन्नरः ।
…र्व्वपापेभ्यो रुद्रलोकं स गच्छति ।"
…स्कन्दपुराणे रुद्रकवचं समाप्तम् । इति
[illegible] ॥
…, पुं, (रुद्रस्य गणः ।) शिवपार्षदगणः ।
…था,—
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
च ।
[illegible]
[illegible]

IV.　　[illegible]

"षट्त्रिंशत्कोटयश्चैव रुद्रस्य सकला गणाः ।
वराहगजनाशार्थं हिताय जगतां तथा ।
शङ्करस्याथ सेवायै मनुष्यता इमे गताः ॥"
इति कालिकापुराणे ३९ अध्यायः ॥

रुद्रचण्डी, स्त्री, (रुद्रा चण्डी ।) रुद्रयामलोक्त-
देवीमाहात्म्यम् । यथा । "अस्य चण्डिका-
महामन्त्रस्य महारुद्र ऋषिरनुष्टुप् छन्द-
श्चण्डिका देवता रुद्रचण्डीजपे विनियोगः । ॐ
नमश्चण्डिकायै ।

श्रीशङ्कर उवाच ।

चण्डिकां हृदये न्यस्य स्मरणं यः करोत्यपि ।
धनलाभमवाप्नोति देवि चण्डीप्रसादतः ॥
रविवारे यदा चण्डीं पठेदागमसम्मताम् ।
नवावृत्तिफलं तस्य जायते नात्र संशयः ॥
सोमवारे यदा चण्डीं पठेद्यस्तु समाहितः ।
सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रते ॥
कुजवारे जगद्धात्रि पठेद्यामलसम्मताम् ।
शतावृत्तिफलं तस्य बुधे लक्षफलं भवेत् ॥
गुरौ यदि महामाये लक्षद्विगुणफलं ध्रुवम् ।
शुक्रे देवि जगद्धात्रि चण्डीपाठेन शङ्करि ॥
शिवं तुल्यफलं दुर्गे यदि चण्डीं समाहितः ।
शनिवारे जगद्धात्रि कोट्यावृत्तिफलं ध्रुवम् ॥
अतएव जगद्धात्रीं यश्च चण्डीं समभ्यसेत् ।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत् ॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम् ।
पठनाच्छ्रवणाच्चैव जायते नात्र संशयः ॥
धनं धान्यं प्रवालञ्च वस्त्ररत्नविभूषितम् ।
चण्डीपाठनमात्रेण कुर्य्यात् सर्व्वं महेश्वरि ॥
ॐ घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी ।
चतुर्वक्त्रा महामाया महादेवविभूषिता ॥
चतुर्वक्त्रा इत्यपि पाठः ।
रक्तदन्ता वरारोहा महिषासुरमर्द्दिनी ।
तारिणी जननी दुर्गा चण्डिका चण्डविक्रमा ॥
गुह्यकाली जगद्धात्री चण्डी च यामलोद्भवा ।
श्मशानवासिनी देवी घोरचण्डी भयानका ॥
शिवा घोरा रुद्रचण्डी महेशगणभूषिता ।
जाह्नवी परमा कृष्णा महात्रिपुरसुन्दरी ॥
श्रीविद्या परमा विद्या चण्डी च वैरमर्द्दिनी ।
दुर्गे दुर्गा शिवा घोरा चण्डहन्त्री प्रचण्डिका ।
माहेशी बगला देवी भैरवी चण्डविक्रमा ।
प्रमथैर्भूषिता कृष्णा चामुण्डा मुण्डमर्द्दिनी ॥
रणखण्डा चन्द्रघण्टा रणे रामवरप्रदा ।
मारिणी भद्रकाली च शिवा घोरा भयानका ॥
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा ।
मङ्गला जननी चण्डी महाक्रुद्धा भयङ्करी ॥
विमला भैरवी निद्रा जातिरूपा मनोहरा ।
तृष्णा निद्रा क्षुधा माया शक्तिर्माया मनोहरा ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नान्यस्तु पाठको देवी पठने नफला भवेत् ॥
नारदः पाठकश्चैव कैलासे रत्नभूषिते ।
वैकुण्ठे ब्रह्मलोके च देवराजपुरे शिवे ।
यः करोति परार्थञ्च मुच्यते सर्व्वपातकैः ।
ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम् ॥
तत् सर्व्वं पातकं दुर्गे मातृगमनपातकम् ।
स्वर्णानयनपापञ्च यत् कन्यागमपातकम् ॥
गुरुस्त्रीगमनञ्चैव यत् यत् पापं प्रजायते ।
परदारकृतं पापं तत्क्षणादेव नश्यति ॥
जन्मजन्मान्तरात् पापात् गुरुहत्यादिपातकात् ।
मुच्यते मुच्यते देवि गुरुपत्नीषु सङ्गमात् ॥
मनसा वचसा पापं यत् पापं ब्रह्महिंसने ।
मिथ्यापापैश्च यत् पापं तत् पापं नश्यति क्षणात् ॥
श्रवणं पठनञ्चैव यः करोति परात्परे ।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत् ॥
यः करिष्यत्यश्रद्धां वै रुद्रयामलचण्डिकाम् ।
पातकैः समायुक्तो रौरवं नरकं व्रजेत् ॥
अश्रद्धां ये प्रकुर्व्वन्ति ते च पातकिनो नराः ।
रौरवं रेतःकुण्डञ्च कृमिकुण्डं प्रयान्ति ये ॥
[illegible]
[illegible] विष्ठायां जायते कृमिः ॥
अतो देवि महामाये पठेत् चण्डीं [illegible] ।
[illegible] काश्यां विश्वेश्वरागमः ॥
प्रयागे [illegible] हरिद्वारे हरेर्हरे ।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे रमे ॥
शिवरात्रौ शिवाग्रे वै यत् पुण्यं [illegible] शिवे ।
तत्पुण्यं तत्पुण्यं तत्पुण्यं न संशयः ॥
भवानी च भवानी च भवानीत्युच्यते बुधैः ।
भकारस्तु भकारस्तु भकारः केवलः शिवः ॥
वाणी चैव जगद्धात्री वराणी भकारकः ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

मनुष्यप्रिया मांसरता मनुष्यमांसबलिप्रिया ।
मदमत्ता सदा नित्या भूतप्रमथसङ्गता ।
मध्यभागा महारामा धान्यदा धनरत्नदा ।
वस्त्रदा मणिदा राज्यप्रदा विषयवर्द्धिका ।
मुक्तिदा सर्व्वदा चण्डी महाविपन्नाशिनी ॥

इमाञ्च चण्डीं पठते मनुष्यः
शृणोति भक्त्या परमां शिवस्य ।
चण्डीं धरण्यामतिपुण्ययुक्तः
स्तौषि गच्छेद्धरमन्दिरं शुभम् ॥

यद्युद्यमेनोदयात् दुर्गां करोति धरणीतले ।
रुद्रचण्डीप्रसादेन किं न सिध्यति भूतले ॥
रुद्रश्रीया रुद्ररूपा रुद्राणी रुद्रवल्लभा ।
रुद्रभक्ता रुद्ररूपा रुद्रभूषासमन्विता ॥
शिवचण्डी महारक्ता शिवप्रीतिगणान्विता ।
भैरवी परमा विद्या महाविद्या च षोड़शी ॥
सुन्दरी परमा विद्या महात्रिपुरसुन्दरी ।
गुह्यकाली भद्रकाली महाकालविमर्द्दिनी ॥
कृष्णा कृष्णस्वरूपा सा जननी मोहकारिणी ।
अतिलक्ष्मा महालक्ष्मा सर्व्वमङ्गलदायिनी ॥
घोरचण्डी भीमरूपा भीमा देवी मनोहरा ।
वगला वगला सिद्धिदायिका सर्व्वदा शिवा ॥
स्मृतिरूपा कीर्त्तिरूपा बुद्धिरूपा मनोहरा ।
विष्णुप्रिया शक्रपूज्या योगेन्द्रैरपि सेविता ॥
भयानका महालक्ष्मा देवी भयविनाशिनी ।
चण्डिका शक्तिहस्ता च कौमारी सर्व्वकामदा ॥
वाराही च वराहस्य इन्द्राणी शक्रपूजिता ।
माहेश्वरी महेशस्य महेशगणभूषिता ॥
चामुण्डा नारसिंही च नृसिंहशत्रुनाशिनी ।
सर्व्वशत्रुप्रशमनी सर्व्वारोग्यप्रदायिनी ॥
नैव दुःखं भयं किञ्चित् पठनात् श्रवणाज्जनः ।
इति सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ॥
नैव शोकं नैव रोगं नैव दुःखं भयन्तथा ।
आरोग्यं मङ्गलं नित्यं करोति शुभमङ्गलम् ॥
महेशानि वरारोहे ब्रवीमि सत्यमुत्तमम् ।
अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥
मम भक्ताय शान्ताय शिवविष्णुप्रियाय च ।
दद्यात् कदाचिद्देवेशि सत्यं सत्यं न संशयः ॥
अवश्यफलमाप्नोति शिवचण्डीप्रसादतः ।
अश्वमेधवाजपेयराजसूयशतेन वै ।
तृप्ताः स्युः पितरो देवास्तथा च सर्व्वदेवताः ॥
दुर्गे त्वां श्रवणधीमानं यन्यामलपुस्तकम् ।
सततमपरमेशानं यः करोति नराधमः ॥
अतएव महेशानि किं वक्ष्ये तव सन्निधौ ।
लम्बोदरादिकचण्डीपठनाच्छ्रवणात् जनः ।
सत्यमहौति नाकेन मुक्तिमाप्नोति दुर्लभाम् ॥”
इति श्रीरुद्रयामले हरगौरीसंवादे रुद्रयामलचण्डी समाप्ता ॥

रुद्रजः, पुं, (रुद्रात् जात इति । जन्+डः ।) पारदः । इति राजनिर्घण्टः । (तुद्यादयोऽप्यस्य पारदशब्दे विज्ञेयाः ।)

रुद्रजटा, स्त्री, (रुद्रस्य जटेव ।) लताविशेषः । तत्पर्य्यायः । रौद्री २ जटा ३ बद्रा ४ सौम्या ५ सुगन्धा ६ सुवहा ७ घना ८ ऐश्वरी ९ रुद्रलता १० सुपथा ११ सुगन्धपत्रा १२ सुरभिः १३ शिवाह्वा १४ पत्रवल्ली १५ जटाह्वमी १६ रुद्राणी १७ नेत्रपुष्करा १८ महाजटा १९ जटारुद्रा २० । अस्या गुणाः । कटुत्वम् । श्वासकासहृद्रोगभूतरक्षोनाशित्वञ्च । इति राजनिर्घण्टः ॥

रुद्रपत्नी, स्त्री, (रुद्रस्य पत्नी ।) दुर्गा । इत्यमरादिकोषः ॥ (यथा, महाभारते । ३ । ८३ । १५८ ।
“सान्निध्यं तत्र राजेन्द्र रुद्रपत्न्याः कुरूद्वह ।
अभिगम्य च तां देवीं न दुर्गतिमवाप्नुयात् ॥”)
अतसी । इति रत्नमाला ॥

रुद्रप्रिया, स्त्री, (रुद्रस्य प्रिया ।) हरीतकी । इति शब्दरत्नावली ॥ पार्व्वती च ॥

रुद्रभूः, स्त्री, (रुद्रस्य भूः स्थानम् ।) श्मशानम् । इति केचित् ॥

रुद्रविंशतिः, स्त्री, (रुद्रदेवताका विंशतिः ।) प्रभवादिषष्टिवर्षान्तर्गतशेषविंशतिवर्षाणि । तेषां नामानि फलानि च यथा,—
“आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता ।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत् ।
कृष्णधान्यानि पीड्यन्ते शौद्रे वर्षति वासवः ।
श्वङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत् ॥२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम् ॥३॥
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४॥
वासवो वर्षते देवि देशे चाहवमण्डले ।
अहिच्छत्रे कान्यकुब्जे विरोधी छविनाशकृत् ॥५॥
अभिभूतं जगत् सर्व्वं रोगैर्बहुविधैः प्रिये ।
मारुतैः जलदाश्चैव परिवारिणि शोभने ॥६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जनोद्धारी जलदो मोदते प्रजा ॥७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दितो प्रजा ॥८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुरा प्रजा ॥९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचारणा ॥१०॥
देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चाप्यपवादि दुर्भिक्षं नर्म्मदातटे ॥११॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यमाम्रादयोऽपराः ।
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्द्दिनम् ।
पार्थिवा मोषका दीनाः कामयुक्ते प्रपीड़िताः ॥१२॥

तोयपूर्णाः स्मृता दे...
निष्ठुराः पार्थिवा ...
अकालेऽपि घनाश्चैव ...
निष्ठुराः पार्थिवा देवि ...
दुर्भिक्षं मध्यमं प्रोक्तं ...
मेरौ ...
सुभिक्षं ...
प्राणिनो जायते सर्व्वे दुर्द्धे...

तत् सर्व्वं देवि ...
रक्ते संवत्सरे देवि क्रूरदुर्ध...
मानवाः ...
दुर्भिक्षं मरणं रोगो ...
पापरोगो महेश्वरि ...
रोगो मरणदुर्भिक्षं ...
क्रोधे तु विषमं सर्व्वं ...
मेदिनी चलते देवि ...
देशभङ्गश्च दुर्भिक्षं क्षये ...
सौराष्ट्रे मालवे देवि ...
दुर्भिक्षं जायते घोरं क्षये ...

निम्नायां केङ्कणे चैव निष्ठुर...
सिंहलो मरुदेशश्च काश्मीर...
क्षये क्षयन्ति सर्व्वाणि धान्य...

रुद्रवीणा, स्त्री, (रुद्रस्य वीणा ।) ...
यथा,—
“इष्टः ...
भ्रमरकुण्डान्वितं शुषिरं तत्र ...
दण्डस्योभयतो ज्ञेयं ...
पश्चात् ...
दण्डस्य वेष्टनं सार्द्ध...
सम्मिता लहरी तस्याः कर्त्तव्या
ककुभो रुद्रवीणायाः खदिरा...
ऊर्द्धे शिरसि दातव्या कोहणी
मूलतन्त्री तदुपरि तस्याः कौलि...
दक्षिणे शिरसि अस्तेत् मुक्तिकौ...
एवन्तु ककुभं तत्र वीणायाः शिर...
द्वादशाङ्गुलमङ्गं शिरोऽङ्गुष्ठमात्रम्...
समाङ्गुलान्तरं तस्मात् अमूलस्य विधि...
अन्यं ततश्चतुर्विंशदङ्गुलान्तरमा...
अष्टादशाङ्गुलवशं पक्षे वै ...
दण्डं सुसमतं कान्तं वर्त्तुलं सुमध्य...
औन्नत्ये किञ्चिदाधिक्यमत्यन्त...
अष्टाङ्गुलान्तरं पश्चादुन्नतं ...
दण्डपृष्ठे रन्ध्रमेकं स्थापयेच्च ...
लोहाङ्कुशन्तु कर्त्तव्यं वर्त्तुलं ...
तद्रन्ध्रगं शुभं तस्मिन् वेष्टने ...
एतत्परायां मोटिन्यां वेष्टन्याङ्गुल...
तस्मादुन्नतरन्ध्रयष्टिं दण्डस्य...
सुयन्त्रिते तु तत्रैव बध्नीयादङ्गुल...
तावच्च भ्रामयेत् पूर्व्वो मोटनीच...

…त्वदेति स्वस्थानं तन्त्री यन्त्रविशारदः ॥
…ाक्षदादश प्रोक्ताः शारिकाः पूर्व्वसूरिभिः।
…ईश्वरा चष्टौ दश च्युताः प्रकीर्त्तिताः ॥
…ास्तु तारयादिम्यस्तिष्ठन्ति पत्रिकोपरि।
…त्तिमात्रपत्रिकाङ्गुष्ठोच्चाप्यस्य गर्भकः ॥
…न् शून्यस्तु कर्णयो यथा दण्डे स्थिरो भवेत्।
…नस्य च चिक्कणस्य योगेन सुदृढीकृता ॥
… । । शारीर्या स्वननीऽयं तलक्रमात्।
…स्तु सर्व्वावयवैः कथितास्त्र्यङ्गुला बुधैः ॥
…प्य दण्डस्य ताः पृष्ठे यथारागस्वरं पुनः।
…नस्य च चिक्कणस्य योगेन सुदृढीकृताः ॥
…ार्षां लोहकलिका मस्तके स्युः सुयन्त्रिताः।
…ाङ्गुलोच्चाः च्युताः स्युरिति शारीविनिर्णयः ॥
… विनिर्म्मिता रुद्रवीणा जनमनोहरा।
…सां शिचा तु कर्त्तव्या दाक्षिणात्योपदेशतः ॥"

इति सङ्गीतनारायणः ॥

…र्गः, पुं, (रुद्रकृतः सर्गः ।) रुद्रकर्तृकसृष्टिः।
…था,—

…दानीं रुद्रसर्गं त्वं शृणु पार्थिवसत्तम!।
…ृत्वर्षेमहस्राणि तपश्चीत्वा महाजले ॥
…ितुष्टो यदा रुद्रस्तदा चोर्व्वीं सकाननाम्।
…ा शस्यवतीं रम्यां मनुष्यपशुसंकुलाम् ॥
…ाव च सदा शब्दाञ्जलिना रुद्रसद्मनि।
…ाममे यज्ञिनाच्चोचैर्घोरास्त्वरिति कीर्त्तितान् ॥
…ः श्रुत्वा महातेजाः सर्व्वज्ञः परमेश्वरः।
…ोपि शुभ्रशं देवो वाक्यमेतदुवाच ह ॥
…दं पूर्व्वन्तु कथितं रुदः सर्व्वात्मना विभुः।
…ाः एतस्त्वेति सदा वाक्यमेतत्तथोक्तवान् ॥
…ानों केन तन् कर्म्म कृतं सृष्टादिवर्णनम्।
…पिका भृशं कोपाहमनाद परमेश्वरः ॥
…स ता नद्यो ज्वालाः श्रोत्रेभ्यो निर्ययुस्तदा।
…र भूतानि वेतालाः उग्रुग्राः प्रेतपूतनाः ॥
…डाका यातुधानाश्च सर्व्वे प्रज्वलिताननाः।
…स्तुः कोटिशतश्च नानाप्रहरणाहताः ॥"

इति वराहपुराणम् ॥

…सर्गि, पुं, द्वादशो मनुः। अस्मिन् मन्वन्तरे
…धामाख्योऽवतारः। ऋतधामा इन्द्रः। हरि-
…ाख्यो देवाः। तपोमूर्त्त्याद्यः सप्तर्षयः। देव-
…पदेवाद्यो मनुपुत्रा भविष्यन्ति। इति
…भागवतमतम्। अपि च।
…ादशे रुद्रपुत्रस्य प्राप्ते मन्वन्तरे मनोः।
…ारर्द्ध्याश्च ये देवा शृणुष्व गदतश्च तान् ॥
…ाम्राः सुमनसो हरितो रोहितस्तथा।
…ाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
…प्रकारा भविष्यन्ति एते वक्ष्यद्भुतो गणः।
…ामितो हि विज्ञेयो ऋतधामा महाबलः ॥
…ादिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु।
…ाम्रसो शुभसात्त्वोर्मूर्त्तिस्तपोनिधिः ॥
…ोऽतिनरन्देश्च सत्यस्तु सप्तोऽपि [illegible]।
…ाद् वामदेवश्च देववेदो [illegible]।
…[illegible] मनुसुता भविष्यन्ति नृपाः ॥"

इति मार्कण्डेयपुराणम् ॥

रुद्रसू:, स्त्री, (रुद्रं तत्परिमितपुत्रं सूते इति। सू + क्विप्।) एकादशपुत्रजननी। यथा,—
"विन्द्यत्दशपुत्रा स्यादेकाधिका तु रुद्रसूः ॥"

इति शब्दरत्नावली ॥

रुद्राक्रीडः, पुं, (रुद्रस्य आक्रीडा देवनं यत्र।) श्मशानम्। इति त्रिकाण्डशेषः ॥

रुद्राक्षं, क्ली, (रुद्रस्य अक्षि कारणत्वेनास्त्यस्येति। अर्श आदित्वादच्।) स्वनामख्यातवृक्षबीजम्। तस्य स्थूलत्वं प्रशस्तत्वञ्च यथा,—
"रुद्राक्षं शिवलिङ्गञ्च स्थूलं स्थूलं विशिष्यते।
शालग्रामो नर्म्मदश्च सूक्ष्मः सूक्ष्मो विशिष्यते ॥"

इति मेरुतन्त्रे ८ प्रकाशः ॥

रुद्राक्षः, पुं, स्वनामख्यातवृक्षः। तत्पर्य्यायः। तृणमेरुः २ अमरः ३ पुष्पचामरः ४। इति शब्दरत्नावली ॥ तस्य फलपर्य्यायः। शिवाक्षम् १ सर्पाक्षम् २ भूतनाशनम् ३ पावनम् ४ नीलकण्ठाक्षम् ५ हराक्षम् ६ शिवप्रियम् ७। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातकफशिरोऽर्त्तिभूतग्रहविषनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः ॥ शिवपूजायां अस्य मालाधारणमावश्यकम्। यथा, लिङ्गपुराणे।
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥"
तस्योत्पत्तिर्यथा। संवत्सरप्रदीपे।
"त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥"
यद्यप्येकादिचतुर्द्दशमुखरुद्राक्षेषु मन्त्रफलविशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमन्त्रावभिधीयेते। यथा,स्कान्दे।
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
हूं नमः इति प्रक्षिप्तमन्त्रेण नमः शिवायेति मन्त्रेण च शिवागमप्रणालीं धारणीयम्।
"विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः।
स याति नरकं घोरं यावदिन्द्राश्चतुर्द्दश ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

तस्य धारणे आवश्यकत्वं यथा, संवत्सरप्रदीपे।
"अरुद्राक्षधरो भूत्वा यद्यत् कर्म्म च वैदिकम्।
करोति जपहोमादि तत् सर्व्वं निष्फलं भवेत् ॥"
स्कान्दे।
"प्राणधारणमात्रोऽपि रुद्राक्षं धारयेद्बुधः।
सर्व्वपापविनिर्मुक्तः स याति परमां गतिम् ॥"

इति वैशारदीतन्त्रम् ॥

अथ रुद्राक्षमाहात्म्यम्।

श्रीमहादेव उवाच।
"रुद्राक्षं देवदेवेशि [illegible] धारणं शुभम्।
रुद्राक्षस्य च माहात्म्यं शृणु मे वरवर्णिनि ॥
श्रीदेव्युवाच।
"[illegible]
[illegible] ॥

रुद्राक्षं धारयेद्भक्त्या शिवलोकमवाप्नुयात् ॥
नववक्त्रन्तु रुद्राक्षं धारयेद्वामबाहुना।
दशबाहौ तथा वत्स! धारयेद्यतमानसः ॥
शिखायां दशनं धार्य्यं कण्ठे च पञ्चविंशतिम्।
कर्णयोः षट् संख्या हृदि चाष्टोत्तरं शतम् ॥
नाभौ सप्त च रुद्राक्षं धारणाच्छीघ्रभाग्भवेत्।
रुद्राक्षधारणादेव नरो देवत्वमाप्नुयात् ॥"
शिखायां दशनं द्वात्रिंशत्परिमितम् ॥ तथा।
"रुद्राक्षं धारयेन्नित्यं भक्तानाञ्च सुरेश्वर!।
रुद्राक्षस्य महाबाहो माहात्म्यं शृणु यत्नतः ॥
एकवक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति।
अवध्यत्वं प्रतिष्ठोत्तो वह्निस्तम्भं करोति च ॥
द्विवक्त्रे हरगौरी स्यात् गोवधाद्यघनाशकृत्।
त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाशयेत् ॥
तुलाराशिं यथा वह्निर्भस्मसात् कुरुते हर!।
त्रिवक्त्रोऽपि च रुद्राक्षस्तथा दहति किल्बिषम् ॥
चतुर्व्वक्त्रस्तु धाता स्यात् नरहत्यां व्यपोहति।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापहृत् ॥
षड्वक्त्रो यो गुहः साक्षात् गर्भहत्यां प्रमेदयन्।
सप्तवक्त्रो ह्यनन्तश्च स्वर्णस्तेयापहृत् सदा ॥
विनायकोऽष्टवक्त्रः स्यात् सर्व्वानृतविनाशकृत्।
भैरवो नववक्त्रः स्यात् शिवसायुज्यदायकः ॥
दशवक्त्रः स्वयं विष्णुर्भूतप्रेतपिशाचहा।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यो भवेदर्कः सर्व्वतीर्थफलप्रदः।
त्रयोदशमुखः कामः सर्व्वकामफलप्रदः ॥
चतुर्द्दशास्यः श्रीकण्ठो वंशोद्धारकरः स्मृतः।
यथोक्तोऽपि रुद्राक्षे तथान्यत्रापि प्रकीर्त्तितम् ॥
भद्राक्षोऽपि सुरश्रेष्ठ तद्गुणं परिकीर्त्तितम् ॥"

इति योगसारे २ परिच्छेदः ॥

अपि च।
"निष्क्रिमाच शुभदाय रुद्राक्षा धारणे स्मृताः।
पञ्चाशत्तं पञ्चमदं स्नानकाले प्रयोजयेत् ॥
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा।
त्र्यम्बकादिकमन्त्रञ्च तथा तत्र प्रयोजयेत् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥
तथा ॐ ह्रीं अघोरे ह्रीं घोरे हूं घोरघोरतरे
ॐ ह्रूँ ह्रीं श्रीं ऐं सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः हूं हूं।
अन्येनापि च मन्त्रेण रुद्राक्षस्य [illegible]।
[illegible] कुर्व्वात् [illegible] लभेत् ॥
[illegible] धारयेद् [illegible] ॥
एकादिचतुर्द्दशवक्त्राणां मन्त्राः प्रत्येकं [illegible]
तन्त्रे यथा। ॐ ॐ [illegible] नमः। १। ॐ ॐ नमः। २। ॐ ॐ नमः। ३। ॐ ॐ ह्रीं नमः। ४। ॐ हूं नमः। ५। ॐ हूं नमः। ६। ॐ ॐ हूं हूं नमः। ७। ॐ नमः। ८। हूं नमः। ९। ॐ ह्रीं नमः। १०। ॐ ह्रीं नमः। ११। ॐ ह्रीं नमः। १२। ॐ [illegible] नमः। १३। ॐ [illegible] नमः। १४।
"[illegible] ॥"

कोऽपि रुद्रपदं याति किं पुनर्मानवा गुह ।
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यः करोति नरः पुण्यं सर्व्वं कोटिगुणं भवेत् ।
यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुख ।
तस्य प्रीतो भवेद्रुद्रः स्वपदञ्च प्रयच्छति ।
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान् घोरान् यावदिन्द्राश्चतुर्द्दश ॥"
इति पद्मपुराणे रुद्राक्षमाहात्म्यम् । इति तन्त्रसारः ॥

रुद्राणी, स्त्री, (रुद्रस्य पत्नी । "इन्द्रवरुणभवशर्व्वरुद्रेति ।" ४ । १ । ४९ । इति ङीष् ।) दुर्गा । इत्यमरः ॥ तस्या व्युत्पत्तिर्यथा,—
"रुद्रार्थेषु रुद्राणी रौद्रं कर्म करोति या ।"
इति देवीपुराणे ४५ अध्यायः ॥
रुद्रजटा । इति राजनिर्घण्टः ॥

रुद्रावासः, पुं, (रुद्रस्य आवासः ।) काशी । इति केचित् ॥

रुद्रारिः, पुं, (रुद्रः अरिर्यस्य ।) कामदेवः । इति केचित् ॥

रुद्री, स्त्री, वीणाभेदः । इति शब्दरत्नावली ॥ अस्या विवरणं रुद्रवीणाशब्दे द्रष्टव्यम् ॥

रुध, इर् ध ञ औ नि आवृतौ । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) इर्, अरुधत् अरौत्सीत् । ध ञ, रुणद्धि रुन्धे । औ, रोद्धा । नि, रुद्धोऽस्ति । इति दुर्गादासः ॥

रुध, य ङ औ कामे । अनुपूर्व्वोऽयम् । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ, अनुरुध्यते धनं लोकः । औ, अनुरोद्धा । इति दुर्गादासः ॥

रुधिरं, क्ली, (रुणद्धि रुध्यते इति वा । रुध + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) शरीरस्थरक्तवर्णधातुः । तत्पर्य्यायः । रक्तम् २ अस्रम् ३ लगणम् ४ कीलालम् ५ क्षतजम् ६ शोणितम् ७ लोहितम् ८ असृक् ९ शोणम् १० लोहम् ११ चर्मजम् १२ । इति राजनिर्घण्टः ॥ (यथा,—
"तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा ।
युनक्ति प्राणिनं प्राणः शोणितं ह्यनुवर्त्तते ॥"
"वातदोषप्रमाणाद्वा विशुद्धा रुधिरस्य वा ।
रुधिरं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा ॥"
इति चरके सूत्रस्थाने चतुर्व्विंशेऽध्याये ॥
"चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणम् ।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।
तथा सम्पाचयेद्भस्म दाहः सङ्कोचयेत् शिराः ॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत् ।
सन्धाने भ्रश्यमाने तु पाचनैः समुपाचरेत् ॥
कल्पैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधि ।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥
सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते ।
सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम् ॥
देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्द्दशोऽध्यायः ॥
रुधिरस्रावेऽनध्यायत्वमुक्तं यथा, मनौ । ४ । १२२ ।
"रुधिरे च स्रुते गात्रात् शस्त्रेण च परिक्षते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥")
कुङ्कुमम् । इत्यमरः ॥ (यथा, रघुः । ११ । २० ।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥")

रुधिरः, पुं, (रुध + किरच् ।) मङ्गलग्रहः । इति मेदिनी ॥

रुधिराख्यं, क्ली, (रुधिरमिति आख्या यस्य ।) मणिभेदः । यथा,—
"हुतभुग्रूपधारस्य शान्तस्य अनीशितम् ।
कर्म्मरावौ विनिश्चित्य विचित्रोऽपि भुवने ॥
तथेन्द्रगोपकशिखं प्रत्यग्रार्कं
संस्थानतः पक्वपीलुफलमात्रम् ।
नानाप्रकारविहितं रुधिराख्यरत्न-
मूर्द्धञ्च तस्य खलु मूल्यमवाप्नोति ॥
मध्येन्द्रचापरागरुचिरविन्दुरक्तं
नवनीतकल्पं परमं तु विहितं स्यात् ।
मेचकधूम्रमवद्यं रुधिरं तदेव
यत्नेन तद्विक्रय भवेत् सुरभ्यमानम् ॥"
इति गारुडे ७४ अध्यायः ॥

रुप, य इर् विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) विमोह आकुलीकरणम् । य, रुप्यति लोकं लोभः । इर्, अरुपत् अरोपीत् । अयमपि पुषादिभिन्नश्च इत्यन्ये । इति दुर्गादासः ॥

रुमा, स्त्री, सुग्रीवभार्य्या । विषिरलवणाकरः । इति मेदिनी । मे, २० ॥

रुम्रः, पुं, (रम् + "चिकिरम्योरुच्चोपधायाः ।" उणा० २ । १३ । इति रक् उपधाया उत्वम् ।) अरुणः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुरुः, पुं, (रौतीति । रु + "रुशातिभ्यां क्रुन् ।" उणा० ४ । १०३ । इति क्रुन् ।) मृगविशेषः । इत्यमरः ॥ (यथा, महाभारते । ३ । ५० । ७ ।
"वराहानृष्यसंघांश्च मेध्यांश्चान्यान् वनेचरान् ।
बाणैरन्यैश्च विविधैर्विप्रेभ्यो न्यवेदयत् ॥")
अस्य मांसगुणाः । स्निग्धत्वम् । गुरुत्वम् । मन्दाग्निकफप्रदत्वञ्च । इति राजनिर्घण्टः ॥ दैत्यभेदः । इति मेदिनी । रे, ७८ ॥ (यथा, कथासरित्सागरे । ५३ । १०१ ।
"एकाकिनि प्रिये दुर्गे नारायणि सरस्वति ।
भद्रकालि महाकालि सिद्धिरुरुविदारिणि ॥"
क्रूरसर्पविशेषः । तस्य भारुण्ड इति नाम । इति भागवतटीकायां श्रीधरः । ५ । २६ । ११ ॥ यथा च देवीभागवते । ८ । २२ । १०—११ ।
"इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीडयन्ति तम् ॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥)

रुरु, पुं, (रु + क्रुन् ।) [illegible] । इति [illegible] ॥ ([illegible] ॥

रुरुकः, पुं, (रुरुरिव । रुरु + कन् ।) [illegible] । इति [illegible] राजनिर्घण्टः ॥

रुरुभ, पुं, दैत्यभेदः । इति [illegible]

रुरुः, पुं, [illegible] । इत्यमरः ॥ [illegible] पर्य्यायः ॥
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति भागवतपुराणे [illegible]

रुश, औ श हिंसे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) औ, रोष्टा । रुशति हिंसति । इति दुर्गादासः ॥

रुष, स क्रुधि । इति कविकल्पद्रुमः ॥ (पर०-अक०-सेट् ।) स, [illegible] रोषति [illegible] । इति दुर्गादासः ॥

रुष, णि बधे । इति कविकल्पद्रुमः ॥ ([illegible] सक०-सेट् ।) णि, रुषः [illegible] इति दुर्गादासः ॥

रुष, य इर् णि क्रुधि । इति [illegible] (दिवा०-पर०-अक०-सेट् ।) य, रुष्यति भूपालः । इर्, अरुषत् अरोषीत् । पुषादिभिन्नश्च इत्यन्ये । णि, रुष्टः [illegible] अस्ति । इति दुर्गादासः ॥

रुषा, स्त्री, (रुष् + क्विप् । भावे टाप् ।) अमर्षः । तत्पर्य्यायः । क्रोधः २ मन्युः ३ [illegible] क्रुत् ५ कोपः ६ प्रतिघः ७ रोषः ८ । इति हेमचन्द्रः । २ । ३१९ ।

रुषितः, त्रि, (रुष्यति स्मेति । रुष + क्त । "रुष्यमत्वरसंघुषास्वनाम् ।" ७ । २ । २८ । पक्षे इट् ।) क्रोधयुक्तः । यथा,—
"तं वानराणां [illegible]
[illegible] रुषितो [illegible]
इति श्रीभागवते [illegible]

रुष्टः, त्रि, (रुष्यते स्मेति । रुष + क्त । "[illegible] संघुषास्वनाम् ।" ७ । २ । २८ । इति [illegible]) क्रोधयुक्तः । यथा,—
"प्रिये दृष्टे गुरुस्थाने गुरौ दृष्टे [illegible]
रेत्रं, क्ली, (रीयते क्षरतीति । री+बाहुलकात् त्रः ।) रेतः । पीयूषम् । पटवासः । सूतकम् । इति मेदिनी ॥

रेप, ङ क शब्दे । गमने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-शब्दे अक०-गमने सक०-सेट् ।) ङ, रेपते रिरेपे । क, अरिरेपत् । इति दुर्गादासः ॥

रेपः, त्रि, (रेप्यते निन्द्यते इति । रेप+घञ् ।) निन्दितः । क्रूरः । कृपणः । इति मेदिनी । पे, १० ॥

रेफः, पुं, (रिफति इति । रिफ+घञ् । यद्वा, "रादिफन् ।" इत्यनेन वर्णस्वरूपार्थे रशब्दादिफन्प्रत्ययः । तथाच "रेफ इत्यौणादिकः ।" इति उज्ज्वल ५ पादे दुर्गः ।) रवर्णः । (यथा,—
"परेङ्गितो यः शिरसापि धार्य्यते
समागते यद्यपि याति नम्रताम् ।
गुणैः परेषां द्विगुणत्वमीहते ।
रेफेव तुल्या प्रकृतिर्महात्मनाम् ।"
इत्युद्भटः ।)
रागः । इति शब्दरत्नावली । (शब्दः । यथा, भागवते । ८ । २० । २५ ।
"शिवश्च पवस्यरविन्ददस्तो
कण्ठे च सामानि समस्तरेफान् ।")

रेफः, त्रि, (रिप+"अवद्यावमाधमार्व्वरेफाः कुत्सिते ।" उणा० ५ । ५४ । इति अप्रत्ययेन निपातितः ।) कुत्सितः । इत्यमरः ॥

रेफाः, [स्] त्रि, (रिफतीति । रिफ्+असुन् ।) क्रूरः । अधमः । दुष्टः । कृपणः । इति शब्दरत्नावली ॥

रेभ, ङ क शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ, रेभते रिरेभे । क, अरिरेभत् । इति दुर्गादासः ॥

रेभणं, क्ली, (रेभ शब्दे+भावे ल्युट् ।) गवां ध्वनिः । इति त्रिकाण्डशेषः ॥

रेरिहाणः, पुं, शिवः । असुरः । इति मेदिनी । णे, १०८ ॥ चौरः । इति शब्दरत्नावली ।

रेव, ऋ ङ प्लुतौ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) प्लुतिः प्लवेन गमनम् । ऋ, अरिरेवत् । ङ, रेवते कपिः उत्प्लुत्य गच्छतीत्यर्थः । इति दुर्गादासः ॥

रेवटं, क्ली, दक्षिणावर्त्तशङ्खम् । इत्यजयपालः ॥

रेवटः, पुं, (रेवते इति । रेव+बाहुलकात् अटच् ।) शूकरः । वेणुः । वातुलः । विषवैद्यः । इत्यजयपालः ॥

रेवतः, पुं, जम्बीरः । इति जटाधरः ॥ (यथा, सुश्रुते । ६ । ५ ।
"पित्तप्रबले द्राक्षारेवतकट्फलपयस्यामधुकचन्दनकाश्मर्य्यकषायं शर्करामधुमधुरं पाययेत् ।") आरग्वधवृक्षः । इति शब्दरत्नावली ॥ राजविशेषः । स तु रेवतीपिता । बलरामश्वशुरश्च । इति महाभारतम् ॥ (अयं हि आनर्त्तपुत्रः शर्य्यातिपौत्रः । स खलु स्वपुत्र्या रेवत्या वरं प्रष्टुकामस्तया सह ब्रह्मलोकं गतवान् आगत्य ब्रह्मणा बलदेवाय कन्यां दत्तवान् । एतद्विवरणं देवीभागवते ७ स्कन्धे ७ । ८ अध्याययो द्रष्टव्यम् ।)

रेवतकं, क्ली, (रेवत इव कायतीति । कै+कः ।) पारेवतम् । इति राजनिर्घण्टः ॥

रेवतिः, स्त्री, कामदेवपत्नी । इति त्रिकाण्डशेषः ॥

रेवती, स्त्री, (रेवतस्यापत्यं स्त्री । रेवत+अण् । न वृद्धिः । ङीप् ।) बलदेवपत्नी । नक्षत्रभेदः । मातृकाभेदः । इति मेदिनी ॥ स्त्रीगवी । इत्यजयपालः ॥ दुर्गा । यथा,—
"रेवा तु नर्म्मदा देवी नदी या रेवती मता ।
अतिरक्तजनन्या या लोके देवी प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥ * ॥
रेवतीनक्षत्रम् अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतशेषनक्षत्रम् । तस्य रूपं मत्स्याकृति द्वात्रिंशत्तारात्मकम् । तस्याधिष्ठातृदेवता पूषाख्यः सूर्य्यः । यथा,—
"दन्तसंख्यभवने भषाकृता-
वन्तभे लसदनन्तमध्यगे ।
कोमलाङ्गि मिथुनोदयात् प्रिये
कालखानलकलाः स्थितेऽचलन् ।"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥*॥
तत्र जातफलं यथा,—
"चारुशीलविभवो जितेन्द्रियः
सत्कुलः स्वभवनैकमानसः ।
मानवो भवति नक्षत्रपतौ
रेवती भवति यस्य जन्मभम् ।"
इति कोष्ठीप्रदीपः ॥ * ॥
बालग्रहविशेषः । तज्जुष्टस्य चिकित्सा यथा,—
"अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा ।
सहा विदारी सिद्धानां काथेन परिषेचनम् ।"
अजशृङ्गी मेढ़ाशृङ्गी । सहा सेवतीपुष्पजातिः ।
"तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसे तथा ।
पलङ्कषायां नलदे तथा गौरकदम्बके ।"
सर्ज्जरसः रालः । पलङ्कषा गुग्गुलुः । नलदं लामज्जकमुशीरवत् पीतच्छवि । गौरकदम्बको धाराकदम्बः । धरडुया कदम्ब इति लोके ।
"धवाश्वकर्णककुभशालकौलिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः ।"
अश्वकर्णः शाल इति लोके ।
"कृत्तिका: शक्रपूर्व्वश्च मदेच: सायमान्तिकः ।
रात्रौ मृकपुरीषाणि यवान् यवमलो घृतम् ।
सन्ध्ययोरुभयोः कार्य्यमेतद्धूपनं शिशोः ।"
यवफलो वंशाङ्कुरः ।
"शुक्लाः सुमनसो लाजाः पयः ...
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना
गोतीर्थे गोष्ठे ।
" ...
नानाशस्त्रधरा ...
चलत्कुण्डलिनी श्यामा रेवती ...
उपासते यां सततं देवी ।
लम्बा कराला विनता ...
रेवती शुष्कनासा च तुभ्यं देवी ...
इति भावप्रकाशः ।
बलदेवपत्न्या विवरणं यथा,—
"रेवस्य रैवतः पुत्रः ...
ज्येष्ठः पुत्रशतस्यासीत्तस्य ...
स कन्यासहितः ...
न जरा क्षुत् पिपासा वा न ...
...
मुहूर्त्तञ्च भवति ब्रह्मलोके ...
रैवतस्य गतस्याथ या ...
तस्य पुत्रशतं यच्च ख्यातं तामवर्त्तत
तस्य वंशे तु ये तत्र क्षत्रिया हि ...
क्षत्रिया ह्यभवन् विप्रा दिशु सर्व्व...
...
गते बहुयुगे काले आजगामाथ रैवतः
मुहूर्त्तमेकं मत्वासौ दृष्ट्वा वार्ष्णेय ...
तां तु द्वारवतीं नाम बहुद्वारां मनोरमाम्
भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः ।
गत्वा तु रैवतः ...
प्रादाद्गुरुतरां तान्तु बलदेवो ह्यसौ
समागतां लघुतां नीत्वा उवाह च
दत्त्वा जगाम शिखरं मेरोस्तपसि रैवतः ।
रेमे रामोऽपि धर्म्मात्मा रेवत्या ...
इति ...
(महाभारते वायवीये च इयं रेवतो ...
प्रदत्ता । एतद्विवरणन्तु ... ८ अध्याये द्रष्टव्यम् ।) रैवतमनुप्रसङ्गे विवरणं यथा,—
मार्कण्डेय उवाच ।
"पञ्चमोऽपि मनुर्यस्तु रैवतो नाम ...
तस्योत्पत्तिं विस्तरतः शृणुष्व कथयामि ते
ऋषिरासीन्महाभाग ऋतवागिति ...
तस्यापुत्रस्य पुत्रोऽभूत् रेवत्यन्ते ...
स तस्य विधिवच्चक्रे जातकर्म्मादिकाः ...
तथोपनयनादींश्च स चाशीलोऽभवन्मुने ।
यतः प्रभृति जातोऽसौ ततः प्रभृति ...
दीर्घरोगपरामर्शमवाप स मुनिपुङ्गवः ।
माता चास्य परामार्त्तिं कुष्ठरोगादि ...
जगाम स पिता चास्य ...
किमेतदिति सोऽप्यस्य पुत्रोऽप्यकरोद् ...
जग्राह भार्य्यामन्यस्य मुनिपुत्रस्य ...
ततो विमना मनसा ऋतवागिदमब्रवीत्
अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता ।

...भी कृतवानसि गर्भस्था कुरुते पितुः ।
...ुच मर्मसंस्थोऽथ मुनिमामन्त्र्य मानवः ॥
...र्गो कोपकारस्य पिदृणां नापि सम्मतः ।
...दुःखाय पितुः जन्म मम दुष्टगणोदयः ॥
...ते मम या मेना सर्वलोकाभिगामिनः ।
...बर्कादिनः श्रान्ताः साधुकर्मानुगामिनः ॥
...र्ग मम यथा गर्भं परलोकपराङ्मुखम् ।
...ाय न गच्छेत् मुमुक्षुरपि यस्य तः ॥
...ीति सुहृदां दैत्यमदितानां मया सुदम् ।
...ाहे च तथा पितौः कुपुत्रः कुरुते हि वै ॥

मार्कण्डेय उवाच ।

...योऽत्मजादुःखस्य पुत्रस्य चरितैर्मुनिः ।
...मागमनोऽहत्तेऽहं गर्गमपृच्छत ॥

ऋषिरुवाच ।

...तेन पुरा वेदा व्रतोऽस्य विधिवन्मया ।
...ाप्य वेदान् विधिवत् कृतो दारपरिग्रहः ॥
...ारेण यथा कार्य्याः श्रौताः स्मार्त्तास्तथा क्रियाः ।
...दयूनाः कृताः काश्चिद्यावदद्य महामुने ॥
...ाधानविधानेन न कामममुरुध्यता ।
...ार्थं जनितश्चायं पुत्राख्यो विभ्यता मुने ॥
...यं किमात्मदोषेण मम दोषेण वा मुने ।
...ाद्दुःखदो जातो दौःशील्यादन्धुशोकदः ॥

गर्ग उवाच ।

...यन्ते मुनिश्रेष्ठ जातोऽयं तनयस्तव ।
...दुःखाय ते काले दुष्टे यस्मादजायत ॥
...ोऽपचारो नैवास्य मातुर्नापि कुलस्य ते ।
...दौःशील्यहेतुत्वं रेवत्यन्तमुपागतम् ॥

ऋतवागुवाच ।

...ामेकपुत्रस्य रेवत्यन्तसमुद्भवम् ।
...दौःशील्यमेतत् सा तस्मात् पततामाशु रेवती ॥

मार्कण्डेय उवाच ।

...ैव व्याहृते शापे रेवत्यृक्षं पपात ह ।
...स्यतः सर्व्वलोकस्य विस्मयाविष्टचेतसः ॥
...त्यृक्षच पतितं कुमुदाद्रौ समन्ततः ।
...ाषयामास सहसा वनकन्दरनिर्झरान् ॥
...ुदाद्रिश्च तत्पातात् ख्यातो रैवतकोऽभवत् ।
...तीवरम्यः सर्व्वस्यां पृथिव्यां पृथिवीधरः ॥
...ऋक्षस्य तु या कान्तिर्जाता पङ्कजिनीसरः ।
...तो जज्ञे तदा कन्या रूपेणातीव शोभना ॥
...वतीकान्तिसंभूतां तां दृष्ट्वा प्रमुचो मुनिः ।
...स्या नाम चकारेत्थं रेवतीति हि भागुरे ॥
...ोषयामास चैवैनां स्वाश्रमाभ्याससम्भवाम् ।
...मुचः स महाभागस्तस्मिन्नेव महाचले ॥
...ाम् यौवनिनीं दृष्ट्वा कन्यकां रूपशालिनीम् ।
...मुनिश्चिन्तयामास कोऽस्या भर्त्ता भवेदिति ॥
एवं चिन्तयतः कालो जगाम सुमहात्मनः ।
...चाससाद सदृशं वरं तस्या महामुनिः ॥
...ततस्तस्या वरं प्रष्टुमग्निं स प्रमुचो मुनिः ।
...विवेश वह्निशालां वै पृष्टस्तं प्राह हव्यभुक् ॥
महाबलो महावीर्य्यः प्रियवाक् धर्म्मवत्सलः ।
दुर्दमो नाम भविता भर्त्ता ह्यस्या महीपतिः ॥

मार्कण्डेय उवाच ।

अनन्तरञ्च मृगयाप्रसङ्गेनागतो मुने ।
तस्याश्रमपदं धीमान् दुर्दमः स नराधिपः ॥
प्रियव्रतान्वयभवो महाबलपराक्रमः ।
पुत्रो विक्रमशीलस्य कालिन्दीजठरोद्भवः ॥
स प्रविश्याश्रमपदं तां तन्वीं जगतीपतिः ।
अपश्यमानस्तमृषिं प्रियेत्यामन्त्र्य पृष्टवान् ॥

राजोवाच ।

क्व गतो भगवानस्मादाश्रमान्मुनिपुङ्गवः ।
तं प्रणन्तुमिहेच्छामि तत्त्वं प्रब्रूहि शोभने ॥

मार्कण्डेय उवाच ।

अग्निशालां गतो विप्रस्तच्छ्रुत्वा तस्य भाषितम् ।
प्रियेत्यामन्त्रणञ्चैव निश्चक्राम त्वरान्वितः ॥
स ददर्श महात्मानं राजानं दुर्दमं मुनिः ।
नरेन्द्रचिह्नसहितं प्रश्रयावनतं पुरः ॥
तस्मिन् दृष्टे ततः शिष्यमुवाच स तु गौतमम् ।
गौतमानीयतां शीघ्रमर्घोऽस्य जगतां पतेः ॥
एष तावदयं भूपश्चिरकालादुपागतः ।
जामाता च विशेषेण योग्योऽर्घोऽस्य मतं मम ॥

मार्कण्डेय उवाच ।

ततः स चिन्तयामास राजा जामातृकारणम् ।
विवेद न च तन्मौनी जगृहेऽर्घञ्च तं नृपः ॥
तमासनगतं विप्र गृहीतार्घं महामुनिः ।
प्रस्वागतं प्राह राजेन्द्रमपि ते कुशलं पुरे ॥
कोषे बलेऽथ मित्रेषु भृत्यामात्येषु चेश्वर ।
तथात्मनि महाबाहो यत्र सर्व्वं प्रतिष्ठितम् ॥
पत्नी च ते कुशलिनी यत एवात्र तिष्ठति ।
पृच्छाम्यस्यास्ततो नाहं कुशलिन्योऽपरास्तव ॥

राजोवाच ।

त्वत्प्रसादादकुशलं न क्वचिन्मुनिसत्तम ।
जातकौतूहलश्चास्मि मम भार्य्यात्र का मुने ॥

ऋषिरुवाच ।

रेवती तु महाभागा त्रैलोक्ये चापि सुन्दरी ।
तव भार्य्या वरारोहा मानवेन्द्र न वेत्सि किम् ॥

राजोवाच ।

सुभद्रां शान्ततनयां कावेरीतनयां विभो ।
सुराष्ट्रजां सुजाताञ्च कदम्बाञ्च वरूथजाम् ॥
विपाटां नन्दिनीञ्चैव वेद्मि भार्य्या गृहे हि याः ।
तिष्ठन्ति मे न भगवन् रेवतीं वेद्मि का त्वियम् ॥

ऋषिरुवाच ।

प्रियेति साम्प्रतं येयं त्वयोक्ता वरवर्णिनी ।
किं विस्मृतं ते भूपाल श्लाघ्येयं गृहिणी तव ॥

राजोवाच ।

सत्यमुक्तं मया किन्तु भावो दुष्टो न मे मुने ।
नात्र कोपं भवान् कर्त्तुमर्हत्यस्मासु याचितः ॥

ऋषिरुवाच ।

सत्यं ब्रवीषि भूपाल न भावस्तव दूषितः ।
व्याजहार भवानेवं वह्निना नृप नोदितः ॥
मया पृष्टो हुतवहः कोऽस्या भर्त्तेति पार्थिव ।
भविता तेन चाप्युक्तो भवानेवाद्य चागतः ॥
तद्गृह्यतां मया दत्ता कन्या तुभ्यं नराधिप ।
प्रियेत्यामन्त्रिता चेयं विचारं कुरुषे कथम् ॥

श्रीमार्कण्डेय उवाच ।

ततश्च सोऽभवन्मौनी तेनोक्तः पृथिवीपतिः ।
ऋषिस्तथोद्यतः कर्त्तुं तस्या वैवाहिकं विधिम् ॥
समुद्यतञ्च पितरं विवाहाय महामुने ।
उवाच कन्या सा किञ्चित् प्रश्रयावनतानना ॥
यदि मे प्रीतिमांस्तात प्रसादं कर्त्तुमिच्छसि ।
रेवत्यृक्षे विवाहं मे तत् करोतु प्रसादितः ॥

ऋषिरुवाच ।

रेवत्यृक्षं न वै भद्रे चन्द्रयोगि दिवि स्थितम् ।
अन्यानि सन्ति ऋक्षाणि सुभ्रु वैवाहिकानि ते ॥

कन्योवाच ।

तात तेन विना कालो विकलः प्रतिभाति मे ।
विवाहो विकले काले मद्विधायाः कथं भवेत् ॥

ऋषिरुवाच ।

ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ।
चकार कोपं क्रोधेन तेनर्क्षं तन्निपातितम् ॥
मया चास्मै प्रतिज्ञाता भार्य्येति मदिरेक्षणे ।
न चेच्छसि विवाहं त्वं संकटं नः समागतम् ॥

कन्योवाच ।

ऋतवाक् स मुनिस्तात किं मे कस्तप्तवांस्तपः ।
न त्वया समता तेन ब्रह्मबन्धोः सुतास्मि किम् ॥

ऋषिरुवाच ।

ब्रह्मबन्धोः सुता न त्वं बाले नैवातपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुत्सहे ॥

कन्योवाच ।

तपस्वी यदि मे तातस्तत् किमृक्षमिदं दिवि ।
समारोप्य विवाहो मे नात्रर्क्षे क्रियते पितः ॥

ऋषिरुवाच ।

एवं भवतु भद्रं ते भद्रे प्रीतिमती भव ।
आरोपयामीन्दुमार्गे रेवत्यृक्षं कृते तव ॥

श्रीमार्कण्डेय उवाच ।

ततस्तपःप्रभावेन रेवत्यृक्षं महामुनिः ।
यथापूर्व्वं तथा चक्रे सोमयोगि द्विजोत्तमः ॥
विवाहश्चैव दुहितुर्विधिवन्मन्त्रयोगजम् ।
निष्पाद्य प्रीतिमान् भूयो जामातरमथाब्रवीत् ॥

ऋषिरुवाच ।

औद्वाहिकं ते भूपाल कथ्यतां किं ददाम्यहम् ।
दुर्लभ्यमपि दास्यामि ममाप्रतिहतं तपः ॥

राजोवाच ।

मनोः स्वायम्भुवस्याहमुत्पन्नः सन्ततौ मुने ।
मन्वन्तराधिपं पुत्रं त्वत्प्रसादाद्वृणोम्यहम् ॥

मुनिरुवाच ।

भविष्यत्येष ते कामो मनुस्त्वत्तनयो महान् ।
सकलां भोक्ष्यते भूमिं धर्म्मविच्च भविष्यति ॥

श्रीमार्कण्डेय उवाच ।

तामादाय ततो भूपस्तदेव नगरं ययौ ।
तस्याश्चाजायत सुतो रेवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्म्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥
इति मार्कण्डेयपुराणे रैवतमन्वन्तरं समाप्तम् ॥

(गौः । इति निघण्टुटीकायां देवराजयज्वा । १ । १० । ११ ।)

रेवतीभवः, पुं, (रेवत्यां भव उत्पत्तिर्यस्य ।) शनैश्वरः । इति हेमचन्द्रः । २ । ३४ । (रैवतमनुः । इति मार्कण्डेयपुराणम् ।)

रेवतीरमणः, पुं, (रेवत्या रमणः पतिः ।) बलदेवः । इत्यमरः । १ । १ । २४ ।

रेवतीशः, पुं, (रेवत्या ईशः ।) बलरामः । इति हेमचन्द्रः । २ । १३८ ।

रेवन्तः, पुं, सूर्य्यपुत्रविशेषः । स च गुह्यकाधिपतिः । तस्योत्पत्तिर्यथा,—

"ततोऽसौ योगमास्थाय स्वां भार्य्यां वडवां रविः ।
ददर्श नियमस्थान्तामश्वरूपमथाकरोत् ।
मैथुनायोपचक्राम सूर्य्योऽसौ च त्वरान्वितः ।
नैच्छन्ती तेन संयोगं परपुंसोऽभिशङ्कया ॥
संग्रहात् संसृतो तेजो मुखनासिकया रवेः ।
देवौ यतः प्रजायेतामश्विनौ भिषजां वरौ ।
नासत्यौ द्वौ तृतीयश्च रेवन्तोऽश्वप्रवाहकः ॥"

इति वह्निपुराणम् ।

अपि च ।

"ततोऽश्वरूपधृक् भानुस्तत्रागमत् कुरून् ।
ददर्श तत्र संज्ञान्तु वडवारूपधारिणीम् ॥
सा च दृष्ट्वा समायान्तं परपुंसोऽभिशङ्कया ।
जगाम संमुखं तस्य पृष्ठरक्षणतत्परा ॥
ततश्च नासिकायोगे तयोस्तत्र समेतयोः ।
नासत्यदस्रौ तनयावश्ववक्त्राद्विनिर्गतौ ॥
रेतसोऽन्ते च रेवन्तः खड्गी धन्वी तनुत्रधृक् ।
अश्वारूढः समुत्पन्नो बाणतूणसमन्वितः ॥
ततः स्वं रूपमसमं दर्शयामास भानुमान् ।
तस्मै सा च समालोक्य स्वरूपं मुदमाददे ।
स्वरूपधारिणीञ्चेमामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ।
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः शापाद्धर्म्मदृष्टिरभूत् सुतः ॥
कृमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ।
धर्म्मदृष्टियेतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ।
यमुना च नदी चक्रे कलिन्दान्तरवाहिनी ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ।
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ॥ * ॥

अन्नादिककर्म्मयनीराजनविधौ रेवन्तस्य राजकर्त्तृपूजाविधिर्यथा,—

"अश्वमे हि तु रेवन्तं पूजयेन्नीराजनान्तरे ।
सर्व्वपुत्रं महाबाहुं द्विभुजं कवचोज्ज्वलम् ॥
ज्वलन्तं सुप्रवल्गेन केशान् वितत्य वाससा ।
कशां वामकरे बिभ्रद्दक्षिणे तु करे पुनः ।
खड्गं चास्य महातीक्ष्णं सितश्वेतहयस्थितम् ॥
स्थण्डिलस्तु रेवन्तं प्रतिमायां घटेऽपि वा ।
कर्म्मपूजाविधानेन पूजयेन्नीराजनान्तरे ॥"

इति कालिकापुराणे नीराजनविधिः ८६

अध्यायः ॥ * ॥ कोजागरपूर्णिमाराश्रौ द्वारोपान्ते तस्य पूजाविधिर्यथा,—

"द्वारोपान्ते सुरेशस्तु संपूज्यो हयवाहनः ।
यवापनद्धगोधूमैस्तण्डुलैश्च सुगन्धिनः ॥
संपूजितश्च पूर्णेन्दुः पयसा पायसेन च ।
स्कन्दः सभार्य्यो वृषभस्तथा नन्दीश्वरो मुनिः ॥
गोमहिः सुरभिः पूज्या छागवह्निर्हुताशनः ।
उरभ्रवह्निर्व्वरुणो गजवह्निर्व्विनायकः ।
पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ॥"

इति तिथ्यादितत्त्वम् ।

(रेवन्तदर्शनेन लक्ष्मीं प्रति नारायणस्य शापवृत्तान्तं देवीभागवते ६ स्कन्धे १७ अध्याये द्रष्टव्यम् ।)

रेवन्तमनुसृट्, स्त्री, (रेवन्तं मनुश्च सृते इति । सृ + क्विप् ।) संज्ञा । इति त्रिकाण्डशेषः ।

रेवा, स्त्री, (रेवते उत्प्लुत्य गच्छतीति । रेव + अच् । टाप् ।) नर्म्मदा नदी । इत्यमरः । १ । १० । ३२ । (यथा, मेघदूते । २० ।

"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् ।")

अस्यां शिवलिङ्गोत्पत्तिर्यथा,—

"रेवया च कृतं पूर्व्वं तपः शिवतुष्टिदम् ।
मम त्वत्सदृशः पुत्रो भूयादिति शिवो तया ॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्वयायं न्यलाञ्छन ।
निश्चित्यैव तदा प्रोक्तं प्रसन्नेनान्तरात्मना ।
लिङ्गरूपेण ते देवि ! गणानगपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये ! ॥
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन चावामेकत्र संस्थितौ ॥
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते ॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमाध्यायः ।

रतिः । सा च कामपत्नी । नीलीवृक्षः । इति मेदिनी । वे, २१ । दुर्गा । यथा,—

"रेवा तु नर्म्मदा देवी नदी वा रेवती मता ।
अतिखण्डनवस्त्रा वा लोके देवी प्रकीर्त्तिता ॥"

इति देवीपुराणे ४५ अध्यायः ।

रेव, ऋ ङ प्लवायाम् । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-सेट् ।) प्लवा घोटककर्त्तृकशब्दः । ऋ, अरिरेवत् । ङ, रेवते रिरेविऽश्वः । इति दुर्गादासः ।

रै, शब्दे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-अनिट् ।) रेफादिः । रायति । इति दुर्गादासः ।

रैवतः, पुं, स्वर्णालुकः । (यथा, गारुडे २०२ अः ।

"मधुरकुलसम्पाको व्याधिघाताभिसंज्ञकः ।
विद्यादारग्वधं राजवृक्षं रैवतसंज्ञकम् ॥")

शैलभेदः । (अस्मैवार्ज्जुनः सुभद्रां हृतवान् । यथा, महाभारते । १ । २२१ । ६—८ ।

"सुभद्रा त्वथ शैलेन्द्रमभ्यर्च्च्य हि रैवतम् ।
दैवतानि च सर्व्वाणि ब्राह्मणान् स्वस्ति वाच्य च ।

प्रदक्षिणं गिरेः कृत्वा ...
तामभिद्रुत्य कौन्तेयः प्रसह्यारोपयत् ...
सुभद्रां चारुसर्व्वाङ्गीं ...
ततः स पुरुषव्याघ्रस्तामादाय ...
रथेन काञ्चनाङ्गेन प्रययौ स्वपुरं प्रति ...
शङ्करः । इति मेदिनी । ते ...
इति धरणिः । (सनु ...
यथा, महाभारते । १ । २२८ । ...
"अदितिं रैवतं ...
कोऽपि कायान् महाघोरो ...

रेवत्यां भवः । रेवती + अण् ।)
... पञ्चमो मनुः । स तु ...
राजपुत्रः । अस्मिन् मन्वन्तरे ...
तारः । विभुरिन्द्रः । भूतरतो ...
हिरण्यरोमादयः सप्तर्षयः । ...
अमितसुताः । इति श्रीभागवतम् ।
यथा,—
"पञ्चमस्य ...
देववाहुः सुबाहुश्च पर्जन्य ...
हिरण्यरोमा सप्ताश्वः ...
देवाश्चाभूतरजसस्तथा प्रकृतः ...
अश्वमस्त्यदर्शौ च निवसन् ...
शक्ती विकुण्ठकः ...
धर्म्मवीर्य्यबलोपेता इत्येते रैवतान्तर ...
भगुः सुधामा विरजः ...
विवस्वानतिनामा च वह्निसर्व्वात्मान ...
इति मात्स्ये ८ अध्याय ...
मार्कण्डेयपुराणोक्तरैवतमनुविवरणं ...
शब्दे द्रष्टव्यम् । (बृहदारण्यक ...
मात्स्ये । ५ । २८ ।
"अजैकपादहिर्ब्बुध्न्यो ...
मेघः । इति निघण्टुः । १ । १० ।
"रैवत्यो गावः 'पशवो वै रेवतीः' ...
'तस्येदम् ।' ४ । ३ । १२० । इत्यण् ...
सर्व्वत्र वर्त्तते यवसं मार्गेयं च ...
तदीयो भवति पर्जन्यस्तथा । ...
इत्यानोति मनुपि 'रयेर्मतौ ...
३४ । इति सम्प्रसारणम् । 'संज्ञा ...
२ । ११ । इति वत्वम् । ततः ...
त्वात् रेवान् इन्द्रः मघवेति ...
तदीयो रैवतः पूर्व्ववत् तदीयं ...
इति तत्र देवराजयज्वा । ॥ ...
विशेषः । यथा, सम्मते । ३ । २८ ।
"अग्निष्टोमो रैवतश्च यथोक्त इति ...
ऋषिविशेषः । यथा, महाभारते । ...
"नारदः सुमहातेजा ऋषिभिः ...
पारिजातेन राजेन्द्र रैवतेन च ...
धनपति, नि । यथा, ऋग्वेदे । १ । ...
"यदा हवेदेवताहो हिरण्य-
रभिश्रयाभिस्त्वः पिपिषि ।"
"वैरताशो धनवन्तः ।" इति तद्भाष्ये ...

णी, (रैवतक + इन् । स्वार्थे अण् ।) पारे
तः । इति राजनिर्घण्टः ॥ (पारेवत-
ब्दे गुणादिकं ज्ञेयम् ॥)
पुं, (रैवत एव । स्वार्थे कन् ।) रैवत-
: । तत्पर्य्यायः । उज्ज्वयन्तः २ । इति
न्दः ॥ (यथा, महाभारते ।१।२२०।११।
, समिवयादवस्य तस्मिन् रैवतके गिरौ ।
ल्मकाणामभवदुत्सवो नृपसत्तम ! ॥")
तामकादयं रेवतीशब्दे द्रष्टव्यम् ॥
, त्रि, (रेवती + "रेवत्यादिभ्यष्ठक् ।"
। १२६ । इति ठक् ।) रेवत्या अपत्यम् ।
मुग्धबोधव्याकरणम् ॥
ति, (रोचतेऽनेनेति । रुच् + घञ् । "चजोः
त् घ्यतोः ।") लिङ्गम् । इत्यमरः ।१।८।२॥
। । चलम् । इति मेदिनी । के, १२ ॥
पुं, (रुच् + घञ् ।) क्रयभेदः । दीप्तिः ।
मेदिनी । के, ११ ॥ (यथा, ऋग्वेदे । ३ ।
७ ।
"दिवश्चिदासि रुचयन्त रोकाः ।"
रोकाश्चदीप्ता दीप्तयः ।" इति तद्भाष्ये
यः ॥")
पुं, (रुज्यतेऽनेनेति । रोजनमिति वा ।
+ घञ् । यद्वा, रुजतीति । रुज् + "पद-
विशस्पृशो घञ् ।" ३।३।१६ । इति कर्त्तरि
।) कुष्ठौषधम् । इति मेदिनी । गे, ९३ ॥
भङ्गकारकः । तत्पर्य्यायः । रुक् २ रुजा ३
ताप: ४ व्याधि: ५ गद: ६ आमय: ७ ।
मरः । २ । ६ । ५१ ॥ अपाटवः ८ आमः ९
तङ्कः १० भयः ११ उपघातः १२ भङ्गः १३
र्त्तिः १४ तमोविकारः १५ ग्लानिः १६ क्षयः
अनार्ज्जवः १८ मृत्युभृत्यः १९ । इति राज-
र्घण्टः ॥ अमः २० । इति जटाधरः ॥ मान्द्यम्
व्याकल्यम् २२ । इति हेमचन्द्रः ॥ * ॥
स्य निदानादिर्यथा,—

धन्वन्तरिरुवाच ।

र्व्वरोगनिदानञ्च वक्ष्ये सुश्रुत तत्त्वतः ।
त्रेयादैर्मुनिवरैर्यथापूर्व्वमुदीरितम् ॥
गः पाप्मा ज्वरो व्याधिर्विकारो दुष्टमामयः ।
मातङ्कगदाबाधाः शब्दाः पर्य्यायवादिनः ॥
दानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा ।
प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥
मित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
दानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ।
त्पित्सुरामयो दोषविशेषेणानधिष्ठितः ॥
ङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथायथम् ।
व तद्व्यक्ततां यातं रूपमित्यभिधीयते ॥
स्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ।
तुव्याधिविपर्य्यस्तं विपर्य्यस्तार्थकारिणाम् ॥
षधान्नविहाराणां उपयोगं सुखावहम् ।
द्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ॥
परीतोऽनुपशयो व्याधिसात्म्याभिसंज्ञितः ।
था दुष्टेन दोषेण तथा चानुविसर्पता ॥

निवृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः ।
संख्याविकल्पप्राधान्यबलकालविशेषतः ॥
स भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ।
दोषाणां समवेतानां विकल्पोंऽशांशकल्पना ॥
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ।
हेत्वादिकात्स्न्यावयवैर्बलाबलविशेषणम् ॥
नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथा मलम् ।
इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते ।
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ।
अहितस्त्रिविधो योगस्त्रयाणां प्रागुदाहृतः ॥
तिक्तोषणकषायाल्परूक्षाप्रमितभोजनैः ।
धारणोदीरणनिशाजागरात्युच्चभाषणैः ॥
क्रियाभियोगभीशोकचिन्ताव्यायाममैथुनैः ।
ग्रीष्माहोरात्रभुक्तान्ते प्रकुप्यति समीरणः ॥
पित्तं कट्वम्ललीक्ष्णोष्णकटुक्रोधविदाहिभिः ।
शरन्मध्याह्नरात्र्यर्द्धविदाहसमयेषु च ॥
स्वाद्वम्ललवणस्निग्धगुर्व्वभिष्यन्दिशीतलैः ।
आस्यास्वप्नसुखाजीर्णदिवास्वप्नातिबृंहणैः ॥
प्रच्छर्द्दनाद्ययोगेन भुक्तमात्रवसन्तयोः ।
पूर्व्वाह्णे पूर्व्वरात्रे च श्लेष्मा वक्ष्यामि सङ्करात् ॥
मिश्रीभावात् समस्तानां सन्निपातस्तथा पुनः ।
सङ्कीर्णाजीर्णविषमविरुद्धाध्यशनादिभिः ॥
व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः ।
पिण्याकमृद्यवसुरापूतिशुष्ककृशामिषैः ॥
दोषत्रयकरैस्तैस्तैस्तथाऽत्तपरिवर्त्तनः ।
ऋतोर्दुष्टात् पुरोवातात् ग्रहावेशविभ्रमात् ॥
दुष्टामान्नैरतिश्लेष्मग्रहैर्मर्म्मसंपीडनात् ।
मिथ्यायोगाच्च विविधात् पापानाञ्च निषेव-
णात् ॥
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः ।
प्रतिरोगमिति क्रुद्धा रोगविध्यनुगामिनः ।
रसायनीं प्रपद्याशु दोषा देहे विकुर्व्वते ॥"
इति गारुडे सर्व्वरोगनिदानं १४९ अध्यायः ॥
रोगविशेषाणां औषधानि गारुडे १८९।१९०।
१९१ । १९२ । १९३ । १९४ । १९५ । १९६ ।
१९७ । १९८ । १९९ अध्यायेषु द्रष्टव्यानि ॥
सर्व्वरोगहरवैष्णवकवचञ्च तत्रैव २०० अध्याये
द्रष्टव्यम् ॥ * ॥ अपि च ।
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥
मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः ।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥
वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥
पाण्डुकः कामलः कुष्ठः शोथः प्लीहा च शूलकः ।
ज्वरातिसारग्रहणीकासव्रणहलीमकाः ॥
मूत्रकृच्छ्रश्च गुल्मश्च रक्तदोषविकारकः ।
व्याधिशो मेहनः कुब्जो गोदश्च गलगण्डकः ॥
भ्रमरी सन्निपातश्च विसूची दारुणी सति ।

एषां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः ॥
मृत्युकन्यासुतावृत्ती जरा तस्याश्च कन्यका ।
जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम् ॥
एते चोपायवेत्तारं न गच्छन्ति च संवृतम् ।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः ॥ * ॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम् ।
कर्णतैलं मूर्द्धि तैलं जराव्याधिविनाशकम् ॥
वसन्ते भ्रमणं वह्निसेवाम्बरं करोति यः ।
बालाञ्च सेवते काले जरा तं नोपगच्छति ॥
ग्रीष्मशीतोदकस्नायी सेवते चन्दनद्रवम् ।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम् ॥
प्रावृडुष्णोदकस्नायी घनतोयं न सेवते ।
समये च समाहारी जरा तं नोपगच्छति ॥
शरद्रौद्रं न गृह्णाति भ्रमणं तत्र वर्जयेत् ।
स्नातस्नायी समाहारी जरा तं नोपतिष्ठति ॥
स्नातस्नायी च हेमन्ते काले वह्निं निषेवते ।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति ॥
शिशिरेऽशुकवह्निञ्च नवोष्णान्नञ्च सेवते ।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति ॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति ॥
भुङ्क्ते यद्रम्भं क्षुत्काले तृष्णायां पीयते जलम् ।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति ॥
दधि हैयङ्गवीनञ्च नवनीतं तथा शुभम् ।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति ॥
शुष्कमांसं स्त्रियो वृद्धा बालार्कं तरुणं दधि ।
संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह ॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम् ।
तानुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि ! ॥
रजस्वला च कुलटा चावीरा जारदूतिका ।
शूद्रयाजकपत्नी या ऋतुहीना च या सति ! ॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति ॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम् ।
पापं व्याधिजराबीजं विघ्नबीजञ्च निश्चितम् ॥
पापेन जायते व्याधिः पापेन जायते जरा ।
पापेन जायते दैन्यं दुःखं शोकं भयं कलिः ॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम् ।
भारते सन्ततं सन्तो नाचरन्ति भयातुराः ॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम् ।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च ॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेविणम् ।
पापा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः ॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जयः ।
सर्व्वं मोक्ष्यमसमये काले सर्व्वं ग्रहीष्यति ॥ * ॥
ज्वरश्च सर्व्वरोगाणां जनकः कथितः सति ।
पित्तश्लेष्मसमीराश्च ज्वरस्य जनकास्त्रयः ॥
एते यथा सञ्चरन्ति स्वयं यान्ति च देहिषु ।
तमेव विविधोपायं साध्वि मत्तो निशामय ॥
क्षुधि जाज्वल्यमानायामाहाराभाव एव च ।
प्राणिनां जायते पित्तं चक्रे च मणिपूरके ॥
वातं विल्वफलं भुक्त्वा जलपानञ्च तत्क्षणम् ।

तदेव तु भवेत् मित्रं मद्यःप्राणहरं परम्।
तप्तोदकञ्च शरदि भाद्रे नित्यं विशेषतः।
दैवयत्नाच यो भुङ्क्ते नित्यं तस्य प्रजायते॥
मधुकेरञ्च धन्याकं मिष्टं शीतोदकान्वितम्।
नवकं सर्वमायञ्च दधिनक्रविवर्जितम्॥
विल्वाताम्रकं पक्वं सर्वमथाशमेव च॥
आर्द्रकं सुरयूपञ्च तिलपिष्टं सशर्करम्॥”
अथवारम्भाने दैवमिति च पाठः।
“दिनलयकरं भद्रो बलपुष्टिप्रदं परम्।
विलघादञ्च तद्दीर्घसुलभं विशेष मे॥
भोजनान्तरं स्नानं भक्तपानं विना तथा।
निर्मोर्ध क्षिप्ततैलं विश्वमामलकोदयम्॥
पर्युषितं तक्रञ्च पक्वरम्भाफलं दधि।
[illegible]॥
[illegible] पर्युषितं जलम्।
[illegible]॥
[illegible] कारणम्।
[illegible] विनाशनम्॥
[illegible] विशेषकम्।
[illegible]॥
[illegible]।
[illegible]॥
[illegible]।
[illegible] मधु॥
[illegible] च।
[illegible] विशामय॥
[illegible] तथा।
[illegible]॥
[illegible] च॥
[illegible] च॥
[illegible] कारकम्।
[illegible] नरोत्तम॥
[illegible]।
[illegible]॥
[illegible]।
[illegible]॥
[illegible]।
[illegible]॥
[illegible]।
[illegible]॥
[illegible]॥
[illegible]॥
[illegible] च।
[illegible] च॥
[illegible] च।
[illegible]॥
[illegible] च।
[illegible]॥”
इति ब्रह्मवैवर्त्ते [illegible]॥ अध्यायः॥
[illegible]। [illegible]।
[illegible]।
[illegible]॥

ते च स्वाभाविकाः केचित् केचिदागन्तवः स्मृताः।
मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः॥”
तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः। क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः। अथवा स्वस्य भावादुत्पत्तेर्जाताः स्वाभाविकाः सहजा इति यावत्। ते च जन्मान्धादयः। आगन्तवोऽभिघातादिजनिताः। अथवा जन्मोत्तरभाविनः। मानसाः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यविषादेर्ष्याऽसूयामात्सर्यप्रभृतयः। अथवा उन्मादापस्मारमूर्च्छाभ्रमतमःसन्न्यासप्रभृतयः। कायिकाः पाण्डुरोगप्रभृतयः॥
“कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे।
कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः॥”
तत्र कर्मजा व्याधयः। यत् प्राक्तनं दुष्कर्मप्रबलं व्याधिरूपं केवलं भोगनाश्यं प्रायश्चित्तनाश्यं वा ततो जाताः न तु दुष्टवातादिदोषैर्जनिताः। तथा।
“यथाशास्त्रन्तु निर्णीता यथाव्याधि चिकित्सिताः।
न शमं यान्ति ये रोगास्ते ज्ञेयाः कर्मजा बुधैः॥”
दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः॥ ●॥ ननु मिथ्याहारविहारयोरपि प्राक्तनदुष्कृतेन नैयम्यं दृश्यत एव ततो दोषजेष्वपि प्राक्तनकर्मैव कारणं तत् कथं दोषजा इति। उच्यते। दोषजेष्वपि वस्तुत व्याधिकारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहारभूयिष्ठा दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यन्त इति समाधिः॥ ●॥ कर्मदोषोद्भवाः।
“अल्पदोषो गरीयांश्च ते ज्ञेयाः कर्मदोषजाः।”
अत्र कारणं दुष्कर्मप्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वं सत्कर्मक्षयादेव क्षीणं भवति। दोषाश्च स्वल्पा अपि निदानस्तोकत्वा दृश्यन्त एवेति। दोषाणां कारणन्तु मन्यत इति कर्मदोषोद्भवाः।
“कर्मक्षयात् कर्मजानां दोषजाः स्वस्वभेषजैः।
कर्मदोषोद्भवा यान्ति कर्मदोषक्षयात् क्षयम्॥”
दोषजाः स्वस्वभेषजैरिति दोषेभ्यो व्याधिकारणं दुष्कर्म तन्निवर्त्तकं यथा [illegible] तस्मात् [illegible] कर्तुर्विनाशनायात् [illegible] उभाभ्यामेव च क्षयं यान्ति। त्रिधाऽदृष्टहेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः।
“साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते॥”
याप्यलक्षणमाह।
“शरीरेऽपि तं विद्यात् क्रियां धारयते हि तम्।
क्रियायान्तु निवृत्तायां सद्यो यस्य विनश्यति॥
पतन्तं [illegible] धारयति स्थूणेव [illegible] मातुरम्।
सद्रूपार्थैर्निराकारं स्तम्भो यत्नेन यौगिनः॥
[illegible] यथा।

शमि [illegible]
अक्रियाणां चिकित्सार्हाणां [illegible]
अथोपद्रवलक्षणम्।
“रोगारम्भकदोषस्य प्रकोपाद्
योऽन्यो विकारः स [illegible]
अथारिष्टस्य लक्षणमाह।
“रोगिणो मरणं [illegible]
तल्लक्षणमरिष्टं स्यादिष्टवादि [illegible]
अथ रोगस्य चिकित्सालक्षणम्
“या क्रिया व्याधिहरणी [illegible]

दोषधातुमलानां या [illegible]
क्रियात्र कर्म। [illegible]
हरणी [illegible]
स्फुट्। तथा च।
“याभिः क्रियाभिर्जायन्ते [illegible]
सा चिकित्सा [illegible]

या ह्युदीर्णं शमयति [illegible]
सा क्रिया न तु या व्याधिं [illegible]
क्रियात्र चिकित्सा। तथा च [illegible]
“व्यारम्भो निष्कृतिः [illegible]
उपायः कर्म चेष्टा च [illegible]

अथ चिकित्साविध्युपदेशः।
“जातमात्रश्चिकित्स्यः [illegible]
[illegible]
रोगमादौ परीक्षेत ततोऽनन्तरम्
ततः [illegible]
अयमर्थः। भिषक् आदौ रोगं [illegible]
इयेत्। ततोऽनन्तरं औषधं [illegible]
पश्चात् रोगौषधविचारानन्तर [illegible]
यातो न तु अन्यथा कर्म [illegible]
दानादिरूपं समाचरेदित्यर्थः॥
चिकित्साकरणे दोषमाह।
“यस्तु रोगमविज्ञाय [illegible]
अथौषधविधानज्ञस्तस्य सिद्धिर्
यदृच्छया स्वेरितया सिद्धिर्
अर्थः। अन्यच।
“औषधं केवलं कर्तुं [illegible]
वैद्यकर्म स चेत् कुर्याद्वधमर्हति
रोगज्ञाने भिषग्ज्ञाने दोषमाह।
“यस्तु केवलरोगज्ञो भेषजेष्व[illegible]
तं वैद्यं प्राप्य रोगी स्यात् [illegible]

[illegible] कर्णधारं विना यथा [illegible]
तथा रोगीत्यर्थः। अन्यच।
“यस्तु केवलशास्त्रज्ञः [illegible]
स स्वल्पमातुरं प्राप्य भीरुः [illegible]
रोगौषधयोर्ज्ञाने गुणमाह।
“यस्तु रोगविशेषज्ञः सर्वौषध[illegible]
देशकालविभागज्ञस्तस्य सिद्धिर्[illegible]

दावन्ते रुजो ज्ञाने प्रयतेत चिकित्सकः ।
ज्ञातानां विधानेऽथ ततः कुर्य्याच्चिकित्सितम् ॥”
चिकित्सितमित्यत्र भावे क्तः । इति भाव-
प्रकाशे पूर्व्वखण्डः ॥ * ॥ अथ येन रोगाणां
ज्ञानं स्यात्तदाह ।
“हेतुस्तदनु संप्राप्तिः पूर्व्वरूपञ्च लक्षणम् ।
उपशयः पञ्च रोगविज्ञानहेतवः ॥”
हेतोर्लक्षणमाह ।
“तु न स्याद्विना येन यस्य तद्धेतुरुच्यते ।
संव्यवहाराय तत्पर्य्यायान् प्रचक्ष्महे ॥
निदानं कारणं हेतुर्निमित्तञ्च निबन्धनम् ।
समायतनं तत्तु प्रत्ययोऽपि निगद्यते ॥”
व हेतुर्व्याधीनां ज्ञानाय हेतुर्यथा । यथा-
[illegible]शोकचिन्ताभया-
दि वातप्रकोपहेतवो वातजान् व्याधीन् बोध-
यन्ति । शरत्कट्वम्लोष्णतीक्ष्णक्रोधलवणाद्युष्णाभि-
तादयः पित्तप्रकोपहेतवः पित्तजान् व्याधीन्
बोधयन्ति । वसन्तमधुरस्निग्धशीतादयः कफ-
कोपहेतवः कफजान् व्याधीन् बोधयन्ति ॥*॥
अथ संप्राप्तेर्लक्षणमाह ।
“यथा दुष्टेन दोषेण यथा चानुविसर्पता ।
निर्व्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः ॥”
यथा दुष्टेन दोषेण यथा कारणभेदेन दुष्टेन
दोषेण । यथा चानुविसर्पता अनेकधा दोषाणां
सर्व्वाङ्गमदोर्ध्वाधस्तिर्य्यगादिगतिभेदेन । तथा च
एतेन आमयस्य या उत्पत्तिः सा
संप्राप्तिः । शास्त्रे व्यवहाराय संप्राप्तेः पर्य्याया-
नाह जातिरागतिरिति । संप्राप्तेरौपाधिक-
भेदानाह ।
“संख्याविकल्पप्राधान्यबलकालविशेषतः ।
भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥”
संख्यादिरूपा ये विशेषास्तैः सा संप्राप्ति-
रत्र भेदवती क्रियते इत्यर्थः । तत्र संख्यां
दर्शयति । यथा ज्वरोऽष्टधा अतीसारः षड्-
विध इत्यादि । विकल्पं दर्शयति । दोषाणां
समेतानां विकल्पोंऽशांशकल्पना । सम-
[illegible] समुदितानां दोषाणां अंशांशकल्पना
[illegible]मध्यादिभेदैरंशांशकल्पना विकल्पः ॥ * ॥
प्राधान्यं निर्दिशति ।
“स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादि-
शेत् ।”
[illegible] स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधा-
न्यं निर्दिशति । यथा स्वतन्त्रस्य ज्वरस्य
प्राधान्यं ज्वरोपद्रवाणां श्वासादीनामप्राधा-
न्यम् ॥ * ॥ बलं निर्दिशति ।
“हेत्वादिकार्त्स्न्यावयवैर्बलाबलविशेषणम् ॥”
[illegible] व्याधेर्बलवत्त्वं । हेत्वादिः हेतुपूर्व्व-
[illegible] । अवयवैः एक-
[illegible] व्याधेर्बलमबलत्वं निर्द्दिष्टं विशेष-
णैः ॥ * ॥ कालं निर्दिशति ।
“नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम् ॥”
[illegible] कालं व्याधिकालम् । [illegible]

यस्मिन् कालेऽपि यस्य दोषस्य प्रकोप उक्तोऽस्ति
सोऽंशस्तद्दोषजस्य व्याधेः काल इत्यर्थः ।
नक्तादिरंशेषु वातादिप्रकोप उक्तो वाग्भटेन ।
“ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः ।
वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात् ॥”
इति ॥
ते वातपित्तकफाः । ऋतुषु वातादिकोपो यथा,
“वर्षासु शिशिरे वायुः पित्तं शरदि उष्णके ।
वसन्ते तु कफः कुप्येद्यथा प्रकृतिरागतौ ॥”*॥
संप्राप्तिर्व्याधीनां ज्ञानाय हेतुर्यथा । मिथ्या-
हारविहारकुपितवातादयो आमाशयगतरसदूषण-
कोष्ठाग्निर्बहिर्निरसनत्वं ज्वरोत्पत्तिप्रकारं
बोधयति तथा व्याधीनां संख्यादोषांशांश-
कल्पनाप्राधान्यबलकालांश्च बोधयति । तेषु
ज्ञानेषु चिकित्साविशेषः स्यात् ॥ * ॥ अथ
पूर्व्वरूपस्य लक्षणमाह ।
“पूर्व्वरूपन्तु तद्येन विद्याद्भाविनमामयम् ।
सामान्यञ्च विशिष्टञ्च द्विविधं तदुदाहृतम् ॥
सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितम् ।
विशिष्टमीषद्व्यक्तं स्यात् विशेषेण समन्वितम् ॥”
दोषाणां विशेषाः जृम्भातिशयनेत्रदाहाग्नि-
मान्द्यादयः । तत्र पूर्व्वरूपं व्याधीनां ज्ञानाय
हेतुर्यथा । श्रमादयो भाविनं ज्वरं बोधयन्ति ।
अयं च त एव श्रमादयोऽतिशयितजृम्भायुक्ता
भाविनं वातज्वरं नेत्रदाहयुक्ता भाविनं पित्त-
ज्वरं वह्निमान्द्ययुक्ता भाविनं श्लेष्मज्वरं बोध-
यन्ति ॥ * ॥ अथ लक्षणस्य लक्षणमाह ।
“पूर्व्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम् ।
संस्थानं लिङ्गचिह्ने च लक्षणं रूपमाकृतिः ॥”
विशिष्टं पूर्व्वरूपं ईषद्व्यक्तं रूपं तदेव स्फु-
टत्वं लक्षणं स्मृतम् । तत्र शास्त्रे व्यवहाराय
पर्य्यायानाह संस्थानमित्यादि । लक्षणं व्याधि-
ज्ञानाय हेतुर्यथा । स्वेदावरोधः सन्तापः
सर्व्वाङ्गग्रहणञ्च युगपदेतल्लक्षणं ज्वरं बोध-
यति ॥ * ॥ अथोपशयस्य लक्षणमाह ।
“औषधान्नविहाराणामुपयोगं सुखावहम् ।
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ॥”
तत्र सात्म्यलक्षणमाह ।
“मधुरलवण[illegible]-
[illegible] ।
[illegible]
[illegible] ॥”
अथ [illegible] ।
“[illegible]-
[illegible]-
[illegible] ।
[illegible]
[illegible] ॥”
अथ [illegible] ।
“[illegible]
[illegible] ।

[illegible]पानाध्वनिवृत्तजागरजलक्रीड़ाङ्गनासेवनं
पानाहारविहारसेवनमिदं श्लेष्मामयं हरेत् ॥”
जलक्रीड़ा कथं कफं हरति तदाह । जल-
क्रीड़ाजनितश्रमेणावरुद्धदेहोष्मा प्रज्वलित-
माकाग्निर्दीप्तो भूत्वा कफं शोषयति इति
समाधिः ॥*॥ उपशयो व्याधिज्ञानाय हेतुर्यदुक्तं
चरकेण । गूढ़लिङ्गं व्याधिलक्षणञ्च व्याधिमुप-
शयानुपशयाभ्यां परीक्षेतेति । तथा च सुश्रुते ।
“अभ्यङ्गस्वेदनप्रदेहैर्विकारो वातिको न यः ।
शाम्येत्तत्र तु विज्ञेयं रक्तमात्रास्ति दूषितम् ॥
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥”
सर्व्वेषां रोगाणां निदानं सन्निकृष्टं कारणम् ।
कुपिताः स्वहेतुदुष्टाः । मलाः वातपित्तकफाः
रक्तञ्च । तथा च वाग्भटः । दोषा एव हि
सर्व्वेषां रोगाणामेककारणमिति । तस्मादागन्तु-
व्याधिषु व्यभिचारः स्यात् । नन्व तत्राप्युत्पत्त्या-
नन्तरं दोषप्रकोपस्यावश्यं भावित्वात् । उन्माद-
मदेषु तुल्ययोगस्त्वेव । इति भावप्रकाशः ॥ * ॥
पापजरोगा यथा । शातातपीयकर्म्मविपाके ।
“कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकासा अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः ।
जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः ।
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥
दण्डापतानकश्चित्रवपुःकम्पविचर्चिकाः ।
वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः ॥”
तथा ।
“[illegible] नृणां रोगा अतिपापाद्भवन्ति हि ।
अन्ये च बहुधा रोगा जायन्ते रोगसङ्कराः ।
उपयान्ति हि निदानानि प्रायश्चित्तानि च
क्रमात् ॥”
सर्व्वरोगनाशकदानं यथा । हेमाद्रिधृतदान-
खण्डे मत्स्यपुराणम् ।
“सुवर्णदानं सर्व्वेषां रोगाणां नाशकारणम् ।
तस्मात् सर्व्वप्रयत्नेन स्वर्णं दद्याद्द्विजोत्तम ॥”
इति मत्स्यपुराणम् ॥ * ॥
अथारोग्यशालादिकम् । तत्र शिल्पी शिलाः
प्रभृताः । [illegible]-
[illegible] । [illegible] । [illegible]-
[illegible]-
[illegible]-
[illegible] । [illegible] । [illegible]-
[illegible] । [illegible] । [illegible]
[illegible] । [illegible] ॥
“[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥”
इति [illegible] ॥

रोगघ्नं, क्ली, (रोगं हन्तीति । हन+टक् ।) औषधम् । इति वैद्यकम् । रोगनाशके, त्रि । (स्त्रियां ङीप् । यथा, सुश्रुते । १ । ४४ ।
"त्रिवृता सर्व्वरोगघ्नी त्रिभागशतमूर्च्छिता ।")

रोगभूः स्त्री, (रोगाणां भूः स्थानं व्याधिमन्दिरत्वात् ।) शरीरम् । इति शब्दचन्द्रिका ।

रोगराजः, पुं, (रोगाणां राजा । टच् ।) राजयक्ष्मा । इति राजनिर्घण्टः । (यथा,—
"इति व्याधिसमूहस्य रोगराजस्य हेतुजम् ।
रूपमेकादशविधं हेतुरोक्तश्चतुर्विधः ।"
इति चरके चिकित्सास्थाने ८ अध्यायः ।)

रोगलक्षणं, क्ली, (रोगाणां लक्षणम् ।) निदानम् । इति राजनिर्घण्टः ।

रोगशान्तकः, पुं, (रोगान् शान्तयतीति । शान्ति+ण्वुल् ।) वैद्यः । इति शब्दचन्द्रिका ।

रोगशिला, स्त्री, (रोगाय रोगनिवृत्तये शिला ।) मनःशिला । इति राजनिर्घण्टः । (विवरणमस्या मनःशिलाशब्दे विज्ञेयम् ।)

रोगशिल्पी, [न्] पुं, (रोगे शिल्पीव ।) वनतिक्तः । इति जटाधरः । शराड् इति भाषा ।

रोगश्रेष्ठः, पुं, (रोगेषु श्रेष्ठः ।) ज्वरः । इति राजनिर्घण्टः ।

रोगहं, क्ली, (रोगान् हन्तीति । हन्+डः ।) औषधम् । इति शब्दचन्द्रिका ।

रोगहरणं, क्ली, (रोगहरं रोगनाशकं द्रव्यम् ।) रोगनाशकवस्तु । यथा,—

धन्वन्तरिरुवाच ।

"इदानीं प्रवक्ष्यामि सर्व्वं रोगहराण्यहम् ।
द्राक्षा[illegible]मधूकं चैव तथा मधु ।
[illegible]
[illegible] शर्करा यथा ।
[illegible] विदारी च प्रियालकम् ।
मधुकं नागकुसुमं [illegible] मधुरो गणः ।
[illegible]
[illegible] निषेवितः ।
[illegible]
[illegible] कारयेत् । * ।
[illegible]
[illegible] निशिरोचनम् ।
[illegible]
[illegible] रसः ।
[illegible] विदारी [illegible]
[illegible] कुमारी [illegible]
[illegible]
[illegible] । * ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] । * ।
[illegible] दारुक च [illegible]
लवणं जम्बुजफलं मुक्ता गुग्गुलुलाङ्गली ।
कटुको दीपनः शोषी कुष्ठकण्डूकफान्तकृत् ।
स्थौल्यालस्यक्रिमिहरः शुक्रमेदोविरोधनः ।
एकोऽप्ययं सेव्यमानो भ्रमदाहादिकृद्भवेत् ॥ * ॥
कृतमालः करीराणि हरिद्रेन्द्रयवास्तथा ।
स्वादुकण्टकनिम्बानि बृहतीद्वयशङ्खिनी ।
गुडूची च द्रवन्ती च त्रिवृन्मण्डूकपर्ण्यपि ।
कारवेल्लकवार्त्ताकुकरवीरकवासकाः ।
रोहिणी शङ्खपुष्पी च कर्कोटी वैजयन्तिका ।
जाती वरुणकं निम्बो ज्योतिष्मती पुनर्नवा ।
तिक्तो रसश्छेदनः स्याद्रोचनो दीपनस्तथा ।
शोधनो ज्वरतृष्णाघ्नो मूर्च्छाकण्डूतिकादिजित् ।
विण्मूत्रक्लेदसंशोषी अत्यर्थं स च सेवितः ।
मन्यास्तम्भक्षेपकार्त्तिशिरःशूलभ्रमादिकृत् ॥ * ॥
त्रिफलाशल्लकीजम्बु आम्राम्रातकवटादिकम् ।
तिन्दुकं बकुलं शाकं तिन्दुकं सुरभिलिका ।"
तिन्दुकस्थाने पाठला इति क्वचित् पाठः ।
"कषायो ग्राहको रोपी स्तम्भनः क्लेदशोषणः ।
एकोऽप्ययं सेव्यमानो हृदयादौ पीडाकृत् ।
शुक्रशोषज्वराध्मानमन्यास्तम्भादिकारकः ॥ * ॥
हरिद्रा कुष्ठलवणमेषशृङ्गीवचाद्वयम् ।
कच्छूरी शल्लकी पद्मो पुनर्नवा शतावरी ।
अग्निमन्थो महादन्ती खदिरैरण्डके तथा ।
यवकोलकुलत्थादि कार्पासीदलमूलकम् ।
पृथक् समस्तो वातघ्नो मधुपित्तहरस्तथा ।
शतावरी विदारी च बालकोशीरचन्दनम् ।
दूर्वा वटः पिप्पली च बदरी शल्लकी तथा ।
कदली चोत्पलं पद्मकुसुमरपटोलकम् । * ।
अथ श्लेष्महरो वर्गो हरिद्रा गुड़कुष्ठकम् ।
शतपुष्पी च जाती च चोरकरजधान्यकुली । * ।
सर्पिस्तैलवसामज्जा स्नेहेषु प्रवरं घृतम् ।
तथाधीधृतिमेधाग्निकाङ्क्षिणां शस्यते घृतम् ।
कैवलं पैत्तिके सर्पिर्व्वातिके लवणान्वितम् ।
देयं बहुकफे चापि व्योषक्षारसमन्वितम् ।
ग्रन्थिनाडीक्रिमिश्लेष्ममेदोमारुतरोगिषु । * ।
तैलं लाघवदार्ढ्यार्थं क्रूरकोष्ठेषु देहिषु ।
वातातपाम्बुभाराध्वस्त्रीव्यायामक्षीणधातुषु ।
रूक्षे क्लेशक्षमात्यग्निवातावृतपथेषु च ।
तथा दग्धा भग्नधृष्ट योनिकर्ण्णशिरोरुजि ।
उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमे ।
जघन्यस्य पलार्द्धेन स्नेहक्वाथौषधेषु च । * ।
अजरुधकं दत्ते देयं पृथक् तैले न शस्यते ।
स्नेहे पीते तु तृष्णायां पिबेदुष्णोदकं नरः ।
वातानुलोमदीप्ताग्निवर्च्चस्निग्धमसं मतम् ।
रूक्षस्य स्नेहनं कार्य्यमतिस्निग्धस्य रूक्षणम् ।
श्यामाकचोरदूषाल्लयपिण्याकशक्तुभिः ।
वातघ्नैश्च वाते वा कफे वा स्वेद इष्यते ।
न स्वेदयेदतिस्थूलरूक्षदुर्ब्बलमूर्च्छितान् ।"
इति गारुडे सोमसारे १०० अध्यायः ॥

धन्वन्तरिरुवाच ।

"पुनरेवापि वक्ष्यामि शृणु सुश्रुत रोगहृत् ।
हरीतकी यथा धात्री शाको मधुकर्षता ।
अभया गुड़ूची चैव [illegible]
एतै रसमैर्भागैर्घृतप्रस्थं विपाचयेत् ।
कण्टकार्य्या रसप्रस्थः क्षीरप्रस्थसमन्वितः ।
एतद्व्याघ्रीघृतं नाम [illegible]
त्रिफलाचित्रकबलानिर्गुण्डीतिक्तारुण[illegible]
पुनर्नवा गुड़ूची च बृहती च शतावरी ।
एतैर्घृतं यथालाभं [illegible]
बलाश्मकषाये तु तैलस्याढ़कं [illegible]
कल्कैर्मधुकमञ्जिष्ठाचन्दनोत्पलपद्म[illegible]
सूक्ष्मैलापिप्पलीकुष्ठलगैलागुरुकेशरैः ।
गन्धाम्बुजीवनीयैश्च [illegible]
एतन्मृदग्निना पक्वं स्थापयेद्राजते शुभे ।
[illegible]
तैलमेतत् प्रशमयेद्बलाख्यं राजयक्ष्म[illegible]
शतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च ।
शतपुष्पा देवदारु मांसी शैलेयकं [illegible]
चन्दनं तगरं कुष्ठं माला चांशुमती [illegible]
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं [illegible]
कुब्जवामनपङ्गूनां बधिरव्यङ्गितानाम् ।
वायुना भग्नगात्राणां ये च [illegible]
जराजर्ज्जरगात्राणां [illegible]
त्वग्गताश्चापि ये वाताः
स वस्तिर्नाशयत्याशु तैश्च [illegible]
नारायणमिदं तैलं विष्णुनोक्तं [illegible]
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौ[illegible]
शतावर्य्या गुडूच्या वा चित्रके [illegible]
निर्गुण्ड्या वा [illegible]

वर्षाभागतया वापि वासकेन [illegible]
द्राक्षया चैरण्डकेनापि
मूषल्या दशमूलेन खदिरेण पलाशि[illegible]
वटिका मोदको वापि चूर्णं [illegible]

घृतेन मधुना [illegible]
लवणैः कटुकैर्युक्तं यथाभाग[illegible]
चित्रकाद्यं त्रिसमामलकद्वयमाद[illegible]
स्वधा च माषा मधिका [illegible]
ज्योतिष्मतीच संभृत्य तैलं धीरो [illegible]
एतान्निष्यन्दनं तैलं भग्न [illegible]
शोधनं रोचनं चैव सर्व्वरोगहरं [illegible]
चित्रकाद्यं महातैलं सर्व्वरोगप्रणा[illegible]
अजमोदः सशिन्दूरी [illegible]
चातुर्य्यं त्रिमधुसमांशं शरीरा[illegible]
रक्तपाशयपामार्गस्वरसैः कटु[illegible]
कल्कैः स्थाने स्नुह्यर्कैः इति च पक्व[illegible]
"एभिः सर्व्वपक्वं तैलमजामज[illegible]
मृदग्निना पचेदेतत् सर्व्वरोगप्र[illegible]
अजमोदादिकं तैलं शङ्खमाला[illegible]
विदग्धस्तु पचेत् पक्वं पक्वेन [illegible]
रोगघ्नं मृदुभावश्च तैलमानि[illegible]
अजमोदादिकं तैलं महावीर्य्य[illegible]
इति गारुडे ।

ारी, [न्] पुं, (रोगं हरति नाशयति । -णिनिः ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ ारके, त्रि ॥

क:, पुं, (रोगिणां श्रोत्रणाशकत्वात् ।) ोरहस्तः । इति राजनिर्घण्टः ॥

भं, क्ली, (रोगिणां वल्लभं प्रियम् ।) पथ्यम् । इति शब्दचन्द्रिका ॥ रोगिप्रिये, त्रि ॥

[न्] त्रि, (रोगोऽस्यास्तीति । रोग+ इनिः ।) रोगयुक्तः । तत्पर्य्यायः । व्याधितः २ तः ३ ग्लानः ४ ग्लानः ५ मन्दः ६ आतुरः ७ शान्तः ८ अभ्यमितः ९ रुग्णः १० आमयावी ११ पटुः १२ । इति राजनिर्घण्टः ॥ आम-ी १३ ग्लास्नुः १४ । इत्यमरः ॥ * ॥ अथ चिकित्सार्थं रोगिणः परीक्षा । तत्र प्राग्-ः ।

दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम् ।
डुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम् ॥"

डुरादि । आदिशब्दात् साध्यत्वासाध्य-दि । दृशा दर्शनेन । अत्र सम्पदादिभ्य-ति भावे क्विप् । स्पर्शात् शीतादेः । शीतोष्ण-कठिनत्वादिना परीक्षणञ्च । प्रश्नतः । लाघवगौरवपथ्यापथ्यबलाबलादिना ॥

मथ्या दृष्टा विकारा हि दुराख्यातास्तथैव च ।
ा दुष्परिदृष्टाश्च मोहयेयुश्चिकित्सकान् ॥"

दर्शनं नेत्रजिह्वामूत्रादेः कर्त्तव्यम् ॥ * ॥ नेत्रपरीक्षा यथा,—

त्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
टरान्तःप्रविष्टञ्च तथास्तञ्च विलोकनम् ॥
रिद्राभवर्णञ्च रक्तं वा हरितं तथा ।
प्रदेऽपि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
श्लेष्माधिक्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
या धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
त्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् ।
त्रिदोषलिङ्गं सेवेत सम्मारयति रोगिणम् ॥
त्रिदोषदूषितं नेत्रमन्तर्लीनं भृशं भवेत् ।
ललिङ्गं सलिलस्रावि प्रान्तेनोन्मीलयत्यपि ॥" *

ाथ जिह्वापरीक्षा ।

शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
क्ता श्यामा भवेत् पित्तालिप्ताऽऽर्द्रा धवला कफात् ।
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
व दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"

अथ मूत्रपरीक्षा ।

"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेद्रक्ताद्धवलं फेनिलं कफात् ॥"

अथ शरीरस्य उष्णत्वादिज्ञानार्थं स्पर्शनं कार्य्यम् । तत्र नाड़ीपरीक्षामाह ।

"पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु ।
अङ्गुष्ठमूलगा नाड़ी परीक्ष्येत भिषग्वरैः ॥
अङ्गुलीभिस्तु तिसृभिर्नाड़ीमवहितः स्पृशेत् ।
तच्चेष्टया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥
सद्यःस्नातस्य भुक्तस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामश्रान्तदेहस्य सम्यङ् नाड़ी न बुध्यते ॥
वातेऽधिके भवेन्नाड़ी प्रव्यक्ता तर्ज्जनीतले ।
पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे ॥
तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा ।
अनामिकायां तर्ज्जन्यां व्यक्ता वातकफे भवेत् ॥
मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके ।
अङ्गुलित्रितयेऽपि स्यात् प्रव्यक्ता सन्निपातिनः ॥
वाताद्वक्रगतिर्नाड़ी पित्तादुत्प्लुत्य गामिनी ।
कफान्मन्दगतिर्ज्ञेया सन्निपातादतिद्रुता ॥
वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः ।
वहेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिके ततः ॥
उत्प्लुत्य मन्दं चलति नाड़ी पित्तकफेऽधिके ।
कामात् क्रोधात् वेगवहा क्षीणा चिन्ताभयाप्लुता ॥
स्थित्वा स्थित्वा चलेद्या या हन्ति स्थानच्युता तथा ।
अतिक्षीणा च शीता च प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् ।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता ॥
चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा ।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता ॥"
इति भावप्रकाशः ॥

(लक्षणान्तरादिकमाह ।

"रोगो यस्यास्ति रोगी स च चिकित्स्यस्तु यादृशः ।
यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम् ॥"

तत्र चिकित्स्यः ।

"निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥"

सत्त्वं व्यसनाभ्युदयक्रियादिष्वविक्लवताकरं तेन युक्तः । चक्षुषा चक्षुरुपलक्षितेन । ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगान् मोचयितव्यः । अन्यच्च ।

"आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि ।
चिकित्स्यो भिषजा रोगी वैद्यवाक्यकृदास्तिकः ॥"

आयुर्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ॥ अथाचिकित्स्यः ।

"चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च शङ्कितः ।
भिषजामविधेयाः स्युर्नोपक्रम्या भिषग्विधाः ॥
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥"

चण्डोऽत्यन्तक्रोधशीलः । साहसिकः अविचार्य्यकारी । भीरुर्भयशीलः । कृतघ्नो वैद्यकृतोपकारलोपकः । व्यग्रो व्याकुलः । विहीनः करणैश्च यः निजेन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात् । वैद्यविदग्धो वैद्यधूर्त्तः । तथा च सुश्रुतः ।

"स न सिद्ध्यति वैद्यस्तु गृहे यस्य न पूज्यते ।"

शङ्कितो वैद्यविश्वासरहितः । भिषजामविधेयाः ॥ वैद्यवचनाविधायिनः । भिषग्विधा वैद्यतुल्याः । एते नोपक्रम्याः न चिकित्स्याः । अथ दूतस्य लक्षणम् ।

"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽश्वरथारूढ़ाः शुभ्रपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्च सजीवदिशिसङ्गताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥"

सजातयः रोगिसमानजातयः ।

"यस्यां प्राणमरुद्वाति सा नाड़ी जीवसंज्ञिता ॥"

अथ दूतस्य यात्रायां शकुनविचारः ।

"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं सौम्य शकुनं प्रदीप्तन्तु सुखावहम् ॥"

प्रदीप्तमग्निं दूतो रोगी रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।

"रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रोग्यं, त्रि, (रोगाय हितमिति । रोग+यत् ।) अपथ्यम् । अहितम् । इति शब्दचन्द्रिका ॥ रोगसम्बन्धिनि च ॥

रोचकः, पुं, (रोचयतीति । रुच्+णिच्+ण्वुल् ।) क्षुधा । तत्पर्य्यायः । बुभुक्षा २ अशना ३ जिघत्सा ४ रुचिः ५ । इति हेमचन्द्रः । ३ । ५७ ॥ कदली । इति शब्दरत्नावली ॥ राजपलाण्डुः । अवदंशः । इति राजनिर्घण्टः ॥ ग्रन्थिपर्णभेदः । भण्डउर इति नेपालदेशे ख्यातः । तत्पर्य्यायः । निशाचरः २ धनहरः ३ कितवः ४ गणहासकः ५ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । पाके कटुत्वम् । लघुत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । हिमत्वम् । कुष्ठकण्डूकफानिलरक्षोऽश्री स्वेदमेदोऽस्रज्वरगन्धविषव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ (काचकूप्यादिकारकः । यथा, रामायणे । २ । ८३ । १३ ।

"मायूरकाः क्राकचिका वेधका रोचकास्तथा ॥"

"रोचकाः काचकूप्यादिकर्त्तारः इति कतकः ।" इति तट्टीका ॥) रुचिकारके, त्रि ॥ (यथा, सुश्रुते । १ । ४६ । मांसवर्गे ।

"संग्राही रोचको वल्यस्तथामेध्यो ज्वरापहः ॥")

रोचनः, पुं, (रोचयतीति । रोचि+नन्द्यादित्वात् ल्युः ।) कूटशाल्मलिः । इत्यमरः ॥ (तस्य पर्य्यायो यथा,—

"कुत्सितः शाल्मलिः प्रोक्तो रोचनः कूट-
शाल्मलिः ।"

इति भावप्रकाशे । १ । १ ।

काम्पिल्लः । तत्पर्य्यायो यथा,—

"काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि
च ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
श्वेतशिग्रुः । पलाण्डुः । आरग्वधः । करञ्जः ।
अङ्कोठः । दाड़िमः । इति राजनिर्घण्टः ।
(देवयोनिविशेषः । यथा, हरिवंशे ।१६६।७५।
"कुम्भाण्डः कुम्भमल्लाश्च रोचनो वैजलोचनः ।"
दक्षिणापुत्रयोरन्यतमः । स च स्वायम्भुवमन्व-
न्तरे देवविशेषः । इति भागवतम् । ४ । १ । ७ ।
स्वारोचिषमन्वन्तरे इन्द्रः । इति च तत्रैव ।८।१।
२० । भारतवर्षान्तर्गतपर्व्वतविशेषः । यथा,
मार्कण्डेये । ५७ । १३ ।
"तुङ्गप्रस्थो नागगिरी रोचनः पाण्डराचलः ।")
त्रि, रोचकः । इति मेदिनी । ने, ११६ । (यथा,
सुश्रुते । १ । ४६ । शाकवर्गे ।
"हृद्योष्णं रोचनं हृद्यं सस्नेहं लघु दीपनम् ।"
दीप्तिशाली । यथा, हरिवंशे । १२८ । ४५ ।

"अन्तकरं रोचनं चारुशाखं
महाबलं धर्म्मनेतारमीशम् ।
सहस्रनेत्रं शतवर्म्माणमुग्रं
महादेवं विश्वसृजं नमस्ते ।"

शोभमानः । यथा, भट्टिः । ६ । ७३ ।
"भृङ्गालिकोकिलकुड्भिर्वाशनैः पश्य लक्ष्मण ।
रोचनैर्भूषितां पम्पामस्माकं हृदयाविधम् ।"
अनुरागकरः । यथा, भागवते । १ । १० ।११ ।
"सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ।
कीर्त्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ।")
रोचनकः, पुं, (रोचयतीति । रोचि + ल्युः । ततः
कन्) जम्बीरः । इति राजनिर्घण्टः । (गुणा-
दयोऽस्य जम्बीरशब्दे ज्ञातव्याः ।)
रोचनफलः, पुं, (रोचनं रुचिकरं फलमस्य ।)
बीजपूरकः । इति राजनिर्घण्टः ।
रोचनफला, स्त्री, (रोचनं रोचकं फलमस्याः ।)
चिर्भिटा । इति राजनिर्घण्टः ।
रोचना, स्त्री, (रोचते या । रुच् + "बहुलमन्य-
त्रापि ।" उणा० २ । ७८ । इति युच् । टाप् ।)
रक्तकह्लारम् । गोपित्तम् । गोरोचना इति
ख्यातम् । (यथा, मनुः । ८ । २३४ ।
"कर्णौ चर्म्म च वालांश्च वस्तिं स्नायुञ्च रोच-
नाम् ।
पशुषु स्वामिनो दद्यात् मृतेष्वङ्गानि दर्शयेत् ।")
वरयोषित् । इति मेदिनी । ने, ११८ । (वसु-
देवपत्नी । यथा, भागवते । ९ । २४ । ४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकी प्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ।")
रोचनिका, स्त्री, (रोचनैव । स्वार्थे कन् ।
टापि अत इत्वम् ।) वंशरोचना । इति राज-
निर्घण्टः । शुक्लारोचनी । इति रत्नमाला ।

रोचनी, स्त्री, (रोचते इति । रुच् + "कृत्यल्युटो
बहुलमिति ल्युट् । ततो ङीप् ।) आमलकी ।
गोरोचना । इति राजनिर्घण्टः । मनःशिला ।
इति हेमचन्द्रः । श्वेतत्रिवृता । गुण्डारोच-
नीतिख्यातक्षविशेषम् । तत्पर्य्यायः । काम्पिल्ल २
कर्कशः ३ चन्द्रः ४ रक्ताङ्गः ५ । इत्यमरः ।
काम्पिल्लः ६ कम्पीलः ७ कम्पिलः ८ काम्पिल्यः ९
रेचनी १० । इति भरतः । पर्य्यायान्तरं गुणाश्च
काम्पिल्लकशब्दे द्रष्टव्याः ।
रोचमानः, पुं, (रोचते इति । रुच् + शानच् ।)
अश्वग्रीवास्थरोमावर्त्तः । यथा,—
"ग्रीवायां हृदयावर्त्तौ रोचमानो गलोद्भवः ।"
इति जिकाण्डशेषः ।
(यथा, माघे । ५ । ४ ।
"अश्वाः प्यधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरायतान्ताः ।"
नृपविशेषः । यथा, महाभारते । १ । ६७।१८ ।
"अश्वग्रीव इति ख्यातः सत्त्ववान् यो महा-
सुरः ।
रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः ।"
दीप्यमाने, त्रि । यथा, कथासरित्सागरे ।
७४ । ७८ ।
"रोचमानैः समायुक्तचूड़ामण्यङ्गदादिभिः ।
गन्धर्व्वकुलसम्भूतैर्वसिष्ठैरिव भूषितम् ।")
रोचिः, [स्] स्त्री, (रोचतेऽनेनेति । रुच् +
बाहुलकात् इसिन् । इत्युज्ज्वलः । २ ।११२ ।)
प्रभा । इत्यमरः । (यथा, माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
मृषित्विषः संवलिता विरेजिरे ।")
रोचिष्णुः, त्रि, (रोचते तच्छीलः । रुच् + "अलं
कृञ् निराकृञिति ।" ३ । २ । १३६ । इति
इष्णुच् ।) अलङ्कारादिना दीप्तिशीलः । तत्-
पर्य्यायः । विभ्राट् २ भ्राजिष्णुः ३ । इत्यमरः ।
(यथा, कथासरित्सागरे । ९४ । ९ ।
"तत्र शूकरदम्भ्राणि भिन्दन् बाणैर्निरन्तरम् ।
श्यामलाम्बररोचिष्णुस्तमांसीव रविः करैः ।"
रोचकः । यथा, सुश्रुते । १ । ४५ । मद्यवर्गे ।
"सुगन्धि दीपनं हृद्यं रोचिष्णु कृमिनाशनम् ।")
रोची, स्त्री, (रोचते इति । रुच् + इन् । वा
ङीष् ।) हिलमोचिका । इति शब्दरत्नावली ।
रोची, [न्] त्रि, (रोचते इति । रुच् + णिनिः ।)
रोचिष्णुः । इति हेमचन्द्रः ।
रोच्यं, त्रि, (रुच् + ण्यः । "ऋहलोर्ण्यत्" इति ।
"यजयाचरुचप्रवच-
र्चश्च ।" ७ । ३ । ६६ । इति कवर्गादेशो न ।)
प्रकाश्यम् । प्रीतिविषयः । रुचधातोः कर्म्मणि
यप्रत्ययेन निष्पन्नोऽयम् ।
रोट्, [ड्] त्रि, (रुष् + "अन्येभ्योऽपि दृश्यन्ते ।"
३ । २ । ७५ । इति क्विप् ।) हिंस्रः । घातकः ।
रोषतीति विचि गुणः । इति मुग्धबोधटीकायां
दुर्गादासः ।
रोटिका, स्त्री, पिष्टकविशेषः । रोटी इति रुटी
इति च भाषा । तत्करणप्रकारमाह ।

"गुन्दगोधूमचूर्णेन वि...
तस्के नीरयेत् सम्यक् भूयो...
मिट्टका रोटिका प्रोक्ता ...
रोटिका बलदा रुच्या बृंहणी ...
वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां ...
अथ लेटी ।
"शुष्कगोधूमचूर्णेन मानुषान्...
विधाय बटकाकारं निर्वापये...
अङ्गारकर्कटी ज्ञेया ... ।
दीपनी कफदुष्टम्
अथ यवरोटिका ।
"यवजा रोटिका बल्या मधुरा...
मलानुलोमनकरी बल्या ...
पीनसश्वासकासघ्नी ...
अथ माषरोटिका ।
"पूर्वं यथोक्तमाषाणां पक्वी...
पक्वमीरचिता रोटी कथ्यते ...
कफघ्नी वातला ...
माषाणां रोटिका ...
कानघ्नी प्रोक्ता यथे निशा ...
पूर्णपीरचिता भेद प्रोक्ता मर्म्मर...
मर्म्मरिकास्थाने हर्म्मरिका ...
इति वा पाठः ।
"भर्म्मरी कफपित्तघ्नी ...
अथ चणकरोटिका ।
... ।६।।८ ...
विष्टम्भिनी न चक्षुष्या तद्गुणा...
इति ...
रोड, ऋ अनादरे । इति कविकल्पद्रुमः ।
पर०-सक०-सेट् ।) ऋ, अररो...
दुर्गादासः ।
रोदः, [स्] क्ली (रुद् + असुन् ।)
इति मेदिनी । से, ११ । (...
२२ । ५ ।
"एते प्रकाशि रोदसी विश्वतो ...
रोदनं, क्ली, (रुद् + ल्युट् ।) क्रन्दन...
पाञ्चजन्यशतके । ६२ ।
"दुर्ब्बलस्य बलं राजा बालानां रोद-
बलं मूर्खस्य मौनित्वं चौराणाम...
अश्रु । इति मेदिनी । ने, ११८ । ...
यथा,—
"अनश्रु स्निग्धवदितमदीनं शुभं ...
प्रचुराश्रु दीनं रूक्षञ्च वदितं ...
इति माधव ...
कपिलाधेनुभि मेधामुना रत्नस्तो
यथा,—
"सुहृत् मुनिं मृतं दृष्ट्वा रुरोद कश्चि...
इत्युपक्रम्य ।
"तदश्रुबिन्दुना मर्त्यं रक्तवंशो ...
रोदनानुपतनेन स्थलात् नरकं ...
"ज्ञानिनो मा रुदन्त्येव मा रोदी ...

...नुरूपमनुरूपाणां मरणं ध्रुवम् ।"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २० अध्यायः ॥
...दिवम् रोदसीनिर्णयो यथा,—
...हु वाग्भटेऽप्युक्ते रोदो भूकाशे रोदसी तथा ।
...न रोदिसीं दिवं स्त्रियः चाम्भ्यां विधानतः ॥"
इति शुद्धितत्त्वम् ॥
...त, स्त्री, (रोदनं अस्य प्रान्तेशाख्यस्यति ।
...+टन् ।) यवासः । इति राजनिर्घण्टः ॥
...घोऽस्य यवासशब्दे ज्ञातव्यः ।)
...स्त्री, (रुद्यतेऽनयेति । रुद् + करणे ल्युट् ।
...।) दुरालभा । इत्यमरः । २ । ४ । ९२ ॥
... स्त्री, (रोदस् + गौरादित्वात् ङीष् ।)
...। भूमिः । इत्यमरः । ३ । ३ । २२८ ॥
...च, स्वर्गः । भूमिः । यथा,—
...द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च ॥"
इति भरतधृतकोषः ॥
..., स्त्री, भूमिस्वर्गौ । यथा,—
...रस्यापि भूद्यावौ रोदस्यौ रोदसी च ते ॥"
इत्यमरः । ३ । ३ । २२८ ॥
...भूमिः द्यौराकाशं एते अपि हे विरहीते च
...रोदःशब्दयोर्वाच्येते इति भूद्यावौ परा-
...ते एतेन ईकारान्तशब्दद्वयेन एकवच-
...तिनापि भूद्यावौ गह्यते उच्यते ।
...हस्व रोदसी चापि दिवि भूमौ पृथक् पृथक् ।
प्रयोगेऽप्यसौ रोदः स्यादपि रोदसी ॥'
इति विश्वः ॥
...दसी रोदसा पाहि पृथ्वीस्वर्गौ दिवि क्षितौ ॥'
इत्यजयः ॥
...सौत्ययमप्यस्ति । यथा । द्यावापृथिव्यौ
...स्यौ रोदसी रोदसीति चेति ।" इति
...टीकायां भरतः ॥
... पुं, (रुणद्धि जलमिति । रुध् + पचाद्यच् ।)
...तीरम् । इत्यमरटीकायां भरतः ।१।१०।७।
...ध् + घञ् । रोधनम् । यथा, मार्कण्डेये ।
...।१।
...वैश्यकुले जातो जन्मन्यस्मात् सप्तमे ।
...ते गवां रोधं निपाने कृतवान् पुरा ॥")
... [स्] स्त्री, (रुणद्धि वार्य्यादिकमिति । रुध +
...सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति
...न् ।) नदीतीरम् । इत्यमरः । १ । १० । ७ ॥
...था, रघुः । ५ । ४२ ।
"स नर्म्मदारोधसि सीकरार्द्रै-
र्मरुद्भिरानर्त्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम् ॥")
..., त्रि, (रुणद्धीति । रुध + तृच् ।) रोधकर्त्ता ।
...धि + भावे ल्युट् ।) रोधे, क्ली । इति व्याक-
...णम् ॥ (यथा, भागवते । ३ । ३० । २७ ।
...तनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्त्तयोः ॥")
...क्रा, स्त्री, (रोधेन वक्रा ।) नदी । यथा ।
...गा रोधवक्रा च स्रवन्ती सिन्धुरापगेति
...रोपर्य्याये भागुरिः । इति भरतः ॥

रोधोवक्रा, स्त्री, (रोधसा वक्रा ।) नदी । इति शब्दरत्नावली ॥

रोधोवती, स्त्री, (रोधोऽस्त्यस्या इति । रोधस् + मतुप् । ङीप् ।) नदी । इति राजनिर्घण्टः ॥

रोध्रं, क्ली, (रुध्यतेऽनेन । रुध + बाहुलकात् रन् ।) अपराधः । पापम् । इति मेदिनी । रे, ८१ ॥

रोध्रः, पुं, लोध्रः । इति मेदिनी राजनिर्घण्टश्च ॥ (यथा, सुश्रुते । १ । १२ ।
"मधूच्छिष्टं समधुकं रोध्रं सर्ज्जरसं तथा ।
मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्व्विपाचयेत् ॥")

रोध्रपुष्पः, पुं, (रोध्रस्येव पुष्पमस्य ।) मधूकवृक्षः । इति राजनिर्घण्टः ॥ (मण्डलिसर्पजातिविशेषः । तद्यथा ।"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसः इत्यादिषु ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

रोध्रपुष्पिणी, स्त्री, (रोध्र इव पुष्पाणीति । पुष्प + णिनि । ङीप् ।) धातकीवृक्षः । इति राजनिर्घण्टः ॥

रोपः, पुं, (रुप्यतेऽनेनेति । रुप विमोहे + घञ् ।) बाणः । इत्यमरः ॥ (रुह + णिच् + घञ् ।) रोपणम् । इति मेदिनी । पे, २ ॥ (यथा, महाभारते । १३ । ५८ । २४ ।
"एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्विमे ॥")
छिद्रे, क्ली । इति हेमचन्द्रः ॥

रोपणं, क्ली, विमोहनम् । रुपधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥ जननम् । प्रादुर्भावः । आरोपणम् । रुहधातोः पकारादेशे अनट्प्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । १५ ।
"सन्धिसंश्लेषणस्पन्दनरोपणपूरणबलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मानुग्रहं करोति ॥")
अञ्जनविशेषः । यथा,—
"रोपणं रसकं पिष्ट्वा सम्यक् संप्लाव्य वारिणा ।
गृह्णीयात्तज्जलं सर्व्वं त्यजेच्चूर्णमधोगतम् ॥
शुष्कञ्च तज्जलं सर्व्वं पर्पटीसन्निभं भवेत् ।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः ॥
कर्पूरस्य रसन्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयने तेन नेत्राखिलगदच्छिदः ॥"
इति भावप्रकाशः ॥
(त्रि, रोपकः । यथा, सुश्रुते । ६ । १८ ।
"लेखनात् त्रिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥"
व्रणरोगे मांसाङ्कुरजननार्थप्रक्रियादिकम् । तद्यथा,—
"आदौ विम्लापनं कुर्य्याद्द्वितीयमवसेचनम् ।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम् ॥
पञ्चमं शोधनञ्चैव षष्ठं रोपणमिष्यते ।
एते क्रमा व्रणस्योक्ताः सप्तमो वै कृतापहः ॥
निम्बपत्रतिलैः कल्को मधुना व्रणशोधनः ।
रोपणः सर्पिषा युक्तो यवकल्कोऽप्ययं विधिः ॥"
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)

रोपणचूर्णं, क्ली, (रोपणस्य चूर्णम् ।) नयनाञ्जनविशेषः । यथा, भावप्रकाशे ।

अथ रोपणचूर्णम् ।
"शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा ।
गृह्णीयात् तज्जलं सर्व्वं त्यजेच्चूर्णमधोगतम् ॥
शुष्कं तच्च जलं सर्व्वं पर्पटीसन्निभं भवेत् ।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः ॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयनं तेन सर्व्वदोषोपशान्तये ॥
समस्तनेत्ररोगघ्नं चूर्णमेतन्न संशयः ॥"

रोपणीवर्त्तिः, स्त्री, नेत्राञ्जनभेदः । यथा । अथ रोपणीवर्त्तिः ।
"अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः ।
जातीपुष्पाणि पञ्चाशन्मरिचानि च षोडश ॥
सूक्ष्मं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा ।
तिमिरार्ज्जुनशुक्राणां नाशिनी मांसवृद्धिनुत् ।
एतस्या अञ्जने प्रोक्ता मात्रा सार्द्धहरेणुका ॥"
कुसुमिकावटी रोपणी । इति भावप्रकाशः ॥

रोप्यातिरोप्यः, पुं, धान्यविशेषः । अस्य गुणाः ।
"रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः ।
अदाहिनो दोषहरा बल्या मूत्रविवर्द्धनाः ॥"
इति राजवल्लभः ॥

रोमं, क्ली, जलम् । इति शब्दचन्द्रिका ॥ (लोम । यथा, महाभारते । ३ । ११२ । ३ ।
"द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च ॥"
जनपदविशेषः । इति केचित् ॥)

रोम, [न्] क्ली, (रौतीति । रु + "नामन्सीमन्व्योमन्रोमन्निति ।" उणा० ४ । १५० । इति मनिन्प्रत्ययेन साधुः ।) शरीरजाताङ्कुरः । रोंया इति भाषा । तत्पर्य्यायः । लोम २ अङ्गजम् ३ त्वग्जम् ४ चर्म्मजम् ५ तनूरुहम् ६ । इति राजनिर्घण्टः ॥ स्थानविशेषे तस्य शुभाशुभसूचकत्वं यथा,—
"अल्परोमयुता श्रेष्ठा जङ्घा हस्तिकरोपमा ।
रोमैकैकं कूपके स्यान्नृपाणान्तु महात्मनाम् ॥
द्वे द्वे रोमे पण्डितानां श्रोत्रियाणान्तथैव च ।
रोमत्रयं दरिद्राणां रोगी निर्म्मांसजानुकः ॥"
इति गारुडे ६३ अध्यायः ॥
रहस्यरोम्णोऽस्पृश्यत्वं यथा,—
"न सर्पशस्त्रैः क्रीडेत स्वानि खानि न संस्पृशेत् ।
रोमाणि च रहस्यानि नाशिष्टेन सदा व्रजेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
(जनपदविशेषः । तद्देशवासिनि । पुं भूम्नि । यथा, महाभारते । ६ । ९ । ५५ ।
"वानायवो दशाःपार्श्वा रोमाणः कुशविन्दवः ॥")

रोमकं, क्ली, (रोमे कायतीति । कै + कः ।) पांशुलवणम् । (यथा, सुश्रुते । १ । ४२ ।
"सैन्धवसौवर्च्चलविड्पाक्यरोमकसामुद्रकपाक्यिमयवक्षारोषरप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः ॥") अयस्कान्तभेदः । इति राजनिर्घण्टः ॥ (रोमैव । जनपदविशेषः । तद्देशवासिनि, पुं भूम्नि । यथा, महाभारते ।२।५०।१५।
"औष्णीकानन्तवासांश्च रोमकान् पुरुषादकान् ॥")

स्वामी देवता ब्रह्मा। गगनमध्ये उदिते सति सिंहलग्नस्य अष्टमिंशन्नवाधिकदण्डमितयं गतं भवति। यथा,—

"कमलाक्षि! मुकुलाञ्जलौ नभो-
मध्यमागतवति प्रजापतौ।
यस्य भै गजकुम्भलिप्तिका
निःस्पृहाः सुदति! सिंहलग्नतः॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥*॥

तत्र जातफलं यथा,—

"स्याद्धर्मेऽर्थे कुशलः कुलीनः
सुवाग्देवो विमलकलेवरः।
कलासु विज्ञाकुलितान्तराशयो
यो रौहिणीजः स धनी स मानी॥"

इति कोष्ठीप्रदीपः॥*॥

गलरोगविशेषः। यथा। रौहिणीनामकगलरोगाणां नामानि संख्याचाह।

"रोहिण्यः पञ्चधा प्रोक्ताः कण्ठशालूक एव च।
अधिजिह्वश्च वलयो बलासाख्यैकवृन्दकः॥
वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः।
गलौघः स्वरघ्नश्च मांसतानक एव च।
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः॥"

तत्र पञ्चानामपि रोहिणीनां सामान्यं प्राप्तिमाह।

"गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम्।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरियं हि रोहिणी॥"

अनिलः मूर्च्छितः प्रवृद्धः पित्तकफौ च मूर्च्छितौ मिलितौ वा मूर्च्छितौ वर्द्धितौ वा मूर्च्छितः। ननु वर्द्धितौ मूर्च्छिताः पृथग्रोहिण्यो भवितव्यम्। तत्रा वातजाया लक्षणमाह।

"जिह्वासमन्ताद्भृशवेदनास्तु
मांसाङ्कुराः कण्ठनिरोधिनः स्युः।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता॥"

जिह्वासमन्तात् जिह्वायाः सर्व्वतः। वातात्मकोपद्रवगाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता।"

पित्तजामाह।

"क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता॥"

कफजामाह।

"स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु॥"

स्रोतोनिरोधिनी कण्ठरोधेन॥*॥ सन्निपातजामाह।

"गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रितयोत्थिता च॥"

रक्तजामाह।

"स्फोटैश्चिता पित्तसमानलिङ्गा
असाध्या प्रदिष्टा रुधिरात्मिका तु॥"

इति रोहिणीनां ज्ञानसाध्यासाध्यत्वमाह।

"[illegible]
[illegible]"

कण्ठशालूकमाह।

"कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति॥"

कण्टकशूकभूतः कण्टकवच्छूकवद्वेदनाजनकः॥ अधिजिह्वमाह।

"जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादपि रक्तमिश्रात्।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम्॥"

अस्य रक्तमिश्रादेवेत्यन्वयः॥*॥ वलयमाह।

"बलास एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति॥"

बलासमाह।

"गले तु शोथं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेनमाहु-
र्बलाससंज्ञं भिषजो विकारम्॥"

मर्म्मच्छिदं हृदयमर्म्मणि छेदेनेव वेदनाजनकम्॥ एकवृन्दमाह।

"वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यमृदुर्गुरुश्च।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्बलासक्षतजप्रसूतः॥"

अन्तः गलमध्ये। अपाकी ईषत् पाकी। अमृदुः ईषन्मृदुः॥*॥ वृन्दमाह।

"समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति।
तच्चापि पित्तक्षतजप्रकोपा-
द्विद्यात् सतोदं पवनात्मकन्तु॥"*॥

शतघ्नीमाह।

"वर्त्तिर्घना कण्ठनिरोधिनी तु
चितातिमात्रं पिशितप्ररोहैः।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीव शतघ्नी॥"

घना कठिना। अनेकरुक् वातपित्तकफजनितोदादाहकण्ड्वादियुक्ता। शतघ्नीसदृशी लोहकण्टकसंवृता शतघ्नी महती शिला। तत्तुल्या यतः प्राणहरी॥*॥ गिलायुमाह।

"ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः।
संलक्ष्यते सक्तमिवाशितञ्च
स शस्त्रसाध्यस्तु गिलायुसंज्ञः॥"

कण्ठविद्रधिमाह।

"सर्व्वं गलं व्याप्य समुत्थितो यः
शोफो रुजः सन्ति च यत्र सर्व्वाः।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य॥"*॥

गलौघमाह।

"शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ॥"

वायुगतेर्निहन्ता उदानवायुरोधकः॥ स्वरघ्नमाह।

"यस्ताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः॥"

ताम्यमानः तमः पश्यन्। शुष्कः विमुक्तोऽस्वाधीनः। अस्वाधीनता शक्तं गिलितुं। अनिलायनेषु वायुवर्त्मसु। [illegible]

मांसतानमाह।

"प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण।
स मांसतानः कथितोऽवलम्बी
प्राणप्रणुत् सर्व्वकृतो विकारः॥"

प्रतानवान् विस्तारवान्। सुकष्टः कष्टं यस्य सः॥*॥ विदारीमाह।

"सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम्।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते॥"

पार्श्वे विशेषात् स तु येन शेते। पार्श्वेन विशेषाद्वाहुल्येन शेते [illegible] विदारी भवति इत्यर्थः॥*॥ अस्याः चिकित्सा।

"रोहिणीनान्तु साध्यानां [illegible]

वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म च।
वातजायान्तु रक्ते स्रवे: [illegible]
सुखोष्णान् [illegible]
विस्राव्य पित्तसंभूतां [illegible]
घर्षयेत् शर्करा [illegible]
आगारधूमकटुकैः कफजां [illegible]
आगारधूमः भूष इति लोके।
शुण्ठीपिप्पलीमरिचानि।
"श्वेताविडङ्गदन्तीषु तैलं सिद्धं [illegible]
नस्यकर्म्मणि दातव्यं [illegible]
श्वेता अपराजिता।
"पित्तवत् साधयेद्वैद्यो रोहिणीं [illegible]
विस्राव्य कण्ठशालूकं साधयेत् [illegible]
एककालं यवान्नञ्च भुञ्जीत [illegible]
उपजिह्वकवच्चापि साधयेदधिजिह्व[illegible]
एकवृन्दन्तु विस्राव्य विधिं [illegible]
एकवृन्दमिव प्राज्ञो वृन्दञ्च [illegible]
गिलायुश्चापि यो व्याधिस्तञ्च [illegible]
अमर्म्मस्थं सुपक्वञ्च भेदयेद्[illegible]

इति [illegible]

(स्तूले, त्रि। यथा, महाभारते [illegible]

हणा न मटमी न क्रष्णा नापि रोहिणी ।
ःहितर्ह्री न मया नीलाष्टमी तथा ।")
पतिः, पुं, (रोहिण्याः पतिः ।) चन्द्रः ।
हेमचन्द्रः । २ । १८ । (यथा, देवीभाग
१ । ११ । १८ ।
ं भाषमाणं सगुराष रोहिणीपतिः ।
क्रोधसमायुक्तं मान्नाविरहदुःखितम् ।"
मः । वृषभश्च ।)
रमणः, पुं, (रोहिण्या रमणः ।) वृषभः ।
राजनिर्घण्टः । वसुदेवश्च । (चन्द्रः ।
गीतगोविन्दे । ७ । १० ।
तं अपदेवेन पर्ववदिदं प्रवसेन ।
अन्तमगृहसमायरोहिणीरमणेन ।")
वल्लभः, पुं, (रोहिण्या वल्लभः ।) चन्द्रः ।
हलायुधः । वसुदेवश्च ।
ईशः, पुं, (रोहिण्या ईशः ।) चन्द्रः ।
हेमचन्द्रः । (यथा, माघे । ३ । ६० ।
"यां रेवतीजानितयेग हानु
न रौहिणेयो न च रोहिणीशः ।")
देवश्च ।
अष्टमी, स्त्री, (रोहिणीयुक्ता अष्टमी ।)
हणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी । यथा,—
दाष्टम्यां च रोहिण्यामर्द्धरात्रेऽर्चनं हरेः ।
यां विद्वापि समन्या हन्ति पापं त्रिजन्म-
जम् ।
।धितोऽर्घेवेन्नन्तेत्तिथिभान्ते च पारणम् ।
ाय योगपतये योगेश्वराय योगसम्भवाय
वन्दाय नमो नमः । स्नानमन्त्रः । यज्ञाय
श्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय
ो नमः । अर्घनस्य । विश्वाय विश्वेश्वराय
श्वपतये विश्वसम्भवाय गोविन्दाय नमो
ः । शयनस्य । सर्वाय सर्वेश्वराय सर्व-
ये सर्वसम्भवाय गोविन्दाय नमो नमः ।
ागस्य ।
दिले पूजयेद्देवं सचन्द्रां रोहिणीन्तथा ।
ि तोयं समादाय सपुष्पफलचन्दनम् ।
शुभ्भासमन्वितं गत्वा चन्द्रायार्घ्यं निवेदयेत् ।
रोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
ाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ।
ये वसुदेवाय बलदेवाय नन्दाय यशोदाये ।
घं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
सुदेवं हृषीकेशं नृसिंहं दैत्यसूदनम् ।
राहं पुण्डरीकाक्षं श्रीकान्तमजमव्ययम् ।
मोदरं पद्मनाभं केशवं गरुड़ध्वजम् ।
विन्दमच्युतं देवमनन्तमपराजितम् ।
धोक्षजं जगद्बीजं सर्गस्थित्यन्तकारकम् ।
नादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
रायणञ्चतुर्बाहुं शङ्खचक्रगदाधरम् ।
ताम्बरधरं दिव्यं वनमालाविभूषितम् ।
मनुषाङ्कं जगद्धाम श्रीपतिं श्रीधरं हरिम् ।
देवं देवकी देवी वसुदेवादजीजनत् ।
मस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
नामान्येतानि संकीर्त्य नत्वञ्च प्रार्थयेत् पुनः ।
त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवात् प्रभो ।
देवकीनन्दन श्रीश हरे संसारसागरात् ।
दुर्वृत्ताञ्चायसे विष्णो ये स्मरन्ति सकृत् सकृत् ।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसाग-
रात् ।
पुष्कराक्ष निमग्नोऽहं महत्यज्ञानसागरे ।
त्राहि मां देवदेवेश त्वामृतेऽन्यो न रक्षिता ।
स्वजन्म वासुदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।
शान्तिरस्तु शिवञ्चास्तु धनविख्यातिराज्य-
भाक् ।"
इति गारुड़े १३२ अध्यायः ।
रोहिन्, पुं, (रोहतीति । रुह+"हृपिरुहियुषिभ्य
इतिः ।" उणा॰ १ । ९९ । इति इतिः ।)
सूर्य्यः । इति मेदिनी । टे, १४० । वर्षभेदः ।
मत्स्यभेदः । इति संक्षिप्तसारोणादिवृत्तिः ।
(ऋष्यगः । यथा, वाजसनेयसंहितायाम् ।
"२४ । ३० । "मनुष्यराजाय मर्कटः शार्द्दू-
लाय रोहिन् ।" "एको रोहित् ऋष्यः शार्द्दू-
लाय ।" इति तद्भाष्ये महीधरः । रोहितवर्ण-
विशिष्टे, त्रि । (यथा, ऋग्वेदे । १ । १०० । १६ ।
"रोहित् श्यावा सुमदंशुर्ललामीः ।"
"रोहित् रोहितवर्णा श्यावा श्यामवर्णा ।"
इति तद्भाष्ये सायणः ।)
रोहित्, स्त्री, (रुह+"हृपिरुहियुषिभ्य इतिः ।"
उणा॰ १ । ९९ । इति इतिः ।) मृगी ।
("ऋष्यस्य मृगस्य मृगी रोहिदुच्यते । तथाच
महिम्नः स्तवे । गतं रोहिद्भूतां रिरमयिषु-
मृष्यस्य वपुषा ।" इत्युज्ज्वलः । १ । ९९ ।) लता-
भेदः । इति मेदिनी । टे, १४० । (वड़वा ।
यथा, ऋग्वेदे । १ । १४ । १२ ।
"युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः ।"
"हे देवाग्ने रोहितः रोहिच्छब्दाभिधेयास्त्वदीया
वड़वाः रथे युक्ष्व युज योजय ।" इति तद्भाष्ये
सायणः । ॥ रोहन्त्याभिर्बीजानि तत्फलेन हि
बीजानि प्ररोहन्तीति तथात्वम् । नदी । इति
निघण्टुः । १ । १३ । १८ । निगमेषु बहुवच-
नान्तत्वेन प्रायशः श्रवणात् बहुवचनान्तत्वम् ।)
रोहितं, क्ली, (रुह+"रुहे रश्च लो वा ।"
उणा॰ ३ । ९४ । इति इतन् ।) कुङ्कुमम् ।
रक्तम् । ऋजुशक्रशरासनम् । इति मेदिनी ।
ते, १४५ । (यथा, मनुः । १ । ३८ ।
"विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ।
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ।")
रोहितः, पुं, (रोहतीति । रुह+"रुहे रश्च लो
वा ।" उणा॰ ३ । ९४ । इति इतन् ।) मीन-
विशेषः । (यथाह कश्चित् ।
"इल्लीशो घितपीयूषो वाचा वाचामगोचरः ।
रोहितो नो हितः प्रोक्तो मद्गुरो मद्गुरोः
प्रियः ।")
रोहितमत्स्यस्य लक्षणं गुणाश्च यथा,—
"शफः प्रन्क्तो भवेत्कृष्णस्तु मत्स्यो
यः श्रेष्ठोऽसौ गीयते रक्तवक्त्रः ।
कीर्णं वर्ज्यं रोहितस्यापि मांसं
वातं हन्ति स्निग्धमुष्णानि वीर्य्यम् ।"
इति राजनिर्घण्टः ।
अपि च ।
"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ।
शफपक्षो भ्रमश्रेष्ठो रोहितः कथितो बुधैः ।
रोहितः सर्व्वमत्स्यानां वरो वृष्योऽर्द्दितार्त्तिजित् ।
कषायानुरसः स्वादुर्व्वातघ्नो नातिपित्तकृत् ।
ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम् ।"
इति भावप्रकाशः ।
(तथाच ।
"वातघ्नो नहि पित्तकृद्बलकरः स्याद्रोहितः
सर्व्वदा ।"
इति हारीते प्रथमस्थाने एकादशेऽध्याये ।
"शैवलाहारभोजित्वात् स्वप्नस्य च विवर्ज्जनात् ।
रोहितो दीपनीयश्च लघुपाको महाबलः ।"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ।
"कषायानुरसस्तेषां शष्पशैवालभोजनः ।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः ।"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ।
स्वनामख्यातो हरिश्चन्द्रस्य नृपतेः पुत्रः । यथा
देवीभागवते । ७ । १५ । १५ ।
"राजा पुत्रमुखं दृष्ट्वा सुखमाप महत्तरम् ।
नामास्य रोहितश्चेति चकार विधिपूर्व्वकम् ।"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम् ।) मृगभेदः ।
रोहितकवृक्षः । इति मेदिनी । ते, १४६ ।
(रोहीतोऽपि पाठः । रोहीतकशब्ददर्शनात् ।
यथा, सुश्रुते । ६ । १७ ।
"पलाशरोहीतमधूकजा रसाः
सौन्दैव युक्ता मदिराग्रमिश्रिताः ।"
अश्मिघोटकः । इति निघण्टुः । १ । १५ ।
"रोहन्ति आरोहन्ति रथं वहन्त्यादित्यमिति
रोहितः ।" इति तत्र देवराजयज्वा । यथा,
ऋग्वेदे । १ । ९४ । १० ।
"यदयुक्था अरुषा रोहिता रथे ।"
"रोहिता लोहितवर्णौ रोहित इत्यमेरश्वस्याख्या
रोहितोऽग्नेरितिदर्शनात् रोहितैस्त्वामिर्द्देवतां
गमयत्विति मन्त्रवर्णाच्च ।" इति तद्भाष्ये सायणः ।)
रक्तवर्णः । रक्तवर्णविशिष्टे, त्रि । इत्यमरः ।
(यथा, वाजसनेयसंहितायाम् । १६ । १९ । ·
"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो
नमः ।")
रोहितकः, पुं, (रोहित एव । स्वार्थे कन् ।)
वृक्षविशेषः । रोहड़ा इति भाषा । तत्पर्य्यायः ।
रोही २ प्लीहशत्रुः ३ दाड़िमपुष्पकः ४ ।
इत्यमरः । रोहीतकः ५ रोहितः ६ रोहिषः ७
कुशाल्मलिः ८ दाड़िमपुष्पः ९ सदाप्रसून: १०
कूटशाल्मलिः ११ विरोचनः १२ शाल्म-
लिकः १३ । अस्य गुणाः । कटु … स्निग्ध-
त्वम् । कषायत्वम् … शोथ-

श्वयथुगुल्मोदरकृमिमेहामयापहश्च। इति राजनिर्घण्टः। अपि च।
"रोहितो लोहितो रोही लोही दाडिमपुष्पकः।
रोहीतकः प्लीहघाती रुच्यो रक्तप्रसादनः॥"
इति भावप्रकाशः।
अन्यच्च।
"रोहीतको यकृत्प्लीहगुल्मोदरहरः स्मृतः॥"
इति राजवल्लभः।
(गणविशेषः। यथा, महाभारते।२।३२।१९।
"भद्रान् रोहितकांश्चैव आग्नेयान्मालवानपि।
गणान् सर्व्वान् विनिर्जित्य नीतिकृत् प्रहसन्निव।
शिबिकान् यवनांश्चैव विजिग्ये सूतनन्दनः॥")

रोहिता, स्त्री, (रोहित+टाप्। "वर्णादनुदात्तात्तोपधात्तो नः।" ४।१।३९। इति पाणिनेर्ङीष् तकारस्य नकारादेशश्च न।) रागादिना रक्तवर्णा। यथा,—
"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।"
इति जटाधरः।

रोहिताश्वः, पुं, (रोहितः अश्वो यस्य।) अग्निः। इत्यमरः। हरिश्चन्द्रराजपुत्रः। इति मेदिनी। ते, ६३॥

रोहितिका, स्त्री, (रोहितो वर्णोऽस्त्यस्या इति। रोहित+ठन्।) रागादिना रक्तवर्णा। इति जटाधरः।

रोहितेयः, पु, (रोहित एव। स्वार्थे ढः।) रोहितवृक्षः। यथा,—
"प्लीहारी रोहितेयः स्यात् रक्तपुष्पश्च रोहितः॥"
इति भरतधृतरत्नकोषः।
(विवरणमस्य रोहितकशब्दे ज्ञातव्यम्।)

रोही, [न्] पु, (अवश्यं रोहतीति। रुह्+आवश्यके णिनिः।) रोहितकवृक्षः। (अस्य पर्य्यायो यथा,—
"रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः॥"
इति वैद्यकरत्नमालायाम्।
"रोहीतको रोहितको रोही दाडिमपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) अश्वत्थवृक्षः। वटवृक्षः। इति मेदिनी। ने, १९०॥

रोहीतकः, पुं, (रोहीत एव। स्वार्थे कन्।) रोहितकवृक्षः। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्।५४।९८।
"रोहितकस्य पश्चाद्धस्तत्रयसंमितैः करैर्यास्यि॥"
तथास्य पर्य्यायः।
"रोहीतको रोहितको रोही दाडिमपुष्पकः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रौक्ष्यं, क्ली, (रूक्षस्य भावः। रूक्ष+ष्यञ्।) रूक्षता। रूक्षस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्। तथा हि।
"तैलं प्रदीप्तदोषघ्नं तैलं वातार्त्ते सुखम्।
तेन त्वौ व्यापयाम्यद्य कालाकालकरौ निजाम्॥"
इति दुर्गापूजायां महाष्टमीमहानवम्योर्मध्यावस्थानकर्म्मणि देवीपुराणम्। (तथा च।
"ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम्॥"
इति सुश्रुते सूत्रस्थाने ४० अध्यायः॥)

रौच्यः, पुं, (रुचेरपत्यमिति। रुचि+ष्यञ्।) मनुविशेषः। यथा,—
"रौच्यादयस्तथान्येऽपि मनवः संप्रकीर्त्तिताः।
रुचेः प्रजापतेः पुत्रो रौच्यो नाम भविष्यति॥"
इति मार्कं ९ अध्यायः।
तन्मन्वन्तरे देवादयो यथा,—
"त्रयोदशस्य पर्य्याये ये रौच्यस्य मनोः सुराः।
सप्तर्षींश्च नृपांश्चैव वदतो मे निशामय॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणस्तथा ह्येते समस्ता सुधियस्तम॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यश्च सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः॥
चित्रसेनो विचित्रश्च नयतिर्भयो दृढः।
सुनेत्रः क्षत्रवृद्धिश्च सुरतश्चैव तत्सुताः॥"
इति मार्कण्डेयपुराणम्।
अन्यद्विवरणं रुचिशब्दे द्रष्टव्यम्। * । विष्णुकाष्ठवृक्षः। तत्पर्य्यायः। बैल्वः २। इति हेमचन्द्रः॥ (क्ली, रौच्यस्येदमिति। अण्। मन्वन्तरविशेषः। यथा, मार्कण्डेये। १००। ३९।
"शान्तिर्मेऽस्तो गुणैर्युक्तो दक्षसावर्णिके मुने।
निशामयाखिलं रौच्यं श्रुत्वा मनोत्तमः॥")

रौट, ऋ मादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) चतुर्दशस्वरी। ऋ, अररौटत्। मादरोऽनादरः। रौटति खलं लोकः। इति दुर्गादासः॥

रौड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अररौडत्। इति दुर्गादासः॥

रौद्रं, क्ली, (रुद्रस्येदम्। रुद्र+अण्।) शृङ्गारादिरसान्तर्गतविशेषरसः। तत्पर्य्यायः। उग्रम् २। इत्यमरः। रुद्रे क्रोधस्याश्रये। रुद्रो देवता यस्य रौद्रम्। यदाह भरतः।
"शृङ्गारो विष्णुदेवः स्याद्धासः प्रमथदैवतः।
करुणो यमदेवः स्याद्रौद्रो रुद्राधिदैवतः॥" इति रुद्रे क्रोधस्याश्रये। उच्यति क्रुधा समवैति उग्रः। उचिर्ये समवायने भाव्नीति रक् निपातनाद्वस्य गः। सर्व्वाभिभाविता रौद्रः। यथा, राघवचरितादि। एष वीभत्सरौद्रे क्लीबे रूपभेदात् अन्ये पुंसि वीभत्सरौद्रौ चेति पुंलिङ्गपाठ इत्युक्तः। इति भरतः॥ * ॥ अपि च।
अथ रौद्रः।
"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनं रिपुस्तत्र तच्चेष्टोद्दीपनं मतम्।
मु[illegible]
संग्राम[illegible]
भ्रूविभङ्गो[illegible]
[illegible]
[illegible]
उग्रता[illegible]
क्रोधाश्चापि[illegible]
यथा,—
"कृतमनुमतं दृष्टं वा यैरिदं[illegible]
मनुजपशुभिर्निर्मर्य्यादैर्भवद्भिरुदायुधैः
नरकरिपुणा सार्द्धं तेषां[illegible]
सशतस्मगसृङ्मेदोमांसैः[illegible]
अत्र पुत्रशोकाद्रिरमाह।
"इत्यादिनैव च[illegible]
इति साहित्यदर्प[illegible]

रौद्रः, पुं, (रुद्रस्यायमिति। रुद्र+अण्) तेजः। तत्पर्य्यायः। घर्म्मः २[illegible] रे, ८० ॥ प्रकाशः ३ दीप[illegible] इत्यमरः॥ तस्य गुणाः।
"आतपः कटुको रूक्षः[illegible]
दाहवैवर्ण्यभ्रमकृत् नेत्ररोगकरो[illegible]
इति राजव[illegible]
समरोना यथा,—
"जठरः पिङ्गलो रौद्रो[illegible]
अग्निनामा च्युतो रौद्रः[illegible]
मन्वन्तरे सप्तमो रौद्रः[illegible]
फलानि यथा,—
"पिङ्गलो[illegible]
अर्थैर्न बहुरोगः स्यात् सर्व्वरोग[illegible]
जठरो रौद्रनामा च[illegible]
प्रजादिपितृरोगश्च नानाविध[illegible]
अग्निनामा यदा वर्षे रौद्रो[illegible]
उत्पातैश्च क्षितिं दुष्येत् नराणां[illegible]
रौद्रनामा महारौद्रो[illegible]
चित्तोद्वेगं भयं कुर्य्यात्तारा[illegible]
घोरनामा महारौद्रो[illegible]
उत्पातैश्च सदा दग्धं नानारोग[illegible]
कालनामा महारौद्र उत्पाते[illegible]
नानारोगसमायुक्तं प्रजादिदुःख[illegible]
इति[illegible]
रसविशेषः। इति मेदिनी। दे, ८[illegible] क्लीबलिङ्गरौद्रशब्दे द्रष्टव्यम्। [illegible] इति हेमचन्द्रः। यमः। इति धर[illegible] केयः। यथा, महाभारते। १।१३[illegible]
"आग्नेयः कृत्तिकापुत्रो रौद्रो गा[illegible]
श्रूयते भगवान् देवः सर्व्वदेवमयो[illegible]

रौद्रः, त्रि, (रुद्र+अण्।) तीक्ष्णः। [illegible] निरुक्तव्याख्याने विषमज्वरविशे[illegible] ज्वरदुर्गतसमत्वम्।
"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो[illegible]
भस्मप्रहरणो रौद्रः कालान्तकयमो[illegible]

NOTICE.

AGENTS
rs. Trubner & Co., London.

AGENT
Pandit Jaistaram Mukundaji, Bombay

A SIR RADHAKANTA'S IMPROVED AND ENLARGED SABDAKALPADRUMA.

A Sanskrit Encyclopedic Lexicon.

new edition is issuing in monthly parts of 8 formes (Royal quarto, 32 pages) each, and we) complete it in four years: generally a fasciculus will contain double parts or numbers.

ring the book within reach of the general public, we offer it for sale to those who register thems subscribers in India at the lowest possible price of one Rupee for each part, and in countries out at 3s. for each part. The number of parts in which the new Appendix would be completed, cannot guessed, they will bear the same price except to those who had subscribed before 1st January 1886. ent subscribers in India, if they choose to pay in advance, can obtain the whole work exclusive of the ix, for 75 Rupees, and in countries out of India, for £8. The advance payments being exclusive of Postage. subscribers in and out of India, the price for each part will be Rs. 1-8 and 4s. respectively. Muffussil s are requested to send Rs. 10 in advance to ensure their enlistment as subscribers, or in lieu of such t, to order despatch of books to them by value payable parcels. We make it a rule to defer supplying cribers any part or parts of the work till all arrears due for the preceding ones, are paid.

remittances and communications, except where special Agents may be preferred, are to be made to Iari Charan Vasu, No. 71, Pathuriaghata Street, Calcutta. Subscribers are requested to see that receipts ncy (when sent to him) bear his seal and signature.

conclude this announcement by an earnest appeal to all students of Sanskrit, Savants, Princes and atrons of learning in India, Europe and America, to help us to lay before them a grand Repertory of Aryan learning replenished with new treasures. We specially urge our claim to the aid of our brother s in all parts of our country, who cannot but feel it a duty to encourage attempts to preserve and improve ost unique monument of the genius, scholarship, industry and philanthropy of our great patrirach of g and zealous friend of education whom, we loved to call as the Hindu of Hindus. We hope that by ical improvements and enlargement of its scope, the Sabdakalpadruma of Raja Sir Radhakanta would be the Encyclopædia Indica of the future, which, it would be the common aim of all to see accomplished.

THE SABDAKALPADRUMA OFFICE,
71, *Pathuriaghata Stree*
Calcutta 20th Augus.

VARADA PRASADA VASU,

গোপালতাপনী।

সম্প্রতি অথর্ববেদীয় পিপ্পলাদশাখার অন্তর্গত গোপালতাপনী নামে এই উপনিষৎখানি দুইটী টীকার সহিত মুদ্রিত হইয়াছে। [illegible] প্রথমটী বৈষ্ণবাগ্রণী শ্রীজীবগোস্বামীর ও দ্বিতীয়টী শ্রীবিশ্বেশ্বরপণ্ডিতের প্রণীত। পূজ্যপাদ গোস্বামীর ব্যাখ্যাটী সম্পূর্ণ ভক্তিরসের আধার স্বরূপ। [illegible] পূর্ব্বে এই গোপালতাপনী উপনিষৎখানি শেষোক্ত টীকার সহিত মুদ্রিত হইয়াছিল তথাপি তাহাতে ভক্তিজ্ঞান-লাভাকাঙ্ক্ষী পবিত্রাত্মা বৈ[illegible] [illegible] হয় নাই, কেননা বৈষ্ণবগণ প্রায়ই চিত্তশুদ্ধির নিমিত্ত ভক্তিপ্রধান গ্রন্থেরই অনুশীলন করিয়া থাকেন; কিন্তু, বিশ্বেশ্বরপণ্ডিতের টীকাটী [illegible]। ব্রহ্মবিদ্যা-[illegible] উপনিষৎ সকল যে, জ্ঞানপ্রধান গ্রন্থ ইহা অবশ্য স্বীকর্তব্য; কিন্তু, গোপালতাপনী-গ্রন্থ পূর্ব্বোক্ত [illegible] ও জ্ঞান, এই উভয়াত্মক সুতরাং উভয়মত ব্যাখ্যারই প্রয়োজন। বিশেষত এই তাপনীগ্রন্থ ভক্তিজ্ঞান-পরায়ণ মহাত্মা বৈষ্ণবদিগেরই পরম [illegible] অতএব ইহাতে শ্রীজীবগোস্বামীর টীকাটীই বিশেষ উপাদেয়, অথচ ঈদৃশ মহার্ঘ টীকা এ প্রদেশে কুত্রাপি মুদ্রিত হয় নাই; এই কারণে [illegible] মহাত্মা বৈষ্ণবগণ পরমাচার্য্য গোস্বামীর ভক্তিরসপূর্ণ টীকায় বিশেষ অনুরাগী জানিয়া এই উভয়বিধ টীকার সহিত প্রকাশ করিয়াছি। ইহার মূল্য ৸৹ আনা; কিন্তু শব্দকল্পদ্রুম ও দেবীভাগবতের গ্রাহকের পক্ষে ॥৹ মাত্র।

ইহার বঙ্গানুবাদ অতি সরল ভাষায় ও টীকানুযায়ী সরল টিপ্পনীতে ভূষিত হইয়াছে। ইহার মূল্য শব্দকল্পদ্রুম অথবা দেবীভাগবতের গ্রাহকের [illegible] অপরের পক্ষে ৸৹ আনা। যাঁহারা মূল ও অনুবাদ একত্রে লইবেন তাঁহাদের পক্ষে ১৲ এক টাকা।

भीषणः । इति मेदिनी । रे, ८० ॥ (यथा, महा-
भारते । २ । ६४ । ५० ।
"तस्य ते तद्वचः श्रुत्वा रौद्रं लोमप्रहर्षणम् ।
प्रचक्रुर्बहुलां पूजां कुरवस्तो धृतराष्ट्रजम् ॥")
रुद्रसम्बन्धिनि च ॥

रौद्री, स्त्री, (रौद्र + ङीप् ।) चण्डी । इति मेदिनी । रे, ८० ॥ रुद्रजटा । इति राजनिर्घण्टः ॥ रुरुदैत्यहतमहारौद्री माया महारौद्रीनाम्नी चामुण्डा च । यथा,—
"एक एव महादैत्यो रुरुस्तस्मौ महाम्बधे ।
स च मायां महारौद्रीं रौरवीं विससर्ज्ज ह ॥
सा माया ववृधे भीमा सर्व्वदेवप्रमोहिनी ।
तया तु मोहिता देवाः सद्यो निद्रां तु भेजिरे ॥
देवी च त्रिशिखेनाजौ तं दैत्यं समताड़यत् ।
तया तु ताड़ितं तस्य दैत्यस्य शुभलोचने ।
चर्म्मतुण्डे उभे सम्यक् पृथग्भूते बभूवतुः ॥
ररोस्तु दानवेन्द्रस्य चर्म्मतुण्डे यथाहृतः ।
अपहृत्य हरेद्देवी चामुण्डा तेन साभवत् ॥
सर्व्वभूतमहारौद्री या देवी परमेश्वरी ।
संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता ॥"
इति वाराहे त्रिशक्तिमाहात्म्यम् ॥

रौप्यं, क्ली, (रूप्यमेव । अण् ।) रूप्यम् । इति राजनिर्घण्टः ॥ (यथा, माघे । ४ । ६७ ।
"दर्पणनिर्म्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति
मुहुः ॥")
तत्करणं यथा,—
"मध्वाज्यं गुड़नाम्नश्च कर्त्ता माषिकं रसम् ।
घनमाक्षं भवेद्रौप्यं तुषयंकरणं मृणु ॥"
इति गारुड़े १८८ अध्यायः ॥
(औषधादिषु अस्याभावे यद्दातव्यं तद्यथा,—
"सुवर्णमथवा रौप्यं मृतं यत्र न लभ्यते ।
तत्र कान्तेन कर्म्माणि भिषक् कुर्य्यादिचक्षणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तन्निर्मिते, त्रि । यथा, भागवते । ४।२५।१४ ।
"स्वर्णरौप्यायसैः शृङ्गैः सङ्कुलां सर्व्वतो गृहैः ॥")

रौमं, क्ली, (रुमायां लवणाकरे भवम् । रुमा + अण् ।) शाम्भरिलवणम् । रत्यमरटीकायां रामाश्रमः ॥

रौमकं, क्ली, शाम्भरिलवणम् । तत्पर्य्यायः । वसुकम् २ । इत्यमरः ॥ "रुमा नाम नदी लवणाकरः तत्र भवं रौमकम् । ढे कादिति षः रौमं ततः स्वार्थे कः रौमकम् ।" इति तट्टीकायां भरतः ॥ (पर्य्यायोऽस्य यथा,—
"शाकम्भरीयं कथितं गुड़ाख्यं रौमकन्तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रौमलवणं, क्ली, (रौमं लवणमिति ।) शाम्भरिलवणम् । इति रत्नमाला ॥

रौरवः, पुं, (रुरवः प्राणिविशेषास्तेषामयमिति । रुरु + अण् ।) नरकविशेषः । घोरः । इति मेदिनी । वे, ११ ॥ अस्य विवरणं यथा,—
"रौरवे कूटसाक्षी तु याति यश्चानृतो नरः ।
तस्य स्वरूपं वदतो रौरवस्य निशामय ॥
योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः ।
जानुमात्रप्रमाणन्तु तत्र श्वभ्रं सुदुस्तरम् ॥
तत्राङ्गारचयो येन कृतं तद्धरणीसमम् ।
जाज्वल्यतातितीव्रेण तापिताङ्गारभूमिना ॥
तन्मध्ये पापकर्म्माणं विमुञ्चन्ति यमानुगाः ।
स दह्यमानस्तीव्रेण वह्निना तेन धावति ॥
पदे पदे च पादोऽस्य शीर्य्यते जायते पुनः ।
अहोरात्रेणोद्धरणं पादन्यासं स गच्छति ।
एवं सहस्रं विस्तीर्णे योजनानां विमुच्यते ॥"
इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्यायः ॥ (तथाच देवीभागवते ।८।२२।८-११।
"एतदहमिति यो भूतद्रोहेण केवलम् ।
पुष्णाति प्रत्यहं स्वीयकुटुम्बं कार्य्यलम्पटः ॥
एतद्विहाय चात्रैव स्वाशुभेन पतेदिह ।
रौरवे नाम नरके सर्व्वसत्त्वभयावहे ॥
इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीड़यन्ति तम् ॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः ॥")

रौरवः, त्रि, चञ्चलः । धर्त्तः । घोरः । इति शब्दरत्नावली ॥ (ररोर्मृगस्येदमिति । अण् । मृगसम्बन्धिनि च । यथा, मनुः । २ । ४१ ।
"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि च ॥")

रौहिट्, [ष्] पुं, रौहिषतृणः । यथा । "स एष रौहिषीं मध्ये चरतीति भवभूतिः ।" इत्यमरटीकायां भरतः ॥

रौहिणं, क्ली, (रोहिणमेव । स्वार्थे अण् ।) दिनस्य नवममुहूर्त्तः । यथा । अत्र पूर्व्वाह्णे श्राद्धमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सम्भवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते । तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः अपराह्णश्राद्धस्य पूर्व्वावधिरित्यवगम्यते तनश्च पूर्व्वदिने सम्भवात् परं रौहिणपर्य्यन्तं तिथेर्लाभे परदिने मुहूर्त्तत्रयमात्रे तत्तिथिलाभे पूर्व्वदिने श्राद्धम् । रौहिणात्मकगौणपूर्व्वाह्णलाभात् न परदिने तथात्वाभावात् । उभयदिने सम्भवलाभे परदिने मुख्यत्वे तिथिर्ग्राह्या इति वचनात् । रौहिणन्तु दिवसस्य नवम मुहूर्त्तस्य ज्योतिषोक्तरौहिणदैवतत्वात् रौहिणत्वमिति । इति श्राद्धतत्त्वम् ॥

रौहिणः, पुं, (रुह् + इनन् । स्वार्थे अण् ।) चन्दनद्रुमः । इति त्रिकाण्डशेषः ॥

रौहिणेयं, क्ली, मरकतमणिः । इति राजनिर्घण्टः ॥

रौहिणेयः, पुं, (रोहिण्या अपत्यमिति । रोहिणी + "स्त्रीभ्यो ढक् ।" ४।१।१२० । इति ढक् ।) बलदेवः । (यथा, महाभारते । १।१८७।१८ ।
"रुक्मीनिदं हदुरौचनाढ्
रदरं इम: हरौहिणेय: ।")
बुधग्रहः । इत्यमरः ॥ (पुरुषोत्तमस्थतीर्थविशेषः । यथा, तीर्थतत्त्वे ।
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥")

रौहिणेयः, त्रि, (रोहिण्या अपत्यमिति । रोहिणी + ढक् ।) गोवत्सः । इति मेदिनी । ये, १२७ ॥

रौहिषं, क्ली, (रोहतीति । रुह् + "रुहेर्वृद्धिश्च ।" उणा० १।४८ । इति टिषच् । वृद्धिश्च धातोः ।) कत्तृणम् । इत्यमरः ॥ रोहिषतृणम् । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकं तथा ।
भूतीकं ध्याम पौरञ्च श्यामकं धूपगन्धिकम् ॥
रौहिषं तुवरं तिक्तं कटुपाकं व्यपोहति ।
हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान् ॥"
इति भावप्रकाशः ॥ * ॥
अन्यत् कत्तृणशब्दे द्रष्टव्यम् ॥

रौहिषः, पुं, (रुह् + टिषच् । वृद्धिश्च धातोः ।) मृगविशेषः । इत्यमरः ॥ रोहितमत्स्यः । इति जयपालः ॥

रौहिषी, स्त्री, (रौहिष + ङीप् ।) मृगी । दूर्व्वा । इति संक्षिप्तसारोणादिवृत्तिः ॥

ल

ल, लकारः । स तु यवर्गस्य तृतीयो वर्णो व्यञ्जनस्याष्टाविंशवर्णश्च । अस्योच्चारणस्थानं दन्ताः । इति व्याकरणम् ॥ (तथाच सिद्धान्तकौमुद्याम् । "लृतुलसानां दन्ताः ॥") तस्य स्वरूपं यथा,—
"लकारं चञ्चलापाङ्गि ! कुण्डलीत्रयसंयुतम् ।
पीतविद्युल्लताकारं सर्व्वरत्नप्रदायकम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ।
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा ।
आत्मादितत्त्वसहितं हृदि भावय पार्व्वति ! ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
(वर्णोद्धारतन्त्रमतानुसारेण ।) अस्य ध्यानप्रकारो यथा,—
"कुण्डलीत्रयसंयुक्ता वामादक्षगता सधः ।
पुनरूर्द्धगता रेखा तासु नारायणः शिवः ।
ब्रह्मशक्तिश्च सन्तिष्ठेदात्मतत्त्वं प्रपद्यते ॥"
ध्यानं यथा,—
"चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम् ।
सर्व्वदा वरदां भीमां सर्व्वालङ्कारभूषिताम् ॥
योगीन्द्रवन्दितां नित्यां योगिनीं योगदायिनीम् ।
चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम् ॥
एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥
तस्य नामानि यथा,—
"लकारः पूर्णा पूर्णो माधवः प्रकाशकः ।
रसाङ्गः त्रिकाशोषो वामनो मांसलं द्वः ॥

खड्गी नादोऽम्बरं देवी अथर्व वारुणीपतिः ।
शिखा वायी क्रिया माता भामिनी कामिनी
प्रिया ॥
ज्वालिनी पेशिनी नादः प्रद्युम्नः शोषणो हरिः ।
विश्वात्ममन्त्री बली वीतो मेरुगिरिः कला रसः ॥"
इति नानातन्त्रशास्त्रम् ॥

(अनुबन्धविशेषः । यथा, कविकल्पद्रुमे ।
"दिवादौ ल्युदादिकः ।" एतेन अद् लो भवणि लुगद्भ्योऽपः । अस्ति इति । छन्दः-शास्त्रोक्तो लघुसंज्ञको गणविशेषः । इति छन्दोमञ्जरी ॥)

लं, क्ली, (लीयतेऽनेनेति । ली+अभिधानान्निरुप-पदेऽपि डः ।) पृथ्वीबीजम् । इति तन्त्रम् ॥

लः, पु, (लातीति । ला+अच् ।) इन्द्रः । इति मेदिनी । ले, १ ॥

लक, क स्वाद आपने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) स्वादो रसोपादानम् । क, लाकयति मोदकं बालकः । इति दुर्गादासः ॥

लकचः, पुं, लकुचवृक्षः । इति शब्दरत्नावली ॥

लकुचः, पुं, (लकयते इति । लक स्वादे+बाहु-लकादुचः ।) वृक्षविशेषः । डेहुया इति मादार इति च भाषा । तत्पर्य्यायः । लिकुचः २ शालः ३ कषायी ४ दृढवल्कलः ५ डहुः ६ कार्श्यः ७ शूरः ८ स्थूलस्कन्धः ९ । अस्य गुणाः । तिक्तरसत्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । कण्ठदोषहरत्वम् । दाहित्वम् । मल-संग्रहदायकत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
"लकुचः शुद्रपनसो लिकुचो डहुरित्यपि ।
आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा ॥
मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत् ।
शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम् ॥
सुपक्वं तत्तु मधुरमम्लं वातपित्तहृत् ।
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकञ्च तत् ॥"
इति भावप्रकाशः ॥ * ॥
अन्यच्च ।
"लकुचं गुरु विष्टम्भि स्वाद्वम्लं रक्तपित्तकृत् ।
श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम् ॥"
इति वैद्यकम् ॥

लक्तकः, पुं, (रक्तेन रक्तवर्णेन कायतीति । कै+कः । रस्य लत्वम् ।) अलक्तकः । इति शब्द-रत्नावली । (यथा, गौ० रामायणे ।२।६०।१६।
"प्रकृत्या लक्तकरसप्रख्यौ तरुणपल्लवौ ।
तथैव रञ्जनुत्क्षाधरकौ पद्मवर्णौ ॥")
जीर्णवस्त्रखण्डम् । नेकड़ा इति भाषा । तत्-पर्य्यायः । कर्पटः २ । हक्तमरः । नक्तकः ३ । इति भरतः ॥ ऐ अनिलमादिद्रुरजीर्णवस्त्रखण्डे नेकड़ा इति ख्याति । लक्तकादयः वक्ष्यमाणे इति केचित् । पटोऽस्त्री कर्पटः प्रादः सिचय-श्चोलनक्तकाः । इति रभसः । कथने चीनैः-राद्यादये अद्भुत तत्र: एक लक क स्वाद

आपने शुभ्रौ निर्म्मेति विभाषितत्वान्न णिः कर्म्मणि क्तः ततः स्वार्थे कः लक्तकोऽप्यलक्तकः स्यादि । अण्यते सा अर्था अक्तं अनूनो: क्तः न अक्तं कं सुरतं यस्मादिति त्रिपदबहुव्रीहौ मनीषादित्वात् अकारस्य पूर्व्वलोपे नक्तकस्तत्रार्णपञ्चमादिरपि । इति तट्टीकायां भरतः ॥

लक्तकर्म्मा, [न्] पुं, (लक्तं रक्तवर्णं करोतीति । कृ+मनिन् ।) रक्तवर्णलोध्रः । इति शब्द-चन्द्रिका ॥

लक्ष, क न दर्शने । अङ्के । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट् ।) क न, लक्षयति लक्षयते घटं लोकः । पश्यति चिह्नयुक्तं करोती-त्यर्थो वा । इति दुर्गादासः ॥

लक्षं, क्ली, (लक्षयतीति । लक्ष+अच् ।) व्याजः । शरव्यम् । इति मेदिनी । षे, २३ ॥ (यथा, मनुः । ७ । ५४ ।
"मौलान् शास्त्रविदः शूरान् लब्धलक्षान्
कुलोद्गतान् ।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षि-
तान् ॥")

लक्षं, क्ली, स्त्री, (लक्षयतीति । लक्ष+अच् ।) दशायुतसंख्या । इति मेदिनी । षे, २३ । लाक इति भाषा । (यथा, कथासरित्सागरे ।४३।१०८।
"तल्लोकाद्यभिमिन्नैः सङ्घातैर्लक्षस्य हि ।
लक्षमभ्यधिकं देव वर्त्तते वरवाजिनाम् ॥")

लक्षकं, क्ली, (लक्षयतीति । लक्ष+ण्वुल् ।) लक्षयति यत् । यथा । लक्षकं नाम लक्षयति ।
"यादृशार्थस्य सम्बन्धवति शक्तस्तु यद्भवेत् ।
तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि ॥"
यादृशार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत् । सैन्धवादयस्तु शब्दाः तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव । गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धितीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्ति तत्र लक्षका एव । अपि च । तदेवं विधलक्षणावत्त्वाल्लक्षकं नामापि जहत्-स्वार्थादिभेदादनेकविधमित्यर्थः स्यादेतद्यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्युभये भवेद्गुरुसदौत्तत्रैव लक्षकायां विभागो न सेतदस्ति । तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकायामननुभावकत्वात् गुरूणाममी शैवं अशेदिव्यादौ शक्येन दवगादिनेव गङ्गायां घोष इत्यादौ शक्तितेन तीरादिना साक्षेप-गृहीतासंसर्गकस्यैव सम्भव्यार्थियत्वान्वयबोध-प्रविष्टत्वादिति चेन्न । शक्यार्थावच्छिन्नस्यैव शक्यार्थस्य धर्म्मान्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीरादिविशिष्टस्य शक्यार्थियत्वादेर्बोधादावन्वयबोधा-योगात् । न च शक्तस्यैव पदस्य स्वसाकाङ्क्ष-पदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वय-बोधं प्रति हेतुत्वादन्वयबुद्धौ लक्षार्थस्य प्रवेशः ।

कुन्ता: प्रविशन्तीत्यादौ लक्षण ,
स्वयविशेषत्वात्तुषपक्तिः । कुमतः ..
लक्षार्थयोर्मिथोऽन्वयबोधस्याप्रभ
तस्मात् प्र.स्ति च भक्तिरपि शक्तमुख
त्येव काव्यनाटकेदकाव्य मष्टोपाय
चारः । इति शब्दशक्तिप्रकाशिका ।

लक्षणं, क्ली, (लक्ष्यतेऽनेनेति । लक्ष
यद्वा, "लक्षेरट् च ।" उणा० ३ । ७
नप्रत्ययस्तस्याडागमश्च ।) चिह्नम् ।
रघुः । १० । ६ ।
"अथाथेयो भविष्यन्त्याः कार्य्य

नाम । इति मेदिनी । णे, ७५ ।
ऽनेनेति लक्षणम् । तद्द्विविधम् ।
नामकम् । अव्यवहारप्रयोजकञ्च । इति
मतम् । व्याकरणमते तु ।
"लक्ष्यहितसमानानामभिधानं विधान
लक्षणस्वनभिज्ञानां तदभिज्ञाबहुरूप
इति

(लक्षणलक्षणम् ।
यत्स्वरूपो लक्षणार्थः ।"
नाम् ।४। सुखदुःखलक्षणं यथा, मनौ
"सर्व्वं परवशं दुःखं सर्व्वमात्मवशं सुख
एतद्विद्यात् समासेन लक्षणं सुखदुःख
दर्शनम् । इति लक्षधात्वर्थदर्शनात् ।

लक्षणः, पुं, (लक्ष+"लक्षेरट् च ।" उण
इति नस्याडागमश्च । लक्षणमस्त्य
स्य ।) सौमित्रिः । यथा, हरिवंशे ।
"लक्ष्मणानुगतो यत्र सर्व्वभूतहिते रत
चतुर्दश वने तप्ता तपो वर्षाणि राघव
सारसपक्षी । इति शब्दरत्नावली ।

लक्षणा, स्त्री, (लक्षण+टाप् ।) सारस
मेदिनी । णे, ७५ । हंसी । इति
कौशल्यासुतादिदन्तिः । (अप्सरोविशेष
महाभारते । १ । १२३ । ५८ ।
"अम्बिका लक्षणा क्षेमा देवी रम्भा मनो
शक्यसम्बन्धः । यथा,—
"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्ति
इति भाषापरि

गङ्गायां घोष इत्यादौ गङ्गापदस्य
प्रवाहरूपे
मत्स्यो यत्र प्रतिसन्धीयते तत्र
तीरस्य बोधः । या च शक्यसम्बन्ध
हि प्रवाहरूपशक्यार्थसम्बन्धस्य ती
तत्रातीरस्य ज्ञानं ततः शाब्दबोध
सिद्धान्तमुक्तावली । * । अपि च ।
"जहत्स्वार्थाजहत्स्वार्थानिरूढाधुनि

लक्षणा विविधात्ताभिर्मतकं स्यादनेक
काचिल्लक्षणा शक्यार्थरूपेण बो
जहत्स्वार्थेत्युच्यते । यथा तीरमादिना
पदस्य । काचिच्छक्यतयाभयत्रिता

का चैवाद्यभावव्यादनवहतस्वार्था।
. चीवघटत्वादिना च घटादि-
। कांचिज्जातावच्छेदकीभूततद्धर्म्म
प्रकारकत्वाभिरूढ़ा। यथा, आरु-
हिप्रकारेण तद्दाश्रयद्रव्यानुभावकत्वादरु-
णपदस्य। काचिच्च पूर्व्वपूर्व्वं तादृश्या-
वच्छिन्नादाधुनिकी। यथा घटत्वादिना
दिपदस्य। आदिना शक्यसदृशत्वप्रकारेण
कतया गौणीत्युपपद्यते। यथा अग्नि-
र्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादि-
श। इति शब्दशक्तिप्रकाशिका ॥ * ॥
च।
"मुख्यार्थबाधे तद्युक्तो यथान्योऽर्थः प्रतीयते।
रूढ़ेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता॥"१॥
कलिङ्गः साहसिक इत्यादौ कलिङ्गादिशब्दो
देशविशेषादिरूपे स्वार्थे असम्भवन् यथा शब्दस्य
देशसंयुक्तान् पुरुषादीन् प्रत्याययति।
यथा च गङ्गायां घोष इत्यादौ गङ्गादिशब्दो
जलमयाद्यर्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य
सामीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति।
तत्र शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्-
भाविता वा शक्तिर्लक्षणा नाम। पूर्व्वत्र हेतु
रूढ़िः प्रसिद्धिरेव। उत्तरत्र गङ्गातटे घोष
इति प्रतिपादनादलभ्यस्य शीतत्वपावनत्वाति-
शयस्य बोधनरूपं प्रयोजनम्। हेतुं विनापि
यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः
इत उक्तं रूढ़िः प्रयोजनाद्वेति ॥ * ॥
तद्भेदानाह।
"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥"२॥
रूढ़ावुपादानलक्षणा यथा। श्वेतो धावति।
प्रयोजने यथा। कुन्ताः प्रविशन्ति। अत्र
हि श्वेतादिभिः कुन्तादिभिश्च अचेतन-
तया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतया-
न्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनो
ऽश्वाः पुरुषादयश्च आक्षिप्यन्ते। पूर्व्वत्र
प्रयोजनाभावाद्रूढ़िः। उत्तरत्र कुन्तादीना-
मतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थ-
स्यात्मनोऽप्युपादानम्। लक्षणलक्षणायान्तु
परोपलक्षणमित्यनयोर्भेदः। इयमेवाजहत्-
स्वार्थेत्युच्यते ॥ * ॥
"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥"३॥
रूढ़िप्रयोजनयोर्लक्षणलक्षणा यथा। कलिङ्गः
साहसिकः गङ्गायां घोष इति च। अनयोर्हि
पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गा-
शब्दाभ्यामात्मार्पणम्। यथा वा।

"उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे
सुखितमास्स्व ततः शरदां शतम्॥"

इत्यादावपकारादीनां वाक्यार्थेऽन्वयसिद्धये उप-
कृतादयः शब्दाः आत्मानमर्पयन्ति। अत्राप-
कारिणं प्रति उपकारादिप्रतिपादनान्मुख्यार्थ-
बाधः वैपरीत्यलक्षणः सम्बन्धः फलमपकारा-
द्यतिशयः। इयमेव जहत्स्वार्थेत्युच्यते ॥ * ॥
"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।"
ताः पूर्व्वोक्ताश्चतुर्भेदा लक्षणाः।
"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा स्यान्निगीर्णस्य मता साध्यवसा-
निका॥४॥
रूढ़ावुपादानलक्षणा सारोपा यथा। अश्वः
श्वेतो धावति अत्र हि श्वेतगुणवान् अश्वोऽनि-
गीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रती-
यते। प्रयोजने यथा एते कुन्ताः प्रविशन्ति
अत्र सर्व्वनाम्ना कुन्तधारिपुरुषनिर्द्देशात्
सारोपात्वम्। रूढ़ौ लक्षणलक्षणा यथा।
कलिङ्गः पुरुषो युध्यति। अत्र पुरुषकलिङ्गयो-
राधाराधारभावः सम्बन्धः। प्रयोजने यथा आयु-
र्घृतम्। अत्रायुष्कारणमपि घृतं कार्य्यकारण-
भावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते अन्य-
वैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्।
यथा च राजकीये पुरुषे गच्छति राजासौ
गच्छति इत्यत्र स्वस्वामिभावलक्षणः सम्बन्धः।
यथा वा अग्रमात्रेऽवयवे हस्तोऽयम्। अत्राव-
यवावयविभावलक्षणः सम्बन्धः। ब्राह्मणेऽपि
तक्षासौ अत्र तात्कर्म्यलक्षणः सम्बन्धः। इन्द्रा-
र्थासु स्थूणासु अमी इन्द्राः अत्र तादर्थ्यरूपः।
एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यता-
दात्म्यप्रतीतिकृत् साध्यवसाना। अस्याश्चतुर्षु
भेदेषु पूर्व्वोदाहरणान्येव ॥ * ॥
"सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोड़श
भेदिताः॥"५॥
ताः पूर्व्वोक्ता अष्टभेदा लक्षणाः सादृश्येतर-
सम्बन्धाः कार्य्यकारणभावादयः। अत्र शुद्धानां
पूर्व्वोदाहरणान्येव। रूढ़ावुपादानलक्षणा
सारोपा गौणी यथा। एतानि तैलानि हेमन्ते
सुखानि अत्र तैलशब्दस्तिलभवस्नेहरूपं
मुख्यार्थमुपादायैव सार्षपादिस्नेहेषु वर्त्तते।
प्रयोजने यथा राजकुमारेषु तत्सदृशेषु च
गच्छत्सु एते राजकुमारा गच्छन्ति। रूढ़ा-
वुपादानलक्षणा साध्यवसाना गौणी यथा
तैलानि हेमन्ते सुखानि। प्रयोजने यथा
राजकुमारा गच्छन्ति। रूढ़ौ लक्षणलक्षणा
सारोपा गौणी यथा राजा गौड़ेन्द्रः कण्टकं
शोधयति। प्रयोजने गौर्व्वाहीकः। रूढ़ौ
लक्षणलक्षणा साध्यवसाना गौणी यथा
कण्टकं शोधयति। प्रयोजने यथा गौर्ज-
ल्पति ॥ * ॥
"व्यङ्ग्यस्य गूढ़ागूढ़त्वाद्द्विधा स्युः फल-
लक्षणाः॥"६॥
प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः
प्रयोजनरूपव्यङ्ग्यस्य गूढ़ागूढ़तया प्रत्येकं द्विधा
भूत्वा षोड़शभेदाः। तत्र गूढ़ः काव्यार्थभावना-
परिपक्वबुद्धिविभवमात्रवेद्यः। यथा उपकृतं
बहु तत्रेत्यादि। अगूढ़ोऽतिस्फुटतया सर्व्वजन-
वेद्यः। यथा उपदिशति कामिनीनां यौवन-
मद एव ललितानि। अत्रोपदिशतीत्यनेन
आविष्करोतीति लक्ष्यते आविष्कारातिशय-
श्चाभिधेयवत् स्फुटं प्रतीयते ॥ * ॥
"धर्म्मिधर्म्मगतत्वेन फलस्यैता अपि द्विधा।"७॥
एता अनन्तरोक्ताः षोड़शभेदा लक्षणाः
फलस्य धर्म्मगतत्वेन धर्म्मिगतत्वेन च प्रत्येकं
द्विधा भूत्वा द्वात्रिंशद्भेदाः। क्रमेणोदाहरति।

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका
घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः
कलाः।
कामं सन्तु दृढ़ं कठोरहृदयो रामोऽस्मि
सर्व्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि!
धीरा भव॥"

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्म्मिणि लक्ष्ये
तस्यैवातिशयः फलम्। गङ्गायां घोष इत्यत्र
तटादिषु लक्ष्येषु शीतत्वपावनत्वादिरूपधर्म्म-
स्यातिशयः फलम् ॥ * ॥
"तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः।"
रूढ़ावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणा-
भेदाः ॥ * ॥ किञ्च।
"पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा।"८।
ता अनन्तरोक्ताः। अत्र पदगतत्वेन यथा
गङ्गायां घोषः। वाक्यगतत्वेन यथा उपकृतं
बहु तत्रेति। एवमशीतिप्रकारा लक्षणा।
इति साहित्यदर्पणम्॥

लक्षा, स्त्री, (लक्षयतीति। लक्ष+अच्। टाप्।) लक्षम्। दशायुतसंख्या। इति मेदिनी। षे, ३३॥

लक्षितः, त्रि, (लक्ष+क्तः।) आलोचितः। दृष्टः। (यथा, रघुः। ७। ४४।
"यैः सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्थ्यतया निजघ्नुः॥")
अङ्कितः। इति लक्षधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। लक्षणाश्रयश्च।

लक्षितलक्षणा, स्त्री, लक्षिते लक्षणा। यथा द्विरेफपदेन बहुव्रीहिसमासबलाद्रेफ-द्वययुक्तभ्रमरपदादभिधेयैर्भ्रमरोऽभिधीयते। अत्र रूढ़िरस्ति। प्रकृते तु रूढ़िप्रयोजनयोरभा-वेऽपि पदं इदमेव लक्षितलक्षणम्। न च तन्मात्रेणाभावात् कथमिदं लक्षितलक्षणेति वाच्यम्। यत्र लक्षितात्पदादर्थान्तराभिधानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्। इति साहित्यदर्पणटीकायां रामचरणतर्क-वागीशः॥

लक्षिता, स्त्री, (लक्ष+क्तः। स्त्रियां टाप्।) परकीयानायिकाविशेषः। [illegible]

पुंश्चलीभावनिपुणा। उदाहरणं यथा,—
"यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात्।
यद्भवतु तद्भवतु वा विफलस्तव गोपनोपायः॥"
इति रसमञ्जरी॥

क्ष्म, [न्] क्ली, (लक्षयत्यनेन लक्ष्यते इति वा। लक्ष+मनिन्।) चिह्नम्। (यथा, शाकुन्तले १ अङ्के।
"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥")
प्रधानम्। इत्यमरः। ३। ३। १२४॥

क्ष्मणं, क्ली, चिह्नम्। इति शब्दरत्नावली॥ (यथा, माघे। ६। ३१।
"अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं विलङ्घ्य शिशिरांशुरुचिः।
परिवारितः परित ऋक्षगणै-
स्तिमिरौघराक्षसकुलं बिभिदे॥")
नाम। इत्यमरटीकायां भरतः॥ (लक्ष्मीरस्त्यस्येति। लक्ष्मी+पामादित्वान्नः। लक्ष्मणः अत्वेति गणसूत्रेणात्वं बोध्यम्।) श्रीविशिष्टे, त्रि। इति मेदिनी। णे, ७५॥

क्ष्मणः, पुं, (लक्ष्मणमस्त्यस्येति। अर्शआदित्वादच्।) सारसः। इति हेमचन्द्रः॥ श्रीरामभ्राता। इति मेदिनी। णे, ७६॥ (यथा, अध्यात्मरामायणे। १। ३। ३५।
"भरताद्भरतो नाम लक्ष्मणं लक्ष्मणान्वितम्।
शत्रुघ्नं शत्रुहन्तारमेवं गुरुरभाषत॥")
स च त्रेतायुगे अयोध्यायां सुमित्रागर्भे दशरथाज्जातः। इन्द्रजिद्वधार्थं तस्य चतुर्दशवर्षपर्य्यन्तं आहारनिद्रादिरहितत्वं यथा,—
"एकदा रघुनाथश्च सीतया लक्ष्मणेन च।
स्नातः सरसि तपसो रम्ये पञ्चवटीतटे॥
उवाच सीतां हेमन्ते फलं सुस्वादु निर्म्मलम्।
तपार्जनं रम्यं सर्व्वं वस्तु सुशीतलम्॥
फलञ्च चर्वणं चक्रे सीतायै प्रददौ पुरः।
ततो ददौ लक्ष्मणाय पश्चाद्बुभुक्षे स्वयं प्रभुः॥
लक्ष्मणस्तु गृहीत्वा च नैव भुङ्क्ते फलं जलम्।
मेघनादवधार्थञ्च सीतोद्धारणकारणात्॥
निद्रां न याति नो भुङ्क्ते वर्षाणाञ्च चतुर्द्दश।
स एव पुरुषो योगी तदर्थी रावणालयः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

लक्ष्मणप्रसूः, स्त्री, (लक्ष्मणस्य प्रसूर्जननी।) सुमित्रा। इति शब्दरत्नावली॥

लक्ष्मणा, स्त्री, (लक्ष्मणमस्त्यस्या इति। अर्श आदित्वात् अच्। टाप्।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥ सारसी। ओषधिभेदः। इति मेदिनी। ७६॥ सैषस्तु लक्ष्मणाकन्द इति भाषा ख्यातः। तस्याः पर्य्यायः। पुत्रकन्दा २ तुमरा ३ नागिनी ४ नागाह्वा ५ नागपत्री ६ तुलिनी ७ मञ्जिका ८ कपविन्दुच्छदा ९ पुत्रदा १०। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। स्त्रीवन्ध्यत्वनाशित्वम्। रसायनकरत्वम्। बलत्वम्। त्रिदोषशमनत्वञ्च। इति राजनिर्घण्टः॥
अपि च।
"पुत्रकाकाररक्ताल्पविन्दुभिर्लाञ्छिता सदा।
लक्ष्मणा पुत्रजननी वस्तगन्धाकृतिर्भवेत्॥"
इति भावप्रकाशः॥ *॥
(मद्राधिपतिकन्या। यथा, भागवते। १०। ५८। ५७।
"सुताञ्च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम्।
स्वयंवरे जहारैकः स सुपर्णः सुधामिव॥")
दुर्य्योधनकन्या। सा तु श्रीशाम्बपुत्रेण साम्बेन विवाहिता। इति महाभारतम्॥ (यथा, भागवते। १०। ६८। १।
"दुर्य्योधनसुतां राजन् लक्ष्मणां समितिञ्जयः।
स्वयंवरस्थामहरत् साम्बो जाम्बवतीसुतः॥")

लक्ष्मीः, स्त्री, (लक्षयति पश्यति उद्योगिनमिति। लक्ष+"लक्षेर्मुट् च।" उणा० ३। १६०। इति ईप्रत्ययो मुडागमश्च।) विष्णुपत्नी। तत्पर्य्यायः। पद्मालया २ पद्मा ३ कमला ४ श्रीः ५ हरिप्रिया ६ इन्दिरा ७ लोकमाता ८ मा ९ क्षीराब्धितनया १० रमा ११। इत्यमरः॥ जलधिजा १२ भार्गवी १३। इति शब्दरत्नावली॥ हरिवल्लभा १४ दुग्धाब्धितनया १५ क्षीरसागरसुता १६। इति कविकल्पलता॥ *॥

अथ लक्ष्मीमन्त्राः।
"वाक्यं वह्निसमारूढं वामनेत्रेन्दुसंयुतम्।
बीजमेतत् श्रियः प्रोक्तं सर्व्वकामफलप्रदम्॥" *॥
अस्य पूजाप्रयोगः। प्रातःकृत्यादिपीठन्यासान्तं कर्म्म विधाय हृत्पद्मस्य पूर्व्वादिकेशरेषु मध्ये च पीठशक्तीः पीठमनुञ्च न्यसेत्। ॐ विभूत्यै नमः। एवं उन्नत्यै कान्त्यै सृष्ट्यै कीर्त्त्यै सन्नत्यै पुष्ट्यै उत्कृष्ट्यै ऋद्ध्यै। ततः श्रीकमलासनाय नमः। इत्यासनं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि भृगुऋषये नमः मुखे निचृच्छन्दसे नमः। हृदि श्रियै देवतायै नमः। ततः कराङ्गन्यासौ कुर्य्यात्। श्रां अङ्गुष्ठाभ्यां नमः। श्रीं तर्ज्जनीभ्यां स्वाहा। श्रूं मध्यमाभ्यां वषट्। इत्यादि। एवं श्रां हृदयाय नमः इत्यादिना च न्यसेत्। तथा च निबन्धे।
"अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत्॥"
ततो ध्यानम्।
"कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यै-
श्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां
श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटो-
ज्ज्वलां
क्षौमाबद्धनितम्बविलसितां वन्देऽरविन्द-
स्थिताम्॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय केशरेषु मध्ये च विभूत्यादिपीठमन्त्रपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं
रणपूजामारभेत्। ...
च श्रां हृदयाय नमः। ...
दलेषु पूर्व्वादिषु ॐ ...
शेषाय प्रद्युम्नाय अनिरुद्धाय। ...
दमकाय ॐ सलिलाय ॐ गुग्गुले ...
कटकाय। ततो देवा दक्षिणे ॐ ...
नमः। एवं वसुधारायै। वामे ॐ ...
वसुमत्यै। पत्राग्रेषु पूर्व्वादिषु
एवं विमलायै कमलायै वनमालिकायै ...
विकायै शार्ङ्ग्यै वसुमालिकायै। ...
दीन् वज्रादींश्च पूजयेत्। ततो ...
अंगानां कर्म्म समापयेत्। अस्य ...
द्वादशलक्षजपः। तथा च।
"भानुलक्षं जपेन्मन्त्रं ...
तत्सहस्रञ्च जुहुयात् कमलैर्मधुराप्लुतैः।
अपामार्गं जुहुयाल्लक्ष्मीं तिलैर्वा मधुराप्लुतैः
बिल्वैः फलैर्वा ...
वाग्भवं वनिता विष्णोर्मायां मकरकेतनः।
चतुर्वर्णात्मको मन्त्रश्चतुर्व्वर्गफलप्रदः।"
वाग्भवं ऐं। विष्णुवनिता श्रीं। माया ह्रीं।
मकरकेतनः क्लीं। अस्य पूजादिकं ...
बोध्यम्। तथा च।
"रमायाः कल्पिते पीठे तद्विधानेन पूर्व्व-
कुर्य्यात् प्रयोगान् तत्स्थापनेन
निधिभिः सेव्यते नित्यं कीर्त्तिमद्भिरनेकैः
ध्याने तु विशेषः।
"माणिक्यप्रतिमप्रभां ...

हस्ताब्जैर्वरदानमम्बुजयुगमाभीतिर्दधानां
कान्तां ...
...

अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च
"भानुलक्षं हविष्याशी जपेन्मन्त्रं ...
जुहुयाद्दशांशैः पुष्पैस्तत्सम्भवं जितेन्द्रियः।
मन्त्रान्तरम्। नमः कमलवासिन्यै ...
मिति प्रोक्तो दशार्णः। तथा च निबन्धे
"दीर्घा वादित्रिसंयुक्ता
वाणीसिन्धुप्रिया वह्निसंज्ञः प्रोक्तो दशाक्षरः
"दीर्घा नकारः। वादिमः। ...
भानुमः। वसुन्धरा लः। वाणीसिन्धु ...
वह्निप्रिया स्वाहा। अस्य पूजाप्रयोगः।
तत् पीठमन्त्रं विन्यस्य
कुर्य्यात्। शिरसि दक्षऋषये नमः।
विराट्छन्दसे नमः। हृदि श्रियै ...
तथा च शारदायाम्।
"ऋषिर्दक्षो विराट्छन्दो देवता श्रीः ...
...

ततः कराङ्गन्यासौ। ॐ देवै ...
नमः। ॐ पद्मिन्यै नमस्तर्ज्जनीभ्यां ...
ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां ...
ॐ वरदायै नमोऽनामिकाभ्यां ...

ॐ कमलवासिन्यै नमः अस्त्राय फट्। इति करन्यासः। ॐ ह्रीं नमो हृदयाय नम इत्यादि। तथा च विष्णुः।
"देवीं सुवर्णवर्णाभां चतुर्हस्तां किरीटिनीम्।
दिव्यवस्त्रैर्विराजन्तीं रत्नाद्यैः समलङ्कृताम्।
अर्घ्यं कमलवासिन्यै नमोऽस्तु प्रणवादिना॥"
ततो ध्यानम्।
"कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भि-
र्गजैः
हस्ते पद्मयुगाभयं च दधती श्रीशालिनी-
गरिमा।
मुक्ताहारविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती
हरिम्॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पूर्व्वोक्तपीठशक्तिपर्य्यन्तं पूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अग्न्यादिकोणेषु दिक्षु च ॐ ह्रीं नमो हृदयाय नमः। ॐ श्रियै नमः शिरसे स्वाहा। ॐ विष्णुपत्न्यै नमः शिखायै वषट्। ॐ वरदायै नमः कवचाय हुम्। ॐ कमलरूपायै नमोऽस्त्राय फट्। ततः पूर्व्वादिदलेषु पूर्व्ववत् पद्मावत्यादि पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं दशलक्षजपः। तथा च।
"दशलक्षं जपेन्मन्त्रं मन्त्रविद्विजितेन्द्रियः।
दशांशं जुहुयान्मन्त्री मधुराक्तैः सरोरुहैः॥"॥
अथ लक्ष्मीस्तोत्रम्।
ईश्वर उवाच।
"त्रैलोक्यपूजिते देवि! कमले विष्णुवल्लभे।
यथा त्वं सुस्थिरा कृष्णे तथा भव मयि स्थिरा॥
ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया।
पद्मा पद्मालया सम्पदुच्चैः श्रीः पद्मधारिणी॥
द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्।
स्थिरा लक्ष्मीर्भवेत् तस्य पुत्त्रदारादिभिः सह॥"
इति तन्त्रसारः॥
विष्णुपुराणोक्तलक्ष्मीस्तोत्रं तत्रैव १ अंशे ६ अध्याये द्रष्टव्यम्॥ ॥ अथ लक्ष्मीपूजानिरूपणम्। यथा, स्कन्दपुराणे।
"पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्।
सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे॥
प्रयत्नं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।
नापराह्णे न रात्रौ च नासिते न च सन्धिषु॥
द्वादश्याञ्चैव नन्दायां रिक्तायाञ्च निरंशके।
त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत्॥
न पूजयेत् शनौ भौमे न बुधे नैव भार्गवे।
पूजयेत्तु गुरोर्वारे चाप्राप्ते रविसोमयोः॥
गुरुवारे हि पूजां च यत्नेन यदि लभ्यते।
तत्र पूज्या तु कमला धनपुत्त्रविवर्द्धिनी॥
न कुर्य्यात् प्रथमे मासि नैव कुर्य्याद्विसर्ज्जनम्।
न घण्टां वादयेत्तत्र नैव झिण्टीं प्रदापयेत्॥
पौषे च दशमी शस्ता चैत्रे पञ्चमी तथा।
नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः॥
आढकं धान्यसम्पूर्णं नानाभरणभूषितम्।
नानाविधसुगन्धैश्च शुक्लपक्षे प्रपूजयेत्॥
पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रके।
पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः॥
गुरुवारसमायुक्ता नभस्ये पूर्णिमा शुभा।
यस्तां पूजयेत्तत्र पुनर्जन्म न विद्यते॥
अनेन क्रमेणैव कमलां पूजयेद् यदि।
इह लोके सुखं प्राप्य परत्र केशवं व्रजेत्॥
प्राङ्मुखो पूजयेल्लक्ष्मीं पश्चिमाननसंस्थिताम्।
गन्धपुष्पधूपदीपनैवेद्याद्युपचारकैः॥
गन्धद्वारेतिमन्त्रेण गन्धेनावाहयेच्छ्रियम्।
श्रियै चात इति द्वाभ्यां पुष्पैरावाहयेत्ततः॥"
ततो ध्यानम्।
"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदममावह॥
गौरवर्णां द्विभुजां सितपद्मोपरिस्थिताम्।
विष्णोर्वक्षःस्थलस्थाञ्च जगच्छोभाप्रकाशिनीम्॥
ध्यायेदाद्यां सदा देवीं पूजाकाले विशेषतः।
ततः पूजादिकं कुर्य्यात् श्रीं लक्ष्म्यै नम इत्यृचा॥
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्धृतिः क्षमा।
तुष्टिः पुष्टिस्तथा कान्तिर्मेधा विद्या रमा स्मृतिः॥
हरिप्रिया तथा विष्णोः प्रिया नारायणस्य च।
एताभिः सप्तदशभिर्लक्ष्मीबीजादिनार्च्चयेत्॥
लक्ष्मीनारायणाभ्याञ्च नमोऽन्तेन प्रपूजयेत्।
धिषणञ्च कुवेरञ्च पूजयेत्तदनन्तरम्॥"
लक्ष्मीचरित्रे।
"न कृष्णपक्षे रिक्तायां दशमीद्वादशीषु च।
श्रवणादिचतुर्ऋक्षे लक्ष्मीपूजां न कारयेत्॥"
इति कालचन्द्रिका॥
दीपान्वितामावस्यायां लक्ष्मीपूजाविधिर्यथा,—
"तुलाराशिगते भानौ अमावास्यां नराधिपः।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चाभिवेष्ट्य-
ताम्॥
अमावास्या यदा रात्रौ दिवाभागे चतुर्द्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥
अमावास्यां यदा देवाः कार्त्तिके मासि केश-
वात्।
अभयं प्राप्य सुप्ताश्च क्षीरोदार्णवसानुषु॥
लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताम्बुजोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका।
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि॥
चतुष्पथश्मशानेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षि-
तान्।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृत्यकैः सह॥"
अथ लक्ष्मीपूजायां पुष्पदानकाले।
"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये!।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्॥"
लक्ष्म्यै नम इत्यनेन वारत्रयं पूजयेत्।
"सुखरात्र्यां प्रदोषे तु कुवेरं पूजयन्ति ये।"
इति रुद्रधरधृतात् कुवेरमपि पूजयन्ति।
"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"
इति पठित्वा कुवेराय नम इति त्रिः पूजयेत्। ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।
"अग्निर्ज्योती रविर्ज्योतिश्चन्द्रर्ज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥"
ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म्म कुर्य्यात्। तथा,—
"सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये।
बन्धून्बन्धूनबन्धूंश्च वाचा कुशलयार्च्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाचन्दनञ्च दद्यादङ्गेषु सर्व्वतः॥"
लक्ष्मीपूजामन्त्रः।
"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां सृष्टिसम्भवा।
आख्याता भूतले देवि! सुखरात्रि नमोऽस्तु
ते॥"
लक्ष्म्यै नम इति त्रिः पूजयेत्। इति तिथ्यादितत्त्वम्॥ ॥ तस्या उपाख्यानं यथा,—
नारद उवाच।
"श्रीकृष्णस्यात्मनश्चैव निर्गुणस्य निराकृतेः।
सावित्रीयमसंवादे श्रुतं सुनिर्म्मलं यशः॥
तद्गुणोत्कीर्त्तनं सत्यं मङ्गलानाञ्च मङ्गलम्।
अधुना श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेव च॥
केनादौ पूजिता सापि किम्भूता केन वा पुरा।
तद्गुणोत्कीर्त्तनं सत्यं वद वेदविदांवर॥
श्रीनारायण उवाच।
सृष्टेरादौ पुरा ब्रह्मन् कृष्णस्य परमात्मनः।
देवी वामांशसम्भूता बभूव रासमण्डले॥
अतीवसुन्दरी रामा न्यग्रोधपरिमण्डला।
यथा द्वादशवर्षीया शश्वत् सुस्थिरयौवना॥
श्वेतचम्पकवर्णाभा सुखदृश्या मनोहरा।
शरत्पार्व्वणकोटीन्दुप्रभाप्रच्छादितानना॥
शरन्मध्याह्नपद्मानां शोभामोचनलोचना।

सा च देवी द्विधा भूता सहसैवेश्वरेच्छया ।
समा रूपेण वर्णेन तेजसा वयसा त्विषा ।
यशसा वाससा मूर्त्त्या भूषणेन गुणेन च ।
स्मितेन वीक्षितेनैव वचसा गमनेन च ।
मधुरेण स्वरेणैव नयेनानुनयेन च ।
तद्वामांशो महालक्ष्मीर्दक्षिणांशश्च राधिका ।
राधादौ वरयामास द्विभुजञ्च परात्परम् ।
महालक्ष्मीश्च तत्पश्चात्तमेव कमनीयकम् ।
कृष्णस्तद्गौरवेणैव द्विधारूपो बभूव ह ।
दक्षिणांशश्च द्विभुजो वामांशश्च चतुर्भुजः ।
चतुर्भुजाय द्विभुजो महालक्ष्मीं ददौ पुरा ।
लक्ष्यते दृश्यते विश्वं स्निग्धदृष्ट्या ययानिशम् ।
देवीषु या च महती महालक्ष्मीश्च सा स्मृता ।
द्विभुजो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः ।
शुद्धसत्त्वस्वरूपश्च गोपैर्गोपीभिरावृतः ।
चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह ।
सर्वांशेन समौ तौ द्वौ कृष्णनारायणौ परौ ।
महालक्ष्मीश्च योगेन नानारूपा बभूव सा ।
वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा परा ।
शुद्धसत्त्वस्वरूपा च सर्वसौभाग्यसंयुता ।
[illegible] सा च प्रधाना च सर्वासु रमणीषु च ।
स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी ।
पाताले च मर्त्त्ये च राजलक्ष्मीश्च राजसु ।
गृहलक्ष्मीर्गृहेष्वेव गृहिणी च कलांशया ।
सम्पत्स्वरूपा गृहिणां सर्वमङ्गलमङ्गला ।
गवां प्रसूतिः सुरभी दक्षिणा यज्ञकामिनी ।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च ।
शोभास्वरूपा चन्द्रे च सूर्य्यमण्डलमण्डिता ।
विभूषणेषु रत्नेषु फलेषु च जलेषु च ।
नृपेषु नृपपत्नीषु दिव्यस्त्रीषु गृहेषु च ।
सर्वसस्येषु वस्त्रेषु स्थानेषु संस्कृतेषु च ।
प्रतिमासु च देवानां मङ्गलेषु घटेषु च ।
माणिक्येषु च मुक्तासु माल्येषु च मनोहरा ।
[illegible] च क्षीरेषु चन्दनेषु च ।
वृक्षशाखासु रम्यासु नवमेघेषु वस्तुषु ।
वैकुण्ठे पूजिता सादौ देवी नारायणेन च ।
द्वितीये ब्रह्मणा भक्त्या तृतीये शङ्करेण च ।
विष्णुना पूजिता सा च क्षीरोदे भारते मुने ॥
स्वायम्भुवेन मनुना मानवेन्द्रैश्च सर्वतः ।
ऋषीन्द्रैश्च मुनीन्द्रैश्च सद्भिश्च गृहिभिस्तथा ।
गन्धर्व्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता ।
शुक्लाष्टम्यां भाद्रपदे कृता पूजा च ब्रह्मणा ।
भक्त्या च पक्षपर्य्यन्तं त्रिषु लोकेषु नारद ॥
चैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे ।
विष्णुना निर्म्मिता पूजा त्रिषु लोकेषु [illegible] ।
वर्षान्ते पौषसंक्रान्त्यां [illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

प्रियव्रतेन चन्द्रेण कुबेरेणैव वायुना ।
यमेन वह्निना चैव वरुणेनैव पूजिता ॥
एवं सर्वत्र सर्वैश्च वन्दिता पूजिता सदा ।
सर्वैश्वर्य्याधिदेवी सा सर्वसम्पत्स्वरूपिणी ॥"
अपि च ।

नारद उवाच ।

"नारायणप्रिया सा च वरा वैकुण्ठवासिनी ।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी ॥
कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका ।
किं तद्ध्यानञ्च स्तवनं सर्व्वः पूजाविधिक्रमः ।
पुरा केन स्तुतादौ सा तन्मां व्याख्यातुमर्हसि ॥

श्रीनारायण उवाच ।

पुरा दुर्व्वाससः शापात् भ्रष्टश्रीश्च पुरन्दरः ।
बभूव देवसंघश्च मर्त्त्यलोकश्च नारद ! ॥
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता ।
गत्वा लीना च वैकुण्ठे महालक्ष्म्याञ्च नारद ॥
तदा शोकाद्ययुर्देवा दुःखिता ब्रह्मणः सभाम् ।
ब्रह्माणञ्च पुरस्कृत्य ययुर्वैकुण्ठमेव च ॥
वैकुण्ठे शरणापन्ना देवा नारायणे परे ।
अतीवदैन्ययुक्ताश्च शुष्ककण्ठोष्ठतालुकाः ॥
तदा लक्ष्मीश्च कलया पुरा नारायणाज्ञया ।
बभूव सिन्धुकन्या सा शक्रसम्पत्स्वरूपिणी ॥
तदा मथित्वा क्षीरोदं देवा दैत्यगणैः सह ।
संप्रापुश्च वरं लक्ष्मीं ददृशुश्चाथ तत्र हि ॥
सुरादिभ्यो वरं दत्त्वा वरमालाञ्च विष्णवे ।
ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने ॥
देवाश्चाप्यसुरग्रस्तं राज्यं प्रापुश्च सत्वरात् ।
तां सम्पूज्य च संस्तूय सर्वत्र च निरापदः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३५ ।३६ अध्यायौ ।
लक्ष्म्या अनवस्थानस्थानानि यथा,—
"यं यं ददौ गुरुर्देवो माता तातश्च बान्धवः ।
अतिथिः पितृलोकाश्च न यामि तस्य मन्दि-
रम् ।
मिथ्यावादी च यः शश्वदनध्यायी च पातकः
सदा ।
सत्त्वहीनश्च दुःशीलो न गेहं तस्य याम्यहम् ॥
सत्यहीनः स्थाप्यहारी मिथ्यासाक्ष्यप्रदायकः ।
विश्वासघ्नः कृतघ्नो यो न यामि तस्य मन्दिरम् ॥
चिन्ताग्रस्तो भयग्रस्तः शत्रुग्रस्तोऽतिपातकी ।
ऋणग्रस्तोऽतिकृपणो न गेहं यामि पापिनाम् ॥
दीक्षाहीनश्च शोकार्त्तो मन्दधीः स्त्रीजितः
सदा ।
पुंश्चलीपतिपुत्रो यो तद्गेहं नैव याम्यहम् ॥
दुर्व्वाक्यकलहाधारो यो भुङ्क्ते वामनः सदा ।
शूद्रान्नभोजी शूद्रयाजी तद्गेहे नैव याम्यहम् ॥
[illegible]
[illegible] न यामि तस्य मन्दि-
रम् ॥
[illegible]
[illegible] न यामि तस्य मन्दिरम् ॥
[illegible]
[illegible] न यामि तस्य मन्दिरम् ॥

स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः [illegible]
यो हरेद्दानहीनश्च न यामि [illegible]
यत् कर्म्म दक्षिणाहीनं कुरुते [illegible]
स पापी पुण्यहीनश्च न [illegible]
मातरं पितरं भार्य्यां गुरुपत्नीं गुरुं सुतम्
अनाथां भगिनीं [illegible]
कार्पण्यादृयो न [illegible]
[illegible]
मूत्रं पुरीषमुत्सृज्य यस्तु पश्चात् [illegible]
यः शेते स्निग्धपादेन न यामि [illegible]
अधौतपादशायी यो नग्नः शेते [illegible]
सन्ध्याशायी दिवाशायी न यामि [illegible]

[illegible]
मूर्द्धि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत्
ददाति पश्चाद्गात्रे वा न यामि [illegible]
दत्त्वा तैलं मूर्द्ध्नि गात्रे विण्मूत्रं यः [illegible]
प्रणमेदाहरेत् पुष्पं न यामि तस्य [illegible]
तृणं छिनत्ति नखरैर्नखैर्विलिखते [illegible]
गात्रे पादे मलं यस्य न यामि तस्य
दशनं वसनं यस्य समलं रूक्षमेव [illegible]
विहसती ग्रासहासी च न यामि तस्य
मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सक [illegible]
सूपकारो देवलश्चैव न यामि तस्य मन्दिरम् ।
विवाहं धर्म्मकार्य्यं वा यो निहन्ति च [illegible]
दिवामैथुनकारी यो न यामि तस्य मन्दिरम्
इत्यादि ब्रह्मवैवर्त्ते गणेशखण्डे [illegible]
नाम २३ अध्यायः ॥ * ॥ अपि च ।

"कुचैलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥
नित्यं छिदस्तृणानां धरणिविलिखनं पादयोः [illegible]

दैन्यानामल्पशौचं वसनमलिनता रूक्ष [illegible]
मांस [illegible]

द्वे सन्ध्ये चापि निद्रा विवसनशयनं [illegible]

स्वाङ्गे पीठे च वाद्यं निधनमुपनयेत् [illegible]
स्यापि लक्ष्मी [illegible]

शिरः सुधौतं चरणौ सुमार्ज्जितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
यस्य कान्त नु पुष्पस्य [illegible]
प्रियमा धार्य्यमाणस्य [illegible]
दौर्गत्य [illegible]
[illegible] लक्ष्मीश्च [illegible]
इत्यादि गारुडे ११४ अध्यायः ॥
चतुर्विंशती लक्ष्मीः [illegible]
देवा ऊचुः ।
"[illegible] । [illegible]
[illegible]

दत्तात्रेय उवाच ।
ीणां पादस्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
क्थिनि संस्थिता वस्त्रं रत्नं नानाविधं वसु ॥
कलत्रदा गुह्यसंस्था क्रोडस्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ॥
लक्ष्मीर्लक्ष्मीवतां श्रेष्ठं कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारैश्च तथाश्लेषं प्रवासिभिः ॥
मिष्टान्नं वाक्यलावण्यमाज्ञामवितथान्तथा ।
मुखसंस्था कवित्वञ्च यच्छत्युदधिसम्भवा ॥
शिरोगता संत्यजति ततोऽन्यं याति संश्रयम् ।
सेयं शिरोगता दैत्यान् परित्यजति साम्प्रतम् ॥"
इति मार्कण्डेयपुराणे दत्तात्रेयचरिताध्यायः ॥ * ॥
अथ लक्ष्मीचरित्रम् ।

श्रीसूत उवाच ।
मेरुपृष्ठे सुखासीनां लक्ष्मीं पृच्छति केशवः ।
केनोपायेन देवि त्वं नृणां भवसि निश्चला ॥

श्रीरुवाच ।
मा: पारावता यत्र गृहिणी यत्र चोज्ज्वला ।
अकलहा वसतिर्यत्र तत्र कृष्ण वसाम्यहम् ॥
धान्यं सुवर्णसदृशं तण्डुला रजतोपमाः ।
मन्नञ्चैवातुषं यत्र तत्र कृष्ण वसाम्यहम् ॥

यः संविभागी प्रियवाक्यभाषी
वृद्धोपसेवी प्रियदर्शनश्च ।
अल्पप्रलापी न च दीर्घसूत्री
तस्मिन् सदाहं पुरुषे वसामि ॥
यो धर्मशीलो विजितेन्द्रियश्च
विद्याविनीतो न परोपतापी ।
क्षमान्वितो यश्च जनानुरागी
तस्मिन् सदाहं पुरुषे वसामि ॥

वरं याति द्रुतं शुष्कं पुष्पं प्राप्य न जिघ्रति ।
गी न पश्येत् स्त्रियं नग्नां नियतं स च मे प्रियः ॥
दानं शच्च शौचञ्च यत्र एते महागुणाः ।
: प्राप्नोति गुणानेतान् महावान् स च मे प्रियः ॥
लिङ्गञ्चैवमध्ये तु त्याग एव विशिष्यते ।
ाति देशे च पात्रे च स च त्यागः प्रशस्यते ॥
कमलामलके लक्ष्मीर्नित्यं वसति गोमये ।
वस्त्रे शङ्खे च पद्मे च नित्यं श्रीः शुक्लवाससि ॥

वसामि पद्मोत्पलशङ्खमध्ये
वसामि चन्द्रे च महेश्वरे च ।
नारायणे चैव वसुन्धरायां
वसामि निक्षेपसमन्दिरेषु ॥"

शङ्खरायामित्यत्र पक्षे धरायामिति वा पाठः ॥

"पतोपदिष्टा गुरुभक्तियुक्ता
पतुर्मता भाजनमेव च नित्यम् ।
नित्यञ्च शुद्धा पतिभक्तियुक्ता
तस्याः शरीरे नियतं वसामि ॥
तुष्टा च धीरा प्रियवादिनी च
सौभाग्ययुक्ता च सुशोभना च ।
लावण्ययुक्ता प्रियदर्शना या
पतिव्रता या च वसामि तासु ॥
श्यामा सुकाशी शुभलक्षणाङ्गा
तनू तन्वी सुहासा सुशीला ।
गभीरनाभिः समदन्तपङ्क्ति-
स्तस्याः शरीरे नियतं वसामि ॥
या पापरक्ता पिशुनस्वभावा
स्वाधीनकान्तः परिभूयते च ।
अमर्षकामा कुचरित्रशीला
तामङ्गनां प्रेतसुखीं त्यजामि ॥

पुष्पं पर्युषितं पूतिं शयनं बहुभिः सह ।
भग्नासनं कुनारीञ्च दूरतः परिवर्जयेत् ॥
चिताङ्गारकमस्थीनि वह्निं भस्म द्विजञ्च गाम् ।
न पादेन स्पृशेत् पादं कार्पासास्थि तुषं गुरुम् ॥
नखकेशोदकञ्चैव मैथुनं पर्व्वसन्ध्ययोः ।
वर्जयेच्छयनशायित्वमेकाकी मिष्टभोजनम् ॥

शिरः सपुष्पं चरणौ सुपूजितौ
निजाङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥

सम्मार्जनीरजोवात निर्गुण्डी लकुचस्तथा ।
रात्रौ बिल्वपलाशञ्च कपित्थं वर्जयेद्दधि ॥
स्वगात्रासनयोर्वाद्यं अपूजा मूर्द्धपादयोः ।
उच्छिष्टस्पर्शनं मूर्द्ध्नि स्नानाभ्यङ्गञ्च वर्जयेत् ॥
शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्जयेत् शुष्कभोजनम् ॥
परेणोद्वर्त्तितं वस्त्रं स्वयं माल्यापकर्षणम् ।
आलस्यमवसादञ्च न कुर्य्याल्लोष्टमर्द्दनम् ॥
शुक्रवारे च यत्तैलं शिलापिष्टञ्च दर्पके ।
स्वयं वामेन मूर्द्धानं पाणिना नैव संस्पृशेत् ॥
तारकाः पुच्छवन्तो च न पश्येदशुचिः पुमान् ।
नेक्षेद्गुह्यं परस्त्रीणां नास्तं यान्तं दिवाकरम् ॥
कुर्य्यान्नान्यधनाकाङ्क्षां परस्त्रीणां तथैव च ।
परेषां प्रतिकूलञ्च उदितार्के प्रबोधनम् ॥
नखकण्टकरक्तैश्च मृत्तिकाङ्गारवारिभिः ।
वृथा विलेखनं भूमौ न कुर्य्यान्मम काङ्क्षया ॥
स्वयं दीपं स्वयं माल्यं स्वयं छत्रञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥"
स्वयं दीपमित्यत्र मधिलक्षेति वा पाठः ।
"न निन्द्यां गणके विप्रे पादयोर्मर्द्दनन्तथा ।
प्रतिकूलञ्चरेत् स्त्रीणां शुक्ला च दन्तधावनम् ॥
अशनं मांसलञ्च नवान्नेन स्त्रियन्तथा ।
भक्षयादशमावेव शक्रादपि हरेत् श्रियम् ॥

मद्यैरयुक्तः परदारसेवी
आचारहीनः परसेवकश्च ।
सद्दींर्यचारी परिवादशील-
स्तं निष्ठुरं दम्भमयं त्यजामि ॥

शयनञ्चार्द्रपादेन रात्रिवासो दिने तथा ।
नोत्तरीयमधः कुर्य्यात् उष्णपादेन भोजनम् ॥
अशुचिं स्नानवस्त्राञ्च दुर्गन्धामशुभावहाम् ।
आशुष्टामुष्णाञ्च न कुर्य्यादालवालकम् ॥
कर्णे च दन्तं शार्ङ्गे नदा करण्डेऽपि च ।
मार्दे दृष्टे तथा नैव न कुर्य्याद्दर्पणेक्षणम् ॥
स्थल्पदीर्घं एवं दीपो हृदयेदग्नि परस्परः ।
दीपं वर्त्तेत च पादस्थं समाहृतः ॥
सर्वं सुखं तदा नीचं गर्हणेन महोदधिम् ।
गृहीतं प्रथमं वस्त्रं वर्जयेन्न कदाचन ॥
अजरजः खररजस्तथा सम्मार्जनीरजः ।
स्त्रीणां पादरजो राजन् शक्रादपि हरेत् श्रियम् ॥

कुचैलिनं दन्तमलप्रधारिणं
महाशटं निष्ठुरवाक्यभाषिणम् ।
सूर्योदये चास्तमिते तु शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥"

महाशटमित्यत्र बह्वाशिनमिति वा पाठः ।
"नित्यं छिद्रस्तृणानां क्षितिनखलिखनं पादयो-रल्पशौचं
दन्ताङ्गे तैलहीनं वसनमलिनतावन्धनं मूर्द्ध-जानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासा-तिरेकः
स्वाङ्गे पीठे च वाद्यं हरति धनपतेः केशव-स्यापि लक्ष्मीम् ॥"
अवन्धनमित्यत्र रूक्षता इति वा पाठः ।
"एवं यः कुरुते नित्यं मयोक्तानि च केशव ! ।
तुष्टा भवामि तस्याहं त्वय्येवा निश्चला यथा ॥
श्रीभाषितमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तद्गृहं विपुलं रम्यं नित्यं भवति नान्यथा ॥
व्याधितो मुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
आपदस्तस्य नश्यन्ति तमः सूर्योदये यथा ॥"
इति स्कन्दपुराणे लक्ष्मीकेशवसंवादे लक्ष्मी-चरित्रं समाप्तम् ॥ * ॥ दुर्गा । यथा,—
"स्मृतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च वा ।
लक्ष्मीर्वा लक्षणा चापि क्रमात् या कान्ति-रुच्यते ॥
इति देवीपुराणे ५५ अध्यायः ॥
सम्पत्तिः । शोभा । ऋद्ध्यौषधम् । वृद्धिनामौ-षधम् । फलिनीवृक्षः । इति मेदिनी । षे, ३८ ॥ सीता । वीरयोषित् । इति शब्दरत्नावली ॥ स्थलपद्मिनी । हरिद्रा । शमी । द्रव्यम् । मुक्ता । इति राजनिर्घण्टः ॥ मोक्षप्राप्तिः । इति चण्डीटीकायां नागभट्टः ॥ (शोभा । यथा, कुमारे । १ । ४८ ।

"पयालनैवासरसस्य मार्गी-
ष्यानिःसृतैर्हेददिनैः शिरस्कः ।
मृणालसूत्राधिकसौकुमार्यौ
बालस्य लक्ष्मीं ग्लपयन्त्यनिन्द्याः ॥")

लक्ष्मीकान्तः, पुं, (लक्ष्म्याः कान्तः ।) नारायणः । यथा,—
"नमः कमलनेत्राय वरदे परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त नमोऽस्तु ते ॥"
इति सत्यनारायणकथा ॥
लक्ष्मीगृहं, क्ली, (लक्ष्म्याः गृहमावासस्थानम् ।) रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥ लक्ष्मी-वेष्ट च ।
लक्ष्मीजनार्दनः, पुं, (लक्ष्म्याः सहितो जनार्दनः ।) शालग्रामविशेषः । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं नीलमेघसमद्युतिम् ।

लक्ष्मीजनार्द्दनौ श्रेयौ रञ्जितौ वनमालया ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
(तथा, देवीभागवते । ९ । २४ । ५९ ॥)

लक्ष्मीतालः, पुं, (लक्ष्मीयुक्तस्तालः ।) श्रीताल-वृक्षः । इति राजनिर्घण्टः ॥ तौर्य्यत्रिकस्य परिच्छेदविशेषः । तस्य द्रुतलघ्वनुविरामक्रमो यथा,—
“द्रौ लौ गू द्रौ विरामान्तौ द्रुतौ गू द्रविरा-
मकः ।
विरामान्तौ द्रुतौ लघ द्रुतौ लघुविरामकः ॥”
इति सङ्गीतरत्नाकरे लक्ष्मीतालः ॥

लक्ष्मीनारायणः, पुं, (लक्ष्म्यान्वितो नारायणः ।) शालग्रामविशेषः । तस्य लक्षणं यथा,—
“एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ।
नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥”
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीनृसिंहः, पुं, (लक्ष्मीयुतो नृसिंहः ।) शाल-ग्रामविशेषः । तस्य लक्षणं यथा,—
“द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् ।
लक्ष्मीनृसिंहं विज्ञेयं गृहिणाञ्च सुखप्रदम् ।”
इति ब्रह्मवैवर्त्तपुराणम् ।

लक्ष्मीपतिः, पुं, (लक्ष्म्याः पतिः ।) वासुदेवः । नरपतिः । इति मेदिनी । ते, २१५ । (यथा, किराते । १ । ४४ ।
“अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्य्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्म्मुकं
जटाधरः सन् जुहुधीह पावकम् ॥”)
लवङ्गवृक्षः । पूगः । इति विश्वः ॥

लक्ष्मीपुत्त्रः, पुं, (लक्ष्म्याः पुत्त्रः ।) कामदेवः । घोटकः । इति मेदिनी । रे, २८३ ॥ कुशः । लवः । इति शब्दरत्नावली ।

लक्ष्मीपुष्पः, पुं, (लक्ष्मीयुक्तं सौन्दर्य्यविशिष्टं पुष्प-मिवास्य ।) पद्मरागमणिः । इति हेमचन्द्रः ॥

लक्ष्मीफलः, पुं, (लक्ष्म्यास्तन्नामकं फलं यत्र ।) विल्व-वृक्षः । इति राजनिर्घण्टः ॥

लक्ष्मीवान्, [त्] पुं, (लक्ष्मीः शोभास्त्यस्येति । मतुप् । मस्य वः ।) पनसवृक्षः । इति शब्द-माला । श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३।१४९।५२ ।
“सर्व्वकामबलो लक्ष्मीवान् समितिञ्जयः ।”)

लक्ष्मीवान्, [त्] त्रि, (लक्ष्मीरस्त्यस्येति ।) श्रीयुतः । धनवान् । तत्पर्य्यायः । लक्ष्मणः २ श्रीलः ३ श्रीमान् ४ । इत्यमरः ॥ (यथाह कश्चित् ।
“इंशे वरामराज्ञान्ते धिये विवभरः श्रिया ।
लक्ष्मीवन्तो न जानन्ति दुःखदां परवेदनाम् ।”)

लक्ष्मीवेष्टः, पुं, (लक्ष्मीयुक्तो वेष्टः ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

लक्ष्मीशः, पुं, (लक्ष्म्याः ईशः ।) विष्णुः । इति मुग्धबोधव्याकरणम् ॥

लक्ष्मीसहजा, स्त्री, (लक्ष्म्याः सह जायते) सुरा । इति शब्दरत्नावली ॥

लक्ष्मीसहजः, पुं, (लक्ष्म्या सह जातः इति । जन् + डः । क्षीराब्धिजातत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दरत्नावली ॥

लक्ष्म्यारामः, पुं, (लक्ष्म्या आरामः ।) वनभेदः । इति शब्दमाला ॥

लक्ष्यं, क्ली, (लक्ष्यते यदिति । लक्ष + ण्यत् ।) शरवेधस्थानम् । तत्पर्य्यायः । लक्षम् २ शर-व्यम् ३ । इत्यमरः । २ । ८ । ८६ ॥ प्रतिकायः ४ वेध्यम् ५ । इति जटाधरः ॥ वेधम् ६ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ६४ ।
“कामस्तु वाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः
शरासनज्यां मुहुराममर्श ॥”)

लक्ष्यः, त्रि, लक्षणया बोध्यः । इति साहित्य-दर्पणम् ॥ (लक्ष्यते इति । लक्ष + ण्यत् ।) दर्शनीयः । इति लक्षधात्वर्थदर्शनात् ॥ (व्याजः । इत्यमरः ॥ यथा, रघुः । ६ । ८१ ।
“रोमाञ्चलक्ष्येण स गात्रयष्टिं
भित्वा निराक्रामदरालकेश्याः ॥”
अनुमेयः । इति मल्लिनाथः ॥ यथा, कुमारे । ५ । ७४ ।
“इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ॥”
तथा च रघुः । ४ । ५ ।
“छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥”)

लख, सृपि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लखति । सृपि गतौ । इति दुर्गादासः ॥

लखि, इ सृपि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लङ्खते । सृपि गतौ । इति दुर्गादासः ॥

लगि, इ खञ्जे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-खञ्जे अक०-गतौ सक०-सेट् ।) इ, लङ्गति । खञ्जो गतिवैकल्यम् । इति दुर्गा-दासः ॥

लग, क स्के । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लागयति । स्के स्वादप्राप्त्योः । स्के इति स्क क स्वाद आपने । इत्यस्य णेरनित्यत्वे भावे अणि रूपम् । इति दुर्गादासः ॥

लग, म ए सङ्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) म, लगयति । ए, अल-गीत् । गलति अधर ओष्ठे । इति दुर्गादासः ॥

लगड्डं, त्रि, चारु । इति त्रिकाण्डशेषः ॥

लगितं, त्रि, सम्प्रयुक्तम् । लागा इति भाषा । इति लगगात्योः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ।

लगुडः, पुं, दण्डः । लाठी इति भाषा । इत्यमरः ॥ लगुडो वंशादिमयो दण्डः । लौहमयोऽप्यभेदः । इति सर्व्वस्वः । लगुडो लौहमयो परिघमो-पवारादिवर्त्यो । इति सद्गीकायां भरतः ।

(अस्याङ्गतिपरिमाणादि यथा,
“लगुडः खड्गपादः स्यात् द्वस्तं
लौहबद्धाग्रभागश्च हस्तदेशः सु
दण्डाकारो दृढाङ्गश्च तथा
उत्थानं पातनश्चैव पेषणं पोथनं
चत्वारो गतयस्तस्य पञ्चमी नैर्
दृढकायः पत्तिवर्गो तेन

लग्नं, क्ली, (लगति फले इति । लग
स्वान्तध्वान्तलग्नेति ।” ७ । २
निपातनात् साधु ।) राशीनामुद
राति फलं राशिलाभप्रकार
मध्ये द्वादशराशय उदयन्ति ।
फलसंयोगः । तेषां
लग्नं ध्रौ लसूनौ ध्रौढे ध्रोदि
ष्यस्य गः । इति सद्गीकायां
मूल्यायनांशपरिमाणं यथा,—
“रामोऽगवेदै-२ । ४७ अंगधि
ऽम्लौ रसैः ५ । ६ पञ्च सधा
याणः कुवेदै-५।४१ त्रिंशयोऽङ्गु
क्रमोत्क्रमाज्जेयतुलादिमानम् ।
तथा हि ।
मेषस्य ३ । ४७ । तुलायाः
वृषस्य ४ । १७ । वृश्चिकस्
मिथुनस्य ५ । ६ । धनुषः
कर्कटस्य ५ । ४० । मकरस्य
सिंहस्य ५ । ४१ । कुम्भस्य
कन्यायाः ५ । २९ । मीनस्य
इति दीपिका । * । .
अन्ये कलिकाताख्यदेशे वर्त्तमा
प्रामाणिककारिका यथा,—
“वेदोऽङ्गैः ४ । ६ सोऽन्तवेदै ४
यनैः ५।२७ सोऽन्तरीयाऽगु
पारावाराश्रयावे-५।३४ गंगा
षट्त्रिभि-५।३६ चन्द्रवेदैः ५ ।
अक्षुद्याभिः ५ । १९ वसुदो
रनलोऽष्टेषुभिः ३।५८ सोऽग्नै
मेषादेकोनविंशे गणितपरि

उदयलग्नास्तलग्नयोर्दिनं प्रति
“लग्नदण्डपलं द्विम तत्संख्यां
विपलञ्च रवेर्भोग्यमेवं कल्पनम
१

एतयोर्विवरणं यथा,—
तत्र प्राचीनलग्नमान

लग्नाः		दिवसत्तम् ।
यथा	पलम् ।	विपलम् ।
१ मेषः ।	७ ।	३४ ।
२ वृषः ।	८ ।	३६ ।
३ मिथुनम् ।	१० ।	१२ ।
४ कर्कटः ।	११ ।	२० ।
५ सिंहः ।	११ ।	२२ ।
६ कन्या ।	१० ।	५९ ।

दिनभुक्तम् । रात्रिभुक्तम् ।
पलम् । विपलम् । दण्डः । पलम् ।
। १० । ५८ । ५ । २८ ।
:। ११ । २८ । ५ । ३१ ।
। ११ । २० । ५ । ४० ।
:। १० । १८ । ५ । ६ ।
। ८ । ३४ । ४ । १७ ।
। ७ । ३४ । ३ । ४७ ।
च स्वदेशाशुभिकल्पमानम् ।
दिनभुक्तम् । रात्रिभुक्तम् ।
पलम् । विपलम् । दण्डः । पलम् ।
। ८ । १२ । ४ । ६ ।
। ६ । ३६ । ४ । ४८ ।
नम् । १० । ५४ । ५ । २७ ।
:। ११ । २० । ५ । ४० ।
:। ११ । ८ । ५ । ३४ ।
। १० । ५८ । ५ । २८ ।
। ११ । १२ । ५ । ३६ ।
कः । ११ । २२ । ५ । ४१ ।
। १० । ३८ । ५ । १९ ।
:। ६ । १० । ४ । ३५ ।
:। ७ । ५६ । ३ । ५८ ।
:। ७ । ३४ । ३ । ४७ ।

ककालीनलग्नस्थग्रहस्थितफलम् ।
र्ध्वं स्थिरोगी शशिनि बलयुतो रूपवान् वित्तयुक्तो
ञ्जः सुवाग्मी शशधरतनये सर्व्वशास्त्रार्थवेत्ता ।
ात्मा पवित्रः शुक्रविरघ गते भार्गवे मत्स्येशः
कद्रूतिगात्रस्तमसि च नियतं वर्षितो धर्म्महीनः ॥"
इति ज्योतिस्तत्त्वम् ॥ ● ॥
च ।
हरिरुवाच ।
र्त्तु समारभ्य राशौ भानुः स्थितो हर ।
आदौ प्रलेदष्टि षड्भिः षड्भिस्तथा निशाम् ॥
षे च पञ्च सुघतसौ वृषकुम्भयोः ।
मिथुने तिस्रः पञ्च चापे च कर्कटे ॥
च वृश्चिके षट् च सप्त कन्या तुले तथा ।
लग्नप्रमाणेन घटिकाः परिकीर्त्तिताः ॥
ावस्थानेशुरसाब्धीम्बधिसागराः ।
ऱ्या हि द्वे वसु लग्ना मेषादयोऽथवा ॥
पे भवेद्वन्ध्या वृषे भवति कामिनी ।
 सुभगा कन्या वेश्या भवति कर्कटे ॥
चैवाल्पपुत्रा च कन्यायां रूपसंयुता ।
र्यां रूपमैश्वर्य्यं वृश्चिके कर्कशा भवेत् ॥
ग्यं धनुषि स्याच्च मकरे नीचगामिनी ।
चैवाल्पपुत्रा स्यान्मीने वैराग्यसंयुता ॥
कर्कटको मेषो मकरश्चैव राशयः ।
ार्य्याणि कुर्य्याच्च स्थिरकार्य्याणि चैव हि ॥
चराज्ञो वृषः कुम्भो वृश्चिकः स्युः स्थिराणि हि ।
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभावकः ॥
द्विस्वभावानि कर्म्माणि कुर्य्यादेषु विचक्षणः ।
यात्रा चरेण कर्त्तव्या प्रवेशश्च स्थिरेण तु ।
देवस्थापनमेवात्र द्विस्वभावेन कारयेत् ॥"
इति गारुडे ६९ अध्यायः ॥

लग्नः, पुं, (लग् + क्तः । निपातनात् साधुः । यद्वा, लस्ज + क्तः । "ओ लस्जी । लग्नः लग्नवान् । लस्जेरोदित्त्वन्निष्ठानत्वे इड्भावे नत्वं स्यात् ।" इति क्तवत्तो दुर्गादासः ।) स्तुतिपाठकः ॥ तत्पर्य्यायः । प्रातर्गेयः २ स्तुतिव्रतः ३ । इति त्रिकाण्डशेषः ॥ स्तनः ४ । इति जटाधरः ॥

लग्नः, त्रि, (लस्ज + क्तप्रत्ययेन साधुः ।) सक्तः । लज्जितः । इति मेदिनी ॥

लग्नकः, पुं, (लग्न एव । स्वार्थे कन् ।) प्रतिभूः । इत्यमरः ॥ द्वे लागा इति जामिन इति च ख्याते । तत्कार्य्ये लग्नकः । ओ लस्जी व्रीडे क्तः । स्वार्थे कन् । प्रतिनिधिर्भवति प्रतिभूः क्विप् । इति तट्टीकायां भरतः ॥

लग्निका, स्त्री, नग्निका । इत्यमरटीका ॥

लघ, इ शोषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लङ्घति । शोष इह अल्पीकरणम् ।
'यं व्याधिरतिदीर्घाङ्गं कदाचित्तु न लङ्घति ।'
इति हलायुधः ॥
गतावप्यन्ये । अन्ये चालङ्घिषुः शैलान् । इति दुर्गादासः ॥

लघ, इ क लिपि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ क, लङ्घयति । लिपि दीप्तौ । इति दुर्गादासः ॥

लघ, इ ङ अशुग्गत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक०च-सेट् ।) इ, लङ्घ्यते । ङ, लङ्घते । अशुक् भोजनाभावः । तथा च ।
'ये गुणा लङ्घने प्रोक्तास्ते गुणा लघुभोजने ॥'
इति वैद्यकम् ॥
लङ्घने उपवासे इत्यर्थः । इति दुर्गादासः ॥

लघट्, पुं, (लङ्घते मध्यस्थानमस्पृष्ट्वोत्तरस्थाने पतति द्रुतं इतस्ततो गच्छतीति वा । लङ्घ + "लङ्घेर्नलोपश्च ।" उणा०१।१३४। इति अटिः । नलोपश्च धातोः ।) वायुः । इत्युणादिकोषः ॥

लघटिः, पुं, (लघ गतौ + अटिः । इरभावः ।) वायुः । इत्युणादिकोषः ॥

लघिमा, [न्] पुं, (लघोर्भावः । लघु + "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् ।) लघुत्वम् । (यथा, रघुः । १३ । ३७ ।
"ध्यात्वा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा ॥")
तत्तु शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । यथा,
"लघिमा वशितेशित्वं प्राकाम्यं महिमाणिमा ।
यत्र कामावसायित्वं प्राप्तिरैश्वर्य्यमष्टधा ॥"
इति हेमचन्द्रः ॥
(अनद्दुमनत्वम् । तुच्छत्वम् । यथा, आर्य्यासप्तशत्याम् । ६० ।
"अग्रे लघिमा पश्चात् महत्तापि विधीयते नहि महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतारविदः ॥")

लघिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे इष्ठप्रत्ययेन निष्पन्नः । अतिशयलघुत्वयुक्तः । इति व्याकरणम् ॥ (यथा, विदग्धमुखमण्डने ।
"भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
स रामोऽपि स्थाता न युधि पुरतो लक्ष्मणयुतः ।
गमिष्यत्येवोच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ॥"
सीतारावणयोरुक्तिप्रत्युक्तिरियम् । सप्तमाक्षरलोपे लेखे वाक्यम् । यथा । "दशवदनग्लानिः ।"
"स्थाता युधि ।" "उच्चैः पदम् ॥")

लघीयान् [स्] त्रि. अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नः । अतिशयलघुत्वयुक्तः । इति व्याकरणम् ॥ (यथा, महाभारते । २ । ६३ । १४ ।
"न वै समृद्धिं पालयते लघीयान्
यत्त्वां समानेष्यति राजपुत्त्रि ! ॥")

लघु, क्ली, (लङ्घते अनेनेति । लङ्घ + "लङ्घिबंह्योर्नलोपश्च ।" उणा० १ । ३० । इति कुः । धातोर्नलोपश्च ।) शीघ्रम् । इत्यमरः ॥ (यथा, रामायणे । २ । ४६ । २१ ।
"यावदेव तु संसुप्तास्तावदेव वयं लघु ।
रथमारुह्य गच्छामः पन्थानमकुतोभयम् ॥")
कृष्णागुरु । इति मेदिनी । घे, ५ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"लामज्जकं सुनालं स्यादमृणालं लयं लघुः ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
हस्ताश्विनीपुष्यनक्षत्राणि । यथा, वृहत्संहितायाम् । ९८ । ९ ।
"लघु हस्ताश्विनपुष्याः
पण्यरतिज्ञानभूषणकलासु ।
शिल्पौषधयानादिषु
सिद्धिकराणि प्रदिष्टानि ॥"
कालपरिमाणविशेषः । यथा, भागवते । ३ । ११ । ७ ।
"लघ्वान् पञ्च विदुः काष्ठां लघुता दश पञ्च च ।
लघूनि वै समाम्नाता दश पञ्च च नाडिकाः ॥"
पुं, प्राणायामविशेषः । यथा, मार्कण्डेये । ३९ । १३—१४ ।
"लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिस्तु मात्राभिरुत्तम
लघुः, स्त्री, पृक्का नाम
घे, ५ ॥ (तथास्याः

"भृङ्गारास्ताम्रजा देवी मरुमाला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

लघुः, त्रि, (लङ्घ + कुः । नलोपश्च ।) अगुरुः । (यथा,—
"तृणादपि लघुस्तूलस्तूलादपि च भिक्षुकः ।
न नीतो वायुना कस्मादर्थिप्रार्थनशङ्कया ॥"
उद्भटः ॥)
मनोज्ञः । (इष्टः । इत्यमरः ॥ यथा, रघुः । ११ । १२ ।
"तामसौ कमलशोभिनां तथा
शातिगाश्च न परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः
प्रीतिमापुरुभयोस्तपस्विनः ॥")
निःसारः । इति मेदिनी । घे, ५ ॥ (यथा, रघुः । १२ । ६६ ।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥")
ह्रस्वः । इति हेमचन्द्रः ॥ * ॥ व्याकरणोक्त-लघुसंज्ञा यथा । ह्रस्वो लघुः दीर्घो गुरुरित्यु-च्चारणप्रयत्नादयमिति । तथा संयोगे सति ह्रस्वो-ऽपि गुरुर्भवतीऽनुबन्ध इति वर्णनाथ । इति दुर्गसिंहकृतकलापवृत्तिः ॥ * ॥ छन्दःशास्त्रोक्तं लघुलक्षणं यथा,—
"मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥
गुरुरेको गकारस्तु लकारो लघुरेककः ॥"
इति छन्दोमञ्जरी ॥

लघुकायः, पुं, (लघुः कायो यस्य ।) छागः । इति त्रिकाण्डशेषः ॥ क्षुद्रशरीरञ्च ॥

लघुकाश्मर्य्यः, पुं, (लघुः काश्मर्य्यः ।) कट्फल-वृक्षः । इति राजनिर्घण्टः ॥

लघुखट्टिका, स्त्री, (लघुः खट्टिका ।) क्षुद्रखट्टा । तत्पर्य्यायः । आसन्दी २ । इति हारा-वली । २०८ ॥

लघुगः, पुं, (लघुर्गः ।) वायुरित्युच्यतेऽस्मिन् नच-त्रादि । यथा,—
"उमः पूर्व्वमथानला गुरवयश्चोत्तरादि लघु-
मीनादिश्चरयिरं चरमश्चः पुष्यादिचहस्ता लघुः ॥"
इति दीपिका ॥

लघुगर्भः, पुं, (लघुर्गर्भं हर ।) त्रिकण्टकमत्स्यः । इति हारावली । १६० ॥

लघुचिर्भिटा, स्त्री, (लघुचिर्भिटा ।) क्षेत्रजात । इति राजनिर्घण्टः ॥

लघुचन्दन, पुं, नागरमुस्ती । इति त्रिकाण्ड-शेषः ॥

लघुदन्ती, स्त्री, (लघुः क्षुद्रा दन्ती ।) क्षुद्रदन्ती-..। यथा,—
"लघ्वी दन्ती विशल्या च स्यादुडम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।
वराहाङ्गी च कथिता निकुम्भश्च मकूलकः ॥"
अस्या गुणाः ।
"दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ।
गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहनुत् ॥
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"क्षुद्रदन्तीफलन्तु स्यान्मधुरं रसपाकयोः ।
शीतलं स्तम्भविध्वंसं गलशोथकफापहम् ॥"
इति भावप्रकाशः ॥

लघुदुन्दुभिः, पुं, (लघुर्दुन्दुभिः ।) डमरुवाद्यम् । इति शब्दरत्नावली ॥

लघुद्राक्षा, स्त्री, (लघुः क्षुद्रा द्राक्षा ।) काकली-द्राक्षा । इति राजनिर्घण्टः ॥

लघुनाम, [न्] क्ली, (लघु लघुवर्णयुक्तं नाम यस्य ।) अगुरु । इति शब्दचन्द्रिका ॥

लघुपञ्चमूलं, क्ली, (लघु क्षुद्रं पञ्चमूलम् ।) क्षुद्र-पञ्चमूलपाचनम् । तत्तु शालपर्णीपृश्निपर्णी-बृहतीकण्टकारीगोक्षुरसंयुक्तम् । यथा,—
"शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका ।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥"
अस्य गुणाः ।
"पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥"
इति भावप्रकाशः ॥

लघुपत्रकः, पुं, (लघूनि पत्राणि यस्य । कप् ।) रोचनी । गुलारोचनी इति ख्यातः । इति शब्दचन्द्रिका ॥

लघुपत्री, स्त्री, (लघूनि पत्राणि यस्याः । ङीष् ।) अश्वत्थोऽयम् । इति राजनिर्घण्टः ॥

लघुपिच्छिलः, पुं, (लघुः पिच्छिलः ।) भूकर्बु-दारकः । इति राजनिर्घण्टः ॥

लघुपुष्पः, पुं, (लघूनि क्षुद्राणि पुष्पाणि यस्य ।) भूमिकदम्बः । इति राजनिर्घण्टः ॥ (भूमि-कदम्बशब्देऽस्य विशेषो ज्ञेयः ॥)

लघुबदरः, पुं, (लघुः क्षुद्रो बदरः ।) क्षुद्रकोलिः । तत्पर्य्यायः । सूक्ष्मपत्रः २ बहुकरः ३ सूक्ष्म-पत्रः ४ ह्रस्वाङ्गः ५ मधुरः ६ दरहारः ७ शिखिप्रियः ८ । इति राजनिर्घण्टः ॥ अस्य फलगुणाः ।
"कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं कथितं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भिन्नविष्टम्भि सर्व्वं लघु तृष्णाक्लमा-स्रजित् ॥"
इति भावप्रकाशः ॥
अस्य पक्वफलगुणाः । मधुराम्लत्वम् । कफवात-नाशित्वम् । रुच्यत्वम् । स्निग्धत्वम् । वह्निकारक-त्वम् । ईषत्पित्तातिदाहशोषकत्वञ्च । इति राजनिर्घण्टः ॥

लघुबदरी, स्त्री, (लघुः क्षुद्रा बद-
दरी । इति राजनिर्घण्टः ॥

लघुब्राह्मी, स्त्री, (लघुः क्षुद्रा ब्राह्मी
ब्राह्मी । तत्पर्य्यायः । जलोद्भवा २
इति राजनिर्घण्टः ॥

लघुमत्स्यः, पुं, (लघुः क्षुद्रो मत्स्यः
मत्स्यः । इति राजनिर्घण्टः ॥

लघुमांसः, पुं, (लघु स्वल्पं मांसं यस्य
पक्षी । इति त्रिकाण्डशेषः ॥

लघुमांसी, स्त्री, गन्धमांसी । इति ..

लघुमयं, क्ली, (लघु शीघ्रं लीयते ।
अच् ।) वीरणमूलम् । इत्यमरः ।

लघुबदापत्रा, स्त्री, (बदरा बद
लघुः बदापत्रा ।) लघूदुम्बरिका
राजनिर्घण्टः ॥

लघुहस्तः, पुं, (लघुः ।
शीघ्रवेधी । इति हेमचन्द्रः ।
(वाच्यलिङ्गोऽपि । यथा,
४२ । १३३ ।
"स राजपुत्रस्त्विव रणमण्डल
भूयः खड्गप्रहारेण लघुहस्तो
यथा च ।
"तस्याधिगतशास्त्रार्थो
लघुहस्तः शुचिः शूरः सर्व्वोपस्क
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी वि
सत्यधर्म्मपरो यश्च स भिषक् पाद
इति सुश्रुते सूत्रस्थाने ३४

लघुहेमदुग्धा, स्त्री, (लघुर्हेमदुग्धा
रिका । इति राजनिर्घण्टः ॥

लघूदुम्बरिका, स्त्री, (लघुः क्षुद्रा
क्षुद्रोदुम्बरिका । छोट डुमर
तत्पर्य्यायः । लघुपत्रफला २
लघुबदापत्रा ४ लघ्वादुम्बरा
वीर्य्यविपाकेषु उडुम्बरात्
इति राजनिर्घण्टः ॥

लघ्वी, स्त्री, (लघु + ङीष् ।)
(यथा,—
"गुर्व्वीं त्रिभिरर्धौ लघ्वीं वै
शकुनामाशु जीर्य्यति मदुपादनं
इति वैद्यकचक्रपाणिसंग्रहेऽतीव
स्यन्दनभेदः । इति मेदिनी । वे
इति राजनिर्घण्टः ॥

लङ्का, स्त्री, (रमन्तेऽस्यामिति ।
लकारात् कः । रस्य लत्वम् । इ
४० ।) रक्षःपुरी । (यथा, मे
"ततो न लङ्घयते मरो
नान्यत्र कुत्रापि च यामि
ज्योतिःशास्त्रमते सा च पृथि
तिष्ठति । लङ्कोदयात् चरलक्ष
प्रमाणं भवति । यथा,—
"लङ्का कुमध्ये यमकोटिरा
प्राक् पश्चिमे रोमकप

... विद्रुतं सुवेलः
... वनराजम् ।
... लाभि
... बहुजीवविरो वदन्ति ।"

... च ।

...दिदेशाम्
... श्रृङ्गम्
...पुर्वे ...दिशा वा मध्यरेखा भुवः ।
... बाहुरयोऽवन्ति विषये ययाहि रैखो-
... दयात्
... क्रियते नरनाथसुतं सैटेल्यवं ...
... पलम् ।"

इति सिद्धान्तशिरोमणिः ॥ * ॥

... लङ्कापुरीवर्णनम् ।

... उवाच ।

... दक्षिणार्णवतीरस्थाम् ।
... तीरे त्रिकूटो नाम पर्वतः ।
... तस्य शैलस्य मध्यमम्बुधिसन्निधौ ।
... दृश्यायां टङ्कच्छिन्नां चतुर्दिशम् ।
... मनुजाः पूर्वं प्रयत्नात् बहुसमरैः ।
... तत्र दुर्धर्षाः सुखं राक्षसपुङ्गवाः ।
... अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥
... समासाद्य प्रमुदा ... ।
... भविष्यन्ति राक्षसैर्बहुभिर्वृताः ।"

... उत्तरखण्डे कपिलदर्शनमामाध्यायः ॥ * ॥

... । शाकिनी । कुलटा । इति मेदिनी । के,
... शाकविशेषः । तत्पर्य्यायः । कराकि-
... २ शाकिका ३ कलम्बालिका ४ । अस्या
... । वत्सम् । हिमत्वम् । शौलत्वम् ।
... त्वम् । वातकारित्वम् । गुरुत्वञ्च ।
... राजनिर्घण्टः ॥

... ,[न्] पुं, (लङ्कां दहति तच्छीलः ।
... + णिनिः ।) हनूमान् । इति शब्दरत्ना-
... ॥

...पतिः, पुं, (लङ्काया अधिपतिः ।)
... । इति जटाधरभूरिप्रयोगौ ॥ (यथा,
... । ६ । ६२ ।

"पुरा जनस्थानविमर्द्दशङ्की
सन्धाय लङ्काधिपतिः प्रतस्थे ।")

...पतिः, पुं, (लङ्कायाः पतिः ।) रावणः ।
... भूरिप्रयोगः ॥

...िका }
...िका } स्त्री, एला । इति शब्दरत्ना-
...िका } वली । पिड्‌शाक इति भाषा ।

...स्थायी, [न्] पुं, (लङ्कावत् तिष्ठतीति । स्था
+ णिनिः ।) दृक्षविशेषः । लङ्कासिज इति
भाषा । यथा,—
"लङ्कास्थायी रावणघ्नो भद्रचूडो विशायकः ।"
इति शब्दचन्द्रिका ॥
(लङ्कायां तिष्ठतीति ।) लङ्कावासिनि, त्रि ॥

...शः, पुं, (लङ्काया ईशः पतिः ।) रावणः ।
इति त्रिकाण्डशेषः ॥

लङ्कोयिका, स्त्री, एला । इति शब्दरत्नावली ।
लङ्कोयिका, स्त्री, एला । इति शब्दरत्नावली ॥
लङ्गः, पुं, (लङ्गतीति । लङ्ग गतौ + अच् ।)
मङ्गः । विङ्गः । इति मेदिनी । गे, २१ ॥ नां
इति भाषा ॥
लङ्गूलं, क्ली, लाङ्गूलम् । इत्युणादिकोषः ॥
लङ्घनं, क्ली, (लङ्घ + ल्युट् ।) उपवासः । (यथा,
सुश्रुते । १ । ४६ ।
"तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् ।
विदग्धे स्वेदनं पथ्यं रसशेषे शयीत च ।"
यथा च ।
"लङ्घनं छेदनं काले कल्यवं चेदनक्रिया ।
स्वेदनं स्तम्भनञ्चैव जानीते यः स वै भिषक् ।"
"यदग्निवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ।"
"लघूष्णतीक्ष्णविशदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ।"
"——————पिपासा मारुतातपौ ।
पाचनान्युपवासाश्च व्यायामश्चेति लङ्घनम् ।"
"प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ।
दृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ।"
"त्वग्दोषिणां प्रमीढानां स्निग्धाभिष्यन्दिबृंहि-
णाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ।"
इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥
"ज्वरे लङ्घनमेवादावुपदिष्टमृते ज्वरात् ।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ॥
आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधा-
पयन् ।
विदधाति ज्वरं दोषस्तदा लङ्घनमाचरेत् ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥
प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
तत् मारुतक्षुत्तृष्णामुखशोषभ्रमान्विते ।
कार्य्यं न बाले वृद्धे वा न गर्भिण्यां न दुर्ब्बले ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्रा क्लमे गते ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ॥
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥
पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ।"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
क्रमणम् । (यथा, कुमारे । ५ । ६४ ।
"यथा श्रुतं वेदविदांवर त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ।")
प्लवनम् । इति मेदिनी । ने, १२० ॥ अग्नि-
लङ्घननिषेधो यथा,—

"न चाग्निं लङ्घयेद्धीमान्नोपदध्यादधः क्वचित् ।
न चैनं पादतः कुर्य्यात् मुखेन न धमेद्बुधः ।"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
(अतिक्रमः । यथा, महाभारते । १ । १५८ ।
३६ ।
"न चाप्यधर्म्मः कल्याण बहुपत्नीकता नृणाम् ।
स्त्रीणामधर्म्मः सुमहान् भर्त्तुः पूर्ब्बस्य लङ्घने ।")
अनादृतीकृतिः । यथा,—
"श्रुतस्य लङ्घनं पश्चिमगगनसुधाकरम् ।"
इति हेमचन्द्रः ॥ * ॥
(स्त्री, अवमानना । यथा, मार्कण्डेये ।
१३५ । ३३ ।
"अस्यापि सर्व्वभूतस्य लङ्घना क्रियते स्त्रिया ।
तां मातं क्षत्रियः सोढुं किं पुनः पितृमार-
कम् ।")
लछ, लक्ष्मणि । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) लछति द्रव्यं चक्रेण लोपः ।
इति दुर्गादासः ॥
लज, भर्त्से । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट् ।) लजति । इति दुर्गादासः ॥
लज, इ भर्त्से । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) इ, लञ्जति । इति दुर्गादासः ॥
लज, इ क भासार्थे । इति कविकल्पद्रुमः ॥
(चुरा०-पर०-अक०-सक०च-सेट् ।) इ क,
लञ्जयति । भा दीप्तिः यद्वार्थौ निकेतनहिंसा-
बलदानानि । इति दुर्गादासः ॥
लज, क अपवार्ते । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-सक०-सेट् ।) अन्तर्हिराच्छादनम् । क,
लाजयति चन्द्रं मेघः । इति दुर्गादासः ॥
लज, ङ व्रीडे । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-अक०-सेट् ।) ङ, लजते । निष्ठायां
लग्न इत्यन्ये । इति दुर्गादासः ॥
लज, त क भासने । इति कविकल्पद्रुमः ॥ (अदन्त
चुरा०-पर०-अक०-सेट् ।) क, लजयति ।
भासनं दीप्तिः । इति दुर्गादासः ॥
लजकारिका, स्त्री, (लजं लज्जां करोतीव ।
कृ + ण्वुल् । टापि अत इत्वम् ।) लज्जालुलता ।
इति शब्दमाला ॥
लज्जा, स्त्री, (लज्जनमिति । लस्ज व्रीडने +
"गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः ।
टाप् ।) अन्तःकरणवृत्तिविशेषः । इति
नागोजीभट्टः ॥ अकार्य्ये कर्म्मणि परज्ञान-
भयम् । लाज् इति भाषा । तत्पर्य्यायः ।
मन्दाक्षम् २ ह्रीः ३ त्रपा ४ व्रीडा ५ । मा
अप्यतश्चेत् अपत्रपा ६ । इत्यमरः ॥ मन्दा-
स्यम् ७ लज्या ८ व्रीडः ९ व्रीडनम् १० । इति
शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।
"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः ।")
लज्जालुः । इति राजनिर्घण्टः ॥

लज्जालुः, पुं, स्त्री, (लज्जैवास्त्यस्याः इति आलुः ।) [illegible]। रक्तपादी २ शमीपत्रा ३ स्पृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गा ७ नमस्कारी ८ प्रसारिणी ९ खदिरी १० गण्डकारी ११ शतमूलिका १२ [illegible] १३ [illegible] १४ [illegible] १५ [illegible] १६ रक्तमूला १७ ताम्रमूला १८ [illegible] १९ [illegible] २० । इति राजनिर्घण्टः ॥ महाभीता २१ [illegible] २२ [illegible] २३ । इति शब्दचन्द्रिका । अस्या गुणाः । कटुत्वम् । शीतत्वम् । पित्तातिसार-शोथदाहश्रमश्वासव्रणकुष्ठकफास्रनाशित्वञ्च । [illegible] यथा,—

"[illegible]
[illegible] ।
[illegible] ।
[illegible] ।"
इति राजनिर्घण्टः ॥

[illegible]

लट, बाल्योक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सक० च-सेट् ।) बालोऽयं तस्य भावो बाल्यं यावत् इति यावत् । लटति लोकः शिशुः स्यात् । किञ्चिद्वदति वेत्यर्थः । इति दुर्गादासः ॥

लटः, पुं, (लटति यदृच्छया वदतीति । लट+अच् ।) प्रमादवचनम् । दोषः । इति विश्वः ॥

लटकः, पुं, (लटतीति । लट्+"कुन् शिल्पि-संज्ञयोरपूर्व्वस्यापि ।" उणा० २ । ३२ । इति कुन् ।) दुर्ज्जनः । इत्युणादिकोषः ॥

लटपर्णं, क्ली, (लटतुल्यं पर्णमस्य ।) त्वचम् । इति राजनिर्घण्टः ॥

लट्टः, पुं, दुर्ज्जनः । इति शब्दरत्नावली ॥

लट्वः, पुं, (लटतीति । लट+"अशूप्रुषिलटीति ।" उणा० १ । १५१ । इति क्वन् ।) जातिविशेषः । नेडुया इति भाषा । रागभेदः । तुरङ्गमः । इत्युणादिकोषः ॥

लट्वा, स्त्री, (लट्+क्वन् । टाप् ।) करञ्जभेदः । नाटाकरञ्जा इति भाषा । वाद्यभेदः । पक्षिविशेषः । भामचटक इति ख्यातः । इति मेदिनी । वे, २२ । कुसुम्भम् । इति हेमचन्द्रः ॥ भ्रमरकः । भोमरो इति ख्यातः । इत्यमरभरतौ । (शिखी । इति हारावली । २५६ । गुलिका । द्यूतम् । यथा,—

"लट्वा तु गुलिका ख्याता लट्वा द्यूतेऽपि दृश्यते ।"

इति व्याडिरभसौ ।" इति उणादिवृत्तौ उज्ज्वलः । १ । १५१ ।)

लड, विलासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) लडति बाला । इति दुर्गादासः ॥

लड, र कि भाषणे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) र, लडयति । कि, लाडयति लडति । भाषणं कथनम् । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

लड, ओ र कि उपसेवायाम् । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) ओ, [illegible] । [illegible] । [illegible] । र, लडयति । कि, लाडयति लडति [illegible] । इति दुर्गादासः ॥

लड, [illegible] । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) [illegible] । इति दुर्गादासः ॥

लड, [illegible] । इति कविकल्पद्रुमः ॥ (चुरा०-[illegible]-सेट् ।) [illegible] । इति दुर्गादासः ।

लड, तु क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) [illegible] लाडनं । इति दुर्गादासः ।

लड, म उन्मन्थनजिह्वयोः । इति [illegible] (भ्वा०-पर०-अक०-सक०-[illegible] सेट् ।) उन्मन्थनं पीडनमेव [illegible] भावश्च । लडति लता [illegible] जिह्वा वा स्वादिष्यर्थः । [illegible] लडति जिह्वा शब्दयतीत्यर्थः [illegible] लडयति । लडयति श्रीहर्षः । पीडयतीत्यर्थः । [illegible] क्षिपतीत्यर्थः । उभयत्र [illegible] केचित्तु जिह्वोन्मथने इति [illegible] उन्मन्थनं उत्क्षेपणमिति [illegible] जिह्वा धर्मे इत्येवोदाहरन्ति । [illegible] दासः ॥

लड्वः, त्रि, मनोज्ञः । इति त्रिकाण्डशेषः ।

लड्डः, त्रि, दुर्ज्जनः । इति शब्दरत्नावली ।

लड्डुकः, पुं, पिष्टकविशेषः । [illegible] यथा । लड्डुको दुर्ल्लभो गुरुः । [illegible] वल्लभः । अपि च ।

"तैलेन हविषा पक्व [illegible]"

लण्डं, क्ली, (लड्यते उत्क्षिप्यते इति [illegible] घञ् ।) पुरीषम् । ख्याक इति भाषा ।

"समेधमानेन स लण्डवायुना
निरुद्धवायुश्चरणेन निःसृतः ।
प्रस्विन्नगात्रः परिवृत्तलोचनः
पपात लण्डं विसृजन् क्षितौ [illegible]"

इति श्रीभागवते १० स्कन्धे [illegible] च टीका । लण्डं पुरीषमुत्सृजन् [illegible] इत्युक्तं श्रीधरस्वामी ॥

लण्डनः, त्रि, (लण्डं नराणां [illegible] जन्+डः ।) [illegible]

"पूर्व्वाभाषि [illegible]
विरुद्धभावया [illegible]
अधिया [illegible]
इत्येवं [illegible]"
इति [illegible]

[illegible] राजधानी च ।

लत, [illegible] । इति [illegible] (भ्वा०-पर०-सक०-सेट् ।) [illegible] दासः ॥

लता, स्त्री, (लतति वेष्टयतीति [illegible] अच् । टाप् ।) [illegible] । [illegible] । [illegible] । इत्यमरः ॥ [illegible]

...
...कलिकावीतरागे पूर्व्वं विशन्ति षट्पदाः
...शीतमृदु वसन्ति कुसुमार्कं ततः क्रमात् ।
...ति शीतलो वसु शीतलस्यांशु विभाकरे ।
...वानरेन्द्रं ... न विन्दति ॥"
...विष्णुपुराणे ७ अंशे १७ अध्यायः ॥ ॥
...दीर्घलीला सभद्रा लतादिर्यथा,—
...कुष्माण्डकं मायाकुष सुकासकः ।
...कर्कटी चापि शिशिरे मङ्गलप्रदा ॥
...कः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा ।
...श्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
...ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
...। प्रियङ्गुः । (अस्याः पर्य्यायो यथा,—
...ङ्गुः फलिनी कान्ता लता च महिलाह्वया ।
...गुन्द्रफला श्यामा विष्वक्सेनाङ्गना-
प्रिया ॥"
...भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
...। (अस्याः पर्य्यायः ।
...कस्तूरिका देवी एका लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
...वर्णी । इत्यमरः ॥ ज्योतिष्मती । (अस्याः
...यो यथा,—
...तिष्मती स्यात् कटभी ज्योतिष्का कङ्गणी-
ति च ।
...पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ॥"
...भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
...कस्तूरिका । माधवी । दूर्व्वा । इति मेदिनी ।
...११-५० ॥ कैवर्त्तिका । सारिवा । इति राज-
...ण्टः ॥ (हृहती । तत्पर्य्यायो यथा,—
...क्षुद्रा हृहती सिंही वार्त्ताकी राष्ट्रिका-
कुली ।
...दुःस्पर्शा रक्तपाका च लता हृहतिका परा ॥")
...री । यथा,—
...कां परवतां पश्चम् अयुतं यस्तु साधकः ।
...वेत् स भवेत् शीघ्रं विद्याया वल्लभः स्वयम् ॥"
इति तन्त्रसारे श्यामासाधनम् ॥
...च नैषधे । १ । ८५ ।
"नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"
...नवीना लता माधवीलता पक्षे नवा
...लता स्त्री ।" इति तट्टीका ॥ ॥ अप्सरो-
...षः । यथा, महाभारते । १ । २१७ । २० ।
...च सौरभेयी च समीची बुद्बुदा लता ।
...निश्चयेन तं विप्रमभ्यगच्छाम भारत ! ॥")
...करञ्जः, पुं, (लतारूपः करञ्जः ।) करञ्ज-
...विशेषः । कण्टकरेज इति हिन्दी भाषा ।
...पर्य्यायः । दुःस्पर्शः २ वीराख्यः ३ वज्र-
...बीजकः ४ धनदाक्षी ५ कण्टफलः ६ कुबे-
...राक्षी ७ । अस्य गुणाः । कटुत्वम् ।
...उष्णत्वम् । कफवातनाशित्वञ्च । तद्बीजगुणाः ।

दीपनत्वम् । पथ्यत्वम् । शूलगुल्मविषापहत्वञ्च ।
इति राजनिर्घण्टः ॥
लताकस्तूरिका, स्त्री, (लतारूपा कस्तूरी तद्-
गन्धत्वात् । ततः स्वार्थे कन् ।) लताकस्तूरी ।
तत्पर्य्यायः । कटुः २ हृतिमदंशजा ३ । अस्या
गुणाः । तिक्तत्वम् । स्वादुत्वम् । वृष्यत्वम् ।
हिमत्वम् । लघुत्वम् । चक्षुष्यत्वम् । छेदित्वम् ।
श्लेष्मतृष्णावस्त्यास्यरोगनाशित्वञ्च । इति पथ्या-
पथ्यविवेकः ॥ अपि च ।
"लताकस्तूरिका तिक्ता स्वाद्वी शीतास्य-
रोगनुत् ॥"
इति राजवल्लभः ॥
लताजिह्वः, पुं, (लतेव जिह्वा यस्य ।) सर्पः ।
इति शब्दमाला ॥
लतातरुः, पुं, (लतेव दीर्घस्तरुः ।) नारङ्गवृक्षः ।
तालवृक्षः । इति शब्दमाला ॥ शालवृक्षः ।
इति त्रिकाण्डशेषः ॥
लताद्रुमः, (लतेव द्रुमः दीर्घत्वात् ।) लताशालः ।
तत्पर्य्यायः । सार्जः २ अश्वकर्णः ३ कुशिकः ४
वंशः ५ दीर्घः ६ । इति रत्नमाला ॥
लतापनसः, पुं, (लतायां पनसमिव फलमस्य ।)
फललताविशेषः । तरमुज इति ख्यातः ।
तत्पर्य्यायः । चैलालः २ चित्रफलः ३ सुखाशः ४
राजतिमिशः ५ शाटाम्रः ६ सेतुः ७ । इति
त्रिकाण्डशेषः ॥
लताप्रका, स्त्री, (लताप्रधाना एला ।) समु-
द्रान्ता । इति शब्दरत्नावली ॥ पिडिंशाक
इति भाषा ॥
लताप्रतानिनी, स्त्री, (लताप्रतानोऽस्यस्येति ।
इनिः ।) शाखाप्रचयवती लता । तत्पर्य्यायः ।
वीरुत् २ गुल्मिनी ३ उलपः ४ । इत्यमर-
भरतौ ॥ वीरुधा ५ वरुत् ६ । इति शब्दरत्ना-
वली ॥ प्रताना ७ कक्षः ८ । इति जटाधरः ॥
लताफलं, क्ली, (लतायां फलमस्य ।) पटोलः ।
यथा,—
"वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
लताभद्रा, स्त्री, (लतया भद्रा यस्याः ।) भद्रालो-
ड्वः । इति शब्दमाला ॥
लतामणिः, पुं, (लतासदृशो मणिः ।) प्रवालः ।
इति त्रिकाण्डशेषः राजनिर्घण्टश्च ॥ (प्रवाल-
शब्देऽस्य विवरणं ज्ञातव्यम् ॥)
लतामरुत्, स्त्री, (लतायां मरुत् यस्याः ।) एला ।
इति शब्दरत्नावली ॥
लतामाधवी, स्त्री, (लताप्रधाना माधवी ।)
माधवीलता । इति शब्दरत्नावली ॥
लतायष्टिः, स्त्री, (लता यष्टिरिव ।) मञ्जिष्ठा ।
इति शब्दमाला ॥
लतायावकं, क्ली, (लतायां याव इव यस्य । कन् ।)
प्रवालम् । इति हारावली । ८१ ॥ (गुणादयो-
ऽस्य प्रवालशब्दे ज्ञेयाः ॥)

लतारसनः, पुं, (लतेव रसना यस्य ।) सर्पः ।
इति हारावली । १५ ॥
लतार्कः, पुं, (लता अर्क इव तीव्रा यस्य ।)
हरित्पलाण्डुः । तत्पर्य्यायः । दुद्रुमः २ ।
इत्यमरः ॥
लतालकः, पुं, हस्ती । इति त्रिकाण्डशेषः ॥
लतावेष्टः, पुं, (लतयेव आवेष्टो वेष्टनं यत्र ।)
स्त्रीपुरुषयोः रतिबन्धान्तर्गततृतीयबन्धः । यथा,—
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत् ।
लघुलिङ्गताडनं योनौ लतावेष्टोऽयमुच्यते ॥"
इति रतिमञ्जरी ॥ ॥
पर्व्वतविशेषः । यथा,—
"अन्वेव निवर्त्त्य परान् याद्रिस्वान् तदा ।
अभ्यन्तरञ्च मार्गञ्च वाह्यञ्च समन्ततः ॥
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम् ।
ऋक्षवन्तं गिरिञ्चैव मार्गञ्च त्वरिता ययुः ॥"
इति हरिवंशे बाणयुद्धम् ॥
(पर्व्वतोऽयं द्वारकाया दक्षिणस्यां दिशि
स्थितः । यथा, तत्रैव । १५५ । १६ ।
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः ॥")
लतावेष्टितकं, क्ली, (लतयेव वेष्टितं वेष्टनं यत्र ।
कन् ।) आलिङ्गनभेदः । यथा, शब्दमालायाम् ।
"उद्घृष्टकं पीडितकं लतावेष्टितकं तथा ॥"
लताशङ्कः, पुं, शालवृक्षः । इति शब्दरत्नावली ॥
लतासाधनं, क्ली, (लतया स्त्रिया साधनम् ।)
योषिदधिकरणकेष्टदेवताराधनम् । तद्यथा,—
"लतायाः साधनं वक्ष्ये प्रत्यक्षं हरवल्लभे ।
शतं केशे शतं भाले शतं सिन्दूरमण्डले ॥
स्तनद्वन्द्वे शतद्वन्द्वं शतं नाभौ महेश्वरि ।
शतं योनौ महेशानि उत्थाय च शतत्रयम् ॥
एवं दशशतं जप्त्वा सर्व्वसिद्धीश्वरो भवेत् ।
अथान्यत् संप्रवक्ष्यामि साधनं भुवि दुर्लभम् ॥
रजोऽवस्थां समानीय तद्योनौ स्वेष्टदेवताम् ।
पूजयित्वा महाराज्ञी त्रिदिनं पूजयेत्ततः ॥
शतत्रयञ्च षट्त्रिंशदधिकं प्रत्यहं जपन् ।
अष्टोत्तरशतं पूर्व्वं चक्रवक्त्रे जपेद्बुधः ॥
ततस्तां नवभिः पुष्पैर्यजेदष्टोत्तरं शतम् ।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम् ॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः ।
षोडशाहेन च भवेत् सत्यं सत्यं न संशयः ॥"
इति मायातन्त्रे १२ पटलः ॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे
४ पटले च द्रष्टव्यम् ॥
लतिका, स्त्री, लता । इति लताशब्दात् स्वार्थे
कन्प्रत्ययेन स्त्रिकप्रत्ययेन वा निष्पन्नम् ॥
(यथा,—
"इयं सन्ध्या दूरादहमुपगतो हन्त मलयात्
तदेकां तद्गेहे विनयवति ! नेष्यामि रजनीम् ।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धुवाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)

लतिका, स्त्री, (लत घाते+"क्षतिभिदिलतिभ्यः क्तिन ।" उणा० ३ । १४७ । इति तिकन् ।) गोधा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लप, ऋ भाषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अलीलपत् अललापत् । भाषः कथनम् । इति दुर्गादासः ॥

लपनं, क्ली, (लप्यतेऽनेनेति । लप्+करणे ल्युट् ।) मुखम् । इत्यमरः ॥ (भावे ल्युट् ।) भाषणम् । इति लपधात्वर्थदर्शनात् ॥ (यथा, आर्य्यासप्तशत्याम् । ३८१ ।

"प्रकटयति रागमधिकं लपनमिदं वक्तिमाण-
मावहति ।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयि-
तस्य ॥"

"शुकस्येव दयितस्य लपनं सम्भाषणम् । पक्षे वदनम् ।" इति सट्टीका ॥)

लपितं, क्ली, (लप्+क्तः भावे ।) वचनम् । कथिते, त्रि । इत्यमरः ॥ (लपितमस्यास्तीति । अच् । वचनयुक्ते च त्रि । यथा, अथर्व्ववेदे । ४।३६।६।

"ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव । तानहं मन्ये दुर्हितां जने अल्पशयूनिव ।")

लप्सिका, स्त्री, खाद्यविशेषः । लप्सी । इति भाषा । यथा,—

"समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् ।
तस्मिन् घनीकृते न्यस्येत् लवङ्गमरिचादिकम् ।
सिद्धैषा लप्सिका ख्याता गुणानस्या वदा-
म्यहम् ॥
लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा ।
स्निग्धा श्लेष्मकरी गुर्व्वी रोचनी तर्पणी
परम् ॥"

इति भावप्रकाशः ॥

लबि, इ ङ संसने । शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अवलम्बने सक०-शब्दे अक०-सेट् ।) इ, लम्ब्यते । ङ, लम्बते । संसनमिहावलम्बनमिति गोविन्दभट्टः । ननाद चण्डायुधस्तदपि भौममालम्बते । इति दुर्गादासः ॥

लब्धः, त्रि, (लभ्+क्तः ।) प्राप्तः । इत्यमरः ॥ (यथा, हितोपदेशे ।

"अलब्धञ्चैव लिप्सेत लब्धं रक्षेदपक्षयात् ।
रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत् ॥")

लब्धवर्णः, पुं, (लब्धो वर्णो यशांसि येन ।) पण्डितः । इत्यमरः ॥ (यथा, रघुः । ११ । २ ।

"कृतकृत्यमपि लब्धवर्णभाक्
तं दिदेश मुनये सलक्ष्मणम् ॥")

लब्धा, स्त्री, (लभ्+क्तः । टाप् ।) नायिकाभेदः । यथा,—

"अविनीतोऽविनीता लब्धा तथा प्रोषितभर्तृका ।
वचसाल्पहिता वासकज्जा स्वाधीनभर्तृका ॥"

इति जटाधरः ॥

लभ, इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, लम्भ्यते । ङ, लभते । इति दुर्गादासः ॥

लभ, डु ओ ङ ष प्राप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) डु, लब्धिमम् । ओ, लब्धा । ङ, लभते । ष, लभा । लभन्ति पुनरस्यामिति गयकृतानित्यत्वादिति रमानाथः । वस्तुतस्तु लभते लभः पचादित्वादच् ततो लभ इवाचरतीति क्वौ साध्यम् । इति दुर्गादासः ॥

लभसः, पुं, (लभ्+"अत्यविचमीति ।" उणा० ३ । ११७ । इति असच् ।) वाजिबन्धनरज्जुः । इत्युणादिकोषः ॥ धनम् । याचकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लभ्यं, त्रि, (लभ्यते इति । लभ्+पोरदुपधात् ।" ३ । १ । ९८ । इति यत् ।) न्याय्यम् । इत्यमरः ॥ लब्धव्यम् । इति मेदिनी । ये, ४३ ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

लमकः, पुं, (रमते इति । रम्+"रमेरश्च लो वा ।" उणा० २ । ३३ । इति क्वुन् रस्य लत्वञ्च ।) षिड्गः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (तीर्थशोधकः । इत्युज्ज्वलः ॥ विलासिनि, त्रि । इति केचित् ॥)

लम्पटः, पु, षिड्गः । इति लम्पाकशब्दार्थे मेदिनी । के, १४९ ॥ (यथा, कथासरित्सागरे । ४७ । १०९ ।

"अघेतराज्ञवीभ्नेर्न यद्यपि स्त्रीषु लम्पटः ।
तथापि न स दुःखेऽस्मिन्नीदृशः स्यात्तथा-
विधः ॥")

आसक्तः । यथा,—

"यथेच्छिकासुक्षिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् कुकलेवरात्ययाद्-
यस्तस्य यत्नः श्रम एव केवलम् ॥"

इति श्रीभागवते ५ स्कन्धे १९ अध्यायः ॥

लम्पाकः, पु, लम्पटः । देशभेदः । इति मेदिनी । के, १४९ ॥ (यथा, मार्कण्डेये । ५७ । ४० ।

"लम्पाकाः शूलकाराश्च चुलिका जागुडैः सह ।
औपधाश्चानिभद्राश्च किरातानाञ्च जातयः ॥")

लम्पाटहः, पुं, पटहवाद्यम् । इति हारावली ॥

लम्फः, पुं, प्लुतगतिः । लाफ इति भाषा । इति प्रसिद्धः ॥ उत्कस्तम्बं प्रलम्फनञ्च ॥

लम्बः, पुं, (लम्बते इति । लबि अवस्रंसने+अच् ।) नर्त्तकः । अङ्गम् । कान्तः । इति संक्षिप्तसारोणादिवृत्तिः । उत्कोचः । यथा,

"प्राभृतं ढौकनं लम्बोत्कोचः कौशलिकामिषे ।
उपाचारः प्रदानम्ब हारो माह्वायने अपि ॥"

इति हेमचन्द्रः ॥

अश्वभेदः । यथा,—

"दरम्भमामा भेदाः पाटकोऽश्वादिचालने ॥"

इति शब्दमाला ॥

न्नित्रादौ लम्बमानरेखा सूत्रं वा । यद्,
"भिन्नेषु भुजयोः . . .

भिन्ना भूलम्बयुता दलितावाधे ...

लम्बगुणं भूम्यर्द्धं स्पष्टं भिन्नस्य फलं ...
उदाहरणम् ।

"क्षेत्रे मही . . .
यत्र त्र्योदशनिविंशतिर्भिन्न ...
तत्रावलम्बकमथो कथयाबाधे
क्षिप्रं तथा च

न्यासः । भूः १४ मुखौ ११ । ...
आबाधे ५ । ९ । लम्बः लम्बः ।
फलञ्च ८४ । इति लीलावती ॥ (
यथा, हरिवंशे । ४६ । २२ ।

"लम्बस्तु लम्बमेघाभः प्रलम्बाम्बरभूषणः
दैत्यवृषगतो भाति सनीहार इवाङ्कुरः
त्रि, दीर्घः । लम्बा इति भाषा । यथा,
"दूरतः शोभते मूर्खो लम्बशाटपटा
तावच्च शोभते मूर्खो यावत् . . .

(लम्बमानः । यथा, रघुः । ११ । ...
"पार्श्वोऽयमंसार्पितलम्बहार
कल्माङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः ॥")

लम्बकर्णः, पु, (लम्बौ कर्णौ यस्य ।) अङ्कोटवृक्षः । इति मेदिनी । ...
छागः । हस्ती । इति शब्दरत्नावली ।
श्येनः । इति राजनिर्घण्टः ॥ (प्रशः
अयं विशेषणेषु तत्र प्रायः स्यात् ।
"लम्बकर्णः शशः शूली लोमकर्णोऽपि
...
इति

लम्बःकर्णः इति कर्म्मधारये ।) ...
तद्युक्ते, त्रि । (यथा, महाभारते ।
३४ ।
"लम्बोदर्य्यो लम्बकर्णास्तथा लम्बपयो

लम्बकेशः, पु, (लम्बः केश इवाभाति ...
विष्टरः । स तु विवाहकाले ...
सार्द्धद्वितयवयामावर्त्तवलिताधोमुखा
दर्भाः । यथा,—
"ऊर्द्ध्वकेशो भवेत् ब्रह्मा लम्बकेशस्तु वि
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु वि

केशोऽश्मापम् । इति प्रायश्चित्तत
माहात्म्ये प्रतिनिद्धन्दर्भस्तु ...
तम् ॥ * ॥ दीर्घकेशयुक्ते, त्रि ।

लम्बदन्ता, स्त्री, (लम्बा दन्ता इव
यस्याः ।) सैंहलीपिप्पली । इति ...
निर्घण्टः । इत्यद्भवन्निर्दिष्टे, त्रि ।

, क्ली, (लम्बते इति । लम्ब+ल्युः ।)
…तिन्दिसनश्चिकादिः । तत्पर्य्यायः । लम-
…का ३ । इत्यमरः । लम्बते लम्बनं कन्धादि-
…रणः । इति नहीशाथी भरतः । (लम्ब+
…ि ल्युट् ।) लम्बनव्यापारोऽपि ।
…:, पुं (लम्बते इति । लम्ब+ल्युः ।) कफः ।
…ति शब्दचन्द्रिका ।
…बीजा, स्त्री, (लम्बानि बीजानि यस्याः ।)
…हलोदिप्पली । इति राजनिर्घण्टः ।
…मानं, त्रि, लम्बायमानवस्तु । लम्बधातोः
…र्त्तरि शानच्प्रत्ययेन निष्पन्नम् ।
…, स्त्री, लक्ष्मीः । गौरी । तिक्ततुम्बी । इति
…दिनी । बे, ९ । कन्यकाविशेषः । यथा,—
…कन्यकां वसु यामीं लम्बां भानुं मरुत्वतीम् ।
…स्वाय गुहूर्त्ताय साध्यां विश्वाय भारत ।
…दं दशपुत्राय दश कन्या ददौ प्रभुः ।”
इति हरिवंशे अधिपतिस्थापनम् ।
…मालयकन्याविशेषः । यथा,—
…तस्मात्तद्वचः श्रुत्वा देवीलम्बामथाब्रवीत् ।
…लम्ब लम्बे शीघ्रं त्वं वाक्संरक्षणं कुरु ।
…ा योगं समाधाय अदृश्या हिमवत्सुता ।
…स्यैकस्य तद्रूपं दर्शयत् पार्श्वमागता ।
…मिट्टाभमुपागम्य यक्षा सा वासमी पुनः ।
…रित्रागाय वाक्यस्य विनयाधिष्ठिता ततः ।
…ुते वासुदेवस्य हिमाद्रेः कीदृशी स्थिता ।”
इति महाभारते हरिवंशे बाणयुद्धम् ।
…का, स्त्री, (लम्बते या । लम्ब+ण्वुल् । टापि
…न इत्वम् ।) तालुमूलस्थजिह्वा । तत्पर्य्यायः ।
…िटिका २ । इति राजनिर्घण्टः । सुधास्रवा ३
…लघुटिका ४ । इति हेमचन्द्रः । घलि-
…ह्वा ५ घलिजिह्विका ६ । इति शब्दरत्ना-
…ली ।
…तः, त्रि, (लम्ब+क्तः ।) संसितः । (यथा,
…गीतगोविन्दे । १२ । १८ ।
…लदरघुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय
लोचने ।”)
…म्बितः । इति लम्बधातोः कर्म्मणि क्तप्रत्ययेन
…निष्पन्नम् । लम्बमानमाल्यादिश्च । (यथा,
…महाभारते । ३ । १५७ । ४२ ।
…वहि शोऽयं त्वया ग्रस्तः कालसूत्रेण लम्बितः ।”)
…दरः, पुं, (लम्बमुदरं यस्य ।) गणेशः ।
…त्यमरः । (यथा, आर्य्यासप्तशत्याम् । १८८ ।
…तगण्डितवरयुवतिः करी कपाली करोतु
मदमलिनौ ।
…स्वयन्धमात्रसिन्धुर लम्बोदर किं मदं वहसि ।”
…पिविशेषः । इति भागवतम् । १२ । १ । २२ ।)
…औदरिके, त्रि । इति हेमचन्द्रः । (यथा,
…कथासरित्सागरे । ७० । १०२ ।
“ततो लम्बोदरेणैत्य पुंसारोपितवाहुकः ।
…ध्यादितः स यातसदनं केशर्योद्गते ।”)
…ोष्ठः पुं, (लम्ब ओष्ठो यस्य । ओत्त्वोष्ठयोः
…समासे वा । इति साधुः ।) उष्ट्रः । इति

राजनिर्घण्टः । लम्बमानौष्ठयुक्ते, त्रि । (चैत्र-
पालदेवनाविशेषः । यथा, प्रयोगसारे चैत्र-
पालप्रकरणे ।
“कुमारौ वालकश्चाथ लम्बोष्ठौ यमवस्तथा ।”)
लम्बौष्ठः, पुं, (लम्ब ओष्ठो यस्य ।) उष्ट्रः । इति
त्रिकाण्डशेषः । दीर्घोष्ठविशिष्टे, त्रि ।
लम्भनं, क्ली, प्रतिलम्भः । इति हेमचन्द्रः । ध्वनिः ।
लभि द शब्दे इत्यस्मात् भावेऽनट् (ल्युट्)
प्रत्ययेन निष्पन्नमिति ।
लम्भा, स्त्री, (लभते इति । लभ इ ड शब्दे +
अच् । टाप् ।) पाटलद्रुमा । इति हारावली ।
लय, ङ गत्याम् । इति कविकल्पद्रुमः । (भ्वा०-
आत्म०-सक०-सेट् ।) ङ, लयते । इति दुर्गादासः ।
लयः, पुं, (ली+अच् ।) विनाशः । संश्लेषः । तौर्य्य-
त्रिकस्य साम्यम् । इति मेदिनी । ये, ५२ । प्रलयः ।
इति शब्दरत्नावली । * । आलम्बनवलम्ब-
नेन चित्तवृत्तिनिद्रा । इति श्रीपरमहंससदानन्द-
योगीन्द्रकृतवेदान्तसारः । तत्राद्यं विघ्नं लक्ष-
यति लयस्तावदिति । लयो द्विविधः । चिरकाल-
सुक्तादष्टसञ्चितनिर्विकल्पकसमाध्यभ्यासपाटवे-
नातितमलोढनलिप्तमलविब्ववत् तैलरहित-
दीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे चित्त-
वृत्तेर्लयः प्रथमः । द्वितीयस्तु मूर्च्छाविष्यावत् आल-
स्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणानादरे
सतिप्रत्यगात्मस्वरूपानवभासनात् वृत्तिस्तब्धीभाव-
लक्षणनिद्रारूपः । इति श्रीनृसिंहसरस्वतीकृत-
सुबोधिन्याख्या तट्टीका । गीतवाद्यपादन्यासानां
क्रियाकालयोः परस्परं समता लयः । लीयन्ते
श्लिष्यन्तेऽनेनेति लयन्ति प्रचलन्ति साम्यं गीता-
दयोऽत्रेति वा लयः । ली ङ य श्लो श्लिषि लय
गत्यां वा अल् । इत्यमरटीकायां भरतः । * ।
लयस्थानविवर्ज्जितं गायकस्य चतुर्द्दशदोषान्त-
र्गतदोषविशेषो यथा,—
“शङ्कितं भीतमुत्क्रुष्टं अव्यक्तमनुनासिकम् ।
काकस्वरः शिरःकम्पी लयस्थानविवर्ज्जितम् ।
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ।
आकुलं तालहीनञ्च गातुर्दोषाश्चतुर्द्दश ।” * ।
अथ लयाः । हृदि स्थितिः कण्ठस्थितिः कपाल-
स्थितिरिति लयत्रयम् । अपरे तु ।
“द्विपदी स्याद्दलतिका भ्रामिका छिन्नखण्डिका ।
वामभुवस्तवन्धिमा खड्गधारा पट्टकः ।
सम्मर्दिका कलतिकः खञ्जकः क्षुरिकस्तथा ।
कथितश्चतुरश्रोऽर्द्धचतुरश्रोऽथ नर्त्तकः ।
भ्रामः पद्मान्दोलनावक्रुष्टा नन्दघटीव्यपि ।
कादम्बस्वर्य्यरी घट्टां मिथोऽर्द्धवनिता ततः ।
अतिचित्रः समयश्च वलितोऽर्द्धदलस्तथा ।
आविद्धस्तु टङ्कवक्रस्तथिचत्रविचित्रकौ ।
आन्वी विकृतधावा च सुकुलोऽथ विलोलकः ।
रमणीयलतश्चैव करकण्टकसंज्ञकः ।
चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः ।
लयेन यस्मी भगवान् लये लीनो जनार्दनः ।”
इति संगीतदामोदरः ।

(त्रि, आवरणात्मकम् । इति श्रीधरस्वामी ।
यथा, भागवते । ११ । ८५ । १५ ।
“यदा लयेदम: मध्यं नमो मठं लयं अङ्गम् ।
कुर्वन् शोकमोहाभ्यां निदया हिंसया भुवा ।”
क्ली, लामज्जकम् । यथा,—
“लामज्जकं सुनालं स्यादमृणालं लयं लघु: ।
इष्टकापथकं सेव्यं नलदश्चावदानकम् ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
लयपुत्री, स्त्री, (लयस्य पुत्रीव ।) नर्त्तकी । इति
शब्दरत्नावली ।
लयारम्भः, पुं, (लयस्यारम्भो यस्मात् ।) नटः ।
इति त्रिकाण्डशेषः ।
लयालम्बः, पुं, (लयमालम्बते इति । लम्ब+अण् ।)
नटः । इति शब्दरत्नावली ।
लर्ब्ब, गतौ । (भ्वा०-पर०-सक०-सेट् ।) लर्ब्बति ।
इति सिद्धान्तकौमुदी ।
लल, ङ क ईप्सायाम् । इति कविकल्पद्रुमः ।
(चुरा०-आत्म०-सक०-सेट् ।) क ङ, लालयते ।
ईप्सा आप्तुमिच्छा । इति दुर्गादासः ।
लल, त क ईप्से । इति कविकल्पद्रुमः । (अदन्त
चुरा०-पर०-सक०-सेट् ।) ईप्सा इति आप-
धातोः सनन्तस्य रूपम् । णिस्थाद् इत्यकारेण
सरूपोऽपि अल् कथं न बाध्यते इति चेन्न
स्त्रीविहितप्रत्ययैः क्वचित् सरूपोऽपि न बाध्यते
इत्यस्य वाच्यत्वात् अन्यथा कार्य्याकारण-
मित्यादयोऽपि न स्युः । एवं वक्ष्यमाणेषु क्रीड़
लज्जे इत्यादिष्वपि बोध्यम् । ललयति धनं
लोकः । इति दुर्गादासः ।
ललज्जिह्वः, पुं, (ललन्ती जिह्वा यस्य ।) उष्ट्रः ।
कुक्कुरः । हिंस्रे, त्रि । इति मेदिनी । वे, १६ ।
(चलद्रसनायुक्ते च त्रि । यथा, कथासरित्-
सागरे । १०६ । १२७ ।
“तावच्च प्रकटीभूय भगवान् भैरवाकृतिः ।
उद्धृतासिर्ललज्जिह्वः कृत्वा हुंकारमभ्यधात् ।”)
ललत्, त्रि, विलासयुक्तः । उन्मत्तविशिष्टः ।
जिह्वाक्रियाविशिष्टः । चेष्टाविशिष्टः । वीप्सा-
विशिष्टः । उपसेवाविशिष्टः । भाषणविशिष्टः ।
ऋतुक्षेपविशिष्टः । इति लडधातोः कर्त्तरि
शतृप्रत्ययेन डस्य लकारादेशेन च निष्पन्नम् ।
ललद्म्बुः, पुं, (ललत् चलदम्बु यत्र ।) लिम्पाकः ।
इति जटाधरः । (विपर्य्ययोऽस्य लिम्पाकशब्दे-
ज्ञेयः ।)
ललनं, क्ली, (लल+ल्युट् ।) केलिः । इति हेम-
चन्द्रः । चालनम् । इति नागोजीभट्टः । यथा,—
“काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ।”
इति देवीमाहात्म्यम् ।
ललनः, पुं, (लल्यते ईप्स्यते इति । लल+कर्म्मणि
ल्युट् ।) वामः । शालः । प्रियालः । इति
राजनिर्घण्टः ।

ललना, स्त्री, (ललयति ईप्सति कामानिति। लल+णिच्+ल्युः। टाप्।) कामिनी। (यथा कुमारसम्भवे। १। १०।
"इति नु मिन ललिन [illegible]
सुहृर्यन्त्र।
[illegible] कुसुम परिमल वासितदेहा बहल्यं-
निला:।")
नारीभेदः। जिह्वा। इति मेदिनी। ने, १२१।
ललनाप्रियं, क्ली, (ललनानां प्रियम्।) ह्रीवेरम्। इति राजनिर्घण्टः।
ललनाप्रियः, पुं, (ललनानां प्रियः।) कदम्बः। इति राजनिर्घण्टः। कामिनीवल्लभश्च।
ललन्तिका, स्त्री, (ललन्तीव। स्वार्थे कन्।) नाभिलम्बमानहारादिः। तत्पर्य्यायः। लम्बनम् २। इत्यमरः। गोधा। इति शब्दमाला।
ललाकः, पुं, मेहनम्। इति शब्दचन्द्रिका।
ललाटं, क्ली, (ललं ईप्सामटतीति प्रापयतीति। अट्+अच्।) अवयवविशेषः। कपाल इति भाषा। तत्पर्य्यायः। अलिकम् २ गोधिः ३। इत्यमरः। भालम् ४ [illegible] ५ भालः ६ [illegible] ७ अलीकम् ८। इति शब्दरत्नावली। [illegible] ९। इति जटाधरः। तस्य शुभाशुभलक्षणम्। यथा,—
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]"
इति [illegible] ४५ अध्यायः।
([illegible])
ललाटकं, क्ली, (ललाटमेव। कन्।) [illegible] इति [illegible]
ललाटन्तप, त्रि, (ललाटं तपतीति। ललाट+तप+[illegible]) [illegible] इति [illegible]
"[illegible]"
[illegible]
"[illegible]
[illegible]

अयो तपस्त्वयरक्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥"
यथा च, नैषधे। १। १३८।
"कथं विधातर्मयि पाणिपङ्कजात्
तव प्रिया शैत्यमृदुत्वशिल्पिनः।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनिष्ठुराक्षरा॥")
ललाटिका, स्त्री, (ललाटे भवोऽलङ्कारः। "कर्ण-ललाटात् कनलङ्कारे।" ४। ३। ६५। इति कन्।) स्वर्णादिरचितललाटाभरणम्। टिका इति ख्याता। तत्पर्य्यायः। पत्रपाश्या २। इत्यमरः। ललाटस्यचन्द्रनम्। तत्पर्य्यायः। प्रहकर्ची २। इति शब्दरत्नावली॥ (तिलकः। इति मल्लिनाथः॥ यथा, कुमारे। ५। ५५।
"तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि॥")
ललाम, [न्] क्ली, ललामम्। यथाह रुद्रः।
"प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु।
भूषावाजिप्रभावेषु ललामं स्यात् ललाम च॥"
(प्रधाने। यथा, रघुः। ५। ६४।
"तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः।"
पुरुषः। इति रघुटीकायां मल्लिनाथधृत-यादवः। ५। ६४।)
ललामं, क्ली, (लड् विलासे+क्विप्। तं अमति प्राप्नोतीति। अम गतौ+अच्। डस्य लत्वम्।) चिह्नम्। ध्वजः। शृङ्गम्। प्रधानम्। भूषा। (यथा, भागवते। ३। १६। ४८।
"पौत्रस्तव श्रीललनाललामं
द्रष्टा स्फुरत्कुण्डलमण्डिताननम्।")
वालधिः। पुण्ड्रम्। तुरङ्गः। प्रभावः। इति मेदिनी। मे ५१। अश्वललाटे अश्वचर्याचिह्नम्। गवादीनां ललाटचिह्नम्। अश्वस्य भूषा। इत्यमरटीकायां भरतः॥ (पुंनपुंसकलिङ्गमपि। यथा,—
"ललामोऽस्त्री ललामापि प्रभावे पुच्छ अश्वे।
श्रेष्ठभूषाध्वजशृङ्गपुण्ड्रचिह्नाश्वलिङ्गिषु।"
इति रघुटीकायां मल्लिनाथधृतयादवः॥
तद्वति वाच्यलिङ्गश्च त्रि। यथा, महाभारते। ७। ३३। १३।
"ललामैर्हरिभिर्युक्तः सर्वैस्तमनुयोधिभिः।
राज्ञो भर्थ्ये मन्त्रबालः प्राक्षभीष्यन्दनेन॥")
ललामकं, क्ली, पुरोऽवलम्बमाल्यम्। इत्यमरः॥ तदेव मन्दं पुरः अंशुकमाला स्यात्। ललाटसंलग्नमात्रं ललामकं ललामं चिह्नमिव इति इत्यर्थे कः। इति भरतः।
ललनी, स्त्री, कर्कमूलबन्धविशेषः। तत्पर्य्यायः। ठरटिक्का २। इति शब्दमाला।
ललितं, क्ली, (लल+क्तः।) शृङ्गारभावजक्रिया-विशेषः। इत्यमरः॥ सुकुमारतयाङ्गानां भ-

नेत्रादिः। [illegible]
तम्। तथा च।
"सुकुमाराङ्गविन्यासे [illegible]
तथा,—
"सभ्रूभङ्गं करकिसलयावर्त्तैरालं[illegible]
सा तिम्यन्ती [illegible]
विन्यस्यन्ती चरणकमले लीलया स्वैर[illegible]
निःसङ्गा च प्रथमवयसा नर्त्तित[illegible]
भ्रूनेत्रादिक्रियाभिः सुकुमारत[illegible]
हस्तपादाङ्गविन्यासस्तथा [illegible]
"अनाचार्य्योपदिष्टं स्याल्ललितं [illegible]
ललन् केलौ भावे क्तः। तत्[illegible]
मनोवाद्विलासात् तस्य ललितं वा। [illegible]
अपि च।
"विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा
सुकुमारा भवेद् यत्र ललितं तदुदीरितम्"
ललितः, पुं, (लल्यते ईप्स्यते इति। लल+क्तः।) रागविशेषः। तस्य [illegible]
"प्रफुल्लसप्तच्छदमाल्यधारी
युवातिगौरोऽरुणलोचनश्च।
विनिःसरन् वासगृहात् प्रभाते
विलासवेशो ललितः प्रदिष्टः।"
तस्य गानसमयो यथा,—
"प्रातर्गेयास्तु देशाखो ललितः [illegible]
विभासा भैरवी चैव कामोदी [illegible]
इति
ललितः, त्रि, (लल+क्तः।) सुन्दरः। रघुः। ८। १।
"अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः।")
ईप्सितः। इति मेदिनी। ते, ११४॥ इति विश्वशब्दरत्नावल्यौ।
ललितकान्ता, स्त्री, (ललिता कान्ता) चण्डिका। तस्या ध्यानं यथा,—
"एषा ललितकान्ताख्या देवी [illegible]
वराभयकरा च त्रिभुजा [illegible]
रत्नकौशेयवस्त्रा च [illegible]
नवयौवनसम्पन्ना चार्व्वङ्गी [illegible]
इति।
ललिता, स्त्री, (ललित+टाप्।) कस्तूरी। इति राजनिर्घण्टः। [illegible]
"निमित्तान्यस्तु रामेण [illegible]
चरिते [illegible]
ततो [illegible]
मध्याह्ने [illegible]
प्रवनस्य [illegible]
[illegible]
तत्र [illegible]
तस्मादनन्तकृत्यात् [illegible]

ऽता तत्र चाप्लुत्य चिरायुरगदो भवेत् ॥
त् पूर्व्वन्तु कृष्णात्तु ललिताख्या सरिद्वरा ।
राद्भिणात् पूर्व्वं महादेवावतारिता ॥
त्त्रशुक्लपक्षस्य तृतीयायां नरस्तु यः ।
हे ललितास्नानं स शम्भुसदनं व्रजेत् ॥
ताया: पूर्व्वतीरे भगवान्नाम पर्व्वतः ।
विष्णुलिङ्गरूपी तत्रास्ते भगवान् हरिः ॥
तायां नरः स्नात्वा द्वादश्यां शुक्लपक्षके ।
र्व्वतं समारुह्य यो यजेत् परमेश्वरम् ।
ाति विष्णुभवनं शरीरेण विराजता ॥”
इति कालिकापुराणे ८२ अध्यायः ॥ * ॥
ीविशेषः । यथा,—
"अखिलरसामृतमूर्त्तिः
प्रसमररुचिरुद्धतारका पालिः ।
कलितश्यामा ललितो
राधाप्रेयान् विधुर्जयति ॥
इति भक्तिरसामृतसिन्धुः ॥
लता श्यामला शैव्या पद्मा भद्राश्च श्रूयन्ते ॥
त तट्टीकायां जीवगोस्वामी ॥ तस्याः स्वरूपं
ा,—
ा दुर्गा सैव ललिता ललिता सैव राधिका ।
ाणामन्तरं नास्ति सत्यं सत्यं हि नारद ! ॥”
पाद्मे पातालखण्डे रासलीलायां नारदं
र्व श्रीकृष्णवाक्यम् ॥ रागिणीविशेषः । सा च
रागस्य पत्नी । यथा, सङ्गीतदामोदरे ।
लिता मालसी गौड़ी नाटी देवकिरी तथा ।
रागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥”
ा तु हनूमन्मते हिन्दोलरागस्य पत्नी । सोमे-
ऱमते वसन्तस्य पत्नी । यथा, संगीतदर्पणे ।
लावली रामकिरी देशाख्या पटमञ्जरी ।
लता सहिता एता हिन्दोलस्य वराङ्गनाः ॥”
र्शी देवकिरी चैव वराटी तोड़िका तथा ।
ता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥”
ा ध्यानादिकमाह तत्रैव । अथ ललिता ।
-प-वर्ज्या च ललिता औड़वा सभया मता ।
ैवा शुद्धमध्या स्यात् सम्पूर्णा केचिदूचिरे ।
तमपधं युक्ता द्वितीया ललिता मता ॥”
ानम् । यथा,—
"प्रफुल्लसप्तच्छदमाल्यकण्ठा
सुगौरकान्तिर्युवती सुदतिः ।
विनिश्वसन्ती सहसा प्रभाते
विलासवेशा ललिता प्रदिष्टा ॥”
ाहरणम् । स ग म ध नि स ।
था,—
रि ग म प ध नि स । इति प्रथमा ।
नि ध ग म ध । इति द्वितीया ।
ि ललिता ।)
ाषष्ठी, स्त्री, (ललिताख्या षष्ठी ।)
ाद्रशुक्लषष्ठी । तत्र कुक्कुटीव्रतं कार्य्यम् ।
ा भविष्ये ।
भाद्रे मासि सिते पक्षे षष्ठ्यां नियमेन या ।
ात्वा शिवं वेष्टयित्वा मण्डले च तथाम्बिकाम् ।

पूजयेच्च तदा तस्यां दुःखापं नैव विद्यते ॥”
इति कुक्कुटीव्रतत्वेन ख्यातम् । इति तिथ्यादि-
तत्त्वम् ॥ * ॥
तद्विधिर्यथा । तत्रादौ स्वस्तिवाचनपूर्ब्बकं
सङ्कल्पं कुर्य्यात् । ॐ अद्येत्यादि भाद्रे मासि
शुक्ले पक्षे सप्तम्यान्तिथौ यावज्जीवनपर्य्यन्तं
अमुकगोत्रा श्रीमदमुकी शिवदुर्गाप्रीतिकामा
प्रतिवर्षीयभाद्रशुक्लसप्तम्यां गणेशादिदेवता-
पूजापूर्ब्बकशिवपार्व्वतीपूजायावज्जीवनडोरक-
धारणभविष्यपुराणोक्तव्रतकथाश्रवणरूपललि-
तासप्तमीव्रतमहं करिष्ये । ततः सङ्कल्प-
सूक्तं पठित्वा सामान्यार्घ्यं विधाय गणेशादीन्
संपूज्य भूतशुद्ध्यादिकं विधाय मण्डलादिषु
पूजामारभेत । ततो ध्यात्वा स्वशिरसि पुष्पं
दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य
पुनर्ध्यात्वा आवाहयेत् । शिवपूजाविधिना
शिवं दुर्गापूजाविधिना दुर्गाञ्च यथाशक्त्युप-
चारैः संपूज्य आवरणदेवान् पूजयेत् । ततो
ऽष्टग्रन्थियुक्तडोरकं दुग्धेन सिक्तं शिवदुर्गाभ्यां
अर्पयित्वा तत् डोरकं वामकरे बद्धा भोज्य-
सुतृप्तेन्य कथां शृणुयात् । अष्टफलानि दद्यात् ।
ततो दक्षिणां दद्यात् ॥ * ॥ अथ कथा ।
श्रीकृष्ण उवाच ।
"लोमशो नाम देवर्षिर्मथुरामागतः पुरा ।
सोऽर्चितो वसुदेवेन देवक्या च युधिष्ठिर ! ॥
उपविष्टः कथाः पुण्याः कथयामास वै तदा ।
ततः कथयितुं भूयः कथामेतां प्रचक्रमे ॥
कंसेन निहताः पुत्रा जाता जाताः पुनः पुनः ।
मृतवत्सा देवकि ! त्वं पुत्रदुःखेन दुःखिता ॥
यथा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
तथा त्वं देवकी भद्रे पुत्रदुःखेन दुःखिता ॥
पश्चाद्वीर्य्यव्रता सा तु बभूवाक्षयपुत्रिका ।
त्वमेव देवकी देवि ! भविष्यसि न संशयः ॥
देवक्युवाच ।
का सा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
कथं चीर्णव्रतं सम्यक् तस्याः सन्ततिकारणम् ॥
लोमश उवाच ।
अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः ।
तस्य राज्ञी महादेवी नाम्ना चन्द्रमुखी प्रिया ॥
पुरोहितस्य तस्यैव पत्नी माला च नामिका ।
तयोरासीद्दृढप्रीतिः स्पर्द्धया परस्परम् ॥
अथ तेऽपि च मित्रिण्यौ स्नानार्थं सरयूतटे ।
प्राप्ते प्राप्तास्तु तत्रैव बहुशो नराङ्गनाः ॥
आनास्ता मण्डलं चक्रुस्तत्रापि स्नानपूर्व्वकम् ।
वेष्टयित्वा शिवं शान्तमुमया सह शङ्करम् ॥
गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि ।
प्रणम्य शिरसा भक्त्या हरगौर्य्यौ यतव्रताः ॥
किमिदं क्रियते साध्व्यः कथ्यतां यदि रोचते ।
तदा सा क्रियते किं वा फलं कस्य तदुच्यताम् ॥
स्त्रिय ऊचुः ।
पूजितोऽस्माभिरेतस्मिन् पार्व्वत्या सह शङ्करः ।
दत्त्वा सूत्रमिदं शुभ्रं शिवदुर्गा निवेदितः ॥

धारणीयमिदं तावद्यावत् प्राणस्य धारणम् ।
तासान्तु तद्वचः श्रुत्वा ते कृत्वा मानसं तथा ॥
कृत्वा च सम्मतिं तत्र बद्धा दोर्भ्यां सुडोरकम् ।
ततस्ताः स्वगृहं जग्मुः सखीभिः परिवारिताः ॥
कालेन महता तत्र विस्मृतं तद्व्रतं नृप ! ।
प्रमत्तया चन्द्रमुख्या विस्मृतञ्च सुडोरकम् ॥
मृता केचिदहोरात्रैः सा बभूव प्लवङ्गमी ।
माला च कुक्कुटी जाता त्वसम्यग्व्रतपालनात् ॥
तथैव ते च मित्रिण्यौ जाते जातिस्मरे कुले ।
सम्भूय भूयस्तत्रैव प्राप्तश्च समयः पुनः ॥
तद्दिने तद्दिने प्राप्ते पुनः काले च ते मृते ।
अदेवमातृके देशे जाते गोकुलसङ्कुले ॥
राज्ञो जाया बभूवाथ पृथ्वीनाथस्य सा पुनः ।
ईश्वरी नाम विख्याता सा तु राज्ञोऽतिवल्लभा ॥
अग्निमीलद्द्विजस्यासीद्भार्य्या भूषणनामिका ।
पुरोहितस्य कालेन कुक्कुटी बहुपुत्रिणी ॥
जातिस्मरा चाष्टपुत्रा तथैव चामृतप्रजा ।
पुनर्निरन्तरा प्रीतिर्बभूवाथ तयोर्द्विज ॥
तत्रेश्वरी पुत्रमेकं प्रसूता तच्च रोगिणम् ।
नववर्षे तु पञ्चत्वमगात्तत्र युधिष्ठिर ! ॥
तत्र तां भूषणा द्रष्टुमाजगामातिदुःखिता ।
सखीभावादतिस्नेहादष्टपुत्रसमन्विता ॥
अयुक्ताभरणा नित्यं स्वभावेनैव भूषिता ।
तां दृष्ट्वा पृथिवीभर्त्तुः प्रणय्याथेश्वरी तथा ॥
ततो गृहं प्रेषयित्वा तां सखीं तीव्रमत्सरा ।
चिन्तयामास सा राज्ञी तस्याः पुत्रवधं प्रति ॥
हता हताश्च ये पुत्राः पुनर्ज्जीवन्त्यनामयाः ।
बहुपुत्रा जीववत्सा प्रयुक्ताभरणा कथम् ।
शोभसे ह्यधिकं भद्रे तडित् सौदामिनी यथा ॥
भूषणोवाच ।
भाद्रे मासि सिते पक्षे सप्तम्यां ललिताह्वये ।
स्नात्वा शिवं वेष्टयित्वा मण्डले च गणाम्बि-
काम् ॥
संपूज्य विधिवत् प्राप्तं येनोक्तं यच्च विद्यते ।
तदेव हि व्रतं पूर्व्वं त्वया सह मया कृतम् ॥
तत्प्रभावादिदं भद्रा तेनाहं सुखिता सखि ।
त्वया नाचरितं सम्यक् दर्पमानगरीयसा ॥
तेन वै सन्ततिच्छिन्ना राज्ञ्यपि सति दुःखिता ।
प्रमादः एव कथितो व्रतस्यास्य तथा सखि ! ॥
अहं तुभ्यं प्रदास्यामि तव धर्म्मस्य सुव्रते ।
सखीभावात् प्रतीच्छ त्वं नाम कार्य्या विचा-
रणा ॥
संपूज्य शङ्करं भक्त्या करे बद्धा सुडोरकम् ।
यावज्जीवं तथा तावत् [illegible] निर्दिशः ॥
[illegible] कृत्वा ततः [illegible] डोरकम् ।
[illegible] धारणम् ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

अभूव सुप्रभा नाम्नी ईश्वरी भुवनेश्वरी ।
तस्यास्तु प्रभावेन सुमुखा त्वञ्च देविके ॥
भविष्यसि त्रिलोकेशं पुत्रञ्च जनयिष्यसि ।
इत्येवं श्रावयित्वा च विरराम मुनिस्तदा ॥
चकाम मधुरं पायं यथाप्येवं मनोहरम् ।
याः स्त्रियः श्रावयिष्यन्ति व्रतमेतद्युधिष्ठिर ।
कुक्कुटाख्यं व्रतश्रेष्ठं देवक्याचरितं शुभम् ।
तासां सन्ततिविच्छित्ती न कदाचिद्भविष्यति ॥
श्रियश्चैव भविष्यन्ति व्रतमेतत् सुखप्रदम् ।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति शिवमन्दिरम् ॥

या कुक्कुटीव्रतमिदं व्रतचोदितेन
दैवं विमाय हृदये च गुरुं विधाय ।
भक्त्या करोति कनुजोपविधानदर्शं
साध्वी सदा भवति सौमनगोत्रवमा ॥"

इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता ॥

लवं, क्ली, (लू+अप् ।) जातीफलम् । इति शब्दचन्द्रिका । लवङ्गम् । रामठकम् । ईषत् । इति राजनिर्घण्टः ॥

लवः, पुं, (लवनमिति । लू+अप् ।) छेदः । (यथा, रघुः । ११ । ११ ।
"[illegible]-
[illegible] ॥")
विलासः । ईदनम् । रामपुत्रः । इति मेदिनी । [illegible] । अत्र [illegible] विनाशः । इति [illegible] । ([illegible] राशाश्च [illegible] ।) कालविशेषः । यथा,—
"[illegible] ॥"
इति हेमचन्द्रः ।
(यथा, भागवते । ३ । ११ । ५ ।
"[illegible] ॥
[illegible] ॥")
[illegible] । इति राजनिर्घण्टः ।
([illegible] । इति रघु-
[illegible] । यथा, रघुः । ११ । [illegible] ।
"[illegible] ॥
[illegible] ॥")

[illegible], क्ली, ([illegible] । लू+
[illegible] ।" [illegible] । इति
[illegible] ।) [illegible] । तत्-
पर्यायः । [illegible] २ [illegible] ३ । [illegible] ।
[illegible] ४ । इति भावप्रकाशः ।
[illegible] ५ । इति शब्दरत्नावली । [illegible]
[illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९
[illegible] १० [illegible] ११ [illegible] १२
[illegible] १३ [illegible] १४ [illegible]
[illegible] १५ । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible] ।
[illegible] । इति राजनिर्घण्टः । [illegible]

शूलघ्नत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् ।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ॥
तृष्णां छर्दिं तथाध्मानं शूलमाशु विनाशयेत् ।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥"
इति भावप्रकाशः ॥

(यथा,—
"विरहानलसन्तप्ता तापिनी कापि कामिनी ।
लवङ्गानि समुद्धृत्य मदनाय रावणे ददौ ॥"
इत्युद्भटः ॥)

लवङ्गकं, क्ली, (लवङ्ग+स्वार्थे कन् ।) लवङ्गम् । इति शब्दरत्नावली ॥ (लवङ्गशब्देऽस्य विवरणं विज्ञेयम् ॥)

लवङ्गकलिका, स्त्री, लवङ्गम् । इति राजनिर्घण्टः ॥

लवङ्गलता, स्त्री, (लवङ्गस्य लता ।) पुष्पलताविशेषः । यथा, जयदेवः ।
"ललितलवङ्गलतापरिशीलनकोमलमलय-
समीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्ज-
कुटीरे ॥
विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥"
(यथा च ।
"अयि ! भ्रमर ! लवङ्गलतालये
पिब मधूनि विधूय मधुव्रतान् ।
इह वने हि वनेचरसङ्कुले
नहि सनातनताप्य विश्रमः ॥")
राधायाः सखीविशेषश्च ॥

लवणं, क्ली, (लुनाति जाड्यमिति । लू+नन्द्यादित्वात् ल्युः । पृषोदरादित्वात् णत्वम् ।) क्षाररसद्रव्यम् । तत्तु पञ्चविधं यथा । सौवर्चलम् १ सैन्धवम् २ विडम् ३ औद्भिदम् ४ सामुद्रम् ५ । तथा हि ।
"सामुद्रं यत्तु लवणमक्षीवं वशिरञ्च तत् ।
सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धुजे ॥
रौमकं वसुकं पाक्यं विडञ्च कृतके द्वयम् ।"
सौवर्चलेऽक्षरुचके ॥ इत्यमरः ॥ (अस्य विवरणं यथा । "सैन्धवसामुद्रविडसौवर्चलरोमकौद्भिदप्रभृतीनि लवणानि यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्वं स्निग्धानि स्वादूनि सृष्टमूत्रपुरीषाणि चेति ॥
"चक्षुष्यं सैन्धवं वृष्यं हृद्यं रुच्याग्निदीपनम् ।
स्निग्धं समधुरं वृष्यं शीतं दोषघ्नमुत्तमम् ॥
सामुद्रं मधुरं पाके नात्युष्णमविदाहि च ।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम् ॥
अक्षारं दीपनं सूक्ष्मं शूलहृद्रोगनाशनम् ।
रोचनं तीक्ष्णमत्युष्णं विडं वाताऽनुलोमनम् ॥
सौवर्चलं लघु कोष्ठे [illegible] विशदं कटु ।
[illegible] ॥

रोमकं तीक्ष्णमत्युष्णं
वातघ्नं लघु विष्यन्दि सूक्ष्मं
लघु [illegible]
सतिक्तं कटु सक्षारं [illegible]
कफवातक्रिमिहरं वेसनं [illegible]
दीपनं पाचनं भेदि [illegible]
जयसूतं बालुकं प्रोक्तम् [illegible]
लवणं कटुकं छेदि विहितं [illegible]
इति सुश्रुते सूत्रस्थाने ॥(
लू+भावे ल्युट् ।) छेदनम् । [illegible]
लावो लवनम् । इति चामरः ।-
प्रकारविशेषः । यथा, हरि-
पर्वणि । ५२ । १० ।
"अाहितं चित्रकं चित्रं [illegible]

लवणः, पुं, (लुनातीति । लू+ल्युः ।
भेदः । (यथा, महाभारते । [illegible]
"लवणेन समुद्रेण समन्तात् परि-
राक्षसविशेषः । रसविशेषः । [illegible]
सौ, ७४ । (यथा, भागवते । ११
[illegible]
माल्यसक्तैः पश्चः सुभ्रौ [illegible]
पृथिव्यां प्रियव्रतसुता [illegible]
इत्यतसनयगुरोपरि [illegible]
पर्यायः । भट्टः २ । तस्य गुणाः ।
"लवणो रुचिकृद्दीपि
पाचनः स्वादुरसश्च [illegible]
रुचितो विरसो [illegible]
शितिमान्य [illegible]
इति [illegible]
अपि च ।
"लवणः क्लेदनो [illegible] पाचनः
स्निग्धो रुचिकरः [illegible]
अन्यच्च ।
"लवणः शोधनो रुच्यः पाचनः
[illegible]
इति राजवल्लभः ।
("लवणः स्यन्दनाख्यं [illegible]
[illegible]
छेदनः क्लेदनो [illegible]
[illegible]
[illegible]
इति वाग्भटे सूत्रस्थाने
"लवणो रसः पाचनः क्लेदनः [illegible]
छेदनः भेदनस्तीक्ष्णः सरो
[illegible] वातहरः
[illegible]
[illegible]
[illegible]
[illegible]
स एवं गुणोऽपि [illegible]
नित्यं [illegible]

तापयति दाहयति कुथ्नाति मांसानि यति कुष्ठानि विषं वर्द्धयति शोफान् यति दन्तान् च्यावयति पुंस्त्वमुपहन्ति ाण्युपरुणद्धि वलीपलितखालित्यमापा- च लोहितपित्ताम्लपित्तवीसर्पवातरक्त- केन्द्रलुप्तप्रभृतीन् विकारानुपजनयति ।" यन् क्लेशविष्यन्दलाघवं कुरुते सुखे । ोष्णं लवणो ज्ञेयः सविदाहस्रुसस्य च ॥"

इति चरके सूत्रस्थाने २६ अध्यायः ॥

ः संशोधनः पाचनो विश्लेषणः क्लेदनः ग्यहृद्यः सर्व्वरसप्रत्यनीको मार्गविशो- सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवं- योगेन सात्यर्थमासेव्यमानो गात्रकण्डूकोठ- वैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा- विपाकं रक्तपित्तवातशोणिताम्लीका- नापादयति ॥"

भक्तरुचिमुत्पादयति कफप्रसेकं जनयति थापादयति स लवणः ।" इति सुश्रुते ाने ४२ अध्यायः ॥ * ॥)

ासुरस्य विवरणं यथा,—

कृतयुगे राजन् ! दैतेयः सुमहामतिः । ापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥ धुर्व्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः । ामाथ रुद्रेण दत्तस्तस्याद्भुतो वरः ॥ शूलाद्दिनिष्कृष्य महावीर्य्यं महाप्रभम् । महात्मा सुप्रीतो वाक्यं चैतदुवाच ह ॥ त्वयैष धर्मो ह्यतुलो मत्प्रसादकरः कृतः । न् सुरेषु विप्रेषु न विरुध्येर्महासुर ! । शूलं तवेदं स्यादन्यथा नाशमेष्यति ॥ त्वामभियुञ्जीत युद्धाय विगतज्वरः । ्लो भस्मसात् कृत्वा पुनरेष्यति ते करम् ॥ यदाद्वरं लब्ध्वा भूय एव महासुरः । पत्य महादेवं वाक्यमेतदुवाच ह ॥ गवन् ममैव स्यान्मम वंशस्य शूलमेतदनुत्तमम् । तु भगवन् देव सुराणामीश्वरो ह्यसि ॥ ुवाणं मधुं देवः सर्व्वभूतपतिः शिवः । ्रत्युवाच महादेवो नैतदेवं भविष्यति ॥ ृते विफला वाणी मत्प्रसादकृता शुभा । ः पुत्रमेकन्तु शूलमेतद्गमिष्यति ॥ यन् करस्थः शूलोऽयं भविष्यति सुतस्य ते । वध्यः सर्व्वभूतानां शूलहस्तो भविष्यति ॥ मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम् । भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम् । ् पत्नी महाभागा प्रिया कुम्भीनसीति या । विश्वावसोरपत्यं साप्यनलायां महाप्रभा ॥ स्याः पुत्रो महावीर्य्यो लवणो नाम दारुणः । ाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥ दुष्टं दुर्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः । ुः स शोकमापेदे न चैनं किञ्चिदब्रवीत् ॥ विहाय इमं लोकं प्रविष्टो वरुणालयम् । ं निवेद्य लवणे वरं तस्मै न्यवेदयत् ॥ प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा । ्तापयति लोकांश्चीन् विशेषेण च तापसान् ॥

आहारः सर्व्वसत्त्वानि विशेषेण च तापसाः । आचारो रौद्रता नित्यं वासो मधुवने तथा ॥ हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान् । मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥ तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् । घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥ प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम् । स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः ॥ को हन्ता लवणं वीरः कस्यांशः स विधी- यताम् ।

भरतस्य महाबाहो शत्रुघ्नस्य च धीमतः ॥ राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् । अहमेनं वधिष्यामि ममांशः स विधीयताम् ॥ भरतस्य वचः श्रुत्वा धैर्य्यशौर्य्यसमन्वितम् । लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥ शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् । कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दन ! ॥ आर्य्येण हि पुरा शून्या त्वयोध्या परिपालिता । सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति । प्रेष्ये मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात् ॥ तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् । एवं भवतु काकुत्स्थ क्रियतां मम शासनम् ॥ स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् । राज्यं प्रशाधि धर्म्मेण वाक्यं मे यद्यवेक्षसे ॥ यदा तु युद्धमाकाङ्क्षन् यदि कश्चित् समाह्वयेत् । तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि ॥ स त्वं पुरुषशार्द्दूल ! तमायुधविनाकृतम् । अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः । अभ्यर्णा क्रियमाणे तु अवध्यः स भविष्यति ॥ ततः प्रभाते विमले तस्मिन् काले स राक्षसः । निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः ॥ एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम् । तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ॥ ततोऽर्द्धदिवसे प्राप्ते क्रूरकर्म्मा स राक्षसः । आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन् ॥ ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् । तमुवाच ततो रक्षः किमनेन करिष्यसि ॥ तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः । शत्रुघ्नो वीर्य्यसम्पन्नो रोषादश्रूण्यवासृजत् ॥ उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम् । योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह ॥ तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः । क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ आहूतस्तु पुनस्तेन शत्रुघ्नेन महात्मना । लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः ॥ आकर्णात् स विकृष्याथ तद्धनुर्धन्विनां वरः । स मुमोच महाबाणं लवणस्य महोरसि ॥ उरस्तस्य विदार्य्याशु प्रविवेश रसातलम् । पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥ शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः । पपात सहसा भूमौ वज्राहत इवाचलः ॥ तच्च शूलं महद्दिव्यं हते लवणराक्षसे ।

पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात् ॥ हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः । ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् । वरदास्तु महाबाहो सर्व्व एव समागताः । विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥ देवानां भाषितं श्रुत्वा शूरो मूर्द्ध्नि कृताञ्जलिः । प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥ इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता । निवेशं प्राप्नुयाच्छीघ्रमेव मेऽस्तु वरः परः ॥ तं देवाः प्रीतमनसो वाढमित्येव राघवम् । भविष्यति पुरी रम्या शूरसेना न संशयः ॥ ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा । शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयेत् ॥ सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम् । निवेशनञ्च शत्रुघ्नः श्रावणेन समारभत् ॥ तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम् । निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥ तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् । रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते ॥"

इति श्रीरामायणे उत्तरकाण्डे एकषष्टादिपञ्च- षष्ट्यन्ताध्यायेभ्यः सङ्कलितम् ॥ * ॥ लवणसमुद्र- स्योत्पत्तिर्यथा,—

"विरजा सा रजोयुक्तां धृत्वा वीर्य्यममोघकम् । सद्यो वभूव तत्रैव धन्या गर्भवती सती । तस्थौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः ॥ एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्जने । विजहार पुनः साध्वी शृङ्गारासक्तमानसा ॥ एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह । कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया ॥ भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः । क्रोड़ं चकार बालं सा कृष्णो राधागृहं ययौ ॥ प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम् । विललाप भृशं तत्र शृङ्गारातृप्तमानसा ॥ शशाप स्वसुतं कोपात् लवणोदो भविष्यति । कदापि ते जलं केचित् न खादिष्यन्ति जीविनः ॥ शशाप सर्व्वान् बालांश्च यात गच्छत मही- तलम् ।

गच्छध्वं च महीं गत्वा जम्बुद्वीपं मनोहरम् । स्थितिर्भवतु युष्माकं भविष्यति पृथक् पृथक् । द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठत सरितः सुताः ॥ द्वीपस्याभ्यन्तरे वीचिं कृत्वा क्रोड़न्तु निर्जने । कनिष्ठो मातृशापाच्च लवणोदो बभूव ह ॥ कनिष्ठः कथयामास मातृशापञ्च बालकान् । आजग्मुर्दुःखिताः सर्व्वे मातृस्थानञ्च बालकाः ॥ श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम् । प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः ॥ समुद्रौघे ग…दाश्च तत्र तस्मुर्दिगागमः । [illegible]दुरपर्यन्तं द्विगुणं द्विगुणं ग[illegible] । [illegible] युराणोदं[illegible] । [illegible] एको [illegible] । [illegible] ॥"

[illegible] अध्यायः ॥

लवणः, त्रि, (लवणेन संसृष्टः। लवण+ठक्। "लवणाल्लुक्।" ४।४।२४। इति ठको लुक्। यद्वा, लवणो रसोऽस्यास्तीति। अर्श आद्यच्।) लवणरसयुक्तः। इति मेदिनी। णे, ७१। (यथा, सुश्रुते। १। ४१। "मधुरत्वविहीनः स्यादित्यत्रो लवणः स्मृतः।") लावण्ययुक्तश्च॥

लवणकिंशुका, स्त्री, महाज्योतिष्मती। इति राजनिर्घण्टः॥

लवणक्षारः, पुं, (लवणस्य क्षारः।) लोनारक्षारः। इति राजनिर्घण्टः॥

लवणखानिः, स्त्री, (लवणस्य खानिः आकरः।) शाकम्भर्य्यादिलवणोत्पत्तिस्थानम्। तत्पर्य्यायः। रुमा २। इति हेमचन्द्रः। ४। ७। लवणाकरमात्रञ्च।

लवणतृणं, क्ली, (लवणरसविशिष्टं तृणम्।) तृणविशेषः। तत्पर्य्यायः। लोणतृणम् २ तृणाम्लम् ३ पटुतृणकम् ४ अम्लशाकम् ५। अस्य गुणाः। सक्षारत्वम्। अम्लत्वम्। कषायत्वम्। असन्तलम्। अश्मरीहरत्वञ्च। इति राजनिर्घण्टः॥

लवणत्रयं, क्ली, (लवणानां त्रयम्।) सैन्धवं विड् रुचकञ्च। इति राजनिर्घण्टः॥

लवणधेनुः, स्त्री, (लवणनिर्म्मिता धेनुः।) दानार्थं लवणादिनिर्म्मितधेनुः। तद्विवरणं यथा,—

होतोवाच।

"लवणधेनुं प्रवक्ष्यामि तां निबोध महीपते।
चतुर्हस्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे॥
धेनुं लवणमयीं कृत्वा षोडशप्रस्थसंयुताम्।
चतुर्थं चतुर्भी राजेन्द्र वत्सपादाय कारयेत्॥
सौवर्णमुखशृङ्गाणि खुरा रौप्यमयास्तथा।
मुखं गुडमयं तस्या दन्ताः फलमया नृप!॥
जिह्वा शर्करया राजन् घ्राणं गन्धमयन्तथा।
नेत्रे रत्नमये कुर्य्यात् कर्णौ पत्रमयौ तथा॥
श्रीखण्डं शृङ्गकोटौ च नवनीतमयाः स्तनाः।
सूत्रपुच्छां ताम्रपृष्ठां दर्भरोमयुतां पयस्विनीम्॥
कांस्योपदोहां राजेन्द्र घण्टाभरणभूषिताम्।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः।
आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत्॥
अयने वाथ संक्रान्तौ व्यतीपाते तथायने।
चन्द्रसूर्य्योपरागेषु सर्व्वकालं प्रदापयेत्॥
द्विजाय साधुवृत्ताय कुलीनाय च धीमते।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये॥
दुर्भगाय प्रदातव्या तथा मत्सरिणे नृप!।
अन्यथैव भवन्तु पुच्छदेशोपरिस्थिताः॥
कृष्णकौशेयवस्त्राणि दर्भानि सुदिक्षापणं च।
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कनकं ददेत्॥
पूर्व्वोक्तेन विधानेन खड्गमथ कनकेन तु।
इमां गृहाण भो विप्र रुद्ररूपे नमोऽस्तु ते॥
रक्षा सर्व्वभूतानां सर्व्वदेवनमस्कृता।
कामं कामदुघे कामा चार्थिनी नमोऽस्तु ते॥
दत्त्वा धेनुं लवणेन एकाहमेव तिष्ठति।
स्वयं त्रिरात्रं विप्रस्य तथैव लवणाशिता॥
अश्वमेध शतैस्तस्य लभ्यते फलमेव तु।
इन्द्रलोकं समाप्नोति यत्र देवो पुरन्दरः॥
[illegible]
[illegible]"

इत्यादि वाराहपुराणे श्वेतोपाख्याने लवणधेनुमाहात्म्यम्॥

लवणमदः, पुं, (लवणस्य मदः।) लोनारक्षारः। इति राजनिर्घण्टः॥

लवणा, स्त्री, (लुनाति या। लू+ल्युट्। टाप्।) नदीविशेषः। दीप्तिः। इति मेदिनीहेमचन्द्रौ। महाज्योतिष्मती। इति राजनिर्घण्टः॥

लवणाचलः, पुं, (लवणनिर्म्मितः अचलः।) दानार्थं लवणादिनिर्म्मितपर्व्वतः। यथा,—

"अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम्।
यत्प्रदानान्नरो लोकमाप्नोति शिवसंयुतम्॥
उत्तमः षोडशद्रोणः कर्त्तव्यो लवणाचलः।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत्।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक्॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा।
तद्वद्धेमतरून् सर्व्वान् लोकपालान्निवेशयेत्॥
सरांसि कामदेवादीन् तद्वदत्र निवेशयेत्।
कुर्य्याज्जागरमत्रापि दानमन्त्रान्निबोधत॥
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम॥
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना।
प्रियश्च शिवयोर्नित्यं तस्मात् शान्तिप्रदो भव॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम्।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात्॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम्।
उमालोके वसेत् कल्पं ततो याति परां गतिम्॥"

इति मात्स्ये ८० अध्यायः॥

लवणाब्धिः, स्त्री, (लवणाब्धौ लवणसमुद्रे जायते इति। जन्+डः।) सामुद्रलवणम्। इति राजनिर्घण्टः॥

लवणासुरं, क्ली, लोनारक्षारः। इति राजनिर्घण्टः॥

लवणोत्तमं, क्ली, (लवणेषु उत्तमम्।) सैन्धवम्। इति रत्नमाला।

लवणोत्थं, क्ली, (लवणादुत्तिष्ठतीति। उत्+स्था+कः।) लोनारक्षारः। इति राजनिर्घण्टः॥

लवणोदः, पुं, (लवणं उदकं यस्य। उत्तरपदस्य चेदुदकस्योदादेशः।) लवणसमुद्रः। इत्यमरः॥

लवनं, क्ली, (लू+भावे ल्युट्।) छेदनम्। इत्यमरः॥

लवनी, स्त्री, फलवृक्षविशेषः। नोना इति भाषा। तत्पर्य्यायः। पीतप्रभा २ अपिप्रा ३। इति शब्दचन्द्रिका॥

लवली, स्त्री, (लवं लेशं लातीति। ला+कः। गौरादित्वात् ङीष्।) फलवृक्षविशेषः। नोयाड़ि इति भाषा। तत्पर्य्यायः। सुगन्ध-

[illegible]
[illegible]
[illegible]
[illegible]
"[illegible]
[illegible]
([illegible]
"[illegible]
[illegible]

लवाकः, पुं, (लवनं छेदनं तदर्थं कायतीति। कै+कः।) छेदनसाधनम्। इत्युणादि-

लवाणकः, पुं, (लूनाति। लू+ "लूधूसूभ्यः आनकः।" उणा० ३। ८३। आनकः।) दात्रादिः। इत्युणादि-

लविः, त्रि, (लूनात्यनेनेति। लू+ "अच इः।" उणा० ४। १३९। इति इः।) छेदनादिः। इत्युणादिकोषः॥

लवित्रं, क्ली, (लूयतेऽनेनेति। लू+ "अर्त्तिलूधूसूखनसहचर इत्रः।" ३। २। १८४। इत्रः।) दात्रम्। इत्यमरः॥

लश, क शिल्पयोगे। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-सेट्।) क, लाशयति शिल्पं युञ्जन्तीत्यर्थः। इति दुर्गादासः॥

लशुनं, क्ली, (अश्नुते भुक्ते इति। "अशेर्लश् च।" उणा० ३। ५७। इति उनन् लशादेशश्च धातोः।) रसोनः। तत्पर्य्यायः। महौषधम् २ अरिष्टः ३ महाकन्दः ४ रसोनकः ५। इत्यमरः। ग्रन्जनः ६ म्लेच्छकन्दः ७ भूतघ्नः ८ उग्रगन्धः ९। अस्य गुणाः। अम्लरहित पञ्चरसत्वम्। कफवातनाशित्वम्। त्रिदोषघ्नत्वम्। रसायनत्वम्। इति राजनिर्घण्टः॥ अपि च।

"अमृतस्य द्रवोत्पन्नः [illegible]
यदामृतं वैनतेयो जहार सुरसत्तमात्।
तदा ततोऽपतद्विन्दुः स रसोनोऽभवद्भुवि॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः॥
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः।
रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः॥
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः।
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
विबन्धगुल्मारुचिकासशोफान्।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति॥

…ांगं नवाम्बु च छिन्नं लशुनमेविणाम् ।
…ममागयं रोगमनिलोरं पयो गुडम् ।
…मश्नन् पुरुषस्यैदैनमिरन्तरम् ।”

इति भावप्रकाशः ॥ * ॥

…श ।
…न: क्षारमधुरः पक्वो गुरुः सरः ।
…ल्पागक्षहरो रक्तपित्तप्रदूषणः ॥”

इति राजवल्लभः ॥

…थास्य गुणादिविषयो यथा,—
“कट्वम्लवीर्य्यो लशुनो हितश्च
स्निग्धो गुरुः स्यात्कटुकोऽथ वल्यः ।
हृद्यश्च मेधास्वरवर्णचक्षु-
र्भग्नास्थिसन्धानकरः सुतीक्ष्णः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
प्रमेहहिक्कारुचिगुल्मशोफान् ।
दुर्नामकुष्ठानलमान्द्यजन्तु-
समीरणं श्वासकफाञ्चिहन्ति ॥”
इति हारीते कल्पस्थाने तृतीयाध्याये ॥
“शीतवातहिमदग्धतनूनां
स्तम्भभुग्नकुटिलव्यथितानाम् ।
भेषजस्य पवनोपहतानां
वक्ष्यते विधिरतो लशुनस्य ॥”
…लयेल्लशुनं शीते वसन्तेऽपि कफोल्वणः ।
…द्येऽपि वातार्त्तः सदा वा शीघ्रलीलया ॥”
इति वाग्भटे उत्तरस्थाने ३९ अध्यायः ॥
…मिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः ।
…धश्चोष्णश्च वृष्यश्च लशुनः कटुको गुरुः ॥”
इति चरके सूत्रस्थाने २७ अध्यायः ॥)

…, पुं, (रसेन ऊनः रस्य लत्वम् । पृषो-
…रादित्वात् सस्य शः अकारलोपश्च ।) लशुनः ।
…ति शब्दरत्नावली ॥

… क शिल्पयोगे । इति कविकल्पद्रुमः ॥
(…रा०-पर०-अक०-सेट् ।) क, लाषयति
…लो तृष्टे शिल्पं युनक्तीत्यर्थः । इति दुर्गा-
…सः ॥

… ञ घाञ्छि । इति कविकल्पद्रुमः ॥ (भ्वा०-
…०-सक०-सेट् ।) ञ, लषति लषते । इति
…र्गादासः ॥

… य ञ स्पृहि । इति कविकल्पद्रुमः ॥ (दिवा०-
…०-सक०-सेट् ।) य ञ, लष्यति लष्यते ।
…ति दुर्गादासः ॥

…, पुं, (लाषयति तृष्टे शिल्पं युनक्तीति ।
…+“सर्व्वनिघृष्वरिष्वेति ।” उणा० १।१५३।
…ति वनप्रत्ययेन साधुः ।) नर्त्तकः । इत्यु-
…दिकोषः ॥

… श्लिषि । क्रीडे । इति कविकल्पद्रुमः ॥ (भ्वा०-
…०-अक०-सेट् ।) लसति । इति दुर्गादासः ॥
… क शिल्पयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-
…०-अक०-सेट् ।) क, लासयति कुशलो
…ष्टे शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

…, स्त्री, (लसतीति । लस्+अच् ।)
…हरिद्रा । इति हारावली । ९३ ॥

लसिका, स्त्री, (लसतीति । लस्+अच् । ततः कन् ततष्टापि अत इत्वम् ।) लाला । यथा,—
“लालायां पिच्छला ख्याता लसिका लासिका
तथा ॥”

इति शब्दचन्द्रिका ॥

लसीका, स्त्री, इक्षुरसः । त्वङ्मांसमध्यगरसः । इति केचित् ॥ (यथा । “लसीका उदकविशेषः । यथाह चरकः । यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते ।” इति विजयरक्षितकृतप्रमेहरोगव्याख्याने ॥
“यत्तु त्वगन्तरे व्रणगतं लसीकाशब्दं लभते ।”
इति चरके शारीरस्थाने सप्तमेऽध्याये ।)

लस्ज, ई ओ ट ब्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) क्विपि संयोगादिलोपे लक् । ई ओ, लग्नः । ट, लज्जते । इति दुर्गादासः ॥

लस्तः, त्रि, श्लिष्टः । क्रीड़ितः । शिल्पयुक्तः । लसधातोः क्तप्रत्ययेन निष्पन्नः । इति लस्तकशब्दव्युत्पत्तौ भरतश्च ॥

लस्तकः, पुं, धनुषो मध्यभागः । इत्यमरः ॥

लस्तकी, [न्] पुं, (लस्तकोऽस्यास्तीति । लस्तक+इनिः ।) धनुः । इति शब्दमाला ॥

लहरिः, } स्त्री, महातरङ्गः । तत्पर्य्यायः ।
लहरी, } उल्लोलः २ कल्लोलः ३ । इति हेमचन्द्रः शब्दरत्नावली च ॥ (यथा, आर्य्यासप्तशत्याम् । ६१४ ।
“सरित इव यस्य गेहे शुष्यन्ति विशाल-
गोत्रजा नार्य्यः ।
धाराभिरिव स तृप्यति जलनिधिलहरिषु जलद
इव ॥”)

ला, ल ग्रहे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, लाति । गृह्णाति गृह्णयम् । इति दुर्गादासः ॥

ला, स्त्री, ग्रहणम् । दानम् । इति मेदिनी । ले, १ ॥

लाक्ष्मी, स्त्री, सीता । यथा,—
“राघवे ते इयं सीता द्वारकेशस्य रुक्मिणी ।
विष्णोऽवतारमात्रस्य लक्ष्म्यंशा कमलालया ॥
नारायणी विशालाक्षी विमला पुरुषोत्तमे ।
वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने ॥
लक्षशः कमला दास्यो यस्याः सा लाक्ष्मी
मता ।
एवं शतसहस्राणामीश्वरी राधिकाधिका ॥”
इति पाद्मोत्तरखण्डे ५५ अध्यायः ॥

लाक्षणिकः, पुं, लक्षणया प्रतिपादकः । इति साहित्यदर्पणम् ॥ लक्षणात्मकशक्तिमत्पदत्वं लाक्षणिकत्वम् । इति सारमञ्जरी ॥ (यथा, विभक्तिनस्त्वार्थवादे ।
“शक्तो लाक्षणिको रूढ़ो योगरूढ़श्च यौगिकः ।
क्वचित् यौगिकरूढ़श्च शब्दः षोढ़ा निगद्यते ॥”
(लक्षणमधीते वेद वा । लक्षण+“क्रतूक्थादिसूत्रान्तात् ठक् ।” ४ । २ । ६० । इति ठक् । लक्षणाभिज्ञे, त्रि ॥)

लाक्षा, स्त्री, (लक्ष्यतेऽनयेति । लक्ष्+“गुरोश्च हलः ।” ३।३।१०३ । इति अः । टाप् । यद्वा, “बाहुलकात् राजतेरपि सः । कपिलिकादित्वात् वा लत्वम् ।” इत्युज्ज्वलः । ३ । ६२ ।) रक्तवर्णवृक्षनिर्यासविशेषः । लाहा इति भाषा ॥ तत्पर्य्यायः । राक्षा २ जतु ३ यावः ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ॥ खदिरिका ७ रक्ता ८ रङ्गमाता ९ पलङ्कषा १० क्रिमिहा ११ द्रुमव्याधिः १२ अलक्तकः १३ पलाशी १४ सुद्रिणी १५ दीप्तिः १६ जन्तुका १७ गन्धमादिनी १८ नीला १९ द्रवरसा २० पित्तारिः २१ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मपित्तार्त्तिशोफविषरक्तविषमज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ भग्नविसर्पत्वग्दोषनाशित्वम् । बल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
“लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा
लघुः ।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ॥
व्रणोरःक्षतवीसर्पक्रिमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः ॥”

इति भावप्रकाशः ॥

(शतपत्री । सेवती । गुलाव इति च । तत्पर्य्यायो यथा,—
“शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षा लक्ष्यातिमञ्जुला ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाक्षातरुः, पुं, (लाक्षोत्पादकस्तरुः ।) पलाशवृक्षः । इति शब्दमाला ॥ (पलाशशब्देऽस्य विशेष ज्ञेयः ॥)

लाक्षातैलं, क्ली, (लाक्षादिभिः पक्वं तैलम् ।) पक्वतैलविशेषः । लाक्षादितैलमिति ख्यातम् । तद्द्विविधं स्वल्पं वृहच्च । यथाक्रमं तत्प्रकारं तद्गुणश्चाह ।
“लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचितम् ।
षड्गुणेनारनालेन दाहशीतज्वरापहम् ॥”

इति स्वल्पलाक्षातैलम् ॥

वृहद्यथा,—
“लाक्षारसाढ़के प्रस्थं तैलस्य विपचेद्भिषक् ।
मस्त्वाढ़कसमायुक्तं पिष्ट्वा चात्र समावपेत् ॥
शतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकाम् ।
कटुकां मधुकां रास्नामश्वगन्धाञ्च दारु च ॥
मुस्तकं चन्दनञ्चैव पृथगक्षसमानकैः ।
द्रव्यैरेतैश्च तत् सिद्धं अभ्यङ्गाद्दाहतापहृत् ॥
विषमाख्यान् ज्वरान् सर्व्वानाश्वेव प्रशमं
नयेत् ।
कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम् ॥
त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनन्तथा ।
पापालक्ष्मीप्रशमनं सर्व्वग्रहनिवारणम् ।
अश्विभ्यां निर्म्मितं सम्यक् तैलं लाक्षादिकं
महत् ॥”

इति वृहल्लाक्षातैलम् । इति सुश्रुते

हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समा-
क्षिकः ।"

अपि च ।
"चन्द्रप्रभा वचा मुस्ता भूनिम्बं सुरदारु च ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्वग्द्वयीपत्रकञ्च सगैला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षं दन्तयोर्हं स्याच्चतुःकर्षा सिता भवेत् ॥
शिलाजतुकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
निहिता चौषधिरेतैः कर्त्तव्या गुटिका शुभा ।
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ।"
इत्यादि भावप्रकाशः ।

(तथास्य पर्य्यायान्तरम् ।
"मधुवह्निवरामालं पिप्पलं यः प्रमेहनि ।
आभावबोधिहिदं विद्यात् नरं चोद्रकोपनः ।"
इति चरके चिकित्सास्थाने चतुर्थेऽध्याये ।)

लालाटिकः, त्रि, लालाविशिष्टः । कातर इति भाषा । लालाप्रस्रावात् [illegible] । इति मुग्धबोधव्याकरणटीका [illegible] लालाटिकः [illegible] । यथा । [illegible] [illegible]
अपि च ।
"[illegible] वा
[illegible] ।
[illegible]
[illegible] ।"
इति पूर्व्वमेघटी २ सर्गः ।
[illegible] । इति भरतमल्लिकटीका ।

[illegible], पुं, (ललाटं प्रियं यस्य ।) भूपादिः । इति हेमचन्द्रः । ३ । १४८ ।

ललाटकारः, पुं, (ललाटं करोतीति । कृ+क्विप् +अण् ।) कर्णकामः । इति हेमचन्द्रः ।
(ललाटकरके, त्रि । यथा, रघुः । ७ । २६ ।
"[illegible] न विदेश: कश्चिन्मृत्युर्न कौशले
भरः ।")

ललित्यः, पुं, अश्विनः । इति हेमचन्द्रः ।३।३३६।

लालित्यं, क्ली, (ललित+ष्यञ् ।) ललितस्य भावः ।
यथा,—
"[illegible] मधुरवस्तु यः कथयते नितं [illegible]
[illegible]-
कं [illegible] ।

माटौ महाव्रतस्य वपुषि चतुरप्रीतिप्रदां
प्रस्फुटां
संविन्नाधरकोमलामलपदैर्लालित्यलीला-
वतीम् ।"
इति लीलावती ।

ला(व)वः, पुं स्त्री, पक्षिविशेषः । लाओया इति भाषा । इत्यमरभरतौ । (यथा, सुश्रुते ।४।८।
"ग्राम्यानूपौदकैर्म्मांसैर्लावाद्यैर्वापि विष्किरैः ।")
अस्य मांसगुणाः । लघुत्वम् । कटुत्वम् । मल-
बद्धकारित्वम् । स्वादुत्वम् । शीतत्वम् । त्रिदोष-
नाशित्वञ्च । इति राजवल्लभः । (तथा च ।
"संग्राही दीपनश्चैव कषायो मधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ।"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ।)
(यथास्य गुणपर्य्यायौ ।
"लावा विष्किरवर्गेषु ते चतुर्धा मता बुधैः ।
पांशुलो गौरकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ॥
लावा वह्निकराः स्निग्धा गरघ्ना ग्राहिका
हिताः ।
पांशुलः श्लेष्मलस्तेषु वीर्य्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥
पौण्ड्रकः पित्तलः किञ्चिल्लघुर्वातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृद्रामयहरो हिमः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)

ला(व)वकः, पुं, (लाव एव । स्वार्थे कन् ।) लाव-
पक्षी । तत्पर्य्यायः । लघुजङ्गलः २ । इति
त्रिकाण्डशेषः ॥ (तथास्य मांसगुणाः ।
"पथ्यश्च मधुरोऽष्णो लावको जाङ्गलात्मकः ।
संग्राही दीपनः प्रोक्तः कषायो मधुरो लघुः ।
तथा विपाके मधुरः सन्निपातेऽतिपूजितः ।"
इति हारीते प्रथमे स्थाने एकादशेऽध्याये ।
यथा, सुश्रुते । ४ । ३८ ।
"त्रिरिक्तस्तद्वैरिणैकलावकाः
प्रयच्छ तेयः समयूरतित्तिरिः ।"
लुनातीति । लू+ण्वुल् । छेदकः । यथा, मार्क-
ण्डेये । ४६ । २६ ।
"यथा ग्रामयाचकः क्षेत्री पालको लावक-
स्तथा ।")

लावणं, त्रि, (लवण+अण् ।) लवणेन संस्कृतम् ।
यथा,—
"शार्ङ्गिकं दाधिकं सार्पिष्टैलिकं संस्कृतं क्रमात् ।
मरिचेरक्षाभ्यासुदकं लावणिकमुदाहृतम् ।
क्षौद्रिकं गौडिकमुक्तं लवणे स्यात्तु लावणम् ।"
इति हेमचन्द्रः ।
लवणसम्बन्धि च । (यथा, हरिवंशे ।१६।१७० ।
"स मां परिभवन्निव मा वैना सम्पराक्रमम् ।
सिन्धुरामास चक्रेऽतिरेव्युविमरैः ।")
मणि, स्त्री । इति रत्नमाला ।

लावणिकं, त्रि, (लवण+ठञ् ।) लवणेन संस्कृ-
तम् । इति हेमचन्द्रः । लवणसम्बन्धि च ।
लवणलिङ्गिनरि, पुं । (यथा, माघे । १० ।
१९ ।

"लीलयैव सुतनोस्तु [illegible]
गौरवाद्रमपि लावणिकेन ।")

लवणमात्रे, क्ली । इति केचित् ।

लावण्यं, क्ली, (लवण+ष्यञ् ।)
लवणस्य भाव इत्यर्थे व्याकरणे
(लवणा त्विट् विद्यते यस्येति भाव ।
आदिभ्योऽच् । तस्य भावः ।
ष्यञ् । यद्वा, लवणा त्विट् [illegible]
स्वान् स्वार्थे ष्यञ् ।) सौन्दर्य्यवि-
शेषः यथा,—
"मुक्ताफलेषु [illegible]
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ।"

तथा हि ।
"नौनिभूमिभुजां [illegible]

दम्पत्योः शिशवो [illegible]

लावण्यं वपुषः स्तुतिस्तु भवता [illegible]

प्रकृतस्य दयितं यथाश्रमदशां [illegible]

इति [illegible]
(शीलनैपुण्यादि । अस्य
पर्य्यायः द्रष्टव्यम् ।)

लावण्यार्जितं, क्ली, (लावण्येन अर्जितम्)
कालीनं श्वशुराभ्यां दत्तं धनम् । [illegible]
"प्रीत्या दत्तञ्च यत्किञ्चित् [illegible]

मादलम्बनिकं यत्तल्लावण्यार्जितमुच्यते ।
इति [illegible]
लावण्यं शीलनैपुण्यादि ।
शीलादिमध्ये वा स्त्रिये [illegible]
स्त्रीयं श्लोघनमित्यर्थः । इति

लावा, स्त्री, (लाव+टाप् ।) [illegible]
पर्य्यायः । लावकः २ लावः ३ [illegible]
मांसगुणाः । पथ्यत्वम् । ग्राहित्वम् ।
इति राजनिर्घण्टः ।

लाबुः, } स्त्री, अलाबुः । इति शब्दरत्ना-
लाबूः, }

लासः, पुं, (लस्+घञ् ।) नृत्य-
नृत्यम् । इति शब्दरत्नावली । ([illegible]
संहारे । ६ । ११ ।
"मदनजनितलासैर्हिमगन्धैः
स्तनभरनतनार्यः कामसम्भ्रम-
यूषः । इति शब्दचन्द्रिका ।

लासकं, क्ली, (लसतीति । लस+ण्वुल् ।)
इति हारावली । नटका इति [illegible]

लासकः, पुं, (लसतीति । लस+ण्वुल् ।)
कारी । मयूरः । लवकः । इति हेम-
चन्द्रः । इति धरणिः । ([illegible]
ऋतुसंहारे । २ । १६ ।

...न्नरूपं शब्दोपलक्षणम्
...भारतेपि लक्षणं लक्षणायाम् ।")
...स्त्री, लेखनी । इत्यमरः ॥
...स्त्री, (लिख्यतेऽनया इति । लिख+
...) लेखनी । इत्यमरः ॥
...स्त्री, लेखनी । वर्त्तिका ।
...हेमचन्द्रः ॥
...लिख + "बाहुलकादिन ।" ४।११८ ।
...) तूलम् । इत्यमरः । लौहलिखम् ।
...मेदिनी । आलावर्ष तूलम् । मार्गशीर्षं
... । इति भरतः ॥
...नाम्य प्राहुः कोविदं नामगुण्ठने ।"
इति महोपनिषद्युक्ते भारतसंहिता ॥
..., महाभारते । १ । ८८ । १० ।
...रिष्वाणदैवाद्भिनाग्ज्ञनोदरैः ।
...रं रवयामास तथा देवे तथैव च ॥")
...पुं, (लिख्यतेऽनेनेति । लिख + अच् ।)
... । इति शब्दरत्नावली ॥
..., स्त्री, (लिख्यतेऽस्याम् । स्वार्थे कन् ।) तूलम् ।
...शब्दरत्नावली ॥
...स्त्री, (लिख्यतेऽनया इति । लिख +
... । टाप् ।) लेखनी । इति शब्दरत्नावली ॥
...स्त्री, (लक्षते आस्वादते इति । लक्+
...लकारस्य उच्चः । पृषोदरादित्वात् इत्वम् ।)
...म् । इति राजनिर्घण्टः ॥ (रक्तुः । अस्य
... यथा,—
...तद्देहप्रयोगेपि यवान्नुलिखुकान्यपि ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)
..., पुं, लकुचः । इत्यमरः ॥
...स्त्री, लिखा । इति शब्दरत्नावली ॥
...स्त्री, (लिश गतौ + बाहुलकात् कः । अच्
... । इत्युणादिवृत्तौ उज्ज्वलः । ३ । ६६ ।)
...क्रम् । इत्यमरः ॥ लिकि इति भाषा ।
...मरभरतौ ॥ तत्पर्य्यायः । लिक्षा २ लीखा ३
...का ४ लिखिका ५ । इति शब्दरत्नावली ॥
...था,—
...पादाश्च सन्त्याश्च यूका लिखाश्च मामकः ॥"
(इति वाभटे निदानस्थाने चतुर्दशेऽध्याये ॥)
...रमाणविशेषः । यथा,—
...जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
...चतुर्भिर्भवेल्लिखा लिखाषड्भिश्च सर्षपः ॥"
इति शब्दचन्द्रिका ॥
...ाकारकवर्गद्वितीयवत्यपि पाठः ॥
...र क्षपि । इति कविकल्पद्रुमः ॥ (भ्वा०-
...र०-सक०-सेट् ।) र, लिखति । क्षपि गतौ ।
...ति दुर्गादासः ॥
..., श लेखने । इति कविकल्पद्रुमः ॥ (तुदा०-
...र०-सक०-सेट् ।) श, लिखति पुस्तकं लेखकः ।
...यं विभाषया कुटादिरिति केचित् । तेन
...लिखितं विश्वरूपोऽपि शक्तिहानिरिति ।
...लिखितवां लेखितथं लिखनं इत्यादि सिद्धम् ।
...ति दुर्गादासः ॥

लिखः, त्रि, (लिखतीति । लिख + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) लेखकः । इति लिखधातोः कप्रत्ययेन निष्पन्नम् ॥

लिखनं, क्ली, लेखनम् । लिपिः । इत्यमरटीकायां भरतमल्लिकौ ॥ (यथा, मार्कण्डेये । ५१ । २० ।
"प्रतिदत्तमतिलिखनात् प्रकृताप्याविधारणात् ।
विश्रुतेष्वावणादस्मादायाप्य वै द्विज ! ॥")
दिव्यलिपिविशेषसम्बन्धीया यथा,—
"यस्य यल्लिखनं पूर्वं यत्र यानि लिखितानि ।
तद्देव लिखितुं तस्यैव नान्यथा कोऽपि विधिः ॥
विधातश्च विधानार्थं वेधो यल्लिखनं कृतम् ।
ब्रह्मादीनाञ्च सर्वेषां न तत् लङ्घ्यं कदाचन ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्यायः ॥

लिखितं, क्ली, (लिख + भावे क्तः ।) लिपिः । इत्यमरः ॥ लेखनम् । इति भरतः ॥ (लिख + कर्म्मणि क्तः ।) लिखितपत्रादौ, त्रि । यथा,—
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति
कीर्त्तितम् ॥"
इति मिताक्षरायां याज्ञवल्क्यः ॥
मुनिविशेषः, पुं । यथा, स्मृतिसंग्रहे याज्ञवल्क्यः ॥
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥"

लिख्या, स्त्री, परिमाणविशेषः । यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः ॥"
इति शब्दचन्द्रिका ॥

लिग, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लिङ्गति । इति दुर्गादासः ॥

लिग, इ क चित्रे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) इ क, लिङ्गयति शब्दं स्त्रीनपुंसकैः शाब्दिकः चित्रं करोतीत्यर्थः । इति दुर्गादासः ॥

लिगु, क्ली, (लिङ्गति विषयात् विषयान्तरं गच्छतीति । लिग + "मृगय्वादयश्च ।" "खरुशंकुपीयुनीलङ्गुलिगु ।" उणा० १ । ३७ । इति कुप्रत्ययेन साधु ।) मनः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लिगुः, पुं, (लिग + कुः ।) मूर्खः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ भूप्रदेशः । मृगः । इति नानार्थरत्नमाला ॥

लिङ्गं, क्ली, (लिङ्ग्यते ज्ञायतेऽनेन इति । लिङ्ग + घञ् । अभिधानात् क्लीबलिङ्गत्वम् ।) चिह्नम् । (यथा, महाभारते । १ । २ । १२ ।
"येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥")
शेफः । इत्यमरः ॥ अनुमानम् । सांख्योक्तप्रकृतिः । (यथा, सांख्यकारिकायाम् । ५५ ।
"तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः
पुरुषः ।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ॥"
प्रकृतिकार्य्ये विकृतिश्च । यथा, तत्रैव । १० ।
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥"
चिह्नमनु मत इष्टः ।) शिवमूर्त्तिविशेषः । इति मेदिनी । गे, २३ ॥ पाण्डम् । वल्कम् । पुंस्त्वादिः । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ५ । १३६ ।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥")
नामार्थम् । यथा,—
"यावन्तामेव धातूनां लिङ्गं रूढिगतं भवेत् ।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रहः ॥"
इति लिङ्गादिसंग्रहे शब्दकारिकाव्याख्यायां रघुनन्दनः ॥ * ॥ अथ शेफार्थस्य लिङ्गस्य पर्य्यायः । शिश्नः २ मेहनम्भः ३ उपस्थः ४ मदनाङ्कुशः ५ कन्दर्पमुषलः ६ शेपः ७ मेहनम् ८ शेफः [न]९ मेढ्रः १० लाङ्गुः ११ ध्वजः १२ रागलता १३ पक्षः १४ । इति शब्दरत्नावली ॥ लाङ्गलम् १५ साधनम् १६ शेफः १७ कामाङ्कुशः १८ । इति जटाधरः ॥ * ॥ लिङ्गमूले वादिलान्तवर्णयुक्तस्वाधिष्ठाननामकषड्दलपद्ममस्ति । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे हेमवर्णाभं व न वर्णचतुर्दलम् ।
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ॥
वादिलान्तषड्वर्णेन युक्तं स्वाधिष्ठानसंज्ञकम् ।
मूलमेव परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥"
इति तन्त्रम् ॥ * ॥
अस्याधिष्ठातृदेवतादिर्यथा ।
"प्रजनः सर्व्वभूतानामुपस्थोऽध्यात्ममुच्यते ।
अधिभूतं तथा शुक्रं दैवतञ्च प्रजापतिः ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥ * ॥
अस्य शुभाशुभलक्षणं यथा,—
"स्वल्पे लिङ्गे च धनवान् स्याच्च पुत्रादि-
वर्ज्जितः ।
स्थूललिङ्गो दरिद्रः स्याद्ध्वस्वकष्टयणी भवेत् ॥"
इति गारुडे ६३ अध्यायः ॥ * ॥
अपि च ।
"महद्भिरायुराख्यातं स्वल्पलिङ्गो धनी नरः ।
अपत्यरहितश्चैव स्थूललिङ्गो धनोज्झितः ॥"
महद्भिर्जानुभिरिति शेषः ।
"मेढ्रे वामनते चैव सुतार्थरहितो भवेत् ।
वक्रेऽन्यथा पुत्रवान् स्यात् दारिद्र्यं विनते
त्वधः ॥
अल्पे तु तनयो लिङ्गे शिरालेऽथ सुखी नरः ।
स्थूलग्रन्थियुते लिङ्गे भवेत् पुत्रादिसंयुतः ॥"
इति गारुडे ६६ अध्यायः ॥
अन्यच्च ।
"दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
कर्कशैः कठिनैर्लिङ्गैः परदाररतः सदा ।
रमते च सदा दासीं निर्धनो भवति ध्रुवम् ॥
कृशलिङ्गेन सप्तेन रक्तलिङ्गेन भूपतिः ।
परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत् ॥
शुभ्रलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।

रान्यं सुगम्य दियाख्याः कन्यकायाः पति-
र्भवेत् ।'

इति सामुद्रकम् ॥

शिवस्य लिङ्गरूपस्य तन्निर्माल्यापाद्यत्वस्य च कारणं यथा,—

दिलीप उवाच ।

"वेद मात्रं द्विजश्रेष्ठ ! यदन्त्रिपुरहन्तकः ।
कस्माद्विगर्हितं रूपं प्राप्तवान् सह भार्य्यया ॥
शिवनिर्माल्यरूपञ्च कथं स्यात् सुमहात्मनः ।
पञ्चवक्त्रश्चतुर्बाहुः शूलपाणिस्त्रिलोचनः ॥
कथं विगर्हितं रूपं प्राप्तवान् देवपुङ्गव ! ।
एवं मम समाचक्ष्व मित्रावरुणनन्दन ॥

वशिष्ठ उवाच ।

शृणु राजन् प्रवक्ष्यामि यन्मां पृच्छसि गौरवात् ।
स्वायम्भुवो मनुः पूर्वं मन्दरे पर्वतोत्तमे ॥
रचयाञ्चक्रे मुनिभिः सार्द्धं दीर्घसत्रमनुत्तमम् ।
तत्र समागताः सर्वे मुनयः संशितव्रताः ॥
[illegible] देवतानां त्रिषु प्रोचुस्तपोधनाः ।
त्रिणां [illegible] कः पूज्यो देवतावरः ॥
इति [illegible] सर्वे [illegible] महर्षयः ।
भृगुं मुनीन्द्रं विप्रं प्रोचुः प्राञ्जलयस्तदा ॥

ऋषय ऊचुः ।

त्वमाद्य संशयं छेत्तुं समर्थोऽसि सुव्रत ।
[illegible] ब्रज सुव्रत ।
[illegible] तथा ब्रह्मा च विष्णवाम् ।
[illegible] वर्तते मुने ! ।
[illegible] पूज्यो [illegible] ।
[illegible] चिरायम् ॥
[illegible] प्रभो ।
[illegible] मुनिसत्तमः ।
[illegible] ।
[illegible] महामन ।
[illegible] ।
[illegible] सुरोत्तमम् ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] शङ्करः ।
[illegible] ।
[illegible] ।
[illegible] सुरेश्वरः ।
[illegible] शङ्करम् ।
[illegible] शङ्करः ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] द्विजसत्तमाम् ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ! ॥

रुद्रभक्ताश्च ये लोके भस्मलिङ्गास्थिधारिणः ।
ते पाषण्डत्वमापन्ना वेदबाह्या भवन्ति वै ॥
एवं भृगुः मुनिस्तत्र रुद्रं त्रिपुरहन्तकम् ।
जगाम ब्रह्मलोकं वै सर्व्वलोकनमस्कृतम् ॥"

इति पाद्मोत्तरखण्डीयाष्टसप्ततितमाध्यायात् सङ्कलितम् ॥ * ॥ शिवलिङ्गस्य पूजाधारत्वं यथा,

"पूजास्थानानि वक्ष्यामि यस्मिन् सान्निध्यतां व्रजेत् ।
लिङ्गस्थां पूजयेद्देवीं स्थण्डिलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पादुके प्रतिमासु च ॥
तल्लिङ्गमाश्रयेन्मन्त्री शुक्राद्यैर्यत् प्रतिष्ठितम् ।
कृपाद्यैर्यत् कृतं लिङ्गं वर्ज्जनीयन्तु साधकैः ॥
अल्पसौख्यप्रदं प्रोक्तं वेदमन्त्रैः प्रतिष्ठितम् ।
साविकारन्तु तल्लिङ्गं भुक्तभोगं तथैव च ।
सा च केतुमालवर्षस्था गङ्गा। यथा। एवं माल्यवच्छिखरान्निष्पतन्ती ततः उपरतवेगा केतुमालमभिवङ्क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति। इति श्रीभागवते ५ स्कन्धे १७ अध्यायः॥ (यथा च महाभारते।६।९।२२।
"गोदावरी च वेणा च कृष्णवेणा तथा द्विजा। इषुमती च कावेरी वङ्क्षुर्मन्दाकिनी तथा॥")

वङ्गं, क्ली, (वङ्गतीति । वगि गतौ + अच् ।) धातुविशेषः । राँ इति भाषा । तत्पर्य्यायः । त्रपुः २ स्वर्णजम् ३ नागजीवनम् ४ म्रदङ्गम् ५ रङ्गम् ६ गुरुपत्रम् ७ पिच्चटम् ८ चक्रसंज्ञम् ९ तमरम् १० नागजम् ११ कस्तीरम् १२ आलीनकम् १३ सिंहलम् १४ । इति हेमचन्द्रः । ४ । १०८ ॥ श्वेतम् १५ नागम् १६ त्रपु १७ । इति शब्दरत्नावली ॥ अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । भेदित्वम् । पाण्डुत्वम् । कृमिवासनाशित्वम् । लेखनत्वम् । किञ्चित्पित्तकारित्वञ्च । इति राजवल्लभः ॥ (अथ वङ्गस्य नामलक्षणगुणाः ।

"रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ।
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते ॥
उत्तमं खुरकं तत्र मिश्रकन्त्ववरं मतम् ।
रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् ॥
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ।
सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्य शोधनमारणविधिर्यथा,—
"वङ्गं चूर्णोदके क्षिप्तं यामार्द्धेन विशुध्यति ॥"
इति वङ्गशुद्धिः ॥
"वङ्गं धतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत् ।
शुष्काश्वत्थभवैर्भाण्डैः सप्तधा भस्मतां नयेत् ॥"
मतान्तरम् ।
"वङ्गं खर्परके कृत्वा चुल्ल्यां संस्थापयेत् सुधीः ।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत् ॥
प्रथमं रजनीचूर्णं द्वितीये च यमानिका ।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम् ॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिःक्षिपेत् ।
एवं विधानतो वङ्गं म्रियते नात्र संशयः ॥
वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वङ्गमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।) अन्यत्तद्यशब्दे द्रष्टव्यम् ॥ * ॥ सीसकम् । देशविशेषे पुं भूम्नि । इति मेदिनी । गे, १२ ॥ (एकवचनान्तोऽपि । यथा, महाभारते । १ । १०४ । ५० ।
"अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः ॥")
स तु प्राच्यदेशान्तर्गतदेशविशेषः । यथा,—
"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः ॥"
रघुवर्ष्य ।
"प्राप्ता मागधमोभद्राः प्राच्या जनपदाः स्मृताः ॥"
इत्यन्तं मत्स्यपुराणवचनम् ।
मतान्तरं यथा,—
"आदित्यामङ्गवङ्गानवद्वारविदुरकोशलाः ।
कलिङ्गौड्रान्ध्रकिष्किन्ध्याविदर्भशवरादयः ॥"
इति ज्योतिस्तत्त्वधृतकूर्म्मचक्रवचनम् ॥
तस्य सीमा यथा,—
"रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे ! ।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥

वङ्गः, पुं, चन्द्रवंशीयबलिराजपुत्त्रः । यथा,—
"बलेः सुतपसो जज्ञे ह्यङ्गवङ्गकलिङ्गकाः ।
सुह्मपौण्ड्राश्च बालेया अनपानस्तथाङ्गतः ॥"
इति गारुडे १४४ अध्यायः ॥ * ॥
(स च वङ्गो दीर्घतमस औरसो बलेः क्षेत्रजश्च । यथा, महाभारते । १ । १०४ । ४७-५१ ।
"ततः प्रसादयामास पुनस्तमृषिसत्तमम् ।
बलिं सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ॥
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः ॥
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ॥
अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ॥
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ।
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")
वार्त्ताकुः । कार्पासः । इति मेदिनी । गे, २५ ॥

वङ्गजं, क्ली, (वङ्गात् धातुविशेषात् जायते इति । जन् + डः ।) सिन्दूरम् । इति रत्नमाला ॥ वङ्गदेशजाते, त्रि ॥

वङ्गनः, पुं, (वङ्गतीति । वगि + ल्युः ।) वार्त्ताकुः । इति शब्दरत्नावली ॥ वेगुन् इति भाषा ॥ (गुणादयोऽस्य वार्त्ताकुशब्दे ज्ञातव्याः ॥)

वङ्गला, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ वङ्गालीति च नामान्तरम् ॥

वङ्गशुल्वजं, क्ली, (वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते इति । जन + डः ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११५ ॥

वङ्गसेनः, पुं, वकवृक्षः । यथा,—
"वङ्गसेनस्त्वगस्तिद्रुः शुकनासो मुनिद्रुमः ।
व्रणजित् कुमणी ॥" इति त्रिकाण्डशेषः ॥

वङ्गसेनकः, पुं, (वङ्गसेन + स्वार्थे कन् ।) वकवृक्षः । यथा,—
"रक्तपुष्पो मुनितरुरगस्तिर्वङ्गसेनकः ॥"
इति रत्नमाला ।
अस्य पुष्पगुणाः ।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"
इति राजवल्लभः ॥

वङ्गारिः, पुं, (वङ्गस्य रङ्गधातोररिः । अस्य वङ्गधातुमारकत्वात् तथात्वम् ।) हरितालम् । इति हेमचन्द्रः ॥

वङ्गालः, पुं, भैरवरागस्य पुत्त्रः । यथा,—
"वङ्गालः पञ्चमः मधो मधुरो हर्षकस्तथा ।
देशाख्यो माधवः सिन्धुर्भैरवस्य ...
अस्य ध्यानम् ।
"कथानिवेशितकरकारहस्तो
मान्त्विग्रहनपरिमण्डितमालभारः ।
भक्तोज्ज्वलो निशितखड्गधरः ...
वङ्गाल इत्यभिहितस्तरुणार्कवर्णः ।
षाडवो देववङ्गालो ...
प्रहर्षे विनियोक्तव्यः
इति

वङ्गाली, स्त्री, भैरवरागस्य रागिणी ।
"भैरवी कौशिकी ...
वङ्गाली चेति रागिण्यो ..."
अस्या मूर्त्तिः ।
"मनोज्ञमुक्तागुणभूषिताङ्गी
गुञ्जं दधाना करकोरकाभ्याम् ।
प्रांशुः कुमारी कमलोपमाक्षी
वङ्गालिकेयं मुनिनाप्युक्ता ।
इति
"वङ्गाली औडवा ...
सग्रहीता च विज्ञेया सर्व्वदा
पूर्णा वा मङ्ग्योपेता कलिकादौ
इति

वच, औ वाचि । सन्देशे । इति (भ्वा०-पर०-सक०-अनिट् ।) ... अयं सेम् (सेट्) इत्येके । ... इति हलायुधः । इति दुर्गादासः ॥

वच, क सन्देशे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) सन्देशो ... वाचयत्यखिलां लिपिमिति इति दुर्गादासः ॥

वच, ल औ वाचि । इति कविकल्पद्रुमः ॥ (अदा०-पर०-द्विक०-सेट् ।) ल, वक्ति । ... अस्मादन्तिविभक्तिर्न प्रयोज्या । ... रिकाः । इति दुर्गादासः ॥ (यथा,—
"वचेरन्यत्र युष्मद्भिः प्रयोगो ...
वयस्तेनास्ति पञ्चम्या उत्तमः पुरु..."

वचः, पुं, (वक्तीति । वच् + अच् ।) ... इति मेदिनी । चे, ६ ॥

वचः, [स्] क्ली, (उच्यते इति । "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८९ ।) वाक्यम् । इत्यमरः । १ । ६ । १ ॥ (यथा, र...
"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभाव-
दात्मन्यवज्ञां शिथिलीचकार ॥"

वचक्नुः, पुं, (वक्तीति । वच् + "... अञ्जागजस्तुच: ।" उणा० ३ । ... क्नुच् ।) ब्राह्मणः । इति मेदिनी ।

र, (वक्तीति । वच् + "रम्युवशिभ्यः
उणा० ३ । ८१ । इत्यक्नुन् ।) चाटुकः ।
ज्ञो । मे, १२० ।
क्तो, शारिका । पक्षिः । शब्दभेदः ।
द्ररत्नावली । मेदिन्यां वचक्नी इति
इति च पाठः ।
ो, (उच्यतेऽनेनेति । श्रेयसाशकत्वादस्य
। वच् + ल्युट् ।) शुण्ठी । इति शब्द-
। । वाक्यम् । तत्पर्य्यायः ।
रस्वती नाक्को भाषा वाणी च शारदा ।
ोच गिरां देवी गीर्द्देवी भारती-
श्वरी ।
। वचसामीशा वाग्देवी वर्णमातृका ।
ाषितं चोक्तिर्व्याहारो लपितं वचः ।
ोवचसोरेव पर्य्यायः परिकीर्त्तितः ।
ानं यथायोग्यं भेद उक्तो मनीषिभिः ।"
इति शब्दरत्नावली । * ।
हितोपदेशे ।
रतिश्वरदारमटवविरवयघम् ।
ीवचनं धन्यं कस्यापि जीवनम् ।")
विधम् । यथा,—
वशिष्ठ उवाच ।
त्रिविधं प्रोक्तं लौकिके वैदिके तथा ।
ानाति प्राज्ञो निर्म्मलज्ञानचक्षुषा ।
ादितं पश्चात् साम्प्रतं श्रुतिसुन्दरम् ।
ानुवंदति नहि तेषां कदाचन ।
: प्रीतिजनकं परिणामसुखावहम् ।
र्म्मशीलश्च बोधयत्येव बान्धवम् ।
ात् सुधातुल्यं सर्व्वकाले सुखावहम् ।
ारं हितकरं वचसां श्रेष्ठमीप्सितम् ।
त्रिविधं प्रोक्तं नीतिसारनिरूपितम् ।
त्रिषुमध्ये किं वदामि वाक्यमीप्सि-
तम् ।"
ह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४१ अध्यायः ।
ः । सा तु स्यादिस्यादिश्च । यथा ।
ेकं वचनं क्रमात् कह्वसंज्ञं स्यात् ।" इति
ोधव्याकरणम् । सवैदिकपर्य्यायः । श्लोकः
ा २ इला ३ गौः ४ गौरी ५ गान्धर्व्वी
ोरा ७ गम्भीरा ८ मन्द्रा ९ मन्द्राजनी
ाशी ११ वाणी १२ वाणीची १३ वाण:
वि: १५ भारती १६ धमनिः १७ नाळीः
ना १९ मेळिः २० सूर्य्या २१ सरस्वती २२
। २३ स्वाहा २४ वग्नुः २५ उपब्दिः २६
२७ काकुत् २८ जिह्वा २९ घोषः ३०
३१ शब्दः ३२ स्वनः ३३ ऋक् ३४ होत्रा
ीः ३६ गाथा ३७ गणः ३८ धेना ३९ ग्नाः
वपा ४१ नमा ४२ कशा ४३ धिषणा ४४
४५ अक्षरम् ४६ मही ४७ अदितिः ४८
४९ वाक् ५० अनुष्टुप् ५१ धेनुः ५२
ः ५३ गल्दा ५४ सरः ५५ सुपर्णी ५६
ा ५७ । इति सप्तपञ्चाशत् वाङ्नामानि ।
वेदनिघण्टौ । १ । ११ ।

वचनग्राही [न्], त्रि, (वचनं गृह्णातीति । ग्रह + णिनिः ।) वचने स्थितः । इत्यमरटीकायां रमानाथः ।

वचनीयः, त्रि, (वच् + अनीयर् ।) कथनीयः । इति वचधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः । (निन्दायां, क्ली । यथा, कुमारे । ४ । २१ ।

"मदनेन विना कृता रतिः
क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं
रमण ! त्वामनुयामि यद्यपि ॥"

"इति वचनीयं निन्दा मे मम व्यवस्थितम् ।"
इति सट्टीकायां मल्लिनाथः ।)

वचनीयता, स्त्री, (वचनीयस्य भावः । वचनीय + तल् ।) लोकापवादः । यथा,—

"जनप्रवादः कौलीनं विगानं वचनीयता ।"
इति हेमचन्द्रः । २ । १८४ ।

(तथा, मृच्छकटिकनाटके तृतीयाङ्के ।

"कामं नीचमिदं वदन्ति पुरुषः स्वप्ने च यद्वर्द्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्य्यं न शौर्य्यं हि तत् ।
स्वाधीना वचनीयतापि हि वरं बद्धो न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्व्वं कृतो द्रौणिना ॥")

वचनेस्थितः, त्रि, (वचने तिष्ठति स्मेति । स्था + "गत्यर्थेति ।" ३।४।७२ । इति क्तः । "तत्पुरुषे कृति बहुलम् ।" ६।३।१४। इति सप्तम्या अलुक् ।) वचने तिष्ठति यः । वचनस्थः । तत्पर्य्यायः । विधेयः २ विनयग्राही ३ आश्रवः । इत्यमरः । ३ । १ । २४ । वश्यः ५ प्रणेयः ६ । इति केचि-दिति भरतः ।

वचनोपक्रमः, पुं, (वचनस्य उपक्रमः ।) वाक्यारम्भः । इति भरतशब्दरत्नावली । तत्पर्य्यायः । उपन्यासः २ वाङ्मुखम् ३ । इत्यमरः ।

वचरः, पुं, (अवान्तरे चरतीति । अव + चर + अच् । अल्लोपः ।) कुक्कुटः । शठः । इति मेदिनी ।

वचक्नुः, पुं, शक्नुः । यथा,—

"पुंसि सक्नुः स्नुयक्नुश्च वचक्नुर्गलुस्तथा ।
भरण्युश्च शरण्युः स्याद्दमित्रे रथिरित्यपि ।"
इति शब्दमाला ।

वचसांपतिः, पुं, (वचसां वाचां पतिः ।) बृहस्पतिः । यथा,—

"जीवोऽङ्गिराः सुरगुरुर्व्वचसांपतीज्यौ ।"
इति दीपिका ।

वचस्करः, त्रि, (करोतीति । कृ + अच् । वचसः करः ।) वचने स्थितः । इति केचित् ।

वचा, स्त्री, (वाचयतीति । वच् + णिच् + अच् । निपातनात् ह्रस्वः । यद्वा, अन्तर्भावितण्यर्थात् वचः अच् ।) औषधविशेषः । वच् इति भाषा । तत्पर्य्यायः । उग्रगन्धा २ षड्ग्रन्था ३ गोलोमी ४ शतपर्व्विका ५ । इत्यमरः । २ । ४ । १०२ ।
क्षीरा ६ जटिला ७ मङ्गल्या ८ विजया ९ उग्रा १० रक्षोघ्नी ११ । इति रत्नमाला । वच्या १२ लोमशा १३ । इति जटाधरः । भद्रा १४ । अस्या गुणाः । अतितीक्ष्णत्वम् । कटुत्वम् । उष्णत्वम् । कफामग्रन्थिशोथवात-ज्वरातिसारवादभूतनाशित्वम् । वान्तिकारि-त्वञ्च । इति राजनिर्घण्टः । * । अपि च ।

"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका ।
क्षुद्रपत्नी च मङ्गल्या जटिलोग्रा च लोमशा ।
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ।
अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत् ।"

अथ खुरासानी वचा ।

"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा ।
हैमवत्युदिता तद्वत् भूतं हन्ति विशेषतः ।"

अथ महाभरी वचा । यस्या लोके कुलीञ्जन इति नामान्तरम् ।

"सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत् ।
सुस्वरत्वकरी रुच्या हृत्कण्ठमुखशोधिनी ।"

अपरा सुगन्धा स्थूलग्रन्थिर्यस्या लोके महाभरा इति नाम ।

"स्थूलग्रन्थिः सुगन्धान्या ततो हीनगुणा स्मृता ।"

अथ चोपचीनीति लोके प्रसिद्धा । तस्या गुणाः ।

"द्वीपान्तरवचा कट्वी तिक्तोष्णा वह्निदीप्तिकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ।
वातव्याधीनपस्मारमुन्मादं तनुवेदनाम् ।
व्यपोहति विशेषेण फिरङ्गामयनाशिनी ।"
इति भावप्रकाशः । * ।

अपरञ्च ।

"वचायुष्या वातकफतृष्णाघ्नी स्मृतिवर्द्धिनी ।"
इति राजवल्लभः । * ।

अन्यच्च ।

"अङ्क्ष्वा पयसाज्येन मासमेकन्तु सेविता ।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणसंयुतम् ।
चन्द्रसूर्य्यग्रहे पीतं पलमेकं पयोऽन्वितम् ।
वचायास्तत्क्षणं कुर्य्यान्महाप्रज्ञान्वितं नरम् ।"
इति गारुडे १९८ अध्यायः ।

वचोग्रहः, पुं, (गृह्णातीति । ग्रह + अच् । वचसां ग्रहः ।) कर्णः । इति राजनिर्घण्टः ।

वज, गतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) वजति । इति दुर्गादासः ।

वज, क संस्कृतौ । गतौ । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) अयं मार्गणसंस्कारे इति प्राञ्चः । मार्गणस्य शरस्य पक्षादिना संस्कारो मार्गणसंस्कारः । क, वाजयति पत्रि-दानं काण्डकारः । इति रमानाथः । मार्गण-संस्कारयोरिति कश्चित् । इति दुर्गादासः ।

वज्रं, पुं, क्ली, (वजतीति । वज गतौ + "ऋज्रे-न्द्राग्रवज्रविप्रेति ।" उणा० २ । २८ । इति रन्-प्रत्ययेन निपातितः ।) इन्द्रस्यास्त्रविशेषः । बाज् इति भाषा । तत्पर्य्यायः । ह्रादिनी २ कुलिशम् ३

हिंसः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।
व्याधिः। मृत्युः। इति संक्षिप्तसारोणादिवृत्तिः॥
वधकर्म्म, क्ली, (वधः एव कर्म्म।) प्राणवियोग-फलकव्यापारः। तद्वैदिकपर्य्यायः। दभ्नोति १ श्नथति २ ध्वरति ३ धूर्वति ४ इयक्ति ५ उषति ६ ह्नयति ७ क्रमति ८ श्वसिति ९ श्नथते १० अर्द्दयति ११ स्तृणाति १२ चोष-यति १३ यातयति १४ स्फुरति १५ स्फुलति १६ मिथयतु १७ अवतिरति १८ वियातः १९ आतिरत् २० तळित् २१ आखण्डलः २२ दृणाति २३ श्नथाति २४ ग्रथाति २५ ध्वाति २६ क्ष्मिलढि २७ ताळ्हि २८ निनीयते २९ निवर्हयति ३० मिनाति ३१ मिनोति ३२ धमति ३३। इति त्रयस्त्रिंशद्वध-कर्म्माणः। इति वेदनिघण्टौ। २। १९॥
वधत्रं, क्ली, (हन्यतेऽनेन इति। वध+"अमिनक्षि-यजिवधिपतिभ्योऽत्रन्।" उणा० ३।१०५। इति अत्रन्।) अस्त्रम्। इत्युणादिकोषः॥
वधस्थली, स्त्री, (वधाय वधस्य वा स्थली स्थानम्।) प्राणिवधस्थानम्। मशान इति भाषा। तत्-पर्य्यायः। आघातः १। इति त्रिकाण्डशेषः॥ आघातः १ वधस्थानम् २। इति शब्दरत्नावली॥ आघातनम् ३। इति हारावली॥
वधस्थानम्, क्ली, (वधाय वधस्य वा स्थानं भूमिः।) वधस्थली। इति हारावली। १९६॥
वधाङ्गकं, क्ली, (वधः वध्यस्य अङ्गं यस्य। ततः कप्।) कारावेश्म। इति त्रिकाण्डशेषः॥
वधार्हः, त्रि, (वधं अर्हतीति। अर्ह+अच्।) वध्यः। वधयोग्यः। यथा, हरस्मृतिः।
"वधार्हः सुवर्णहर्त्ता [illegible] दापयेत्तु पुरुषः।
अङ्गच्छेदार्हकस्तद्वदर्द्धं दाप्यस्तदर्द्धकम्॥"
[illegible]। इति प्राय-श्चित्तविवेकः॥
वधी, [न्] त्रि, (प्राणवियोगफलकव्यापारो वधः स विद्यतेऽस्य [illegible]। वध+इनिः।) वधकर्त्ता। प्राण-वियोगफलकव्यापारो वधः [illegible] [illegible] [illegible] [illegible] [illegible]। १। [illegible] प्रयोजकः। २। [illegible] [illegible] [illegible] [illegible] [illegible]। ३। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। ४। [illegible]॥

अत्र प्रयोजकस्य कर्त्तृप्रवृत्तिद्वारेण वधकार-णत्वम्। अनुमन्तुश्च हन्तुर्निर्भयत्वेन दृढ़तर-प्रहारोत्पत्तिद्वारेण। अनुग्राहकस्य पलायना-द्युपायाभावेन हननीयस्यैर्य्यं कुर्व्वतः प्रहारस्वरू-पोत्पत्तिद्वारेण वा कारणत्वम्। निमित्तिनो हन्तुर्मन्यूत्पादनद्वारेणेति। प्रयोजकादीनां चतुर्णां अव्यवहितहननकारणानामवान्तरभेदा-द्भेदः। अतः षड्विधं वधित्वम्। इति प्राय-श्चित्तविवेकः॥
वधोद्यतः, त्रि, (वधाय उद्यतः।) परवधायोद्-युक्तः। तत्पर्य्यायः। सन्नद्धः २ आततायी ३। इत्यमरः॥ आततायिवधापवादमाह वृद्ध-स्मृतिः।
"नाततायिवधे हन्ता प्राप्नुयात् किल्बिषं क्वचित्।
विनाशार्थिनमायान्तं घातयन्नापराध्नुयात्॥"
कात्यायनः।
"आततायिनमायान्तमपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयात् न तेन ब्रह्महा भवेत्॥"
जिघांसी सन् ईयात् गच्छेदित्यर्थः। देवलः।
"उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्॥"
भ्रूणो ब्राह्मणविशेषः। दोषदर्शनं नियमार्थम्। मनुर्विष्णुः।
"गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥"
एवकारो नियमार्थः। तथा।
"नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति॥"
यस्माद्धन्तुर्मन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषो हन्ति हन्यते वेति हननविधेरपवादः।
आततायिनमाह वशिष्ठः।
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते आततायिनः॥"
विष्णुकात्यायनौ।
"उद्यतासिविषाग्निञ्च शापोद्यतकरं तथा।
आथर्व्वणेन हन्तारं पिशुनञ्चैव राजसु॥
भार्य्यातिक्रामिणञ्चैव विद्यात् सप्ताततायिनः।
यशोवित्तहराणन्यानाहुर्धर्म्मार्थहारकान्॥"
विशेषमाह कात्यायनः।
"अनाचारिनपूर्व्वो यत्नपराधे प्रवर्त्तते।
प्राणद्रव्यापहारे च प्रवृत्तस्याततायिना॥"
अनाचारिणोऽनपत्नः। तेन पूर्व्वकृतापरा-धस्य मारणोद्यतस्य नाततायिना। एतेन अन्यत्राततायिवधे दोष एव। ननु आततायिनो-ऽपि श्रोत्रियब्राह्मणस्य वधे दोषमाह सुमन्तुः।
"आततायिवधे न दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्।" तथा भविष्ये।
"शयानमपि श्रोत्रियं न हन्यात् कदाचन।"
अतः पूर्व्वापरविरोधः। अत्र व्यवस्थामाह कात्यायनः।
"आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः।
वधस्तत्र तु नैव स्यात् पापे हीने वधो भृगुः॥"

धर्म्मपदेन जातिकुलश्रोत्रिये। [illegible]
तपोविद्याजातिकुलैरुत्कृष्टो [illegible]
तदन्यो वध्य एव। भगवानपि [illegible]
यथा,—
"पापमेवाश्रयेदस्मान् [illegible]
[illegible]
एतान् [illegible]
एवम्भूताततायिनश्चाहनने [illegible]
स्मृतिः।
"आततायिनमुत्कृष्टं [illegible]
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं [illegible]
यद्यपि गुरुं बहुश्रुतं [illegible]
गुरोः सकाशात् कुलविद्यानयोः [illegible]
उत्कर्षसम्भवादिदं बहुश्रुतादि।
उत्तमवर्णो न वध्यः [illegible]
सुमन्तुवचनम्। गौरामतायि [illegible]
[illegible]
हत्यस्याना [illegible]

इति कात्यायनवचनं [illegible]
यम्। विशेषमाह कात्यायनः।
"उत्कृष्टानान्तु पापानां हनने [illegible]
निकृष्टास्तु यदारभ्याद्वधार्हं [illegible]
इति
वध्यः, त्रि, (वधमर्हतीति। वध+यत्।)
तत्पर्य्यायः। शीर्षच्छेद्यः २। [illegible]
"किन्त्वया न श्रुतं लोके अवध्या [illegible]
हीनवर्णोपसृष्टा या आत्मा [illegible]
इति [illegible]
अवध्या यथा,—
"गोत्राह्मणं वृद्धमथापि [illegible]
बालं स्वबन्धुं ललनां [illegible]
कृतापराधानपि वै [illegible]
दाचार्य्ययुक्ता गुरवस्तथैव॥"
इति वामनपुराणे
वध्यपालः, पुं, (वध्यं वध्यजनस्थानं पालयतीति। वध्य+पाल+अण्।)
रक्षकः। यथा,—
"साध्वीविक्रयतस्कराः [illegible]
तप्तलौहे तु पच्यन्ते यत्र भर्त्ता [illegible]
इति विष्णुपुराणे। ३।
वन, सम्भक्तिशब्दयोः। इति [illegible]
(भ्वा०-पर०-सक०-सेट्।) [illegible]
सेवनम्। इति दुर्गादासः।
वन, उ म याचने। इति कविकल्पद्रुमः।
पर०-अक०-सेट्। उदित्त्वात् [illegible]
वनित्वा वत्वा। म, [illegible]
अस्य णौ अनकृत्यौ [illegible]
कल्पनात् शोभयोर्वात् [illegible]
वानयति। आटिविदांगणः। [illegible]
क्रियामात्र इत्यन्ये। इति दुर्गादासः।

वनं

तिश्रद्दाघातश्रन्दोपतापेषु। इति
: ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-
ट्।) कि, वानयति वनति। अयं
यते। इति दुर्गादासः ॥
याचे। इति कविकल्पद्रुमः ॥ (तना०-
इक०-सेट्। उदित्त्वात् क्त्वायेट्।) इ ड,
ट, वनित्वा वत्वा। इति दुर्गादासः ॥
ली, (वनतीति। वन्+पचाद्यच्। यद्वा,
सेव्यते इति। "पुंसि संज्ञायां घः
।" ३।३।११८। इति घः।) बहुवृक्ष-
ानम्। (यथा, मनुः। ८। ३५६।
स्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा।
नां वापि सम्भेदे सङ्ग्रहणमाप्नुयात् ॥"
यान्तु यथा, साहित्यदर्पणे आर्थीव्यञ्जना-
म्।
"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु
दूरेपतिः कथय किं करणीयमद्य ॥")
पर्य्यायः। अटवी २ अरण्यम् ३ विपिनम् ४
हनम् ५ काननम् ६। इत्यमरभरतौ ॥
व: ७ दव: ८ अटविः ९ भीरुकम् १०
टम् ११ गुहिनम् १२। इति शब्दरत्ना-
ली। प्रवन् १३ समत्रम् १४ प्रान्तरम् १५
क्षम् १६ ॥ इति जटाधरः ॥ कान्तारम् १७।
ति राजनिर्घण्टः ॥ * ॥ गृहसमीपकर्षितवनं
था,—
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी शुभाम्।
पुष्पप्रदात्री च पुण्यदा हरिभक्तिदा।
भाति तुलसीं दृष्ट्वा सर्वदानफलं लभेत् ॥
मालती यूथिका कुन्दं माधवी केतकी तथा।
नागेश्वरं मल्लिका च काञ्चनं बकुलं शुभम् ॥
अपराजिता च सुभद्रा तयासुद्यानमीप्सितम्।
... च दक्षिणे चैव शुभदं नात्र संशयः।"
ति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
पुरायां द्वादश वनानि यथा,—
रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम्।
दृष्ट्वा मनुजो देवि सर्व्वान् कामानवाप्नुयात् ॥
ं तालवनञ्चैव द्वितीयं वनमुत्तमम्।
त्र स्नात्वा नरो देवि कृतकृत्यो हि जायते ॥
तीयं कुमुदं नाम वनं चैवोत्तमं तथा।
त्र गत्वा नरो देवि कृतकृत्यो हि जायते ॥
कादश्यां कृष्णपक्षे मासि भाद्रपदे हि या।
त्र स्नातो नरो देवि मम लोके महीयते ॥
र्थं काम्यकवनं वनानां वनमुत्तमम्।
त्र गत्वा नरो देवि मम लोके महीयते ॥
ममस्य च कुण्डे तु सर्व्वैः पापैः प्रमुच्यते।
मु प्रमुच्य प्राणान् मम लोकं स गच्छति ॥
ष्ठमं बहुलवनं वनस्थानमनुत्तमम्।
त्र गत्वा नरो देवि वह्निस्थानं स गच्छति ॥
मुनायाः परे पारे देवानामपि दुर्लभम्।
... वनमुत्तमम् ॥

तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः।
तद्वनस्य प्रभावेण नागलोकं स गच्छति ॥
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम्।
तत्र गत्वा नरो भद्रे मम लोकं स गच्छति ॥
महावनं चाष्टमन्तु सदैव तु मम प्रियम्।
तस्मिन् स्नात्वा तु मनुजो इन्द्रलोके मही-
यते ॥

लोहजं धवलं नाम लोहजङ्घेन रक्षितम्।
नवमन्तु वनं देवि महापातकनाशनम् ॥
वनं विल्ववनं नाम दशमं देवपूजितम्।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते ॥
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम्।
तस्य दर्शनमात्रेण नरो गर्भं न गच्छति।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम् ॥
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते ॥
वृन्दावनं द्वादशमं वृन्दया परिरक्षितम्।
मम चैव प्रियं भूमे महापातकनाशनम् ॥
वृन्दावनन्तु गोविन्दं ये पश्यन्ति वसुन्धरे।
न ते यमपुरं यान्ति वैकुण्ठं प्राप्नुवन्नराः ॥"
इति वाराहे मथुरातीर्थवनद्वादशकवर्णनं
नामाध्यायः ॥ * ॥ वनविशेषे मरणफलं
यथा,—
"यदेवं कथितं पुण्यं मया ब्रह्मसुखावृतम्।
तन् समग्रं भवेत्तस्य अरण्येषूपरेषु च ॥
अरण्यानि प्रवक्ष्यामि तथा चैवोषराणि च।
सैन्धवं दण्डकारण्यं नैमिषं कुरुजाङ्गलम् ॥
उत्पलावतमारण्यं जम्बूमार्गोऽथ पुष्करम्।
हिमवाससतोऽरण्य उत्तमः परिकीर्त्तितः ॥
नवस्वेतेष्वरण्येषु यस्तु प्राणान् परित्यजेत्।
ब्रह्मलोकातिथिर्भूत्वा स याति परमं पदम् ॥"
इति देवीपुराणे अरण्योषरप्रशंसा ॥ * ॥
अरण्ये वर्णनीयानि यथा,—
"अरण्येऽहिवराहेभमृगसिंहादयो द्रुमाः।
शुककाककपोताद्या भिल्लभल्लदवाग्नयः ॥"
उद्याने वर्णनीयानि यथा,—
"उद्याने सरितः सर्व्वफलपुष्पलताद्रुमाः।
पिकालिकेकिहंसाद्याः क्रीडावापध्वग-
स्थितिः ॥"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥
(शङ्कराचार्य्यशिष्यस्य हस्तामलकस्य शिष्या-
णामुपाधिविशेषे, पुं। यदुक्तं प्राणतोषिण्या-
मवधूतप्रकरणे।
"सुरम्ये निर्झरे देशे वने वासं करोति यः।
आशापाशविनिर्मुक्तो वननामा स उच्यते ॥")
वनं, क्ली, (वन्यते सेव्यते इति। वन्+"पुंसि
संज्ञायां घः प्रायेण।" ३।३।११८। घः।
इति निघण्टौ देवराजयज्वा। १।१२।९।)
जलम्। (यथा, रघुः। ९। ७२।
"समदमि मा स हि वनमनं
वनदवे मनुविरदये गिरः ॥")
निवासः। आलयः। इति मेदिनी। ने, १९ ॥
(यथा, ऋग्वेदे। २। १६। ९।

"अध्वर्यवः कर्त्तना श्रुष्टिमस्मै वने निपूतं वन
उन्नयध्वम् ॥"
"वने संभजनीये वने उदके निपूतमाप्यायनेन
शोधितं सोमसुन्नयध्वमूर्द्धं नयत। यद्वा वने
शोधितं सोमसुन्नयध्वमूर्द्धं नयत। यद्वा वने
तद्विकारे चमसे निपूतं दशापवित्रेण शोधितं
सोमं वने चमसे उन्नयध्वम्।" इति तद्भाष्ये
सायणः॥) प्रस्रवणम्। इति हेमचन्द्रः ॥
(रश्मिः। इति निघण्टुः। १।५।८ ॥ "वन षण
सम्भक्तौ भ्वादिः परस्मैपदी। पुंसि संज्ञायां
घः। वन्यते सेव्यते शीतादिनिवारणाय।
अथवा वनतिर्हिंसार्थः। वन्यते हिंस्यतेऽनेन
तमः। यद्वा, वनु याचने तनादि आत्मने भाषा।
वन्यते याच्यते वृष्टिप्रदानाय। यद्वा, वनशब्दे
भ्वादिः परस्मैपदी वन्यते शब्द्यते स्तूयते
स्तोतृभिः।" इति तत्र देवराजयज्वा ॥ यथा,
ऋग्वेदे। १। २४। ७।
"अबुध्ने राजा वरुणो वनस्य ॥")
वनकदली, स्त्री, (वनोद्भवा कदली।) काष्ठ-
कदली। इति राजनिर्घण्टः ॥ (विवृतिरस्याः
काष्ठकदलीशब्दे ज्ञातव्या ॥)
वनकन्दः, पुं, (वनजातः कन्दः।) वनशूरणः।
धरणीकन्दः। इति राजनिर्घण्टः ॥
वनकार्पासी, स्त्री, (वनोद्भवा कार्पासी।) वनो-
द्भवकार्पासः। तत्पर्य्यायः। त्रिपर्णी २ भार-
द्वाजी ३ वनोद्भवा ४। इति रत्नमाला ॥
वनकोलिः, स्त्री, (वनोद्भवा कोलिः।) वन-
बदरी। तत्पर्य्यायः। कर्कन्धुका २ फ...
कर्कन्धू ३। इति कोषान्तरम् ॥
वनगोचरः, पुं, (वनं गोचरो देशो यस्य।)
व्याधः। इति केचित् ॥ (वनं जलं गो...
निवासस्थानं यस्य। नारायणः। इति ...
वनटीकायां श्रीधरस्वामी। ३। १८। ३ ॥
जलचरः। यथा, भागवते। ३। १८। २...
"सुप्तमनुष्या मरणोऽदग्रिया...
जहास चाहो वनगोचरो मृगः ॥"
काननविहारी। यथा, मनुः। ८। २५...
"ग्रामघातासमभावे तु मौलानां सीम्नि...

इमानप्युपलीत पुरुषान् वनगोचरान् ...
वनगौः, स्त्री, (वनस्य गौः।) गवय...
राजनिर्घण्टः ॥
वनचन्दनं, क्ली, (वनजातं चन्दनम्।
देवदारु। इति विश्वः ॥
वनचन्द्रिका, स्त्री, (वने चन्द्रिका ...
मल्लिका। इति राजनिर्घण्टः ॥
वनचम्पकः, पुं, (वनजातश्चम्पकः।
वन समाप्तः।) वनचम्पकपुष्प...
पर्य्यायः। वनदीपः २ इत्याहः ...
अस्य गुणाः। कटुत्वम्। उष्ण...
ग्राहित्वम्। वातलम्।
दीपनत्वम्। पथः...
विशेषः ॥

वनच्छागः, पुं, (वनस्य छागः।) अरण्य-छागः। तत्पर्य्यायः। एडकः २ भिगु-वाहकः ३। इति त्रिकाण्डशेषः। (वने छाग इव।) शूकरः। इति शब्दमाला।

वनजं, क्ली, (वने जले जायते इति। जन्+डः।) अम्बुजम्। इति मेदिनी। जे, २८। (यथा, रघुः। ९। ७३।

"दीर्घिकासु नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष! वनायुदेश्याः।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः॥"

अरण्यजाते वनोद्भवे च त्रि। यथा, रामायणे। २। ५३। ७।

"शाद्वलेन परिक्षिप्तानि वनजैरपरैरपि।")

वनजः, पुं, (वने जले अरण्ये वा जायते इति। जन्+डः।) मुस्तकः। इति मेदिनी। जे, २८। हस्ती। इति हेमः। वनशूरणः। इति राज-निर्घण्टः। (कुम्भकचणम्। तत्पर्य्यायो यथा,—
"तुम्बुरः कौरवः कोरो वनजः सानुजोऽम्बजः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

वनजा, स्त्री, (वने जायते इति। जन्+डः। टाप्।) मुद्गपर्णी। इति मेदिनी। जे, २८। अश्वगन्धा। वनोपोदकी। अरण्यकार्पासी। कन्यका। निर्दिष्टा। ईश्वरम्। इति राज-निर्घण्टः।

वनजीरः, पुं, (वनोद्भवो जीरः।) वनोद्भव-जीरकः। तत्पर्य्यायः। वृहत्पाली १ क्षुद्र-कः २ अरण्यजीरः ३ कणः ४। अस्य गुणाः। कटुत्वम्। शीतत्वम्। व्रणनाशित्वञ्च। इति राजनिर्घण्टः।

वनतिक्तः, पुं, (वनेषु वनोद्भवेषु तिक्तः।) हरी-तकी। इति शब्दमाला।

वनतिक्ता, स्त्री, (वनेषु वनोद्भवेषु मध्ये तिक्ता।) वनतिक्तिका। इति रत्नमाला।

वनतिक्तिका, स्त्री, (वनतिक्ता+कन्। टापि अत इत्वम्।) पाठा। इत्यमरः। २। ४। ८३। (गुणादिस्तु पाठाशब्दे ज्ञेयम्।)

वनदः, पुं, (वनं जलं ददातीति। दा+कः।) मेघः। इति शब्दमाला। वनदातरि, त्रि।

वनदमनः, पुं, (वनजातो दमनः।) अरण्यदमनः। इति राजनिर्घण्टः।

वनदीपः, पुं, (वनस्य दीप इव।) वनचम्पकः। इति राजनिर्घण्टः।

वनधेनुः, स्त्री, (वनस्य धेनुरिव।) गवयी। इति राजनिर्घण्टः।

वनपः, पुं, (वनमिव विपिनं रक्षतीति।) [illegible] इति शब्दरत्नावली। अरण्य-रक्षकः।

वनपांशुलः, पुं, (वने पांशुलः व्यभिचारी।) व्याधः। इति शब्दरत्नावली।

वनपिप्पली, स्त्री, (वनोद्भवा पिप्पली।) वनोद्भव-पिप्पली। तत्पर्य्यायः। क्षुद्रपिप्पली २ सूक्ष्म-पिप्पली ३ वनकणा ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। रुच्यत्वम्। दीपनत्वम्। सा आमा गुणाढ्या। शुष्का स्वल्प-गुणा। इति राजनिर्घण्टः।

वनपुष्पा, स्त्री, (वनमिव निविडं पुष्पं यस्याः। टाप्।) शतपुष्पा। इति राजनिर्घण्टः। (शतपुष्पाशब्देऽस्या विवरणं ज्ञातव्यम्।)

वनपूरकः, पुं, (वनजातः पूरको बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः।

वनप्रियं, क्ली, (वनेषु वनजातेषु मध्ये प्रियम्।) त्वचम्। इति राजनिर्घण्टः।

वनप्रियः, पुं, (वनं प्रियं यस्य।) कोकिलः। इत्यमरः। २। ५। १९। (यथा,—

"अयि वनप्रिय विस्मृत एव किं
वलिभुजो विषयो भवताधुना।
यदनयैव कुहूरिति विद्यया
न मततच्चरणौ धरणौ तव॥"
इत्युद्भटः॥)

अरण्यप्रियमात्रे, त्रि।

वनबीजः, पुं, (वनस्य वनोद्भवो वा बीजो बीज-पूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः।

वनबीजकः, पुं, (वनबीज+स्वार्थे कन्।) वनबीज-पूरकः। इति राजनिर्घण्टः।

वनबीजपूरकः, पुं, (वनोद्भवो बीजपूरकः।) अरण्यजातबीजपूरः। तत्पर्य्यायः। वनजः २ वनबीजकः ३ वनबीजः ४ अम्लकः ५ गन्धाढ्यः ६ वनोद्भवा ७ देवदूती ८ शीता ९ देवदासी १० देवेष्टा ११ मातुलुङ्गिका १२ मधुरी १३ महा-फला १४। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वम्। रुचिप्रदत्वम्। वातामदोष-शमित्वञ्च श्वासकासाग्निदत्वञ्च। इति राजनिर्घण्टः।

वनभद्रिका, स्त्री, (वने भद्रं यस्याः। ततः टापि अत इत्वम्।) भद्रबला। इति केचित्।

वनभुक्, [ज्] पुं, (वनं भुङ्क्ते इति। वन+भुज्+क्विप्।) वनभोजकम्। इति शब्द-चन्द्रिका।

वनमक्षिका, स्त्री, (वनस्य मक्षिका।) दंशः। इत्यमरः। २। ५। २७।

वनमल्ली, स्त्री, (वनोद्भवा मल्ली।) वनोद्भव-मल्लिका। इति शब्दरत्नावली।

वनमाला, स्त्री, (वनोद्भवपुष्परचिता माला। मध्यपदलोपिसमासः।) श्रीकृष्णस्य माला। तल्लक्षणं यथा,—

"आजानुलम्बिनी माला सर्व्वर्त्तुकुसुमोज्ज्वला।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता॥"
इति शब्दमाला।

(वनपुष्पस्रक्। यथा, रघुः। ९। ५१।
"परिचयमभिलाषी वनमालया
मदनवाणविलोचनमन्डनः॥")

वनमालिनी, स्त्री, (वनमाला अस्त्यस्या इति। इनि। ङीप्।) द्वारकापुरी। इति त्रिकाण्ड-शेषः। वाराही। इति राजनिर्घण्टः।

वनमाली, [न्] पुं, (वनमाला अस्त्यस्येति। इनिः।) श्रीकृष्णः। इत्यमरः। १। १। (नारायणः। यथा, पद्मपुराणे।—

"कमलयामलया वनमालिनं
गिरिजया गिरिशञ्च निशाकृत
सुविशता परियोजयतो विधे
चतुरता चतुरूपनमावहे॥")

वनमुक्, [च्] पुं, (वनं जलं मुञ्चतीति। क्विप्।) मेघः। इति शब्दरत्नावली। वर्षिणि, त्रि। इति रघुः। ८। ११।

वनमुद्गः, पुं, (वनोद्भवो मुद्गः।) ... इत्य-मरः। २। ९। १७। तत्पर्य्यायः। निगूढकः २ कुलीनकः ३ ... इत्य-मरः। ४। २३९। अस्य ... मकुष्टकशब्दयोर्द्रष्टव्यौ।

त्रिपुटकहरेण्वाढकीप्रभृतयो भेदाः।

वनमुद्गा, स्त्री, (वनमुद्ग+टाप्।) ... इति राजनिर्घण्टः।

वनमूतः, पुं, मेघः। वनं जलं मूतं ... वनं सुवति इति वा मनोरमा।

वनमूर्द्धजा, स्त्री, (वनस्य मूर्द्धि जायते इति। जन्+डः।) वनबीजपूरकः। इति राजनिर्घण्टः।

वनमोचा, स्त्री, (वनोद्भवा मोचा।) ... इति राजनिर्घण्टः।

वनरः, पुं, (वानरः। पृषोदरादित्वात् साधुः।) वानरः। इति भरतद्विरूपकोषः।

वनराजः, पुं, (वनस्य वने वा राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। टच्।) सिंहः। इति शब्दमाला।

वनलक्ष्मीः, स्त्री, (वनस्य लक्ष्मीः।) कदली। इति राजनिर्घण्टः।

वनवर्व्वरः, पुं, (वनोद्भवो वर्व्वरः।) ... इति राजनिर्घण्टः।

वनवर्व्वरिका, स्त्री, (वनजाता वर्व्वरिका।) अरण्यजवर्व्वरी। वनतुलसी इति भाषा। तत्पर्य्यायः। सुगन्धिः २ सुरसा ३ ... ४ विषघ्नः ५ सुमुखः ६ ... निद्रालुः ८ शोफहारी ९ ... अस्या गुणाः। उष्णत्वम्। ... भूतघ्नत्वम्। ... इति राजनिर्घण्टः।

वनवल्ली, स्त्री, (वनोद्भवा वल्ली।) ... इति राजनिर्घण्टः।

वनवह्निः, पुं, (वनस्य वनोद्भवो वा वह्निः।) दावानलः। इति हेमचन्द्रः। ४। १६६। कथासरित्सागरे। ११। ११।
"वनाद्ग्निप्रभाभासमदृष्टं तारौ ...
... इव ...

वनवासनः, पुं, (वनं वासयतीति। वन+वासि+ल्युः।) गन्धोतुः। इति त्रिकाण्डशेषः।

...न्] पुं, (वनं वासयति सुरभीकरोतीति । ...णिनिः ।) ऋषभनामौषधम् । मुष्कक-वाराहीकन्दः । शाल्मलीकन्दः । नील-कन्दः । इति राजनिर्घण्टः ॥ (वने वस-... वस्+णिनिः ।) वनवासकर्त्तरि, त्रि ॥ ..., मनुः । ६ । २७ ।
"...ष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
...षु चान्येषु द्विजेषु वनवासिषु ॥")

...ी, स्त्री, (वनस्य वृन्ताकी वार्त्ताकी ।) ... । इति राजनिर्घण्टः ॥

..., पुं, (वनस्य व्रीहिः ।) नीवारः । इति ...न्द्रः । ४ । २४२ ॥

...', स्त्री, (वनस्य शूकरीव रोमशत्वात् मांस-...।) कपिकच्छुः । इति राजनिर्घण्टः ॥ ...स्य शूकरी ।) आरण्यवराही च ॥

..., पुं, (वनजातः शूरणः ।) वनोद्भवोलः । ...ोल इति भाषा । तत्पर्य्यायः । सितशूरणः २ ...३ वनकन्दः ४ अरण्यशूरणः ५ वनजः ६ ...रणः ७ वनकन्दुलः ८ । अस्य गुणाः । ...म् । कटुत्वम् । उष्णत्वम् । क्रमिगुल्म-...दोषशूलारोचकनाशित्वञ्च । इति राज-...ण्टः ॥

...टः, पुं, (वनस्य शृङ्गाट इव कण्टकाकृत-...।) गोक्षुरकः । इत्यमरः । २ । ४ । ९९ ॥ ...पर्य्यायो यथा,—
"...क्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादु-कण्टकः ।
...ण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥
...या स्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ।"
...भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

...टकः, पुं, (वनशृङ्गाट+स्वार्थे कन् ।) ...रकः । इति राजनिर्घण्टः ॥

...णं, क्ली, (वनं जलं शोभयतीति । शुभ+ ...+ल्युः ।) पद्मम् । इति शब्दचन्द्रिका ॥ ...य शोभाकर्त्तरि, त्रि ॥

... [न्] पुं, (वनस्य वने वा श्वा कुक्कुरः ।) मार्ज्जारः । [illegible] । व्याघ्रः । इति मेदिनी । ...०॥

...टः, पुं, (वने सङ्कटो बाहुल्यं यस्य ।) ...रः । इति शब्दचन्द्रिका ॥

...षः, पुं, (वनानां समूहः ।) अरण्य-...निः । तत्पर्य्यायः । वन्या २ । इत्यमरः । ... २ । ४ । वान्या ३ । इति शब्दरत्नावली ॥ ...समूहश्च ॥

...सिनी, स्त्री, (वनस्य [illegible] ...भास्करत्वात् ।) [illegible] । इति शब्द-...रत्नावली ॥

..., पुं, (वने तिष्ठतीति । स्था+कः ।) [illegible] । ...शब्दचन्द्रिका । (वानप्रस्थः । यथा, मनुः । ... । ११२७ ।
"...[illegible] ...
...[illegible] ॥")

वनवासिनि, त्रि ॥ (यथा, हरिवंशे ।१५२।२१।
"प्रवृत्तचक्रो नृपतिर्वनस्थान्
गजान् गजैः स्वैरिव वीर्य्यवीमान् ॥")

वनस्था, स्त्री, (वने तिष्ठति या । स्था+कः । टाप् ।) अश्वत्थीवृक्षः । इति राजनिर्घण्टः ॥

वनस्पतिः, पुं, (वनस्य पतिः । पारस्करादित्वात् सुट् ।) विना पुष्पं फलिद्रुमः । (यथा, मनुः । १ । ४७ ।
"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ॥")
वृक्षमात्रम् । इति मेदिनी । ते, २१६ ॥ (यथा, महाभारते । १ । १४१ । १६ ।
"कथं नु शाखास्तिष्ठेरंश्छिन्नमूले वनस्पतौ ॥")
स्थालीवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः ॥"
इति भावप्रकाशे । १ । १ ॥
द्युतपृष्ठस्य पुत्त्रविशेषः । यथा, भागवते । ५ । २०।२१ ॥ "आत्मा मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितवर्णो वनस्पतिरिति द्युतपृष्ठसुताः ॥" वटवृक्षः ॥ तत्पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वनहरिद्रा, स्त्री, (वनोद्भवा हरिद्रा ।) अरण्यहरिद्रा । तत्पर्य्यायः । शोली २ शोलिका ३ वनारिष्टा ४ । अस्या गुणाः । कटुत्वम् । गौल्यत्वम् । रुच्यत्वम् । तिक्तत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ॥"
इति भावप्रकाशः ॥

वनहासः, पुं, (वनस्य हास इव प्रकाशकत्वात् ।) काशतृणम् । इति त्रिकाण्डशेषः ॥ कुन्दवृक्षः । इति राजनिर्घण्टः ॥

वनहासकः, पुं, (वनहास+स्वार्थे कन् ।) काशतृणम् । इति शब्दरत्नावली ॥

वनाखुः, पुं, (वनस्याखुः ।) शशकः । इति त्रिकाण्डशेषः ॥

वनाखुकः, पुं, मुद्गः । इति त्रिकाण्डशेषः ॥

वनाजः, पुं, (वनस्य अजः ।) वनच्छागः । तत्पर्य्यायः । रङ्कुः २ शिशुवाहकः ३ छग-लाङ्गः ४ । इति हेमचन्द्रः । ४ । ३४४ ॥

वनाटुः, पुं, वर्व्वटा । नीलमक्षिका । इति शब्द-चन्द्रिका ॥

वनाम्रः, पुं, (वनस्य आम्र आम्रक इव ।) [illegible] । इति शब्दमाला ॥

वनाम्रः, पुं, (वनस्य आम्र इव ।) [illegible] । इति राजनिर्घण्टः ॥ ([illegible] [illegible] ॥)

वनायुः, पुं, देशविशेषः । यथा —
"[illegible] ॥"
इति शब्दरत्नावली ॥

(यथा, महाभारते । ८ । ७ । ११ ।
"आजानेयैः सैन्धवैः पार्व्वतीयै-
र्नदीजकाम्बोजवनायुबाह्लिकैः ॥"
दानवविशेषः । यथा, महाभारते ।१।६५।३०।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥")

वनायुजः, पुं, (वनायौ देशे जायते इति । जन+डः ।) वनायुदेशोद्भवघोटकः । अस्य रूपान्तरं वानायुजः । इति शब्दरत्नावली ॥

वनारिष्टा, स्त्री, (वनजाता अरिष्टेव ।) वनहरिद्रा । इति राजनिर्घण्टः ॥

वनार्चकः, पुं, (वनस्य अर्चक इव । नियतपुष्पचायित्वात् तथात्वम् ।) पुष्पजीवी । मालाकारः । इति जटाधरः ॥

वनार्द्रका, स्त्री, (वनोद्भवा आर्द्रका ।) वनभवार्द्रकम् । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायगुणौ ऐन्द्रशब्दे द्रष्टव्यौ ॥

वनालिका, स्त्री, (वनं अलति भूषयतीति । अल+ण्वुल् । टापि अत इत्वम् ।) हस्तिशुण्डी । यथा,—
"वज्रवल्ल्यस्थिसंहारी हस्तिशुण्डी वनालिका ।"
इति हारावली । ९५ ॥

वनाश्रयः, पुं, (वनमेव आश्रयो यस्य ।) द्रोणकाकः । इति जटाधरः ॥ (अरण्याश्रयिणि, त्रि । यथा, मार्कण्डेये । १०८ । ४३ ।
"भोदिष्टवत्तिन्नो लोकरापि भूप ! वनाश्रये ॥")

वनाहिरः, पुं, (वनस्य आहिरः ।) शूकरः । इति त्रिकाण्डशेषः ॥

वनिः, पुं, अग्निः । वनति कपि धनि वनि हनि शनि ध्वनि मनि [illegible] । इत्येषां पञ्चानां पुर्व्वानुकृत-इमादेशेन निष्पन्नः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । ४ । १३८ ॥

वनितः, त्रि, (वन+क्तः ।) याचितः । सेवितः । इति मेदिनी । ते, १२८ ॥

वनिता, स्त्री, (वन+क्त । टाप् ।) जातरागस्त्री । स्त्रीमात्रम् । इति मेदिनी । ते, १२८ ॥ (यथा, रघुः । ४ । १९ ।
"इक्षुच्छायानिषादिन्यस्तस्य
गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं
शालिगोप्यो जगुर्यशः ॥")

वनी, स्त्री, वनम् । [illegible] । (यथा, साहित्यदर्पणे । ३ ।
"[illegible] ॥")

वनी, [न्] पुं, (वनं [illegible] । [illegible] ।) वानप्रस्थः । यथा,—
"[illegible] ॥" इति [illegible] ॥

वनीक:, त्रि, [illegible] ॥

वनीयकः, त्रि, [illegible] ॥ [illegible] । इत्यमरः । ३ । १ । ४९ ॥

वनेक्षुदा, स्त्री, (वने क्षुदा। अलुक्समासः।) करञ्जः। इति रत्नमाला॥

वनेचरः, त्रि, (वने चरतीति। चर+“चरेष्टः।” इति टः। तत्पुरुषे कृतीत्यलुक्।) अरण्य-चारी। यथा,—

“वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः॥”

इति कुमारसम्भवे १ सर्गः॥

वनेज्यः, पुं, (वने इज्यः पूज्यः।) वङ्गरसालः। इति राजनिर्घण्टः॥

वनेमर्कः, पुं, (वने मर्क इव।) अश्मगर्भः। इति रत्नमाला॥

वनोद्भवा, स्त्री, (वने उद्भवो यस्याः।) वनकार्पासी। इति रत्नमाला॥

वनौकाः, [स्] पुं, (वनमेव ओको यस्य।) वानरः। इत्यमरः।२।५।३॥ (वनवासिनि, त्रि। यथा, भागवते।४।८।२१।
“यन्नोऽपि ते अशरणः शरणो भवायो ये वनौ-
कसः।
चरन्ति वनेचराश्च भुक्ते तद् [illegible]।”)

वन्दका, स्त्री, वन्दा। यथा,—
“वन्दाका दिव्यदी ईया वन्दा च वन्दकीत्यपि॥”
इति भरतधृतवचः॥

वन्दनः, पुं, (वन्दते स्तौति वन्द्यते स्तूयते इति वा। वन्द + “मूविशिभ्यां म्युष्”इत्यादिना [illegible]। “इदव वल्लोऽस्य स्थाने वन्दीति पाठोऽपि बहुलभ्यः इत्योऽपि।) स्तोता। स्तुवः। चन्द्रगमोऽत्यन्तमेव विषयः। इति सिद्धान्त-कौमुदी॥

वन्दनं, क्ली, (वन्द्यतेऽनेनेति। वन्द+करणे ल्युट्।) तिलकम्। इति शब्दचन्द्रिका। (वन्द+भावे ल्युट्।) प्रणामः। स तु षोडशप्रकारभक्त्यन्तर्गत-भक्तिविशेषः। यथा। पाद्मोत्तरखण्डे शिव-पार्वतीसंवादे।

“[illegible] हरेः।
[illegible]।
अर्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्॥
तत्पादोदकसेवा च तन्निवेदितभोजनम्।
तदीयानाञ्च सेवा च द्वादशीव्रतनिष्ठता॥
तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः।
भक्तिः षोडशधा प्रोक्ता भवबन्धविमुक्तये॥”

इति [illegible] ११ [illegible]।

[illegible]। यथा,—
“[illegible]।
[illegible] च।
[illegible] वन्दनं नरः॥”

[illegible]॥

अथ वन्दनम्।

“[illegible]।

पठेत् प्रतिप्रणामञ्च प्रसीद भगवन्निति॥”
तदुक्तमेकादशे श्रीभगवता।
“स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत्॥”
अथ प्रणामविधिः। कालिकापुराणे।
“यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिम्।
शिरो मत्पादयोः कृत्वा बाहुभ्याञ्च परस्परम्।
प्रपन्नं पाहि मामीश भीतं मृत्युमहार्णवात्।”
किञ्चागमे।
“दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ॥”
इति॥
“गरुडं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः।
अवश्यञ्च प्रणामांस्त्रीन् शक्तश्चेदधिकाधिकान्॥”
तथा च नारदपञ्चरात्रे।
“सन्धिं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च।
द्विचतुर्विंशदथवा चतुर्विंशत्तदर्द्धकम्।
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वथा नमेत्॥”
विष्णुधर्म्मोत्तरे।
“देवार्च्चादर्शनादेव प्रणमेन्मधुसूदनम्।
स्थानापेक्षा न कर्त्तव्या दृष्टार्च्चा द्विजसत्तमाः।
देवार्च्चाऽऽदपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥”
अथ नमस्कारमाहात्म्यम्। नारसिंहे।
“नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥”
स्कान्दे।
“दण्डप्रणामं कुरुते विष्णवे भक्तिभावितः।
रेणुसंख्यं वसेत् स्वर्गे मन्वन्तरशतं नरः॥”
तत्रैव श्रीब्रह्मनारदसंवादे।
“प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥”
तत्रैव शिवोमासंवादे।
“भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि।
प्रणमेत् यो हि देवेशं सोऽश्वमेधफलं लभेत्॥”
तत्रैवान्यत्र।
“तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम्॥
शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्विने।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति॥
वैष्णवं चिन्तनाथस्य कृत्वा देवे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥”
विष्णुधर्म्मोत्तरे।
“अभ्यर्च्च्य मधुहन्तारं समाप्य तथा नमेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात्॥”
ब्रह्मपुराणे।
“चतुर्व्विधमयं देवं वैकुण्ठाधरधारणम्।
ये नमन्ति नरा नित्यं नहि नश्यन्ति ते यतन्॥

ये जना जगतां नाथं नित्यं [illegible]
नमन्ति नहि ते [illegible]
नारदीये।
“एकोऽपि कृष्णस्य [illegible]
दशाश्वमेधावभृथेन तुल्यः [illegible]
दशाश्वमेधी पुनरेति ज[illegible]
कृष्णप्रणामी न पुनर्भ[illegible]
भक्तिसुधोदये।
[illegible]
पातितं पातकं [illegible]
अपि पापं दुराचारं [illegible]
नेक्षन्ते किङ्करा याम्या [illegible]
श्रीविष्णुपुराणे। श्रीयम[illegible]
“हरिममरगणार्च्चित[illegible]
प्रणमति यः परम[illegible]
तमपगतसमस्तपाप[illegible]
व्रज [illegible]
ब्रह्मवैवर्त्ते।
“शरणागतरक्षोद[illegible]
हरिमीशं प्रणमन्ति [illegible]
न पतन्ति भवाम्बुधौ [illegible]
पतितानुद्धरति स [illegible]
अष्टमस्कन्धे च बलिवाक्ये।
“अहो प्रणामाय कृ[illegible]
प्रपन्नभक्तार्थविधौ [illegible]
यल्लोकपालैस्त्वदनुग्र[illegible]
दलब्धपूर्व्वोऽपसदेऽसुरे[illegible]
अतएव नारायणव्यूहस्त[illegible]
“अहो भाग्यमहो [illegible]

येषां हरिपदाम्भोजे शिरो [illegible]
किञ्च नारसिंहे श्रीयमोक्तौ।
“तस्य वै नारसिंहस्य [illegible]
प्रणामं ये प्रकुर्व्वन्ति [illegible]
भविष्योत्तरे च जलधेनुप्रस[illegible]
“विष्णोर्द्देवजगद्धातुर्जनार्द्दन[illegible]
प्रणामं ये प्रकुर्व्वन्ति तेषा[illegible]

अथ प्रणामनियमाः। द्वार[illegible]
पाद्मवाराहे।
“सकृद्वा न नमेद्यस्तु विष्णो[illegible]
शवोपमं विजानीयात् कदा[illegible]
किञ्च पाद्मे। वैशाखमा[illegible]
संवादे।
“प्रद्युम्नो भगवान्[illegible]
अपत्या तमकामादि [illegible]
अथ नमस्कारनिषिद्धानि। [illegible]
“जन्मप्रभृति यत्किञ्चित् पुण्[illegible]
सर्व्वं तन्निष्फलं याति एकह[illegible]
वाराहे।
“वस्त्रप्रावृतदेहस्तु यो नरः [illegible]
श्वित्री स जायते मूर्खः [illegible]

…न्यत्र ।
…पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
…मिनमस्कारान् न कुर्य्यात् देवतालये ॥"
…च ।
…द्भौ निपतितो न शक्तः प्रणमेद्गुरुः ।
…थोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥
…प्रदक्षिणां कुर्य्यात् भक्ता भगवतो हरेः ।
…नि कीर्त्तयन् भक्तो नाच गायाद्दयन्द-
नाम् ॥"
…ति हरिभक्तिविलासे ८ विलासः ॥ ● ॥
…नमस्कारशब्दे प्रणामशब्दे च द्रष्टव्यम् ॥
…विशेषः । यथा, ऋग्वेदे । ७ । ५१ । ८ ।
"यदिजामन् यदपि वन्दनं भुवन् ।"
…। ऋग्वेदविशेषः । इति ऋग्भाष्ये
…: । ७ । ८१ । ५ ।)
…ला, स्त्री, (वन्दनार्थं माला यत्र सा ।)
…म् । इति हलायुधः । २ । १९६ ॥
…नार्थं माला इति कर्मधारये ।) दम्भा-
…नगृहद्वारदेशान्वयवरचितमाला । यथा,
…मारमाला यो रम्भाफलैः शुभोभने: ।
…ग्रोद्धैः पवैर्जातैः चमपालिभिः ॥
…ति पञ्चवर्ण्यमालां कर्म्मणो नहीतार्थो भवेत् ।
…न दाषदाश्चैव योऽर्थते चापरोपणः ॥"
इति हरिभक्तिविलासे १६ विलासः ॥
…मालिका, स्त्री, (वन्दनमाला + स्वार्थे कन् ।)
…द्वारोपरि शुभदा माला । यथा,—
…द्वारोपि तु महत्त्वं दावकन्दनमालिका ॥"
इति देवकः ॥१।०॥
…, स्त्री, (वन्द + "घाहृवन्दिविदिभ्यश्चेति
…न् ।" ३ । २ । १०७ । इत्यस्य वार्त्तिकोक्त्या
… टाप् ।) स्तुतिः । तत्पर्य्यायः । वर्णनी ८ ।
… त्रिकाण्डशेषः ॥ गोरोचना । तिलकम् ।
…,—
…पुमानस्तोत्रेण पुष्पा यस्य पूर्वेण वा ।
…री कारयेनैव शिरःपश्चार्द्धेषु च ।
…तत्पर्य्यायैव यत्पुरुषायेतन ॥"
इति निष्कादितत्वे प्रतिष्ठातत्वम् ॥
…, स्त्री, (वन्द + ल्युट् । ङीप् ।) वन्दिः ।
…[illegible]

वन्दनीया, स्त्री, (वदि + कर्म्मणि अनीयर् । टाप् ।) गोरोचना । इति त्रिकाण्डशेषः ॥ (विश्वनिरुक्ता गोरोचनाशब्दे विवृतिः ॥)
वन्दा, स्त्री, (वन्दते अवलम्बतेतिमिति । वदि + अच् । टाप् ।) वृक्षोपरिवृक्षः । बाँद इति महाराष्ट्र । इति च भाषा । तत्पर्य्यायः । वृक्षा-दनी १ वृक्षरुहा २ जीवन्तिका ३ । इत्यमरः ॥ वन्दाका ४ देवरी ५ शेखा ७ वन्दका ८ । इति भरतधृतचन्द्रः ॥ वन्दकः ९ कामवृक्षी १० इति रत्नमाला ॥ वन्दाकी ११ परवाशिका १२ इति शब्दरत्नावली ॥ वन्दिनी १३ पुष्पिणी १४ वन्दा १५ परपुष्टा १६ पराश्रया १७ । इति शब्दचन्द्रिका ॥ लताविशेषः । भिक्षुकी । इति मेदिनी । दे, १० अस्याः पर्य्यायान्तरं गुणाश्च वन्दाकशब्दे द्रष्टव्याः ॥
वन्दाकः, पुं, वृक्षोपरिवृक्षः । बाँदा इति हिन्दी भाषा । तत्पर्य्यायः । पादपरुहा २ शिखरी ३ गन्धोदिनी ३ वृक्षादनी ४ वृक्षरुहा ५ काम-वृक्षः ७ देवरी ८ केशरुहा ९ तरुरुहा १० तरुस्था ११ तरुवासिनी १२ तारिणी १३ तरुभुक् १४ श्यामा १५ जलदी १६ । अस्य गुणाः । तिक्तत्वम् । शिशिरत्वम् । कफपित्त-शमनत्वम् । वातादिविनिहन्तृत्वम् । रसायनत्वम् । वशीकरणत्वम् । इति राजनिर्घण्टः ॥ अपि च ।
"वन्दाकः कटुतिक्तोष्णः मधुरस्तुवरो हरेत् ।
मङ्गल्यः कफवातास्त्रपित्तविषयहः ॥"
इति भावप्रकाशः ॥
वन्दाका, स्त्री, वन्दा । इति भरतधृतचन्द्रः ॥
वन्दाकी, स्त्री, वन्दा । इति शब्दरत्नावली ॥
वन्दारुः, त्रि, (वन्दते स्तौति अभिवादयति वा । वन्द + "शॄवन्द्योरारुः ।" ३ । २ । १७३ । इति आरुः ।) वन्दनशीलः । तत्पर्य्यायः । अभि-वादकः २ । इत्यमरः ॥ ३ । १ । २५ ॥ अभि-वादयिता ३ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ६ । ८६ । ३ ।
"[illegible]
[illegible]"
…इति कश्चित् ॥ …, स्त्री । इति …
…।)
वन्दिः, स्त्री, (वन्द + इन् …)
[illegible]

व(ब)न्दिग्राहः, पुं, (वन्दिमिव स्वल्पं गृह्णातीति । ग्रह + अण् ।) कपाटादिभेदनेन गृहप्रवेशकः । (डाकात इति भाषा ।) यथा,—
"वन्दिग्राहांस्तथा वाजिकुञ्जराणाञ्च हारिणः ।
प्रसह्यघातिनश्चैव शूलानारोपयेन्नरान् ॥
वन्दिग्राहादीन् कपाटस्थानं यानवाद नराम्
शूलानारोपयेत् । अथच यथाकारविरिशो-
पदेशः ।
"अन्यागारात्तुधान्यादीन्दिवागारभेदकान् ।
हत्वानामयुक्तं च इत्यादिविचारयन् ॥"
इति मनुस्मरणात् । इति मिताक्षराव्यवहार-
काण्डे द्रष्टव्यम् ॥
व(ब)न्दिचौरः, पुं, (वन्दिमिव निधाय चौरः अप-
हारकः । यद्वा वन्दिमिव कृत्वा गृहमद्भा-
मादधारकसमादृच तथात्वम् ।) वन्दिग्राहः ।
तत्पर्य्यायः । मायकः २ । इति हारावली ।
१३३ ॥ अभ्यागारः ३ । इति त्रिकाण्डशेषः ॥
व(ब)न्दिपाठः, पुं, (वन्दि + भावे ठक् । वन्दिः
स्तुतिस्तत्स्वरूपः पाठो यत्र ।) स्तुतिपाठः । तत्-
पर्य्यायः । मौक्तिकमौ २ । इति त्रिकाण्डशेषः ॥
व(ब)न्दी, स्त्री, (वन्द + "सर्व्वधातुभ्य इन् ।"
इति ङीष् ।) वन्दिः । इत्यमरटीकायां भरतः ॥
(यथा, कुमारे । २ । ५२ ।
[illegible]
[illegible]"
…न्दी, पुं, (वन्दते स्तौति इत्यर्थः …)
[illegible]

उर्व्वशीमशरःशैली पुरुमृथ दिवं यत्नः।"
"पुरवर्न्दमो देवभव्याः।" इति तट्टीकायां
पीयरस्वामी।)

व(ब)न्दीकारः, पुं, (बन्दीन् बलात्कार्यं करोतीति।
कृ + "कर्मण्यण्।" ३। २। १। इत्यण्।)
बन्दिग्राहः। बाकारत इति भाषा। तत्-
पर्य्यायः। साहसः १ प्रसह्यचौरः २ विलाभः
३। इति त्रिकाण्डशेषः।

वन्दा, स्त्री, (वन्दते स्तूयते इति। वदि+
अच्।) वन्दा। इति शब्दचन्द्रिका। गोरो-
चना। इति भावप्रकाशः। (वन्दनीये, त्रि।
यथा, माहिष्मत्यां १ परिच्छेदे।
"चाद्धोः परन्दरा वन्दा कर्षे लता लपी
कुरु।"
यथा च भागवते। ३। १९। २६।
"चारित्र यद्ना वन्दं तदिच्छो: परमं
पदम्।")

वन्दि, स्त्री, (वन्द्यते स्तूयते इति। वदि स्तुतौ+
"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति
इन्।) बन्धनम्। इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः।

वन्द्य, त्रि, (वन्द्यते स्तूयते देवादिवत् पूजाकाले
इति। वदि+ण्यत्।) पूज्यः। इत्युणादि-
कोषः।

वन्ध्या, स्त्री, (वने भवम्। वन+यत्।) जलम्।
इति शब्दरत्नावली। (कुटजम्। तत्पर्य्यायो
यथा,—
"कुटजं वरं वन्धं तृणाभञ्च वरोगजम्।"
इति वैद्यकरत्नमालायाम्।)

वन्य, त्रि, (वने भवः। वन+यत्।) वनोद्भवः।
इति हेमचन्द्रः। ये, ११। (यथा, रघुः। १।४५।
"वैवस्वतोत्सङ्गसिद्धे वन्यानामुपस्थितम्।
[illegible]
[illegible]।")

वन्यः, पुं, (वन+यत्।) वनशूरणः। वाराही-
कन्दः। देवनलः। इति राजनिर्घण्टः। (चोर-
[illegible]। कृष्णवर्णे यथा —
"[illegible]।
[illegible]।"
इति वैद्यकरत्नमालायाम्।)

वन्या, स्त्री, (वनानां समूहः। वनानां वा
[illegible]। वन+"पाशादिभ्यो यः।" ४। २।
४८। इति यः।) वनसमूहः। इत्यमरः। ३।
२। ३९। जलसमूहः। इति मेदिनी। ये, ११।
[illegible]। (यथा, रघुवंशे,
"[illegible]।
[illegible]।")
[illegible]। मुद्गपर्णी। [illegible]। मत्स्याक्षी।
[illegible]। इति राजनिर्घण्टः। (गोचरका।
[illegible] यथा,—
"[illegible]।
[illegible]।"

वन्यात्मा क्वचित् दृश्यते। इति वैद्यकरत्नमाला-
याम्।)

वन्योपोदकी, स्त्री, (वन्या वनोद्भूता उपोदकी।)
लताविशेषः। बनपुंड इति भाषा। तत्पर्य्यायः।
वनजा २ वनसाख्या ३। अस्या गुणाः। तिक्त-
त्वम्। कटुत्वम्। उष्णत्वम्। रोचनत्वञ्च। इति
राजनिर्घण्टः।

वन्नः, पुं, (वनति भागमर्हतीति। वन सम्भक्तौ+
"रुचिकाद्यर्ध्योति।" उणा० २। २८।
इति रन्प्रत्ययः।) अंशी। भागी। इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः।

वप, औ ञ डु ए मुण्डनबीजसन्तत्योः। इति
कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-अनिट्।)
औ, वप्ता। ञ, वपति वपते। डु, उप्त्रिमम्।
मुण्डो मुण्डितकरणम्। वपति मस्तकं नापितः।
वपति तन्तुं तन्तुवायः। यदि वपति कृषाणः
क्षेत्रमाधाय बीजम्। इति दुर्गादासः।

वपः, पुं, (वप्+घः।) केशमुण्डनम्। बीजवप-
नम्। इति वपधातोर्भावेऽल्प्रत्ययेन निष्पन्नः।

वपनं, क्ली, (वप्+भावे ल्युट्।) केशमुण्डनम्।
(यथा, मनुः। ५। १४०।
"शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम्।")
बीजाधानम्। इति मेदिनी। ने, १२२।

वपनी, स्त्री, (उप्यते मस्तकादिकमस्यामिति। वप्
+ अधिकरणे ल्युट्। ङीप्।) नापितशाला।
इति हेमचन्द्रः। ४। ६६। (तन्तुवायशाला।
इति तद्धात्वर्थदर्शनात्।)

वपा, स्त्री, (उप्यतेऽस्मिन्निति। वप्+भिदाद्यङ्। टाप्।)
छिद्रम्। (यथा, शतपथब्राह्मणे। ६।१।२।५।
"अथ वल्मीकवपा सुषिरा यद्धि छिद्रितः
भवति।") मेदः। इत्यमरः। २। ६। ६४।
(यथा, रामायणे। १। १४। ३६।
"पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः।
ऋत्विक् परमसम्पन्नः श्रपयामास शास्त्रतः।"
सा च हृदयस्थधातुः। यथा। "त्वक् च
लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयञ्च क्लोम
च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषा-
धानञ्चामाशयश्च पक्वाशयश्चोत्तरगुदश्चाधर-
गुदश्च क्षुद्रान्त्रञ्च वपा च वपावहनञ्चेति कोष्ठ-
ानि।" इति चरके शारीरस्थाने सप्तमे-
ऽध्याये।)

वपिलः, पुं, (वपति बीजमिति। वप्+इलच्।)
पिता। इत्युणादिकोषः।

वपुः, [स्] क्ली, (उप्यन्ते देवासुरभोगसाधन-
भूतानि कर्माण्यत्रेति। वप्+"अर्त्ति-
पृवपियजि।" उणा० २। ११८। इति
उसिः।) शरीरम्। इत्यमरः। २। ६। ७०।
(यथा, रघुः। ३। ४०।
"ततः परं दुष्प्रसहं द्विषद्भि-
र्नृपः वपुः [illegible]।")
[illegible]। इति मेदिनी। स, २६। (यथा,
[illegible]। १। ६६।

"अष्टानां लोकपालानां [illegible]
"वपुस्तेजोऽंशः।" इति मेदिनी।
स्वनामख्याता दक्षकन्या। सा तु
धर्म्मपत्नी। यथा, मार्कण्डेये। ५०। १९।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः [illegible]

धर्म्मार्थं प्रतिजग्राह धर्म्मो दाक्षायणीः [illegible]

वपुःस्रवः, पुं, (वपुषः शरीरात् स्रवः
यस्य।) शरीरस्थरसधातुः। इति
निर्घण्टः।

वपुनः, पुं, (वप+उनन्। वपुः+[illegible]
त्वात् यस्य नः इति केचित्।) देवः।
शब्दरत्नावली।

वपुषा, स्त्री, कृतुषा। इति भावप्रकाशः।
स्त्री। यथा, ऋग्वेदे। १। ५। ११।
"इदं न चित्रं वपुषायदस्मिं
मनुष्वितं सदमिमाय हैमे।"
"वपुषाय रूपार्थं दर्शनं दर्शनीय
तद्भाष्ये सायणः।)

वपुष्मा, स्त्री, पद्मचारिणी। इति
(काशीराजस्य कन्या। जनमेजय
सा तु रम्भा नामाप्सरा। [illegible]
काले इन्द्रेणेयमश्वप्रविष्टेषु [illegible]
जयेनेयं परित्यक्तापि [illegible]
वाक्येन गृहीता। [illegible]
अध्याये द्रष्टव्यम्।)

वप्ता, [ऋ] पुं, (वपति बीजमिति।
तृच्।) जनकः। इति मेदिनी। कृ,
जटाधरः। (नापितः। यथा, [illegible]
१४२। ४।
"यदा ते वातो अनुवाति शोचि-
र्वप्तेव श्मश्रु वपसि प्र भूम।"
"यथा वप्ता नापितो श्मश्रु
भूम भूमिं प्रवपसि प्रकर्षेण [illegible]
तद्भाष्ये सायणः।)

वप्ता, [ऋ] त्रि, (वपतीति।
तृच्।) वापकः। इति मेदिनी।
यथा, मनुः। ९। १४२।
"यदीदं वीजहृता न [illegible]
तथाप्येते क्षेत्रिका न लाभं [illegible]

वप्रं, क्ली, पुं, (उप्यतेऽस्मिन्निति। वप+
रन्।" उणा० २। २०। इति
नगरे परिखाया [illegible]
यदि प्राकारो निवेशने [illegible]
शाखम्। [illegible]
यदि प्राकारमिति। तद्वदन्ति।
इत्यमरभरतौ। क्षितिखण्डः।
इत्यादयो। (यथा, [illegible]
"तपं वपने तदाः [illegible]
[illegible]
इति वप्रं क्रियाभिः [illegible]

[illegible]

… (दधि । १ । ६ ।) …

यवः, पुं स्त्री, यवनम् । इति यवनालिरूढकोश-
विधानम् । इति [illegible] ।

यवनः, पुं, (यवनयति । यम् + "दिनेरीदुच ।" ३ । ३ । ८८ । इति अनुच् ।) यवाः । (यथा, रघुः ऊनराजे २४ अध्यायः ।

"दीर्घतालयवनासकवप्रपुरदा: सम्पन्ना- रावणसुतां: ।")

… समर्थाय: । यर- …: २ । २ । १ । ५५ । (यथा, नैषधे । १८ । ६ ।

"[illegible] ।")

यवनं, क्लो, (यम् + भावे ल्युट् ।) दर्शनम् । (यथा, रघुः । १ । १२ ।

"मधुराणां दधीं पापि यवनाय प्रदापयेत् ।"

यावत्कालमपि । यथा, कथासरित्सागरे । ६४ । १७ ।

[illegible]

… वा जयेत् ।"

"… विष्यति ।

… ।

… ।

… ।"

"… ।

… ।

… ।"

"… ।

… ।

… ।

… ।"

"… ।

… ।

… ।

… ।"

"… ।

पाययेत् …"

मन्नार्द्धं वार्क्कदुग्धाक्तं तच्चूर्णं पाययेत् पृथक् ।
पञ्चमीमूलनकेष्वाक्तु जीवन्तीजीवकोदकैः ॥
वमनौषधमुख्यानामिति कल्पदिगीरिता ।
वीक्षेभानेन मतिमानन्यान्यपि च कल्पयेत् ॥"
इति वाभटे कल्पस्थाने प्रथमेऽध्याये ॥)

वमनः, पुं, (वमतीव शुक्लवर्णमिति । वम् + ल्युः ।) शणः । इति राजनिर्घण्टः ॥

वमनी, स्त्री, (वमन + ङीप् ।) जलौका । इति राजनिर्घण्टः ॥ (विवृतिरस्या जलौकाशब्दे ज्ञातव्या ॥)

वमनीया, स्त्री, (वमयतीति । वम् + अर्थविवक्षायाम् । अभिधानात् कर्त्तरि अनीयर् ।) मक्षिका । इति राजनिर्घण्टः ॥ वमनयोग्ये, त्रि ॥

वमिः, स्त्री, (वमनमिति । वम् + सर्व्वधातुभ्य इन् । उणा० ४ । ११७ ।) प्रच्छर्द्दिका । इत्यमरः । २ । ६ । ५५ ॥ (अस्याः सनिदानचिकित्सितं पथ्यापथ्यञ्च यथा,—
"आमये शूलरोगार्त्तिः पर्व्वभेदो भ्रमः क्लमः ।
क्रोधः शिरोव्यथा खेदो नेत्रे गम्भीरमिच्छति ।
तन्द्री वा पित्तं वापि अजीर्णाज्जायते वमिः ।
गम्भीरनेत्रो वमति विड्वन्धो वातिसार्य्यते ॥
गात्रे तन्द्री ज्वरः शूलं तथा शोषोऽतितृष्णता ।
विरक्ताक्षो भ्रमार्त्तश्च भ्रमतीवाचतं जगत् ॥
शिरोऽर्त्तिर्व्वेपथुश्चैव करपादौ हिमोपमौ ।
एतैर्लिङ्गैस्तु संयुक्तां छर्द्दिं दूरे परित्यजेत् ॥"

चिकित्सा ।

"स पञ्चमूलोऽर्द्धितः कषायः
सक्षौद्रधात्रीफलकस्य कल्कः ।
क्वाथं पिबेन्मिश्रितपिप्पलीकं
स वातछर्द्दिर्विनिवारणाय ॥"

"आमलक्या रसेनाथ शुष्कं चन्दनकं मधु ।
गुडिकामलमात्रेण लेहो हन्ति वमिं ध्रुवम् ॥
बिल्वदलकुटजत्वचोदयश्च पञ्चनिकं मधुना च
पाचयेत्कच ।
अमृतमिति चूर्णमेनमधुना द्रुतं वमिं निवारयति ॥"

"हरीतकी काकमाची च क्वाथं शर्करया युतम् ।
लाजाशर्करसंयुक्तं हन्ति पित्तवमिं द्रुताम् ॥
मातुलुङ्गरसश्चैव पथ्या शर्करया पुनः ।
हन्ति क्वाथं त्रिफलावमिं शीघ्रं नियच्छति ।
दत्त्वा त्रिवर्त्मं चोरीं वराहधमदाविनीम् ॥
नवारम्भधरश्चापि मधुशर्करयोऽन्वितम् ॥
चोरयेत् शहदं वा सुधाशर्करयोऽन्वितम् ॥"
"जम्ब्वाम्रयोः पल्लवानि दाडिमामलकानि वा ।
मधुपर्णीशिरं क्वाथं दत्त्वाऽश्वु छर्दिं द्रुताम् ॥
जम्बोश्चैवं वदरमज्जाश्चिन्तूर्णं
दुग्धा च चन्दनदिनं मधुरं मदनात् ।
कंदोद्धर्त्तं वमनमाशु निरन्ति पुंसां
भक्तोद्भवः मधुलिहः गोऽपि लेहः ॥"
"कर्णमञ्जरी रोगे विशेषो हि उद्भवे ।
गर्भिणी ....ऽपि वमनं हान्ति धुवम् ।
वन हिमकन्दनवनिन्दा दैवामना मधु ।

क्रिमिजं वमनं ज्ञात्वा क्रिमीणां शमनक्रिया ॥
न चोष्णं नातिचाम्लञ्च न तीक्ष्णं न तथा लघु ।
तण्डुलीयकशाकं वा न मद्यं काञ्जिकं न तु ॥
वमिरोगे च कथितं पथ्यञ्चात्र शृणुष्व मे ।
आनूपं शालिभक्तञ्च शतपुष्पा च वास्तुकम् ॥
आढ़की मुद्गयूषञ्च दधि सर्पिर्गुड़ान्वितम् ।
अङ्गारमण्डका चाथ वमौ पथ्यं प्रशस्यते ॥
यथाबलं यथाकालं यथारोगं यथानलम् ।
तथा दृष्ट्वा प्रकुर्व्वन्ति पथ्यानां समुपक्रमम् ॥
दिवानिद्रां प्रयुञ्जीत वमौ श्वासेऽतिसारके ।
हिक्काशोथे तथा जीर्णे वमिक्लेदेऽथवा पुनः ॥
न चोष्णतोयपानञ्च नातिभोजनमेव च ।
तथावनञ्च कर्त्तव्यं वर्ज्जयेद्दमनाहितैः ॥"
इति वैद्यके ॥)

अथ छर्द्यधिकारः । तत्र छर्द्दिविप्रकृष्टसन्निकृष्टनिदानं पूर्व्वरूपं संप्राप्तिञ्चाह ।
"अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।
अकाले चातिमात्रैश्च तथा सात्म्यैश्च भोजनैः ॥
आमाशयाच्चघोरेगादजीर्णात् क्रिमिदोषतः ।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः ॥
दुष्टैर्दोषैः पृथक् सर्व्वैर्वीभत्सालोकनादिभिः ।
वीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लिश्यते बलात् ॥"
आमात् असम्यक् पक्वादन्नात् । अजीर्णात् यथास्थिताद्भुक्तात् । आपन्नसत्त्वायाः गर्भिण्याः । अन्यैर्वीभत्सैर्विकृतैर्हेतुभिः घृणाकारिभिः अनिष्टश्रवणस्पर्शनदर्शनभक्षणघ्राणैः उत्क्लिश्यते ऊर्द्धं नीत्वा मुखादूर्द्धं निःक्रियते ॥ * ॥ पूर्व्वरूपमाह ।
"हृल्लासोद्गाररोधौ च प्रसेको लवणस्तथा ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणम् ॥"
छर्द्देः सामान्यलक्षणमाह ।
"छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥
छादयन् पूरयन् अङ्गभञ्जनैः अङ्गभेदैः अर्द्दयन् अङ्गानि पीडयन् । वक्त्रं प्रधावितः वक्त्रं प्रतिधावितः दोषः छर्द्दिर्निरुच्यते ॥" * ॥ वातजाया लक्षणमाह ।
"हृत्पार्श्वपीडामुखशोषमूर्द्ध-
नाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नकृष्णं तनुकं कषायम् ॥
कृच्छ्रेण चाल्पं महता च वेगे-
नार्त्तोऽनिलाच्छर्द्दयतीह दुःखम् ॥"
कषायं कषायरसम् । दुःखं दुःखमिव छर्द्दयति । * । पित्तजामाह ।
"मूर्च्छापिपासामुखशोषमूर्द्ध-
ताल्वक्षिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितञ्च तिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥" * ॥
कफजामाह ।
"तन्द्रास्यमाधुर्य्यकफप्रसेक-
सन्तोषनिद्रारुचिगौरवार्त्तः ।

स्निग्धं घनं स्वादु कफाद्विशुद्धं
सलोमहर्षोऽल्परुजं वमेत्तु ।'
वरेण्यं, क्ली, (व्रियते लोकैरिति । वृ + "वृञ एण्यः ।" उणा० ३ । ९८ । इति एण्यः ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥

वरेण्यः, त्रि, (वृ + एण्यः ।) प्रधानः । इत्यमरः । ३ । १ । ५७ । (यथा, भट्टिः । १ । ४ ।
“पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः ॥”
वरणीयः । इति मल्लिनाथः । यथा, कुमारे । ७ । ९० ।
“संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन ॥”
पुं, पितृगणनामान्यतमः । यथा, मार्कण्डेये । ९६ । ४५ ।
“वरो वरेण्यो वरदो पुष्टिदस्तुष्टिदस्तथा ।”
भृगुपुत्रविशेषः । यथा, महाभारते । १३ । ८५ । १२९ ।
“भृगोस्तु पुत्राः सप्तासन् सर्व्वे तुल्या भृगो-र्गुणैः ।
च्यवनो वज्रशीर्षश्च शुचिरौर्वस्तथैव च ।
शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते ॥”
महादेवः । यथा, तत्रैव शिवसहस्रनामकथने । १३ । १७ । १२६ ।
“वरो वराहो वरदो वरेण्यः सुमहास्वनः ॥”)

वरोली, स्त्री, गौधेरकः । इति त्रिकाण्डशेषः ॥

वरेश्वरः, पुं (वरः श्रेष्ठ ईश्वरः ।) शिवः । इति शब्दरत्नावली ॥

वरोटं, क्ली, (वराणि श्रेष्ठानि उटानि दलानि यस्य ।) मरुवकपुष्पम् । इति शब्दमाला ॥

वरोलः, पुं स्त्री, (वृ + ओलच् ।) वरटः । इति त्रिकाण्डशेषः ॥

वर्करः, पुं, (वृक्यते वृक्ते इति । वृक आदाने + बहुलमन्यत्रापि अरः । इत्युज्ज्वलदत्तः । ३ । १३१ ।) युवपशुः । इत्यमरः । २ । १० । २३ ॥ मेषशावकः । इति तट्टीकायां भरतः ॥ परिहासः । (यथा, अमरुशतके । ७ ।
“कान्ते केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे
किन्नो वर्करकर्करैः प्रियसखैराक्रम्य विक्रीयते ॥”)
छागः । इति मेदिनी । रे, २१० ॥

वर्कराटः, पुं, (वर्करं परिहासं अटति गच्छतीति । अट् + अण् ।) कटाक्षः । तरुणादित्यरोचिः । नारीपयोधरोत्सङ्गकान्तदत्तनखक्षतः । इति मेदिनी । टे, ६५ ॥

वर्गः, पुं, (वृज्यते इति । वृजी वर्ज्जने + घञ् ।) सजातीयसमूहः । (यथा, रघुः । २ । ४ ।
“व्रताय तेनानुचरेण धेनो-
र्न्यषेधि शेषोऽप्यनुयायिवर्गः ॥”)
समानधर्म्मिभिः प्राणिभिरप्राणिभिरुपलक्षितं द्वन्द्वम् । यथा कवर्गः । अत्र कत्वखत्वादिना विजातीयत्वेऽपि स्थानसाम्यमस्ति । इत्यमरभरतौ ॥ ग्रन्थपरिच्छेदः । यथा,—
“सर्गो वर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ।
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः ॥”
इति त्रिकाण्डशेषः ॥
समानाङ्कद्वयस्य पूरणम् । तत्पर्य्यायः । कृतिः २ । वर्गकरणसूत्रं वृत्तद्वयम् ।
“समद्विघातः कृतिरुच्यतेऽथ
स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः ।
स्वस्वोपरिष्टाच्च तथापरेऽङ्का-
स्त्यक्त्वान्त्यमुत्सार्य्य पुनश्च राशिम् ॥
खण्डद्वयस्याभिहतिर्द्विनिघ्नी
तत्खण्डवर्गैक्ययुता कृतिर्वा ।
इष्टोनयुग्राशिवधः कृतिः स्या-
दिष्टस्य वर्गेण समन्वितो वा ॥” ॥
अस्योद्देशकः ।
“सखे नवानाञ्च चतुर्द्दशानां
ब्रूहि त्रिहीनस्य शतत्रयस्य ।
पञ्चोत्तरस्याप्ययुतस्य वर्गं
जानासि चेद्वर्गविधानमार्गम् ॥”
न्यासः । ९ । १४ । २९७ । १०००५ । एषां यथोक्तकरणेन जाता वर्गाः ८१ । १९६ । ८८२०९ । १००१०००२५ । अथवा नवानां खण्डे ४ । ५ । अनयोराहतिः २० । द्विनिघ्नी ४० । तत्खण्डवर्गैक्येन ४१ । युता जाता सैव कृतिः ८१ । अथवा चतुर्द्दशानां खण्डे ६ । ८ । अनयोराहतिः ४८ । द्विनिघ्नी ९६ । तत्खण्डवर्गौ ३६ । ६४ । अनयोरैक्येन १०० । युता जाता सैव कृतिः १९६ । अथवा खण्डे ४ । १० । तथापि सैव कृतिः १९६ । अथवा राशिः २९७ । अयं त्रिभिरूनः एषयुतश्च २९४ । ३०० । अनयोर्घातः ८८२०० । त्रिवर्गेणयुतो जातो वर्गः स एव ८८२०९ । एवं सर्व्वत्रापि इति

सीमान्तज्ञो वर्गः । (स्त्री, यथा, महाभारते । १ । २१० । ११ ।
“ ...
दृष्टा धनपतेर्व्वर्गा नाम ...
मुनिश्चापानुग्राहकोऽपि ...
सुखासीनम् । ...

वर्गमूलं, क्ली, (वर्गस्य ... आद्याङ्कः ।) ...
यथा । वर्गमूले करणसूत्रं वृत्तम् ।
“त्यक्त्वान्त्याद्विषमात् कृतिं ...
त्यक्तालब्धकृतिं तदाद्यविषमाल्लब्धं ...
पङ्क्त्यां पङ्क्तिहृते समेऽन्य ...
पङ्क्त्यां तद्द्विगुणं ...
... स्यात् पदम् ॥”
अस्योद्देशकः ।
“मूलं चतुर्णाञ्च तथा नवानां
पूर्व्वं कृतानाञ्च सखे कृतीनाम् ।
पृथक् पृथग्वर्गपदानि विद्धि
बुद्धेर्विवृद्धिर्यदि तेऽत्र जाता ॥”
न्यासः । ४ । ९ । ८१ । १९६ । ८८२...
१०००२५ । लब्धानि क्रमेण मूलानि ...
९ । १४ । २९७ । १०००५ । ...
वर्गो वर्गमूलम् ॥
सजातीयाङ्कत्रयस्य घातः घनः । तस्य च समुदायवशीकरणं ... लिखितानि प्रसङ्गादत्र ... करणसूत्रं वृत्तत्रयम् ।
“समत्रिघातश्च घनः प्रदिष्टः
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः
आदित्रिनिघ्नस्तत आदिवर्गः
त्र्यन्त्याहतोऽथादिघनश्च सर्व्वे ।
स्थानान्तरत्वेन युता घनः स्यात्
प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यम्
एवं मुहुर्व्वर्गघनप्रसिद्धा-
वाद्याङ्कतो वा विधिरेष कार्य्यः ।
खण्डाभ्यां वा ...
वर्गमूलघनस्वघ्नो वर्गराशेर्घनो ...
अस्योद्देशकः ।
“नवघनं त्रिघनस्य घनं तथा
कथय पञ्चघनस्य घनञ्च मे ।
घनपदञ्च ततोऽपि घनात् सखे
यदि घनेऽस्ति घना भवतो मतिः ॥”
न्यासः । ९ । ३ । १२१ ।
७२९ । १९६८३ । १९५ ...
९ । अस्य खण्डे ४ । ५ । ...
१८० त्रिनिघ्नः ५४० । ...
युतो जातो घनः ७२९ । ...
अस्य खण्डे २० । ७ । ...
११३४० । खण्डघनैक्येन ...
घनः १९६८३ । अथवा ...

। घन: ८। अयं क्रमो जातचतुर्णां
। अथवा राशि: ६। अस्य मूलम् ३।
। अस्य वर्गो नवानां घन: ७२६।
र्गराशिघन: स एव वर्गमूलघनवर्ग: ।
॥ अथ घनमूले करणसूत्रं वृत्तद्वयम्।
आद्यं घनस्थानमथाघने द्वे
नस्तयात्त्याद्घनतो विशोध्यम्।
नं पृथकस्थं पदमस्य कृत्वा
त्रिघ्ना तदाद्यं विभजेत् फलन्तु ।
द्रन्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य ।
नं तदाद्याद्घनमूलमेवं
द्भिर्भवेदेवमतः पुनश्च ।”
क:। पूर्व्वघनानां मूलार्थं न्यास: ७०६।
। १६५३१२५। क्रमेण लब्धानि मूलानि
। १२५। इति लीलावत्यां घनमूलम् ।
पुं, (वर्गेषु उत्तम: ।) चराणां अर्थात्
टतुलामकरराशीनां प्रथमोऽंश: ।
नां अर्थाद्वृषसिंहवृश्चिककुम्भराशीनां
ऽंश:। द्व्यात्मकानां अर्थात् मिथुनकन्या-
राशीनां नवमोऽंशश्च। यथा,—
नां प्रथमे चांशे स्थिराणां पञ्चमे तथा।
ात्मकानाञ्च वर्गोत्तम इति स्मृत: ॥”
। राशीनां स्वकीयनवांश:। यथा,—
शस्तु राशीनां वर्गोत्तम इति स्मृत: ॥”
इति ज्योतिस्तत्त्वम् ॥
र्णे। इति कविकल्पद्रुम: ॥ (भ्वा०-
-अक०-सेट् ।) ङ, वर्धते । । इति दुर्गा-
।
[ ] स्त्री, (वर्धते इति। वर्ध+“सर्व्व-
ोऽच्युन् ।” उणा० ४। १८८। इति
।) रूपम्। विष्ठा। (यथा, सुश्रुते
नने ३० अध्याये ।
“मूत्रविट्‌: महतश्चोऽरन्यद्गो
ष्णापान: [illegible] ।
वर्चो मुखान्नलमत्वं [illegible]
[illegible] मानिलं मारतेन ॥”)
। इति मेदिनी । सं, १५ ॥ (यथा, भाग-
८। ११। २१।
यदस्य तथा [illegible] वर्च: सुवीर्य्यम् ॥”
[illegible]” इति महाभारते आदि: । अन्नम् ।
तथैव । ३ । २४ । १ ।
[illegible] अभिमातोऽप्यत्र ।
[illegible] पाहसे ॥”
[illegible] पहि ।” इति महाभारते
[illegible])
[illegible] स्त्री, (वर्चस्+[illegible]) विष्ठा ।
[illegible] । २ । ९ । ९८ । ([illegible] । यथा,
भारते । ११ । २५ । १८ ।
[illegible]
[illegible] ॥”)
[ ] पुं, ([illegible] वर्चस्+

“असुमायामेधेति ।” ५ । २ । १२१ । इति
विनि: ।) चन्द्र: । यथा,—
“रोहिण्यामभवद्बर्चा वर्चस्वी येन चन्द्रमा: ॥”
इति वह्निपुराणम् ॥
वर्चा:, [स्] पुं, (वर्चते इति । वर्च+असुन् ।)
चन्द्रपुत्र: । इति मेदिनी । से, ११ ॥ अन्यच्च ।
“रोहिण्यामभवद्वर्चा वर्चस्वी येन चन्द्रमा: ।”
इत्यादि वह्निपुराणे सगांशुकीर्त्तने सतीदेह-
त्यागनामाध्याय: ॥
वर्ज्जनं, क्ली, (वृज्+ल्युट् ।) त्याग: । हिंसा ।
इति मेदिनी । ने, १२२ ॥ मारणम् । इति
हेमचन्द्र: ॥
वर्ज्जित:, त्रि, त्यक्त: । वृजधातो: क्तप्रत्ययेन
निष्पन्न: । यथा,—
“अवघ्रातञ्चावधूतं सरोषं विस्मयान्वितम् ।
गुरोरपि न भोक्तव्यमन्नं संस्कारवर्ज्जितम् ॥”
इति कौर्म्मे उपविभागे १६ अध्याय: ॥
वर्ज्जनीयं, त्रि, (वृज्+अनीयर् ।) वर्ज्जनयोग्यम् ।
त्यक्तव्यम् । वर्ज्जनीयान्नं यथा,—
“राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नं कर्म्मकारिण: ।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्ज्जयेत् ॥
चक्रोपजीविरजकतस्करध्वजिनां तथा ।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्ज्जयेत् ॥
कुलालचित्रकर्म्मान्नं वार्द्धुषे: पतितस्य च ।
पौनर्भवच्छात्रिकयोरभिशस्तस्य चैव हि ॥
सुवर्णकारशैलूषव्याधबद्धातुरस्य च ।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाण्डिकस्य च ।
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च ।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषत: ॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे ।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजिन: ।
अपाङ्‌क्तान्नञ्च सङ्घान्नं शस्त्राजीवस्य चैव हि ।
क्लीवसंन्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि ।
भीतस्य रुदितस्यान्नमवक्रुष्टं परिक्षुतम् ।
ब्रह्मद्विष: पापरुचे: श्राद्धान्नं सूतकस्य च ।
वृथापाकस्य चैवान्नं शावान्नं श्वशुरस्य च ।
अप्रजानान्तु नारीणां भृतकस्य तथैव हि ।
कारुकान्नं विशेषेण शस्त्रविक्रयिणस्तथा ।
शौण्डान्नं घटिकान्नञ्च भिषजामन्नमेव च ।
विद्धप्रजननस्यान्नं परिवेत्त्रन्नमेव च ।
पुनर्भुवो विशेषेण तथैव दिधिषूपते: ॥
अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम् ।
गुरोरपि न भोक्तव्यमन्नं संस्कारवर्ज्जितम् ॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्ने व्यवस्थितम् ।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बि-
षम् ॥”
इति कूर्म्मपुराणे उपविभागे १६ अध्याय: ॥
वर्ज्य:, त्रि, (वृज् + ण्यत् ।) वर्ज्जनीय: । यथा,—
[illegible]
[illegible]
[illegible]
[illegible]

भक्ष्या स्मृते सदा वर्ज्या ग्रामसूकरकुक्कुटौ ।
पितृदेवादिशेषञ्च श्राद्धे ब्राह्मणकाम्यया ।
प्रोक्षितञ्चौषधार्थञ्च खादन् मांसं न दोषभाक् ॥”
इति मार्कण्डेयपुराणे सदाचाराध्याय: ॥
वर्ण, क वर्णे । इति कविकल्पद्रुम: ॥ (चुरा०-
पर०-सक०-सेट् ।) क, वर्णयति । अयं कश्चिन्न
मन्यते । वर्ण: शुक्लादिक्रिया । इति दुर्गादास: ॥
वर्ण, त् क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने । इति
कविकल्पद्रुम: ॥ (अदन्त चुरा०-पर०-सक०-
दीपने अक०-सेट् ।) वर्णयति वर्णापयति कवि:
स्तौतीत्यर्थ: । वर्णयति तन्तुं विस्तारयतीत्यर्थ: ।
वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थ: ।
वर्णयति उद्युङ्क्ते दीप्यते वेत्यर्थ: । शुक्लाद्यु-
द्युक्तिदीपने इत्यपि पाठ: । इति दुर्गादास: ॥
वर्णं, क्ली, (वर्णयतीति । वर्ण+अच् ।) कुङ्कुमम् ।
इति हेमचन्द्र: ॥
वर्ण:, पुं, (व्रियते इति । वृ+“कृवृजृसिद्रुपन्य-
निस्वपिभ्यो नित् ।” उणा० ३ । १० । इति
न: । स च नित् ।) जाति: । सा च ब्राह्मण:
क्षत्रियो वैश्य: शूद्रश्च । एषामुत्पत्त्यादिर्यथा ।
यदा भगवान् पुरुषरूपेण सृष्टिं कृतवान् तदास्य
शरीरात् चत्वारो वर्णा उत्पन्ना: । मुखतो
ब्राह्मणा: बाहुत: क्षत्रिया: ऊरुतो वैश्या:
पादत: शूद्रा जाता: । एतेषां वर्णानां धर्म्मा:
शास्त्रेषु निरूपिता: सन्ति । तत्र ब्राह्मणधर्म्मा
उच्यन्ते । अध्ययनं यजनं दानञ्चेति । जीविका-
र्थञ्च: अध्यापनं याजनं प्रतिग्रहश्चेति । १ ।
क्षत्रियस्य षडो धर्म्मा: । अध्ययनं यजनं
दानञ्च । प्रजानां रक्षणं जीविका । २ । वैश्यस्य
षडो धर्म्मा: । अध्ययनं यजनं दानञ्च । चतस्रो
जीविका: । कृषि: गोरक्षणं वाणिज्यं कुसीद-
ञ्चेति । ३ । शूद्रस्य तु ब्राह्मणादिसेवा शुश्रूषा
धर्म्मो जीविका च । ४ । ब्राह्मणा व्यापार-
भेदेन [illegible] भवन्ति । ब्रह्मचारी गृहस्थ:
वानप्रस्थ: संन्यासी च । तत्र उपनयनानन्तरं
नियमं कृत्वा यो गुरो: समीपे स्थित्वा शास्त्र-
वेदाध्ययनं करोति स ब्रह्मचारीत्युच्यते । १ ।
शास्त्रवेदाध्ययनं समाप्य यो दारपरिग्रहं कृत्वा
स्वधर्म्माचरणं करोति स गृहस्थ उच्यते । २ ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

ब्रह्मोवाच ।

"वर्णादिभ्यो हरिरेव पूज्यः स्वायम्भुवादिभिः ।
विप्रादीनां च धर्मांश सद्धर्मं व्यास वै शृणु ।
यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट् कर्माणि द्विजोत्तमे ॥
दानमध्ययनं यज्ञो धर्मः क्षत्रियवैश्ययोः ।
दण्डस्तथा क्षत्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्मसाधनम् ।
कारुकर्म्मस्तथाजीवः पाकयज्ञोऽपि धर्मतः ॥
भिक्षाचर्याथ शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्ध्याकर्माग्निकार्यञ्च धर्मोऽयं ब्रह्मचारिणः ॥
सर्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्व्विधम् ।
ब्रह्मचार्य्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः ।
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् ।
गृहस्थस्य समासेन धर्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ।
ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्य्याधना-
दिकम् ।
एकाकी यस्तु विचरेत् उदासीनः स मौक्षिकः ॥
भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्मोऽयं वनवासिनः ।
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ।
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
भैक्ष्यं श्रुतञ्च मौनित्वं तपो ध्यानं विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
कर्म्मसन्न्यासिनः केचित् त्रिविधः पारमेष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
प्रथमा भावना पूर्वे मोक्षे त्वक्षरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
धर्म्मात् संजायते मोक्षः अर्थात् कामोऽभि-
जायते ।
प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म्म वैदिकम् ।
ज्ञानपूर्वं निवृत्तं स्यात् प्रवृत्तं यदतोऽन्यथा ।
क्षमा दमो दया दानमलोभस्त्याग एव च ।
आर्जवञ्चानसूया च तीर्थानुसरणं तथा ।
सत्यं सन्तोषमास्तिक्यं तथा चेन्द्रियनिग्रहः ।
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ।
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता ।
[illegible] ।
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम् ।
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तिनाम् ।
गान्धर्व्वं शूद्रजातीनां परिचारे च वर्त्तिनाम् ॥"

इति गारुडे ४८ अध्यायः ॥ * ॥

अन्यच्च ।

"ब्राह्मणस्य तु वक्ष्यामि शृणु कर्म्म वसुन्धरे ! ।
यानि कर्म्माणि कुर्व्वीत मम भक्तिपरायणः ॥
षट्कर्म्मनिरतो भूत्वा अहङ्कारविवर्ज्जितः ।
लाभालाभं परित्यज्य भिक्षाहारी जितेन्द्रियः ॥
मम कर्म्मसमायुक्तः पैशुन्येन विवर्ज्जितः ।
शास्त्रानुसारी मध्यस्थो न दृष्टः शिशुचेतनः ॥
एतद्वै ब्राह्मणः कर्म्म एकचित्तो जितेन्द्रियः ।
इष्टापूर्त्तञ्च कुरुते स मामेति वसुन्धरे ! ॥
क्षत्रियाणां प्रवक्ष्यामि मम कर्म्मसु तिष्ठताम् ।
यानि कर्म्माणि कुर्व्वन्ति क्षत्रिया मध्यसंस्थिताः ॥
दानशूरश्च कर्म्मज्ञो यज्ञेषु कुशलः शुचिः ।
मम कर्म्मसु मेधावी अहङ्कारविवर्ज्जितः ॥
अल्पभाषी गुणश्चैव नित्यं भागवतप्रियः ।
गुरुविश्वासयात्मा गुह्यकर्म्मस्वतन्द्रितः ॥
अभ्युत्थानादिकुशलः पैशुन्येन विवर्ज्जितः ।
एतैर्गुणैः समायुक्तो यो मां भजति क्षत्रियः ॥
भजते मम यो नित्यं मम लोकाय गच्छति ।
वैश्यानान्तु प्रवक्ष्यामि मम कर्म्मसु तिष्ठताम् ॥
यानि कर्म्माणि कुरुते मम भक्तिपथे स्थितः ।
एतैर्गुणैः स्वधर्म्मेण लाभालाभविवर्ज्जितः ॥
ऋतुकालाभिगामी च शान्तात्मा मोह-
वर्ज्जितः ।
शुचिर्दक्षो निराहारो मम कर्म्मरतः सदा ॥
गुरुसंपूजको नित्यं युक्तो भक्तानुवत्सलः ।
वैश्यधर्म्मेस्तु संयुक्तो यो तु कर्म्माणि कारयेत् ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
अथ शूद्रस्य वक्ष्यामि कर्म्माणि शृणु माधवि ! ।
यानि कर्म्माणि कृत्वा तु शूद्रो मह्यं व्यवस्थितः ॥
दम्पती मम भक्तौ यौ मम कर्म्मपरायणौ ।
उभौ भागवतौ भक्तौ मत्परौ कर्म्मनिष्ठितौ ॥
देशकालौ च जानाति दक्षता तमसोज्झितः ।
निरहङ्कारयुक्तात्मा चातिथेयो विनीतवान् ॥
श्रद्धानोऽतिशूद्धात्मा लोभमोहविवर्ज्जितः ।
नमस्कारप्रियो नित्यं मम चिन्तायवस्थितः ॥
शूद्रकर्म्माणि मे देवि ! य एवं स समाचरेत् ।
त्यक्ता सर्व्वकर्म्माणि शूद्रमेव भजाम्यहम् ॥"

इति वाराहे विप्रकर्म्मोत्पत्तिनामाध्यायः ॥

अपरञ्च ।

सुकेशिरुवाच ।

"निशाचरा चातुराश्रम्यं विस्तरान्मे तपोधनाः ।
आचक्षध्वं न मे तृप्तिः शृण्वतः प्रतिविद्यते ॥

ऋषय ऊचुः ।

कृतोपनयनः सम्यक् ब्रह्मचारी गुरौ वसन् ।
तत्र धर्म्मोऽस्य यस्तञ्च कथ्यमानं निशामय ॥
स्वाध्यायोऽथाग्निशुश्रूषा स्नानं भिक्षाटनं तथा ।
गुरौ निवेद्य तच्चाद्यमनुज्ञातेन विप्रजः ॥
धर्म्मार्थकाममोक्षाणां सम्यक् प्रलुप्तभावनम् ।
वैश्यतुर्यः तदेवैव गुरुपरोऽपूर्व नियतः ॥

अवाप्य सम्यग्वेदान् वेदौ वा ...

ततो वराङ्गना दद्याद्गुरवे ...
गार्हस्थ्याश्रमकामस्तु ...
वानप्रस्थाश्रमश्चापि चतुर्थं ...
तथैव च गुरोर्गेहे द्विजो ...
गुरोरभावे तत्पुत्रं तद्वदेव शिष्ये ...
एवं जयति मृत्युं स द्विज ...
... १४ ...
व्यसनानकुला कन्यामुद्वहेत् ...
स्वकर्म्मणा धनं लब्ध्वा ...
सम्यक् संप्रीणयेद्भक्त्या ...
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं ...
क्षत्रियस्यापि गदिता य आश्र ...
वैखानसत्वं ...
गार्हस्थ्यमुत्तमं ...
स्वानि वर्णाश्रमोक्तानि ...
यो हापयति तस्यासौ ...

इति वामनपुराणे ।

पुनश्च ।

श्रीउर्व्व उवाच ।

"ब्राह्मणक्षत्रियविशां शूद्राणां ...
स्वमेकाग्रमना भूत्वा शृणु ...
दानं दद्याद्यजेद्देवान् यज्ञैः ...
नित्योदकी भवेद्विप्रः ...
इत्यर्थं याजयेच्चान्यानध्यापयेत् ...
कुर्य्यात् प्रतिग्रहादानं शुक्ला ...
शुश्रूषायां तु शूद्रः ...
समात् । इति तट्टीका ।
...
मैत्री समस्तसत्त्वेषु ...
आर्य्येषि ...
ऋतावभिगमः ...
दानानि दद्यादिच्छातो ...

यज्ञेश्च विविधैर्यज्ञैरधीयीत च ...
शुश्रूषाजीवो महीरक्षाप्रदा ...
तस्यापि प्रथमे कल्पे ...
धरित्रीपालनेनैव कृतकृत्यो ...
भवन्ति ...
दुष्टानां शासनाद्राजा ...
प्राप्नोत्यभिमताल्लोकान् वर्णसंस्था ...
पाशुपाल्यं वाणिज्यं ...
वैश्याय जीविका ब्रह्मा ददौ लोक ...
तस्याप्यध्ययनं यज्ञो दानं धर्म्मश्च ...
नित्यनैमित्तिकादीनामनुष्ठानं ...
द्विजातिसंश्रयं कर्म्म तादर्थ्यं ...
क्रयविक्रयजैर्वापि धनैः कारुकर्म्मो ...
दानञ्च दद्यात् शूद्रोऽपि पाकयज्ञैर्यजेत ...
पित्रादिकञ्च वै सर्व्वं शूद्रः कुर्व्वीत ...
भृत्यादिभरणार्थाय सर्व्वेषाञ्च ...
ऋतुकालाभिगमनं स्वदारेषु ...

स्वृतेषु निमित्ता नामिनाहिता ।
सेवापापो मङ्गलं प्रियवादिता ॥
ा यथा महद्‌कार्य्यन्तं नरेश्वर ।
च सामान्या वर्णानां कथिता गुणाः ॥
ाच सर्व्वथाऽमि सामान्यजनाः ।
ायस्तीव विप्रादीनामिमान् शृणु ॥
र्म द्विजस्योक्तं वैश्यकर्म तथापदि ।
ञ्च वैश्योक्तं शौद्रं कर्म्म न चैतयोः ॥
क्ति सत्याम्बुभाभ्यामपि पार्थिव ।
द् कर्म्मणं न कुर्व्वीत कर्म्म सङ्करम् ॥
दिता राजन् वर्णधर्म्मा मया तव ।
ामिनां सम्यक्तनुवतो मे निशामय ॥८॥
और्व्व उवाच ।
ोपनयनो वेदाहरणतत्परः ।
दवेद्भूप ब्रह्मचारी समाहितः ॥
ायता तत्र कार्य्यं शुश्रूषणं गुरोः ।
चरता कार्य्या वेदश्च कृतबुद्धिना ॥
दे रविं भूप तथैवाग्निं समाहितः ।
तथा कुर्य्याद्‌गुरोरप्यभिवादनम् ॥
ाठेद्‌ब्रजेद्याति नीचैरासीत चासति ।
गुरौ दृष्यश्च प्रतिकूलं न संभजेत् ॥
ः पठेद्वेदं नान्यचित्तः पुरःस्थितः ।
च भिक्षान्नमश्नीयाद्‌गुरुणा ततः ॥
देयः पूर्व्वमाचार्य्येणावगाहिताः ।
मादिकं चास्य यच्चं कल्यमुपानयेत् ॥
ाहृतेदश्च ततोऽनुज्ञामवाप्य वै ।
ामावसेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः॥१॥
ा चाप्तदारस्तु धनं प्राप्य स्वकर्म्मणा ।
ार्य्यमखिलं कुर्य्याद्‌भूपाल ! शक्तितः ॥
ण पितृनर्च्चेद्यज्ञैर्देवांस्तथातिथीन् ।
ींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥
ंस्तथा च भूतानि वात्सल्येनाखिलं जगत् ।
न लोकान् पुरुषो निजकर्म्मसमर्ज्जितान् ॥
ुक्षश्च ये केचित् परिव्राट् ब्रह्मचारिणः ।
व प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥
रणकार्य्येषु तीर्थस्नानाय च प्रभो ! ।
ा वसुधां विप्राः पृथिवीदर्शनाय च ॥
ता ह्यनाहारा यत्र सायं गृहास्तु ये ।
ृहस्थः सर्व्वेषां प्रतिष्ठा योनिरेव च ॥
ागतदानादि वक्तव्यं मधुरं वचः ।
ानां दद्याच्च शयनासनभोजनम् ॥
थर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ।
ा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥
ानमहङ्कारो दम्भश्चैव गृहे सतः ।
ापोपघातौ च पारुष्यञ्च न शस्यते ॥
सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
न्धविनिर्म्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥
ारियवा राजन् कृतकृत्यो गृहाश्रमी ।
भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥२॥
र्णफलाहारः केशश्मश्रुजटाधरः ।
शायी भवेत्तत्र मुनिः सर्व्वातिथिर्नृप ॥
ाशकुशैः कुर्य्यात् परिधानोत्तरीयके ।

तद्वत्सिषवणं स्नानं शस्तमस्य नरेश्वर ॥
देवताभ्यर्च्चनं होमः सर्व्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ॥
वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपश्चास्य राजेन्द्र शीतोष्णादिसहिष्णुता ॥
यस्त्वेतां नियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान्॥३॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ।
त्रैवर्गिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्ज्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्‌गृहान् ॥
काम क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राट् निर्म्ममो
भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च मुखे जुहोति ।
विप्रस्तु भैक्ष्योपगतैर्हविर्भि-
श्चिताग्निनां स व्रजति स्म लोकान् ।”
चिताग्नीनां अग्निचितामित्यर्थः । चिताग्निना
इति वा पाठः । इति तट्टीका ॥
“मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥” ४ ॥
इति विष्णुपुराणे ३ अंशे ९८ अध्यायौ ॥५॥
प्रकारान्तरेण तेषामादिरुत्पत्तिर्यथा,—
“ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा ।
तस्मात् पद्मात् समभवद्‌ब्रह्मा वेदमयो विधिः ॥
प्रजाविसर्गं विविधं मानसो मनसाऽसृजत् ।
अहङ्कारनाद्यानेव पूर्व्वं ब्रह्मा प्रजापतिः ॥
आत्मतेजोभिर्निर्वृत्तान् भास्कराग्निसमप्रभान् ।
ततः सत्यञ्च धर्म्मञ्च तपो ब्रह्म च शाश्वतम् ॥
आचारञ्चैव शौचञ्च स्वर्गाय विदधे विभुः ।
देवदानवगन्धर्व्वा दैत्यासुरमहोरगाः ॥
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ! ॥
ये चान्यभूतसंघानां वर्णास्तांश्च विनिर्म्ममे ।
ब्राह्मणानां सितो वर्णः क्षत्रियाणाञ्च लोहितः ॥
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ॥
भरद्वाज उवाच ।
चातुर्व्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्व्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥

कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा
श्रमः ।
सर्व्वेषां नः प्रभवति कस्माद्वर्णो विभज्यते ॥
स्वेदमूत्रपुरीषाणि श्लेष्मापित्तं सशोणितम् ।
तनुः क्षरति सर्व्वेषां कस्माद्वर्णो विभज्यते ॥
जङ्गमानामसंख्येयाः स्थावराणाञ्च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥
भृगुरुवाच ।
न विशेषोऽस्ति वर्णानां सर्व्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा पूर्व्वसृष्टं हि कर्म्मभिर्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रिय-
साहसाः ।
त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां
गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसानृतप्रिया लुब्धाः सर्व्वकर्म्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां
गताः ॥
इत्येतैः कर्म्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ॥
विहिता ब्रह्मणा पूर्व्वं लोभात्त्वज्ञानतां गताः ।
ब्राह्मणा धर्म्मतन्त्रस्थास्तपस्तेषां न नश्यति ॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ।
ब्रह्म चैव परं सृष्टं ये न जानन्ति तेऽद्विजाः ॥
ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परैः ।
आदिदेवसमुद्भूता ब्रह्ममूलाक्षयाव्ययाः ।
सा सृष्टिर्मानसी नाम धर्म्मतन्त्रपरायणाः ॥
भरद्वाज उवाच ।
ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ! ।
वैश्यः शूद्रश्च विप्रर्षे तद्‌ब्रूहि वदतांवर ॥
भृगुरुवाच ।
जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः
शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथाद्रोह आनृशंस्यं क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्रजं सेवते कर्म्म वेदाध्ययनसंयुतः ।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः ॥
सर्व्वभक्षरतिर्नित्यं सर्व्वकर्म्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैतद्भवेल्लक्ष्यं द्विजे चैतन्न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥
मान्धातोवाच ।
के धर्म्माः सर्व्ववर्णानां चातुर्व्वर्ण्यस्य के पृथक् ।
चातुराश्रम्यधर्म्माश्च राजधर्म्माश्च के मताः ॥
नारद उवाच ।
अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।

प्रजनः स्वेषु दारेषु शौचमद्रोह एव च।
आर्ज्जवं भृत्यभरणं नव ते सार्व्ववर्णिकाः।
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम्।
दममेव महाराज धर्म्ममाहुः पुरातनम्।
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते।
तं चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि।
अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम्।
कुर्व्वीतापत्यसन्तानमथो दद्याद्यजेत च।
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते॥*॥
क्षत्त्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव।
दद्याद्राजा न याचेत यजेत न च याजयेत्।
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम्।
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः।
अविक्षतशरीरो हि संग्रामाद्यो निवर्त्तते।
क्षत्त्रियस्य तु तत् कर्म्म नोभयञ्च यशःप्रदम्।
क्षत्त्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परः।
नास्य कृत्यतमं किञ्चिदन्यद्दस्युनिबर्हणात्।
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते।
तस्माद्राज्ञा महाराज योद्धव्यं धर्म्मशीलिना।
प्रजाः स्वेषु च धर्म्मेषु स्थापयेन महीपतिः।
धर्म्मार्थेन हि कर्म्माणि कारयेत् सततं
प्रजाः।
परमां सिद्धिमाप्नोति नृपतिः परिपालनात्।
कुर्य्यादन्यन्न वा कुर्य्यादैन्द्रो राजन्य उच्यते॥*॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः।
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममर्ज्जयन्।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत्।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्।
ब्राह्मणाय च राज्ञे च सर्व्वाः परिददे प्रजाः।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्।
षड्भ्य एकां पिबेद्धेनुं शताच्च मिथुनं भवेत्।
लब्धाच्च सप्तमं भागं तथा शृङ्गकलाखुरे।
सस्यानां सर्व्वबीजानामेषा सांवत्सरी भृतिः।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन॥*॥
शूद्रस्यापि हि यो धर्म्मस्तं ते वक्ष्यामि भारत।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्।
तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते।
तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात्।
शूद्र एतान् परिचरेत् त्रीन् वर्णाननसूयकः।
सञ्चयांश्च न कुर्व्वीत जातु शूद्रः कथञ्चन।
पापीयान् हि धनं लब्ध्वा वशे कुर्य्याद्गरीयसः।
राज्ञा वा समनुज्ञातः कामं कुर्व्वीत धार्म्मिकः।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते।
छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च।
यातयामानि देयानि शूद्राय परिचारिणे।
अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः।
शूद्रायैव प्रदेयानि तस्य धर्म्मधनं हि तत्।
यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत्।
कल्प्यां तस्य तु तेनाहुर्वृत्तिं धर्म्मविदो जनाः।
देयः पिण्डोऽनपत्याय भर्त्तव्यौ वृद्धदुर्ब्बलौ।
शूद्रेण च न हातव्यो भर्त्ता कस्याञ्चिदापदि।
अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये।
न हि स्वमस्ति शूद्रस्य भर्तृहार्य्यधनो हि सः।
उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च पार्थिव।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते।
तस्माच्छूद्रः पाकयज्ञैर्यजेत नच स्वयम्।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम्॥*॥

श्रीनारद उवाच।

इदानीमाश्रमाणाञ्च धर्म्मं वक्ष्यामि भूमिप।
ब्रह्मचर्य्याश्रमं तावत् शृणु सर्व्वाधिवासव।
गत्वा गुरुगृहं शिष्यो नमस्कृत्य गुरुं शुचिः।
ब्रूयादध्येतुमायातः शिष्योऽहं तव मारिष।
ततस्तस्याज्ञया नित्यमध्येतव्यं नराधिप।
सदा विचारः शास्त्रस्य गुरुपादाभिवादनम्।
सदाज्ञापालनञ्चापि ध्यानं दैवतभावना।
लाभेन येन केनापि तुष्टिः सद्भिः समागमः।
समाप्तविद्यो गुरवे दक्षिणां प्रतिपाद्य च॥*॥
गृहाश्रमं ततो गच्छेद्गुरोराज्ञामधिव्रजन्।
उद्वहेत् कुलजां कन्यां सुशीलां धर्म्मचारिणीम्।
अनहंवादिनीं सौम्यां सुचरित्रां प्रियंवदाम्।
गृहिणां प्रथमो धर्म्मोऽतिथिपूजैव पार्थिव।
अप्राप्य पूजामतिथिर्यस्य गेहान्निवर्त्तते।
स याति नरकं घोरं पुण्यं तस्मै प्रदाय च।
प्रथमं स्वागतं पृच्छेदासनञ्चापि सन्दिशेत्।
पाद्यञ्च मधुपर्कञ्च दद्यात् प्रणतिपूर्व्वकम्।
संवादञ्च प्रियालापं कुर्य्यादेव महात्मनः।
भोजनञ्च यथाशक्ति कारयेदतिथिं नृप।
देवाश्च पितरश्चापि प्रीयन्तेऽतिथिपूजने।
आतिथ्यसदृशं कर्म्म गृहस्थानां न विद्यते।
यस्य नित्यं स्थितिर्नास्ति सोऽतिथिः परिकीर्त्तितः।
सर्व्वाश्रमाणामधिको गृहाश्रम उदाहृतः।
यस्मात्तस्मिन् समायान्ति भिक्षार्थमाश्रमाश्रयाः।
पितृदेवार्च्चनं कार्य्यं गृहिणा सुखमिच्छता॥*॥
वानप्रस्थाश्रमं वक्ष्ये तृतीयं जगतीपते।
वानप्रस्थाश्रमं गच्छेत् कृतकृत्यो गृहाश्रमात्।
तदारण्यकशास्त्राणि समधीत्य स धर्म्मवित्।
ऊर्द्ध्वरेताः प्रव्रजित्वा गच्छत्यक्षरसात्मताम्।
सुते भार्य्यां परित्यज्य वनं गच्छेत् सहैव वा।
शान्तः शुद्धान्तरात्मा च सर्व्वभूतहिते रतः।
परिनिष्ठितचर्य्यस्य शाकस्य विधीयते।
वर्त्तयामीह राजेन्द्र कन्दमूलैः सुनिष्ठुरैः।
भिक्षाचर्य्याप्यधीकारः प्रमत्त इव मौनिकः।
पञ्चाग्निमध्यगो स्यान्निरग्निरनिकेतनः।
यथोपलब्धभोजी स्यात् सुनिर्दम्भो जितेन्द्रियः।
निराशीः स्यात् सर्व्वसमो निर्भयो निर्व्विकार-
वान्।
विवेकी धनशून्यो निःस्पृहः काल
संसारं स्वप्नवद्वीक्ष्य शान्तः
पत्रमूलफलाहारी जलाशी वा
निराहारोऽथवा
एवं कुर्व्वन् ... ॥*॥
चतुर्थमाश्रमं वक्ष्ये मुक्तिकारणे
गुरोः ...
विचरेत् सकलां पृथ्वीं
योगाभ्यासरतो नित्यं धर्म्मतत्त्व
धर्म्माधर्म्मविहीनो वा भिक्षुकः वि

इति पाद्मे स्वर्गखण्डे २१।२६।२७
अन्यत् नारसिंहपुराणे ५८
पुराणे मदालसोपाख्याने
अध्याये च द्रष्टव्यम्॥*॥
जातौ र भुक् इति भाषा।
प्रवेणी २ आस्तरणम् ३
कुथा ४। इत्यमरः। द्वैदि
कुथम् ६। इति भरतः।
इति ख्यातः। स च बहुविधो
पाण्डुः २ धूसरः ३ कृष्णः ४ पी
रक्तः ७ शोणः ८ बभ्रुः ९
श्यावः ११ धूम्रः १२ पिङ्गः ११
इति चामरः। गर्भस्थशावक
वर्णो भवति। इति ८
स्तुतिः। इति मेदिनी। ...
व्रतम्। रूपम्। अक्षरम्। ...
चित्रम्। तालविशेषः। ...
हेमचन्द्रः।

वर्णः, पुं क्ली, (वर्ण्यते भिद्यते
घञ्।) भेदः। (वर्ण्यते
वर्ण + घञ्।) रूपम्। (वर्ण
अच्।) अक्षरम्। (वर्ण्यते
+ घञ्।) विलेपनम्। इति मेदि
वर्णश्च द्विविधः। ध्वन्यात्मकः
अस्योत्पत्तिप्रकारो यथा,—
“अत्रैवास्याः सुषुम्नामार्गस्थानि
अव्यक्तं प्रलपति यदा सा
मूलाधारे विचरति तदा
इति

अस्यार्थः।
कुण्डलिनी यदा सा कुण्डली वर्णा
अक्षरमचरं यत्रायत्तं ध्वनौ
कलभावव्यादिकं करोति
यति प्रम्लायनि
तट्टीका।*। अस्य कुण्डलिनी
“कुण्डलीभूतसर्पाणामङ्गश्रिता
विद्याजननी देवी प्रसरशक
द्विचत्वारिंशदक्षरात्मिका यथा
गुणिना सर्व्वगात्रेण कुण्डली
विन्यासक्रमपङ्क्तिः सा
एकधा गुणिता शक्तिः सर्व्वविश्व

दं स्वरान् देवी प्रत्याहीणां त्रयं त्रयम् ॥”
इति सारदातिलकः ॥
:। त्रिधासेति चन्द्रसूर्य्याग्निरूपा। द्वि-
शदिति भूतलिपिमन्त्रमयी। पञ्चाश-
ात्कामयीत्यर्थः। सर्व्वगात्रेण सर्व्ववर्णेन
परस्परमिलिता सती मन्त्रमयं जगत्
काशयति इत्यर्थः। मूलाधारे सर्पवत्
भूता नाड़ी वर्त्तते तन्मध्यस्थायित्वादियं
। सर्व्वविश्वेत्युभयोपादानात् शब्दार्थ-
प्रतिपादिकेति सूचितम्। त्रिपुष्कर-
येष्ठमध्यमकनिष्ठत्वेन तीर्थत्रयम्। स्वरा-
उदात्तानुदात्तसमाहारान्। इति
:॥ * ॥ अपि च।
वारिंशता मूले गुणिता विश्वनायिका।
ति कुण्डलिनी शब्दब्रह्ममयी विभुः॥
तो ध्वनिस्तस्मान्नादस्तस्मान्निबोधिका।
न्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः॥”
इति सारदायामाचार्य्याः॥
लाधारे द्विचत्वारिंशता गुणिता विश्व-
ा कुण्डलिनी अनेन क्रमेण अकारादि-
न्तां द्विचत्वारिंशदात्मिकां भूतलिपि-
मकां वर्णमालिकां सूते इत्यन्वयः। क्रम-
शक्तिमिति सा कुण्डलिनी शक्तिं सूते
शक्तेर्ध्वनिरासीदिति योजना। ततो
त्यादि ज्ञेयम्। अयञ्च क्रमः सर्व्वाचरी-
सिद्धः। तत्र सत्त्वप्रविष्टा चिच्छक्तिशब्द-
। पुनराकाशस्था सैव सत्त्वप्रविष्टा रजो-
ा सती ध्वनिशब्दवाच्या। अचरावस्था
मोऽनुविद्धा नादशब्दवाच्या। अव्यक्तावस्था
तः प्रादुर्भावनिबोधिकाशब्दवाच्या। सैव
प्रादुर्भावादर्द्धेन्दुशब्दवाच्या। उक्तञ्च परा-
।
शक्तिवर्णोद्भूतो ज्ञानशक्तिप्रदीपकः।
णौ च सा शक्तिः क्रियाख्या एजति
प्रभुः॥”
व बिन्दुः स्थानान्तरगतः परादाख्यो
।
ती मध्यमा वाची वैखरी शब्दजन्मभूः।
रा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा
वैखरी मुखे। तदुक्तं पदार्थादर्शे।
कुण्डलिनी मध्ये ज्योतिर्मात्रास्वरूपिणी।
चविषया तस्मादूर्द्ध्वमुद्गामिनी॥
एकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत्।
हृद्येव प्राप्य मध्यमा नादरूपिणी॥
संज्ञमात्रा स्यादभितोऽर्द्धगामिनी।
कण्ठशानुभ्यां द्विरोदादरहस्रिता॥
ामर्दोष्ठादिदृ ताल्वादिस्थानपरिग्रहा।
अवर्णरूपा वैखरीवाक्या तु वैखरी॥
स्वरक्रियाणी वैखरी तु स्वात्मिका।
ानेन एजति प्रत्यर्णं वर्णमालिकाम्॥
रादिक्षकारान्तां द्विचत्वारिंशदात्मिकाम्।
महारमुद्रिता वर्णमयीं नालिकाम्॥

एते तदर्थतो भिन्नाः कला रुद्रादिकान्
क्रमात्॥”
इति तट्टीका॥
“अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च॥”
इति शिक्षासूत्रम्॥ * ॥
किञ्च।
“यथा भवन्ति देहान्तरमी पञ्चाशदक्षराः।
भेदा येन प्रकारेण तथा वक्ष्यामि तत्त्वतः॥
समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः।
व्यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः॥
उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम्।
नीचैर्गतोऽनुदात्तञ्च स्वरितं तिर्य्यगागतः॥
अर्द्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात्।
व्यञ्जनह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः॥
अकारेकारयोर्योगादेकारो वर्ण इष्यते।
तस्यैवैकारयोगेन स्यादैकाराक्षरं तथा॥
उकारयोगात्तस्यैव स्यादोकाराह्वयः स्वरः।
तस्यैवौकारयोगेन स्यादौकाराह्वयः स्वरः॥
सन्ध्यक्षराः स्युश्चत्वारो मन्त्राः सर्व्वार्थसाधकाः।
ऌवर्णे वर्गयोर्व्यक्तिर्न वै सम्यक् प्रदर्श्यते॥
बिन्दुसर्गात्मनोर्व्यक्तिमनयोरजपा वदेत्।
कण्ठात्तु निःसरन् सर्गः प्रायोऽचात्मकतः-
परः॥
नश्वरः सर्ग एव स्यात् सोष्मा च प्राणकस्तु यः।
स सर्गः क्षेपितः कण्ठे वायुना कादिमीरयेत्॥
वर्गस्पर्शनमात्रेण कं स्वरस्पर्शनात्तु खम्।
स्तोकगम्भीरसंस्पर्शात् गघौ ङञ पदिगतम्॥
विसर्गस्तालुगः सोष्मा चं चवर्गञ्च यं तथा।
ऋटुरेफषकारञ्च मूर्द्धगो दन्तगस्तथा॥
ऌतवर्गलसानोष्ठात्तुपूपध्मानसंज्ञकान्।
दन्तौष्ठाभ्यां वञ्च तत्तत्स्थानगोऽर्णान् समी-
रयेत्॥”
इति प्रपञ्चसारे १ पटलः॥
सर्गो विसर्ग एव नश्वरो विलस: सोष्मा च
सकाररूपः उच्छ्वासोऽन्तःप्रवेशशाली वायुः
स्यादित्यन्वयः। एवं प्राणको बहिर्निर्गमन-
शाली वायुर्यः स्यात् स एव उच्छ्वासः सोष्मा च।
प्राणश्वासौ को वायुश्चेति प्राणकः। इति
तट्टीका॥ * ॥ अवर्णकवर्गहविसर्जनीयाः
कण्ठ्याः। १। इवर्णचवर्गयशास्तालव्याः। २।
ऋवर्णटवर्गरषा मूर्द्धन्याः। ३। ऌवर्णतवर्ग-
लसा दन्त्याः। ४। उवर्णपवर्गोपध्मानीया
ओष्ठ्याः। ५। वो दन्तौष्ठ्यः। ६। ए ऐ कण्ठ-
तालव्यौ। ७। ओ औ कण्ठौष्ठ्यौ। ८। इति
शिक्षासूत्रम्॥ * ॥ अपि च।
“वदुक्तं सर्व्वतन्त्रेषु वर्णोच्चारविधिं शिवे!।
तव स्नेहान्महेशानि! तदद्य कथयामि ते॥
[illegible]
अ कु इ चु ऋ टु ऌ तु उ पु अर्द्धौ वर्णाः प्रकीर्त्तिताः।
अ कु हाः कण्ठ्यौ ...
[illegible]। ६।

ऋ टु रषास्तु मूर्द्धन्याः ३ दन्त्या ऌ तु ल सा
मताः॥ ४॥
उपध्मोष्ठसंभूताः ५ स्थानानि कथितानि ते।
विशेषं कथयाम्यद्य श्रोतव्यं कण्ठतः स्वराः॥
ऋद्वयं जिह्वया मूर्द्धा रुदयं जिह्वदन्तजम्।
मुखस्थानाद्धलो वाच्याः षकारः कण्टघातजः॥
व्यञ्जनद्वयसंयोगे भवेत् पूर्व्वस्वरो गुरुः।
पदान्तादिमवर्णस्य संयोगेषु श्रुतिर्द्वयोः॥
अपदान्तादिसंयोगे युरन्यत्र तथेष्यते।
युः श्रुतिस्तु तिरोभूय स्वरवत् श्रुतितां व्रजेत्॥
शिया बीजे शकारस्य छश्रुतिः परमेश्वरि!।
छश्रुतिश्च रादिस्थौ तथादिस्थे तु चश्रुतिः॥
सहस इत्यादौ नमस्तस्यै आस्था इत्यादौ च।
रेफादिके तदन्ते वा हकारे समवाच्यता॥
वर्हः ह्रद इत्यादौ।
किन्तु वैशात्यमाश्रित्य स्फुटं नात्राक्ष वाच्यता॥
घु तुर्य्यध्वनिमाप्नोति यादिस्थे परमेश्वरि!।
वाह्य इत्यादौ।
पु चतुर्थध्वनिं याति वादिस्थे तु विशेषतः॥
आह्वानमित्यादौ।
लादिस्थेऽप्यथ नादिस्थे वैशात्यं स्वल्पवाच्यता।
प्रह्लाद अह्नाय इत्यादौ।
मादिस्थे मे च मस्यापि नासिकामूलवाच्यता॥
उ ङ ण न मा बिन्दुर्नासिकामूलजाः स्मृताः।
यकारश्च तृतीयत्वं पदादौ सर्व्वदा व्रजेत्॥
केयूरादावपि तथा अन्यत्र कण्ठमागतः।
नादिस्थशषयोस्त्वं नरयोगात्तवर्गके॥
प्रश्नः स्नान इत्यादौ।
पर्य्यन्तरेषु डढयोर्व्यक्तजिह्वादिवाच्यता।
वैशात्यमपि तत्रास्ति गुरोरेव समभ्यसेत्।
ध्यादिरेफस्तु संप्रोक्तो दष्टरूपो वरेहताम्।
एवं ज्ञात्वा महेशानि! पठेत् शास्त्रं वरेन्महम्।
कथञ्च महेशानि नान्यथा पञ्चसाम्प्रयात्॥”
इति प्रपञ्चसारे ३ पटलः॥ * ॥
अपि च।
“इचः खरेषु पूर्व्वोक्तः परो दीर्घः क्रमादिमे।
शिवशक्तिमयास्ते स्युर्बिन्दुसर्गात्मकाः॥
बिन्दुः पुमान् रविः प्रोक्तः सर्गः शक्तिर्निशा-
करः।
ऊराद्ये मध्यगं यत्तु तत्तुर्य्यं नपुंसकम्।
विना स्वरैस्तु तान्तेषां जायते व्यक्तिरक्षमा।
शिवशक्तिमयात् प्रादुरभादनात् सर्व्ववित्॥
कारणात् पञ्चभूतानामुद्भूता माहरा वनः।
तत्ते भूतात्मका वर्णाः पञ्च पञ्च विभागतः॥
वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात्।
पञ्च ह्रस्वाः पञ्च दीर्घाः बिन्दन्ताः सन्धिसम्भवाः।
षट्कः वादवः य ल व र स हान्ताः शान्ते-
तिमाः॥”
इति सारदा॥ * ॥
अकारादिवर्णानां यथा,—
“आकारादिरेषां सर्व्वशक्तिः सृष्ट्याख्याने
ह्नाः॥

धान्याक्षराणि दृष्टानि पश्चाल्लब्धान्यतः पुरा ।”
इति ज्योतिस्तत्त्वे बृहस्पतिः ।
वर्णोल्लेखनप्रकारस्तु तत्तद्वर्णे द्रष्टव्यः ॥ * ॥ वर्ण-
नामानि यथा,—
“तन्त्रसङ्केतबोधार्थमाहृत्य तन्त्रशास्त्रतः ।
वर्णनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
ॐकारो वर्तुलस्तारो वामश्च हंसकारणम् ।
मन्त्राद्यः प्रणवः सत्यं बिन्दुशक्तिस्त्रिदैवतम् ॥
सर्व्वबीजोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः ।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम् ।
पञ्चरश्मिस्त्रिकूटे च त्रिभवे भवनाशनः ॥
गायत्रीबीजपञ्चांशौ मन्त्रविद्याप्रसूः प्रभुः ।
अक्षरं मातृकासूश्चानादिरद्वैतमोक्षदौ ॥ ॐ ॥
अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः ।
पूर्णोदरी सृष्टिमेधौ सारस्वतः प्रियंवदः ॥
महाभाग्यो वासुदेवो घनेशः केशवोऽमृतम् ।
कीर्त्तिर्निवृत्तिर्वागीशो नरकारिर्हरो मरुत् ॥
ब्रह्मा वामाद्यणो ह्रस्वः करसः प्रणवाद्यकः ।
ब्रह्माणी कामरूपश्च कामेशो वाग्मिनी वियत् ॥
सिन्धेशः श्रीविष्णुकण्ठौ प्रतिपत्तिर्धरेशिनी ।
अर्कमण्डलवर्णाद्यौ ब्राह्मणः कामकर्षिणी ॥ अः ॥
आकारो विजयानन्तौ दीर्घच्छायो विनायकः ।
क्षीरोदधिः पयोदश्च पाशो दीर्घास्यवृत्तकौ ॥
प्रचण्ड एकजो रुद्रो नारायण इभेश्वरः ।
प्रतिष्ठा मानदा कान्तो विश्वात्मकमलात्मकः ॥
पितामहो हिठान्तोऽभूः क्रिया कान्तिश्च
सम्भवः ।
द्वितीया मानदा काशी विघ्नराजः कुजो वियत् ।
स्वरान्तकश्च हृदयमङ्गुष्ठो भगमालिनी ॥ आः ॥
इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः ।
सुमित्रं सुन्दरी वीरः कोटरः काटरः मयः ॥
भ्रूमध्यो माधवस्तुष्टिर्दन्तनेत्रश्च नासिका ।
शान्तः कान्तः कामिनी च कामो विघ्नविना-
यकः ।
नेपालो भरणी रुद्रो निद्रा क्षिप्रा च मादकः ॥
॥ इः ॥
ईस्त्रिभूर्त्तिर्महामाया लोलाक्षी वामलोचनम् ।
गोविन्दः शेखरः पुष्टिः सुभद्रा रतिसंज्ञकः ॥
विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः ।
कालोत्तरीयो भेरुण्डा रतिश्च पौण्ड्रवर्द्धनः ॥
शिवोत्तमः शिवा तुष्टिश्चतुर्थी बिन्दुमालिनी ।
वैष्णवी वैन्दवी जिह्वा कामकला सनादका ।
पावकः कोटरः कीर्त्तिर्मोहिनी कालकारिका ।
कुचद्वन्द्वं तर्जनी च शान्तिस्त्रिपुरसुन्दरी ॥ ईः ॥
उः शङ्करो मधुर्नाथो भूत कल्याणवाचकः ।
अमरेशो दक्षकर्णः षड्वक्त्रो मोहनः शिवः ।
उग्रः प्रभुर्धृतिर्विष्णुर्विश्वकर्म्मा महेश्वरः ।
शम्भुश्चेटिका पुष्टिः पञ्चमो वह्निवासिनी ॥
चेटिकास्थाने चण्डिका इति वा पाठः ।
कामघ्नः कामदा शेषो मोहिनी विघ्नकृद्धरी ।
वरदः दृष्टिका भीमं मारको मे दशी हरः ।

ऊठ्ठु इति कुत्रचित् पाठः । उः ॥
ऊः कण्टको रतिः शान्तिः क्रोधनो मधुसूदनः ।
कामराजः कुलेशश्च महेशो वामकर्णकः ॥
कण्ठकस्थाने कण्टक इति वा पाठः ।
अर्घीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ।
महाविद्येश्वरी षष्ठा षण्डो भूः कान्यकुब्जकः ॥
॥ ऊः ॥
ऋः पूर्दीर्घमुखी रुद्रो देवमाता त्रिविक्रमः ।
भावभूतिः क्रिया क्रूरा रेचिका नासिका धृतः ॥
एकपादशिरो माला मण्डला शान्तिनी जलम् ।
कर्णः कमलभा मेधो निवृत्तिर्गणनायकः ।
रोहिणी शिवदूती च पूर्णगिरिश्च सप्तमी ॥
मेधः स्थाने मेष इति च पाठः ॥ ऋः ॥
ॠः क्रोधोऽतिथिशो वाणी वामनोऽगोऽथ
श्रीधृतिः ।
ऊर्द्धमुखी निशानाथः पद्ममाला विनष्टधीः ॥
शशिनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता ।
एकदन्ताह्वयो माता हरिता मिथुनोदया ॥
माता स्थाने माया इति वा पाठः ।
कोमलः श्यामला मेधी प्रतिष्ठा पतिरष्टमी ।
ब्रह्माण्डमिव कौशाले पावको गन्धकर्षिणी ॥
मिवस्थाने मवेति वा पाठः । ॠः ॥
ऌः स्थाणुः श्रीधरः शुद्धो मेधा धूम्रो वको वियत् ।
देवयोनिर्दक्षगण्डो वहेशः कौन्तरुद्रकौ ॥
वहेशस्थाने वाहग इति वा पाठः ।
विश्वेश्वरो दीर्घजिह्वा महेन्द्रो लाङ्गलिः परा ।
चन्द्रिका पार्थिवी धूम्रा द्विदन्तः कामवर्द्धनः ॥
शुचिस्मिता च नवमी कान्तिराषाढकेश्वरः ।
चित्ताकर्षिणी काशश्च तृतीयकुलसुन्दरी ॥
चित्ताकर्षिणीस्थाने चित्राकर्षिणी इति वा
पाठः । ऌः ॥
ॡकारः कमला हर्षा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्वामगण्डो रुद्रः कामोदरी सुरा ।
शान्तिकृत् स्वस्तिका शक्रो मायावी लोलुपो
वियत् ।
कुशमी सुस्थिरो माता नीलपीतो गजाननः ॥
कामिनी विश्वपा कालो नित्या शुद्धः शुचिः
सती ॥
विश्वपास्थाने विशाया इति वा पाठः ।
सर्व्वो धैर्य्याकर्षणी च एकाकी दनुजप्रसूः ॥ ॡः ॥
एकारो वाचकः शक्तिर्भिण्टीशोऽधो भगं मरुत् ।
सूक्ष्मा भूतोऽर्द्धश्रेणी च ज्योत्स्ना यज्ञा प्रमर्द्दनः ॥
भूतस्थाने भ्रत इति वा पाठः ।
भयं ज्ञानं कृशा धीरा जङ्घा सर्व्वसमुद्भवः ।
वह्निर्विष्णुर्भगवती कुण्डली मोहिनी वसः ॥
योनिराधारशक्तिश्च त्रिकोणा ईशसंज्ञकः ।
अग्निरेकादशी भद्रा पद्मनाभः कुलाचलः ॥ एः ॥
ऐलंक्ष्मा भौतिकः कान्ता वायवी मोहिनी
विधः ।
दया दामोदरः प्रद्योऽधरो विजयस्थापि ॥
यमान्तको जगद्योनिः परः परनिबोधकृत् ।

ज्ञानात्मा वाग्भवं श्रीः
त्रिपुरा लोहिता
महेश्वरो द्वादशी
कामकोटी

ओकारः सत्यपीयूषी
सद्योजातो वासुदेवो

उद्दिष्टदर्पकस्तोत्रः
प्रणवांशो ब्रह्मसूत्रमन्त्रेशः
जयोदशी दीर्घनाभा
त्रैलोक्यविजया प्रधा

औकारः शक्तिको नादनिर्णो
मनुवदृष्यदेशश्च शङ्कुकर्णः
अघोरनाथ कण्ठोष्ठौ
आज्ञा चोर्द्धमुखी शान्तो
अनन्ता व्यापिनी
नेत्रमालाकर्षिणी च
बोमास्थाने रोमा इति
अङ्कुरश्चतुर्मो
प्रद्युम्नः श्रीमुखी
दन्तस्थाने दम्भ इति वा पाठः ।
परं शशी प्रभाशीशः
अक्रूरश्चेतना नागपूर्णा
शिरः शम्भुर्नरेशश्च सुहृद्
पूर्णिमा रेवती शुद्धः कला
अमृताकर्षिणी सूर्यं
केदारो रात्रिनाथश्च सुश्रिया

अः कण्ठको महासेनः
इच्छा भद्रा गणेशश्च
द्विबिन्दुरसना सोमाऽनिरुद्धः
द्विजिह्वः कुण्डलं वक्त्रः
सुन्दरी सुयशानन्दा गजानना
कः क्रोधीशो महाकाली
कपाली तैजसः शान्तिर्विदः
चक्री प्रजापतिः सृष्टिर्दन्त
अनन्तः पार्थिवो
दण्डकन्धस्थाने दण्डकर्णो
वर्णाद्यश्च सुखो ब्रह्मा
माहेश्वरी तुला पृथ्वी
निद्रा कामेश्वरी सूक्ष्मः कामदं
श्रीपुरं रमणी रक्तः कुसुमा
खः प्रचण्डः कामरूपी
आकाशमिन्द्रियं दुर्गा चण्डीश
शिखण्डी दन्तजातीशः
शून्यं कपाली कल्याणी
सुधायोनिश्च सर्वलिङ्गी

वर्णः

ो गौरवो गङ्गा गणेशो गोकुलेश्वरः ।
यात्मको गाथा गन्धर्व्वः सर्व्वगः
स्मृतिः ॥
ः प्रभा धूम्रा द्विजास्यः शिवदर्शनः ।
। गौः पृथग्रूपा बालबद्धिलोचनः ॥
स्वती विद्या भोगिनी नन्दनी धरा ।
ो च हृदयं घ्राणं जालन्धरो लवः ॥
े नर इति वा पाठः । गः ॥
ो घुर्घुरो घण्टो घण्टीशश्चिपुरा-
न्तकः ।
योत्तमः सत्या किङ्किणी वीरनायकः ॥
र्व्वरूपो मेधा कालरूपी च दाम्भिकः ।
ा ज्वालमूलं नन्दीशो हननं ध्वनिः ।
विद्या संहर्त्ता कामाख्यमनघामयः ॥घः॥
ो भैरवचण्डो बिन्दूत्तंसः शिशुप्रियः ।
ो दमनस्तः खर्परो विषयस्पृहा ॥
ः श्वेताङ्गयो धीरो द्विजात्मा ज्वालिनी
वियत् ।
क्तिश्च मदनो विघ्नेशो चात्मनायकः ॥
ो महानन्दो दुर्द्धरश्चन्द्रमा यतिः ।
या नीलकण्ठः कामेशो च मयाशुकौ ॥
॥ङः॥
करो हली वाणी चात्मशक्तिः सुदर्शनः ।
ण्डधरो भूत्वा मद्दिघाचारचम्पिनी ॥
ाने भौम इति च पाठः ।
ो रुचिः कूर्म्मश्चासुण्डा दीर्घबाहुकः ।
ाहुर्म्मलमाया चतुर्मूर्त्तिस्वरूपिणी ॥
ञ्च द्विनेत्रञ्च लक्ष्मीश्चितयलोचनः ।
। चन्द्रमा देवश्चेतनो वृश्चिको बुधः ॥
ोटसुखेच्छात्मा कौमारपूर्व्वफल्गुनी ।
मेखला वायुर्म्मदिनी च मूलावती ॥ चः ॥
दनं सुषुम्ना च पशुः पशुपतिर्म्मतिः ।
लं तरलं वह्निर्भूतमात्रा विलासिनी ॥
त्रञ्च त्र्यस्ली द्विशिरा वामकूर्परः ।
र्णा लाङ्गली वामकाममत्ता सदाशिवः ॥
। निशाचरः पायुर्व्विचलः स्थितिशब्दकः ॥
॥छः॥
ावो वानरः शूली भोगदा विजया स्थिरा ।
ेवो जयो जेता धातकी सुसखी विभुः ॥
ादरी स्तुतिः शाखा सुप्रभा कर्णिका धरा ।
वाहू रुचिर्हंसो नन्दी वेगाः सुराधिपः ॥
ो वेगितो वामो मानवाद्यः सदात्मकः ।
ाराधेश्वरी वेगी चामोदा मदविह्वलः ॥जः॥
झङ्कारी गुहो झञ्झावायुः सत्यः पड्डुमतः ।
शो द्राविणी नादः पाशी जिह्वा जलं
स्थितिः ॥
ागेन्द्रो धनुर्हस्तः कर्कशो नादजः कृशः ।
ेबाहुबलो रूपमाकन्दितः सुचपलः ॥
सो नट व्यात्मा बानू विकटा कुचमण्डलः ।
ांसप्रिया बामा व्यङ्गुलीमध्यपर्व्वकः ।
ाशाङ्कदायश्च मायात्मा यञ्जनः स्वरः ॥
॥ञः॥

वर्णः

ञकारी बोधनी विश्वा कुण्डली मखदो वियत् ।
कौमारी नागविज्ञानी सव्याङ्गुलनखरो वकः ॥
कुण्डलीस्थाने कुण्डली मखदस्थाने सुखद इति
वा पाठः ।
सर्व्वेशचर्गिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
धर्म्मैकपादौ सुसखौ विरजा चन्द्रेश्वरी ॥
बुद्धिस्थाने सिद्धिः स्वर्गस्थाने सर्ग इति वा
पाठः ।
गायनः पुष्पधन्वा च रागात्मा च वरा-
शिखी ॥ञः॥
टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
सोमवा स्थाने सोमेश इति क्वचित् पाठः ।
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः ।
वृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ।
राजा गिरिर्म्महाधनुर्प्राणात्मा सुसखी
मरुत् ॥ टः ॥
ठः शून्यो मञ्जरी वीजः पाणिनी लाङ्गली
चया ।
वनजो नन्दनो जिह्वा सुनखघूर्णकः सुधा ॥
वर्त्तुलः कुण्डली वह्निरमृतं चन्द्रमण्डलः ।
दक्षजानूरुभावश्च देवभक्षो वृहद्धनिः ॥
एकपादो विभूतिश्च ललाटं सर्व्वमित्रकः ।
वृषघ्नो नलिनी विष्णुर्म्महेशो ग्रामणीः
शशी ॥ ठः ॥
डः स्मृतिर्द्दारुको नन्दिरूपिणी योगिनी
प्रियः ।
कौमारी शङ्करस्त्रासस्त्रिवक्रो नदको ध्वनिः ॥
दुरूहो जटिलो भीमा द्विजिह्वः पृथिवी सती ।
कोरगिरिः क्षमा कान्तिर्नाभिः स्वाती च
लोचनम् ॥
जटिलीस्थाने जटिल इति कान्तिस्थाने शान्ति-
रिति वा पाठः ॥ डः ॥
ढो ढक्का निर्णयः पूर्व्वो यक्षेशादनदेश्वरः ।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी नवः ॥
यक्षेशादनदेश्वर इत्यत्र यक्षेशो धनदेश्वर
इत्यपि पाठः ।
दक्षपादाङ्गुलेर्म्मूलं सिद्धिदण्डो विनायकः ।
प्रहासा त्रिरेखा ऋद्धिर्निर्गुणो निधनो ध्वनिः ॥
प्रहासा स्थाने प्रहास इति वा पाठः ।
विघ्नेशः पालिनी त्वकधारिणी क्रोड़पुच्छकः ।
एलापुरं त्वगात्मा च विशाखा श्रीर्म्मनी रतिः ॥
त्वकस्थाने त्वकुच इति वा पाठः ॥ ढः ॥
णो निर्गुणं रतिर्ज्ञानं जम्भनः पक्षिवाहनः ।
जया शम्भी नरकजित् निष्कला योगिनीप्रियः ॥
द्विसुखं कोटवी श्रोत्रं समृद्धिर्बोधनी मता ।
त्रिनेत्रो मानुषी व्योमदक्षपादाङ्गुलेर्मुखम् ॥
माधवः शङ्खिनी वीरो नारायणश्च निर्णयः ॥
सुखस्थाने नखं इति वा पाठः ॥ णः ॥
तः पूतना हरिः शुद्धिः शक्तो शक्तिर्जटी ध्वजा ।
वामस्फिक्वामकर्ण्णौ च कामिनी मध्य-
कर्णकः ॥

वर्णः

हरिस्थाने हविः इति वा पाठः ।
आषाढ़ो तण्डुलश्च कामिका पृष्ठपुच्छकः ।
रत्नकश्च श्यामसुखी वाराही मकरोऽरुणा ॥
आषाढ़ीतण्डुलश्चस्थाने आषान्तढ़ान्तसुदश्च
इति रत्नकश्चस्थाने रत्नकण्ठ इति वा पाठः ।
सुगतोऽर्द्धसुखा बुद्धजानुश्च क्रोड़पुच्छकः ।
गन्धो विश्वामरश्छत्त्रश्चानुराधा च सौरकः ॥
बुद्धस्थाने शुद्ध इति सौरकस्थाने सैविक इति वा
पाठः ।
जयन्ति पुलको भ्रान्तिरनङ्गमदनातुरा ॥ तः ॥
थः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राहो भयानकः ।
शिली शिरश्छिन्नो दण्डी भद्रकाली शिलोच्चयः ॥
कृष्णो बुद्धिर्व्विकर्म्मा च दमनाशाधिपोऽमरः ।
वरदा भोगदा केशो वामजानू रसोऽनलः ॥
कृष्णो बुद्धिर्विकर्म्मा स्थाने कृष्णो वह्निर्व्विकर्णा
इति वा पाठः ।
लोलौजयिनी गुह्यः शरचन्द्रो विदारकः ॥
लोलौ इत्यादिस्थाने लोलोज्जयिनीपूर्णगुह्यशर-
चन्द्रदिवाकरौ इति वा पाठः । थः ॥
दोऽत्रीशो धातकिर्धाता दाता दत्तं कलत्रकम् ।
दीनं ज्ञानञ्च दानञ्च भक्तिराह्वनी धरा ॥
दाता दत्तं स्थाने दानादत्तु इति वा पाठः ।
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः ।
कात्यायनी शिवा दुर्गा लङ्गना नान्ति
कण्डकी ॥
लङ्गनास्थाने सङ्गना कण्डकीस्थाने कण्टकी
इति वा पाठः ।
स्वस्तिकः कुटिला रूपः कृष्णघोमाजितेन्द्रियः ।
धर्म्मद्वदामदेवश्च भ्रमा बहुसुचचला ॥
धर्म्मद्वत्स्थाने धर्म्मसत् बहुस्थाने बहु इति वा
पाठः ।
हरिद्रा पुरमत्रौ च दक्षपार्श्विस्त्ररेखकः ॥दः॥
धो धनार्थो रुचिः स्थाणुः शाश्वतो योगिनी-
प्रियः ।
मौनेशः शङ्खिनी तोयं नागेशो विश्वपावनी ॥
धनार्थस्थाने धनाढ्य इति वा पाठः ।
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः ।
मीतवासा त्रिवर्णा च धाता धर्म्मश्रयङ्गमः ॥
धरणाचिन्तास्थाने धरणी चित्रा इति वा
पाठः ।
सन्दर्शो मोहनो लज्जा वज्रतुण्डा धरं धरा ।
वामपादाङ्गुलेर्म्मूलं ज्येष्ठा सुरपुरं भयः ।
सशांत्मा दीर्घजङ्घा च धनेशो धनसञ्चयः ॥धः॥
नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी ।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः ॥
वारुणीस्थाने वरुणा इति वा पाठः ।
ऊर्द्धगामी द्विरण्डश्च वामपादाङ्गुलेर्मुखम् ।
वैनतेयस्तुतिर्व्वर्त्म तरणिर्यालिरागमः ॥
वामनो ज्वालिनी दीर्घा निरीहः सुगतिर्व्वियत् ।
शब्दात्मा दीर्घघोणा च हस्तिनापुरनैचकौ ।
गिरिनायकनीलौ च शिवो नादिर्म्महा-
मतिः ॥ नः ॥

मर्णः

[illegible] प्रथमो रमा।
[illegible] कामरात्रिः [illegible]॥
[illegible]
[illegible] मार्ग [illegible]॥
[illegible] इति [illegible] इति
वा पाठः।
[illegible] मरीचिः [illegible]।
[illegible] रेखा च मोहकः॥
[illegible] इति रेखास्थाने रेखा इति
वा पाठः।
[illegible]

[illegible]॥
[illegible] इति वा पाठः। [illegible]
[illegible]।
[illegible]

[illegible]॥

[illegible]

घर्णः

मातङ्गमालिनी बिन्दुः अवयाभरणो वियत्॥
रयस्थाने मत्त इति वा पाठः। मः॥
यो वायी यज्ञपा वायुर्विकृतिः पुरुषोत्तमः।
धूमाम्नः शवनः प्रौढो धूमार्चिः प्राणिसेवकः॥
धूमाम्लस्थाने धूमाम इति वा पाठः।
धना धमो जटो लोणा वायुवेगी यशस्करी।
धङ्कुपेरः घमा वामो हृदयं कपिला प्रभा॥
वायवीयो यामकाख्यागो होमो यानं प्रभा

सुखम्।

चण्डः सर्वेश्वरी धूमवाहुल्ला सुमुखेश्वरी॥
प्रमास्थाने प्रभा इति वा पाठः।
विशाखा मनथो माता हंसिनी भृङ्गिनायकः।
तेवसः शोषको मोनो धनिष्ठानन्दवेदिनी॥
विशाखास्थाने विशाला इति तेवसस्थाने येमन
इति वा पाठः।
सेतुः भीमः पक्तिनामा पायसा प्रायसंज्ञकः॥
सेतुस्थाने सेट इति वा पाठः। यः।
रो रक्तः क्रोधिनी रेफः पावकस्तेजसो मतः।
प्रकाशा दर्शनो दीप्तो रक्तकृष्णा परं बली॥
स्तेजसस्थाने सौजस इति रक्तकृष्णास्थाने रक्त-
कृष्ण इति वा पाठः।
भुजङ्गेशो मतिः सर्वा धाम रक्तः प्रकाशकः।
मायको रेवती दासं कुर्ह्मशो वह्निमण्डलम्॥
दासस्थाने दानमिति कुर्ह्मशस्थाने दर्पाश
इति वा पाठः।
उग्ररेखा मूलरको वेदकण्ठमला पुरा।
शङ्कितः शुक्लो मलयस्य आयको धनम्॥
वेदकण्ठमलास्थाने वेदकण्ठमला इति वा पाठः।
[illegible] उमा शरयं [illegible] त्रिपुरसुन्दरी।
[illegible] [illegible] विश्वतोमुखी॥
[illegible]स्थाने [illegible] इति वा पाठः। टः।
[illegible] [illegible] माधवः [illegible]।
[illegible] [illegible] व्यापको मोक्षसंज्ञकः॥
[illegible]स्थाने माधवी इति वा पाठः।
[illegible] [illegible] देवी [illegible] पतिः।
[illegible] [illegible] भामिनी कामिनी

प्रिया।

[illegible]स्थाने [illegible]मिति [illegible]स्थाने [illegible]मिति वा
पाठः।
[illegible] वेदिनी [illegible] शोषको [illegible]।
[illegible] [illegible] [illegible]॥
[illegible]स्थाने [illegible] इति [illegible]स्थाने [illegible] इति वा
पाठः। वः।
[illegible] [illegible] [illegible]।
[illegible] [illegible]॥
[illegible] [illegible]स्थाने [illegible]
इति वा पाठः।
[illegible] [illegible] [illegible]

[illegible]।

[illegible]
[illegible]।
[illegible]

षर्णः

[illegible]
[illegible]
[illegible]
वामोरुः [illegible]
हंसस्थाने हिंसा इति पाठः।
शः [illegible] वासुदेव [illegible]
परमेष्ठी [illegible]
पीनास्थाने पीना इति [illegible]
वा पाठः।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]स्थाने [illegible] इति [illegible]
वा पाठः।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
दुर्गोत्तारिणिस्थाने [illegible]
[illegible]
इति वा पाठः। षः।
[illegible]

[illegible]
[illegible]स्थाने [illegible] इति वा पाठः।
[illegible]
[illegible]
[illegible] इति [illegible]
इति वा पाठः।
[illegible]
[illegible]
[illegible]
[illegible]

कारि यथात्र इति वर्णाकृत्वाणि वर्णास
ा वाक:।
श्री जनार्दनो मातृकामाला...व:।
...वर्णवाचना कार्णिकारा गणेश्वर:।
...वंशालो मन्मथ: शीर्णनाटक:॥" न:॥
चन्द्रभट्टाचार्यविरचितं वर्णाभिधानं
ानम्॥

ो, (वर्णयतीति। वर्ण + ण्वुल्।) हरि-
।। इति रत्नमाला॥ गात्रानुलेपनयोग्यं
द्रव्यं वा सुगन्धिद्रव्यम्। इत्यमर:॥ चन्द-
इति शब्दरत्नावली॥

पुं, क्ली, (वर्ण + स्वार्थे संज्ञायां वा कन्।)
नम्। चन्दनम्। इति मेदिनी। के,
॥ (यथा, महाभारते। १३ ।१११।१०७।
कार्षीसथा गन्धचोरयित्वेह मानव:।
हरित्वमाप्नोति राजन्! लोभपरायण:॥")

पुं, क्ली, (वर्णयति रज्यतेऽनेनेति। वर्ण +
स्वार्थे कन्।) हिङ्गुलहरितालकाचनीली-
:। इत्यमरभरतौ॥ (यथा, आर्य्यासप्त-
म्। १८६।
ां निन्दति लुम्पति क: स्मरफलकस्य वर्णकं
सुभ्र:।
वति रत्नकटकमम्ब्ते कस्याश्चिदुरेति॥")

पुं, (वर्णयति शृङ्गारादीन् विस्तारयतीति।
+ ण्वुल्।) चारण:। इति मेदिनी। के,
मण्डलम्। इति शब्दरत्नावली॥

:, पुं, कुबेरपुत्र:। इति त्रिकाण्ड-
॥

का, स्त्री, (वर्णानां कूपिकेव।) मस्या-
:। यथा,—
ीधानी मसिमणिर्मेलान्दुर्वर्णकूपिका॥"
इति त्रिकाण्डशेष:॥

क:, त्रि, (वर्णान् नीलादीन् चारयति
ारयतीति। चर + णिच् + ण्वुल्।) चित्र-
:। इति शब्दमाला॥

:, पुं. (वर्णेषु चतुर्षु मध्ये ज्येष्ठ: प्रथमोत्-
त् गुणोत्कृष्टत्वाच्च।) ब्राह्मण:। इति
ाण्डशेष:॥

:, त्रि, (वर्णेन ज्योतिषोक्तपारिभाषिक-
न ज्येष्ठ: श्रेष्ठ:।) स्ववर्णापेक्षोत्तमवर्ण:।
रिभाषिकहीनवर्णकर्तृकपारिभाषिकवर्ण-
कन्याविवाहनिषेधो यथा,—
"मीनकर्कटवृश्चिकविप्रा:
सिंहतुलाधनु: क्षत्रिय उक्त:।
कुम्भनरद्वयमेषविश: स्यु-
र्मकरवृषस्त्री कथितावरजाति:॥
ज्येष्ठा च या नारी वर्णहीनश्च य: पुमान्।
ोर्विवाहे मृत्यु: स्यात् यस्मामात्र
संशय:॥"
इति ज्योतिस्तत्त्वे वर्णजोटनम्॥

ल:, स्त्री, (वर्णानां तूलिरिव।) लेखनी।
त शब्दरत्नावली॥

वर्णतूलिका, स्त्री, (वर्णानां तूलिकेव।) लेखनी। इति हारावली। २१८॥

वर्णतूली, स्त्री, (वर्णानां तूलीव।) लेखनी। इति त्रिकाण्डशेष:॥

वर्णदं, क्ली, (वर्णं ददातीति। दा + "आतोऽनुपसर्गे क:।" ३।२।३। इति क:।) कालीयकम्। इति जटाधर:॥ वर्णदातरि, त्रि॥

वर्णदात्री, स्त्री, (वर्णं ददातीति। दा + तृच् + ङीप्।) हरिद्रा। इति राजनिर्घण्ट:॥ वर्णदातरि, त्रि॥

वर्णदूत:, पुं, (वर्णा एव दूता यत्र।) लिपि:। तत्पर्य्याय:। लेख: २ वाचिकहारक: ३ स्वस्तिमुख: ४। इति त्रिकाण्डशेष:॥

वर्णधर्म्म:, पुं, स्त्री, (वर्णानां ब्राह्मणादीनां धर्म्म:।) ब्राह्मणक्षत्रियवैश्यशूद्राणां कर्त्तव्यं कर्म्म। तद्यथा,—
"यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रह:।
अध्यापनं चाध्ययनं षट्कर्म्माणि द्विजोत्तमा:॥
दानमध्ययनं यज्ञो धर्म्म: क्षत्रियवैश्ययो:।
दण्डो युद्धं क्षत्रियस्य कृषिर्वैश्यस्य शस्यते॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम्।
कारुकर्म्म तथाजीव: पाकयज्ञोऽपि धर्म्मत:॥
क्षमा दमो दया दानमलोभस्त्याग एव च।
आर्ज्जवं चानसूया च तीर्थानुसरणं तथा॥
सत्यं सन्तोष आस्तिक्यं श्रद्धा चेन्द्रियनिग्रह:।
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषत:॥
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता।
समासिकमिमं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनु:॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम्॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम्।
गान्धर्व्वं शूद्रजातीनां परिचारे तु वर्त्तताम्॥"
इति कौर्म्मे २ अध्याय:॥ *॥
अपि च।
मार्कण्डेय उवाच।
"हारीतस्त्वाशुवाचाथ तैरेवं चोदितो मुनि:।
शृण्वन्तु मुनय: सर्व्वे धर्म्मान् वक्ष्यामि शाश्वतान्॥
वर्णानामाश्रमाणाञ्च योगशास्त्रञ्च सत्तमा:।
यज्ज्ञात्वा मुनयो नित्यं मुच्यन्ते जन्मबन्धनात्॥
ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मण: स्मृत:।
तस्य धर्म्मं प्रवक्ष्यामि तं योग्यं देशमेव च॥
कृष्णसारो मृगो यत्र स्वभावात्तु प्रवर्त्तते।
तस्मिन् देशे वसन् धर्म्मं कुर्व्वीत ब्राह्मणोत्तम:॥
अध्यापनं चाध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव कर्म्मषट्कमिहोच्यते॥
अध्यापनञ्च त्रिविधं धर्म्मार्थं चार्थकारणम्।
शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितम्॥
एषामन्यतमो वापि दृश्यते यत्र मानवे।
तत्र विद्या न दातव्या पुरुषेण हितैषिणा॥
योग्यानध्यापयेच्छिष्यान् यज्ञानपि प्रयोजयेत्।
विदितात् प्रतिगृह्णीयाद्गृहधर्म्मप्रसिद्धये॥
वेदमेवाभ्यसेन्नित्यं शुचौ देशे समाहित:।
यजेद्‌यज्ञं यथाशक्त्या दद्याद्विद्यानुसारत:॥
नित्यं नैमित्तिकं धर्म्मं कर्म्म कुर्य्यात् प्रयत्नत:।
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रित:॥
सायं प्रातरुपासीत विधिनाग्निं द्विजोत्तम:।
स्नातश्चात: प्रकुर्व्वीत वैश्वदेवं दिने दिने॥
अतिथिञ्चागतं भक्त्या पूजयेच्छक्तितो गृही।
अभ्यागतान् विप्रान् पूजयेदविरोधत:॥
स्वदारनिरतो नित्यं परदारविवर्ज्जित:।
सत्यवादी जितक्रोध: स्वधर्म्मनिरतो भवेत्॥
अकर्म्मणि च संप्राप्ते प्रमादे नैव रोचयेत्।
प्रियां हितां वदेद्वाचं परलोकाविरोधिनीम्॥
एष धर्म्म: समुद्दिष्टो ब्राह्मणस्य समासत:।
धर्म्ममेवन्तु य: कुर्य्यात् स याति ब्रह्मण: परम्॥
हारीत उवाच।
क्षत्रादीनां प्रवक्ष्यामि यथावदनुपूर्व्वश:।
येन येन प्रवर्त्तन्ते विधिना क्षत्रियादय:॥
राजा च क्षत्रियश्चैव प्रजा धर्म्मेण पालयेत्।
कुर्य्यादध्ययनं सम्यक् युगयुक्तो यथाविधि॥
दद्याद्दानं द्विजाग्रेभ्यो धर्म्मबुद्धिसमन्वित:।
देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा॥
धर्म्मेण वै जयाकाङ्क्षी अधर्म्मस्य विवर्जयेत्।
उत्तमां गतिमाप्नोति क्षत्रियो ह्येवमाचरन्॥ *॥
गोरक्षं कृषिवाणिज्यं कुर्य्याद्वैश्यो यथाविधि।
दानं धर्म्मं यथाशक्त्या द्विजशुश्रूषणं तथा॥
लोभदम्भविनिर्म्मुक्त: सत्यवागनसूयक:।
स्वदारनिरतो दान्त: परदारविवर्ज्जित:॥
धनैर्विप्रान् समभ्यर्च्य यज्ञकाले त्वयाचित:।
अप्रमत्त: स्वधर्म्मेषु वर्त्तेत देहपातनात्॥
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रित:।
पितृकार्य्यञ्च तत्काले नारसिंहार्च्चनं तथा॥
एतद्वैश्यस्य कर्म्मोक्तं स्वधर्म्ममनुतिष्ठत:।
एतदासेवमानस्तु मुक्त: स्यान्नात्र संशय:॥ *॥
वर्णत्रयस्य शुश्रूषां कुर्य्यात् शूद्र: प्रयत्नत:।
दासवत् ब्राह्मणानान्तु विशेषेण समाचरेत्॥
अयाचित: प्रदाता स्यात् कृषिं वृत्त्यर्थमाश्रयेत्।
पाकयज्ञविधानेन यजेद्देवानतन्द्रित:॥
शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम्।
धारणं जीर्णवस्त्रस्य विप्रस्योच्छिष्टभोजनम्॥
स्वदारेषु रतिश्चैव परदारविवर्ज्जनम्।
पुराणश्रवणं विप्रान्नारसिंहस्य पूजनम्॥
तथा विप्रनमस्कारस्तथा मन्त्रं दिने दिने।
सत्यं सम्भाषणं चैव रागद्वेषविवर्ज्जनम्॥
इत्थं कुर्व्वंस्तथा शूद्रो मनोवाक्कायकर्म्मभि:।
स्थानमैन्द्रमवाप्नोति व्यक्तपाप: प्रमुच्यते॥"
इति नारसिंहे ५३।५४ अध्यायौ॥ *॥
अन्यच्च।
मदालसोवाच।
"दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदित:।
धर्म्मो नान्यश्चतुर्थोऽस्ति धर्म्मस्त्वापदं विना॥
याजनाध्यापने यज्ञस्तथा शुद्ध प्रतिग्रह:।

इत्येतत् सम्यक् समाख्यातं त्रितयं चास्य जीविका ।
दानमध्ययनं यज्ञः क्षत्त्रियस्याप्ययं त्रिधा ।
धर्म्मः प्रोक्तः क्षितेः रक्षा शस्त्राजीवश्च जीविका ॥
दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥
दानं यज्ञोऽथ शुश्रूषा द्विजातीनां त्रिधा मया ।
व्याख्यातः शूद्रधर्म्मोऽपि जीविका कारुकर्म्मणा ॥
तद्वद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयैः ।
वर्णधर्म्मास्त्विमे प्रोक्ताः श्रूयतामाश्रमाश्रयः ॥”
इति मार्कण्डेयपुराणे मदालसानुशासनाध्यायः ॥
अपरञ्च ।
“ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट्कर्म्माणि यथाक्रमम् ॥
अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः ॥
षण्णान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥
त्रयो धर्म्मा निवर्त्तन्ते ब्राह्मणात् क्षत्त्रियं प्रति ।
अध्यापनं याजनञ्च तृतीयश्च प्रतिग्रहः ॥
वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः ।
न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजापतिः ॥
शस्त्रास्त्रभृत्त्वं क्षत्त्रस्य वणिक्पशुकृषिर्विशः ।
आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः ॥
वेदाभ्यासो ब्राह्मणस्य क्षत्त्रियस्य च रक्षणम् ।
वार्त्ताकर्म्मैव वैश्यस्य विशिष्टानि स्वकर्म्मसु ॥
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्म्मणा ।
जीवेत् क्षत्त्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरः ॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्त्रियोऽपि वा ।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्ज्जयेत् ॥
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥
इदन्तु वृत्तिवैकल्यात् त्यजतो धर्म्मनैपुणम् ।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ॥
सर्व्वान् रसानपोहेत कृतान्नञ्च तिलैः सह ।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः ॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिरस्थितान् ॥
भोजनाभ्यञ्जनाद्दानाद् यदन्यत् कुरुते तिलैः ।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥
सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥

इतरेषान्तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥
रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नञ्चाकृतान्नेन तिला धान्येन तत्समाः ॥
जीवेदेतेन राजन्यः सर्व्वेणाप्यनयङ्गतः ।
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ॥
यो लोभादधमो जात्या जीवेदुत्कृष्टकर्म्मभिः ।
तं राजा निर्द्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥
वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥
वैश्योऽजीवन् स्वधर्म्मेण शूद्रवृत्त्यापि वर्त्तयेत् ।
अनाचरन्नकार्य्याणि निवर्त्तेत च शक्तिमान् ॥
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनाम् ।
पुत्त्रदारात्ययं प्राप्तो जीवेत् कारुककर्म्मभिः ॥
यैः कर्म्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्म्माणि शिल्पानि विविधानि च ॥
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः ।
अवृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत् ॥
सर्व्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयङ्गतः ।
पवित्रं दुष्यतीत्येतद्धर्म्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते ॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
अजीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः ।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥
श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्म्माधर्म्मविचक्षणः ।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥
भरद्वाजः क्षुधार्त्तस्तु सपुत्त्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः ॥
क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥
जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तन्तु त्यागेन तपसैव च ॥
शिलोञ्छमप्याददीत विप्रोऽजीवन् यतस्ततः ।
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥
सीदद्भिः कुप्यमिच्छद्भिर्धने वा पृथिवीपतिः ।
याच्यः स्यात् स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ॥
अकृतञ्च कृतात् क्षेत्राद्गौरजाविकमेव च ।
हिरण्यं धान्यमन्नञ्च पूर्व्वं पूर्व्वमदोषवत् ॥
सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥
विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ।
धृतिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः ॥
ब्राह्मणः क्षत्त्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामन्तु खलु धर्म्मार्थं दद्यात् पापीयसेऽल्पिकाम् ॥

चतुर्थमाददानोऽपि [illegible]
प्रजा रक्षन् परं [illegible]
स्वधर्म्मो विजयस्तस्य [illegible]
शस्त्रेण वैश्यान् रक्षित्वा [illegible]
धान्येऽष्टमं विशां शुल्कं विंशं [illegible]

कर्म्मोपकरणाः शूद्राः कारवः [illegible]
शूद्रस्तु वृत्तिमाकाङ्क्षन् [illegible]
अथवा क्षत्त्रमाराध्य वैश्यं शूद्रो [illegible]
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु [illegible]
जातब्राह्मणशब्दस्य सा ह्यस्य [illegible]
विप्रसेवैव शूद्रस्य विशिष्टं कर्म्म [illegible]
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् [illegible]
प्रकल्प्या तस्य [illegible]
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च [illegible]
उच्छिष्टमन्नं दातव्यं जीर्णानि [illegible]
[illegible]
न शूद्रे पातकं किञ्चित् [illegible]
नास्याधिकारो धर्म्मेऽस्ति न धर्म्मात् [illegible]

धर्म्मेप्सवस्तु धर्म्मज्ञाः सतां वृ[illegible]
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नु[illegible]
यथा यथा हि सद्वृत्तमातिष्ठत्य[illegible]
तथा तथेमञ्चामुञ्च लोकं प्राप्नो[illegible]
शक्तेनापि हि शूद्रेण न [illegible]
शूद्रो हि धनमासाद्य ब्राह्मणान्[illegible]
एते चतुर्णां [illegible]
यान् सम्यगनुतिष्ठन्तो व्रजन्ति पर[illegible]
एष धर्म्मविधिः कृत्स्नश्चातुर्वर्ण्य[illegible]
अतः परं प्रवक्ष्यामि प्रायश्चित्त[illegible]
इति मानवे धर्म्मशास्त्रे भृगुप्रोक्त[illegible]
तायां दशमोऽध्यायः ॥ *।
इत्यादि ॥

वर्णनं, क्ली, (वर्ण स्तुतौ चित्रे [illegible]
ल्युट् ।) स्तवनम् । (यथा, [illegible]
७३ । १० ।
“इत्थं विप्रस्य दमघोषसु[illegible]
दुत्थाय कृष्णगुणवर्णनजा[illegible]
उत्क्षिप्य बाहुमिदमाह सद[illegible]
संश्रावयन् मगधराजसुते[illegible]
चित्रणम् । शुक्लादिवर्णदानम् ।
इति वर्णधातोर्भावेऽनट्प्रत्ययेन नि[illegible]

वर्णना, स्त्री, (वर्ण + णिच् + यु[illegible]
गुणकथनम् । तत्पर्य्यायः । [illegible]
स्तोत्रम् ४ स्तुतिः ५ नुतिः [illegible]
प्रशंसा ८ अर्थवादः ९ । इति हेम[illegible]
१६२ ॥ (यथा, कुमारसम्भवे [illegible]
१६६ ।
“त्रिदशा अपि यद्गुणवर्णना [illegible]

वर्णनीयं, त्रि, (वर्ण + अनीय [illegible]
वर्णनम् । वर्णितव्यम् । (यथा, [illegible]
६ परिच्छेदे ।

था यथायोगं साङ्गोपाङ्गा अमी
इह ॥")
पदार्था यथा,—
र्ण्यानि कथ्यन्ते तानि यानि कवी-
श्वरैः ।
यप्रभृतिषु प्रबन्धेषु बबन्धिरे ॥
राजवधूपुरोहितकुमारामात्यसेवाधिपाः
पुरीशरोऽब्धिसरिद्दुद्यानाङ्गरण्या-
श्रमाः ।
नरगप्रयाणमृगयाश्वेभर्त्तिवैन्दूदया
विरहः स्वयंवरसुरा पुष्पाम्बुकेला
रतम् ॥"
कविकल्पलतायाम् १ स्तवके ३ कुसु-
स्तवार्थः । वर्णधात्वर्थदर्शनात् । यथा,
। ३ । २२ । १७ ।
ण्यादिराजस्य मनोहरिनमद्भुतम् ।
वर्णनीयस्य तदपत्योदयं ययौ ॥")
स्त्री, (वर्णस्य पात्रम् ।) चित्रकारस्य
दिरागस्याधारः । यथा,—
का वर्णपात्रं स्यात् तूलिका लेख्य-
कूर्चिका ॥"
इति शब्दमाला ॥
, पुं, (वर्णयन्ति नानावर्णानि पुष्पाणि
कप् ।) राजतरुणीपुष्पवृक्षः । इति
घण्टः ॥
स्त्री, (वर्णयन्ति पुष्पाणि यस्याः ।
) उड्काष्ठीपुष्पवृक्षः । इति राज-
ः ॥
र्न, स्त्री, (वर्णस्य प्रसादनं यस्मात् ।)
। इति राजनिर्घण्टः ॥
, स्त्री, (वर्णस्य मातेव ककाराद्यक्षर-
ात् ।) लेखनी । इति हारावली ॥
ा, स्त्री, (वर्णानां वर्णमालानां मातृ-
) सरस्वती । इति शब्दरत्नावली ॥
, स्त्री, जातिमाला । (वर्णानां माला
।) अक्षरश्रेणी । तत्र संस्कृतवर्णाः ५०
लायाम् ५१ । इङ्गरेजीयवर्णाः २६ ।
ीयाः २२ । [illegible] अर्थात् इङ्गु-
२८ । आरवीयाः २८ । पारसीयाः ३१ ।
ीयाः ३३ । [illegible]याः ३१ । [illegible]
ीयाः २४ । [illegible]याः २२ । [illegible]
[illegible]याः २६ । [illegible]याः २७ ।
[illegible]याः २० । तातारीयाः २०२ ।
[illegible]याः ३६ । [illegible] [illegible]
: [illegible] ८०००० । [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥"
[illegible]
[illegible]
[illegible]

दीनाञ्च वर्णानां अन्तिमवर्णं सानुस्वारं
कृत्वा पूर्व्ववदुच्चार्य्य मन्त्रजपः कार्य्यः । अनेन
प्रकारेणाष्टोत्तरशतसंख्यो जपो भवति । अन्त-
र्व्यञ्जनमित्युपलक्षणम् ।
"सविन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेत् सुधीः ।
अकारादिक्षकारान्तं विन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमिका ।
क्षकारं मेरुमेवात्र तत्र मन्त्रं जपेन्नहि ॥"
इति नारदीयवचनात् ॥
प्रकारान्तरं विशुद्धेश्वरे ।
"अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितान्
मनून् ॥
कुर्य्याद्वर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ।
चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ॥"
इति तन्त्रसारः ॥
अपि च ।
"अनुलोमविलोमेन कॢप्तया वर्णमालया ।
आदिलान्तलादि आन्तक्रमेण परमेश्वरि ! ।
क्षकारं मेरुरूपञ्च लङ्घयेन्न कदाचन ॥"
इति मुण्डमालातन्त्रम् ॥
वर्णरेखा, } स्त्री, (वर्णा लिख्यन्तेऽनयेति । लिख+
वर्णलेखा, } करणे घञ् । रलयोरैक्यम् ।) कठिनी ।
इति त्रिकाण्डशेषः ॥
वर्णलेखिका, स्त्री, (वर्णलेखा+स्वार्थे कन् । टापि
अत इत्वम् ।) कठिनी । इति रत्नमाला ॥
वर्णवती, स्त्री, (वर्णोऽस्त्यस्यामिति । वर्ण+"तदा-
दिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य
वः ।) हरिद्रा । इति जटाधरः ॥ वर्णविशिष्टे,
त्रि ॥
वर्णविलोडकः, पुं, (वर्णान् विलोडयतीति । वि+
लोड़ि+ण्वुल् ।) लोकस्तेनः । सन्धिचौरः ।
इति मेदिनी । के, २११ ॥
वर्णसङ्करः, पुं, (वर्णेभ्यो ब्राह्मणादिभ्यः वर्णानां
वा सङ्करो मिश्रणं यत्र ।) मिश्रजातिः ।
तद्विवरणं यथा,—
"बभूवुर्वर्णा पश्चाच्च ब्राह्मणजातयः ।
महाजो वासुदेवाख्य आसाः [illegible]जातयः ॥
[illegible] पारमः शूद्रजातयः ।
तासां सङ्करजातेन बभूवुर्वर्णसङ्कराः ॥
गोपनापितभिल्लाश्च तथा मोदककूबरौ ।
ताम्बूलिस्वर्णकारौ च तथा वणिग्जातयः ॥"
तैलिस्थाने माला इति कूबरस्थाने कुम्भ इति
च पाठः ।
"इत्येवमाद्या विप्रेन्द्र ! सच्छूद्राः परिकीर्त्तिताः ।
शूद्राविशां तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः ।
विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षडेते शिल्पिनां वराः ॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च ।
[illegible] ॥"

अजाख्या इत्यत्र अयाख्या इत्यपि पाठः ।
"स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजो-
त्तम ।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि ।
शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्वणिग्विशेषश्च संसर्गात् स्वर्णकारिणः ।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥
कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः ।
बभूवाट्टालिकाकारः पतितो जारदोषतः ॥
अट्टालिकाकारवीर्य्यात् कुम्भकारस्य योषिति ।
बभूव कोटिकः सद्यः पतितो गृहकारकः ॥
कुम्भकारस्य वीर्य्येण सद्यः कोटिकयोषिति ।
बभूव तैलकारश्च कुटिलः पतितो भुवि ।
सद्यः क्षत्रियवीर्य्येण राजपुत्रस्य योषिति ।
बभूव तीवरश्चैव पतितो जारदोषतः ॥
तीवरस्य तु वीर्य्येण तैलकारस्य योषिति ।
बभूव पतितो दस्युर्लेटश्च परिकीर्त्तितः ॥
लेटस्तीवरकन्यायां जनयामास षट् सुतान् ।
माल्लं मल्लं मातरञ्च भड्डं कोलञ्च कन्दरम् ॥"
कन्दरस्थाने कलन्दर इति वा पाठः ।
"ब्राह्मण्यां शूद्रवीर्य्येण पतितो जारदोषतः ।
सद्यो बभूव चाण्डालः सर्व्वस्मादधमोऽशुचिः ॥
तीवरेण च चाण्डाल्यां चर्म्मकारो बभूव ह ।
चर्म्मकार्य्यां च चाण्डालान्मांसच्छेदो बभूव ह ॥
मांसच्छेद्यां तीवरेण कोंचश्च परिकीर्त्तितः ।
कैवर्त्तकन्यायां कोंचात् कर्त्तारः परिकीर्त्तितः ॥
सद्यश्चाण्डालकन्यायां लेटवीर्य्येण शौनकः ।
बभूवतुस्तौ द्वौ पुत्रौ हड्डिडोम्बौ तथा ॥"
हड्डिडोम्बौ [illegible] इत्यपि
पाठः ।
"क्रमेण हड्डिकन्यायां सद्यश्चाण्डालवीर्य्यतः ।
बभूवुः पञ्चपुत्राश्च भद्रा दक्षाश्च ते ॥
[illegible] ।
बभूव सद्यो यो बालो गङ्गापुत्रः प्रकीर्त्तितः ॥
गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः ।
बभूव वेशधारी च पुत्रो युङ्गी प्रकीर्त्तितः ॥
[illegible] सद्यः पुत्रो बभूव ह ।
[illegible] प्रकीर्त्तितः ॥
[illegible] राजपुत्रो बभूव ह ।
राजपुत्र्यां [illegible] प्रकीर्त्तितः ॥
[illegible] परिकीर्त्तितः ।
[illegible] प्रकीर्त्तितः ॥"
[illegible] इति वा पाठः ।
[illegible]
[illegible] बभूव ह ।
[illegible]
[illegible]
[illegible]
[illegible]

[illegible] मनोः प्रथमवासरे ।
[illegible] जातः [illegible] कीर्त्तितः ॥
[illegible] मतेन [illegible] ।
[illegible] ॥
[illegible] प्रथमवासरे ।
जातः [illegible] ॥
[illegible] ।
[illegible] प्रकीर्त्तितः ॥
[illegible] ।
[illegible] ॥
[illegible] धर्मवर्जिताः ॥
[illegible] ।
[illegible] परिकीर्त्तितः ॥
[illegible] ।
[illegible] वा [illegible] द्विज
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible]
[illegible] ॥"
इति ब्रह्मवैवर्त्ते [illegible] १० अध्यायः ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] एव ते ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।

तानप्यनन्तरनाम्नस्तु मातृदोषात् प्रचक्षते ।
ब्राह्मणादुग्रकन्यायामावृतो नाम जायते ।
आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः ॥
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम् ।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥
वैश्यान्मागधवैदेहौ क्षत्रियात् सूत एव तु ।
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राज्जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः ॥
क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनिर्दिशेत् ॥
व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥
झल्लो मल्लश्च राजन्याद् व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खसो द्रविड एव च ॥
वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥
व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्मणां च त्यागेन जायन्ते वर्णसङ्कराः ॥
सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥
सूतो वैदेहकश्चैव चण्डालश्च नराधमः ।
मागधः क्षत्तृजातिश्च तथायोगव एव च ॥
एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते ।
आनन्तर्यात् स्वयोन्यां तु तथा बाह्येष्वपि क्रमात् ॥
ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषितान् ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ।
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ।
प्रतिकूलं वर्तमाना बाह्या बाह्यतरान् पुनः ।
हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥
प्रसाधनोपचारज्ञमदासं दासजीवनम् ।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे ॥
मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये ॥
निषादो मार्गवं सूते दासं नौकर्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः ॥
मृतवस्त्रभृत्सु नारीषु गर्हितान्नाशनासु च ।
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः ॥
कारावरो निषादात्तु चर्म्मकारः प्रसूयते ।
वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥
चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥
चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥
निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम् ।

श्मशानगोचरं सूते [illegible]
सङ्करे जातयस्त्वेताः [illegible]
प्रच्छन्ना [illegible]
स्वजातिजानन्तरजाः [illegible]
शूद्राणान्तु सधर्माणः [illegible]
तपोबीजप्रभावैस्तु ते गच्छन्ति [illegible]
उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह [illegible]
शनकैस्तु क्रियालोपादिमाः [illegible]
वृषलत्वं गता लोके [illegible]
पौण्ड्रकाश्चोड्रद्रविडाः [illegible]
पारदाः पह्लवाश्चीनाः [illegible]
मुखबाहूरुपज्जानां या लोके [illegible]
म्लेच्छवाचश्चार्य्यवाचः सर्वे ते [illegible]
ये द्विजानामपसदा ये चापध्वं[illegible]
[illegible]
[illegible]
वैदेहकानां स्त्रीणाञ्च [illegible]
मत्स्यघातो निषादानां [illegible]
[illegible]
उग्रपुक्कसानां [illegible]
धिग्वणानां चर्म्मकार्य्यं वेणानां [illegible]
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु [illegible]
वसेयुरेते विज्ञाता वर्त्तयन्तः [illegible]
[illegible]
अपपात्राश्च कर्त्तव्या [illegible]
वासांसि मृतचैलानि भिन्नभाण्डे[illegible]
कार्ष्णायसमलङ्कारः परिव्रज्या [illegible]
न तैः समयमन्विच्छेत् पुरुषो धर्म[illegible]
व्यवहारो मिथस्तेषां विवाहः सदृ[illegible]
अन्नमेषां पराधीनं देयं स्या[illegible]
रात्रौ न विचरेयुस्ते [illegible]
दिवा चरेयुः कार्य्यार्थं चिह्नि[illegible]
अबान्धवं शवञ्चैव निर्हरेयुरि[illegible]
वध्यांश्च हन्युः सततं यथाशा[illegible]
वध्यवासांसि गृह्णीयुः [illegible]
वर्णापेतमविज्ञातं नरं कलुषयो[illegible]
आर्य्यरूपमिवानार्य्यं [illegible]
[illegible]
पुरुषं प्रज्ञयन्त्येव [illegible]
पित्र्यं वा भजते शीलं मातुर्वो[illegible]
न कथञ्चन दुर्योनिः प्रकृतिं [illegible]
कुले मुख्येऽपि जातस्य यस्य [illegible]
संश्रयत्येव तच्छील[illegible]
यत्र त्वेते परिध्वंसा [illegible]
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रे[illegible]
ब्राह्मणार्थे गवार्थे वा [illegible]
स्त्रीबालाभ्युपपत्तौ च [illegible]
अहिंसा सत्यमस्तेयं [illegible]
एतं सामासिकं धर्मं [illegible]
शूद्रायां ब्राह्मणाज्जातः श्रेयसा [illegible]
अश्रेयान् श्रेयसीं जातिं गच्छत्या[illegible]
शूद्रो ब्राह्मणतामेति [illegible]

[illegible] चिरावेक्षणकादेव च ।
[illegible] काष्ठमत्र तत्परा ।
[illegible] वेद्यं चैव वेष्टयेत् ।
[illegible] मर्पेद्-
धृतः ।
[illegible] इति निश्चयः ।
[illegible] भूमौ स्थापितः ।
[illegible] पूर्वं कृत्वा प्रतिष्ठितः ।
[illegible] कृत्वैव आत्मं कल्पनीति यथा ।
[illegible] भाण्डाग्रे मर्दं संस्कारमर्हति ।
[illegible] कृपास्थितः मनीषिणः ।
[illegible] सर्वेषाञ्च सर्वदा कृतात्मनः ।
[illegible] विमन्त्रति ।
[illegible] शीघ्रं वेष्टनं कालिकं भवेत् ।
[illegible] निरूपणात् कल्पोऽभवत् ।
[illegible] सहाहोमं प्रकल्पति ।
[illegible] ।
[illegible] न मयी मानसाविति ।"
इति मात्स्ये ८ । १० अध्यायाः ॥ * ॥
[illegible] कारणं दोषाश्च यथा,—
"[illegible]भिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
[illegible] दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥
[illegible] नरकायैव कुलघ्नानां कुलस्य च ।
[illegible] पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
[illegible]तैः कुलघ्नानां वर्णसङ्करकारकैः ।
[illegible]द्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः ॥
[illegible]कुलधर्म्माणां मनुष्याणां जनार्द्दन ।
[illegible] नियतं वासो भवतीत्यनुशुश्रुम ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
[illegible], पुं, (वृणोति व्याप्नोतीति । वृञ् आवरणे + [illegible]विविदिभ्योऽन्यस्मिन्नपि ।" उणा० ३ । १०७ । [illegible] अर्थः धातोर्नुक् च ।) अश्वम् । इत्युणादि-[illegible] ॥

[illegible] स्त्री, (वर्ण्यते भक्ष्यते इति । वर्ण भक्षणे + [illegible] अच् । ततष्टाप् ।) आढकी । इति [illegible] ॥

[illegible]ा, स्त्री, (वर्णा अक्षराणि अनयेति । अङ्क + [illegible] घञ् । ततष्टाप् ।) लेखनी । इति [illegible]रत्नावली ॥

[illegible], पुं, (वर्णान् अटतीति । अट् + अण् ।) [illegible]यनः । चित्रकरः । स्त्रीकृतजीवनः । इति [illegible] । टे, ५५ ॥

[illegible]मा, [न्] पुं, (वर्णः अक्षरं आत्मा स्वरूपं [illegible]स्य ।) शब्दः । इति जटाधरः ॥

[illegible]धिपः, पुं, (वर्णानां ब्राह्मणादीनामधिपः ।) [illegible]क्षत्रियवैश्यशूद्राणामधिपतिग्रहः । यथा,
"[illegible]ब्राह्मणे शुक्रवागीशौ क्षत्रिये भौमभास्करौ ।
[illegible] वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने ॥"
इति ।
"[illegible]स्वाध्याये वेद वर्णाधिप इह शुभदे चोरभे [illegible]
[illegible]वादितौ च ।"
इति च ज्योतिस्तत्त्वम् ॥

वर्णार्द्दः, पुं, (वर्णमर्द्दतीति । वर्ण + अर्द्द + अण् ।) तृणः ।
इति राजनिर्घण्टः ॥

वर्णि, स्त्री, (वर्ण्यते स्तूयते इति । वर्ण स्तुतौ + इन् ।) स्वर्णम् । इति सिद्धान्तकौमुदी । ("वर्णेरिच्चाद्दिरण्ये ।" उणा० ४ । १२१ । इत्युक्तेः हिरण्ये तु वर्णिरितीव । क्वचित् पुंलिङ्गोऽपि ।)

वर्णिकः, पुं, (वर्णा लेखनेन सन्ति अस्येति । वर्ण + ठन् ।) लेखकः । यथा,—
"लेखकैर्लसद्वर्णैः स्फुटकरकौशलः ।
वर्णिको लिपिकरश्चाक्षरचणाक्षरजीवी लिपिलिखिः ॥"
इति हेमचन्द्रः । ३ । १४० ॥

वर्णिका, स्त्री, (वर्णा अक्षराणि लेखनेन सन्त्यस्या इति । वर्ण + ठन् + टाप् ।) कठिनी । यथा,—
"लेखन्यां वर्णिकापि स्यात् कठिन्यामपि
वर्णिका ।"
इति शब्दरत्नावली । २६८ ॥
मसिः । इति त्रिकाण्डशेषः । काञ्चनस्य उत्कर्षः । यथा,—
"वर्णकावारकौशला तु चन्दने च विलेपने ।
द्वयोर्मात्रादिकृत स्त्री स्यादुत्कर्षे काञ्चनस्य च ॥"
इति मेदिनी । के, १५२ ॥

वर्णितः, त्रि, (वर्ण + क्त ।) स्तुतियुक्तः । तत्पर्य्यायः । ईडितः २ शस्तः ३ पणायितः ४ पनायितः ५ प्रणुतः ६ पणितः ७ पनितः ८ गीर्णः ९ अभिष्टुतः १० ईलितः ११ स्तुतः १२ । इत्यमरः । ३ । १ । ११० ॥ नुतः १३ । इति जटाधरः ॥ (विस्तारितः । यथा, महाभारते । १ । २ । २०८ ।
"चतुर्थमेतद्विपुलं वैराटं पर्व्व वर्णितम् ॥"
कथितः । यथा, कथासरित्सागरे । १८ । ३६ ।
"अभर्त्तुश्चैव न मया दरिद्रस्यापि वर्णितम् ॥")

वर्णिनी, स्त्री, (वर्णोऽस्त्यस्या इति । वर्ण + इनिः । ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वनिता । इति हेमचन्द्रः । ३ । १६८ ॥

वर्णी, [न्] पुं, (वर्णा अक्षराणि लेखनेन सन्त्यस्येति । वर्ण + इनिः ।) लेखकः । (वर्णा नील पीतादयः लेखनेन सन्त्यस्येति । इनिः ।) चित्रकरः । (यथा, महाभारते । १२ । ६८ । ५७ ।
"अङ्गारकुम्भसूत्राणां पलाशप्रत्यर्थिनाम् ।
यवसेन्धनदिग्धानां कारयेत च सञ्चयान् ॥" * ।
वर्ण + "वर्णाद्ब्रह्मचारिणि ।" ५ । २ । १३४ ।"
इति इनिः ।) ब्रह्मचारी । यथा,—
"वर्णी स्यात् लेखके चित्रकरेऽपि ब्रह्म-
चारिणि ॥"
इति मेदिनी । ने, १२७ ॥
(यथा, कुमारे । ५ । ५२ ।
"सखी तदीया तमुवाच वर्णिनं
निबोध साधो ! तव चेत् कुतूहलम् ॥")

वर्णविशिष्टे, त्रि ॥ (वर्णोत्तरपदात् तु "धर्म्मशील-वर्णान्ताच्च ।" ५ । २ । १३२ । इति इनिः स्यात् । यथा, कामन्दकीये नीतिसारे । २ । १८ ।
"याजनाध्यापने शुद्धे विशुद्धाच्च प्रतिग्रहः ।
इतिवृत्तमिदं प्राहुर्मुनयो वर्णिनः ॥"
वर्णिनां ब्राह्मणक्षत्रियवैश्याः ॥)

वर्त्तुः, पुं, (वृङ् संभक्तौ + "कमिमनिजनि..." उणा० १ । १८ । इति तुः । न च गित् ।) तट्टविशेषः । इत्युणादिकोषः । आदित्यः ।
इति संक्षिप्तसारोणादिवृत्तिः ॥ (देशविशेषः ।
इत्युज्ज्वलदत्तः ॥)

वर्त्तकं, क्ली, (वर्त्तते इति । वृत् + ण्वुल् ।) कंस-लोहम् । इति हेमचन्द्रः ॥ विदरि इति भाषा ॥
(घूर्णते, त्रि । यथा, गो० रामायणे । २ ।
१०७ । १२ ।
"निवेश सेना भरतः पक्षी पादवर्ती वरः ।
अभिगन्तुं स काकुत्स्थमियेष गुरुवर्त्तकः ॥")

वर्त्तकः, पुं, (वृत् + ण्वुल् ।) पक्षिविशेषः । भारुइ
इति भाषा ॥ (यथा, महाभारते । १३ ।
१११ । १०३ ।
"कौशिकस्तु ततो भूत्वा ततो जायते वर्त्तकः ॥"
अस्य पर्य्यायो गुणाश्च यथा,—
"वर्त्तीको वर्त्तकश्चैवमस्तनोऽन्या वर्त्तकाः स्मृताः ।
वर्त्तकोऽपिश्वरः शीतो ज्वरदोषत्रयापहः ।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाल्पगुणाः स्मृताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
अश्वस्य खुरः । इत्यमरः । ३ । ३ । ११ ॥

वर्त्तका, स्त्री, (वर्त्तक + टाप् । "वर्त्तका शकुनौ प्राचाम् ।" इति वार्त्तिकोक्त्या न अत इत्वम् ।)
वर्त्तकपक्षी । इत्यमरटीकायां रायमुकुटः ॥

वर्त्तकात्मा, [न्] पुं, (वर्त्तते आकाशपथे आत्मा यस्य ।) मेघः । इति शब्दमाला ॥

वर्त्तनं, क्ली, (वर्त्ततेऽनेनेति । वृत् + करणे ल्युट् ।)
वृत्तिः । इत्यमरः । २ । ९ । १ ॥ (यथा, भागवते । ७ । ११ । २६ ।
"सम्मार्ज्जनोपलेपाभ्यां गृहमण्डनवर्त्तनैः ।
स्वयञ्च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥")
साधारणवर्त्तनम् । इति शब्दरत्नावली ॥

वर्त्तनं, क्ली क्ली, (वर्त्ततेऽनेनेति । वृत् + ल्युट् ।)
तूलनाला । तर्कुपीठः । जीवनम् । इति मेदिनी । ने, १२६ ॥ (यथा, मार्कण्डेये । ५० । ७१ ।
"देवतापितृभक्तानामतिथीनाञ्च वर्त्तनम् ।
यस्यावशिष्टेनान्नेन पुंसस्तस्य गृहं त्वज ॥")

वर्त्तनः, पुं, (वर्त्तते इति । वृत् + "अनुदात्तेतश्च हलादेः ।" ३ । २ । १४९ । इति युच् ।)
वामनः । इति मेदिनी । ने, १२५ ॥ वर्त्तिष्णौ, त्रि । इत्यमरः । ३ । १ । २९ ॥ (यथा, भागवते । ३ । ११ । २६ ।
"एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
तिर्य्यङ्नृपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥")

वर्त्तनिः, पुं, पूर्व्वदेशः । इति त्रिकाण्डशेषः ॥
(स्त्री, वर्त्ततेऽनयेति । वृत् + "वृतेश्च ।" उणा० २ । १०७ । इति अनिः । पन्थाः । इत्युज्ज्वलदत्तः ॥)

वर्त्तनी, स्त्री, (वर्त्तनि + कृदिकारादिति पक्षे ङीप् ।)
पन्थाः । पेषणम् । इति शब्दरत्नावली ॥

वर्त्तमानः, पुं, (वर्त्तते इति । वृत्+शानच् । मुक् ।) प्रयोगाधिकरणीभूतकालः । इति नैयायिकाः । तत्कालवृत्ते, त्रि । तयोः पर्य्यायौ । अद्यतनः २ आधुनातनः ३ । इति राजनिर्घण्टः । वैयाकरणमते तु । आरब्धापरिसमाप्तिर्व्वर्त्तमानः कालः । यथा । महाभारतं पठति । स तु चतुर्विधः । यथा,—
"प्रवृत्तोपरतश्चैव वृत्ताविरत एव च ।
नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्विधः ॥"
क्रमेणोदाहरणानि । मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयति इत्यर्थः । इह कुमाराः क्रीडन्ति सदानीन्तनक्रीडाभावेऽपि पूर्व्वक्रीडायां बुद्धौ वर्त्तमानत्वात् । पर्व्वतास्तिष्ठन्ति नित्यप्रवृत्तत्वात् । किञ्च पर्व्वतानां स्थितत्वे वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्व्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो द्विविधः । भूतसामीप्यो भविष्यत्सामीप्यश्च । भूतसामीप्ये यथा । कदा आगतोऽसि इति प्रश्ने अध्वखेदादेर्व्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत् सामीप्ये यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमनक्रियमाणोद्यमोऽपि वदति । इति मुग्धबोधटीकायां दुर्गादासः ॥

वर्त्तरूकः, पु, (वर्त्तौ वर्त्तनं राति गृह्णातीति । रा+बाहुलकात् ऊकः ।) नदीभेदः । काकनीडः । जलावर्त्तः । इति मेदिनी । के, २१२ । द्वारपालः । यथा,—
"मन्त्री मन्त्रिधरोऽमात्यो द्वाःस्थितो वेत्रधारकः ।
दौःसाधिको वर्त्तरूको गर्व्वाटो दण्डवासिनि ॥"
इति त्रिकाण्डशेषः ॥

वर्त्तलोहं, क्ली, (वर्त्तते इति । वृत्+अच् । ततः कर्म्मधारयः ।) लौहविशेषः । पित्तरि इति भाषा । इति केचित् । तत्पर्य्यायः । वर्त्तलोहम् २ वर्त्तकम् ३ लोहसङ्करम् ४ नीलकम् ५ नीललोहम् ६ नीलजम् ७ वर्त्तलोहकम् ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । कफदाहपित्तनाशित्वम् । मधुरत्वम् । पित्तदाहशमनत्वञ्च । इति राजनिर्घण्टः ॥

वर्त्तिः, स्त्री, (वर्त्ततेऽनया इति । वृत्+"वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।" उणा॰ ४ । ११८ । इति इञ् ।) भेषजनिर्म्माणम् । नयनाञ्जनम् । लेखः । गात्रानुलेपनी । दीपदशा । (यथा, भागवते । ५ । ११ । ८ ।
"यथा प्रदीपो घृतवर्त्तिमश्नन्
शिखाः सधूमा भजति ह्यन्यदा स्वम् ॥")
दोषः । इति मेदिनी । ते, ५५ ॥ * ॥ वर्त्तिविद्यो यथा,—
"वनस्य वर्त्तं प्रथमं विस्तरं माषसं यथा ।
धनो रमाणं चौरं निष्क्रान्ति मनःशिला ।
दशां वर्त्तिं दहन्ति कासं तिमिरं पटलं तथा ॥"
इति गारुडे १९८ अध्यायः ॥

(वर्त्ततेऽनयेति । वृत्+"हृपिषिरुहिवृतिविदिच्छिदिकीर्त्तिभ्यश्च ।" उणा॰ ४ । १४० । इति इः । बाहुलकात् ङीषपि । योगकर्म्मसाध्यम् । इत्युज्ज्वलदत्तः ॥)

वर्त्तिकः, पुं, पक्षिविशेषः । बटेर इति हिन्दी भाषा । तत्पर्य्यायः । वार्त्तिकः २ वर्त्ती ३ गाञ्जिकायः ४ । अस्य मांसगुणाः ।
"सदच वार्त्तिकं मांसं निर्द्दोषं वीर्य्यपुष्टिदम् ।"
तद्वत् तित्तिरवत् । इति राजनिर्घण्टः ॥

वर्त्तिका, स्त्री, वर्त्तकपक्षी । इत्यमरः । वर्त्तते इत्यच् वर्त्तः । स्वार्थे कः वर्त्तकः । भारद्वाजः इति ख्यातः । वृत्तिजातिभ्यां तिकः वर्त्तिका स्त्रीलिङ्गा । बाट्भार इति ख्याता । नामद्वयमिदमित्यमरदीपिका । वर्त्तिकेति स्त्रियामीत्वप्रतिषेधार्थं ह्रयोरुपादानमिति माधवी । रूपभेदप्रदर्शनार्थमिति रायमुकुटः । इति तट्टीका सारसुन्दरी ॥ सा च बटेर पक्षी इति भाषा ख्याता । अस्या मांसगुणाः ।
"वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी ।"
इति राजवल्लभः ॥

अजशृङ्गी । इति राजनिर्घण्टः ॥ (वर्त्ति+स्वार्थे कन् । टाप् ।) वर्त्तिः । वाति इति प्रलिता इति पलिता इति च भाषा । इत्युणादिकोषः ॥ * ॥ सा पञ्चविधा । यथा,—
"पद्मसूत्रभवा दर्भगर्भसूत्रभवा तथा ।
शाणजा बादरी वापि फलकोषोद्भवा तथा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता ॥"
इति कालिकापुराणे ६८ अध्यायः ।

वर्त्तिष्णुः, त्रि, (वर्त्तते इति । वृत+"अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ।" ३ । २ । १३६ । इति इष्णुच् ।) वर्त्तनशीलः । तत्पर्य्यायः । वर्त्तनः । इत्यमरः । ३ । १ । २९ ॥ वर्त्ती । इति हेमचन्द्रः । ३ । ५३ ॥ (यथा, भट्टौ । ५ । १ ।
"निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥")

वर्त्तिष्यमाणः, त्रि, (वृत्+भविष्यति स्यमानप्रत्ययः ।) भविष्यत्कालादिः । वर्त्तमानप्रागभावाश्रयः । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे । ६ । ३०८ ।
"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥")

वर्त्ती, स्त्री, (वर्त्ति+कृदिकारादिति ङीष् ।) वर्त्तिः । इत्यमरटीका ॥ (यथा, महाभारते । ३ । २१ । २३ ।
"आसीदभ्यधिका चास्य श्रीः श्रियं प्रसुमूर्षतः ।
निर्व्वाणकाले दीपस्य वर्त्तीमिव दिधक्षतः ॥")

वर्त्ती, [न्] (वर्त्तते इति । वृत्+णिनिः ।) वर्त्तिष्णुः । इति हेमचन्द्रः । ३ । ५३ ॥

वर्त्तुलं, त्रि, (वर्त्तते इति । वृत्+बाहुलकात् उलच् ।) गोलवस्तु । तत्पर्य्यायः । निस्तलम् २ वृत्तम् ३ । इत्यमरः । ३ । १ । ६९ ॥

मत्कुणादिनम् ॥ इति
(यथा, भागवते । ५ । १६ । १ ।
"यो वा अयं द्वीपः ...
निवुनयोजनविशालः समवर्त्तुलो
यथा ॥")
"सम्पूर्णगर्भवृत्तानि सुवर्त्तुलानि ।
...
आवर्त्तः कमठो ...
...
वृत्तानि यथा,—
"वृत्तानि ...
...
कर्णयाम्रभुजापाम्रा...
...दिकापरिखायोमण्डारथ...
इति कविकल्पलतायाम् २ स्तबकम् ॥

वर्त्तुलं, क्ली, गृञ्जनम् । ...

वर्त्तुलः, पुं, कलायविशेषः । गोलकः ।
यथा,—
"कलायस्य भयो ...

वर्त्तुला, स्त्री, (वर्त्तुल+टाप् ।) ...
इति हारावली । २१३ । ...
भाषा ॥

वर्त्तुली, स्त्री, (वर्त्तुल+गौरादित्वात् ङीष् ।) गजपिप्पली । इति राजनिर्घण्टः ॥
अस्या गजपिप्पलीशब्दे ज्ञातव्याः ॥

वर्त्म, [न्] क्ली, (वर्त्ततेऽनेनास्मिन् वा । वृत्+मनिन् ।) पन्थाः । इत्यमरः । २ । १ ।
(यथा, ऋग्वेदे । १ । ८५ । ३ ।
"गोमातरो यच्छुभयन्ते
अञ्जिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः ।
बाधन्ते विश्वमभिमातिनमप
वर्त्मान्येषामनु रीयते घृतम् ॥"
"वर्त्मानि मार्गाननु" इति
सायणः ॥ यथा च रघौ । २ । २ ।
"पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या ।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या ॥")
नेत्रच्छदः । इति मेदिनी । ने, १२८ ।
(अष्टाङ्गहृदये । २ । १० ।
"सितासितञ्च सन्धी नेत्रवर्त्मं ...
प्रच्छादनं भवेद्वर्त्म चाक्षिकूटं ...

वर्त्मनिः, स्त्री, (वर्त्तते इति । वृत्+ ...
उणा॰ २ । १०७ । इति अनिः ...
मुडागमोऽप्यत्रेति केचित् । ...
र्त्तनः । इत्युज्ज्वलदत्तः ...
इत्युणादिकोषः ॥

वर्द्ध, क पूर्त्तिच्छेदौ । इति कविकल्पद्रुमः ।
(चुरा॰-पर॰-सक॰-सेट् ।) क, वर्द्धयति ।
क दीर्घविधानेन पूर्त्तिच्छेदार्थे ...

[illegible]
(वर्द्धते पुष्पमनेनेति । वर्द्ध + ल्युट् ।)
(वर्द्धते इति । वृध् + णिच् + ल्युट् ।)
…वर्द्धित्र । इति जटाधरः ॥ पूर्त्तिः ।
इति शब्दरत्नावली ॥
पुं, (वर्द्धते इति । वृध् + ल्युट् ।)
…च्छेदिका । इत्यमरः । २ । ९ । ९० ॥
…नीति । वर्द्ध पूरणे छेदने च + ल्युट् ।)
…छेदके च, त्रि ॥
पुं, (वर्द्धते छिनत्तीति । वर्द्ध + ल्युट् ।
…वर्द्धयतीति । वृध णिच् + बाहुलकात्
) यथा । इत्यमरः । २ । १० । ९ ॥
…, रामायणे । १ । ११ । ७ ।
…शिल्पिनाम् शिल्पकराम् वर्द्धकीन् शम-
कामपि ।
…न् शिल्पिनश्चैव तथैव तट्टकर्मणाम् ॥”)
[न्] पुं, (वर्द्धते वर्द्धयति अर्च्यति ।
+ इनि ।) वर्गमण्डलाविशेषः ।
…इति हिन्दी भाषा । तत्पर्य्यायः । मत्तः २
…: ३ गजा ४ स्थपतिः ५ रथकारः ६
…: ७ काष्ठतट् ८ काष्ठतक्षः ९ । इति
…नायणौ ॥ (यथा, वृहत्संहितायाम् ।
…८८ ।
“चरभङ्ग चलमिदी
…मिदा नाशो बन्धस्य विकल्पः ।
…चर्णनयोस्भङ्ग
तथाविभङ्ग च वर्द्धकिनः ॥”)
…नी, (वृध् चौरादिणिः + ल्युट् ।) छेदनम् ।
…, मनुः । २ । २९ ।
…नाभिवर्द्धनात् पुंसो जातकर्म विधीयते ॥”)
…: । इति मेदिनी । ने, १२३ ॥
…त्रि, (वर्द्धयतीति । वृध् + नन्द्यादित्वात्
…यद्वा, वर्द्धते तच्छील इति । वृध् पूर्व्वो +
…शद्धासितभ्येति ।” ३ । २ । १४९ । इति
।) वर्द्धिष्णुः । इत्यमरः । ३ । १ । २८ ॥
…, ऋग्वेदे । ३ । ३२ । १२ ।
…हि त्व इन्द्र वर्द्धनो भूदुत प्रियः सुतसोमो
मियेधः ॥”)
…स्त्री, घटी । इति मेदिनी । ने, १२३ ॥
…र्ज्जनी । इति हेमचन्द्रः । ४ । ८२ ॥
…पात्रविशेषः । वद्ना इति भाषा । यथा,
…तुः स्त्री कर्करी पात्री वर्द्धनी च लल-
न्तिका ॥”
इति जटाधरः ॥ * ॥
…ष्ठादिकर्म्मणि तत्प्रयोजनं यथा,—
…ष्ठा यस्य देवस्य तदाख्यं कलसं न्यसेत् ।
…न्यां पूजयेद्याम्ये चक्रचैव च वर्द्ध-
नीम् ॥

[illegible]
…मासि मासि …
…
…
…
वर्द्धमा तु समावृत्तं कलसं भावयेद्द् ॥
वर्द्धनी धारया सिञ्चन्तो धारयेत्ततः ।
…वर्द्धनीकुम्भं स्थापयित्वा विसर्जयेत् ॥”
इति मात्स्ये ९८ अध्यायः ॥

वर्द्धमानः, पुं, (वर्द्धते इति । वृध वृद्धौ + शानच् ।)
एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (अस्य
पर्य्यायो यथा,—
“रुबू एरण्ड आमण्डश्चित्री गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ।
वातारिस्तरुणश्चापि रुबूकश्च निगद्यते ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पञ्जरिदः । शरावः । (यथा, महाभारते । ७ ।
८० । १८ ।
“तथा गाः कपिला दोग्ध्रीः सवत्साः पाण्डु-
नन्दनः ।
हेमशृङ्गी रूप्यखुरा दत्त्वा चक्रे प्रदक्षिणम् ।
स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्च-
नान् ॥”
अस्मिन्नर्थे क्लीवलिङ्गेऽपि दृश्यते । यथा, तत्रैव ।
१३ । ९४ । १९ ।
“तथास्तु निष्पूर्णानि वर्द्धमानानि मानवः ।
प्रदाय पुरुषपशुमानिह प्रेत्य च मोदते ॥”
तथा च सुश्रुते सूत्रस्थाने २९ अध्याये ।
“स्त्री पुत्रिणी सवत्सा गौर्वर्द्धमानमलङ्कृता ।
कन्या मत्स्याः फलं चामं स्वस्तिकं मोदका दधि ॥”)
विष्णुः । इति मेदिनी । ने, २०८ ॥ (यथा,
महाभारते । १३ । १४९ । ४१ ।
“वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः ॥”)
जिनविशेषः । तत्पर्य्यायः । वीरः २ चरमतीर्थ-
कृत् ३ महावीरः देवार्यः ५ ज्ञातनन्दनः ६ ।
इति हेमचन्द्रः ।१। ३० ॥ धनिनां गृहविशेषः ।
यथा,—
“स्वस्तिको वर्द्धमानश्च नन्द्यावर्त्तादयोऽपि च ॥”
इति हलायुधः ॥
(यथा, वृहत्संहितायाम् । ५३ । ३३ ।
“द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्तत-
श्चान्यः ।
तद्वच्च वर्द्धमाने द्वारन्तु न दक्षिणं कार्य्यम् ॥”)
स्वनामख्यातदेशः । यथा,—
“प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः ॥”
इति ज्योतिस्तत्त्वे कूर्म्मचक्रम् ॥
(भद्राश्ववर्षस्य कुलपर्व्वतविशेषः । यथा, मार्क-
ण्डेये । ५९ । १२ ।
“विशालः कम्बलः कृष्णो जयन्तो हरिपर्व्वतः ।
विशोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः ॥”
वृद्धिविशिष्टे, त्रि ।)

वर्द्धमानकः, त्रि, (वर्द्धमान + स्वार्थे संज्ञायां वा
कन् ।) वृद्धिविशिष्टः । पुं, शरावः । इत्यमरः ।
२।९।३३ ॥ (यथा, महाभारते । १४ ।६५।१४।
“भृङ्गाराणि कटाहानि कलसान् वर्द्धमान-
कान् ॥”)
कार्ष्णि कन्दुके स्वस्तिकस्य । (प्रासादविशेषः ।
इति महाभारतटीकायां नीलकण्ठः ॥ यथा,
महाभारते । ७ । ५५ । ४ ।
“कटमर्द्धकगान्धर्वैः पुष्पैर्वर्द्धमानकैः ।
नित्योद्योगैश्च क्रीडद्भिस्तत्र स्म परिवर्जिता: ॥”)
वर्द्धापनं, क्ली, नाड़ीच्छेदनम् । यथा,—
“अर्द्धरात्रे व्यतीतायां सा नन्दिगुडमन्दिरा ।
ततो वर्द्धापनं चक्रे नानाढ्यैः करणं मम ॥
कर्णवत् तनुजस्यास्यां प्रभाते नवमीदिने ।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः ॥”
वर्द्धापनं नाड़ीच्छेदनम् । इति तिथ्यादितत्त्वम् ।
वर्द्धितं, त्रि, (वृध् + क्तः ।) प्रवृद्धम् । छिन्नम् ॥
पूरितम् । इति मेदिनी । ते, १४८ ॥ (वरि-
पूर्णम् । यथा, मनुः । ३ । २२४ ।
“पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम् ।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥”
“अन्नस्येति कर्म्मणि षष्ठी । वर्द्धितं पूर्णं पिठ-
रादिपात्रम् ।” इति तट्टीकायां कुल्लूकभट्टः ॥
वृध + णिच् + क्तः । वृद्धिं प्रापितम् । यथा,
भागवते । ४ । २३ । १ ।
“दृष्ट्वात्मानं प्रवयसमेकदा वैण्य आत्मवान् ।
आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजापतिः ॥”)
वर्द्धिष्णुः, त्रि, (वर्द्धते इति । वृध + “अलङ्कृ-
ञिति ।” ३ । २ । १३६ । इति इष्णुच् ।)
वर्द्धनशीलः । तत्पर्य्यायः । वर्द्धनः २ । इत्य-
मरः । ३ । १ । २८ ॥ (यथा, भट्टिः । ५ । १ ।
“निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥”)
वर्द्ध्रं, क्ली, (वर्द्धते दीर्घीभवतीति । वृध् + “वृधि-
वपिभ्यां रन् ।” उणा० २ । २७ । इति रन् ।)
चर्म्म । इत्युणादिकोषः ॥ (यथा, अथर्व्ववेदे ।
१४ । १ । ६० ।
“त्वष्टा पिपेश मध्यतोऽनुवर्द्ध्रान्त्स्या नो अस्तु
सुमङ्गली ॥”)
वर्द्ध्री, स्त्री, (वर्द्ध्र + गौरादित्वात् ङीष् ।) चर्म्म-
रज्जुः । वरी इति भाषा । तत्पर्य्यायः । नद्ध्री २
वरत्रा ३ । इत्यमरः ॥ वर्द्धी ४ । इति भरतः ॥
वर्पः, [स्] क्ली, (वृणोति संवृतं भवतीति । वृ +
“वृङ्शीङ्भ्यां स्वरूपाङ्गयोः पुट् च ।” उणा०
४ । २०० । इति असुन् पुडागमश्च ।) रूपम्
इत्युणादिकोषः ॥ (यथा, ऋग्वेदे ।१।१४०।५।
“आदस्य ते ध्वसयन्तो वृथेरते
कृष्णमभ्वं महि वर्पः करिक्रतः ॥”
स्तोत्रम् । यथा, तत्रैव । १ । ३८ । १ ।
“कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ
कं ह धूतयः ॥”
“कस्य यजमानस्य क्रत्वा क्रतुना सङ्गच्छध्व इति

देवः। यदा कश्चिद् यजमानस्य यर्थः सोऽपि च मनुष्यवद्रि।" इति महाभाष्ये सायणः।)

वर्ब, गत्याम्। वर्बे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) वर्बति। इति दुर्गादासः।

वर्म्म, [न्] क्ली, (वृणोति आच्छादयति शरीरमिति। वृ+मनिन्।) तनुत्रम्। इत्यमरः। २। ८। ६३॥ (यथा, रघुः। ४। ५६।
"[illegible] वाडवाग्नेर्वरतो [illegible]।
[illegible]:॥"
[illegible]म्। इति निघण्टुः। ३। ४॥ यथा, बृहत्संहितायाम्। ११। ३।
"छिन्नभिन्नभिन्नशितासिकटाक्षि-
[illegible] मातृभिः।
[illegible]
[illegible]भिः॥")

वर्म्मकण्टकः, पुं, पर्पटः। इति राजनिर्घण्टः। (विवरणमस्य पर्पटशब्दे विज्ञेया।)

वर्म्मकषा, स्त्री (वर्म्म कषतीति। कष+अच्। टाप्।) सप्तला। इति शब्दरत्नावली। चामार कषा इति भाषा।

वर्म्मा, [न्] पुं, (वृ+मनिन्।) क्षत्रियस्य पद्धतिः। यथा,—
"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्य च।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"
इति चाहुतत्त्वधृतयमवचनम्॥

वर्म्म, पुं, [illegible]। [illegible] इति भाषा। अस्य गुणाः। गुरुत्वम्। रुच्यत्वम्। कषायत्वम्। [illegible]। इति राजवल्लभः। (यथा, [illegible]। १। १३।
"[illegible]।"
[illegible] यथा,—
"[illegible]॥"
इति [illegible] द्वितीये भागे।)

वर्म्मि[illegible], त्रि, (वर्म्म [illegible]। वर्म्म+इनि। [illegible]) [illegible]। इत्यमरः। [illegible]। इति [illegible]। (यथा, [illegible]। २। ८१। ११।
"[illegible]॥")

वर्म्म[illegible], पुं, [illegible]। [illegible] इति भाषा। अस्य [illegible]। [illegible]। [illegible]। इति राजवल्लभः।

वर्ष[illegible], त्रि, (वर्षे [illegible] इति। [illegible]—"[illegible]।" ३। १। ९८। इति यत्।) [illegible]। इत्यमरः। ३। १। ६३। (यथा, [illegible]। ९। १।
"[illegible]।
[illegible]॥")
[illegible]। इति [illegible]। (यथा, [illegible]।

"माहेन्द्रं नममभितः करेणुवर्य्याः
पर्य्यन्तस्थितजलदा दिशः पतन्तः॥")

वर्य्यः, पुं, (वर्य्यते प्रार्थ्यते इति। वर+यत्।) कामदेवः। इति मेदिनी। ये, ४०॥

वर्य्या, स्त्री, (व्रियते इति। वृ+"अवद्यपण्यवर्य्येति।" ३। १। १०१। इति अप्रतिबन्धे यत्।) पतिंवरा। इत्यमरः। २।६।७॥ कन्या। इति मुग्धबोधव्याकरणम्॥

वर्व्वणा, स्त्री, (वरिष्ठयत्नशब्देन वणति शब्दायते इति। वण शब्दे+अच्। टाप्।) नीलमक्षिका। इत्यमरः। २। ३। २७॥ नीलाकारवर्णा मक्षिका वर्व्वणा। भणभणिया इति ख्याता। मक्षिकाख्यायां द्वयोके। वरिति वणति वर्व्वणा। व्रण वण भण शब्दे पचादित्वादन्‌ अच्। किंवा वृणोति पूतिदग्धं भजते इति वृडो विच् वर्। वणतिरपि यथा ततः कर्म्मधारये वर्व्वणा। इति तट्टीकायां भरतः॥

वर्व्वरं, क्ली, (वृणुते वरयति नानागुणान् इति। वृ+"कृगृशृवृञ्चतिभ्यः ष्वरच्।" उणा० २। १२१। इति ष्वरच्।) हिङ्गुलम्। पीतचन्दनम्। बोलम्। इति राजनिर्घण्टः॥

वर्व्वरः, पुं, (वृणोति दीपामिति। वृ+ष्वरच्।) पामरः। स च नीचजातिः। केशः। बाबरी इति भाषा। चकलः। देशविशेषः। (तद्देशवासिनि, पुंभूम्नि। यथा, मार्कण्डेये।५७।३८।
"काम्बोजा दरदाश्चैव वर्व्वरा हर्षवर्द्धनाः॥")
पत्रिका। इति मेदिनी। रे, २०८॥ तृणविशेषः। काल बावुइ इति भाषा। तत्पर्य्यायः। सुसलः २ गरभः ३ कृष्णवर्व्वरकः ४ सुगन्धकः ५ गन्धपत्रः ६ पूतगन्धः ७ सुखावहः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वान्तिविषविषमलहृद्रोगनाशित्वञ्च। इति राजनिर्घण्टः॥

वर्व्वरकं, क्ली, (वर्व्वर+स्वार्थे कन्।) चन्दनभेदः। तत्पर्य्यायः। वर्व्वरोत्थम् २ श्वेतवर्व्वरकम् ३ शीतम् ४ सुगन्धिः ५ पित्तारिः ६ सुरभिः ७। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। कफमारुतपित्तकुष्ठकण्डूव्रणनाशित्वम्। विदाहकरदोषजित्त्वञ्च। इति राजनिर्घण्टः॥

वर्व्वरा, स्त्री, (वर्व्वरतृणवच्चैव आकृतिरस्यास्ति इति। वर्व्वर+अच्। टाप्।) पुष्पभेदः। शाकभेदः। इति मेदिनी। रे, २०८॥ (वर्व्व इति शब्दं रातीति। रा+कः।) मक्षिकाभेदः। इति शब्दरत्नावली॥

वर्व्वरा, } स्त्री, (वर्व्वर+टाप्। पक्षे विलात्
वर्व्वरी, } ङीष्।) तुलसीविशेषः। बाबुइ इति भाषा। तत्पर्य्यायः। कवरी २ तुङ्गी ३ खरपुष्पा ४ अजगन्धिका ५ अजमन्दा ६ वरा ७ गन्धपत्रिका ८। इत्यमरशब्दरत्नावल्यौ॥ तस्याः प्रकारा गुणाश्च।
"वर्व्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र शुक्ले तु कठिञ्जरकुठेरकौ॥

कालमारः [illegible]
तत्र शुक्लोऽपि [illegible]
वर्व्वरीनितयं हृद्यं शीतं [illegible]
तीक्ष्णं रुचिकरं वृद्ध [illegible]
पित्तजं [illegible]

वर्व्वरीकः, पुं, (वृङ्‌ [illegible]
[illegible] इति ईकन्‌ द्विवचनं [illegible]
[illegible]। [illegible]
[illegible]। [illegible]
इति भाषा। इति [illegible]
कालः। इति हेमचन्द्रः।
[illegible]
[illegible]॥

वर्व्वा, स्त्री, वर्व्वरी। [illegible]

वर्व्विः, त्रि, (वृ+"[illegible]
इति क्विन्।) [illegible]

वर्व्वूरः, पुं, (वृ+[illegible]
विशेषः। बावला इति [illegible]
युगलाक्षः २ [illegible]
मोदकः ५ पङ्क्तिबीजः [illegible]
[illegible] ८ दृढबीजः ९
गुणाः। कषायत्वम्। [illegible]
[illegible]
राजनिर्घण्टः।

वर्ह, पुं, क्ली, (वर्ह्यते [illegible]
[illegible]
व्रियते प्रार्थ्यते इति। [illegible]
[illegible]। [illegible]
[illegible]। (यथा, [illegible]
"[illegible]
[illegible]
[illegible]। [illegible]
मनुः। ५। ११।
"[illegible]
[illegible]
[illegible]। इति [illegible]
[illegible]। वृह्+[illegible]
[illegible]। २। ५८। ७। [illegible]
[illegible]
[illegible]
[illegible]
परिमाणं पूर्ब्बवत् [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

● [illegible] विनी।
[illegible] दीपाः।
[illegible] सप्तद्वीपवतीं धराम्।
[illegible] प्र चकार ह-
मोऽपि।"
● [illegible] विस्तर।
[illegible]।
[illegible]।"

[illegible] कमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम्। यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथासंख्यम्। तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते।

यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति। चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्च भवति।१।●। अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। प्लक्षो जम्बुप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं यवसं सुभद्रं शान्तं क्षेमममृतमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः।२।●। एवम् इक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते। यत्र ह वै शाल्मली प्लक्षायामा। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमविज्ञातमिति। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः। स्वरसः शतशृङ्गो वामदेवः कुन्दः मुकुन्दः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति।३।●। एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्। वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव। बभ्रुश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्ध्वरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति।४।●। तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तः। वृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चनामा पर्वतराजो द्वीपनामनिर्वर्त्तक आस्ते। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपबर्हिणो नन्दो नन्दनः सर्वतोभद्र इति। अभया अमृतौघा आर्यका तीर्थवती रूपवती पवित्रवती शुक्लेति।५।●। एवं पुरस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति। अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति।६।●। एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतः। तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामः। यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानाम्। यदुपरिष्टात् सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम एतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स्वयं पूर्वजवद्भगवत्कर्मशील आस्ते। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्मकेण कर्मणाराधयन्ति।७। इति श्रीभागवते ५ स्कन्धे १।२।१६।१८।२० अध्यायाः।●। अपि च।

"कन्ये द्वे दश पुत्राश्च सम्राट् कुक्षिश्च ते उभे।
ते सर्वे भ्रातरः शूराः प्रजापतिसमा द्विज।
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वपुः।
ज्योतिष्मान् द्युतिमान् भव्यः सवनो मित्र एव वा।
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः।
जातिस्मरा महाभागा न राज्याय मनो दधुः।
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान्।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे।
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः।
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये।
क्रौञ्चद्वीपे द्युतिमन्तं भव्यं शाकाह्वये सुतम्।
पुष्कराधिपतिश्चैव सवनं कृतवान् सुतम्।
महावीतो धातकिश्च पुष्कराधिपतेः सुतौ।
द्विधा कृत्वा ततो वर्षं पुष्करे स न्यवेशयत्।
जलदश्च कुमारश्च सुकुमारो मनीचकः।

कुमोत्तरोऽथ मोदाकी सप्तमस्तु महाद्रुमः ।
तन्नामाङ्कानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्त्रांश्चापि निबोध मे ॥
कुशलो मनोऽनुगश्चोष्णः प्रधानश्चान्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमस्तु तथापरः ॥
तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ॥*॥
ज्योतिष्मतः कुशद्वीपे पुत्त्रनामाङ्कितानि वै ।
तथापि सप्त वर्षाणि तेषां नामानि मे शृणु ।
उद्भिन्नं वेणुमच्चैव द्वैरथं लम्बमेव च ॥
धृतिमत् प्रभाकरश्चैव कपिलश्चापि सप्तमम् ।
वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभवन् ॥
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव महीयः सुप्रभस्तथा ॥
तथैव शाल्मले तेषां स्वनामानि तु सप्त वै ।
सप्तमेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य ये ।
तेषां नामाङ्कितैर्वर्षैस्तद्वर्षं सप्तभिर्वृतम् ।
पूर्व्वं शाकभवं वर्षं शिशिरन्तु सुखोदयम् ॥
आनन्दञ्च शिवञ्चैव क्षेमकञ्च तथा ध्रुवम् ।
प्लक्षद्वीपादिकेष्वेषु शाकद्वीपान्तिकेषु च ॥
ज्ञेयः पञ्चसु धर्म्मोऽयं वर्णाश्रमविभागजः ।*।
यानि किंपुरुषादीनि वर्षाण्यष्टौ हिमाह्वयम् ।
सुखमायुश्च रूपञ्च बलं धर्म्मश्च नित्यशः ।
अष्टास्वेतेषु वर्षेषु सर्व्वं साधारणं स्मृतम् ॥*॥
आग्नीध्राय पिता पूर्व्वं जम्बुद्वीपं ददौ द्विज ।
तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव ।
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ।
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ॥
रम्यश्च पञ्चमः पुत्रो हिरण्वः षष्ठ उच्यते ।
कुरुस्तु सप्तमस्तेषां भद्राश्वस्त्वष्टमः स्मृतः ॥
नवमः केतुमालश्च तन्नाम्ना वर्षसंस्थितिः ।*।
यानि किंपुरुषादीनि वर्षाण्यष्टौ हिमाह्वयम् ॥
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ।
विपर्य्ययो न तेष्वस्ति जरामृत्युभयं न च ॥
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ।
न वै चतुर्युगावस्था आपदः ऋतवो न च ॥*॥
आग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज ।
ऋषभाद् भरतो जज्ञे वीरः पुत्त्रशताग्रजः ।
सोऽभिषिच्यर्षभः पुत्त्रं महाप्राव्राज्यमास्थितः ।
तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ॥*॥
हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥
भरतस्याभवत् पुत्रः सुमतिर्नाम धार्म्मिकः ।
तस्मिन् राज्यं समावेश्य भरतोऽपि वनं ययौ ॥
एतेषां पुत्त्रपौत्त्रैश्च सप्तद्वीपा वसुन्धरा ।
प्रियव्रतस्य पुत्त्रैस्तु भुक्ता स्वायम्भुवेऽन्तरे ॥
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ।
पूर्व्वमन्वन्तरे सम्यक् किमन्यत् कथयामि ते ॥"
इति मार्क्कण्डेयपुराणे स्वायम्भुवे मन्वन्तरे भुवनकोषः ॥ * ॥ अन्यच्च ।

[illegible] ।

"केतुमाले नराः कालाः सर्व्वे पनसभोजनाः ।
स्त्रियश्चोत्पलपत्राभा जीवन्ति च वर्षायुतम् ।
भद्राश्वे पुरुषाः शुक्लाः स्त्रियश्चन्द्रांशुसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति वायुभोजनाः ॥*॥
रम्यके पुरुषा नार्य्यो रमन्ते रजतप्रभाः ।
दशवर्षसहस्राणि शतानि दश पञ्च च ॥
जीवन्ति तत्र सत्त्वस्था न्यग्रोधफलभोजनाः ।
हिरण्मये हिरण्याभाः सर्व्वे च लकुचाशनाः ॥
एकादशसहस्राणि शतानि दश पञ्च च ।
जीवन्ति कुरुवर्षे तु श्यामाङ्गाः क्षीरभोजनाः ॥
सर्व्वे मिथुनजाताश्च नित्यं सुखनिषेविणः ।
चन्द्रद्वीपे महादेवं यजन्ति सततं शिवम् ॥
तथा किंपुरुषे विप्रा मानवा हेमसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति प्लक्षभोजनाः ॥
यजन्ति सततं देवं चतुर्म्मूर्त्तिं चतुर्म्मुखम् ।
ध्याने मनः समाधाय सदा वा भक्तिसंयुताः ॥*॥
तथा च हरिवर्षेऽपि महारजतसन्निभाः ।
दशवर्षसहस्राणि जीवन्तीक्षुरसाशिनः ॥
तत्र नारायणं देवं विश्वयोनिं सनातनम् ।
उपासते सदा विष्णुं मानवा विष्णुभाविताः ॥
तत्र चन्द्रप्रभं शुभ्रं शुद्धस्फटिकनिर्म्मलम् ।
विमानं वासुदेवस्य पारिजातवनाश्रितम् ॥
चतुर्द्वारमनौपम्यं चतुस्तोरणसंयुतम् ।
प्राकारैर्दशभिर्युक्तं सुगन्धञ्च सुदुर्गमम् ॥
स्फाटिकैर्म्मण्डपैर्युक्तं देवराजगृहोपमम् ।
स्वर्णस्तम्भसहस्रैश्च सर्व्वतः समलङ्कृतम् ॥
हेमसोपानसंयुक्तं नानारत्नोपशोभितम् ।
दिव्यसिंहासनोपेतं सर्व्वशोभासमन्वितम् ॥
सरोभिः स्वादुपानीयैर्नदीभिश्चोपशोभितम् ।
नारायणपरैः शुद्धैर्वेदाध्ययनतत्परैः ॥
योगिभिश्च समाकीर्णं ध्यायद्भिः पुरुषं हरिम् ।
स्तुवद्भिः सततं मन्त्रैर्नमस्यद्भिश्च माधवम् ॥
तत्र देवादिदेवस्य विष्णोरमिततेजसः ।
राजानः सर्व्वकालन्तु महिमानं प्रकुर्व्वते ॥
गायन्ति चैव नृत्यन्ति विलासिन्यो मनोरमाः ।
स्त्रियो यौवनशालिन्यः सदा मण्डनतत्पराः ॥
इलावृते पद्मवर्णा जम्बूफलरसाशिनः ।
त्रयोदशसहस्राणि वर्षाणां वै स्थिरायुषः ॥
भारते तु स्त्रियः पुंसो नानावर्णाः प्रकीर्त्तिताः ।
नानादेवार्च्चने युक्ता नानाकर्म्माणि कुर्व्वते ॥
परमायुः स्मृतं तेषां शतं वर्षाणि सुव्रताः ।
नवयोजनसाहस्रं वर्षमेतत् प्रकीर्त्तितम् ॥
कर्म्मभूमिरियं विप्रा नराणामधिकारिणाम् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ॥
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः ।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरावृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनास्तथा ॥
ब्राह्मणाः क्षत्त्रिया वैश्या मध्ये शूद्रास्तथैव च ।
इज्यायुद्धवणिज्याभिर्व्वर्त्तयन्त्यत्र मानवाः ॥
स्रवन्ति पावना नद्यः पर्व्वतेभ्यो विनिःसृताः ।
शतद्रुश्चन्द्रभागा च सरयूर्यमुना तथा ॥
इरावती वितस्ता च
गोमती धूतपापा च
कौशिकी लोहिता चैव
रोमत्वं वर्णं बलमारोग्यमायुषः ।
परिवृद्धिश्च बस्तिः सम्यगुपासितः ॥
शीते वसन्ते च स्नेहबस्तिः प्रदीयते ।
वर्षाशरत्काले रात्रौ स्यादनुवासनम् ।
निस्निग्धमन्नं भोजयित्वानुवासयेत् ।
मूर्च्छां च जनयेत् द्विधा स्नेहप्रयोजितः ॥"
भाजने वस्तौ च ।
नं सुक्तवतोऽत्यन्तं बलं वर्णञ्च दापयेत् ।
त्रिहमतो भक्तं भोजयित्वानुवासयेत् ॥"
स्निग्धं यथोचितस्नेहं भोज्यं भोजयित्वा
यः ।
नमात्रावुभौ बस्ती नातिकार्य्यकरौ स्मृतौ ।
मात्रौ सुखानादक्रमातिसारकारकौ ॥"
बस्ती अनुवासननिरूहाख्यौ ।
मा स्यात् पलैः षड्भिर्मध्यमा स्यात्
पलैस्त्रिभिः ।
देन हीना स्यादुक्ता मात्रानुवासने ॥"*॥
स्नेहबस्तिः ।
ताशसैन्धवाभ्यां च देयं स्नेहे च चूर्णकम् ।
त्रीतममध्यान्याः षट्चतुर्यमाषकैः ॥
स्नात् सप्तरात्रे गते जातबलाय च ।
निर्मायानुवास्याय बस्तिर्देयोऽनुवासनः ॥
नुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः ।
र्यित्वा यथाशास्त्रं कृतं चंक्रमणं ततः ॥
दृष्टानिलविण्मूत्रं योजयेत् स्नेहबस्तिना ।"
म्बुस्वेदितं उष्णाम्बुना स्नापितम् ।
मस्य वामपार्श्वेन वामजङ्घाप्रसारिणः ।
श्चापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत् ॥
वस्तिमुखं सूत्रैर्वामहस्तेन धारयेत् ।
येद्दक्षिणेनैव मध्यवेगेन धीरधीः ॥
भाकासक्षवादींश्च वस्तिकाले न कारयेत् ।
न्माभामितः कालः प्रोक्तो वस्तेस्तु पीडने ॥
: प्रपीडिते स्नेहे उत्तानो वाक्शतं भवेत् ।
जानुनः करावर्त्तं कुर्य्याच्छोटिकया युतम् ॥
मात्रा भवेदेका सर्वत्रैवैष निश्चयः ।
मेषोन्मेषयं पुंसामङ्गुल्या छोटिकाथ वा ॥
परोच्चार्यं वा वाङ्मात्रेयं स्मृता बुधैः ।
रितैः सर्वगात्रैर्यथावीर्यं प्रसर्पति ॥"
वीर्य्यं स्नेहादि ।
ताडयेत्तल्पौरेनं त्रींस्त्रीन् वारान् शनैः
शनैः ।
स्फिचोश्चैव तथा श्रोणीं शय्याञ्चैवोत्क्षिपेत्ततः ॥
र्क्षेपेन सपार्ष्णिभ्यां पूर्ववत्ताडयेद्बुधः ।
याश्च पादतलस्य त्रीन् वारानुत्क्षिपेत्ततः ।
ते विधाने तु ततः कुर्य्यान्निद्रां यथासुखम् ॥

सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥"
उपद्रवस्थाने उपशोषाविति सुश्रुते पाठः ।
"जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥
अनुवासितस्य देयमितरेऽह्नि सुखोदकम् ।
धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम् ॥"
सुखोदकमुष्णोदकम् । व्यापत् विपद् ।
"अनेन विधिना षड्वा सप्त वाष्टौ नवापि वा ।
विधेया वस्तयस्तेषामन्ते चैव निरूहणम् ॥
दत्तस्तु प्रथमो बस्तिः स्नेहयेद्वस्तिवङ्क्षणौ ।
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ॥
बलं वर्णञ्च जनयेत् तृतीयस्तु प्रयोजितः ।
चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृजौ ॥
षष्ठो मांसं स्नेहयति सप्तमो मेद एव च ।
अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम् ॥"
यथाक्रममिति वचनादष्टमोऽस्थि स्नेहयेत् ।
"एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ॥
द्विगुणः अष्टादशदिवसाधिको बस्तिः ।
"अष्टादशाष्टादशकान् वस्तीनां यो निषेवते ।
स कुञ्जरबलोऽश्वस्य रये तुल्योऽमरप्रभः ॥
रूक्षाय बहुवाताय स्नेहबस्तिं दिने दिने ।
दद्याद्वैद्यस्तथान्येषामग्न्याबाधभयात्त्र्यहात् ॥
स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः ।"
अनत्ययोऽबाधकः ।
"तथा निरूहः स्निग्धानां मलमात्रः प्रशस्यते ॥
अथवा यस्य तत्कालं स्नेहो निर्याति केवलः ।
तस्मान्योऽल्पतरो देयो नहि स्निह्यति तिष्ठति ॥"
स्निह्यति स्निग्धे तिष्ठति तत्स्नेह इति शेषः ।
"अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्मानं शूलं श्वासश्च जायते ॥
पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
तीक्ष्णं तीक्ष्णौषधैर्युक्ता फलवर्तिर्हिताथवा ॥
यथानुलोमगो वायुर्मलं स्नेहश्च जायते ।
तथा विरेचनं दद्यात् तीक्ष्णं नस्यं च शस्यते ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहबस्तिर्विनिःसृतः ।
सर्वोऽल्पो वा वृतो रौक्ष्यादुपेक्ष्यः स विजानता ॥
अनायातं त्वहोरात्रे स्नेहं संशोधनैर्हरेत् ।
स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते ॥
गुडूच्येरण्डपूतीकभार्गीरास्नाकरोषिणम् ।
शतावरीसहचरं काकनासां पलोन्मिताम् ॥
यवमाषातसीकोलकुलत्थान् प्रसृतोन्मितान् ।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च ॥
पचेत्तैलाढ़कं पेष्यैर्जीवनीयैः पलोन्मितैः ।
अनुवासनमेतद्धि सर्ववातविकारनुत् ॥"
पूतिकः करञ्जः । रोहिषं रोहिष इति सुगन्धतृणविशेषः । काकनासा कौयाठोंठी । प्रसृतं पलद्वयम् ।
"षट्सप्ततिर्व्यापदस्तु जायन्ते वस्तिकर्म्मणः ।
दूषितान् समुदायेन ताश्चिकित्सास्तु सुश्रुतात् ।"
समुदायेन अनुचितनेत्रादिसामग्र्या ।

"पानाहारविहाराश्च वस्तिकर्म्मणि सानुगाः ।
स्नेहपानसमाः कार्य्या नात्र कार्य्या विचारणा ॥"*॥
अथ निरूहबस्तिविधिः ।
"निरूहबस्तिर्बहुधा भिद्यते कारणान्तरैः ।
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः ॥"
कारणान्तरैः समवायिकारणभेदैः ।
"निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः ।
स्वस्थानस्थापनाद्दोषधातूनां स्थापनं मतम् ॥
निरूहस्य प्रमाणञ्च प्रस्थः पादोत्तरं परम् ।
मध्यमं प्रस्थमुद्दिष्टं हीनञ्च कुड़वास्त्रयः ॥"
परं श्रेष्ठम् ।
"अतिस्निग्धोऽक्लिष्टदोषः क्षतोरस्कः कृशस्तथा ।"
अक्लिष्टदोषः अनुत्क्लिष्टदोषः । अदत्तोत्क्लेशन इति यावत् । क्षतोरस्कः उरःक्षतवान् ।
"आध्मानच्छर्द्दिहिक्कार्शःशोषश्वासप्रपीड़ितः ।
गुदशोफातिसारार्त्तो विसूचीकुष्ठसंयुतः ॥
गर्भिणी मधुमेही च नास्थाप्याश्च जलोदरी ।
वातव्याधावुदावर्त्ते वातासृग्विषमज्वरे ॥
मूर्च्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च ।
वृद्ध्यसृग्दरमन्दाग्निप्रमेहेषु निरूहणम् ॥
शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः ।
उत्सृष्टानिलविण्मूत्रस्निग्धं स्विन्नमभोजितम् ॥
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् ।"
स्निग्धं स्वभ्यक्तम् । स्विन्नं उष्णाम्बुस्नापितम् ।
"स्नेहबस्तिविधानेन बुधः कुर्य्यान्निरूहणम् ॥
जाते निरूहे च ततो भवेदुत्कटकासनः ।
तिष्ठेन्मुहूर्त्तमात्रन्तु निरूहागमनेच्छया ॥"
अत्र मुहूर्त्तमात्रशब्दे नैतदपि बोधितम् ।
निरूहप्रत्यागमनकालो मुहूर्त्तमात्रः ।
"अनायातं मुहूर्त्तात्तु निरूहं शोधनैर्हरेत् ।
निरूहैरेव मतिमान् क्षारमूत्राम्लसैन्धवैः ॥
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ।
लाघवञ्चोपजायेत सुनिरूढं तमादिशेत् ॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम् ॥"
विविक्तता दत्तौषधनिःसरणम् ।
"अनेन विधिना युञ्ज्यान्निरूहं वस्तिदानवित् ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम् ॥
सस्नेह एकः पवने पित्ते द्वौ पयसा सह ।
कषायकटुका स्वत्रा कफे दृष्णास्त्रयो हिताः ॥
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ।
निरूढं भोजयित्वा च ततस्तमनुवासयेत् ॥
सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ।
वस्तिस्तीक्ष्णा प्रयुक्ता हि तेषां हन्याद्बलायुषी ॥
दद्यादुत्क्लेशनं पूर्व्वं मध्ये दोषहरं ततः ।
पश्चात् संशमनीयञ्च दद्याद्बस्तिं विचक्षणः ॥
एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
हपुषा फलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥"
उत्क्लेशनवस्तिः ॥ * ॥

"शताह्वा मधुकं बिल्वं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ॥"
इति दोषहरवस्तिः ॥ * ॥
"प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः ॥"
इति शमनवस्तिः ॥*॥
"त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः ।
ऊषकादिप्रतीवापा वस्तयो लेखनाः स्मृताः ॥"
ऊषकादिप्रतीवापाः ऊषकादिगणविशेषचूर्ण-
प्रक्षेपाः । इति लेखनवस्तयः ॥ * ॥
"बृंहणद्रव्यनिःक्वाथैः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः ॥"
इति बृंहणवस्तयः ॥ * ॥
"बदर्य्यैरावतीशेलुशाल्मलीधन्वनाङ्कुराः ।"
ऐरावती नारङ्गी । शेलुः बहुवारः ।
"क्षीरसिद्धाः क्षौद्रयुता नाम्ना पिच्छिलसंज्ञिताः ।
अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः ।"
अजश्छागः । उरभ्रो मेषः । एणः कृष्णमृगः ।
"मात्रा पञ्चपलक्षौद्रा सर्वेषामभिमता ॥"
इति पिच्छिलवस्तयः ॥*॥
"दत्वादौ सैन्धवस्यार्द्धं मधुनः प्रसृतिद्वयम् ।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् ।
संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम् ॥
वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम् ।
पिष्ट्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् ॥
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत् ।
वाते चतुःपलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम् ॥
पित्ते चतुःपलं क्षौद्रं स्नेहं दद्यात् पलत्रयम् ।
कफे तु षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुः-
पलम् ॥"
इति निरूहमात्रा ।
"एरण्डक्वाथतुल्यांशं मधु तैलं पलाष्टकम् ।
शतपुष्पार्द्धेन सैन्धवार्द्धेन संयुतम् ॥
मधुतैलिकसंज्ञोऽयं वस्तिर्दोषविशोधनः ।
मेदोगुल्मकृमिप्लीहमलोदावर्त्तनाशनः ।
बलवर्णकरश्चैव वृष्यो दोषहरश्च सः ॥"
इति मधुतैलिकवस्तिः ।
"क्षीराम्बुक्षौद्रतैलानां प्रसृतं प्रसृतं भवेत् ।
हपुषा सैन्धवाक्षांशो वस्तिः स्याद्यापनः
परः ॥"
हपुषः हापुषा । इति यापनवस्तिः ॥*॥
"एरण्डमूलनिर्यूहो मधु तैलं ससैन्धवम् ।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः ॥"
इति युक्तरथवस्तिः ।
"पञ्चमूलस्य निःक्वाथस्तैलं मागधिका मधु ।
ससैन्धवः समधुकः सिद्धवस्तिरिति स्मृतः ॥"
इति सिद्धवस्तिः ।
"[illegible] ।
[illegible] ॥"
अथोत्तरवस्तिः ।
"अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम् ।
निरूहादुत्तरो यस्मात्तस्मादुत्तरसंज्ञकः ॥
द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम् ।
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम् ॥
पञ्चविंशतिवर्षाणामधोमात्रा द्विकार्षिकी ।
तदूर्द्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः ॥
अथ स्नापितमुष्कस्य तृप्तस्य स्नानभोजनैः ।
स्थितस्य जानुमात्रे च पीठेऽन्विष्य शलाकया ॥
स्निग्धया मेढ्रमार्गन्तु ततो नेत्रं नियोजयेत् ।
शनैः शनैर्घृताभ्यक्तं मेढ्ररन्ध्रेऽङ्गुलानि षट् ॥
ततोऽवपीडयेद्वस्तिं शनैर्नेत्रं विनिर्हरेत् ।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः ॥
स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्य्याद्दशाङ्गुलम् ।
मुद्गः प्रवेशं योन्यञ्च योन्यन्तश्चतुरङ्गुलम् ॥
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मनेत्रं नियोजयेत् ।
मूत्रकृच्छ्रविकारेषु बालानां त्वेकमङ्गुलम् ॥
शनैर्निष्कम्पमाधेयं सूक्ष्मं नेत्रं विचक्षणैः ।"
मालतीपुष्पवृन्ताभं नेत्रमित्युक्तत्वात् पुनः सूक्ष्म-
शब्दाभिधाने बालानां ततोऽपि नेत्रस्य सूक्ष्मता-
बोधनार्थम् ।
"योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिकी ॥
मूत्रमार्गे पलोन्माना बालानाञ्च द्विकार्षिकी ।
उत्तानायै स्त्रियै दद्यात् ऊर्द्ध्वजान्वै विचक्षणः ॥
अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते ।
भूयो वस्तिं विदध्याच्च संयुक्तं शोधनैर्गणैः ॥
फलवर्त्तिं विदध्याद्वा योनिमार्गे दृढं भिषक् ।
सूत्रैर्विनिर्म्मितां स्निग्धां शोधनद्रव्यसंयुताम् ॥
दह्यमाने तथा वस्तौ दद्याद्वस्तिं विशारदः ।
क्षीरिवृक्षकषायेण पयसा शीतलेन वा ॥"
दह्यमाने वस्तौ यस्मिन् स्थाने वस्तिर्दत्तस्तस्मिन्
दह्यमाने ।
"वस्तिः शुक्रकृतः पुंसां स्त्रीणामार्त्तवजा रुजः ।
हन्यादुत्तरवस्तिस्तु नोचिता मेहिनां क्वचित् ॥
सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च ।
वस्तेरुत्तरसंज्ञस्य समानः स्नेहवस्तिना ॥" * ।
अथ फलवर्त्तिविधिः ।
"घृताभ्यक्ते गुदे क्षिप्ता यवाख्या साङ्गुष्ठसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥"
इति भावप्रकाशः ॥ * ॥
("चतुरङ्गुलां वेणुमयीं नाडीं प्रतिलभ्य तस्या
तया वस्तिप्रतिकर्म्म कुर्य्यात् ।
नातिशीते च काले च न शीते न च भोजिते ।
न विकाले च मन्दाग्नौ विश्रान्ते न च वेगभाक् ॥
वस्तिकर्म्म निरूहञ्च कारयेत्तं निरस्य च ।
आदौ मूत्रविड्विसर्गं कृत्वा गुदं प्रक्षाल्य नाति-
स्निग्धशय्यायां शाययित्वा वामाङ्गे वामपार्श्वे
दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि-
संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाडीं तयोः
प्रचारयेत् । ततः शनैः शनैर्वस्तिं निष्पीड्य
द्विपञ्चाशन्मितैरेव निरूहं कुर्य्यात् । निरूहा-
नन्तरं शनैः शनैर्वस्तिं शाययित्वा ऊर्द्ध्वं
स्फिजं च पश्चात् सङ्कोच्य पाणिभिः पञ्च वारान्
स्फिक्प्रदेशान् ताडयेत् । ततः शय्यां कृत्वा
ज्ञीनाघ्यामाशयं मलस्थानं [illegible]
दरवातान् दोषान् विनाशयेत् ।
वस्तिनिरूहं तद्वस्तिकर्म्म च [illegible]
हारीते सूत्रस्थाने द्रष्टव्यम् ।
"हतगन्धं शैलदरुं [illegible]
स्थितं शनैश्चायनवत्पार्श्वे ।
मदयिसंस्थेषु तमदियः
पुनर्व्वसुम्पातनिरस्य [illegible]
वस्तिर्नरेभ्यः क्रियते [illegible]
स्यात् [illegible]
कीदृक् प्रमाणानि [illegible]
केषाञ्च किं योनिमुखे [illegible]
निरूहकर्म्म प्रविधास्यामः
स्नेहस्य वा काः प्रवदेति [illegible]
के वस्तयः केषु मता [illegible]
शुश्रूषवे प्राह वचो महर्षिः ।
समीक्ष्य दोषौषधदेशकाल-
सात्म्याग्निसत्त्वादिवयोबलानि ।
वस्तिः प्रयुक्तो नियतं गुणाय
स्युः सर्व्वकर्म्माणि च सिद्धिमन्ति ।
सुवर्णरूप्यत्रपुताम्ररीति-
कांस्यास्थिशस्त्रद्रुमवेणुदन्तैः ।
नलैर्विषाणैर्मणिभिश्च तैस्तैः
कार्य्याणि नेत्राणि दृढानि [illegible]
षड्द्वादशाष्टाङ्गुलसम्मितानि
षड्विंशतिद्वादशवर्षजानाम् ।
स्युर्मुद्गकर्कन्धुसतीनपाठ-
च्छिद्राणि वर्त्त्या पिहितानि [illegible]
यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां
मूलाग्रयोः स्युः परिणाहवन्ति ।
ऋजूनि गोपुच्छसमाकृतीनि
श्लक्ष्णानि च स्युर्गुडिकामुखानि ।
स्यात् कर्णिकैकाग्रचतुर्थभागे
मूलाश्रिते वस्तिनिबन्धने द्वे ।
जारद्गवो माहिषशूकरो वा
स्यात् शौकरो वस्तिरजस्य वा [illegible]
दृढस्तनुर्नष्टशिरो विगन्धः
कषायरक्तः सुमृदुः सुशुद्धः ।
नृणां वयो वीक्ष्य यथानुरूपं
नेत्रेषु योज्यस्तु सुबद्धसूत्रः ।
वस्तेरभावे प्लवजो गलो वा
स्यादङ्कपादः सुघनः पटो वा ।
आस्थापनार्हं पुरुषं विदित्वा
समीक्ष्य पुण्येऽहनि शुक्लपक्षे ।
प्रशस्तनक्षत्रमुहूर्त्तयोगे
जीर्णान्नमेकाग्रमनन्यचित्तम् ।
माला गुडूची त्रिफला रास्ना
द्वे पञ्चमूले च पलोन्मितानि ।
अष्टौ फलान्यर्द्धतुलाञ्च मांसा-
च्छागात् पचेदप्सु चतुर्द्रोणे ।
पूर्णं यथानीपफलिकृत-
[illegible]

कल्कैर्गुडस्नेहयुतैः स सैन्धे-
र्युतं सुखोष्णं तु पिचुप्रमाणैः ।
गुडोऽपलं द्विप्रसृतान्तु माक्षी
स्नेहस्य युक्त्या मधुसैन्धवादि ॥
प्रक्षिप्य वस्तौ मथितं मथेन
सुबद्धसूत्राग्य च निर्वलीकम् ।
अङ्गुष्ठमध्येन मुखं पिधाय
नेत्राग्रसंस्थामपनीयवर्त्तिम् ॥
तैलाक्तगात्रं कृतमत्र विट्कं
नाति क्षुधार्त्तं शयने मनुष्यम् ।
समेऽथ वेषन्नतशीर्षके वा
नात्युच्छ्रिते स्वास्तरणोपपन्ने ॥
सव्येन पार्श्वेन सुखं शयानं
कृत्वर्जुदेहं स्वभुजोपधानम् ।
निकुञ्च्य सव्येतरमस्य सक्थि
वामं प्रसार्य्य प्रणयेत्ततस्तम् ॥
स्निग्धे गुदे नेत्रचतुर्थभागं
स्निग्धं शनैर्ऋजु पृष्ठवंशम् ।
अकम्पनावेपनलाघवादीन्
पाण्योर्गुणांश्चापि विदर्शयन् हि ॥
प्रपीड्य चैकग्रहणेन दत्तं
नेत्रं शनैरेव ततोऽपकर्षेत् ।
तिर्य्यक्प्रणीते तु न याति धारा
गुदव्रणः स्याच्चलिते च नेत्रे ॥
दत्तः शनैर्नाशयमेति वस्तिः
कण्ठं प्रधावत्यतिपीडितश्च ।
शीतस्त्वतिस्तम्भकरो विदाहं
मूर्च्छाञ्च कुर्य्यादतिमात्रमुष्णः ।
स्निग्धोऽतिजाड्यं पवनन्तु रूक्ष-
स्तन्वल्पमात्रालवणस्त्वयोगम् ।
करोति मात्राभ्यधिकोऽतियोगं
क्षामन्तु सान्द्रः सुचिरेण चैति ॥
दाहातिसारौ लवणोऽतिकुर्य्या-
त्तस्मात् प्रयुक्तं सममेव दद्यात् ।
पूर्व्वं हि योज्यं मधुसैन्धवन्तु
स्नेहं विनिर्मथ्य ततोऽनुकल्कम् ॥
विमथ्य संयुज्य पुनर्द्रवैस्तत्
वस्तौ निदध्यान्मथितं खजेन ।
आमाशयोऽग्निर्ग्रहणीगुदश्च
सतुपार्श्वसंस्थस्य सुखोपलब्धिः ॥
तोयन्त एवं वलयश्च तस्मात्
सव्यं शयानोऽरतिवस्तिदानम् ।
विड्वातवेगो यदि चार्द्धदत्ते
निष्कृष्य दत्ते प्रणयेदशेषम् ॥
उत्तानदेहस्य कृतोपधानः
स्याद्वीर्य्यमाप्नोति तथास्य देहम् ।
एकोऽपकर्षत्यनिलं स्वमार्गात्
पित्तं द्वितीयस्तु कफं तृतीयः ॥
प्रत्यागते कोष्णजलावसिक्तः
शाल्यन्नमद्यात्तनुना रसेन ।
जीर्णे तु सायं लघु चाल्पमात्रं
भुक्तोऽनुवास्यः परिहृत्यधर्मम् ॥"

"स्निग्धोष्ण एकः पवने निरूहो
द्वौ स्वादुशीतौ पयसा च पित्ते ।
त्रयः समूत्राः कटुकोष्णतीक्ष्णाः
कफे निरूहा न परं विधेयाः ॥
रसेन वाते प्रति भोजनं स्यात्
क्षीरेण पित्ते तु कफे च यूषैः ।
तथानुवास्येषु च विल्वतैलं
स्याज्जीवनीयं फलसाधितञ्च ॥"

इति चरके सिद्धिस्थाने तृतीयेऽध्याये ॥

"तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्मप्रधानतममाहुराचार्य्याः । कस्मादनेककर्म्मकरत्वाद्वस्तेरिह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसंग्रहणानि करोति । क्षीणशुक्रं वाजीकरोति कृशं वृंहयति स्थूलं कर्षयति चक्षुः प्रीणयति वलीपलितमुपहन्ति वयः स्थापयति । शरीरोपचयं वर्णं बलमारोग्यमायुषः परिवृद्धिञ्च करोति वस्तिः सम्यगुपासितः ॥ तथा ज्वरातीसारतिमिरप्रतिश्यायशिरोरोगाधिमन्थार्द्दिताक्षेपकपक्षाघातैकाङ्गसर्व्वाङ्गरोगाध्मानोदरशर्कराशूलवृद्ध्युपदंशानाहमूत्रकृच्छ्रगुल्मवातशोणितवातमूत्रपुरीषोदावर्त्तशुक्रार्त्तवस्तन्यनाशहृद्धनुमन्याग्रहाशोऽश्मरी मूढ़गर्भप्रभृतिषु चात्यर्थमुपयुज्यते ॥"

"तत्र द्विविधो वस्तिः नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । तस्य विकल्पो माधुतैलकः । तस्य पर्य्यायशब्दो यापनो युक्तरथः सिद्धवस्तिरिति । सदोषनिर्हरणाच्छरीररोगहरणाद्वा निरूहः । वयःस्थापनादायुःस्थापनाद्वास्थापनम् । माधुतैलिकविधानञ्च निरूहक्रमचिकित्सिते वक्ष्यामः ॥

तत्र यथा प्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावकृष्टः । अनुवसन्नपि न दुष्यत्यनुदिवसं दीयत इत्यनुवासनः ॥

तस्यापि विकल्पोऽर्द्धार्द्धमात्रावकृष्टोऽपरिहार्य्यो मात्रावस्तिरिति ॥" इति सुश्रुते चिकित्सितस्थाने ३५ अध्यायः ॥

"अत ऊर्द्ध्वं प्रवक्ष्यामि व्यापदः स्नेहवस्तिजाः ।
बलवन्तो यदा दोषाः कोष्ठे स्युरनिलादयः ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्व्वन्त्युपद्रवान् स्नेहः स चापि न निवर्त्तते ॥
तत्र वाताभिभूते तु स्नेहे मुखकषायता ।
जृम्भावातरुजास्तास्ता वेपथुर्विषमज्वरः ॥
पित्ताभिभूते स्नेहे तु मुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वरः खेदो नेत्रमूत्राङ्गपीतता ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्द्दिरुच्छ्वासः कृच्छ्रः शीतज्वरोऽरुचिः ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥
अत्याशितेऽन्नाभिभवात् स्नेहो नैति यदा
तदा ।
गुदरामाशयः शूलं वायुश्चाप्रतिसञ्चरः ॥
हृत्पीड़ामुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचिः ।
तत्रापतर्पणस्यान्ते दीपनो विधिरिष्यते ॥
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्माने श्वासः शूलश्च जायते ॥
पक्वाशयगुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
अतितीक्ष्णौषधैरेवं सिद्धयाप्यनुवासनम् ॥
शुद्धस्य दूरानुगते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्व्वेन्द्रियाणामुपलेपोऽवसादनम् ॥
स्नेहशगन्धिमुखत्वञ्च कासश्वासावरोचकः ।
अतिपीड़ितवेत्तत्र विविधा स्थापनन्तथा ॥
अस्विन्नस्याविशुद्धस्य स्नेहोऽल्पः सम्प्रयो-
जितः ।
शीतो मृदुश्च नाभ्येति ततो मन्दं प्रवाहयेत् ॥
विबन्धगौरवाध्मानशूलाः पक्वाशयं प्रति ।
तत्रास्थापनमेवाशु प्रयोज्यं सानुवासनम् ॥
अल्पं भुक्तवतोऽल्पो हि स्नेहोमन्दगुणस्तथा ।
दत्तो नैति क्रमोत्क्लेशी भृशं वा रतिमाव-
हेत् ॥
तत्र चास्थापनं कार्य्यं शोधनीयेन वस्तिना ।
अन्वासनञ्च स्नेहेन शोधनीयेन शस्यते ॥
अहोरात्रादपि स्नेहः प्रत्यागच्छन्न दूष्यति ।
कुर्य्याद्वस्तिगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिरनिःसृतः ।
सर्व्वोऽल्पो वा वृतो रौक्ष्यादुपेक्ष्यः स विजा-
नता ॥
अनायान्तन्त्वहोरात्रात् स्नेहं संशोधनैर्नयेत् ॥
स्नेहवस्तावनायाते नान्यः स्नेहो विधीयते ।
इत्युक्ता व्यापदः सर्व्वाः सलक्षणचिकित्-
सिताः ॥"

इति च सुश्रुते चिकित्सितस्थाने ३७ अध्यायः ॥)

वस्तिकर्म्माढ्यः, पुं, (वस्तिकर्म्मणा तच्छोधनव्यापारेण आढ्यः । वस्तिशोधने एवास्य प्रचुरकार्य्यकरत्वात् तथात्वम् ।) अरिष्टवृक्षः । भूरिटा इति ख्यातः । यथा,—

"अरिष्टो वस्तिकर्म्माढ्यो वेणीरः फेनिलः
क्षुपः ॥"

इति शब्दचन्द्रिका ॥

वस्तिमलं, क्ली, (वस्तेर्नाभ्यधोभागस्य मलम् ।) मूत्रम् । इति हेमचन्द्रः । ३ । २८१ ॥

वस्तु, क्ली, (वसतीति । वस + "वसेस्तुन् ।" उणा० १ । ७६ । इति तुन् ।) द्रव्यम् । यथा,—

"बुद्धद्रयं लौपिकं स्यात् सत्त्वं द्रव्यञ्च वस्तु च ।"

इति ॥

(तथा, भागवते । ८ । ४ । २० ।

"स्त्रीषु दारेषु सुतेषु बन्धुषु
द्विपोत्तमस्यन्दनवाजिवस्तुषु ।
अक्षय्यरत्नाभरणाम्बरादि-
ष्वनन्तकोषेष्वकरोदसन्मतिम् ॥"

पात्रभूतम् । यथा, रघौ । ३ । २९ ।

"अथोपनीतं विधिवद्विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते
क्रिया हि वस्तूपहिता प्रसीदति ॥")

पदार्थः । यथा,—
"भावः पदार्थो धर्मः स्यात् वस्तं तत्त्वञ्च
वस्तु च ।"
इति त्रिकाण्डशेषः ।
(यथा, शकुन्तलायाम् १ अङ्के ।
"सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ।")
जगन्ति वस्तुद्वयं भावोऽभावश्च । इति न्याय-
शास्त्रम् । सच्चिदानन्दाद्वयं ब्रह्म । इति वेदान्त-
सारः । (यथा, कथासरित्सागरे । २९ । ४९ ।
"अहो वस्तुनि मात्सर्य्यमहो भक्तिरवस्तुनि ।"
सामर्थ्यम् । यथा, कामन्दकीयनीतिसारे।१५।२५।
"वस्तुष्वशक्येषु समुद्यमश्चेत्
शक्येषु मोहादसमुद्यमश्च ।
शक्येषु कालेन समुद्यमश्च
त्रिधैव कार्य्यव्यसनं वदन्ति ।"
अर्थः । इति मल्लिनाथः । यथा, कुमारे ।
६ । ६५ ।
"अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ।"
इतिवृत्तम् । यथा, विक्रमोर्व्वश्याम् ।
"वयमन्तो कालिदासग्रथितवस्तुना नवेन त्रोट-
केनोपस्थास्यामहे ।")
वस्तुकं, क्ली, (वस्तु + संज्ञायां कन् ।) वास्तूकम् ।
इति शब्दचन्द्रिका राजनिर्घण्टश्च ।
वस्तुकी, स्त्री, (वस्तुक + गौरादित्वात् ङीष् ।)
चिल्लिकाशाकः । इति राजनिर्घण्टः ।
वस्त्यं, क्ली, (वस + क्तिन् । वस्तिर्वासस्तत्र
साधु । वस्ति + "तत्र साधुः ।" ४ । ४ । ९८ ।
इति यत् ।) गृहम् । इत्यमरः ।
वस्त्रं क्ली, (वस्यते आच्छाद्यतेऽनेनेति । वस
आच्छादने + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ ।
१५८ इति ष्ट्रन् ।) परिधानाद्युपयुक्तकार्पासादि-
निर्म्मितवस्तु । कापड़ इति भाषा । तत्पर्य्यायः ।
आच्छादनम् २ वासः ३ चेलम् ४ वसनम् ५
अंशुकम् ६ । इत्यमरः । सिचयः ७ पोतः ८
सक्तकः ९ कर्पटः १० पाटकः ११ कशिपुः १२ ।
इति जटाधरः । वासनम् १३ छिन्नम् १४
चोनम् १५ छादम् १६ वाथम् १७ । इति
शब्दरत्नावली ॥ ० ॥ अस्य परिधानविधिर्यथा,
भृगुः ।
"विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च ।
श्रौतं स्मार्त्तं तथा कर्म्म न नग्नश्चिन्तयेदपि ।"
विकच्छः परिधानाञ्चलरहितः । तथा च ।
"परिधानाद्बहिःकच्छा निबद्धा ह्यासुरी भवेत् ।"
वह्निः ।
"शाटे द्वे तथा कार्य्ये वसनन्तु सुराजनम् ।
वर्ज्जितः कर्म्मणः शस्तैर्यो विप्रः स मुनिः स्मृतः ।"
बौधायनः ।
"कार्य्ये ह्येनञ्च वसनमाच्छादयति जानुनी ।
कर्णान्तेन यदस्तं स्यात्तद्वस्त्रमपि वोच्यते ।"
उत्तरः । स्मार्त्ते कार्य्ये उभयं वेद् । स्मृतिः ।
न स्यात् कर्म्मणि कञ्चुकीति । उत्तरीयधारणं
यज्ञोपवीतवत् ।
"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः ।
तथा सन्धार्य्यते यत्नादुत्तराच्छादनं शुभम् ।"
इति स्मृतेः ।
अत्र यथा द्विजोत्तमैः सव्यापसव्यत्वादिना उप-
वीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजो-
त्तमैरिति प्रदर्शनमात्रम् । प्रागुक्तभृगुवचनेन
सर्व्वेषां द्विवस्त्रताप्रतीतेः । पारस्करः । एकव-
स्त्रो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति ।
इत्याह्निकतत्त्वम् ॥ ० ॥ अस्य धारणगुणाः ।
यथा,—
"काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत्पारिषदं शस्तं निर्म्मलाम्बरधारणम् ।"
इति राजवल्लभः ॥ ० ॥
अपि च ।
"स्नानस्यानन्तरं सम्यग्वस्त्रेण तनुमार्ज्जनम् ।
कान्तिप्रदं शरीरस्य कण्ड्वादोषनाशनम् ॥
कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च ।
वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ।"
कौषेयं पट्टाम्बरं तसरवस्त्रञ्च ।
"मेध्यं सुशीतं पित्तघ्नं काषायं वस्त्रमुच्यते ।
तद्धारयेदुष्णकाले तथापि लघु शस्यते ।"
काषायं कोकची इति लोके । कषायरागरक्तं
वा ।
"शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् ।
न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत् ॥
यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्द्धनम् ।
लघ्वं वशीकरं वस्त्रं नवं निर्म्मलमम्बरम् ।"
काम्यं कामोद्दीपकम् ।
"कदापि न जनैः सद्भिर्धार्य्यं मलिनमम्बरम् ।
तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ।"
अलक्ष्मीरशोभा दारिद्र्यं वा । इति भाव-
प्रकाशः ॥ ० ॥ (अथ स्वप्ने वस्त्रादिदर्शनात्
शुभमाह यथा,—
"कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुते-
जसः ।
यः पश्यति लभते यो वा छत्रादर्शविषामिषम् ॥
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम् ।
तस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते ।"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये ।)
अथ नववस्त्रपरीधानदिनम् ।
"हस्तादिपञ्चकयुगाश्विधनिष्ठपौष्ण-
पुष्यान्तरादितिषु नार्क्कसितामरेज्ये ।
पाराशरीय ... नवकादि ...
धार्य्यं नवं वसनमीश्वरदेवतुष्टौ ।"
इति ज्योतिस्तत्त्वम् ॥ ० ॥
अपि च ।
"धर्म्मे चाक्षतधन्यं रवः शशिदिने क्लेदः सदा
भूमिजे
वस्त्राणां बहुता बुधे सुरगुरौ विद्यागमः
सम्पदः ।
नानाभोगयुतः शशीद्यदवं
शौरे स्युः ...

अस्य धारणे योग्यानियोग्यदिनानि ...
"मन्दमङ्गलवह्नीषु ...
वस्त्राणां ...
...

तद्दानफलं यथा,—
...

अपि च ।
"द्विजानां ये तु सततं ...
वस्त्राण्ययुतः पश्चात्तेषां सुरकोटिः ...
इत्यादि वह्निपुराणे ...
ध्यायः ॥ ० ॥ तेन ...
" ...
वासोभिः पूजयेद्विष्णुं ...
इति तत्रैव
तद्ग्रहणविधिर्यथा । विष्णुधर्म्मोत्तरे
"वस्त्रं ...
आच्छ्रोपानहौ यानमारूढै ...
तस्याधिपतिर्यथा । तत्रैव ।
"वार्हस्पत्यं स्मृतं वासः सौम्यानि ...
मलिनञ्च तथा सर्व्वं वायव्यः ...
तत्प्रतिग्रहप्रायश्चित्तं यथा । शातातपः
वासोगवादीनां ...
अष्टसहस्रं अष्टोत्तरसहस्रं ...
तत्त्वम् ॥ ० ॥ अपि च ।
श्रीभगवानुवाच ।
"कार्पासं कम्बलं वाल्कं कौषं ...
तत् पूर्व्वं पूजयित्वैव ...
निर्दशं मलिनं जीर्णं ...
परकीयं वाससदं च्छोविदं तथैव ...
उपकेशं विधौतञ्च शेषमधारितम् ...
प्रदाने देवताभ्यश्च देवे पैत्रे च कर्म्म ...
वर्ज्जयेत् प्रायशोगेन यथाशास्त्रोक्ता ...
प्रायशोगेन इत्यत्र ओपयोगेन इ...
पुस्तके पाठः ।
"उत्तरीयोत्तरासङ्गौ निव ...
परिधानञ्च यच्चैवामन्यतानि ...
प्रावरणं नीशारञ्च तथैवान्तरवास ...
क्वचित् पुस्तके प्रावरणमिदं ...
पाठः ।
"पक्षातकं तथा दूष्यं यच्च ...
पताकाध्वजवस्त्रादौ सूत्रं ...
अन्यप्रावरणादौ च तहितां ...
रक्तं कौषेयवस्त्रञ्च महादेवे प्रयच्छे ...
शीतं तथैव कौषेयं वासुदेवाय ...
रक्तन्तु कमलं दद्यात् शिवाय ...
विचित्रं सर्व्वदेवेभ्यो देवीभ्योऽपि ...
कार्पासं सर्व्वशोभनं दद्यात् सर्व्वदा ...

[illegible]म् ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] यथा ।
[illegible]
[illegible] सततम् ।
[illegible]सम् ॥”
इति वाराहपुराणे [illegible] अध्यायः ॥
[illegible] वर्ज्जनम् ।
था,—
[illegible]
[illegible] प्रवर्त्तयेत् ॥”
इति तत्रैव [illegible] अध्यायः ॥
[illegible] परिधाय विष्णुपूजननिषेधो यथा,—
वराह उवाच ।
[illegible] नीलवस्त्रेण यो हि मामुपसर्पति ।
[illegible] न निवर्त्तते ॥
[illegible] शुध्यन्ति अपराधविशोधनम् ।
[प्राय]श्चित्तं [illegible] येन शुध्यन्ति किल्विषात् ॥
[illegible] चान्द्रायणं कृत्वा विधिदृष्टेन कर्म्मणा ।
[illegible] किल्विषात् भूमे [illegible] संशयः ॥”
[इ]ति वाराहे नीलवस्त्रपरीधानप्रायश्चित्त-
[ना]माध्यायः ॥ * ॥ विष्णुपूजने रक्तवस्त्रपरी-
[धा]ननिषेधो यथा,—
वराह उवाच ।
रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ।
[illegible] शुध्यन्ति कर्म्म संसारमोक्षणम् ।
[illegible] वर्षाणि रक्तो [illegible] प्रवर्त्तते ।
[illegible] कर्म्मदोषेण जायते ॥
[illegible] वसति तत्र निश्चयः ।
[illegible] भूत्वा महाभागे रक्तवस्त्रपरायणः ॥
[प्रा]यश्चित्तं प्रवक्ष्यामि सद्य कायविशोधनम् ।
[ये]न शुध्यन्ति वै भूमे पुरुषाः शास्त्रवर्ज्जिताः ॥
[चान्द्रा]यणं ततः कृत्वा दिनानि दश सप्त च ।
[illegible]भक्षो दिनत्रीणि दिनमेकं जलाशनः ॥
[ए]वं स शुध्यते भूमे मम विप्रियकारकः ।
[प्रा]यश्चित्तं ततः कृत्वा ममाग्रे रोचते यद ॥
[ए]तत् कथितं भूमे रक्तवस्त्रविभूषितम् ।
[प्रा]यश्चित्तं महाभागे सर्व्वसंसारमोक्षणम् ॥”
इति तत्रैव रक्तवस्त्रपरीधानप्रायश्चित्तम् ॥
[प]रिधानकृष्णवस्त्रस्य विष्णुपासननिषेधो यथा,—
“यः पुनः कृष्णवस्त्रेण मम कर्म्मपरायणः ।
[दे]वि कर्म्माणि कुर्व्वीत तस्य वै पतनं शृणु ॥
[घु]णा वै पञ्चवर्षाणि काष्ठभक्षश्च जायते ।
[illegible] वर्षाणि [illegible] पञ्च च ॥
[ए]वं स गच्छति संसारं मम कर्म्मपरायणः ।
पारावतश्च जायेत नववर्षाणि पञ्च च ॥
[illegible] पापात्मा भुवि ।
[illegible] मम धर्म्मेषु यथैवाहं प्रतिष्ठितः ॥
प्रायश्चित्तं प्रवक्ष्यामि सद्य संसारमोक्षणम् ।
[illegible] कृष्णवस्त्रपरायणः ॥
[illegible] ततः कृत्वा त्रिरात्रं [illegible] ।
[illegible] त्रिरात्रम् एवं शुध्यते किल्वि-
षात् ॥
[अ]नेन विधानेन देवि कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ।
न स गच्छति संसारं मम लोकाय गच्छति ॥”
इति तत्रैव कृष्णवस्त्रपरीधानप्रायश्चित्तम् ॥
परिधृतधौतवस्त्रस्य विष्णुकर्म्मकरणनिषेधो
यथा,—
वराह उवाच ।
“[illegible] न च धौतेन यो मे कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ॥
तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे ।
पतन्ति येन संसारं पापमोक्षदकारिणः ॥
देवि भूत्वा [illegible] भवो भुवि ।
उष्ट्रयोनिं भवेज्जन्म जन्म चैवं [illegible] ॥
गोमायुश्चैकजन्मा वै जन्म चैवं [illegible] ।
मार्जारश्चैकजन्मा वै [illegible] भवति चैकधा ॥
[illegible] पश्चात्तो भवति मानुषः ।
महत्तश्च गुणज्ञश्च मम कर्म्मपरायणः ।
निरापराधो दक्षश्च अहङ्कारविवर्ज्जितः ॥
धरण्युवाच ।
श्रुतमेतत् प्रवक्षेण त्वया मधुराक्षरम् ।
संसारं पापयोनिषु येन गच्छन्ति मानवाः ॥
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम् ।
किल्विषात् येन शुध्यन्ति तव धर्म्मपरायणः ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि कथ्यमानं मयानघे ।
प्रायश्चित्तं प्रवक्ष्यामि मम भक्तिपरायणः ॥
यावकेन दिनं चैकं पिण्याकेन पुनस्त्रयः ।
कणभक्षो दिनत्रीणि पायसेन दिनत्रयम् ॥
एवं कृत्वा महाभागे पापमोक्षदकारिणः ।
अपराधं न विद्येत संसारञ्च न गच्छति ॥”
इति तत्रैव अधौतवासःपरिधानप्रायश्चित्त-
नामाध्यायः ॥*॥ अथ परिहितपरकीयवस्त्रस्य
विष्णुपूजादिकरणे प्रायश्चित्तम् ।
वाराह उवाच ।
“यः पारक्येण वस्त्रेण नावधूतेन माधवि ।
प्रायश्चित्ती पुमान्भूत्वा मम कर्म्मपरायणः ॥
करोति मम कर्म्माणि स्पृष्ट्वा ते मां ततःस्थितः ।
मृगो वै जायते देवि वर्षाणि चैव सप्त च ॥
दीनपादेन जायेन चैकजन्म वसुन्धरे ।
मूर्खश्च क्रोधनश्चैव मत्तश्चैव जायते ॥
तस्य वक्ष्यामि शुद्ध्योषि प्रायश्चित्तं महौजसम् ।
येन गच्छति संसारं मम भक्तो व्यवस्थितः ॥
अष्टभक्तं ततः कृत्वा मम कर्म्मपरायणः ।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशी ॥
तिष्ठेज्जलाशये तत्र शान्तो दान्तो जितेन्द्रियः ।
[illegible] भूत्वा मम [illegible]परायणः ॥
प्रभातायाम् शर्व्वर्य्याम् उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्विषात् ॥
अनेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वपापविनिर्म्मुक्तो मम लोकाय गच्छति ॥”
इति वाराहे परकीयवस्त्रपरीधानप्रायश्चित्त-
नामाध्यायः ॥ * ॥ श्राद्धनिर्म्मितवस्त्रप्रमाणं
यथा,—
“यावत् कार्पासतन्तूनां [illegible] ।
[illegible] प्रेतं यथा [illegible] ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे [illegible] अध्यायः ॥
“आसनं शयनं यानं जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥”
दशाहीनादिवस्त्रस्य पश्चिमाद्या[illegible]-
वस्त्रस्य च वर्ज्जनं यथा,—
“दशाहीनं स्त्रिया धौतं [illegible] रञ्जितं तु ।
अधौतं [illegible] ॥”
इति कर्म्मलोचनम् ॥*॥
[illegible] ।
“प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत् ।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि ॥”
अग्राग्रं दशा [illegible] ॥ * ॥ प्रचेताः ।
“स्वयं धौतेन कर्त्तव्या क्रिया धर्म्मा विपश्चिता ।
न च रजकधौतेन नाधौतेन भवेत् क्वचित् ॥
[illegible] च ।
[illegible] यद्धौतं तत् पवित्रमिति स्थितिः ॥”
[illegible] उष्णीषवस्त्रस्य धार्य्यत्वं यथा ।
उष्णीषधारणं शिरोवलापनयनाय । तेन तद्-
गन्तरं न धार्य्यम् । तथा महाभारतम् ।
“आहुतः साधिवासेन जलेन च सुगन्धिना ।
राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम् ।
जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि ॥”
शिथिलार्पितं अगाढ़बद्धम् ॥ * ॥ निषिद्ध-
वस्त्राणि यथा । भारते ।
“न स्यूतेन न दग्धेन पारक्येण विशेषतः ।
मूषिकोत्कीर्णजीर्णेन कर्म्म कुर्य्याद्विचक्षणः ॥”
नारसिंहे ।
“न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।
मलाक्तञ्च दशाहीनं वर्ज्जयेदम्बरं बुधः ॥”
उल्वणं उत्कटरक्तविशेषम् । आचाररत्ने
उशनाः ।
“दशाहीनेन वस्त्रेण कुर्य्यात् कर्म्माण्यभावतः ।”
विष्णुधर्म्मोत्तरे ।
“वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा ।
जीर्णं वापदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः ॥
उपानहं नान्यधृतं ब्रह्मसूत्रञ्च धारयेत् ।
न जीर्णमलवद्वासो भवेच्च विभवे सति ॥”
योगियाज्ञवल्क्यः ।
“स्नात्वैवं वाससी धौते अक्लिन्ने परिधाय च ।
प्रक्षाल्योरू मृदद्भिश्च हस्तौ प्रक्षालयेत्ततः ॥
अभावे धौतवस्त्राणां शाणक्षौमाविकानि च ।
कुतपो योगपट्टं वा द्विर्व्वासा येन वा भवेत् ॥

अधीतेन च वस्त्रेण निवसेन्निभिर्विधाम् ।
कुर्वन् धर्मं न चाप्नोति दत्तं भवति निष्फलम् ॥"
कृत्यो निपानकल्पः ॥ * ॥ तर्जनात् पूर्वं स्नानवस्त्रनिष्पीड़ननिषेधो यथा,—
"निष्पीड़यति यः पूर्वं स्नानवस्त्रन्तु तर्पणात् ।
निराशाः पितरस्तस्य यान्ति देवाः पिवन्ति च ॥"
याज्ञवल्क्यः ।
"स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि ।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुद्ध्यति ॥
आर्द्रैकवस्त्र वसनं परिदध्यात् कथञ्चन ॥"
हारीतः । आर्द्रैक वसनामाहलमपि शुद्ध्यति ॥ * ॥ मदनपारिजाते धारस्तरः ।
एकवेद्यधो भवति तस्योत्तराद्रैव प्रच्छादयतीति । इत्याह्निकतत्त्वम् ॥ * ॥ संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा । मद्दर्शिदवनाभिगमौ ।
"संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
वस्त्रं न पीड़येत्तत्र न च क्षारेण धौतयेत् ॥"
इति तिथ्यादितत्त्वम् ॥

वस्त्रकुट्टिमं, क्ली, (वस्त्रनिर्मितं कुट्टिममिव ।) छत्रम् । इति त्रिकाण्डशेषः ॥ (वस्त्रस्य कुट्टिमं शुभ्रवसनम् ।) वस्त्रगृहम् ॥

वस्त्रगृहं, क्ली, (वस्त्रनिर्मितं गृहम् ।) वस्त्रनिर्मितशाला । ताम्बु इति भाषा । तत्पर्यायः ।
पटवासः २ पटमयम् ३ दूष्यम् ४ स्तवकम् ५ ।
इति त्रिकाण्डशेषः ॥

वस्त्रग्रन्थिः, पुं, (वस्त्रस्य ग्रन्थिः ।) परिधानवस्त्रस्य ग्रन्थनम् । तत्पर्यायः । उच्चयः २ नीवी ३ । इति त्रिकाण्डशेषः ॥

वस्त्रपञ्चलः, पुं, कोलकन्दः । इति राजनिर्घण्टः ॥

वस्त्रपुत्रिका, स्त्री, (वस्त्रनिर्मिता पुत्रिका पुत्तलिका ।) वस्त्रनिर्मितपुत्तलिका । इति शब्दमाला ॥

वस्त्रभूषणः, पुं, (भूषयतीति । भूषि+ल्युः । वस्त्रस्य भूषणः रञ्जक इत्यर्थः ।) धातकवृक्षः । इति राजनिर्घण्टः ॥

वस्त्रभूषणा, स्त्री, (वस्त्रस्य भूषणं रागो यस्याः ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या मञ्जिष्ठाशब्दे ज्ञातव्याः ॥)

वस्त्रयोनिः, स्त्री, (वस्त्रस्य योनिरुत्पत्तिकारणम् ।) वस्त्रोत्पत्तिकारणम् । यथा,—
"त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश स्त्रियः ॥"
इत्यमरः ॥

वस्त्ररञ्जनः, पुं, (रञ्जयतीति । रञ्ज+णिच्+ल्युः ।) वस्त्राणां रञ्जनः । कुसुम्भः । इति राजनिर्घण्टः ॥ (तथास्य पर्यायः ।
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जनमित्यपि ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

वस्नं, क्ली, (वस निवासे आच्छादने वा+"धाप्रवस्यज्यतिभ्यो नः ।" उणा० ३ । ६ । इति करणादौ यथायथं नः ।) वेतनम् । मूल्यम् ।
(यथा, ऋग्वेदे । ४ । २४ । ९ ।)

"भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन् ॥")

वस्नम् । वस्नम् । इति त्रिकाण्डशेषः ॥ धनम् । अस्ति ।
इति हेमचन्द्रः ॥ (वस्यते आच्छाद्यतेऽनेन शरीरमिति । वस्+न: ।) चर्म । इत्यमरटीकायां रामाश्रमः ॥

वस्नः, पुं, (वस्+नः ।) मूल्यम् । इत्यमरः ॥

वस्नसं, कटीसूत्रकम् । इति शब्दरत्नावली ॥

वस्नसा, स्त्री, (वस्नं वसीत वीनाति । वस्न+सिञ+डः । स्त्रियां टाप् ।) स्नायुः । इत्यमरः ॥

व(ब)स्वौकसारा, स्त्री, (वस्वौकेषु रत्नाकरेषु सारा ।) इन्द्रपुरी । (यथा, रघुः । १९ । १० ।
"वस्वौकसारामभिभूय साऽथ
सौराज्यबद्धोत्सवया विभूत्या ।
समग्रशक्तौ त्वयि सूर्यवंश्ये
सति प्रपन्ना करुणामवस्थाम् ॥")
इन्द्रपुरी । (यथा, महाभारते । १ । १७७ । १०६ ।
"वस्वौकसारां नलिनीं नर्मदाग्रेण भारत ॥")
कुबेरपुरी । (यथा, महाभारते । ७ । ६३ । ६४ ।
"नैताद्दशं हृदृष्टं कुबेरभवनेऽपि ।
धनञ्च पूर्णमासं च, किं पुनर्मनुजेष्विति ।
भवं वस्वौकसारेयमिन्मनुष्या विदिताः ॥")
कुबेरनदी । इति हेमचन्द्रः ॥

वह, द क नितं । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) द क, वंहयति । निति दीप्तौ । इति दुर्गादासः ॥

वह, ऐ ज औ प्रापणे । इति कविकल्पद्रुमः । (भ्वा०-उभ०-द्वि०-अनिट् ।) प्रापणमिह स्थानात् स्थानान्तरनयनम् । ऐ, उह्यात् । ज, वहति वहते भारं ग्रामं जनः प्रापयतीत्यर्थः । औ, अवाक्षीत् । अवोढारे अवक्ष्मैवोऽयम् । यथा ।
अमूः सरिद्वति सोमपि अम्बुपतीति मैथिली । मर्दे मलहरति गच्छति चारिवाचः ।
इति महानाटके । वहति इतः पुरवासिनो जनाः वहवासः । इत्यादि भिन्नार्थतोऽपि वहधातुं मन्यते वर्द्धमानरवर्षी ।
वस्तुतस्तु वहत्यादयो मानसादेर्बोधादिरनेकोऽपिस्थितः । वहति इति वचोप्रयोगस्य तु वाच इ यमे इत्यस्मात् गच्छतानिव्यात् परस्मैपदसिद्धिः । अनेकार्थत्वात् गच्छतीत्यर्थः । अथवा वय इत्यादि इत्येव व्याख्यानम् । इति दुर्गादासः ॥

वहः, पुं, (वहति युगमनेनेति । वह+"गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति घञभावे साधु ।) वृषस्कन्धप्रदेशः । इत्यमरः ॥ (यथा, महाभारते । ४ । २ । २१ ।
"यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ ।
दक्षिणे चैव सव्ये च गवामिव वहः कृतः ॥")
वहतीति । वह+अच् ।) घोटकः । वायुः ।
इति मेदिनी । हे, ८ ॥ पन्थाः । इति त्रिकाण्डशेषः ॥ नदः । इति हेमचन्द्रः ॥ (वाच्यवत्, त्रि ।

स्पन्दः, पद् । । ७ ।
"... ... ...

वहता ... ...

वहत्, पुं, (वहतीति । वह+अति ।) ... ... ।
... इत्युणादिकोषः ।

वहति, पुं (वहतीति । वह+अति ।)
... उणा० ४ । ६० । इति
वायुः । इत्युणादिकोषः । मेदिनी । ते, १८ ॥

वहन्ती, स्त्री, (वहतीति । वह+
ङीप् ।) नदी । इति मेदिनी ।

वहनः, पुं, (वह+"वहिदोर्ह।"
३ । ७० । इति अनुः ।) वृष
इति मेदिनी । ते, १३८ ॥ ...
...नम् । यथा, कुमारे । १० । ७ ।
"स्कन्धाग्र वहनः ...
"वहनः स्कन्धविवर्ते ...
इति महाभिः कायवन् । ...
वेदे । १० । ७६ । ११ ।
"... ...
... वहनं कुर्वीत ॥"
"स्कन्धाग्र वहनं ... ।
भार्यां ... । महाभारते, वे
भागवते । ७ । २ । १० ।
"उभा ... वहनं ... ॥"
"उभौ वहनं ... कोर्त ...
कृमिणो विषये ।" इति तत्र्यं

वहनं, क्ली, (उह्यतेऽनेनेति ।
... ।) पोतः । बृषी इति भाषा ।
"... ...
... वहनं ... ... ॥
इति ।

(यथा, कथासरित्सागरे । ५३ । ...
"... च ... ।
... वहनं ... ।
वह+भावे ल्युट् । प्रापणम् ।
यथा, महाभारते । ९ । ३१ । ...
"... ...
वहतीति । वह+ल्युः । ...
कथासरित्सागरे । ११८ । ११ ।
"दैवाज्जगामधियौ विमानवहनः ...
...

वहन्तः, पुं, (वहति वाप्नोति । वह+,
...।" उणा० ३ । १२८ । इति
वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
(उह्यते इति । कर्मणि भच् ।) इति
इत्युणादिकोषः ॥

व(ब)हलः, पुं, (उह्यतेऽनेनेति । वह+...
...।) पोतः । इति शब्दा...
दृढ़, त्रि । इति हेमचन्द्रः । (...
उत्तरचरिते । ३ ।

बस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ॥"
या प्रबोधचन्द्रोदये । १ ।
ह.सद्रक्तो शृगचहलघनामांसमलिप्तकमह-
ारीकारि भूरिस्युलरुधिरसरिद्दारिपूरे-
ऽभिषिक्तः ॥")
ं, स्त्री, (बहलः प्रचुरो गन्धो यस्य ।)
चन्दनम् । इति राजनिर्घण्टः ॥
शुः. [स्] पुं, (बहलानि प्रचुराणि चक्षुं-
पुष्पाणयस्य ।) मेषशृङ्गी । इति रत्न-
॥ पुस्तकान्तरे ।
शृङ्गी मेषशृङ्गी तथा मेषविषाणिका ।
हलं चक्षुश्च मेढ्रशृङ्गी गृहद्रुमाः ॥"
इत्यपि पाठः ॥
चः, पुं, (बहला दृढा त्वचा वल्कलं यस्य ।)
लोध्रः । इति राजनिर्घण्टः ॥
स्त्री, (बहलानि प्रचुराणि पुष्पाणि
स्या इति । अर्शआदित्वादच् ।) शत-
। इति राजनिर्घण्टः ॥ स्थूलैला । इति
प्रकाशः ॥ (अस्याः पर्य्यायो यथा,—
तु बहला स्थूला माषेयं ताड़काफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
स्त्री, (वहतीति । वह + अच् । टाप् ।)
। इति हेमचन्द्रः । ४ । १४६ ॥
ः, [स्] अ, बाह्यम् । इत्यमरः ॥ (यथा,
: । १० । ४५ ।
मधाहूरपञ्चानां या लोके जातयो वहिः ।
वाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥"
च, रामायणे । २ । ५४ । २ ।
यं प्रथमा रात्रिर्याता जनपदात् वहिः ।
सुमन्त्र रहिता तां नोत्कण्ठितुमर्हसि ॥")
ःकुटीचरः, पुं, (वहिःकुट्यां चरतीति ।
+टः ।) कुलीरः । इति त्रिकाण्डशेषः ॥
, त्रि, (अवधीयते स्मेति । अव + धा + क्तः ।
कारलोपः ।) अवहितः । इति द्विरूप-
षः ॥
, स्त्री, (वहति द्रव्याणीति । वह + "अमिचा-
भ्य इत्रोत्रौ ।" उणा० ४।१०२। इति इत्रः ।)
नः । तत्पर्य्यायः । वार्व्वटः २ । इति
काण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । ५ ।
"प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ॥")
त्रकं, स्त्री, (वहित्र + स्वार्थे कन् ।) जलयानम् ।
था, हेमचन्द्रे ।
सांयात्रिकः पोतवणिक् यानपात्रं वहित्रकम् ।
हित्रं वहनं पोतः पोतवाहो नियामकः ॥"
हिर्द्वारं, स्त्री, (वहिःस्थं द्वारम् ।) तोरणम् ।
त्यमरः ॥ (यथा,—
धिगस्तेना विद्या धिगपि कविता धिक्सुजनता
यो रूपं धिक् धिगपि च यशो निर्द्धनमतः ।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान्
बहिर्द्वारे यस्मात्तृणलभसमाः सन्ति गुणिनः ॥"
इत्युद्भटः ।)

व(ब)हिर्द्वारप्रकोष्ठकः, पुं, (बहिर्द्वारस्य प्रकोष्ठकः ।) गृहस्य द्वाराद्बहिः प्रकोष्ठम् । तत्पर्य्यायः । प्रघाणः २ प्रघणः ३ अलिन्दः ४ । इत्यमरः । २ । २ । १२ ॥

व(ब)हिर्भूतः, त्रि, (बहिस् + भू + क्तः ।) बहिर्गतः । बहिःशब्दपूर्व्वकप्राप्त्यर्थभूधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । यथा । "पञ्चविषयिता-बहिर्भूतसाध्यविषयिताघटितधर्म्मावच्छिन्नप्रति-बध्यताशालिसं शयः पक्षता ।" इति जगदीशः ॥

व(ब)हिर्मुखः, त्रि, (बहिर्बाह्यविषये मुखं प्रवणता यस्य ।) विमुखः । यथा, नरसिंहाचार्य्यधृतेशानसंहितायाम् ।
"शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः ।
सर्व्वं पूजाफलं हन्ति शिवरात्रिबहिर्मुखः ॥"
इति तिथ्यादितत्त्वम् ॥

व(ब)हिश्चरः, पुं, (बहिश्चरतीति । चर + टः ।) कर्कटः । इति हेमचन्द्रः ॥ (बहिश्चरणशीले, त्रि । यथा, मार्कण्डेये । २३ । ८३ ।
"युवयोर्यन्मदीयं तन्मामकं युवयोः स्वकम् ।
एतत्सत्यं विजानीतं युवां प्राणा बहिश्चराः ॥")

वहेडुकः, पुं, विभीतकवृक्षः । इति राजनिर्घण्टः ॥

वह्निः, पुं, (वहति धरति हव्यं देवार्थमिति । वह + "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।" उणा० ४ । ५१ । इति निः ।) चित्रकः । भल्लातकः । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"मञ्जिष्ठाद्यौ वासको देवदारु
पथ्यावह्नी चोपधात्री विड़ङ्गम् ॥")
निम्बूकः । इति राजनिर्घण्टः ॥ रेफः । इति तन्त्रम् ॥ अग्निः । इत्यमरः ॥*॥ तस्य नामानि यथा,—
"ते जातवेदसः सर्व्वे कल्माषः कुसुमस्तथा ।
दहनः शोषणश्चैव तपनश्च महाबलः ।
पिठरः पतगः स्वर्णस्त्वगाधो भ्राज एव च ॥"
अन्यत्र तु नामान्तराण्युक्तानि यथा,—
"जृम्भकोद्दीपकश्चैव विभ्रमभ्रमशोभनाः ।
आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च ।
अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नयः ॥"
अन्यैरन्यथोक्तानि यथा,—
"भ्राजको रञ्जकश्चैव क्लेदकः स्नेहकस्तथा ।
धारको बन्धकश्चैव द्रावकाख्यश्च सप्तधा ।
व्यापकः पावकश्चैव श्लेष्मको दशमः स्मृतः ॥"
शरीरस्थवह्नेः स्थानानि यथा,—
"वह्नयो दोषदूष्येषु संलीना दश देहिनः ॥"
दोषदूष्या यथा,—
"वातपित्तकफा दोषा दूष्याः स्युः सप्त धातवः ॥"
इति सारदातिलकः ॥
तत्र निषिद्धकर्म्माणि यथा,—
"नाशुद्धोऽग्निं परिचरेत् न देवान् कीर्त्तयेद्दषीन् ।
न चाग्निं लङ्घयेद्धीमान् नोपदध्यादधः क्वचित् ॥
न चैनं पादतः कुर्य्यात् मुखेन न धमेद्बुधः ।
अशुद्धो न निःश्वसेदग्निं नाग्निः प्रशमयेत्तथा ॥
न वह्निं मुखनिश्वासैर्ज्वालयेन्नाशुचिर्बुधः ।
स्वमग्निं नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत् ॥
नापश्चिपेन्नोपधमेत् स स्पर्शेण च पाणिना ।
मुखेनाग्निं समिन्धीत मुखादग्निरजायत ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
अस्योत्पत्तिर्यथा,—

शौनक उवाच ।

"सर्व्वं श्रुतं महाभाग परिपूर्णं मनो मम ।
अधुना श्रोतुमिच्छामि वह्नेरुत्पत्तिमीप्सिताम् ॥

सूत उवाच ।

एकदा सृष्टिकाले च ब्रह्मानन्तमहेश्वराः ।
श्वेतद्वीपं ययुः सर्व्वे द्रष्टुं विष्णुं जगत्पतिम् ॥
परस्परञ्च संभाषां कृत्वा सिंहासनेषु च ।
ऊषुः सर्व्वे सभामध्ये सुरम्ये पुरतो हरेः ॥
विष्णुगात्रोद्भवास्तत्र कामिन्यः कमलाकलाः ।
तत्र नृत्यन्ति गायन्ति विष्णुगाथाश्च सुस्वरम् ॥
तासाञ्च कठिनां श्रोणिं कठिनं स्तनमण्डलम् ।
सस्मितं मुखपद्मञ्च दृष्ट्वा ब्रह्मा स कामुकः ॥
मनो निवारणं कर्त्तुं न शशाक पितामहः ।
वीर्य्यं पपात तच्छ्रीघ्रं लज्जया वाससा विभुः ॥
तद्वीर्य्यं वस्त्रसहितं प्रतप्तं कामतापितः ।
क्षीरोदे प्रेरयामास सज्जीते विरते द्विज ॥
जलादुत्थाय पुरुषः प्रज्वलन् ब्रह्मतेजसा ।
उवास ब्रह्मणः क्रोड़े लज्जितस्य च संसदि ॥
एतस्मिन्नन्तरे रुष्टो जलादुत्थाय सत्वरः ।
प्रणम्य वरुणो देवान् बालं नेतुं समुद्यतः ॥
बालो दधार ब्रह्माणं बाहुभ्याञ्च भयाद्रुदन् ।
किञ्चिन्नोवाच जगतां विधाता लज्जया द्विज ॥
बालकस्य करे धृत्वा चकाराकर्षणं रुषा ।
वरुणश्च सभामध्ये तं चिक्षेप प्रजापतिः ॥
पपात दूरतो देवो वरुणो दुर्ब्बलस्तथा ।
मूर्च्छां संप्राप स्तवत् कोपदृष्ट्या विधेरहो ॥
चेतनं कारयामास स्वदृष्ट्या च शङ्करः ।
संप्राप्य चेतनां तत्र तमुवाच जलेश्वरः ॥

वरुण उवाच ।

बालो जले समुद्भूतो मम पुत्रोऽयमीप्सितः ।
अहं गृहीत्वा यास्यामि ब्रह्मा मां ताड़येत् कथम् ॥

ब्रह्मोवाच ।

बालकः शरणापन्नो मयि विष्णो महेश्वर ।
कथं दास्यामि भीतञ्च रुदन्तं शरणागतम् ॥
शरणागतदीनार्त्तं यो न रक्षेदपण्डितः ।
पच्यते निरये तावद् यावच्चन्द्रदिवाकरौ ॥
उभयोर्व्वचनं श्रुत्वा प्रहस्य मधुसूदनः ।
उवाच सर्व्वतत्त्वज्ञः सर्व्वेशश्च यथोचितम् ॥

भगवानुवाच ।

दृष्ट्वा शुकामिनीश्रोणिं वीर्य्यं धातुः पपात तत् ।
लज्जया प्रेरयामास क्षीरोदे निर्म्मले जले ॥
ततो बभूव बालश्च धर्म्मतो विधिपुत्रकः ।
क्षेत्रजश्च सुतः शास्त्रे वरुणस्यापि गौणतः ॥

महादेव उवाच ।

यो विद्यायोनिसम्बन्धो देहेषु च निरूपितः ।
शिष्ये पुत्रे च समता चेति वेदविदो विदुः ॥

मत्स्यं ददातु वरुणो विद्याञ्च बालकाय च।
पुष्पो विधातुर्वह्निश्च शिष्यश्च वरुणस्य च॥
विष्णुर्ददातु बालाय दाहिकां शक्तिमुत्तमाम्।
सर्वदग्धो हुताशश्च निर्माणो वरुणेन च॥
विष्णुश्च दाहिकां शक्तिं ददौ मत्स्यै शिवाज्ञया।
मत्स्यं विद्याञ्च वरुणो रत्नमालां मनोहराम्॥
क्रोडे कृत्वा च तं बालं चुचुम्ब मायया सुरः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वह्न्युत्पत्तिर्नाम ११० अध्यायः॥ *॥ तद्दाहनिवारणौषधानि यथा,—
"शालूरस्यैन्धवशा विद्युद्दग्धा च मृत्तिका।
तयानुलिप्तं यद्देश्म नाग्निना दह्यते नृप!॥"
इति मात्स्ये राजधर्म्मे राजरक्षानाम १८३ अः॥
अग्निवैकृत्यं तच्छान्तिश्च यथा,—
"अनग्निर्दीप्यते यत्र राष्ट्रे यस्य निरिन्धनः।
न दीप्यते चेन्धनवान् स राष्ट्रः पीड्यते नृपैः॥
प्रज्वलेदप्सु मांसं वा तथार्द्रं वापि किञ्चन।
प्रासादतोरणद्वारं नृपवेश्म सुरालयम्॥
एतानि यत्र दह्यन्ते तत्र राजभयं भवेत्।
विद्युता वा प्रदह्यन्ते तथापि नृपतेर्भयम्॥
धूमश्चानग्निजो यत्र तत्र विद्यान्महद्भयम्।
विनाग्निं विस्फुलिङ्गाश्च दृश्यन्ते यत्र कुत्रचित्॥
त्रिरात्रोपोषितश्चात्र पुरोधाः सुसमाहितः।
समिद्भिः क्षीरवृक्षाणां सर्षपैस्तु घृतेन च॥
दद्यात् सुवर्णञ्च तथा द्विजेभ्यो
गाश्चैव वस्त्राणि तथा भुवञ्च।
एवं कृते पापमुपैति नाशं
यदग्निवैकृत्यभवं द्विजेन्द्र!॥"
इति मत्स्यपुराणे अग्निवैकृत्यं नाम २०५ अध्यायः॥ *॥ सुरामयो यथा,—
"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः।
एतेऽग्नयस्त्रयो मुख्याः शेषाश्चोपसदस्त्रयः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥ *॥
वह्निविप्रमध्यगमननिषेधो यथा,—
"द्वौ विप्रौ वह्निविप्रौ च दम्पत्योर्गुरुशिष्ययोः।
हलाग्रे च न गन्तव्यं मध्ये तु पदे पदे॥"
इति कर्म्मलोचनः॥ *॥
अपि च।
"नाग्निब्राह्मणयोरन्तरा व्रजेत् नाग्न्योर्न ब्राह्मणयोर्न गुर्वाग्निषयोरन्तरया तु व्रजेत्।"
इति तिथ्यादितत्त्ववचनम्॥ *॥ अथ वह्निस्तम्भनम्।
"मण्डूकस्य वसां गृह्य घृतौषां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्॥
शाल्मलीरसमादाय ततस्त्वं निधाय तम्।
अपामार्गे दिवैतेन अग्निस्तम्भनमुत्तमम्॥
वासको उदरं गृह्य मण्डूकस्य वसा तथा।
गुडूची कारवेल्लस्य मनोऽपि प्रतिपेषयेत्॥
एतेनैव लोपितेन अग्निस्तम्भनमुत्तमम्।
गृहकोषकरञ्जोत्थं मरीचं मागधं तथा।
चर्व्वणाच्च दमं वक्त्रे जिह्वया ज्वलनं लिहेत्॥

गोरोचना भृङ्गराजं चूर्णं कृत्वा घृतं समम्।
दिव्यस्तम्भश्च पीत्वा स्यान्मन्त्रेणानेन वै तथा॥"
ॐ अग्निस्तम्भनं कुरु। इति गारुडे १८६ अध्यायः॥ (दैत्यविशेषः। यथा, महाभारते। १२। २२७। ५०।
"वायुः कार्त्तस्वरो वह्निर्विश्वदंष्ट्रोऽथ नैर्ऋतिः॥"
मित्रविन्दागर्भजातः कृष्णस्य पुत्रविशेषः। यथा, भागवते। १०। ६१। १६।
"मह्वांशः पावनो वह्निर्मित्रविन्दात्मजाः क्षुधिः॥"
तुर्वसुपुत्रः। यथा, हरिवंशे। ३२। ११७।
"तुर्वसोस्तु सुतो वह्निर्गोभानुस्तस्य चात्मजः॥"
कुकुरपुत्रः। यथा, भागवते। ९। २४। १९।
"कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः॥")
वह्निकरी, स्त्री, (वह्निं देहस्थवह्निं करोतीति। कृ+टः। ङीप्।) धातकीपुष्पी। इति शब्दचन्द्रिका॥ धाइ फुल इति भाषा॥
वह्निकाष्ठं, क्ली, (वह्निवत् दाहकं काष्ठम्।) दाहागुरुः। इति राजनिर्घण्टः॥
वह्निगन्धः, पुं, (वह्निना वह्निसंयोगेन दहनेन गन्धो यस्य।) यक्षधूपः। इति शब्दचन्द्रिका॥
वह्निगर्भः, पुं, (वह्निर्गर्भे यस्य।) वंशः। इति शब्दचन्द्रिका॥
वह्निगर्भा, स्त्री, (वह्निरग्निर्गर्भे यस्याः।) शमीवृक्षः। इति शब्दचन्द्रिका॥
वह्निचक्रा, स्त्री, (वह्नेरिव चक्रं आवर्त्तवत् चिह्नं यत्र।) कलिकारीवृक्षः। इति भावप्रकाशः॥
वह्निज्वाला, स्त्री, (वह्नेर्ज्वालेव दाहकत्वात्।) धातकीवृक्षः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायो यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वह्निदमनी, स्त्री, (दमयति शमयतीति। दम+णिच्+ल्युः। ङीप्। वह्नेर्दमनी। अग्निदाहजनितशमनकारित्वादस्यास्तथात्वम्।) अग्निदमनीक्षुपः। इति राजनिर्घण्टः॥
वह्निदीपकः, पुं, (वह्निं दीपयतीति। दीप+णिच्+ण्वुल्। वह्नेर्दीपक इति वा।) कुसुम्भम्। इति शब्दरत्नावली॥ (गुणादिविशेषोऽस्य कुसुम्भशब्दे ज्ञेयः॥)
वह्निदीपिका, स्त्री, (वह्नेर्जठरानलस्य दीपिका उत्तेजिका॥) अजमोदा। इति राजनिर्घण्टः॥
वह्निनामा [न्], पुं, (वह्नेर्नाम नाम यस्य।) चित्रकः। भल्लातकः। इति रत्नमाला॥
वह्निनी, स्त्री, (वह्निं तद्वत्कान्तिं नयतीति। नी+डः। गौरादित्वात् ङीप्।) जटामांसी। इति रत्नमाला॥
वह्निपुष्पी, स्त्री, (वह्निरिव दाहकं रक्तवर्णं वा पुष्पमस्याः। ङीप्।) धातकी। इति राजनिर्घण्टः॥

वह्निबधूः, स्त्री, (वह्नेर्वधूः।) स्वाहा। इति रत्नावली॥
वह्निबीजं, क्ली, (वह्नेर्बीजम्।) ...
तकम्॥ (वह्निदायकं ...
कम्। इति राजनिर्घण्टः॥ ...
स्वर्णम्। इति हेमचन्द्रः॥ ...
"एकदा ...
तत्र कृत्वा च नृत्यञ्च
विलोक्य रम्भां सुश्रोणीं ...,
पपात वीर्य्यं चस्कार
उत्तस्थौ स्वर्णपुञ्जश्च ...
चर्येन वर्द्धयामास स ...
हिरण्यरेतसं वह्निं प्रवदन्ति ...
इति ते कथितं वत्स किं भूयः ...
इति ब्रह्मवैवर्त्ते ...
नाम १३० अध्यायः॥
वह्निभोग्यं, क्ली, (वह्नेरग्नेर्भोग्य...त्वात्।) घृतम्। इति शब्दचन्द्रिका॥
वह्निमन्थः, पुं, (वह्नये ... इति। मन्थ+घञ्।) ...
जटाधरः॥ (...
वह्निमन्थोऽग्निमन्थश्च मथनो ...
इति
अग्निमन्थः। इति राजनिर्घण्टः॥
वह्निमारकं, क्ली, (वह्निं ...
मृ+णिच्+ण्वुल्।) जलम्। ...
चन्द्रिका॥
वह्निमित्रः, पुं, (वह्निर्मित्रं यस्य।) ...
शब्दचन्द्रिका॥
वह्निरेताः [स्], पुं, (वह्नौ रेतो ...
निषिक्तवीर्य्यत्वादेवास्य तथात्वम्।)
इति हलायुधः॥
वह्निलोहकं, क्ली, (वह्निरिवारक्तं ...
कांस्यम्। इति राजनिर्घण्टः॥
वह्निवर्णं, क्ली, (वह्नेरिव रक्तो वर्णो य...
त्पलम्। इति शब्दचन्द्रिका॥
वह्निवल्लभः, पुं, (वह्नेर्वल्लभः प्रियः ...
सर्ज्जरसः। इति त्रिकाण्डशेषः॥
वह्निशिखं, क्ली, (वह्निरिव शिखा ...
म्भम्। इत्यमरः॥ (अस्य ...
"स्यात् कुसुम्भं वह्निशिखं ...
इति भावप्रकाशस्य ...
वह्निशिखरः, पुं, (वह्निरिव शिखा ...
लोहितमस्तकः। इति शब्दरत्नावली॥
वह्निशिखा, स्त्री, (वह्निरिव शिखा ...
कलिनी। इति धरणिः॥ कलिका...॥
इति राजनिर्घण्टः॥ (लाङ्गलि...
विष इति ख्याता। तत्पर्य्यायो यथा,—
"गौरी लाङ्गलिका ...
अग्निजिह्वेन्द्रपुष्प्याग्निशिखो ...
इति भावप्रकाशस्य पूर्व्वखण्डे ...

...शः, पुं, (वंशः शिल्पं यस्य । अण् ।)
...शिल्पकः । इत्यमरः ॥
...पुं, (वंशैश्चरतीति । चर + टः ।)
... इति शब्दरत्नावली ॥ (वंशः शरः ।)
इति वंशादिजन्मतया ॥
... (वंशीति । वंश + "...अण्" ।
४ । ३ । ११ । इति अण् प्रत्ययेन साधुः ।)
...म् । इति हेमचन्द्रः ॥ (वंशस्येदमिति ।
"तस्येदम् ।" ४ । ३ । १२० । इति
...) वंशजम् । वंशादिजातम् ॥ (यथा,
...३ । ६ । ४० । ३ ।
...शिल्पा वंशीदिव वंशं मानयन् ...
...दिव ॥")
...वी, मुरलिका । वंशवाद्यविशेषः ॥
...शब्दविशेषः । इति शब्दकल्पद्रुमः ॥
...१०-षष्ठ०-त्रुटानाडी स्वर०-अनुप्रास सप्त०-
...) च, वाग्मति । इति दुर्गादासः ॥
... सप्तस्वरमयी: । इति शब्दकल्पद्रुमः ॥
...१०-षष्ठ०-सप्त०-ङीप् ।) ...
...के । गृहस्थित पादुकपूर्व्वकेन । स, यानि
... । दिनमं सत्यवानिति मनुभूप: । इति
...दास: ॥
... (वा + क्विप् ।) विचक्षणः । (यथा, मनुः ।
...११८ ।
...र्योषध न स्यातां शुश्रूषा वापि तद्विधा ।
...विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")
...सा । (इवार्थे । यथा, रघुः । १८ । ५१ ।
"बीज पवित्रकलामिवेन्दु वा
पद्मं नदमिव धर्म्मपल्लवम् ॥")
...र्थः । (यथा, महाभारते । १ । १५४ । ८ ।
...ते दिदृक्षु सर्व्वेषां सुस्पष्टैः प्रबोधितैः ।
...नागाद्य दुर्ब्बुद्धे तरसा त्वं नराधम ! ॥")
...पूरणम् । (यथा, रामायणे । १ । २५ । ३ ।
...बाहुबलान् वापि सशस्त्रोरगान् भुवि ।
...मितान् प्रशस्तानी वशीकृत्य जयिष्यसि ॥")
...चयः । इति मेदिनी । वे, ७४ ॥ इवार्थः ।
...विधः ॥ (यथा, किराते । ३ । १६ ।
"सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ॥")
...त्रि, वंशसम्बन्धी । वंशस्यायमित्यर्थे ष्य(ष्यञ्)
...येन निष्पन्नः ॥
...कः, पुं, (वंशीवादनं शिल्पमस्येति । वंश +
...क् ।) वंशीवादकः । इति जटाधरः । (भार-
...तान् वंशान् हरति वहति आवहति वा ।
...हरति वहत्यावहति भाराद्वंशादिभ्यः ।"
... । १ । ५० । इति ठक् । भारभूतवंशहारके
...वाहके च त्रि ॥)
...ी, स्त्री, (वंशे भवा + वंश + अण् । ङीप् ।)
...लोचना । इति राजनिर्घण्टः ॥ (तत्पर्य्यायो
...था,—
तुगाक्षीरी शुभा वांशी वंशजा वंशलोचना ॥"
इति वैद्यकरत्नमाला ॥

"ककदंशीलना वांशी तुगाक्षीरी तुगा शुभा ।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वाः [र्], क्ली, (वार्य्यते तृषानेनेति । वृ + णिच् + क्विप् । यद्वा, "वृञ् वरणे । भ्राजिकोरात् छान्दसः । तस्मात् क्विप् । अति लोपः । वान्तादिलोपः । रेफस्य विसर्ज्जनीयः ।" इति सिद्धान्तकौमुद्यां उणादिवृत्त्या । १ । १२ । ८ ।) जलम् । इत्यमरः ॥ (यथा, भागवते ।३।१३।१६।
"एतन्मे क्षितिर्व्वार्भिः प्लाव्यमाना रसा- गता ॥")

वाःकिटिः, पुं, वारि जलस्य किटिः शूकरः । शिशुमारः । इति केचित् ॥

वाःसदनं, क्ली, (वारो जलस्य सदनम् ।) जला- धारः । इति त्रिकाण्डशेषः ॥

वाक् [च्], स्त्री, (उच्यतेऽसौ अनया वेति । वच् + "क्विब्वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घोऽसम्प्रसारणञ्च ।) वाक्यम् । (यथा, मनुः । २ । १५९ ।
"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् ।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्म- मिच्छता ॥")
सरस्वती । इत्यमरः ॥ (यथा, कथासरित्- सागरे । १ । ३ ।
"प्रणम्य वाचं निःशेषपदार्थोद्द्योतदीपिकाम् ।
बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम् ॥")

वाकं, त्रि, (वकस्येदमिति । वक + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकसम्बन्धि । वक- स्येदं इत्यर्थे व्युत्पत्त्या निष्पन्नम् ॥ (क्ली, वकस्य समूहः । "तस्य समूहः ।" ४ । २ । ३७ । इत्यण् । वकसमूहः ॥ उच्यतेऽसौ अनेनेति वा । वच् + घञ् । वाक्यम् । यथा, उत्तररामचरिते । १ । १ ।
"इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे ॥"
वेदभागविशेषः । यथा, महाभारते । १२ । ४७ । २५ ।
"यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु ॥"
पुं, वकस्यावयवो विकारो वा । प्राणित्वादञ् । वकावयवविशेषः ॥)

वाकुची, स्त्री, (वातीति वा वायुस्तं कुचति सङ्को- चयति पूतिगन्धित्वात् । कुच् + कः । गौरादि- त्वात् ङीष् ।) ओषधिविशेषः । हाकुच इति भाषा ॥ तत्पर्य्यायः । सोमराजी २ सोमवल्ली ३ सुवल्लिका ४ सिता ५ सितावरी ६ चन्द्रलेखा ७ चन्द्री ८ सुप्रभा ९ कुष्ठघ्नी १० कालमेषी ११ पूतिगन्धा १२ वल्गुला १३ चन्द्रराजी १४ कालमेषी १५ त्वग्दोषापहा १६ कान्तिदा १७ अवल्गुजा १८ चन्द्रप्रभा १९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । क्रिमिकुष्ठकफत्वग्दोषविषकण्डूव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"अवल्गुजो वाकुची स्यात् सोमराजी सुव- ल्लिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुनुत् ॥"
इति भावप्रकाशः ॥

वाकुलं, क्ली, (बकुलस्येदमिति । बकुल + "तस्ये- दम् ।" ४ । ३ । १२० । इत्यण् ।) बकुलफलम् । अस्य गुणाः ।
"वाकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"
इति राजवल्लभः ॥

वाक्कीरः, पुं, (वाचि कौतुकवाक्ये कीरः शुक इव प्रियत्वात् ।) स्यालकः । इति शब्दरत्नावली ॥

वाक्छलं, क्ली, (वाचा छलम् ।) वाक्यचालः । यथा । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । तत्त्रिविधम् । वाक्छलम् । सामान्यच्छलम् । उपचारच्छलञ्च । अविशेषाभिहितेऽर्थे वक्तुरभि- प्रायादर्थान्तरकल्पना वाक्छलम् ॥ १ ॥ सम्भ- वतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थ- कल्पना सामान्यच्छलम् ॥ २ ॥ धर्म्मविकल्प- निर्द्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ३ ॥ इति गौतमसूत्रम् ॥ अनेकार्थशब्दप्रयोगे तात्पर्य्य- भेदकशब्दस्य भ्रमात् अर्थान्तरतात्पर्य्यकत्वकल्प- नया दूषणाभिधानं वाक्छललक्षणम् । यथा । नेपालादागतोऽयं नवकम्बलवत्त्वात् । इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बलाः ॥ १ ॥ सामान्य- विशिष्टसम्भवदर्थाभिप्रायेण उक्तस्य सामान्य- योगादसम्भवदर्थकल्पनया दूषणाभिधानं सामान्यच्छलम् । यथा । ब्राह्मणोऽयं विद्या- चरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरण- सम्पदं साधयति इति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पत् व्रात्ये व्यभि- चारात् ॥ २ ॥ शक्तिलक्षणयोरेकतरवृत्त्या यः प्रतिषेधः स उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति इत्यत्र मञ्चस्था एव क्रोशन्ति न तु मञ्चाः । एवं चाहं नित्य इति शब्दः प्रयुक्ते असदकादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युप- चारच्छलम् ॥ ३ ॥ इति तट्टीका ॥ अपि च ।
"सर्व्वस्वर्णविवादेषु वाक्छले नावसीदति ।
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
इति व्यवहारतत्त्वम् ॥

वाक्पतिः, पुं, (वाचां पतिः ।) बृहस्पतिः ॥ इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ८ । १५ ।
"उद्गारोऽग्निसक्षेमकरो वाक्पतिश्चरन् भानाम् ॥")

वाक्पति ... (वाचां पतिरिव ... ।) ... । इति ... ग्री-

क्यमादिपटुवचनः । इति भरतः ॥ स्वबुद्ध्या वाक्यरचकः । इति सारसुन्दरी ॥ पटुवचनः । इति पदार्थकौमुदी ॥ व्यक्तवाग्जनः । इति नीलकण्ठः ॥ तत्पर्य्यायः । वागीशः २ । इत्यमरः ॥ अनवद्योग्रवचाः ३ । इति जटाधरः ॥
"वाग्मी वाग्मिर्वाविदूको वाचो युक्तिपटुस्तथा ।
वागीशो वाक्पतिश्चेति भवेते सुवक्तरि ॥"
इति शब्दरत्नावली ॥
(यथा, हरिवंशे । २१५ । ३४ ।
"ममार्थे सर्व्वलोकस्य विदधाति स वाक्पतिः ॥")
वाक्पारुष्यं, क्ली, (वाचा कृतं पारुष्यम् ।) अप्रियवाक्योच्चारणम् । तत्तु सप्तधाव्यसनान्तर्गतव्यसनविशेषः । यथा,—
"त्रयाणाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे ।
दण्डपारुष्यमित्येतत् स्वीयं व्यसनसप्तकम् ॥"
इति हेमचन्द्रः ॥*॥
तल्लक्षणं नारदेनोक्तम् ।
"देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम् ।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥"
देशादीनां आक्रोशन्यङ्गसंयुतम् । उच्चैर्भाषणमाक्रोशः न्यङ्गमवद्यं तदुभययुक्तं यत्प्रतिकूलार्थं उद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते ॥ तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैवोक्तम् ।
"निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम् ।
गौरवानुक्रमात्तस्य दण्डोऽपि स्यात् क्रमाद्गुरुः ॥
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पतनीयैरुपाक्रोशैस्तीव्रमाहुर्म्मनीषिणः ॥" इति ।
तत्र निष्ठुराश्लीलयोः सवर्णविषये दण्डमाह ।
"समानवर्णयाक्षेपे दण्डस्त्रयोदशपणः ।
तस्यैव ... पञ्चाशद्दण्डः पञ्चाशदुत्तमः ॥"
... तथाविधम् ।
तथैवापि सृजन् दाप्यो दण्डं कार्षापणं स्मृतम् ॥"
इति वर्णप्रसंगे तदतिदुष्टस्वर्णविषयम् । यदा पुनः पुत्रादयो मात्रादीन् शपन्ति तदा शतं दण्डनीया इति तेनैवोक्तम् ।
"मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानञ्चाददद्गुरोः ॥"
इति च ।
इदञ्च भार्य्यादिषु मात्रादिषु गुरुषु निरपराधेषु आक्षार्य्यां द्रष्टव्यम् ॥ * ॥ अश्लीलाक्षेपे दण्डमाह ।
"अभिगन्तास्मि भगिनीं मातरं वा तवेति च ।
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् ॥
अर्द्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च ।
दण्डप्रणयनं कार्य्यं वर्णजात्युत्तराधरैः ।
प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः ।
वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः ॥" * ॥
मनुः ।
"शतं ब्राह्मणमाक्रुश्य क्षत्त्रियो दण्डमर्हति ।
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ।
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्त्रियस्याभिशंसने ।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥"
इति मिताक्षरा ॥*॥
वाक्पारुष्ये अभियोगमन्तरेणैव प्रत्यभियोगे प्रतिप्रसवो यथा,—
"कुर्य्यात् प्रत्यभियोगञ्च कलहे साहसेषु च ।"
वाक्पारुष्ये शस्त्रादिप्रहारेषु च यथा पूर्व्वमहमप्यनेनाकृष्टः शस्त्रेण हतः इत्यपराधाभावाय प्रत्यभियोगं कुर्य्यात् । इति व्यवहारतत्त्वम् ॥
वाक्यं, क्ली, (उच्यते इति । वच् + ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् । शब्दसंज्ञत्वात् "वचोऽशब्दसंज्ञायाम् ।" ७ । ३ । ६७ । इति निषेधो न ।) पदसमुदायः । इति व्याकरणम् । तिङन्तचयः । सुबन्तचयः । कारकान्विता क्रिया । इत्यमरः । इह श्रुतिलोकयोस्त्रिविधं निरुक्तं वाक्यलक्षणम् । तिङ्सुबन्तयोश्चयः समुदायः कारकान्विता क्रिया च वाक्यम् । तिङ्शब्देन तिबादीनि शास्त्रीतिशतसंख्यकानि वचनानि उच्यन्ते । एवं सुप्शब्देन स्वादीन्येकविंशतिवचनानि इन्द्रात् परं यः श्रूयते लभतेऽर्थो प्रत्येकं अभिसम्बध्यते स च शब्द उभयोरपि सम्बध्यते । अत्र तिङन्तसमूहो यथा । पचति भवति पाको भवति इत्यर्थः । एवमन्यदप्यवसेयम् । सुबन्तसमूहो यथा । प्रशान्तचिह्नमिदं हि महात्मनाम् । धात्वर्थः क्रिया कारकैः कर्त्रादिभिरन्विता सम्बन्धा कारकान्विता अन्वितत्वञ्च क्रियाकारकयोः आकाङ्क्षायोग्यतासन्निधिवशात् ज्ञेयम् । तिङ्सुबन्तचयात्मकेऽपि समुदायेन बोध्यो व्यवस्थार्थस्याप्रयोगात् अतएव परस्पराभिसम्बन्धः पदसमूहो वाक्यमिति वृद्धाः । कारकान्विता क्रिया यथा । देवदत्तो ग्रामं गच्छति । इति तट्टीकायां भरतः ॥*॥ वाक्यलक्षणमाह ।
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।
वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ॥"
उक्तञ्च ।
"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संभूय जायते ॥"
इति ॥
तत्र वाक्यं यथा । शून्यं वासगृहमित्यादि । महावाक्यं यथा । रामायणमहाभारतरघुवंशादिः । इति साहित्यदर्पणे २ परिच्छेदः ॥*॥
अप्रियवाक्यभाषणनिषेधो यथा
"न हिंस्यात् ...
आदित्यं नाप्रियं वाक्यं न ...
पापकृदादिभिर्वाक्यनिषेधो य...
...
... दारान् ...
इति कौर्म्मे उपविभागे ...
शुभाशुभवाक्यानि यथा,—
"नैव राज्येन महता न वै ...
प्राप्यते मानकृतं ...
स्वर्गापवर्गसिद्धार्थेभाषितं ...
वाक्यं मुनिवरैः ...
...
वाक्यं निरयहेतुत्वात् ...
संस्कृतेनापि किं तेन ...
अविद्या रागवाक्येन ...
यत् श्रुत्वा जायते ...
निरङ्कुशमपि तद्वाक्यं ...
इति वह्निपुराणे वैष्ण...
ध्यायः ॥ (अत्र वाक्यदो...
"वाक्यदोषो ...
क्रमवत्क्रमपार्थकं निरर्थ...
हरयोमनयनिगमनान ...
भवति ...
तच न्यूनं ...
स्थितं ।" इति चरके विमान...
वाच, ऋ काङ्क्षे । इति कवि...
पर०-सक०-सेट् ।) ऋ, ...
नैवेष्टसिद्धौ इदनुबन्धो ...
इति तट्टीकायां दुर्गादासः ...
वाचरः, पु, (वाचा दर्शि...
अच् ।) सारकः । ग्राबः ...
दकः । सरघुः । पक्षिन...
इति हेमचन्द्रः ॥
वागात्मः, त्रि, (वाचि आत्...
इव मर्म्मच्छेदकत्वात् ।) ...
"व्याघ्री बलवती ...
स जीवा ...
वागाशनि, पु, बुद्धः । इति ...
वागीशः, पुं, (वाचां ईशः ।) ...
रत्नावली । (यथा, ...
"अयं विमिश्रोऽभिष्ट...
कुलमन्त्रीशोऽसितासित...
ब्रह्मा । यथा, कुमारे ।...
"वागीशं वाग्भिरर्थाभि...
वागीशः, त्रि, (वाचामी...
सुवक्ता इति यावत् ।...
महाभारते । १० । ७ ।...
"नित्यानन्दप्रसादिना वाग...

ा, स्त्री, (वाचामीशा।) सरस्वती। यथा,
"...शा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
...सि हृदये संविन् तं नृसिंहमहं भजे॥"
इति श्रीमद्भागवतटीकायां श्रीधरस्वामी॥
...रः, पुं, (वाचामीश्वर इव।) मञ्जुघोषः।
... त्रिकाण्डशेषः॥ (जैनविशेषः। इति च
...ाण्डशेषः। १। १। २३॥ बृहस्पतिः।
...।। इति व्युत्पत्तिलभ्योऽर्थः॥) वाचा-
...रे, त्रि। यथा, गारुडे १९६ अध्याये।
...ामलकचूर्णं वै मधुतैलसमन्वितम्।
...ा मासं युवा स्याच्च नरो वागीश्वरो
भवेत्॥"
...री, स्त्री, (वाचामीश्वरी।) सरस्वती।
...त्रिकाण्डशेषः॥ (यथा, तन्त्रसारे। "वागी-
...ऋतुस्नाताम्॥")
..., स्त्री, सोमराजी। इत्यमरः। २।४।९॥
...ा, वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे।
...मिसेवी कटुष्णेन वारिणा वागुजीं पिबेत्।
...भोजी त्रिसप्ताहात् कुष्ठरोगाद्विमुच्यते॥")
..., पुं, कर्म्मरङ्गः। इति शब्दमाला॥
..., स्त्री, (वातीति। वा गतिबन्धनयोः+
"...दुगुरादयश्च।" उणा० १।४२। इति उरच्-
...येन गुणागमेन च साधुः।) मृगबन्धनार्थ-
...विशेषः। इत्यमरः। २।१०।२६॥ (यथा,
...ित्सागरे। २१। ११।
"...: यथा वने तस्मिंस्तस्य वर्त्मसु वागुराः॥")
...कः, पुं, (वागुरया चरतीति। वागुरा+
"...रति।" ४।४।८। इति ठक्।) व्याधः।
...रया मृगादीन् बध्नाति यः। इत्यमरः।
।१५।४॥ (यथा, रघुः। ९।५३।
"मृगवागुरिकैः प्रथमास्थितं
व्यपगतानलदस्यु विवेश सः॥")
...दः, पुं, (वाचा गोदते क्रीड़तीवेति। गुद
...ड़ायाम्+कः।) पक्षिविशेषः। इति
...काण्डशेषः॥ एतद्योनिकारणं यथा,—
"...ियं तित्तिरिर्हृत्वा चौमं हृत्वा तु दर्द्दुरः।
...मांसतान्तवं क्रौञ्चो गोधा गां वाग्गुदो
गुड़म्॥"
इति मानवे १२ अध्यायः॥
...लिः, पुं, (वाचा गुडति रक्षतीति। गुड़+
"...गुणधातु कित्।" उणा० ४।११८। इति
...। स च कित्।) ताम्बूली। राज्ञां ताम्बूल-
...ा। इति शब्दमाला॥
...लिकः, पुं, (वागुलि+स्वार्थे कन्।)
...मूलदः। इति त्रिकाण्डशेषः॥
...दरिद्रः, त्रि, (वाचि दरिद्र इव।) मित-
...षी। तत्पर्य्यायः। वाग्यः २। इति शब्द-
...ला॥
...दलं, क्ली, (वाचां दलमिव।) ओष्ठाधरौ।
...ति त्रिकाण्डशेषः॥
...दुष्टः, पुं, (वाचा वाक्यमात्रेण दुष्टः।)
...ालः। इति जटाधरः॥

वागदुष्टः, त्रि, (वाचा शुद्धेऽपि वस्तुनि अशुद्ध-
रूपत्वदुर्व्वाक्येन दुष्टः।) वाचा दोषयुक्तः।
यथा,—
"वाग्भावदुष्टाश्च तथा दुष्टैर्द्दोषहतास्तथा।
वाससा चावधूतानि वर्ज्ज्यानि श्राद्धकर्म्मणि॥"
इति श्राद्धतत्त्वम्॥ *॥
तदन्नभक्षणप्रायश्चित्तम्। तत्र शङ्खः।
"वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते।
भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रन्तु व्रती भवेत्॥"
एतदभ्यासे व्रती यावकेन तत्र द्वादशपणा
देयाः। इति प्रायश्चित्तविवेकः॥
वागदेवता, स्त्री, (वाचां देवता।) सरस्वती।
यथा,—
"पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षः-
स्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्ग-
स्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ता-
म्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-
माश्रये॥"
इति तन्त्रसारः॥
वागदेवी, स्त्री, (वाचां देवी।) सरस्वती। इति
त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्।
५। १६३।
"द्विजस्तयोर्नायकाख्यो गौरीशसुरसद्मनोः।
चातुर्विद्यं कृतस्तेन वाग्देवी कुलमन्दि-
रम्॥")
वाग्मी, [न्] त्रि, (प्रशस्ता वागस्त्यस्येति।
"वाचो ग्मिनिः।" ५। २। १२४। इति
ग्मिनिः।) वक्ता। इत्यमरः॥ (यथा, काम-
न्दकीयनीतिसारे। ४। १५।
"वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान्
वशी॥")
पटुः। इति मेदिनी। ने, १३०॥
वाग्मी, [न्] पुं, (प्रशस्ता वागस्त्यस्येति। वाच्+
ग्मिनिः।) सुराचार्य्यः। इति मेदिनी। ने,१३०॥
(पुरुवंशीयमनस्योः पुत्रविशेषः। यथा, महा-
भारते। १। ९४। ७।
"शक्तः संहननो वाग्मी सौवीरीतनयास्त्रयः।
मनस्योरभवन् पुत्राः शूराः सर्व्वे महारथाः॥")
वाग्यः, त्रि, (वाचं परिमितवाक्यं याति गच्छ-
तीति। या+कः।) वाग्दरिद्रः। इति शब्द-
माला॥ निर्व्वेदः। कल्पः। इत्यजयः॥
वाग्यतः, त्रि, (वाचि वाक्ये यतः संयतः।)
वाक्संयतः। यथा,—
"प्रत्यहं नियतं काममालभो व्रतमादिशेत्।
प्रायश्चित्तसमासीनो वाग्यतस्त्रिसवनं स्पृशेत्॥"
इति प्रायश्चित्ततत्त्वधृतशङ्खलिखितवचनम्॥
वाग्यामः, त्रि, अशक्त्यादिना वाचं यच्छति यः।
इति सिद्धान्तकौमुदी॥
वाङ्कः, पुं, समुद्रः। इति त्रिकाण्डशेषः॥

वाङ्मती, स्त्री, (स्तुतिरूपा वागस्त्यस्या इति।
वाच्+मतुप्। ङीप्।) नदीविशेषः। यथा,—
"हिमाद्रेस्तुङ्गशिखरात् प्रोद्भूता वाङ्मती नदी।
भागीरथ्याः शतगुणं पवित्रं तज्जलं स्मृतम्॥
तत्र स्नात्वा हरेर्लोकानुपस्पृश्य दिवस्पतेः।
त्यक्त्वा देहं नरा यान्ति मम लोकं न संशयः॥"
इति वाराहे गोकर्णमाहात्म्ये जलेश्वरमाहात्म्य-
वर्णननामाध्यायः॥
वाङ्मयं, त्रि, (वाक्स्वरूपम्। वाच्+मयट्।)
वाक्यात्मकम्। यथा,—
"स्मरसत्तमभृगोर्लान्तैरेभिर्द्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥"
अपि च।
"पद्यं गद्यमिति प्राहुर्व्वाङ्मयं द्विविधं बुधाः।
प्रागुक्तलक्षणं पद्यं गद्यं संप्रति गद्यते॥"
पद्यं यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्॥"
गद्यं यथा।
"अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।
तद्धि वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥
भवेदुत्कलिकाप्रायं समासाढ्यं दृढ़ाक्षरम्।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम्॥"
इति छन्दोमञ्जरी॥ *॥
वाङ्मयपापानि यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥"
तथा परुषवचनमपवादः पैशुन्यमनृतं वृथा-
लापो निष्ठुरवचनं इति वाङ्मयानि षट्।
परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचार-
परिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं
परुषम्।
"यथान्यत् क्रोधसन्तापभयसंजननं वचः।
परुषं तच्च विज्ञेयं यथान्यच्च तथाविधम्॥
अश्लीलानि तु मार्गे च काले आक्रन्दयति च।
प्रशंसानिन्दनं दैवात् परुषाणि विनिर्द्दिशेत्॥"
तेषामेव परुषवचनानां परोक्षमुदाहरणं
अपवादः। गुरुनृपतिप्रभुआदिमित्रमहार्यो
व्यर्थोपघातार्थं दोषोमाख्यानं पैशुन्यम्।
अनृतं द्विविधं असत्यमसत्यचेति।
"देशराष्ट्रप्रसङ्गाश्च परार्थपरिकल्पनात्।
नर्म्मदोषप्रसङ्गाच्च भाषणं व्यर्थभाषणम्॥
गुह्याङ्गाभिधसंज्ञानां भाषणं निष्ठुरं विदुः।
यद्वाद्य वचो नीचश्रोतुर्म्मर्म्मभिदुत्कारणम्॥
इत्येवं यद्विक्लत्य दुर्नाम्नश्च भाषणात्।
इह चामुत्र च ऋसपं प्रतिपद्यते॥"

प्रशंसया निन्दनं प्रशंसानिन्दनम्। अत्र चतुर्विधपङ्क्तिविषयोरविरोधः। समपत्नासमपत्नभेदानादरेण पारव्यापवादयोरैक्यात् निरुद्धस्य पदत्रासम्भावाच। असमङ्गप्रतापपर्यवभाषमयोः पर्यायत्वान्नार्थान्तरम्। इति तिथ्यादितत्त्वम्॥

वाङ्मयी, स्त्री, (वाङ्मय + + ङीप्।) सरस्वती। इति केचित्॥

वाङ्मुखं, क्ली, (वाचां मुखमिव।) उपन्यासः। इत्यमरः। १। ६। ८।

वाचंयमः, पुं, (वाचो वाक्यात् यच्छति विरमतीति। यम उपरमे + "वाचि यमो व्रते।" ३। २। ४०। इति खच्। "वाचंयमपुरन्दरौ च।" ६। ३। ६८। इति अमन्तत्वं निपातनं।) मुनिः। इत्यमरः। २। ७। ४२। मौनव्रती। इति केचिदिति भरतः। (यथा, छान्दोग्योपनिषदि। ५। २। ८।

"वाचंयमोऽप्रत्याहः स यदि स्त्रियं पश्येत् समृद्धं कर्मेति विद्यात्।")

वाचः, पुं, (वाचयति गुणानिति। वच् + णिच् + अच्।) मत्स्यविशेषः। वाचा इति भाषा। (यथा,—

"ईलिनी त्रितपौयूषो वाचो वाचामगोचरः।
रोचिनीनो हितः प्रोक्तो मद्गुरो मद्गुरोः प्रियः॥"
इत्युद्भटः।)

अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः।

वाचकः, पुं, (वक्ति अभिधावृत्त्या बोधयत्यर्थान् इति। वच् + ण्वुल्।) शब्दः। यथा। प्राख्ये शब्दस्तु वाचकः। इत्यमरः। ६ वाचके। प्रत्ययस्य वरेषार्थस्य वाचको गवादिरूपः शब्दो वाचकोऽभिधायको न शब्द उच्यते। लोके तु संस्कृतोऽसंस्कृतः शब्द उच्यते। वक्तीति वाचकः शब्दः। इति भरतः। तत्पर्यायः। वाचकः। शब्दाभिधायी अभिधाभिधाने वाचको ध्वनिः। इत्याह कुन्दरिणवेति त्रिकाण्डशेषः। ०। (तत्पर्यायं बहुलं मुग्धबोधटीकायां दुर्गादासः।

"वाचात् बहुविधं योऽर्थमभिधत्ते स वाचकः॥"

वाचयतीति। वच् + णिच् + ण्वुल्।) कथकः। पुराणादिपाठकः। यथा,—

"श्रावकं वाचकं विद्वान्ब्राह्मणं समाहरत्।
कुलान्तरं काहावत् वाचकाग्रजं भवेत्॥"

तथा।

"[illegible] [illegible] [illegible] विदितः।
[illegible] कुमारीवाचकः [illegible]॥
[illegible] न तु सर्वं न मुखां वारयेत् [illegible]।
[illegible] [illegible] [illegible] [illegible]॥
[illegible] [illegible] [illegible] नाद्भुतम्॥"
[illegible] वाचकौ [illegible]।

"वाचकः पूजितो येन प्रथमास्तस्य देवताः॥"

तथा।

"श्रुत्वा पर्वसमाप्तिञ्च पूजयेद्वाचकं बुधः।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम्॥"

तथा।

"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम्॥
बुध्यमानः सदार्थं ग्रन्थार्थं कृत्स्नशो नृप।
ब्राह्मणादिषु सर्वेषु ग्रन्थार्थं चार्पयेन्नृप॥
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते॥"

तथा।

"सप्तस्वरसमायुक्तं काले काले विशाम्पते।
प्रदर्शयन् रसान् सर्वान् वाचयेद्वाचको नृप॥"
इति तिथ्यादितत्त्वम्॥

वाचनं, क्ली, (वच् + णिच् + ल्युट्।) पठनम्। यथा,—

"सुक्षेत्रानन्यचित्तेन पठितव्यं प्रयत्नतः।
न कार्यासक्तमनसा कार्यं कोशस्य वाचनम्॥"
इति वाराहीतन्त्रम्॥

तथा।

"दानवाचनान्वारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात्॥" इति कात्यायनसूत्रम्॥ (प्रतिपादनम्। यथा, साहित्यदर्पणे १० परिच्छेदे।

"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्॥")

वाचनकं, क्ली, (वाचनेन कायतीति। कै + कः।) प्रहेलिका। इति हारावली। १५२।

वाचस्पतिः, पुं, (वाचसां सर्वविद्यारूपवाक्यानां पतिः। अभिधानात् षष्ठ्या अलुक्।) बृहस्पतिः। इति शब्दरत्नावली॥

वाचस्पतिः, पुं, (वाचः पतिः। "षष्ठ्याः पतिपुत्रेति।" ८।३।५३। इति षष्ठीविसर्गस्य सः।) बृहस्पतिः। इत्यमरः। १। ३। २४। (यथा, कुमारे। २। ३०।

"वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्॥"

शब्दपतिपालके, त्रि। यथा, ऋग्वेदे। १०। १६६। ३।

"वाचस्पते निषेधे मान्यथा मदधरं वदात्॥"
"हे वाचस्पते वाचः शब्दस्य पालयितरिन्द्र॥"
इति तद्भाष्ये सायणः।)

वाचा, स्त्री, (वाच् + भागुरिमते टाप्।) वाक्। इति त्रिकाण्डशेषः। (यथा, कालके।

"[illegible] मातृ रक्षोनिवासाद्रोहचर्याः।
[illegible] इदमाशी [illegible] वाचा विद्या गिरा॥"

[illegible], [illegible]। ३। ३८। "[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]॥")

वाचाटः, त्रि, कुत्सितं बहु भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५। २। १२५। इति आटच् प्रत्ययः। इत्यमरः। ३। १। ३६। (यथा, मनुः। ८।

"गौडदेव [illegible]
[illegible] वाचोमिश्रा [illegible]

वाचालः, त्रि, (वाच् + "आलजाटचौ बहुभाषिणि" इति आलच्।) [illegible]
जल्पाकः २ वाचाटः।
भाषिण्यपि [illegible]
वाचालो [illegible]
श्लोकार्द्धपर्याये [illegible]
वाचालासुपर्यवेषि [illegible]
दिति मद्दीकायां भरतः।
सरित्सागरे। ४०। ११।
"वाचालैः कलह [illegible]

वाचिकं, त्रि, (वाच् + ठक्।) [illegible]
यथा,—
"शरीरजैः [illegible]
वाचिकैः [illegible]
इति [illegible]

अपि च।
"कायिकं वाचिकञ्चैव [illegible]
एकत्रस्थेन तत् सर्वं [illegible]
इति [illegible]

अन्यच। कायिकं [illegible]
आचार्येण कर्म [illegible]
इति मुग्धबोधटीकायां दुर्गा[illegible]
वाक् + "वाचो व्याहृता[illegible]
इति ठक्। सन्देशोक्तिः [illegible]
१६६। यथा, राजतरङ्गि[illegible]
"[illegible] वाचिकं [illegible]

वाचिकः, पुं, (वाचा विज्ञा[illegible]
वाक्यारम्भः। यथा,—
"आलापश्च विलापश्च [illegible]
अनुलापोऽपलापश्च सन्देश[illegible]
अपदेशोपदेशौ च निर्देशो [illegible]
कौर्त्तिता [illegible]

वाचिकपत्रं, क्ली, (वाचिकस्य [illegible]
[illegible]। संवादपत्रम्। [illegible]

वाचिकहारकः, पुं, ([illegible]
हारकः।) [illegible]। [illegible]
([illegible]। इति [illegible]

वाचोयुक्तिः, त्रि, ([illegible]
इत्यमरटीकायां [illegible]
[illegible] [illegible]। "[illegible]
[illegible]।" ६। ३। ४१। [illegible]
[illegible] [illegible]। [illegible]

वाचोविग्लापिन्, त्रि, ([illegible]
[illegible] [illegible]।) [illegible]। [illegible]

NOTICE.

AGENTS
Trubner & Co., London.

AGENT
Pandit Jaistaram Mukundaji, Bombay

SIR RADHAKANTA'S IMPROVED AND ENLARGED SABDAKALPADRUMA.

A Sanskrit Encyclopedic Lexicon.

r edition is issuing in monthly parts of 8 formes (Royal quarto, 32 pages) each, and we mplete it in four years generally a fasciculus will contain double parts or numbers.

g the book within reach of the general public, we offer it for sale to those who register them-ubscribers in India at the lowest possible price of one Rupee for each part, and in countries out 3s. for each part. The number of parts in which the new Appendix would be completed, cannot ssed, they will bear the same price except to those who had subscribed before 1st January 1888. subscribers in India, if they choose to pay in advance, can obtain the whole work exclusive of the for 75 Rupees, and in countries out of India, for £8. The advance payments being exclusive of Postage. scribers in and out of India, the price for each part will be Rs. 1-8 and 4s. respectively. Muffussil re requested to send Rs. 10 in advance to ensure their enlistment as subscribers, or in lieu of such to order despatch of books to them by value payable parcels. We make it a rule to defer supplying bers any part or parts of the work till all arrears due for the preceding ones, are paid.

emittances and communications, except where special Agents may be preferred, are to be made to i Charan Vasu, No. 71, Pathuriaghata Street, Calcutta. Subscribers are requested to see that receipts r (when sent to him) bear his seal and signature.

nclude this announcement by an earnest appeal to all students of Sanskrit, Savants, Princes and rons of learning in India, Europe and America, to help us to lay before them a grand Repertory of ran learning replenished with new treasures. We specially urge our claim to the aid of our brother n all parts of our country, who cannot but feel it a duty to encourage attempts to preserve and improve t unique monument of the genius, scholarship, industry and philanthropy of our great patrirach of and zealous friend of education whom, we loved to call as the Hindu of Hindus. We hope that by il improvements and enlargement of its scope, the Sabdakalpadruma of Raja Sir Radhakanta would be- e Encyclopædia Indica of the future, which, it would be the common aim of all to see accomplished.

HE SABDAKALPADRUMA OFFICE,
71, *Pathuriaghata Street,*

VARADA PRASADA VASU,
HARI CHARANA VASU,

[illegible]

… घोटकः । इत्यमरः । २ । ८ । ४३ ॥ (यथा, भागवते । १० । ५१ । १९ ।
"[illegible] वाजिभिः [illegible]" …)

… इति मेदिनी । सं, १९ ॥
… इति विश्वः ॥

…, क्ली पुं, (वाजयतं पुनं वा [illegible] ।) [illegible] । इत्यमरभरतौ । स तु [illegible] । यथा । [illegible] वाजिपक्ष । [illegible] ॥

…ी [न्], पुं, (वाजं …स्य इति । [illegible] + णिनिः ।) [illegible] । इति शब्दरत्नावली ।

[illegible]

"[illegible]
[illegible]तः ॥")

वाजिदन्तकः, पुं, (वाजिनो दन्त इव पुष्पं यस्य ।) वासकः । इति शब्दमाला ॥

वाजि[illegible]कः, पुं, ([illegible] ।) [illegible] ॥

वाजिनं, क्ली, [illegible] । इति वैद्यक[illegible] । [illegible] इति [illegible] । (यथा, [illegible] ।
"[illegible] वाजिनं [illegible] ।"
[illegible] यथा,—
"[illegible]
[illegible]
[illegible]
[illegible] ॥"
इति भावप्रकाशः पूर्व्वखण्डे प्रथमे भागे ॥
[illegible] । यथा, याज्ञवल्क्यसंहितायाम् । [illegible]
"दासी वृषम् वाजिनम् ।"
"वाजिनं दधि ।" इति महाभाष्ये [illegible] ॥
पुं, अश्वः । यथा, ऋग्वेदे । १० । ७१ । ५ ।
"नैनं हिन्वन्त्यपि वाजिनेषु ॥"
"वाच् इमा ईश्वरा देवाः ।" इति सायणः ॥)

वाजिनी, स्त्री, अश्वगन्धा । घोटकी । तस्याः पर्य्यायः । वडवा २ वामी ३ प्रसवा ४ अश्विनी ५ । अस्याः क्षीरगुणाः ।
"अश्व्याः क्षीरन्तु रूक्षोष्णं लवणं दीपनं लघु ।
दृष्टमानकरं बल्यं शोषघ्नं वातजित् परम् ॥"
तद्दधिगुणाः ।
"आश्वं दधि स्यान्मधुरं कषायं
कफानिलघ्नं नयनामयारि रूक्षम् ।
भावानलदं दीपनकारि मेघ-
दोषापहं तत् कथितं पृथिव्याम् ॥" ॥
तन्नवनीतगुणाः ।
"आश्वन्तु नवनीतं स्यात् कषायं कफकामजित् ।
[illegible]
[illegible] ॥"
[illegible] ।

[illegible]
[illegible] ॥"
[illegible] ॥

[illegible]

वाजी [न्], पुं, (वाजो वेगोऽस्त्यस्येति । वाज + इनिः ।) घोटकः । (यथा, रघुः । ३ । ४३ ।
"[illegible]
[illegible] वाजिनः ॥"
वाजः पक्षोऽस्त्यस्येति ।) वाणः । पक्षी । [illegible] । इति मेदिनी । (वहति [illegible] । वह + णिनिः । त्रि, [illegible] यथा, याज्ञवल्क्यसंहितायाम् । [illegible] ।
"वाजी [illegible]
[illegible]म् ॥"
"इयति वाजी । [illegible] ।" इति महाभाष्ये [illegible] । [illegible] यथा, ऋग्वेदे । १ । ४ । १४ ।
"तमीमहे [illegible] वाजिनं हवम् ।"
"वाजिनं यजस्वन्तम् ।" इति तद्भाष्ये सायणः ।
वाजः पक्षोऽस्त्यस्येति । पक्षविशिष्टः । यथा, भागवते । ४ । ७ । १९ ।
"सुपर्णेन उपानीतचार्व्वङ्घ्रि सोत्र-
वाजिना ॥")

वाजीकरणं, क्ली, (अवाजी वाजीव क्रियतेऽनेन । कृ + ल्युट् । अभूततद्भावे च्विः ।) वीर्य्यवृद्धिकरम् । इति राजनिर्घण्टः । वाजीकरणद्रव्यलक्षणमाह ।
"यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम्
तद्वाजीकरमाख्यातं मुनिभिर्भिषजां वरैः ॥"
अत्र प्रसङ्गात् क्लैब्यस्य लक्षणं संख्यां निदानञ्चाह ।
"क्लीवः स्यात् सुरताशक्तस्तद्भावः क्लैब्यमुच्यते ।
तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते

तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नॄणां क्लैब्यं समुपजायते ॥
द्वेष्यस्त्रीसंप्रयोगाच्च क्लैब्यं तन्मानसं स्मृतम् ।"
तैस्तैर्भावैर्भयशोकक्रोधादिभिः । अहृद्यैः हृदयाहितैः दुःखदत्वात् । क्षते पीड़िते अवसन्ने इति यावत् । ध्वजः शिश्नः । पतति न मुन्नमति । संप्रयोगो मैथुनम् ॥ १ ॥
"कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
पित्ताच्छुक्रक्षयो दृष्टः क्लैब्यं तस्मात् प्रजायते ।"
कट्वादीनामतिमात्रेण सेवनेन पित्तेन शुक्रस्य दग्धत्वात् क्लैब्यं भवति । पित्तजमेतद्द्वितीयम् ॥ २ ॥
"अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ।"
शुक्रक्षयजं तृतीयम् ॥ ३ ॥
"महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत् ॥ ४ ॥
वीर्य्यवाहिशिराच्छेदान्मेहनानुन्नतिर्भवेत् ॥ ५ ॥
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्य्यतः ।
षष्ठं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् ।"
बलिनः पुष्टस्य पुरुषस्य क्षुब्धमनसः कामात् सञ्चलितस्य । मनसः ब्रह्मचर्य्यतो निरोधात् क्लैब्यं भवति ॥ ६ ॥
"जन्मप्रभृति यत् क्लैब्यं सहजं तद्धि सप्तमम् ।" ७
असाध्यं क्लैब्यमाह ।
"असाध्यं सहजं क्लैब्यं मर्म्मच्छेदाच्च यद्भवेत् ।"
मर्म्मच्छेदात् वीर्य्यवाहिशिराच्छेदात् ।" * ।
अथ क्लैब्यस्य चिकित्सायां वाजीकरणविधिमाह ।
"नरो वाजीकरान् योगान् सम्यक्शुद्धो निरामयः ।
सप्तत्यन्तं प्रकुर्व्वीत वर्षादूर्द्ध्वन्तु षोडशात् ॥
न च वै षोडशादर्व्वाक् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अयद्दुग्रपरंप्राप्य घोराश्चातीवदुर्ल्लयाः ।
अकालमरणञ्च स्याद्भजतस्त्रियमन्यथा ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नराणां बहुभार्य्याणां विधिर्वाजीकरो हितः ॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् ।
योषित्प्रसङ्गात् क्षीणानां क्लीवानामल्परेतसाम् ।
हिता वाजीकरा योगाः प्रीणयन्ति बलप्रदाः ।
एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया ।"
वाजीकराण्याह ।
"भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्राभिरामाश्च त्वचः स्पर्शसुखावहाः ।
यामिनी चेन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा स्रजः ।
गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ।
मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम् ।
माक्षीकधातुमधुपारदलोहचूर्णं
पथ्याशिलाजतुविडङ्गघृतानि लिह्यात् ।
एकान्नविंशतिदिनानि गदार्दितोऽपि
सोऽशीतिकोऽपि रमयेत् प्रमदां युवेव ॥
गत्वा विक्लवमानो निशि पयसि पायसम् ।
गोधूमचूर्णञ्च तथा सितामधुघृतान्वितम् ।
भुक्त्वा हृष्यति वीर्य्योऽपि दशदारान् व्रजत्यपि ।"
अथ रसाला ।
"दध्नोऽर्द्धाढ़कमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः प्रस्थं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्माषकान् ।
एलाया अपि चतुर्थकं मरिचतः कर्षं लवङ्गं तथा धृत्वा शुभ्रपटे शनैः करतलेनोन्मथ्य विस्रावयेत् ।
मृद्भाण्डे मसृणाभिचन्दनरसमृगमदैरगुरुधूपिते
कर्पूरेण सुगन्धिकं तदखिलं संशोध्य संस्थापयेत् ।
सस्यार्थं मधुरेश्वरेण रचिता रुचिरा रसाला स्वयं भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ * ॥
गोक्षुरेक्षुरबीजानि वाजिगन्धा शतावरी ।
मुषली वानरीबीजं यष्टी नागबला बला ॥
एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्जितम् ।
सितया मोदकं कृत्वा भक्ष्यं वाजीकरं परम् ॥
चूर्णाद्दशगुणं क्षीरं घृतं चूर्णसमं स्मृतम् ।
सर्व्वतो द्विगुणं खण्डं स्याद्देयविधिवद्यथा ॥
वाजीकराणि भूरीणि संग्रह्य रचितो यतः ।
तस्मादमुष्य योगेषु योगोऽयं प्रवरो मतः ।"
रतिवल्लभो मोदकः ॥ * ॥
"पिप्पलीलवणोपेते वस्ताण्डे घृतसाधिते ।
कच्छपस्याथ वा खादेत् तु वाजीकरे ध्रुवम् ॥
पूर्वं दधिकदेशं दशपलोन्मानं श्लक्ष्णं कर्त्तयेत्
तच्छिन्नं जलयोगतो मृदुतरं संकुट्य चूर्णीकृतम् ।
सचूर्णं पटशोधितं वसुगुणे गोशुद्धदुग्धे पचेत्
गव्याज्याञ्जलिसंयुतेऽतिनिविड़े दद्यात्तुलार्द्धां सिताम् ।
पक्वं तन्मृदुपावकात् क्षितितलं प्रतिनयेत् तस्मिन् पुनः प्रक्षिपेत्
दद्यात् तद्भुदराहवामि षट्कुषा क्वाथादरात् संहिताः ।
एला नागबला बला सचपला जातीफला- लिङ्गिका
जातीपत्रलवङ्गपत्रचित्रकयुतं तद्य त्वचा संयुतम् ।
विश्वाचीरणवारिवारिदवरा ब्राह्मी वरी वानरी-शाखा शेषरगोक्षुराश्च मुषली खर्ज्जूरिका चोरिका ।
धान्याकं सकशेरुकं समधुकं शृङ्गाटकं जीरकं पृथ्वीकाजयवानिका वरटिका मांसी मिसि-मैथिका ॥
कस्तूरीच विदारिकाथ मुषली गन्धर्व्वगन्धा तथा
कर्पूरं करिकेशरं समरिचञ्चारस्य बीजं नवम् ।
बीजं शाल्मलिसम्भवं करिकणा बीजञ्च राजीवजं

चैन्नं चन्दनञ्च ...
सर्व्वेषामि ...

तुल्यं पञ्चगुणमद्गोदकं
कस्तूरी घनसारचूर्णमतुलं ...
पश्चादस्य तु मोदकान् विरचयेत्

तान् मोदकानि सदा

पूर्णीकारयुते घटे परिवर्त्तं

नित्यं श्रीरतिवल्लभाख्यममिं ...

दीप्ताग्निर्म्मन्मथात् सदा विरहिते

वृद्धो योऽपि ...

वसुगुणे अष्टगुणे । पञ्जिरहेदरात्
पवमानपवनमितम् । संहिताः
नागबला गुरुसकरी ...
चपला वहंक्रियाद्र तथा ...
पिप्पली । जातीफलं जात्यै ।
शुण्ठी । वीरणं उशीर ...
वारि सुगन्धवालकं । वारिद मुस्ता ।
त्रिफला ब्राह्मी-ब्रह्मशोभा ।
वानरी कपिकच्छूः तस्या बीजं शाखा
कोकिलाक्षः तस्य बीजम् ।
बीजम् । मुषली खर्ज्जूरिका ।
चोरिका चोरी । पृथ्वीका ...
इति लोके । वरटिका वरे इति ...
मेषी कर्कः स्याद्गेयकोषो ...
जटामांसी । मिसिः शौफः ।
गन्धा तस्या मूलम् । बीजं ...
सारः कर्पूरः । विश्वप्रभावात् ...
रतिवल्लभाख्यपूगपाकः ॥ * ॥
"एतस्मिन् रतिवल्लभे यदि पुनः ...

धुस्तूरस्य तु बीजमर्द्धकरभा ...

सम्याकूपलकं तथा ...

चूर्णार्द्धं विजया तदा च हि ...

इति मद ...

"रक्तपित्ताधिकारोक्त. ...
रक्तपित्तादिरोगघ्नो महावाजीकर ...
मध्याम्लस्य रसं श्रोय सितामाढ़क ...
घृतप्रस्थमिदं दद्याभागस्य ...
मरिचं कुङ्कुमोन्मानं पिप्पलीश्च ...
सलिलस्याढ़कं दत्त्वा सर्व्वमेकत्र ...
पचेत्तनुन्दवसे पात्रे दारव्या ...

ंगो विपेचन चलीभूतेऽवतारिते ॥
ं चीरकं पत्रं चित्रकं मुस्तकं त्वचम् ।
ीरकमाद्य चन्द्रिकं नागकेशरम् ॥
ोर्ण लवङ्गञ्च पृथक् जातीफलं पलम् ।
ीति प्रदद्याच मधुन: कुडवद्वयम् ॥
होमनाद्नीक् पलमात्रमिदं नर: ।
: नियमा नाम मात्रा खादेद्यथानलम् ॥
: सेवनादस्य वाजीव सुरते भवेत् ।
बलवान् पुष्टो हृष्टो नित्यं निरामय: ॥
ी नाशयेदेव चयं श्वासमरोचकम् ।
रतञ्च पित्तञ्च रक्तपित्तञ्च पाण्डुताम् ॥"
ीरकं नानाग्रैला । इति आम्रपाक: ॥
र्थात गोक्षुरचूर्णं छागक्षीरेण साधितं
समधु ।
चयति लाचं यज्जनितं कुप्रयोगेण ॥
ेन चन्दनादिस्तु चन्दनं रक्तचन्दनम् ।
मय कालीयागुरुकृष्णागुरूण्यपि च ॥
र: सरल: पद्मकं तुणिकोऽपि च ।
ी म्रगनाभिश्च लताकस्तूरिकापि च ॥
ः कुङ्कुमं नव्यं जातीफलकमत्र च ।
पिचं लवङ्गञ्च सूक्ष्मैला महती च सा ॥
लफलकं त्वक् च पत्रकं नागकेशरम् ।
कच तथोशीरं मांसी दारु सितापि या ॥
कर्पूरकश्चापि शैलेयं भद्रमुस्तकम् ।
का च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ॥
ा नखश्च रालश्च धातकीकुसुमं तथा ।
पर्णश्च मञ्जिष्ठा तगरं सिक्थकं तथा ॥
नि प्रायमाणानि कल्कीकृत्य शनै: पचेत् ।
प्रस्थमितं सम्यक् एतत्पात्रे शुभे क्षिपेत् ॥
ाभ्यक्तगात्रस्तु वृद्धोऽशीतिसमोऽपि य: ।
भवति शुक्राढ्य: स्त्रीणामत्यन्तवल्लभ: ॥
ापि लभते गर्भं षण्ढोऽपि तरुणायते ।
ज: पुत्रमाप्नोति जीवेच शरदां शतम् ॥
ादिमहातैलं रक्तपित्तं चयं ज्वरम् ।
प्रस्वेददौर्गन्ध्यं कुष्ठं कण्डुं विनाशयेत् ॥"
ं वकम् इति लोके । कालीयं कलम्बक
लोके । लताकस्तूरिका मुसुकदाना इति
के । कक्कोलफलस्याभावे जातीपुष्पं ग्राह्यम् ।
ाभेऽपि लवङ्गं ग्राह्यम् । दारुशिला दारु-
ी । शैलेयं छरा इति लोके । श्रीवास:
री इति लोके । ग्रन्थिपर्ण: गाठिवन् इति
के । चशीतिसम: चशीतिवार्षिक: । इति
दनादितैलम् ॥ * ॥
ीलानि कोशकच्छ्वा: कुडवमितानि स्वेदये-
च्छनकै: ।
े गोभवदुग्धे दुग्धं यावद्घनीकृतम् ॥
पहितानि च कृत्वा सूक्ष्मं संपेषयेत्तानि ।
ाटिकया लघुवटिका: कृत्वा गव्ये पचेदाज्ये ॥
ागुणितशर्करया वा वटिका: संपक्वया
लेप्या: ।
टिका माचिकमध्ये मज्जनयोग्येऽखिला:
स्थाप्या: ॥

पञ्चटङ्कमितास्तासु सायं प्रातश्च भक्षयेत् ।
अनेन शीघ्रद्रावी यो यश्च स्यात् पतितध्वज: ॥
सोऽपि प्राप्नोति सुरते सामर्थ्यमिति वाग्मिवत् ।
नानेन सदृशं किञ्चित् दृष्टं वाजीकरं परम् ॥"
इति वानरीवटिका ॥ * ॥
"आकारकरभा शुण्ठी लवङ्गं कुङ्कुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ॥
चूर्णयेदहिफेनञ्च तत्र दद्यात् पलोन्मितम् ।
सर्व्वमेकीकृतं माषमात्रं चौद्रेण भक्षयेत् ॥"
शुक्रस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीणां प्रीतिजनकं सेवेत निशि कामुक: ॥"
इति भावप्रकाश: ॥
(यथा च ।
"विदारीकन्दां शुभवीरुद्धयौ ।
काकोलिकाभीरुपुनर्नवे द्वे ।
शृङ्गाटकं मागधिका बला च
चूर्णं सिताढ्यं सितया प्रयोज्यम् ॥
जीर्णे पय: पायसमेव योज्यं
करोति पुंसां बलमेवमोज: ।
स्त्रीणां सहस्रं भजतेऽपि षण्ढो
मासद्वयेनापि च सेवमान: ॥"
इति हारीते चिकित्सास्थाने ४६ अध्याय: ॥
"वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
तुष्टि: पुष्टिरपत्यञ्च गुणवत्तत्र संश्रितम् ॥
अपत्यसन्तानकरं यत् सद्य: संप्रहर्षणम् ।
वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गना: ॥
भवत्यतिप्रिय: स्त्रीणां येन येनोपचीयते ।
तद्वाजीकरणं तद्धि देहस्योर्ज्जस्करं परम् ॥
धर्म्म्यं यशस्यमायुष्यं लोकद्वयरसायनम् ।
अनुमोदामहे ब्रह्मचर्य्यमेकान्तनिर्म्मलम् ॥
अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिण: ।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते ॥
कल्पस्योदग्रवयसो वाजीकरणसेविन: ।
सर्व्वेष्वृतुष्वहरहर्व्यवायो न निवार्य्यते ॥
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान् ।
घृततैलरसक्षीरशर्कराक्षौद्रसंयुतान् ॥
योगविद्योजयेत् पूर्व्वं क्षीरमांसरसाशिनम् ।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान् ॥
अच्छाय: पूतिकुसुम: फलेन रहितो द्रुम: ।
यथैकश्चैकशाखश्च निरपत्यस्तथा नर: ॥
सुललितमनमयत्नवचनं धूलिधूसरम् ।
अपि लालाविलमुखं हृदयाह्लादकारकम् ॥
अपत्यं तुल्यता केन दर्शनस्पर्शनादिषु ।
किंपुनर्यद्यशोधर्म्ममानश्रीकुलवर्द्धनम् ॥
शुद्धकाये यथाशक्ति वृष्य योगान् प्रयोजयेत् ।
शरेक्षुकुशकाशानां विदार्य्या वीरणस्य च ॥
मूलानि कण्टकार्य्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ शूर्पपर्ण्यौ शतावरीम् ॥
अश्वगन्धामतिबलामात्मगुप्तां पुनर्नवाम् ।
वीरां पयस्यां जीवन्तीं ऋद्धिं रास्नां त्रिकण्ट-
कम् ॥
मधुकं शालिपर्णीञ्च भागांश्चिपलिकान् पृथक् ।

माषाणामाढकञ्चैतद्विपचेत् साधयेदपाम् ॥
रसेनाढकशेषेण पचेत्तेन घृताढकम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढकाढकम् ॥
घृताच्चतुर्गुणं क्षीरं पेष्याणीमानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं फल्गूनि पिप्प-
लीम् ॥
द्राक्षां विदारीं खर्ज्जूरं मधुकानि शतावरीम् ।
तत्सिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥
शर्करायास्तुगायाश्च पिप्पल्या: कुडवेन च ।
मरिचस्य प्रकुञ्चेन एषगार्द्धपलोन्मितै: ॥
त्वगेलाकेसरै: श्लक्ष्णै: क्षौद्राद्विकुडवेन च ।
पलमात्रं तत: खादेत् प्रत्यहं रसदुग्धभुक् ॥
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकाद्भज: ॥
पृथक् स्वगुप्तामूलाच कुडवांशं तथा मधु ।
तुलार्द्धं शर्कराचूर्णात् प्रस्थार्द्धं नवसर्पिष: ॥
सोऽक्षमात्रमत: खादेद् यस्य रामाशतं गृहे ।
स्वात्मगुप्ताफलान् क्षीरे गोधूमान् साधितान्
हिमान् ॥
मांषान् वा सघृतक्षौद्रान् खादन् दधिपयो-
ऽनुप: ।
जागर्त्ति रात्रिं सकलामखिन्न: खेदयेत् स्त्रिय: ॥
बस्ताण्डसिद्धे पयसि भावितानसकृत्तिलान् ।
य: खादेत् ससितान् गच्छेत् स स्त्रीशतमपूर्व्ववत् ॥
चूर्णं विदार्य्या बहुश: स्वरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमृच्छति ॥"
"धात्रीफलरज: स्वरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनुपय: पिबेत् ॥
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ॥
पयोऽनुपानं यो लिह्यान्नित्यवेग: स ना भवेत् ॥"
"उच्चटाचूर्णमप्येवं शतावर्य्याश्च योजयेत् ॥
चन्द्रशुभ्रं दधिसरं ससितं षष्टिकौदनम् ।
पटे समार्ज्जितं भुक्त्वा वृद्धोऽपि तरुणायते ॥"
"आचरेच सकलां रतिचर्य्यां
कामशास्त्रविहितामनवद्याम् ।
देशकालबलशक्त्यनुरोधाद्-
वैद्यतन्त्रसमयोक्त्यविरुद्धाम् ॥
अभ्यङ्गमोद्वर्त्तनसेकगन्ध-
स्रक्चित्रवस्त्राभरणप्रकारा: ।
गान्धर्व्वकाव्यादिकथा प्रवीणा:
समस्वभावा वशगा वयस्या: ।
दीर्घिका स्वभवनान्तनिविष्टा
मञ्जरेणुमधुमत्तविहङ्गा: ।
नीलसानुगिरिकूटनितम्बे
काननानि पुरकण्ठगतानि ॥
दृष्टिसुखा विविधा तरुजाति:
श्रोत्रसुख: कलकोकिलनाद: ।
अङ्गसुखर्त्तुवशेन विभूषा-
चित्तसुख: सकल: परिवार: ॥
ताम्बूलमच्छमदिरा कान्ता कान्ता निशा
शशाङ्काङ्का ।

यद्यच्च किञ्चिदिष्टं मनसो वाजीकरं तत्तत् ।
मधुरस्वरमिव सोत्पलं प्रियायाः
कलरणनापरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या
किसलयिनी लतिकेव पुष्पिताग्रा ॥
देशे शरीरे च न काचिदर्ति-
रर्थेषु नाप्योऽपि मनोविघातः ।
वाजीकराः सन्निहिताश्च योगाः
कामस्य कामं परिपूरयन्ति ।”
इति वाभटे उत्तरस्थाने ४० अध्यायः ॥

तथाच ।
“वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान् ।
तदायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ॥
पुत्रस्यायतनं ह्येतद्गुणाश्चैते सुताश्रयाः ।
वाजीकरणमग्र्यञ्च क्षेत्रं स्त्री या प्रहर्षिणी ॥
इष्टा ह्येकैकशोऽप्यर्थाः परं प्रीतिकराः स्मृताः ।
किं पुनः स्त्रीशरीरे ये संघातेन व्यवस्थिताः ॥
संघातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।
स्त्र्याश्रयो हीन्द्रियार्थो यः स प्रीतिजननो-
ऽधिकः ।”
“अचिरदीपः शरःशुष्कमधातुर्धातुसन्निभः ।
नियतस्तृणपूलीति ख्यातः पुरुषाकृतिः ॥
अप्रतिष्ठश्च नग्नश्च शून्यश्चैकेन्द्रियश्च ना ।
मन्तव्यो निष्क्रियश्चैव यस्यापत्यं न विद्यते ॥
बहुमूर्त्तिर्बहुमुखो बहुव्यूहो बहुक्रियः ।
बहुचक्षुर्बहुज्ञानो बह्वात्मा च बहुप्रजः ॥
मङ्गल्योऽयं प्रशस्तोऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुशाखोऽयमिति च स्तूयते ना बहुप्रजः ॥
प्रीतिर्बलं सुखं वृत्तिर्विस्तारो विभवः कुलम् ।
यशो लोकाः सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ।
तस्मादपत्यमन्विच्छन् गुणांश्चापत्यसंश्रितान् ॥
वाजीकरणनित्यः स्यादिच्छेत् कामसुखानि च ।
माषाणामात्मगुप्ताया बीजानामाढकं नवम् ॥
जीवकर्षभकौ वीरां मेदाम्दृहीं शतावरीम् ।
मधुकञ्चाश्वगन्धाञ्च साधयेत् कुडवोन्मिताम् ॥
रसे तस्मिन् घृतप्रस्थं गव्यं दशगुणं पयः ।
विदारीणां रसप्रस्थं प्रस्थमिक्षुरसस्य च ॥
दत्त्वा मृद्वग्निना साध्यं सिद्धं सर्पिर्निधापयेत् ।
शर्कराया तुगाक्षीर्य्याः क्षौद्रस्य च पृथक्
पृथक् ॥
भागांश्चतुष्पलांस्तत्र पिप्पल्याश्चावपेत् पलम् ।
ततः पूर्णमतो कोष्ठात् ततो मात्रां प्रयोजयेत् ॥
स इच्छेदक्षयं शुक्रं शिवञ्चोत्तमं बलम् ।”
इति वाजीकरणं घृतम् ॥०॥
“शतावर्य्या बहुधाता दशानां प्रियङ्गना-
म्नया ।
शिशुमारस्य मत्स्यस्य भिषक् शुक्राणि संहरेत् ।
तस्मां सर्वैराहन्य कुलिङ्गस्य तथामपि ।
हंसचक्राह्व चूर्णानि चूर्णं मीनुरकैरव च ।
हन्तः पूतिका मांसाः ... वर्त्तिका
तथा ।
पुण्डरीकाश्च रिसिहा मत्स्याश्चैते पृथग्विधाः ।

एषां प्रयोगाद्दुष्यात्मा काश्मेनापूर्णरेतसा ।
शेफसा वाजिवद्याति यावदिच्छन् स्त्रियो
नरः ।”
इति स्त्र्यपूपालिकयोगः ॥०॥
“मण्डलैर्जातरूपस्य तस्या एव पयःशृतम् ।
अपत्यजननं सिद्धं सघृतक्षौद्रशर्करम् ॥”
“स्थानि मत्स्यमांसानि भृष्टानि शफरीश्च वा ।
तप्ते सर्पिषि यः खादेत् स गच्छेत् स्त्रीषु न
क्षयम् ॥
घृतभृष्टान् रसे छागे रोहितान् फलसाधिते ।
अनुपीतरसान् सिद्धानपत्यार्थी प्रभोजयेत् ।”
इति गर्भाधानकरो योगः ॥०॥
“नर्त्ते वै षोड़शाद्वर्षात् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्णसर्व्वधातुः स्त्रियो व्रजन् ।
उपतप्येत सहसा तड़ागमिव काजलम् ॥
शुष्करूक्षं यथाकाष्ठं जन्तुदग्धं विजर्ज्जरम् ।
स्पृष्टमाशु विशीर्य्येत तथा वृद्धस्त्रियो व्रजन् ॥
जरया चिन्तया शुक्रं व्याधिभिः कर्म्मकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ॥
क्षयाद्भयादविश्रम्भाच्छोकात् स्त्रीदोषदर्शनात् ।
नारीणामरसज्ञत्वादभिचारादसेवनात् ॥
व्रजतस्यापि स्त्रियो गन्तुं न शक्तिरुपजायते ।
देहसत्त्वबलापेक्षी हर्षः शक्तिश्च हर्षजा ॥”
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

वाञ्छा, स्त्री (वाञ्छनमिति । वाछि इच्छायाम् । गुरोश्चेत्यः । टाप् ।) आत्मवृत्तिगुणविशेषः । सा च द्विविधा यथा । उपायविषयिणी फलविषयिणी वा । फलं सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्यायः । इच्छा २ काङ्क्षा ३ स्पृहा ४ ईहा ५ तृट् ६ लिप्सा ७ मनोरथः ८ कामः ९ अभिलाषः १० तर्षः ११ । इत्यमरः ।१।७।२७॥ आकाङ्क्षा १२ कान्तिः १३ अयचय: १४ दोहदः १५ आभिलाषः १६ । इति शब्दरत्नावली ॥ वक् १७ रुचिः १८ मतिः १९ दोहलम् २० छन्दः २१ । इति जटाधरः ॥ (यथा, कथासरित्सागरे ।११।२७।
“सन्दिदेश च यद्यस्ति वाञ्छा मच्छ्यतां प्रति ।
तत्पुत्रात्तदिहैवैषा भवता प्रेष्यतामिति ।”)

वाञ्छितं, त्रि, (वाञ्छ + क्तः ।) अभिलषितम् । यथा,—
“अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लाम्बरधरां देवीं शुक्लाभरणभूषिताम् ॥
वाञ्छितं फलमाप्नोति स लोके नात्र संशयः ।
इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम् ।”
इति तन्त्रसारः ॥

वाञ्छिनी, स्त्री, (वाञ्छतीति । वाञ्छ + णिनिः । ङीप् ।) वाञ्छनीया नारी । तत्पर्य्यायः । कामुका २ कमनीया ३ । इति त्रिकाण्डशेषः ॥ वाञ्छनीयमात्रे, त्रि ।

वाटं, क्ली, वरण्डः । मार्गभेदः ।
यथा,—
“वाटः पथि द्वयो वाटं वर्ष्म ...

वाटः, पुं, (वटाते वेष्ट्यते इति । ... मार्गः । इतिस्थानम् । इति ...
अपि च ।
“सुखं निःसरणे वाटे ...
...
(वास्तु । मण्डपः । यथा,
“कृत्वं वरण्डं सगणं ...
निवेश्य निबद्धयशेषराटम्
वटस्येदमिति । वट + अण् । ...
त्रि । यथा, मनुः ।२।४५।
“ब्राह्मणो बैल्वपालाशौ ...
पैलवौदुम्बरौ वैश्यो ...

वाटशृङ्खला, स्त्री, (वाटोऽपि ... शाकपार्थिवादिवत् मध्यपदलोपः ... शृङ्खला । तत्पर्य्यायः । उमा ... वली ॥

वाटिका, स्त्री, (वटाते वेष्ट्यते ... रिति । वट वेष्टने + संज्ञायां ... अत इत्वम् ।) वास्तु । (यथा, ... सागरे ।७२।२०६।
“सा सागाय गते ...
...
प्रविश्य धात्रकरं ...
वाट्यालकः ।
इति शब्दचन्द्रिका ।

वाटी, स्त्री, (वट्यते वेष्ट्यते इति ... घञ् । गौरादित्वात् ङीष् ।) ... इति शब्दरत्नावली । कुटी । ... मेदिनी । टे, २८ । ग्रीवस्य ...
“वाटस्थो वेश्म भूर्ल ...

तस्या लक्षणादियथा,—
विश्वकर्म्मवचनम् ।
“के ते इषाः प्रशस्ताश्च ...
भद्रा भद्रप्रदाश्चापि तान् वदस्व ...
केषामकल्याणकरास्तु (प्रविरल ...
दिशि कुत्र जलं भद्रमशुभञ्च ...
द्वाराणाञ्च गृहाणाञ्च प्राकारा ...
भद्रप्रदश्च को वृक्षो दिशि कुत्र ...
किं प्रमाणं गृहाणाञ्च
मङ्गलं कुसुमोद्यानं दिशि कुत्र ...
प्राकारं किंप्रमाणञ्च परिखा ...
द्वाराणाञ्च गृहाणाञ्च प्राकारा ...
कस्य कस्य तरोः काष्ठं प्रशस्तं ...
अमङ्गलं वा केषां वा सर्व्वं ...
श्रीभगवानुवाच ।
आश्रमे नारिकेलञ्च ...

वातायुः, पुं, (वाते अयते गच्छतीति । अय + उण् ।) हरिणः । इति हारावली ॥

वाताटः, पुं, (वाते अटति भ्रमतीति । अट + अच् ।) वाताश्वः । इति हारावली ॥
(सूर्य्यस्याश्वे वाताश्वशब्दे ज्ञातव्यः ॥)

वाताश्व, पुं, (वातस्य इव । वातं अश्नाति भ्रमतीति । अश + क्विप् ।) सूर्य्याश्वः ।

वाताटी, स्त्री, (वाटीमटति भ्रमतीति । अट + अच् । गौरादित्वात् ङीष् ।) वात्याश्वः ।
इति शब्दरत्नावली ॥

वाद, ऋ ङ आस्वादे । इति कविकल्पद्रुमः ॥
(भ्वा० आत्म०-सक०-सेट् ।) ऋ, अववादृत् ।

दशः ॥ चतुर्थ्यां १० ... ११ ...
१९ ... २० ... २१ ...
इति वातव्याधयो यथा । ... इति शार्ङ्गधरः ॥

"यथा ...
...

हिमाद्रमज्जनात्तथा निधुवनाच धातुक्षयात्
मलादिरयधारणात् मदनशोकचिन्ताभयैः ।
अतिश्रमजशोषणात् मदशनातिमात्राशना-
दतीव भ्रमणाद्भुताततिविरेचनादामतः ।
पयोदसमये दिनव्ययदशोत्तशीतार्भयो-
र्नदामतिगतेऽपिसे शिशिरसंज्ञकालेऽपि च ।
इदं स्रोतांसि रिक्तानि पूरयित्वानिलो बली ।
करोति विविधान् रोगान् सर्वाङ्गैकाङ्गसंश्र-
याम् ।"

शमितश्चास वैपरीत्यं शोषसंक्षेप अपरिमित-मित्यर्थः । प्रकर्षेण मितमत्यर्थं वा अश्नन-मतिभुक्तं शाल्यादि । कतिचिदन्नानि सन्ति अन्यपि वातलानि । यत आह । गुणरत्नमालायाम् ।

नीवारस्त्रिपुटः कलीनचणकश्यामाकमुद्गाढकी-
निष्पावाश्च मकुष्टकश्च वरटा मल्लाधक:
कोद्रवः ।

इत्येते वातकरा इति शेषः । नीवारः प्रसाधिका तीनी इति लोके । त्रिपुटः खेसारी । कलीनः कलायः । निष्पावो राजमाषः । बोड़ा इति लोके । मकुष्टकः मोठ इति लोके । वरटा वरटिका वरै इति लोके । मल्लाधकः मसूरी इति लोके । पुरःपवनः प्राग्वातः । आमतः आमेन मार्गावरणात् । यत उक्तम् ।
वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।
पयोदसमये वर्षासु । नदामतिगतेऽपि शक्ति-रतीव जीर्णताङ्गति । इदं स्रोतांसीत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिस्त्वधादौ समये हेतुभूते बली अनिलः प्रवृद्धो वायुः करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते ।

"शिरोग्रहोऽपतन्त्रकं जृम्भार्दितं हनुग्रहः ।
जिह्वास्तम्भो गद्गदत्वं मिन्मिनत्वञ्च मूकता ।
वाचालता प्रलापश्च रसाज्ञानमनिज्ञता ।
बाधिर्यं कर्णनादश्च कर्णशूलं तथार्दितम् ।
मन्यास्तम्भोऽथ गृध्रसी बाहुशोषोऽपबाहुकः ।
चलिता चैव विश्वाची खञ्जवात उदीरितः ।
आध्मानञ्च प्रत्याध्मानं वाताष्ठीला प्रत्यष्ठीला ।
तूनी च प्रतितूनी च वङ्क्षणस्यैव च ।
आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च ।
उद्भूय स्तम्भं मूत्रनिग्रहो मलगाढ़ता ।
पुरीषस्यापहतिश्च ग्रहणी च ततः परः ।
कलायखञ्जता चापि खञ्जता पङ्गुता तथा ।
क्रोष्टुशीर्षकस्ती च वातकण्टक एव च ।
पादहर्षः पाददाहः आक्षेपो दण्डकाभिधः ।
वातपित्तलालाक्षेपकस्तथा दण्डापतानकः ।
अभिघातजनाश्चैव आयामो द्विविधः स्मृतः ।
आनाहश्च तथा वाह्यो धनुर्वातश्च कुब्जकः ।
अपतन्त्रोपतानश्च पक्षाघातोऽस्तिलाफ्रकः ।
कम्पः स्तम्भो व्यथा तोदो भेदश्च स्फुरणं तथा ।
रौक्ष्यं कार्श्यं च कार्ष्ण्यञ्च शैत्यं लोम्नाञ्च हर्ष-
णम् ।
अङ्गमर्देऽङ्गविभ्रंशः शिराकोच एव च ।
आक्षेपश्च भ्रंशो मलं मौषधप्रमचितमता ।
निद्रानाशः स्वेदनाशो बलहानिस्तथैव च ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः ।
एत एवाशीतिसंख्या रोगा योगेन रूढ़िनः ।
वातव्याधीति नामानो मुनिभिः परि-
कीर्तिताः ।"

एत एव शिरोग्रहादय एव । योगेन वातेन । वातादा व्याधिर्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह रूढ़िनः प्रसिद्धितः । शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञा प्रसिद्धा न तु वातज्वरादयः ॥ ० ॥
अथ वातव्याधिर्नाममात्रचिकित्सामाह ।
"मधुरलवणाम्लस्निग्धशोधानि
गुरुरविकरचलितस्वेदनमर्पणानि ।
दधनकलदर्दिकाभ्यङ्गमर्दनानि
प्रकुपितपवमानं शमनमेतानि कुर्युः ।"
इति भावप्रकाशः ॥ ० ॥
अपि च ।
"चलवृद्धिकराण्येव वायुबीजं निशामय ।
भोजनानन्तरं सद्यो गमनं धावनं तथा ।
छिदनं वह्निताप उच्चदुर्भावमैथुनम् ।
वृद्धस्त्रीगमनञ्चैव मनःसन्ताप एव च ।
अतिरूक्षमनाहारं युद्धं कलह एव च ।
कटुवाक्यं भयं शोकः केवलं वायुकारकम् ।
आमाशयचक्रे तत्राम निशामय तदौषधम् ।
पक्वरम्भाफलञ्चैव सदोर्द्ध प्रमंरोदकम् ।
नारिकेलोदकञ्चैव पयस्तक्रं सुमिष्टकम् ।
माहिषन्दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्युषितान्नञ्च सौवीरं शीतलोदकम् ।
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
नारिकेलतालसर्ज्जूरगसत्तमामलकोदकम् ।
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानिलम् ।
एतत्ते कथितं वत्स सद्यो वातप्रणाशनम् ।
वायवस्त्रिविधाः पुंसां ख्यातानापकारकाः ।"
इति श्रीब्रह्मवैवर्ते ब्रह्मखण्डे १६ अध्यायः ॥ ० ॥
अन्यच्च ।
"बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ।
बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा वर्षा गुडूचीकपिकच्छुकः ।
एषां दशपलिकान् भागान् क्वाथयेत् सलिले-
ऽवमे ।
तेन पादावशेषेण तैलं पात्रे विपाचयेत् ।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् । ० ।
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि
तच्छृणु ।
शतपुष्पा देवदारु मांसपर्णी वचागुरुः ।
कुष्ठमांसी सैन्धवञ्च पलिकं पुनर्नवा ।
पाके सर्व्वं समाध्यक्षे तैलमेतत् प्रदापयेत् ।
शुष्कशूलं पार्श्वशूलञ्च गृध्रसीञ्च नाशयेत् ।

अपतानं वातरक्तमाप्नुयाद् [illegible]
गर्भेनचतरी [illegible]
अश्वानां वातभग्नानां कुञ्जरा[illegible]
तैलमेतत् प्रदातव्यं सर्व्ववातविकार[illegible]
नुत्तम ।
"पञ्चाङ्गं तैलञ्च सुखी विश्वासा[illegible]
पञ्चप्रस्थं लारनाल तैलप्रस्थं [illegible]
पक्वमग्नावधारोष्णमर्दनानि[illegible]
इति माधवे ॥
(तथास्य गुणादयः ।
"बालस्तु चलसूक्ष्मश्च तद्वशी[illegible]
काय रौक्ष्यादयस्तथा
प्रतनक[illegible]
काश्च लघुश्च
वाहः [illegible]
शिरः स्कन्धपार्श्व[illegible]
सिराप्रतानाः शोषात्
विकाराः शोषोत्तमस्थान[illegible]
व्याधिमोऽल्पस्थानय[illegible]
प्रतनशीलकोदयस्वन्माः [illegible]
स्यात् स्फुटितायवशः [illegible]
न एवं गुणयोगात् [illegible]
इति चरके विमानस्थानेऽष्टमेऽध्याये ।
वृद्धिलक्षणं यथा ।
"तत्र वातवृद्धो भवन् पारुष्यं [illegible]
गात्रस्फुरणमुष्णकामिता
गाढ़वर्च्चस्त्वञ्च ।"
"तत्र वातक्षये
मन्दचेष्टा च ।" इति सुश्रुते
दशेऽध्याये । ० । स्थानविशेषे
चिकित्सा यथा,—
"विशेषतस्तु कोष्ठस्थे वाते वारं
आमाशयस्थे शुद्धस्य यथा दोषहरी
आमाशयगते वाते छर्द्दितास्य [illegible]
इम: षड्धरणो योगः [illegible]
"पक्वाशयगते वाते हितं [illegible]
बस्तयः शोधनीयाश्च प्राशाश्च [illegible]
सर्व्वं चलवकम् ।
"कुष्ठीतरवणाभ्यङ्ग[illegible]
गोमयैः सर्व्वं चलवणं तत्परं वात[illegible]
कार्यो बस्तिगते चापि विधिर्व[illegible]
तद्वमोघाश्च क्षिप्रा प्राप्ते कुर्यात्[illegible]
[illegible]
सर्व्वं दोषनाशाय[illegible]
वायुसम्भवस्य संप्राप्ते कुर्यात्[illegible]
स्वेदाभ्यङ्गावगाहाश्च [illegible]
शीताः प्रदेहा रक्तस्थे [illegible]
विरेको मांसमेदःस्थे निरूहाः [illegible]
वाह्याभ्यन्तरतः स्वेदैस्तस्मिन्[illegible]
एवोऽस्थिमात्रे शुक्रस्थे बलशुक्रकरं [illegible]

मध्यासि चलतः। अध्यशनं विदाह्यन्नम्। विदाहि निष्पावकुलत्थसर्षपशाकादि। संविदाह्यन्नस्य। संविदाहेऽध्यशनं यस्य भुक्ते विदग्धे तदुपरि भुञ्जानस्येत्यर्थः। अध्यशनशब्देनाजीर्णाशनं विरुद्धाजीर्णभोजनस्य विशेषतो हेतुत्वार्थम्। पश्चात् वातशोणितं प्रकुप्येदित्यनेनान्वयः। एतेषां कारणानां मध्ये केनचिद्वायुः केनचिदुभयमपि प्रकुप्येत्। *। संप्राप्तिमाह।

"तस्य रक्तं विदह्याशु तच्च
दुष्टं स्रस्तं पादयोश्चीयते तु।
तत् संपृक्तं वायुना दूषितेन
तत्प्राबल्यादुच्यते वातरक्तम्॥"

पूर्व्वोक्तैर्हेतुभिः तस्य समस्तं रक्तं विदहति अत्र दहधातुरविवक्षितकर्म्मकः। तेन विदहति विदग्धं भवतीत्यर्थः। तच्च दुष्टं रक्तम्। स्रस्तं अधोगतम्। पादयोश्चीयते सञ्चितं भवति। तद्रुधिरं दूषितेन स्वहेतुवायुना संपृक्तं मिलितं वातरक्तं उच्यते। अत्र चैतस्य संप्राप्तिरुक्ता सुश्रुतेन।

"शीघ्रं रक्तं दुष्टिमायाति तच्च
वायोर्मार्गं संरुणद्ध्याशु यातः।
क्रुद्धोऽत्यर्थं मार्गरोधात् स वायु-
रत्युद्रिक्तं दूषयेद्रक्तमाशु॥"

अथ प्रथमं रक्तस्य दुष्टत्वे रक्तवातमिति व्यपदेष्टुमुचितं भवत्यत आह। तत्प्राबल्यादिति। तस्य वातस्य दोषत्वेन प्राधान्याद्वातरक्तमिति व्यपदिश्यते। *। पूर्व्वरूपमाह।

"स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक्।
सन्धिशैथिल्यमालस्यं सदनं पिडकोद्गमः॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च॥
कण्डूः सन्धिषु रुक् हात्वा भूत्वा नश्यति चासकृत्।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्व्वलक्षणम्॥"

अथाधिकवातस्य वातरक्तस्य लक्षणमाह।

"वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम्।
शोथस्य रौक्ष्यं कृष्णत्वं श्यावतावृद्धिहानयः॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक्।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः॥"

तत्र पादयोः शूलादिकमधिकम्। यत आह सुश्रुतः।

"स्पर्शोद्विग्नौ तोदभेदप्रशोषौ
स्वापोपेतौ वातरक्तेन पादौ॥" इति।

अत्र सुप्तिः स्पर्शाज्ञता। *। अधिकरक्तं वातरक्तमाह।

"रक्ते शोथोऽतिरुक् तोदस्ताम्रश्चिमिचिमायते।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः॥"

अधिकपित्तं तदाह।

"पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदस्तृषा।
स्पर्शाक्षमत्वं रुग्रागः शोथपाको भृशोष्मता॥"

विदाहश्च पादादेव बोद्धव्यः। यत आह सुश्रुतः।

"पित्तात्सदाहाशुनदाहौ भृशोष्णा-
वत्यर्थोष्णौ रक्तशोथौ मृदू च॥"

पादाविति शेषः। अधिककफं तदाह।

"कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः॥"

गुरुत्वादयः पादयोरेव। यत आह सुश्रुतः।

"कण्डूमन्तौ स्थिरशीतौ सशोथौ
पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते॥" *।

अनिक्रियमाणवातरक्तस्य उपद्रवानाह।

"अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः।
मूर्च्छा च मदरुक् तृष्णा ज्वरमोहप्रवेपकाः॥
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहार्ब्बुदाः॥"

मांसकोथो मांसगलनम्। *। असाध्यत्वादिकमाह।

"एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वापि यत्।
अप्रसूतोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम्॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम्।
त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः॥"

अथ वातरक्तस्य चिकित्सामाह।

"वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्।
अल्पाल्पं रक्षयेद्वायुं यथादोषं यथाबलम्॥
उपाङ्गदाहतोदेषु जलौकोभिर्विनिर्हरेत्।
शृङ्गतुम्बैश्चिमिचिमाकण्डूरुग्दाहान्वितम्॥
प्रच्छन्नेन शिराभिर्वा देशाद्देशान्तरं व्रजेत्।
अङ्गे ग्लानौ च तत् वार्य्यं रूक्षे वातोत्तरे च यत्।
गम्भीरं श्वयथुं स्तम्भं कम्पं स्नायुं शिरामयान्।
रोगानन्यांश्च वातोत्थान् कुर्य्याद्वायुरदर्चितः॥
विविधान् वातरोगान् वा कष्टं वाह्यपरीक्षितम्।
रक्तं कुर्य्यात्ततः स्निग्धात्तत्प्रमाणेन निर्हरेत्॥
विरेचयेत् पित्ताढ्यं स्नेहयुक्तैर्विरेचनैः।
वाह्यमालेपनाभ्यङ्गपरिषेकोपनाहनैः।
विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत्॥
दिवास्वप्नं च कोपं च व्यायामं मैथुनं तथा।
कट्वुष्णं गुर्व्वभिष्यन्दि लवणाम्लं च वर्ज्जयेत्॥
पुराणा यवगोधूमशालयः षष्टिकास्तथा।
भोजनार्थे रसार्थे तु विष्किराः प्रतुदा हिताः॥
आढकी चणका मुद्गा मसूराः सकुलत्थकाः।
यूषार्थे बहुसर्पिष्काः प्रशस्ता वातशोणिते॥
सुनिषण्णकवेत्राग्रं काकमाची शतावरी।
वास्तूकोपोदिकाशाकं शाकं सौवर्च्चलं तथा॥
घृतमांसरसैर्भृष्टं शाकमन्यच्च दापयेत्।
क्षिप्तो गोधूमचूर्णैश्च छागमीरयतण्डुलैः॥
वेपल्लहसिला भक्ताः पिष्टाः पयसि निर्वृताः॥
क्षीरपिष्टातसीभिर्वा वर्द्धमानफलैरपि।
दुग्धपिष्टैः प्रलेपैः स्याद्धितः पवनशोणिते॥
गुडूचीक्वाथकल्काभ्यां सपयस्कं पचेद् घृतम्।
वातरक्तं निहन्त्याशु कुष्ठं हरति दुस्तरम्॥"

गुडूचीघृतम्। *।

"तुलां पचेद्गुडूच्यास्तु जलद्रोणचतुष्टये।

पादशेषः क्वाथस्तु [illegible]
निम्बैश्चाद्रर्द्धका [illegible]
वत्समात्रैर्मतो दश्चैः [illegible]
मञ्जिष्ठा मधुकं कुष्ठं [illegible]
स्यामाक च नदीजा [illegible]
वरेण्यः कासको वोरं [illegible]
मङ्गो मामा प्रलादा च [illegible]

[illegible]
सन्तानि कल्कानि [illegible]
मानि भङ्गेभुङ्गाणि च [illegible]
वातरक्तं [illegible]
श्वयं पुंसवनं श्रोको सर्वं [illegible]

[illegible]

इति गुडूचीतैलम्।

(प्रयाच।
"तुला [illegible]
पृथक् गुडमेकायामां [illegible]
अधिमात्रमशुनस्य [illegible]
हेतुल वातमेवस्याप्यत्रार्थे [illegible]
"अभिघातादयद्वाच [illegible]

[illegible]

उत्थ
वायुर्विरुद्धो रक्ते [illegible]
कुद्धस्तद्दूषयेत्तत्र तम्मूर्खं [illegible]
एवं [illegible]
तस्य स्थानं करौ पादावङ्गु [illegible]
तलादौ पादपादे तु सर्वं [illegible]

[illegible]
मर्म्मसभिहतं पूर्व्वं [illegible]
स्थितं पित्तादिसंयतं [illegible]
करोति दुःखं तेनैव तस्मात् [illegible]
"उत्तानमथ गम्भीरं [illegible]
त्वङ्मांसाश्रयमुत्तानं [illegible]

[illegible]
अन्विता ताम्ररक्ता [illegible]
गम्भीरे श्वयथुः स्तब्धः [illegible]

[illegible]
सविदाहान्वितोऽभीक्ष्णं [illegible]
छिन्दन्निव [illegible]
करोति खञ्जं पङ्गुं वा [illegible]
सर्व्वैर्लिङ्गैश्च विज्ञेयं वाता [illegible]
"रक्तमार्गं निहन्त्याशु [illegible]
निषेधाल्लोकमात्रं वेदनां [illegible]
तत्र सुखेरक्तमुण्वज्योक [illegible]
प्रच्छनैर्वा शिराभिर्वा यथादो [illegible]

[illegible]
अल्पेऽल्पमोचरेत् सविकल्पैः [illegible]
देशाद्देशं व्रजत् चाङ्गं शिरावि [illegible]
"अपि स्नेहवधामन्यायिनामा [illegible]

रपमाहेच वातोत्तरमुपाचरेत्॥
घृतक्षीरपानैः सेकैः बस्तिभिः।
वापनैश्चापि रक्तपित्तोत्तरं जयेत्॥
न्द्रुतार्थं स्वेदसेकादिलङ्घनम्।
पाश्च प्रशस्ते वातरक्ते कफोत्तरे॥
त्तरे शीतैः प्रलिम्पे वातशोणिते।
शोथरुक्कण्डूविवृद्धिः स्तम्भनाद्भवेत्॥
त्तरे दाहः क्लेदोऽवदरणं भवेत्।
साद्विषग्दोषबलं वुद्ध्वाचरेत् क्रियाम्॥"
रूषकद्राक्षाकाश्मर्य्यखर्जूरसान् समान्।
ग्यांश्च रसं तथा क्षीरचतुर्गुणम्॥
ायोगिकं सर्पिः पारूषकमिति स्मृतम्।
चते चीणे वीसर्पे पैत्तिके ज्वरे॥"
इति पारूषकं घृतम्॥
र्णाः पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे।
गार्धं घृतक्षत्वचदेवं मधुकात् शते॥
र्यं त्रिदोषे स्यात् वातासृग्वातकास्त्वृत्।
ृद्रोगवीसर्पकामलादाहनाशनम्॥
पायकल्काभ्यां तैलं क्षीरसमन्तथा।
तपाकं वा वातास्रवातरोगनुत्॥
ं श्रेष्ठतमं इन्द्रियाणाम्प्रसादनम्।
हं दृप्यं स्वर्य्यं शुक्रासृग्दोषनाशनम्॥"
गादामृतसंसिक्ते चौमपद्मदलच्छदे।
पुलिनस्पर्शे शीतमारुतवीजिते॥
ार्द्रकराद्याः प्रिया नार्य्यः प्रियंवदाः।
शीतसुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम्॥"
ौरे रक्तमाक्रान्तं स्याद्विदाहं विवर्ज्जयेत्।
तातिरूक्षाः तु पाकमाशु नियच्छति॥
स्रवति वा रक्तं विदग्धं पूयमेव वा।
क्रिया विधातव्या यथः शोधनरोपणी॥
दुपद्रवाणाञ्च क्रियां स्यात् स्वाचिकित्-
सितात्॥"
ति चरके चिकित्सास्थाने २८ अध्यायः॥
कं पारदं लौहं वनं तालं मनःशिला।
ानु पुरं शुद्धं समभागं विचूर्णयेत्॥
ं त्रिफला चोपं वागुजी च पुनर्नवा।
कं देवकाष्ठञ्च दार्व्वी श्वेतापराजिता॥
र्यां दृषत् तुल्यं सर्व्वमेकत्र कारयेत्।
ाभृङ्गराजस्य रसेनैव पृथक् त्रिधा॥
य भक्षयेत् प्रातर्माषमात्रं दिने दिने।
दुमानं निम्बस्य पत्रं पुष्पं त्वचं समम्॥
मात्रं पृथेदद्यात् सर्व्ववातविकारहृत्।
रक्तं महाघोरं गम्भीरं सर्व्वलक्षणेन्॥
पिद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम्॥"
इति वातरक्तान्तको रसः॥
प शुद्धेन तावेन गन्धतुल्येन मेलयेत्।
सूक्ष्मं चौरतार्क्ष्यं वायुकायलके पचेत्॥
ाखेश्वरो नाम रसः परमदुर्लभः।
ान् कुष्ठानि सर्व्वाणि वातरक्तमथापि वा।
महाविधं विषं रसतालेश्वरो महान्॥"
इति महातालेश्वरो रसः॥
। वैद्यकरसेन्द्रसारसंग्रहे वातरक्ताधिकारे॥

अथात्र पथ्यापथ्यविधिः।
"दयोरसस्रुतिः सूचीजलौकाशृङ्गलाबुभिः।
घृतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम्॥
यवषष्टीकनीवारकलमारक्तशालयः।
गोधूमाश्चणका मुद्गाश्तुवर्य्योऽपि मुकुष्टकाः॥
अजानां महिषीणाञ्च गवामपि पयांसि च।
लावतित्तिरिशर्मादिताम्रचूडादिविष्किराः॥
प्रतुदाः शुकदात्यूहकपोतकटकादयः।
उमोदिकाकाकमाची वेत्राग्रं सुनिषण्णकम्॥
वास्तुकं कारवेल्लञ्च तण्डुलीयः प्रसारणी।
पत्तूरी दृढकुष्माण्डं सर्पिः शम्पाकपल्लवम्॥
पटोलं रसुतैलञ्च मृद्वीकाश्वेतशर्करा।
नवनीतं सोमवल्ली कस्तूरी सितचन्दनम्॥
शिंशपागुरुदेवाह्वसरलं स्वेदमर्द्दनम्।
तिक्तञ्च पथ्यमुद्दिष्टं वातरक्तगदे नृणाम्॥
दिवास्वप्नाग्निसन्तापव्यायामातपमैथुनम्।
माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम्॥
अमृतानूपमांसानि विरुद्धानि दधीनि च।
इक्षवो मूलकं मद्यं पिण्याकोऽम्लानि काञ्जिकम्॥
कटुश्च गुर्व्वभिष्यन्दि लवणानि च शक्तवः।
इत्यपथ्यं निगदितं वातरक्तगदे नृणाम्॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे वातरक्ताधिकारः॥)

वातरक्तघ्नः, पुं, (वातरक्तं रोगविशेषं हन्तीति। हन+टक्।) कुकुरद्रुमः। इति शब्दचन्द्रिका॥ कुकुरसड़ा इति भाषा॥

वातरक्तारिः, पुं, (वातरक्तस्य अरिर्नाशकः।) पित्तघ्नी लता। इति शब्दचन्द्रिका॥ गुलञ्च इति भाषा॥

वातरङ्गः, पुं, (वातेन वायुना रङ्गो यस्य। निरन्तरचलदलत्वादस्य तथात्वम्।) अश्वत्थः। इति शब्दरत्नावली॥

वातरथः, पुं, (वातो वायू रथो यस्य।) मेघः। इति त्रिकाण्डशेषः॥ (वातो रथः प्रापको यस्येति वायुप्रापके, त्रि। यथा, भागवते। ३।२८।२०।
"यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात्।
एवं योगरतं चेत आत्मानमविकारि यत्॥")

वातरायणः, पुं, (वातेन वायुजनितरोगेण रायति शब्दायते इति। रै शब्दे+ल्युः।) उन्मत्तः। निष्प्रयोजनपुरुषः। काण्डम्। करपत्रम्। कूटः। शरक्षेपः। इति मेदिनी। ने, ११६॥ सरलद्रुमः। इति शब्दरत्नावली॥

वातरूषः, पुं, (वातेन रूष्यते भूष्यते इति। रूष+घञ्।) वातूलः। उत्कोचः। इन्द्रधनुः। इति मेदिनी। षे, ४०॥

वातरोगः, पुं, (वातजनितो रोगः।) वायुव्याधिः। तत्पर्य्यायः। वातव्याधिः २ चलातङ्कः ३ अनिलामयः ४। इति राजनिर्घण्टः॥ (यथा,
"वातरोगं निहन्त्याशु वह्नेर्दीपनमुत्तमम्॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ रसोनपिण्डे।)

वातरोगी [न्] त्रि, (वातरोगोऽस्त्यस्येति। वातरोग+इनिः।) वातरोगयुक्तः। तत्पर्य्यायः। वातकी २। इत्यमरः॥ (यथा, हृश्रुतसंहितायाम्। ८७।११।
"परतोऽपि दर्शनं वातरोगिणां चन्दनागुरुप्राप्तिः॥")

वातर्हिः, पुं, काष्ठलौहोभयनिर्मितपात्रम्। तत्पर्य्यायः। काष्ठलौही २। इति त्रिकाण्डशेषः॥

वातलः, पुं, (वातं लातीति। ला+कः।) चणकः। इति शब्दचन्द्रिका॥ वायुकारके त्रि॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अः।
"वातलाः शीतमधुराः सकषाया विरूक्षणाः। कफशोणितपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः॥")

वातलमण्डली, स्त्री, वात्या। इति भूरिप्रयोगः॥

वातवान् [त्] त्रि, वायुयुक्तः। वातो विद्यतेऽस्य इत्यर्थे वतुप्रत्ययेन निष्पन्नः॥

वातवैरी [न्], पुं, (वातस्य वैरी।) वातादः। इति राजनिर्घण्टः॥ वायुघ्नी, त्रि॥

वातव्याधिः, पुं, (वातजनितो व्याधिः।) वातरोगः। इति राजनिर्घण्टः॥ (यथा,
"नूनं सुरत्वचं भग्नं कम्पाध्मानविपीड़ितम्। चक्षार्दितमन्तञ्च नरं वातव्याधिर्विनाशयेत्॥"
इति माधवकरकृते रुग्विनिश्चये वातरोगाधिकारे शेषांशे॥)

वातशीर्षं, क्ली, (वातस्य शीर्षमिव।) वस्तिः। इति राजनिर्घण्टः॥

वातशोणितं, क्ली, (वातजं शोणितं दुष्टरक्तं यत्र।) वातरक्तरोगः। इति भावप्रकाशः॥ (अस्य सनिदानसम्प्राप्तिकं पूर्व्वरूपं लक्षणञ्च यथा,—
"विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक्प्रदूषणम्।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम्॥
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनाम्।
अभिघातादशुद्ध्या च नृणामसृजि दूषिते॥
वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः।
तादृशेनासृजा रुद्धः प्राक् तदेव प्रदूषयेत्॥
आढ्यरोगं खुडं वातबलाशं वातशोणितम्।
तदाहुर्नामभिस्तच्च पूर्व्वं पादौ प्रधावति॥
विशेषाद्यानयानाद्यैः प्रलम्बौ तस्य लक्षणम्।
भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः॥
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि॥
आखोरिव विषं क्रुद्धं कृत्स्नं देहं विधावति।
त्वङ्मांसाश्रयमुत्तानं तत्पूर्व्वं जायते ततः॥
कालान्तरेण गम्भीरं सर्व्वान् धातूनभिद्रवत्।
कण्ड्वादिसंयुतोत्ताने त्वक्ताम्रा श्यावलोहिता॥
सायामा भृशदाहोषा गम्भीरेऽधिकपूर्व्वरुक्।
श्वयथुर्ग्रथितः पाकी वायुः सन्ध्यस्थिमज्जसु॥
छिन्दन्निव चरत्यन्तर्वक्रीकुर्व्वंश्च वेगवान्।

करोति सर्वं बहु वा शरीरे सर्वतश्चरन् ।
वातेऽधिकेऽधिकन्तत्र शूलस्फुरणतोदनम् ।
शोफस्य रौक्ष्यकृष्णत्वश्यावताहृद्धिहानयः ।
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ।
रक्ते शोफोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ।
पित्ते विदाहः सम्मोहः स्वेदो मूर्च्छा मदः स-
तृट् ।
स्पर्शाक्षमत्वं रुग्रागः शोफपाको भृशोष्मता ।
कफे स्तैमित्यगुरुता सुप्तिस्निग्धत्वशीतताः ।
कण्डूर्मन्दा च रुग्द्वन्द्वसर्वलिङ्गञ्च सङ्करे ।
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजं त्यजेत् स्रावि स्तब्धमर्व्वुदकारि च ।
रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निविश्यान्योऽन्यमावार्य्य वेदनाभिर्हरत्यसून् ।"
इति वाभटे निदानस्थाने षोडशोऽध्याये ।
"वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ।
चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम् ।
भेषजं शमनं शस्तं पर्य्यायैः स्मृतमौषधम् ।"
इति च वाभटे चिकित्सितस्थाने द्वाविंशतितमे-
ऽध्याये । अस्य चिकित्सा वातरक्तशब्दे द्रष्टव्या ।)

वातसहः, त्रि, (वातं वातजनितरोगं सहते । सह + अच् ।) वातव्याधियुक्तः । यथा,—
"वातसहो वातसही वातुलो वातुलोऽपि च ।"
इति शब्दरत्नावली ।
(वायुवेगसहनशीलः । यथा, महाभारते । १ । १३२ । ५ ।
"ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ऊर्म्मिक्षमां दृढां कृत्वा कुन्तीमिदमुवाच च ।")

वातसारथिः, पुं, (वातः सारथिः सहायो यस्य ।) अग्निः । इति केचित् ।

वातस्कन्धः, पुं, (वातस्य स्कन्ध इव ।) आकाशस्य भागविशेषः । यत्र वायुर्वहति । इति केचित् ।

वातहा, [न्] त्रि, (वातं हन्तीति । हन् + क्विप् ।) वातघ्नः । वायुनाशकौषधम् । इति वैद्यकम् ।

वाताटः, पुं, (वात इव अटति गच्छतीति । अट + अच् ।) सूर्य्याश्वः । इति त्रिकाण्डशेषः ।
वातमृगः । इति शब्दरत्नावली ।

वाताण्डः, पुं, (वातदूषितो अण्डो यस्मात् ।) मुष्करोगविशेषः । तस्य लक्षणं यथा,—
"इतश्चो वृषयोर्वायुः सेवया यस्य संश्रितः ।
तस्य मुष्कश्चलैको रोगो वाताण्डसंज्ञकः ।"
इति माधवकरः ।

वातादः, पुं, (वाताय वातनिवारणाय अद्यते इति । अद + घञ् ।) वृक्षफलविशेषः । बादाम इति ख्यातः । तत्पर्य्यायः । वातवैरी २ नेत्रोपमफलः ३ वाताम्रः ४ । अस्य गुणाः । उष्णत्वम् । वृष्यत्वम् । वातहारित्वम् । शुक्रकारित्वम् । गुरुत्वञ्च । अस्य मज्जगुणाः । मधुरत्वम् । वृष्यत्वम् । पित्तवातहरत्वम् । स्निग्धत्वम् ।
उष्णत्वम् । कफकारित्वम् । रक्तपित्तविकारिणां शस्तत्वञ्च । इति भावप्रकाशः ।

वातापिः, पुं, असुरविशेषः । स च ह्रादस्य धमन्यां पत्न्यां जातः । अगस्त्येन भक्षितः । इति श्रीभागवतमतम् । कल्पान्तरे तु विप्रचित्तेः सिंहिकायां जातः । यथा,—
"सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्दश ।
वंशः प्रबलसाध्य यज्ञः शल्यस्तथैव च ।
इल्वलो नमुचिश्चैव वातापी हस्थ्यो त्रिकः ।
हरकल्पः कालनाभो भौमश्च नरकस्तथा ।
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्द्दनः ।
इत्येते सिंहिकापुत्त्रा देवैरपि दुरासदाः ।"
इति वह्निपुराणे काश्यपीयवंशः ।
अन्यच्च ।
"विप्रचित्तिः सैंहिकेयान् सिंहिकायामजी-
जनत् ।
हिरण्यकशिपोर्ये वै भागिनेयास्त्रयोदश ।
व्यंशः शल्यश्च राजेन्द्रो नभो वातापिरेव च ।
इल्वलो नमुचिश्चैव श्वसृमश्चाञ्जनस्तथा ।
नरकः कालनाभश्च सरमाणस्तथैव च ।
कल्पवीर्य्यश्च विख्यातो दनुवंशविवर्द्धनः ।"
इति मात्स्ये ६ अध्यायः ।
(मुनिवरोऽगस्त्यस्तु एनं ब्रह्मदेहादौ भक्षितवान् । एतद्वृत्तान्तस्तु महाभारते वनपर्व्वणि ९९ अध्यायमारभ्य द्रष्टव्यः ।)

वातापिद्विट्, [ष्] पुं, (वातापिं द्वेष्टीति । द्विष + क्विप् ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ।

वातापिसूदनः पुं, (वातापिं सूदयति इति । सूद + ल्युः ।) अगस्त्यः । इति त्रिकाण्डशेषः ।

वातापिहा [न्] पुं, (वातापिं हन्तीति । हन + क्विप् ।) अगस्त्यः । इति त्रिकाण्डशेषः ।

वातामोदा, स्त्री (वातेन प्रसृत आमोदो यस्याः ।) कस्तूरी । इति शब्दमाला ।

वातायनं, क्ली, (वातस्य अयनं गमनागमनमार्गः ।) गवाक्षः । इत्यमरः । (यथा, आर्य्यासप्तशत्याम् । ५३० ।
"कोषागारस्य बहिः सखीषु चरमास्तियो मयि प्रियया ।
प्रकटीकृतः प्रसादो दत्त्वा वातायने व्यजनम् ।")
तेन परबाधानिषेधो यथा,—
"परबाधां न कुर्व्वीत जलवातायनादिभिः ।
कारयित्वा तु कर्म्माणि कारं पश्चात् न वञ्च-
येत् ।"
इति कौर्म्मे उपविभागे १५ अध्यायः ।

वातायनः, पुं, (वातस्येव अयनं गतिर्यस्य ।) घोटकः । इति त्रिकाण्डशेषः ।

वातायुः, पुं, (वातमयते इति । अय + बाहुलकात् उण् ।) हरिणः । इत्यमरः ।

वातारिः, पुं, (वातस्य वातरोगस्य अरिः ।) एरण्डवृक्षः । इति शब्दरत्नावली । (अस्य पर्य्यायो यथा,—
"शुक्लएरण्ड ...
... वर्द्धमानो ...
वातारिस्तरुणश्चापि ...
रक्तोऽपरो रुबूकः ...
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तान ...
इति ...
शूलमूली । इति शब्दचन्द्रिका ।
शेफालिका । यवानी । भर्ङ्गी ।
विडङ्गः । सूरणः । भल्लातः ।
राजनिर्घण्टः ।

वातालौ, स्त्री, (वातस्य आलीव ... इति त्रिकाण्डशेषः ।

वाताश्वः, पुं, (वात इव शीघ्रगो ...) ... नाश्वः । तत्पर्य्यायः । ... आवानेयः ३ । इति त्रिकाण्डशेषः ।
कथासरित्सागरे । ६६ । ६३ ।
"तदिमं मां त्रिवार्ताहि ...
आशीतमिह ..."

वातासहः, त्रि, (वातं ... इति । आ + सह + अच् ।) ...
शब्दरत्नावली ।

वातिः, पुं, (वाति गच्छतीति । वा + उणा० ४ । १ । इति अतिः ।) ...
"वातिर्वायुर्भवेदातः ...
इत्यमरटीकायां ...
सूर्य्यः । चन्द्रः । यथा ।
इति रभसः ।

वातिकः, पुं, (वातात् आगतः ।) वायुग्रस्तव्याधिः । यथा,—
"वातिको वातजो व्याधिः पैत्तिकः ...
श्लैष्मिकः ...

(स्त्री, वातस्य प्रशमं कोपनं ...) ... प्रशमकोपनयोरन्यत्र ... ३८ । इत्यस्य वार्त्ति । ठञ् ।
वाचाले, त्रि । यथा, महाभारते ।
"अपरे स्वदस्तत्र वातिकास्ते ...
युधिष्ठिरस्य यज्ञेन न समो ..."

वातिगः, पुं, (वातिं वायुं गच्छति । गम + डः ।) भण्टाकी । वार्त्ताकुः । इति मेदिनी । गे, ३८ ।

वातिगमः, पुं, (वातिं वायुं गमयति । गमि + अण् ।) वार्त्ताकुः । इति ... जटी ।

वातिङ्गणः, पुं, वार्त्ताकुः । इति ...

वातीयं, क्ली, (वाताय वातनिवारणाय हितम् । वात + छः ।) काञ्जिकम् । इति ...

वातुलः, पुं, वात्या । इत्यमरटीकायां ...

वातुलः, त्रि, वातविकारवान् । इत्यमरटीकायां भरतः ।

वातुलिः, स्त्री, तन्तुलिका । इति ... वादुड इति भाषा ।

पुं, (वत्सानां समूहः । "वत्सादृण: ।" इ । इत्यण् वार्त्तिकोक्त्या स्वण: । यद्वा, : वत्सस्यापत्यमिति । वत्स + "गिरादि- ।" ४ । १ । १०५ । इति यञ् । "वात्स्य- ण ।" इञ् । यद्वा, वत्सानां समूहः वात्सं त । इति वा । वत्स + "वत्साद्यच्च मतुपि च । त स्पृते इति च ।" ५।२।९८ । इत्यस्य ०५ कच्छ ।) वात्स्या । वत्सवर्गे,त्रि । इत- । "वात्सा वात्सच्छदः । अन्य वत्सवत्सादि- वत्सादिति स्वण: । वात्सवर्गे वात- वानदः । वात्सा इति स्वातः । अथ गो- सम्बन्धिना स्वण: वात्सः । वात्सवर्गीणि गुणे वत्सवत्सेऽपि वात्सः । वात्सी वात्सवोऽपि इति हिन्दवीय: । उष्णतोऽपि वात्सः ।" सरटीकायां भरत: ।

', स्त्री, (वात्सवत्सयमीति । वत्स + अण् ।) हरापुषः । इति राजनिर्घण्टः । वात्स- !, त्रि ।

स्त्री, (वात्सानां समूहः । वात्स + "पाशा- दी यः ।" ४ । २ । ४९ । इति यः ।) वात्स- द: । यथा,—

"...मी च वात्साली स्यात् वात्सा वात्स- महत्ती ।"

इति त्रिकाण्डशेष: ।

था, भागवते । ३ । १० । ५ ।

"...ी वात्सः शुद्धशब्दः पैत्कारामीरयन् शदु: । ...लिसगापनीत् वात्सावीवी दन्तोध्वग: ।")

,स्त्री, (वत्सानां समूहः । वत्स + "गोत्रोक्षो- ...।" ४ । २ । ३९ । इति वुञ् ।) वत्स- ...: । इत्यमर: । (वत्सकवेदमिति । वत्सक ...म् । कुटजसम्बन्धिनि इन्द्रयवसम्बन्धिनि ...त्रि । यथा, सुश्रुते । ६ । ४० ।

"...रातिविषासुत्तं पिप्पल्यो वात्सकं फलम् ।")

...:, पुं, (वत्सल एव । स्वार्थे ष्यञ् ।) ...विशेष: । यथा,—

"...लब्धशान्तौ तु रसौ शृङ्गार: कौशिक: स्मृत: ।"

इति त्रिकाण्डशेष: ।

...मधिकारी यथा,—

"...न्ति ब्राह्मण एव स्यात् प्रीते दास: प्रकी- र्त्तित: ।

...पि सु: सखायो हि यशोदा वत्सले स्मृता: ।

...धुरे राधिका प्रोक्ता हास्ये स्यान्मधुमङ्गल: ।

...सौपूर्योऽद्भुते प्रोक्तो वीरे चारणगोष्ठपा: ।

...दृषि वत्सस्थादिर्जटिलाद्यास्तु रौद्रके ।

...विर्द्वनेऽभिमन्युश्च भयानक उदाहृतौ ।

...मुखिम्वादयो ह्यत्र वीभत्से परिकीर्त्तिता: ।

...स्था नियता प्रोक्ता आलम्बनविभावका: ।"

इत्युज्ज्वलनीलमणि: ।

...वत्सलस्य भाव: । वत्सल + ष्यञ् ।) वत्सलस्य ...वे, स्त्री । (स्नेह: । यथा, भागवते ।४।६।३४।

"...चरन्तं विश्वसुहृदं वात्सल्यात्लोकमङ्गलम् ।")

वात्सीपुत्र:, पुं, नापित: । इति त्रिकाण्डशेष: ।

वात्स्य:, पुं, (वत्सस्य गोत्रापत्यम् । वत्स + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेष: । यथा । वात्स्यगार्ग्यजैमिन्यनौलोमिकलमालवेयाः...परा: । इत्युदाहृतम् ।

वात्स्यायन:, पुं, (वत्सस्य गोत्रापत्यं युवा । वत्स + यञ् । ततो यूनि फक् ।) मुनिविशेष: । तत्पर्याय: । मल्लनाग: २ पक्षिल: ३ स्वामी ४ । इति त्रिकाण्डशेष: । (अयं हि कामसूत्रकर्त्ता । यथा, कुट्टनीमते । ७७ ।

"वात्स्यायनमयमतुषं
वात्स्यायनेन दत्तकाचार्य्यान् ।
गमयति मन्मथमते
पद्मश्रुत्यं राजपुत्रस्य ।")

वाद:, पुं, (वद् + घञ् ।) यथार्थबोधेच्छो- र्वाक्यम् । यथा,—

"विजिगीषो: कथा जल्पो वादस्तत्त्वबुभु- त्सो: ।"

इति जटाधर: ।

अस्य लक्षणं यथा । प्रमाणतर्कसाधनोपालम्भ: सिद्धान्ताविरुद्ध: पञ्चावयवोपपन्न: पक्षप्रतिपक्ष- परिग्रहो वाद: । इति गौतमसूत्रम् । १ । अपि च ।

"सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वाद: प्रवदतामहम् ।"
इति भगवद्गीतायाम् १० अध्याय: ।

"प्रवदतां वादिनां सम्बन्धिनो वादजल्पवितण्डा- ख्यास्त्रिस: कथा: प्रसिद्धास्तासां मध्ये वादो- ऽहम् । यत्र द्वाभ्यामपि प्रमाणतर्कैस्तत्त्वं स्वपक्ष: स्थाप्यते परपक्षच्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम । यत्र त्वेक: स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत् पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा । तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनो: शक्तिपरीक्षामात्रफले । वादस्तु वीतरागयो: शिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिर्णयफल: । अतोऽसौ श्रेष्ठत्वान्मद्विभूतिरित्यर्थ: ।" इति तट्टी- कायां श्रीधरस्वामी । ("तत्र वाद: । वादो नाम य: परस्परेण सह शास्त्रपूर्व्वकं विगृह्य कथयति । स वादो द्विविध: संग्रहेण जल्पो वितण्डा च । तत्र पक्षाश्रितयोर्वचनं जल्प: । जल्पविपर्य्ययो वितण्डा ।" इति चरके विमान- स्थानेऽष्टमेऽध्याये ।)

वादक:, त्रि, (वादयतीति वद् + णिच् + ण्वुल् ।) वादकर: । (यथा, भागवते । १० । १८ । १३ ।

"क्वचित् नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् । शशंसतुर्महाराज साधु साध्विति वादिनौ ।") वक्ता । वदधातो: कर्त्तरि णक(ण्वुल्)प्रत्ययेन निष्पन्न: ।

वादनं, क्ली, (वद् + णिच् + ल्युट् ।) वाद्यम् । (यथा, संगीतदर्पणे । ३३ ।

"वीणावादनतत्त्वज्ञ: श्रुतिजातिविशारद: । तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ।")

वा(बा)दरं, त्रि, (बदरात् बदराकारकार्पास- फलाद्भवम् । बदर + अण् ।) कार्पासनिर्म्मित- वस्त्रादि । इत्यमर: । २।६।१११ । बादराया: कार्पास्या इदं इत्यर्थे अण्प्रत्ययेन निष्पन्नम् ।

वा(बा)दर:, पुं, (बदर + स्वार्थे अण् ।) कार्पास- वृक्ष: । इति हेमचन्द्र: । (बदरीवृक्ष: । कुलगाछ इति भाषा ।)

वादरङ्ग:, पुं, अश्वत्थवृक्ष: । इति त्रिकाण्डशेष: ।

वा(बा)दरा, स्त्री, (बदरवत् फलमस्त्यस्या: । बदर + अच् । तत: टाप् ।) कार्पासवृक्ष: । तत्पर्याय: । कार्पासी २ सूत्रपुष्पा ३ बदरी ४ समुद्रान्ता ५ तुण्डिकेरी ६ कार्पासिका ७ । इति शब्द- रत्नावली । अस्या: पर्य्यायान्तरं गुणाश्च कार्पासीशब्दे द्रष्टव्या: ।

वादरायण:, पुं, (बदरायणे बदरिकाश्रमे निवस- तीति । बदरायण + अण् ।) व्यासदेव: । इति शब्दरत्नावली ।

वादरायणि:, पुं, (बादरायण एव । स्वार्थे इञ् ।) व्यासदेव: । इति शब्दरत्नावली । (बादरा- यणस्यापत्यमिति अपत्यार्थे इञ् । शुकदेव: ।)

वादरिक:, त्रि, बदरचयनकर्त्ता । बदरं चिनोती- त्यर्थे ठिकप्रत्ययेन निष्पन्न: ।

वादलं, क्ली, मधुयष्टिका । इति शब्दचन्द्रिका ।

वादवादी [न्], पुं, (वादं वदतीति । वद् + णिनि: ।) जिनभेद: । तत्पर्याय: । आर्हत: २ । इति हेमचन्द्र: ।

वादामं, क्ली, स्वनामाख्यातफलम् । तस्य गुणा: । उष्णत्वम् । सुस्निग्धत्वम् । वातघ्नत्वम् । बल- शुक्रकारित्वञ्च । इति राजवल्लभ: ।

वादान्य:, त्रि, (वदान्य एव । स्वार्थे अण् ।) वदान्य: । बहुप्रद: । इति भरतद्विरूपकोष: ।

वादाल:, पुं, मत्स्यभेद: । बोयालि इति भाषा । तत्पर्याय: । सहस्रदंष्ट्र: २ । इति हेमचन्द्र: ।

वादि:, त्रि, (वादयति व्यक्तमुच्चारयतीति । वद् + णिच् + "वसिवपियजीति ।" उणा० ४ । १२४ । इति इञ् ।) विद्वान् । इत्युणादिकोष: ।

वादित्रं, क्ली, (वाद्यते । वद् + णिच् + "भूवादि- गृभ्यो णित्रन् ।" उणा० ४ । १७० । इति णित्रन् ।) वाद्यम् । इत्यमर: । (यथा, भाग- वते । ३ । २४ । ७ ।

"अवादयंस्तदा व्योम्नि वादित्राणि घनाघना: ।" वादित्रेऽर्थिनस्त्रायते इति । त्रै + क: । अर्थि- रक्षके, त्रि । यथा, वक्रोक्तिपञ्चाशिकायाम् ।२८।

"हत्वा त्वां पशुवत्सितं नहि मया दृष्टेन न प्रीयते
नैवाहं पशव: कृशोदरि चित: प्रत्ययो विधातुं त्वया ।
किं वादित्रविवक्षयात्र दयिते को वादित्रस्त्रायते स्मृत्वा निर्जितशैलराजसुत इत्याख्या- ...")

वादरं, क्ली, वदरीसद्मवस्त्रफलत्वच:। इति शब्दरत्नावली॥

वादिराट्, [ज्] पुं, (वादिषु वक्तृषु राजते इति। राज+क्विप्।) मञ्जुघोष:। इति त्रिकाण्डशेष:॥

वादिश:, त्रि, साधुवादी। इति शब्दमाला॥

वादी, [न्] त्रि, (वदतीति। वद्+णिनि:।) वक्ता। (यथा, मनु:। ७।९१।
"न च हन्यात् स्थलारूढं न क्लीबं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥")
अर्थी। विवादकर्त्ता। फरियादी इति पारस्यभाषा॥ यथा, सभापते: कर्त्तव्यमाह कात्यायन:।
"अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिन:।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम्॥"
वादिनो भाषावादिन: उत्तरवादिनश्च॥ * ॥
स्वयं विवादाशक्तौ प्रतिनिधिमाह नारद:।
"अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥"
तयोर्वादिप्रतिवादिनो:। कात्यायन:।
"मनुष्यमारणे स्तेये परदाराभिमर्षणे।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे।
पारुष्ये कूटकरणे नृपद्रोहे तथैव च।
प्रतिवादी न दातव्य: कर्त्ता तु विवदेत् स्वयम्॥"
भ्रात्रादीतरस्य पक्षस्थितस्य दण्डनीयत्वमाह नारद:।
"यो न भ्राता पिता वापि न पुत्त्रो न नियोजित:।
परार्थवादी दण्ड्य: स्यात् व्यवहारेषु विब्रुवन्॥"
नारद:।
"पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुन:।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नर:॥"
प्रत्यर्थी यदि कञ्चित् कालं प्रार्थयते स लभते। अर्थी तु कालं प्रार्थयन् व्यर्थिलमेव हन्यादिति तेन कालो न प्रार्थनीय:। तदाह।
"प्रत्यर्थी लभते कालं त्र्यहं सप्ताहमेव च।
अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते॥"
क्वचित् प्रत्यर्थी कालं न लभते। याज्ञवल्क्य:।
"साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम्।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृत:॥"
अथ भाषापाद:। तत्र भाषास्वरूपमाहतु: कात्यायनबृहस्पती।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदु:॥
स्वल्पाक्षर: प्रभूतार्थो नि:सन्दिग्धो निराकुल:।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधक:॥
यदा त्वेवंविध: पक्ष: कल्पित: पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
कात्यायनोऽपि।
"वादस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत्॥"
तच्छोधनमाह बृहस्पति:।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
इति व्यवहारतत्त्वम्॥

वाद्यं, क्ली, (वद्+णिच्+यत्।) वादयन्ति यत्। बाजना इति भाषा। तत्पर्य्याय:। वादित्रम् १ आतोद्यम् २। तच्चतुर्व्विधं यथा,
"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम्॥"
इत्यमर:॥
"इदं ततादि चतुर्व्विधं चतु:प्रकारं वाद्यादिपञ्चकवाच्यम्।
'इदं चतुर्व्विधं वाद्यं वादित्रादिकनामकम्।'
वाद्यमितिपर्य्यन्तं प्रथमान्तं विशेष्यपदं इति कलिङ्गादय:। एतत्तो न विशेष्य:।" इति तट्टीकायां भरत:॥ * ॥

अथ वाद्यानि।

"वाद्येन राजते गीतं तालो वादित्रसम्भव:।
यतोऽयस्तेन वादित्रं तच्चतुर्विधमुच्यते॥
ततं सुषिरमानद्धं घनमित्थं चतुर्व्विधम्।
ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा॥
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम्॥" * ॥
तत्र ततं यथा,—
"अलाबनी ब्रह्मवीणा किन्नरी लघुकिन्नरी।
विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया॥
हस्तिका कुब्जिका कूर्म्मी सारङ्गी परिवादिनी।
त्रिस्वरी शततन्त्री च नकुलौष्ठी च ढंसवी॥
औडुम्बरी पिनाकी च नि:शङ्क: शुष्कलस्तथा।
गदावारणहस्तश्च रुद्रोऽथ स्वरमण्डल:।
कपिलासी मधुस्यन्दी घोषेत्यादि ततं भवेत्॥"
अलाबनी यथा,—
"कनिष्ठिका परिधिसम्मितच्छिद्रेण संयुत:।
दशयष्टिमितो दण्ड: खादिरो वैणवोऽथवा॥
अध:करभवागूर्द्ध्वं कुम्भवक्त्राभिशोभित:।
नवाङ्गुलादधश्छिद्रोपरि चन्द्रार्द्धसन्निभाम्॥
निवेश्य शुक्तिकां भद्रालाबुखण्डं निवेशयेत्।
द्वादशाङ्गुलविस्तारं हृद्रूपकं मनोहरम्॥
शुक्तिकावेधमध्येन दण्डच्छिद्रे तु निर्म्मिताम्।
अलाबुमध्यगां कीलीं कृत्वा स्थपात् कालिकाम्॥
तथा संवेष्ट्य तन्मध्ये कालिकां भ्रामयेत्तत:।
यथा स्यान्निश्चलाबुर्न्धश्च करभोपरि॥
पञ्चाङ्गुलिषु संत्यज्यालाबुं खण्डाञ्च बन्धयेत्।
केशाम्लनिर्म्मिता पट्टमयी सूक्ष्मतन्त्रायवा॥
समा: सूक्ष्मा दृढा तत्र तन्त्री देया विचक्षणै:।
एतल्लक्षणसंयोग्यादलाबनी प्रकीर्त्तिता॥
विन्दुना न स्पृष्टं तुम्बं नि:क्षिप्य वक्षसि।
मध्यमानामिकाभ्याञ्च वाद्या दक्षिणपाणिना॥
तारे मन्द्रे च घोषे च नि:क्षाणे विन्दुरिष्यते।
तुम्बीमूलं समुत्पश्य वामाङ्गुष्ठेन धारयेत्॥
ततस्ताभिस्तु सर्व्वाभि: स्वरव्यक्तिर्विधीयते।
त्रिस्वरी दक्षिण: पार्श्वीमध्यान्त चतु:स्वर:॥
अलावन्यां स्थिता ग्रीवा: षड्जषड्जादय: स्वरा:।
रागार्थक्रियया रागे भवेत् षड्जादिभेदत:॥

कं प्रस्तारविधान ...
हयप्रभावली ग्रीवा ...
प्रशस्ता सारदा देवी ...
इत्यभाषगी। अर्था
शोभम्॥ * ॥ सुषिरं यथा,
"वंशोऽथ पारीमुरली ...
लोहलीसुरलोऽशुखञ्च
शृङ्गं ...
यशो सुषिरभेदास्तु ...
वर्णना: कलन्त्रैकवर्णैर्दर्षि
देवन: ...
कीलकश्चोऽथ तीरवीर्दे
राजप्रत्यक्षो ...
कनिष्ठाङ्गुलिसुखेन ...
सिमपविद्याप्रधीन वस्.
वेष्टनेन ...
तवोऽष्योऽपि तथाधारा ...
तत्र प्रक्षा शिरोदेशानदोदि ...
फूत्कारस्तु कुर्व्वीत ...
पञ्चाङ्गुलानि संत्यज्य
कुर्य्यात्तथाष्टरन्ध्राणि वक्त्रं ...
वदरीबीजतुल्यानि ...
प्रान्तयोरन्तरं कार्य्यं ...
निरूपकेण कला देया तेन तुल्या
मध्याङ्गुलोऽये वंश:
पञ्चाङ्गुलानि ...
फूत्कारतारमध्य यावत्
तदेव नाम वंशस्य वोधितं
एकाङ्गुलो ह्यङ्गुलश्च त्र्यङ्गुलश्चतुर्
अतितारतरत्वेन वोधित:
त्रयोदशाङ्गुलो वेणुवर:।
निन्दितो ...
महानन्दस्तथा नन्दो
चत्वार उत्तमा वंशा ...
दशाङ्गुलो महानन्दो ...
द्वादशाङ्गुलमानस्तु त्रिस्वर ...
चतुर्दशाङ्गुलमितो जय ...
अष्टा दशो रविविंशु: क्रमाद
नैविध्यं प्रोढ़ता ...
माधुर्य्यमिति ५ ...
ग्रीत्कारवहुल: स्निग्धो विसर ...
अमधुरश्च विशेय: ...
तथा प्रयोगवाहुल्यमक्षता ...
दभिदोषैर्युतोऽतीव निन्दितो ...
स्थानकादिक्रियाभिज्ञो ममक्रिया ...
ग्रीवहस्त: कलाभिज्ञो वादको ...
प्रसृतिर्वहुसतिश्च सुविचक्षणो ...
सुस्थानकं सुस्वरं च अङ्गुलीवाद ...
सममागमकप्रासं रागरागाङ्ग ...
क्रियाभाषाविभाषास्व ...
स्वस्थाने चापि द्रुतस्थाने वादयेत् ...
गानु या स्थानदाड्यं तदो ...

"… वर्द्धिता: ।"
इति सं० ॥
… विशेषः । गोपुच्छो मृदङ्गो मुरजो
… अवनद्धानां शब्दविशेष आ-
… वर्णः वर्ण्यते । एतेषां विस्तरभया-
● । वाद्यं यथा,—
… इत्युक्तं भरतादिभि: ॥"
।
… विशेषो दर्शयामि
… शास्त्रनिबन्धन: ।
… स्यात् हुडुक्का हुडुक्का
… ढक्का दौण्डिकाभिधा ॥
… डमरु: कुम्भी लाम्बाभिधा
… दुन्दुभी च ततः ।
… स्यात् … पाणवाह्वं
… वाद्यमिदं जगत्त्रयम् ॥
… कुर्यात् …
… वाद्यमिदं भवेत् । ● ।
… आदि: श्रेष्ठो … ध्वनिः ।
… वाद्यो गम्भीरध्वनिकृत्: ॥
… प्रमाणन्तु दैर्घ्यमस्य विधीयते ।
… वामभागे चाष्टाङ्गुलम् ॥
… भवेद्धीनमिति … वा ।
… गच्छेव एवं भवेत् ।
… भवेत् वक्त्रं चर्म करणं मतम् ।
… स्वयंभूतिव मृदङ्ग: परिकीर्तित: ॥
… वाद्यं मार्दङ्गिकं महती ।
… भक्तं … च सक्तम् ॥
… स्वीयं ओदनीं …मितम् ।
… पिष्टलेप: स्वरलिखयते ॥
… पूरिका कृत्वा लेपं दद्याच्च दक्षिणे ।
मर्दल: प्रोक्त: सर्ववाद्योत्तमो मत: ।
… संयोगमासाद्य सर्वं वाद्यञ्च शोभते ।
… बोलकादि दलमष्टाङ्गुलं विदु: ॥ ● ॥
… मिति ज्ञेया: पाटवर्णा मृदङ्गजा: ।
दं टिं धिक्कटधाद्यो ताकं दं दं थोगं धिधि ॥
… खिं नं गटं दं धा कूटपाटा मता अमी ।
… थों टिं तक्क धीं दीं दं दं धिग् थीं ततं
तधि ॥
… नं थं धिदीं तधि पाटवर्णे क्रमः ।●।
… च यतिमाने पाटस्वर: । दगतथेणा
… थों धी धिक ताधिका थोणा थोणां
… धिक्का थोता दगत ताधि धि धिधि-
… कद्रमा थोधिक थोणां धोता दगतता
… दगतता धि । इति यतिमानपाट-
… ● ।
… तिरोड़ाख्यवर्णादी मल्लारि: रूपकं ध्रुवम् ।
… मारिगोली च नादश्च कथितं तथा ॥
… एवं हुड्डुक्कश्च प्रबन्धा द्वादश स्मृता: ।"
… एं चाल इत्येतावली यति: ।● ।
… वाद्यं यथा । दां तथो तधिक तधिक दं
… दं धा थोधि थोधि तत तत थवि थवि

दिक्की दिक्की टटुमकि टटुमकि मरटकु मरटकु
अरटकु अरटकु नगिमगि नगिमगि दां दां दं
दं दीं दीं दं ना मथा । इत्योवाद्यम् । ● ।
आवर्त्तवाद्यं यथा । दं थाम: दं थाम: दिकि
दिकि दिगं दं थाम: । इत्यावर्त्तवाद्यम् ।●।
गजरवाद्यं यथा । थोकटे च नेम टिं कें गथो
गथोङ्ग टेङ्ग थोगतकि धिकतकि धिक टेङ्गन
धि धि कटतक थोक तधि कटतक कतथो
गतङ्गोम् । इत्येकताल्यां गजर: । ● । रूपक-
वाद्यं यथा । तक धिक तक धिक थरितकि
थरितकि धिक दं थाम: । इति रूपकवाद्यम् ।
ध्रुवकवाद्यं यथा । तक तकट धिक धिकट ।
इति निःसारुकताले ध्रुवक: । ● । गजथो यथा ।
तधिद्धि धिकतक तधिगन गं था था दें तथा
टेंगन । इत्येकताल्यां गजथ: ।●। मारिगोली
यथा । थोङ्ग टेन तक धिक तकाधक तकथो
थटङ्गन थटङ्गन थोगककथो: । इति प्रथम-
लक्ष: । ● । टेनको: धिक्कोट: टेन टेन दक्क
तगदक धिक तदिदक दं गदं गत्तो गत्तोक
तक तक धिकत धिकत थोट्टिण थोटिण थटेगल
त्रोग गण त्रोग त्रोहट गें टगें त्रोहटण
इत्यस्य छन्दनम् । इति मारिगोली । ● ।
नादो यथा,—
"हांकारत्रितयं पूर्वं दां धिगिति ततत्त्रयम् ।
दां दां धिकत्रयं यत्र इति नाद: प्रयोप्रिय: ॥"
इति नाद: ॥
"हतं मानसमारब्धं शुद्धं कूटविनिर्म्मितम् ।
सप्तपञ्चमयं वाद्यं करिभं तदिहोच्यते ॥"
हतमानसहात् प्रतिताले यथा । ततत ततत
तक्कि तक्कि दिदं धिगतत्तो धिगतत्तो धिक
धिक धिक धिक धिक तगि तगमि थो थो धि
धि धि: दां दां धिक थो थो थो कत्थोङ्ग
तत्थिथो तत्थिथो थोङ्ग थोङ्ग केटि केटि थोङ्ग
थोङ्ग तटि तटि तटुक गीं गीं धगि धगि तत
तथे तथे तत तगि डोण्डो थोग थोग थों थोग
गथो गथो ततता ।
"इति सप्तपदान्याहु: कथितं वाद्यपण्डिता: ।
प्रतितालेन तालेन पाटवर्णसमागत: ॥
शम्भुस्वयंपतिना पूर्वमुक्तं प्रीतास्तदर्त्तने ।
सुधर्म्मारक्षणार्थञ्च करीभं प्रकटीकृतम् ॥"
प्रहरणं यथा । थोगक्ता तद्धिकाथा गकटग
गीं दं थोग दिद्धिक धिक धिकटेण । इत्येक-
ताल्यां प्रहरणम् ।
"वाद्यं विमुच्यते येन छन्दनं तन्निगद्यते ।"
यथा । तद्धिथो दिण टेण तत: । इति छन्दनम् ॥
"कलाशो विकलाशश्च टाकली चार्द्धटाकली ।
त्रोकाडा कलिका चैव गोसदी सुरजस्तथा ॥"
ग्वलात्तुजवाद्यं त्रिकवाद्यम् । मर्द्दल: त्रयोदशा-
ङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणसुख: । सुरज-
स्तष्टादशाङ्गुलवामसुख: सप्तदशाङ्गुलदक्षिण-
सुख: । मर्द्दलसुरजयोरयं भेद: । ● । धनं
यथा,—

"कनकं किंकणं चैव विविधं घनवाद्यकम् ।
गीतादमसमवदनं विज्ञं तालनं चनम् ॥
करताल: कांस्यतालो जयघण्टाच शुक्तिका ।
कण्ठिका पटवाद्यञ्च पट्टाघोषञ्च घर्घरम् ॥
झञ्झातालञ्च मञ्जीरकर्त्तरी उरु इत्यपि ।
द्वादशैते समीक्षित्त कथिता घनसंज्ञका: ॥
त्रयोदशाङ्गुलव्यासौ शुद्धकांस्यविनिर्म्मितौ ।
मध्यमुद्रौ कमलाकारौ तन्मध्ये रज्जुगुम्फितौ ॥
पद्मिनीपत्रसदृशौ कराभ्यां रज्जुयन्त्रितौ ।
करतालाह्वयौ वाद्यौ पाटि मानटकैरिति ॥
यद्वा त्रयोदशयवव्यासं चक्रयवोन्नितम् ।
यवयवकगम्भीरं मध्ये च यवमन्तकम् ॥
विस्तृतं वर्त्तुलं निम्नं यवत्रयमितं सत: ।
एकतो मध्यदेशे च छिद्रसिद्धमसाद्भुतिम् ॥
अस्त्ररूपीतस्वर्गतुङ्ककांस्यविनिर्म्मितम् ।
संरक्ताङ्गुलिस्रावस्थदीर्घमधुरध्वनिम् ॥
घना निसा त्रिसंरक्तं दृढ़ं शुद्धं मनोहरम् ।
काश्मीरादिसमुद्भूतं तालमाहुर्मनीषिण: ॥
सुनादं दक्षिणं तालं ततो हीनञ्च वामकम् ।
कुर्व्वीत तद्वयं कार्य्यं तज्ज्ञस्तद्युक्तयोगिन: ॥
वामहस्तस्यतालस्य मध्यमं मणिनादिनम् ।
तिर्य्यग्दक्षिणतालस्य परिशंषेण ताडयेत् ॥
तालादौ वादयेद्देव प्रुतदीर्घलघुद्रुतै: ॥"
इति करतालविशेष: । कर्णरीघनविशेष: । उरु-
रच घनविशेषो दन्तरेफान्तपुंलिङ्ग: । अन्येषां
लक्षणं विस्तरभयान्नोक्तम् । ● ।
"रुक्मिण्या: सत्यभामाया: कालिन्दीमित्र-
विन्दयो: ।
जाम्बवत्या नाग्नजित्या लक्ष्मणाभद्रयोरपि ॥
लक्ष्मणाद्यष्टमहिषीणां पुरीदाहमहोत्सवे ।
ततं शुषिरमानद्धं घनञ्च श्रुगपज्जना: ॥
अवादयन्समंख्यातमिति पौराणिकी श्रुति: ।
ततं वाद्यन्तु देवानां गन्धर्व्वाणाञ्च शौषिरम् ॥
आनद्धं राक्षसानान्तु किन्नराणां घनं विदु: ।
निजावतारे गोविन्द: सर्व्वमेवानयत् क्षितौ ॥
यावन्ति वाद्यभाण्डानि रामरावणयोर्युधि ।
तावन्ती नाभवन् सेना: कुरुपाण्डवसङ्गरे ॥"
किञ्च ।
"लिलिम्प ज्वाकम्पनतोमरेण
रणे सुरारेर्म्मथनात् सुरेश ।
अभूत्तताद्यैरपि सिंहनादै:
सा पञ्चशब्दीति कथाप्रवाद: ॥
युद्धे सैन्यानां योऽहङ्कारख: स सिंहनाद: ।
ततादिभिरेभिश्चतुर्भिर्वाद्यैश्चमूनां सिंहनादेन
पञ्चशब्दीवाद्यमभूत् । सिंहनादेन सह वाद्यं
पञ्चविधं भवतीत्यर्थ: । इति सङ्गीतदामोदर: ॥
विष्णुगृहे वाद्यकरणफलं यथा,—
"अन्योपचारैर्विविधैर्घृतक्षीराभिषेचनै: ।
गीतवादित्रनृत्याद्यैस्तोषयस्वाच्युतं नृप ॥
पुष्पराजिम गोविन्दं गीतनृत्यरवोत्सवै: ।
भूपचामरकैर्भक्त्या तोषयाच्युतमव्ययम् ॥
येषां न वित्तं तैर्भक्त्या मार्ज्जनाद्युपलेपनै: ।

[illegible]यिर्ता मनयस्तायो नैमंते क्रूरकर्म्मकृत् ।
[illegible]मद्वा कर्मवित्तच पीयमाने जते प्रिये ॥
[illegible]मन्य पावके भाति वार्य्रीकूपतड़ागकम् ।
[illegible]मिदार्हं मदा कुर्म्मान् समाद्यपतुष्पदाम् ॥
[illegible]र्हंते पीयमानन्तु आत्मना दुःखितो भवेत् ।
[illegible]यापि तन्नर्न पीत्वा पतिं मक्षाति वामन: ॥
इति देवीपुराणे नन्दाकुण्डप्रवेशाध्याय: ॥
[illegible]स्वरयपर्ने यथा,—
[illegible] उवाच ।
[illegible]नहामोदकयापीनां हनामामिह मन् पलम् ।
[illegible]हैन [illegible]सुमङ्गलपीपत: ॥
यम उवाच ।
[illegible]र्म्मन्तार्थन्त वामस्य पद्मस्य द्विजोत्तम ।
[illegible]कार्म शुभभूतानु परमापनन्नं सुगनम् ॥
[illegible]स्वना: [illegible] बाला [illegible] मघवाचना: ।
[illegible] संसयन्ति सनाप्रयम् ।
[illegible] नारकं वीर्य्यं पाप मानि जनाप्रये ।
[illegible] शाम्त्रि वार्य्यं [illegible] ॥
[illegible] नदाेन्तु तरिन्नं यस्य निष्ठति ।
[illegible] नस्य सरन्ति मनीषिण: ॥
[illegible] द्विदिरवाने तु वार्य्यं प्रतिनिष्ठति ।
[illegible] वर्न [illegible] मानवा: ॥
[illegible] चैव यो [illegible] तु तरिन्नं यस्य निष्ठति ।
[illegible] न वर्षं [illegible] ॥
[illegible] [illegible] दिवानिशम् ॥
[illegible] नङ्गलमिह कार-
येत् ।
[illegible] [illegible] न संशय: ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] न यौवने ॥
[illegible] [illegible] ॥
[illegible] [illegible] न [illegible] ।
[illegible] [illegible] ।
[illegible] [illegible] संशय: ।
[illegible] [illegible] ।
[illegible] [illegible] न कार-
येत् ।
[illegible] [illegible] ।
[illegible] [illegible] ।
[illegible] [illegible] वचनम् ।"
इति [illegible] ।
[illegible], पुं, ([illegible] । वा [illegible] ।
[illegible] ।) [illegible]-
[illegible] । इति [illegible] ॥
[illegible], स्त्री, ([illegible] । [illegible] + "[illegible]-
[illegible] ।" [illegible] । इति [illegible] ।) [illegible]-
[illegible] । [illegible] । १ । ३ । १२६ । [illegible]
[illegible] । (यथा, [illegible] ३ । [illegible] ।
[illegible] [illegible] ।

वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलम् ॥"
वप्+ण्यत् ।) वपनीये च, त्रि ॥
वामं, क्ली, (वा+"अर्त्तिस्तुसुहुसृधृक्षीति ।" उणा॰ १ । १४०। इति मन् ।) धनम् । इति मेदिनी । मे, २८ । वास्तुकम् । इति जटाधर: ॥
वाम:, त्रि, (वमति वम्यते वेति । वम उद्गिरणे + "ज्वलितिकसन्तेभ्यो ण: ।" ३ । १ । १४० । इति ण: । यद्वा, वातीति । वा गतिगन्धनयो: + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदीति । उणा॰ १ । १४०। इति मन् ।) वल्गु: । (यथा, रघौ । ७ । ५७ ।
"स दक्षिणं तूणमुखेन वामं
व्यापारयन् हस्तमलक्ष्यताजौ ।
आकर्णकृष्टा सकृदस्य योद्धु:
मौर्व्वीव बाणान् सुषुवे रिपुघ्नान् ॥")
प्रतीप: । (यथा, वैराग्यशतके । ५३ ।
"दुःखैर्गोपान्तेऽन्तं पाल्यन्ते प्रत्यहञ्च लाल्यन्ते ।
वामा: स्त्रियो विमूढैरुपधन्नाना: सुखं विमु-
ञ्चम् ॥"
यथाच, साहित्यदर्पणे । १० ।
"वामा मृगमदो विड्म्बरचित: कीदृक् सारो
वर्त्तते ॥")
सव्य: । इत्यमरमेदिनीकारौ ॥ (यथा, राज-
तरङ्गिण्याम् । १ । २ ।
"भालं वह्निशिखाङ्कितं दधदधिस्त्रोतं वहन्
सम्भृत-
क्रीडन् कुञ्जनिजृम्भितं जलधिजच्छायाच्छ-
कण्ठच्छवि: ।
वक्षो बिभ्रदहीनकञ्चुकचितं भक्ताङ्गनार्द्धस्य वो
भाग: पुष्पवनस्य वोऽस्तु यस्य वामोऽथवा
दक्षिण: ॥")
अधम: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥
वामहस्तेन अन्नपानभोजननिषेधो यथा ।
हारीत: ।
"न पिबेन्न च भुञ्जीत द्विज: सव्येन पाणिना ।
नैकहस्तेन च जलं शूद्रेणावर्ज्जितं पिबेत् ॥"
इति आह्निकतत्त्वम् ।
अन्यच्च ।
"न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा जलम् ।
नोत्तरेदनुपस्पृश्य नाप्सु रेत: समुत्सृजेत् ॥"
इति कौर्म्मे १५ अध्याय: ॥
"वाम: वामो [illegible] ।
[illegible] वामाचारादिप्रवर्त्तक: ॥"
इति कालिकापुराणे ७७ अध्याय: ॥
([illegible] । यथा, अथर्व्ववेदे । ६ । १३ । २ ।
"[illegible] वर्द्धं [illegible] ।
वामं [illegible] ।"
"वामं [illegible] ।" इति [illegible] सायण: ।
[illegible] [illegible] ।
[illegible] ॥)
वाम:, पुं, ([illegible] । वा [illegible] + मन् ।)
हर: । (यथा, महाभारते । १३ । १७ । ७ ।

"प्रजापतेस्ते श्वशुरस्य साम्नां
नियमितो यज्ञमखोऽसुरद्विड ।
वयञ्च तत्राभिसराम वाम । ते
यद्याचिताश्मो विदुधा प्रशस्ति ।")
कामदेव: । पयोधर: । इति मेदिनी ।
(श्रीकृष्णस्य भद्रागर्भोत्पन्न: पुत्रविशेष: ।
भागवते । १० । ६१ । १७ ।
"संग्रामजित् बृहत्सेन: [illegible]
जय: सुभद्रो भद्राया वाम आयुश्च [illegible]
वामलूर् [पु] स्त्री, (वामा [illegible]
यस्या: ।) नारी । इति राजनिर्घण्ट: ।
वामदेव:, पुं, (वाम एव देव: ।) शिव: ।
[illegible]मर: । १ । १ । ३४ ॥ (यथा, [illegible]
१३ । १७ । ७० ।
"वामदेवश्च वामश्च प्राग्दक्षि[illegible]
ऋषिप्रभेद: । यथा, पञ्चदश्याम् । ८ । [illegible]
"आगामिप्रतिबन्धश्च वामदेवे समीरित: ।
एकेन जन्मना क्षीणो भरतस्य [illegible]
वामन:, पुं, (वामयति वमति वा
वम+णिच्+ल्यु: ।) इत्युणादिवृत्ति: ।
भागवते । ५ । २० । १६ ।
"[illegible]
जगद्गुरुणा [illegible] ।
ऋषभ: पुष्करचूडो वामनोऽपराजित:
सकललोकस्थितिहेतव: ॥") दिग्ग[illegible]
मर: । २ । ६ । ३६ ॥ (यथा, रघौ ।
"व्योमपश्चिमकलास्थितेन वा
पङ्कशेषमिव धर्म्मपल्वलम् ।
राज्ञि । मत्कुलमभूत् समागते
वामनार्च्चिरिव दीपभाजनम् ।"
यथाच तत्रैव । १ । ३ ।
"प्रांशुलभ्ये [illegible]
खर्ब्बोदरश्च: । हरि: । इति मेदिनी ।
(यथा, महाभारते । १३ । १४९ ।
"उपेन्द्रो वामन: प्रांशुरमोघ: [illegible]
शिव: । यथा, महाभारते । १३ । १७ [illegible]
"वामदेवश्च वामश्च प्राग्दक्षिण[illegible]
अन्नभेद: । यथा, अथर्व्ववेदे । ६ । [illegible]
"[illegible] मित्रेण [illegible]
समर्थं वाजिनं विन्ध्यावामनं
[illegible] पुत्रभेद: । यथा, हरिवंशे । ६ ।
"[illegible]
भुजङ्गभेद: । यथा, महाभारते । १ ।
"कालियो मणिनागश्च [illegible]
नागश्चापो निमरक [illegible]
[illegible] परिकीर्त्तित: । यथा,
५ । १०२ । १० ।
"[illegible]
[illegible]
हिरण्यगर्भस्य पुत्रभेद: । [illegible]
४३३ । ६ ।
"[illegible]

…दिग्गजविशेषः । यथा, महाभारते ।
। १४ । १७—१८ ।
"क्रौञ्चद्वीपे महाराज ! क्रौञ्चो नाम महा-
गिरिः ।
क्रौञ्चात् परो वामनको वामनादन्धकारकः ।
अन्धकारात् परो राजन् ! मैनाकः पर्वतोत्तमः ।
मैनाकात् परतो राजन् ! गोविन्दो गिरि-
रुत्तमः ।"
…दैत्यः । यथा, महाभारते । २ । ९ । १६ ।
"…नस्तु वामनो नाम्ना सर्व्वदाप्रतीपकम् ।"
…आङ्गवत्यात्मजः । यथा, देवीभागवते । १ ।
। ७ ।
"…वामनाख्यं वामनं वटु धारिणम् ।
…र्बलिं याचितवान् तु जीवन ।")
…हरेः पञ्चमावतारः । तस्य प्रादुर्भावो यथा ।

श्रीमहादेव उवाच ।

"प्रह्लादस्य सुतो धर्म्मे विरोचन इतीरितः ।
तस्य पुत्रो महाबाहुर्बलिर्बलवतां वरः ॥
… स धर्म्मविदां श्रेष्ठः सत्यवादी जितेन्द्रियः ।
…देवः प्रियवादी भक्तो नित्यं धर्म्मरतः शुचिः ॥
…जित्वा सकलान् देवान् …गतक-
ल्मषान् ।
त्रैलोक्यान् स्ववशे स्थाप्य राज्यं चक्रे महाबलः ॥
इन्द्रादित्रिदशानाञ्च विद्रुताः स्वपदच्युताः ।
…राज्यं सुरपतिं दृष्ट्वा तस्य पितादितिः ॥
…तपो भार्य्यया सार्द्धं तपश्चेये हरिं प्रति ।
…दित्या सह धर्म्मात्मा पयोव्रतसमन्वितः ॥
…र्च्चयामास देवेशं पद्मनाभं जनार्द्दनम् ।
…तो वर्षसहस्रान्ते तेन संपूजितो हरिः ॥
…दैवाविरभूत्तस्य देवा सह सनातनः ।
…तं दृष्ट्वा जगन्नाथं हर्षनिर्भरचेतसा ॥
…भार्य्यया सह नमस्कृत्य तुष्टाव च द्विजोत्तमः ॥

कश्यप उवाच ।

नमो नमस्ते लक्ष्मीश ! सर्व्वज्ञ जगदीश्वर ।
सर्व्वात्मन् सर्व्वदेवेश ! दुष्टसंहारकारक ॥
…इत्यादिस्तुतिभिः सम्यक् स्तूयमानो महर्षिणा ।
प्राह गम्भीरया वाचा परितुष्टो जनार्द्दनः ॥
सन्तुष्टोऽस्मि द्विजश्रेष्ठ ! त्वया भक्त्या समर्च्चितः ।
वरं वृणीष्व भद्रं ते करोमि तव वाञ्छितम् ॥
ततः प्राह हृषीकेशं भार्य्यया सह कश्यपः ।
पुत्रत्वं मम देवेश संप्राप्य त्रिदशां हितम् ॥
कुरुष्व बलिना देव त्रैलोक्यं निर्ज्जितं बलात् ।
इन्द्रस्यावरजो भूत्वा उपेन्द्र इति नामतः ॥
येन केनाप्युपायेन बलिं निर्ज्जित्य मायया ।
त्रैलोक्यं मम पुत्राय देहि शक्राय शाश्वतम् ॥
इत्युक्तस्तेन विप्रेण तथेत्याह जनार्द्दनः ।
संपूज्यमानस्त्रिदशैस्तत्रैवान्तरधीयत ॥
एतस्मिन्नन्तरे काले कश्यपस्य महात्मनः ।
अदित्या गर्भमापेदे भगवान् भूतभावनः ॥"

इति पाद्मोत्तरखण्डे ८८ अध्यायः ॥

श्रीशिव उवाच ।

"अथ वर्षसहस्रान्ते सर्व्वलोकमहेश्वरम् ।
अदितिर्जनयामास वामनं विष्णुमच्युतम् ॥
श्रीवत्सकौस्तुभोरस्कं पूर्णेन्दुसदृशाननम् ।
सुन्दरं पुण्डरीकाक्षं ज्ञानसर्वस्वं हरिम् ॥
बटुवेशधरं देवं सर्व्ववेदान्तगोचरम् ।
शिवपालकदण्डादिचिह्नाढ्यं सर्व्वगमीश्वरम् ॥
तं दृष्ट्वा देवताः सर्व्वे शक्रपुरोगमाः ।
स्तुत्वा महर्षिभिः सार्द्धं नमश्चक्रुर्महौजसः ॥
ततः प्रसन्नो भगवान् प्रोवाच सुरसत्तमान् ।
किं कर्त्तव्यं मया चाद्य तद्ब्रवीत सुरोत्तमाः ॥
ततः प्रहृष्टास्त्रिदशास्तमूचुः परमेश्वरम् ।
अस्मिन् काले बलिर्यज्ञं करोति मधुसूदन ॥
प्रथमं दानकालोऽयं तस्य दैत्यपतेः प्रभो ।
याचित्वा त्रिदिवं लोकं तस्मात् दातुमर्हसि ॥
इत्युक्तस्त्रिदशैः सर्व्वैराजगाम बलिं हरिः ।
यागदेशं समागात्तु ऋषिभिः सार्द्धमव्ययः ॥
अभ्यागतं वटुं दृष्ट्वा सहसोत्थाय दैत्यराट् ।
अभ्यागतं स्वयं विष्णुं महाहर्षसमन्वितः ॥
पूजयामास विधिना निवेश्य कुसुमासने ।
प्रणिपत्य नमस्कृत्य प्राह गद्गदया गिरा ॥
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम ।
त्वामर्च्चयित्वा विप्रेन्द्र ! किं करोमि तव प्रियम् ॥
आगतोऽसि यदर्थं त्वं मामुद्दिश्य द्विजोत्तम ।
तत् प्रयच्छामि ते शीघ्रं ब्रूहि वेदविदां वर ॥
ततः प्रहृष्टमनसा तमुवाच महीपतिम् ।
शृणु राजेन्द्र ! वक्ष्यामि ममागमनकारणम् ॥
अग्निकुण्डस्य पृथिवीं देहि दैत्यपते मम ।
मम त्रिविक्रमं पादं मह्यं सन्दातुमर्हसि ॥
सर्व्वेषामेव दानानां भूमिदानमनुत्तमम् ।
यो ददाति महीं राजन् विप्रायाकिञ्चनाय वै ।
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः ।
न भूमिदानसदृशं पवित्रमिह विद्यते ॥
तस्माद्भूमिं महीपाल प्रयच्छ त्रिपदं मम ।
एतदल्पमहीं दातुं मा विशङ्क महीपते ॥
जगत्त्रयप्रदानन्तत् मम भूप भविष्यति ।
ततः प्रहृष्टवदनस्तथेत्याह महीपतिः ॥
तस्मै महीप्रदानन्तु कर्त्तुं मेने विधानतः ।
तं दृष्ट्वा दैत्यराजानं तदा तस्य पुरोहितः ॥
उशना अब्रवीद्वाक्यं मा राजन् दीयतां मही ।
एष विष्णुः परेशो यो देवैः संप्रार्थितो नृप ! ॥
वञ्चयित्वा महीं सर्व्वां ततः प्राप्तुमिहागतः ।
तस्मान्मही न दातव्या तस्मै राजन् महात्मने ॥
अन्यमर्थं प्रयच्छस्व वचनान्मम भूपते ! ।
ततः प्रहस्य राजासौ तं गुरुं प्राह धैर्य्यतः ॥
प्रीतये वासुदेवस्य पुण्यं सर्व्वं कृतं मया ।
अद्य धन्योऽस्म्यहं विष्णुः स्वयमेवागतो यदि ॥
तस्मार्पयामि राज्यं हि जीवितञ्च महत्मम ।
तस्मादस्मै प्रयच्छामि त्रीन् लोकानपि माचिरम् ॥
इत्युक्त्वा भूपतिस्तस्य पादौ प्रक्षाल्य भक्तितः ।
वाञ्छितां प्रददौ भूमिं वारिपूर्व्वं विधानतः ॥
परिणीय नमस्कृत्य दत्त्वा वै दक्षिणां वसु ।
उवाच तं वटुं विप्रं प्रहर्षेणान्तरात्मना ॥
धन्योऽस्म्यनुगृहीतोऽस्मि तव दत्त्वा महीं द्विज ।
यदिष्टं तव विप्रेन्द्र तद्गृहाण महीमिमाम् ॥
पञ्चाशत्कोटिविस्तीर्णां सकाननमहीधराम् ।
ससागराञ्च महीं तां सद्देवासुरमानुषाम् ॥
पादेनैकेन पृथ्वीं विक्रम्य मधुसूदनः ।
उवाच तं दैत्यराजं किं करोमीति शाश्वतम् ॥
तत्र त्रैविक्रमं रूपमीश्वरस्य महौजसः ।
सम्यग्ज्ञातुमपि देवानामगोचरञ्च महात्मनाम् ॥
न वक्तुमपि शक्यं स्यात् ब्रह्मणः शङ्करस्य च ।
तत्पदं पृथिवीं सर्व्वामाक्रम्य गिरिजे शुभे ॥
अतिरिक्तं समभवत् शतयोजनमायतम् ।
दिव्यं चक्षुर्ददौ तस्मै दैत्यराज्ञे सनातनः ॥
तस्मै सन्दर्शयामास स्वकं रूपं जनार्द्दनः ।
तद्विश्वरूपं देवस्य दृष्ट्वा दैत्येश्वरो बलिः ॥
प्रहर्षमतुलं लेभे आनन्दाश्रुपरिप्लुतः ।
दृष्ट्वा देवं नमस्कृत्य स्तुत्वा स्तुतिभिरेव च ॥
प्राह गद्गदया वाचा प्रहर्षेणान्तरात्मना ।
धन्योऽस्मि कृतकृत्योऽस्मि त्वां दृष्ट्वा परमेश्वरम् ॥
लोकत्रयं ममैवैतत् गृहाण मधुसूदन ।
अथ सर्व्वेश्वरो विष्णुर्द्वितीयं पदमव्ययम् ॥
ऊर्द्ध्वं प्रसारयामास ब्रह्मलोकान्तमच्युतः ।
सजनस्तपलोकं तं सर्व्वदेवसमावृतम् ॥
पादेनापरिपूर्णोऽभूदच्युतः स शुभानने ।
ततः पितामहो दृष्ट्वा चक्रपद्मादिचिह्नितम् ॥
श्रीपादं देवदेवस्य हर्षसंभ्रमचेतसा ।
धन्योऽस्मीति वदन् ब्रह्मा गृहीत्वा स्वं कम-
ण्डलुम् ॥
भक्त्या प्रक्षालयामास तत्र संस्थितवारिणा ।
अक्षय्यमभवत्तोयं तस्य विष्णोः प्रभावतः ॥
तत्तीर्थं मेरुशिखरे प्रापतद्विमलं जलम् ।
जगतः पावनार्थाय चतुर्द्दिक्षु प्रवाहितम् ॥
सीता चालकनन्दा च चक्षुर्भद्रा यथाक्रमात् ॥
प्रसङ्गादिदमाख्यातं गङ्गाजन्म त्वनुत्तमम् ॥
ततो नारायणः श्रीमान् बलेर्दैत्यपतेः प्रभुः ।
रसातलं शुभं लोकं प्रददौ भक्तवत्सलः ॥
सर्व्वेषां दानवानाञ्च नागानां यादसाम्पतेः ।
राजानञ्च बलिञ्चक्रे यावदाहूतसंप्लवम् ॥
प्रतिगृह्य बलेर्लोकान् वटुवेशेन दैत्यहा ।
महेन्द्राय ददौ प्रीत्या काश्यपिर्व्विष्णुरव्ययः ॥
ततो देवाः सगन्धर्व्वा ऋषयश्च महौजसः ।
तुष्टुवुः स्तुतिभिर्दिव्यैः पूजयामासुरच्युतम् ॥
संक्षिप्य तन्महद्रूपं तेषां सन्दर्शनाय वै ।
संपूज्यमानस्त्रिदशैरन्तर्धानं ययौ हरिः ॥"

इति पाद्मोत्तरखण्डे ८९ अध्यायः ॥ * ॥

तदवतारप्रकारान्तरं यथा,—

नारद उवाच ।

"सांप्रतं भगवान् विष्णुस्त्रैलोक्याक्रमणं वपुः ।
करिष्यति जगत्स्वामी बलेर्बन्धनमीश्वरः ॥
तत् कथं पूर्व्वकालेऽपि विभुरासीत् त्रिविक्रमः ।
कस्य वा बन्धनं विष्णुः कृतवांस्तच्च मे वद ॥

पुलस्त्य उवाच ।

श्रूयतां कथयिष्यामि योऽयं प्रोक्तस्त्रिविक्रमः ।
यस्मिन् काले समभूत यञ्च वञ्चितवानसौ ॥

आसीद् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः ।
दनुगर्भसमुद्भूतो महाबलपराक्रमः ॥
स समाराध्य वरदं ब्रह्माणं तपसासुरः ।
अवध्यत्वं सुरैः सर्व्वैः प्रार्थयन् स तु नारद ! ।
तद्वरं तस्य च प्रादात् तपसा पङ्कजोद्भवः ।
परितुष्टः स च बली निर्ज्जगाम त्रिविष्टपम् ॥
चतुर्थस्य कलेरादौ जित्वा देवान् सवासवान् ।
धुन्धुः शक्रत्वमकरोत् हिरण्यकशिपौ सति ॥
तस्मिन् काले स बलवान् हिरण्यकशिपुस्ततः ।
चचार मन्दरगिरौ दैत्यं धुन्धुं समाश्रितः ॥
ततोऽसुरा यथाकामं विहरन्ति त्रिविष्टपे ।
ब्रह्मलोके च त्रिदशाः संस्थिता दुःखसंयुताः ॥

ततोऽमरान् ब्रह्मसदोनिवासिनः
श्रुत्वा च धुन्धुर्दितिजानुवाच ह ।
गच्छाम दैत्या वयमप्यकस्य
सदो विजेतुं त्रिदशान् सशक्रान् ॥
इति धुन्धुवाक्यन्तु निशम्य दैत्याः
प्रोचुर्न नो विद्यति लोकपाल ।
गतिर्यया याम पितामहाजिरं
सुदुर्गमोऽयं परतो हि मार्गः ॥
इतः सहस्रैर्ब्बहुयोजनाख्यै-
र्लोको महर्नाम महर्षिजुष्टः ।
येषां हि नासापवनोद्धितेन
दह्यन्ति दैत्याः सहसेक्षितेन ॥

तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान् ।
गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान् ॥
कथन्तु कर्म्मणा केन गम्यते दानवर्षभाः ।
कथं तत्र सहस्राक्षः संग्रामः सह दैवतैः ॥
इति धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्नचोऽधिपम् ।
कर्म्म तत्र वयं विद्मः शुक्रस्तद्वेत्त्यसंशयम् ॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम् ।
पप्रच्छ शुक्र किं कर्म्म कृत्वा ब्रह्मसदोगतिः ॥
ततोऽस्मै कथयामास दैत्याचार्य्यः कलिप्रियः ।
शक्रस्य चरितं धीमान् पुरा वृत्रारिपोः किल ॥
शक्रः शतन्तु पुण्यानां क्रतूनामजयत् पुरा ।
दैत्येन्द्र ! वाजिमेधानां तेन ब्रह्मसदो गतः ॥
तद्वाक्यं दानवपतिः श्रुत्वा शुक्रस्य वीर्य्यवान् ।
यष्टुं तुरगमेधानां चकार मतिमुत्तमाम् ॥
आमन्त्र्याह्वासुरगुरुं दानवांश्चाप्युत्तमान् ।
प्रोवाच यक्ष्येऽहं यज्ञैरश्वमेधैः सदक्षिणैः ॥
आहूयन्ताञ्च निधयश्चाप्सरस्यश्च गुह्यकाः ।
प्रयामो देविका यत्र गङ्गा प्राचीनवाहिनी ।
सा हि पुण्या सरिच्छ्रेष्ठा सर्व्वसिद्धिकरी शिवा ।
जलं प्राचीनमासाद्य वाजिमेधान् यजामहे ॥
इत्थं सुरारिर्वचनं निशम्यासुरयाजकः ।
बाढ़मित्यब्रवीद्धृष्टो निश्चयः साध्विति स्म सः ॥
ततो धुन्धुर्द्देविकायाः प्राचीने पापनाशने ।
भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः ॥

ततोऽग्निधूमेन मही समेता
व्याप्ता दिशः खं विदिशश्च पूर्णाः ।
तेनोग्रगन्धेन दिवस्पृशेन
महर्षयो ब्रह्मलोके महर्षे ।

तं गन्धमाघ्राय सुरा विलग्ना
जानन्त धुन्धुं हयमेधदीक्षितम् ।
ततः शरण्यं शरणं जनार्द्दनं
जग्मुः सशक्राः शरणः परायणम् ॥
प्रणम्य वरदं देवं पद्मनाभं जनार्द्दनम् ।
प्रोचुः सर्व्वे सुरगणा भयगद्गदया गिरा ॥
भगवन् देवदेवेश ! चराचरपरायण ! ।
विज्ञप्तिः श्रूयतां विष्णो सुराणामार्त्तिनाशन ! ॥
धुन्धुर्नाम्ना सुरपतिर्बलवान् बलदर्पितः ।
शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः ॥
शतं क्रतूनामिष्ट्वासौ ब्रह्मलोकं महासुरः ।
आरोढुमिच्छति बली विजेतुं त्रिदशानपि ॥
तस्मादकालहीनन्तु चिन्तयस्व जगद्गुरो ।
उपायं मखविध्वंसी भवतो येन निर्वृताः ॥
श्रुत्वा सुराणां वचनं भगवान्मधुसूदनः ।
दत्त्वाभयं महाबाहुः प्रेषयामास सोऽथ तान् ॥
विसृज्य देवताः सर्व्वा ज्ञात्वा जेतुं महासुरम् ।
वधनाय मतिञ्चक्रे स धुन्धोरध्वरस्य वै ॥
ततः स कृत्वा भगवान् वामनं रूपमीश्वरः ।
देहं कृत्वा निरालम्बं काष्ठवद्देविकाजले ॥
चचाराम्भस्तपोऽमभ्यमुक्तकेशो यदृच्छया ।
दृष्टोऽथ दैत्यपतिना दैत्यैर्यान्यैः सुरार्दिभिः ॥
ततः कर्म्म परित्यज्य यज्ञियं ब्राह्मणोत्तमाः ।
समुत्तारयितुं विप्रमद्रवन्त समाकुलाः ॥
सदस्या यजमानाश्च ऋत्विजश्च महौजसः ।
निमज्जमानमुद्धृत्य सर्व्वे तं वामनं द्विजम् ॥
समुत्तार्य्य हसन्तस्ते पप्रच्छुः सर्व्व एव हि ।
किमर्थं पतितोऽसीह केन क्षिप्तोऽसि वा वद ॥
तेषामाकर्ण्य वचनं कम्पमानो मुहुर्मुहुः ।
प्राह धुन्धुपुरोगांस्तान् श्रूयतामत्र कारणम् ॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः ।
तस्य पुत्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम् ॥
तस्य ज्येष्ठो मम भ्राता कनीयानपरस्त्वहम् ।
नेत्रभास इति ख्यातो ज्येष्ठो भ्राता ततो-
ऽसुराः ॥
मम नाम पिता चक्रे इति भासोऽतिकौतुकात् ।
ततः कालेन महता आवयोः स पिता मृतः ॥
तस्यौर्द्ध्वदेहिकं कृत्वा गृहमावां समागतौ ।
ततो मयोक्तः स भ्राता विभजामो गृहं वयम् ।
तेनोक्तो नैव भवतो विद्यते भाग इत्यहम् ।
कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि ।
उन्मत्तानां तथान्धानां धनभागो न विद्यते ॥
एवमुक्तो मया सोऽथ किमर्थं पैतृकाद्धनम् ।
धनार्हभागमर्हामि नाहं न्यायेन केन वै ॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः ।
समुत्क्षिप्याक्षिपत्तामस्यां मामिति कारयान् ॥
ममास्यां निम्नगायान्तु मध्ये च पुरतो मतः ।
कालः संवत्सराख्यस्तु युष्माभिरिह चोद्धृतः ।
के भवन्तश्च संप्राप्ताः सखे वा बान्धवा इव ॥
इति वामनवचः श्रुत्वा भार्गवा द्विजसत्तमाः ।
प्रोचुर्दैत्यपतिं सर्व्वे वामनार्थंकरं वचः ॥
इति द्विजानां वचनं श्रुत्वा दैत्यपतिर्व्वचः ।

प्राह द्विज ददामीति यावदिच्छ …
तदाप्नं दानवपतेः …
प्राचामुरपतिं धुन्धुं यावदिच्छसि …
मोऽददेनापि हि भाजा …
तस्याचमन्य यद्दत्तं विक्रमो …
मम प्रमाणमात्रोऽथ मामकं …
संग्रयच्छस्व दैत्येन्द्र नाधिकं दातुं …

इत्थंमुक्ते वदने महात्मा
विहस्य दैत्याधिपतिः सकर्… ।
प्रादाद्धि जेन्द्राय यदर्थं तदा
यदा स नाम्नन् वदते च विप्र …
क्रमत्रयं सोऽपमेयः …
महासुरेन्द्रेण विमुञ्चन्ती ।
चक्रे ततो लङ्घयितुं त्रिलोकीं
त्रिविक्रमं रूपमनन्तशक्तिः ।
कृत्वा तु रूपं दितिजांश्च …
प्रणम्य चर्षीन् प्रथमक्रमेण ।
मही महीध्रैः सहिता सहार्ण…
जहार रत्नाकरपत्तनैर्युताम् ।
भुवं समाक्रं त्रिदशाधिवासं
सोमार्कऋक्षैरभिमण्डितं नभः ।
देवो द्वितीयेन जगाम वेगात्
क्रमेण देवप्रियशोभमीश्वरः ।
क्रमं तृतीयं न यदाप्य पूर्णं
तदातिकोपाद्दनुपुत्रस्य ।
पपात पृष्ठे मगवान्त्रिविक्रमो
मेरुप्रमाणेन तु विग्रहेण ।

पतता वासुदेवेन दानवोपरि नारद ।
त्रिंशद्योजनसाहस्री भूमिर्भुग्ना …
ततो दैत्यं समुत्पाद्य तस्यां
वर्षसिकताभिरव्यग्रां तां गर्भभूमिमपूर…
ततः स्वर्गं सहस्राक्षो वासुदेवप्रसाद…
सुराश्च सर्व्वे त्रैलोक्यमवापुर्निर्वृ…
भगवानपि दैत्येन्द्रं प्रक्षिप्य सिकताभिः…
कालिन्द्यां रूपमाधाय तत्रैवान्तर्द्धे…

इति वामने अ…

वामनः, त्रि, (वामयतीति । वम + …
अतिखर्ब्बः । तत्पर्य्यायः । न्यक्…
खर्ब्बः ४ ह्रस्वः ५ । इत्यमरः ।
अवनतः ७ । इति जटाधरः । (…
२२ । ५७ ।

"विधिस्तु धारस्तु दिनानि कर्त्ता
कर्त्ता त्रिविक्रमांति तदन्नाभि…
ज्योतिर्म्मानं चेत् सतुप्रतिमा …
कथं कथं तानि च वामनानि …

वामनव्रतं, क्ली, (वामनदेवनामकं व्रत…
द्वादशीकर्त्तव्यो वामनदेवस्य व्रतवि…

अथ श्रीवामनव्रतविधिः ।

"मत्वा गुरुमनुज्ञाप्य यथानियममा…
न हि सिद्धिर्गुरोर्भक्तिं नियमं च …
नियममन्त्रः ।
"एकादश्यां निराहारः स्थित्वा चैव…

रे श्रीवामनानन्त शरणागतवत्सल ॥" इति ।
ादश्यां रजन्यां वा द्वादश्यां वार्च्चयेत्
प्रभुम् ।
हृण्मये पात्रे ताम्रवंशमयेऽपि वा ॥
इकां स्थापयेत् पार्श्वे छत्रिकापादुकास्तथा।
च वैणवीं यष्टिमक्षसूत्रं पवित्रकम् ॥
र्भिः फलैर्धूपैः प्रदीपैश्चार्च्चयेद्धरिम् ।
ाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडौदनैः ॥
रं निशि कुर्व्वीत गीतवादित्रनर्त्तनैः ।
ाराध्य देवेशं प्रभाते विमले सति ॥
ार्घ्यं प्रदातव्यं पश्चाद्देवं प्रपूजयेत् ।
केलेन शुभेन दद्यादर्घ्यञ्च पूर्व्ववत् ।"
मन्त्रः ।
मनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ।
ार्घ्यं मया दत्तं वामनाय नमोऽस्तु ते ॥"
ाय अर्घ्यं नमः ।
स्यं कूर्म्मं वराहञ्च नरसिंहञ्च वामनम् ।
ं रामञ्च कृष्णञ्च क्रमात् द्वौ बुद्धकल्किनौ ॥
योर्जानुनोर्गुह्ये नाभ्यासुरसि कण्ठयोः ।
योर्मूर्द्ध्नि सर्व्वाङ्गेष्वर्च्चयेदायुधानि च ॥
ापूजां ततः कृत्वा गोमहीं काञ्चनादिकम् ।
ाचार्य्याय दातव्यं ब्राह्मणेभ्यश्च मन्त्रतः ॥
प्यथापि मन्त्रेण प्रतिगृह्णाति मन्त्रवित् ।
ाति मन्त्रतो ह्येव दाता भक्तिसमन्वितः ।"
र दानमन्त्रः ।
ामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयम् ।
मनश्च प्रतिग्राही तेन मे वामने रतिः ॥
मनः प्रतिगृह्णाति वामनोऽपि ददाति च ।
मनस्तारको द्वाभ्यां तेनेदं वामने नमः ॥"
इति ॥
वं कृत्वा विधानेन भोजनं घृतदाध्यकम् ।
ं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुञ्जीत बन्धुभिः ॥
ामनपुराणे च यद्भविष्योत्तरे व्रतम् ।
मनस्योदितं तस्यानुसाराल्लिखितं विदम् ॥"
श्रवेवर्त्ते ।
र्द्दीत्वा नियमं प्रातर्गत्वा नद्याश्च सङ्गमे ।
वर्णं वामनं कृत्वा सौवर्णमाषकेण वा ॥
याशक्त्या वित्तस्य कुम्भोपरि जगत्पतिम् ।
र्णपात्रे स्थापयित्वा मन्त्रैरेतैश्च पूजयेत् ॥
वामनाय नमः पादौ कटिं दामोदराय च ।
रु श्रीपतये गुह्यं कामदेवाय पूजयेत् ॥
दरं त्रैलोक्यधारिणे ।
ह्रदयं योगनाथाय कण्ठं श्रीपतये नमः ॥
स्य मङ्गलाथाय शिरः सर्व्वात्मने नमः ।
वं संपूज्य वासोभिराच्छाद्य च जगद्गुरुम् ।
दान् सुयत्नया चार्घ्यं नारिकेलादिभिः फलैः ॥
नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक ।
दघौघसंक्षयं कृत्वा प्रेममोक्षप्रदो भव ।"
इत्यर्घ्यमन्त्रः ॥
दमोवामनयोरग्रं दद्याद्य कमण्डलुम् ।
वदेव द्विजाग्र्याय वामनः प्रीयतामिति ॥
धोदरसमायुक्तां वारिधानीं प्रदापयेत् ।

पूजयित्वा यथाशक्त्या वामनः प्रीयतामिति ॥
यथाशक्त्या च दानानि द्विजाग्र्येभ्यः प्रदापयेत् ।
कुर्य्याज्जागरणं रात्रौ गीतशास्त्रसमन्वितम् ॥
श्रद्धया परया युक्तो निशामनिमिषेक्षणः ।
प्रभाते भोजयेद्विप्रान् द्वादश्यां पारणं ततः ।
कुर्य्यात् स्वयं श्रद्धया तत् सर्व्वं सफलतां व्रजेत् ॥"
तन्माहात्म्यञ्च तत्रैव ।
"एवं कृते तु कालेय व्रतेऽस्मिन् विजयादिने ।
न दुर्लभतरं किञ्चिदिह लोकेऽथवा परे ॥
फलमस्य व्रतस्योक्तं दत्त्वा पितॄन्ेरोत्तमः ।
वंशोद्धारकरो मुक्तिं याति पैत्राद्दयादपि ॥
न पावनतरं किञ्चिदतः परमिहोच्यते ।
विजयाव्रततुल्यञ्च न परं परिपश्यति ॥"
भविष्योत्तरे च ।
"समाप्ते तु व्रते तस्मिन् यत् पुण्यं तन्निबोध मे ।
चतुर्युगानि राजेन्द्र ! सप्तसप्ततिसङ्ख्यया ॥
प्राप्य विष्णुपुरं राजन् क्रीडते कालमक्षयम् ।
इहागत्य भवेद्राजा प्रतिपक्षभयङ्करः ॥
हस्त्यश्वरथयानानां दाता भोक्ता विमत्सरः ।
रूपसौभाग्यसम्पन्नो दीर्घायुर्निरुजो भवेत् ।
पुत्त्रपौत्त्रैः परिवृतो जीवेच्च शरदां शतम् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

वामनेत्रं, क्ली, (वर्णन्यासे वामं नेत्रं सूचकं येन ।) दीर्घईकारः । यथा,—
"ईः त्रिमूर्त्तिर्म्महामाया लोलाक्षी वामलोचनम् ।"
इत्यादि वर्णाभिधानम् ॥
अपि च ।
"ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजन्ते देव्यमन्यदिगलितचिकुरे कालिके ये जपन्ति ।"
इति तन्त्रसारे महाकालविरचितं श्यामास्तोत्रम् ॥ (वामचक्षुश्च ।)

वामलूरः, पुं, (वामं यथा तथा लुनातीति । लू + बाहुलकात् रक् ।) वल्मीकः । इत्यमरः । २ । १ । १४ ॥ (यथा, काशीखण्डे । २२ । १८ ।
"जटाटवीकोटरान्तःकृतनीडाण्डजाश्च ये ।
प्ररूढवामलूराङ्गाः स्थाणुवत्स्थिरचक्षुषः ॥")

वामलोचना, स्त्री, वामे चारुणी लोचने यस्याः । स्त्रीभेदः । इत्यमरः । २ । ६ । ३ ॥ (यथा, हितोपदेशे । २ । १४८ ।
"नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥")

वामवेधशुद्धिः, स्त्री, (वामे प्रतिकूले यो वेधः तद्विषये शुद्धिर्विशोधनम् । यद्वा, वामेन विपरीतेन वेधेन शुद्धिः ।) सराशितश्चैकादशद्वादशचतुर्थनवमदशमी विद्धोऽपि चन्द्रः यदि शुक्लपक्षगोचराजस्तदा विद्धति तदा यात्रायां अशुभफलदाता भवति । यदि तु सितदक्षिणक्षगोचरावंशुभस्थान् दशमपञ्चमसप्तमदशादि विद्धति तदा यात्रायां सरलाः-

पेक्षया यथासंख्यं अष्टमपञ्चमद्वितीयद्वादशगोऽपि चन्द्रः प्रचुरफलदाता भवति । यथा,—
"सितगनिकुजजीवार्कास्तु इन्दुर्नराणां
अयसुखनवमस्थोऽपि अष्टदाता तथैषाम् ।
सुसुतनिधनगश्चेन्द्रस्वलुपुत्रार्थगोऽपि
प्रचुरशुभफलं स्याद्वामवेधेन शुद्धिः ॥"
वामवेधत्वञ्च दूनजन्मेति एवमन्येति वक्ष्यमाणवचनाभ्यामेकार्थत्वाद्बोध्यम् ॥ * ॥
अथ दक्षिणवेधवामवेधकथनम् ।
"लाभविक्रमखशत्रुषु स्थितः
शोभनो निगदितो दिवाकरः ।
खेचरैः सुतनवोऽन्त्यगै-
र्यार्किभिर्यदि न विध्यते तदा ॥
दूनजन्मरिपुलाभखत्रिग-
श्चन्द्रमाः शुभफलप्रदस्तदा ।
स्वात्मजान्त्यमतियन्धुधर्म्मगैः
विध्यते न विबुधैर्यदि ग्रहः ॥
विक्रमाय रिपुगः शुभः कुजः
स्यात्तदान्त्यसुतधर्म्मगैः खगैः ।
चेन्न विद्ध इनसङ्कुरपत्सौ
किन्तु धर्म्मपतिना न विध्यते ॥
स्वायुषचतुर्दशायगः शुभो
भूसुतः न खलु विध्यते यदा ।
व्यालजत्रिनवकादशेषन-
प्रान्त्यगैर्विविधुभिर्नभश्चरैः ॥
स्वायधर्म्मतनयद्युनस्थितो
नाकनायकपुरोहितः शुभः ।
रिपुफरन्त्रखलत्रिगैर्यदा
विध्यते गगनचारिभिर्नहि ॥
व्यायुताष्टमतपोश्रयायगो
विद्व आस्फुजिदशोभनः स्मृतः ।
नैधनाद्युतनुकर्म्मधर्म्मधी-
लाभवैरिषद्दशखेचरैः ॥"
इति ज्योतिस्तत्त्वम् ॥

वामा, स्त्री, (वमति सौन्दर्य्यं इति । वम + ज्वलादित्वात् णः । टाप् । यद्वा, वमति प्रतिकूलमेवार्थं कथयति । यद्वा, वामः कामोऽस्त्यस्या इति अर्श आदिभ्योऽच् इत्यच् ।) नारी । स्त्री । इत्यमरः । २ । ६ । २ ॥ (यथा, गीतगोविन्दे । १ । २६ ।
"श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति वामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम् ॥")
दुर्गा । यथा,—
"वामं विरुद्धरूपञ्च विपरीतञ्च गीयते ।
वामेन सुखदा देवी वामा तेन मता बुधैः ॥"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"हाहाशु वाल्यदाश्चिस्त्यावाप्याभ्यामपि पुरुषेषु ।
क्लम्भमेवर्द्दी देवीकुमारी तथैव च ॥
उपायमेवर्दी चर्चा तारो विपुरभैरवीम् ।

इत्यास्तु वामभावेन यजेत्त्रिपुरभैरवीम् ।
सर्व्वत्र पितृदेवादौ यस्मादुभवति दक्षिणः ।
देवी च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते ।
या पुनः पूज्यमाना तु देवादीनाञ्च पूर्व्वतः ।
यज्ञभागं स्वयं धत्ते सा वामा तु प्रकीर्त्तिता ।”
इति कालिकापुराणे ७७ अध्यायः ॥

वामाक्षि, क्ली, (वाममक्षि ।) वामचक्षुः । (वर्णान्यासे न्यस्तं वाममक्षि येन ।) दीर्घ ईकारः । यथा,—
“कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दु
वामाक्षियुक्तं
बीजन्ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये
जपन्ति ।”
इत्यादिकर्पूराख्यस्तोत्रम् ॥

वामाक्षी, स्त्री, (वामे मनोहरे अक्षिणी यस्याः । षच् । ङीष् ।) वामलोचना । इति हेमचन्द्रः ॥

वामाचारः, पुं, (वामो विपरीतो वेदविरुद्धो वा आचारः ।) आचारविशेषः । यथा,—
“पञ्चतत्त्वं खपुष्पञ्च पूजयेत् कुलयोषितम् ।
वामाचारो भवेत्तत्र वामा भूत्वा यजेत्
पराम् ।”
इत्याचारभेदतन्त्रम् ॥
तदाचारवतां नरकगमनं यथा,—
“स्वधर्म्मरहिता विप्रा वेदान्यसेविनः सदा ।
भ्रष्टाचाराश्च वामाश्च ते यान्ति नरकं ध्रुवम् ।”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥
तत्प्रशंसा यथा,—
“चत्वारो देवि वेदाद्याः पशुभावे प्रतिष्ठिताः ।
वामाद्यास्त्रय आचारा दिव्ये वीरे प्रतिष्ठिताः ।”
इति नित्यातन्त्रम् ॥
“सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत् ।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि ।”
इति कुलार्णवतन्त्रे २ खण्डम् ॥ * ॥
तदाचारयुक्तस्य निषिद्धकर्म्माणि यथा,—
“न दद्यात् ब्राह्मणो मद्यं महादेव्यै कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्ष-
येत् ।”
तदनुकल्पो यथा । कुलचूड़ामणौ ।
“यथावचनवाक्यन्तु ब्राह्मणस्तु विशेषतः ।
तत्र गुड़ार्द्रकं दद्यात् ताम्रे वा विन्दुसेक्मधु ॥
देयास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत् ।
एतद्द्वयन्तु शूद्रस्य नाश्रयान्तु कदाचन ।
वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु चान्यकम् ।
ब्राह्मणस्य गवां क्षीरं ताम्रे वा विन्दुसेक्मधु ।
नारिकेलोदकं कांस्ये सर्व्वेषां दग्धशोधनम् ।”
क्षत्रियवैश्ययोस्तु गौड़ी माध्वी च तथा तत्र
नयोरधिकारात् तदभावे अनुकल्पविधानम् ।
तथा च ।
“गोक्षीरं ब्राह्मणो दद्यात् द्रव्यमाज्यञ्च
बाहुजः ।
वैश्यश्च माक्षिकं दद्यं शूद्रः पैष्टादिकं पुनः ।”
तेन शूद्रस्य नानुकल्पः ॥ * ॥ कुलार्णवे ।
“जलं क्षीरं घृतं भद्रे मधु मैरेयमेव च ।
पैष्ट्यं तालभवं धान्यसम्भवं तक्रनिर्म्मितम् ॥
सहकारभवं देवि त्रिविधं बहुभेदकम् ।
मादकं धर्म्मसम्भेदात् सर्व्वमासीत् शुभोत्तमे ।
शानेन संस्कृतञ्चेत्तु महापापकनाशनम् ।
तद्दाने पालकाभावो दिव्यभावत्रिकं वा ॥ * ॥
माकन्दफलजं रम्यं दग्धं शैवं द्विजातिभिः ।
अमादकत्वाद्वैष्णि पेयार्हं सेवते बुधैः ।”
एतेन क्षत्रियादिभिरमादकं दग्धं शैवं मादकञ्च
पापहेतुकत्वमुक्तम् । भैरवतन्त्रे ।
“मद्यं मांसं विना यत्र यत्किञ्चित् कुलया-
यनम् ।
प्रथमे दत्त्वा ततः शेषं गुरवे तन्निवेदयेत् ।
तदनुज्ञां मूर्द्ध्नि कृत्वा शेषमात्मनि योजयेत् ।”
तेन क्षत्रियादीनां शुद्धदाने अधिकारः ।
न पाने । यत्तु ।
“पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ।”
तत्तु चतुर्थाश्रमिपरम् ॥ * ॥ तद्ग्रहणे
जातिचिन्तां न कुर्य्यात् ।
“मदिरायां मैथुने च जातिचिन्तां न कार-
येत् ।”
एतेषां शोधनस्यावश्यकत्वम् । तथा च ।
“संशोधनमनाचर्य्य क्वापि मद्येषु साधकः ।
आचार्य्यं सिद्धिहानिः स्यात् क्रुद्धा भवति
सुन्दरी ।”
मद्येषु सुखाद्यकल्पेषु ॥ * ॥ तथा कुलपूजापर-
मस्यावश्यकत्वम् । तथा च ।
“मधु मांसं विना देवि कुलपूजां समाचरेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ।” * ।
अथ मांसादिशोधनम् ।
“मांसन्तु त्रिविधं प्रोक्तं जलखेचरभूचरम् ।
मांसन्तु त्रिविधं प्रोक्तं देवताप्रीतिकारकम् ॥
मत्स्यञ्च त्रिविधं देवि उत्तमाधममध्यमम् ।
उत्तमं त्रिविधं मत्स्यं शालपाठीनरोहितम् ॥
मध्यमं कण्टकैर्हीनं तैलाक्तं वक्कलैर्युतम् ।
देव्याः प्रीतिकरश्चैव मध्यमं तच्चतुर्व्विधम् ।
क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः ।”
भूचरमांसञ्च ।
“गोमेषाजकुलापोत्थगोधाशोद्रुग्गोद्भवम् ।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम् ।”
मांसाभावे अनुकल्पः । समयाचारे ।
“लवणार्द्रकपिण्याकतिलगोधूममाषकम् ।
लशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः ।” * ।
मुद्रा तु द्विविधा । कुलार्णवे ।
“शफरं मण्डलाकारं चन्द्रपद्मनिभं शुभम् ।
चारु पद्मनोहारि शर्क्करादैश्च पूरितम् ।
पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता ।”
यामले ।
“भ्रष्टधान्यादिकं यावत् चर्व्वणीयं प्रकल्पयेत् ।
सैषा मुद्रा समाख्याता
सैषा शोधनञ्च समयतन्त्रे । ॐ
हिन्याद्दि मांसम् । वामर्ममद्दि
तद्वाक्योरित्यादि सुरान् ॥ * ॥
शोधनम् । तत्र मातृचूड़ामणौ ।
“अशोधितकुलाद्रव्यात् निवेदितं
तत्क्षणात्स पैत् स्यात्
न कुलीनः कथं देवि पूजयेत् ।
श्रीक्रमे । संशोधनमनाचर्य्येति ।
“अ ...
वनाश्रा यज्ञतो यदि वा
अभिषेकमन्तु ।
“आदौ वाणीं समुच्चार्य्य ...
नमःशब्दं समुच्चार्य्य इमां ...
पवित्रीकुरु शब्दान्ते मम सिद्धिं ...
वह्निजायां समुच्चार्य्य शुद्धिमन्त्र ...
ततः कर्णेभिरद्भुता मायाबीजं ...
इति प्रक्रियोक्तम्
ततः शोधितद्रव्यमर्घ्यं चरेत् । ...
विधौ ।
“पूर्व्वं शोधितद्रव्यन्तु गुरवे ...
स्वतन्त्रतन्त्रे ।
“आद्यद्रव्यमर्घ्यपात्रे निःक्षिप्य ...
कुलगोलोद्भवं द्रव्यं स्वयम्भुकुसुमं ...
अर्घ्यं दत्त्वा महेशानि सर्व्वा
सुरया चार्घ्यदानेन योगिनीनां ...
महायोगी भवेद्ध्रुवम्
भैरवतन्त्रे ।
“पञ्चमात् तु परं ...
केवलैः पञ्चमैश्चापि सिद्धो भ...
तेन पञ्चमकारेण पूजा कर्त्तव्या । ...
चारः ॥

वामापीड़नः, पुं, पौण्ड्रचः । ...

वामिका, स्त्री, (वामा + स्वार्थे कन् । ...
इत्वम् ।) चण्डिका । यथा,—
“वक्रास्तु चण्डिका देया

वाममार्गस्तु वामिका स्मृतिवक्ता दक्षिणे
कामिदार्हं पुरग्रामसन्दिरे
अपूजिता ...
वाग्भैरवी सरस्वत्या
तस्या मन्त्रं पुरा प्रोक्तं सुरवर्णां ...
इति कालिकापुराणे

वामिलः, त्रि, (वाम + इलच् ।) ...
वामः । इति मेदिनी । ले, १११ ।

वामी, स्त्री, शृगाली । वड़वा । (रघु,
५ । ६२ ।
“अयोद्धवामीश्वतवाहितार्ष
प्रमेश्वरं प्रीतमना महर्षिः ।”)
रासभी । करभी । इति मेदिनी । मे, १
वामोरूः, स्त्री, वामौ सुन्दरौ ऊरू ...
(“संहितशृपलप्रचयवामाद्य ।” ...

...कन् ।) काकविशेषः । इति शब्दचन्द्रि-
...कम् ॥ (यथा, माघे । ८ । ६६ ।
“अलम्बो [illegible]
...[illegible] विस्मयञ्च ।
...[illegible] प्रणमतो विमापि ...
...[illegible] किमु मति कारवैः मदग्नः ॥”)
...ः, पुं, (वयतीति । वे + ण्वुल् ।) मण्डपः ।
...ति शब्दचन्द्रिका ॥ (तन्तुवायः । यथा, भाग-
... । ५ । २६ । १९ ।
...क च विमनर्द वायपुरचं [illegible]
...दशा इव ... परिवयन्ति ॥”)
...ण्डः, पुं, (वायस्य दण्डः । यद्वा, वायतीति ...
...दः । वाय एव दण्ड इति कर्म्मधारयः ।)
...दण्डः । इति भरतद्विरूपकोषः ॥
..., स्त्री, पिष्टविशेषः । तत्पर्य्यायः । ...
...पनम् २ । मर्दनकम् ३ । इति त्रिकाण्ड-
...षः ॥
...वी, स्त्री, (वायोरियमिति । वायु + अण् ।
...ङीप् ।) उत्तरपश्चिमदिक् । इति जटाधरः ॥
...र्त्तिकेयस्यानुचरमातृगणभेदः । यथा, महा-
...रते । ९ । ४६ । १७ ।
“वायव्या च कौमार्य्यो वाराही च भरतर्षभ ।
...तथा सौर्य्या वाराही च महाबलाः ॥”)
...यं, त्रि, (वायुर्देवतास्येति । वायु + “वाय्वृतु-
...त्रुषसो यत् ।” ४ । २ । ३१ । इति यत् ।)
...दिगादि । यथा । [illegible]
...वामतन्त्रे ।
“वायव्यां नैर्ऋत्यां न वदीयान् कदाचन ॥”
इति तिथ्यादितत्त्वम् ॥
...वायुर्देवताकपशुरवित्रादि । यथा, ऋग्वेदे ।
... । १० । ९० । ८ ।
“तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥”
“वायव्यान् वायुदेवताकान् ।” इति सायणभाष्ये
...वायवः ॥ * ॥ क्ली, षट्शताधिकचतुर्विंशति-
...सहस्रश्लोकात्मकवायुनामकमहापुराणम् । यथा,
...देवीभागवते । १ । ३ । ७ ।
“...वामनाख्यञ्च वायव्यं षट्शतानि च ।
चतुर्विंशतिः संख्यातः सहस्राणि तु शौनक ! ॥”
...अस्त्रविशेषः । यथा, महाभारते । १ । १३६ । १९ ।
“आग्नेयेनासृजद्वह्निं वारुणेनासृजत् पयः ।
वायव्येनासृजद्वायुं पार्ज्जन्येनासृजद्घनान् ॥”)
...सः, पुं, (वयते इति । वय गतौ । “वयश्च ।”
उणा० ३ । १२० । इति असच् । सच णित् ।)
...अगुरुवृक्षः । श्रीवासः । काकः । इति मेदिनी ।
...से, ३८ । (यथा, महाभारते । ३ । २८० । ३१ ।
“श्येनकङ्ककाकोलभासगोमायुवायसाः ।
...तत्र वीराणां हतानां मांसशोणितैः ॥”)
...अस्योत्पत्तिर्यथा,—
“...ताम्रा भार्य्या श्येनी वीर्य्यवती महा-
बला ।
...सम्पातिश्च जटायुश्च प्रभूतौ पक्षिसत्तमौ ।
सम्पातिर्जनयत् गृध्रान् काकाः पुत्रा जटायुषः ॥”
इति वह्निपुराणे वाराहप्रादुर्भावः ॥ * ॥
अस्य एकाक्षिनाशकारणं यथा,—
मार्कण्डेय उवाच ।
“गते तु भरते तस्मिन् रामः कमललोचनः ।
लक्ष्मणेन सह भ्रात्रा भार्य्यया सीतया सह ।
शाकमूलफलाहारो विचचार महावने ॥
एकदा मध्यगत्ने रामदेवः प्रतापवान् ।
चित्रकूटे वने देशे वैदेह्या सङ्गमाश्रितः ॥
सुष्वाप सुखहृष्टश्च ततः काको दुरात्मवान् ।
सीताभिमुखमभ्येत्य विददार स्तनान्तरम् ।
विदार्य्य वृक्षमारुह्य स्थितोऽसौ वायसाधमः ॥
ततः प्रबुद्धो रामोऽसौ दृष्ट्वा रक्तं स्तनान्तरम् ।
शोकाविष्टां सीतां तामुवाच कमलेक्षणः ॥
किमिदं स्तनान्तरे भद्रे तव रक्तस्य कारणम् ।
इत्युक्ता सा च तं प्राह भर्त्तारं विनयान्विता ॥
पश्य राजेन्द्र वृक्षाग्रे वायसं दुष्टचेष्टितम् ।
येनैतच्च कृतं कर्म्म सुप्ते त्वयि महामते ॥
रामोऽपि दृष्ट्वा तं काकं तस्मिन् क्रोधमथा-
करोत् ।
ऐषिकास्त्रं समादाय ब्रह्मास्त्रेणाभिमन्त्रितम् ॥
काकमुद्दिश्य चिक्षेप सोऽवधावद्भयान्वितः ॥
स त्विन्द्रस्य सुतो राजन् इन्द्रलोकं विवेश च ।
रामास्त्रं प्रज्वलं दीप्तं तस्यानुप्रविवेश वै ॥
विदित्वार्थञ्च देवेन्द्रो देवैः सर्व्वैः समन्वितः ।
निष्क्रामयच्च तं दुष्टं राघवस्यापकारिणम् ॥
ततोऽसौ सर्व्वदेवैस्तु देवलोकाद्बहिष्कृतः ।
पुनः सोऽभ्येत्य रामञ्च राजानं शरणं गतः ॥
त्राहि राम महाबाहो अज्ञानादपकारि-
णम् ।
इति ब्रुवन्तं स प्राह रामः कमललोचनः ॥
अमोघाय ममास्त्राय अक्षि एकं प्रयच्छ मे ।
ततो जीवसि दुष्टात्मन् मेऽपराधो महान् कृतः ॥
इत्युक्तोऽसौ स्वकं नेत्रमेकमस्त्राय दत्तवान् ।
अस्त्रञ्च नेत्रमेकन्तु भस्मीकृत्य शमं ययौ ॥
ततः प्रभृति सर्व्वेषां काकानामेकनेत्रता ।
चक्षुषैकेन पश्यन्ति हेतुनानेन पार्थिव ! ॥”
इति नरसिंहपुराणे ४३ अध्यायः ॥
(वायससम्बन्धिनि, त्रि । यथा, महाभारते ।
१२ । ८२ । ७—८ ।
“स काकं पञ्जरे बद्ध्वा विषयं क्षेमदर्शिनः ।
सर्व्वं पर्य्यचरद्युक्तः प्रवृत्तार्थी पुनः पुनः ॥
अधीध्वं वायसीं विद्यां शंसन्ति मम वायसाः ।
अनागतमतीतञ्च यच्च संप्रति वर्त्तते ॥”)

वायसादनी, स्त्री, (वायसेन अद्यते इति । अद + कर्म्मणि ल्युट् + ङीप् ।) महाज्योतिष्मती । काकतुण्डी । इति राजनिर्घण्टः ॥

वायसारातिः, पुं, (वायसस्य अरातिः ।) पेचकः । इत्यमरः । २ । ५ । १५ ॥

वायसाह्वा, स्त्री, (वायसस्य आह्वा नाम यस्याः ।) काकनामा । काकमाची । इति राजनिर्घण्टः ॥

वायसी, स्त्री, (वायसानामियमिति तत्प्रियत्वात् । वायस + अण् । ङीप् ।) काकोडुम्बरिका । काकमाची । इति मेदिनी । से, ३८ ॥ महाज्योतिष्मती ॥ काकनामा । काकतुण्डी । इति राजनिर्घण्टः ॥

वायसेक्षुः, पुं, (वायसानामिक्षुरिव प्रियत्वात् ।) काशः । इति राजनिर्घण्टः ॥

वायसोलिका, स्त्री, (वायसोली + स्वार्थे कन् ।) काकोली । इति शब्दरत्नावली ॥

वायसोली, स्त्री, (वायसान् ओलण्डयतीति । ओलडि उत्क्षेपे + “अन्येष्वपि दृश्यते ।” इति डः । शकन्ध्वादित्वात् अस्य लोपः ।) काकोली । इत्यमरः । २ । ४ । १४४ ॥

वायुः, पुं, (वातीति । वा गतिगन्धनयोः + “कृवा-पाजिमिस्वदिसाध्यशूभ्य उण् ।” उणा० १ । १ । इति उण् । “आतो युक् चिण्कृतोः ।” ७ । ३ । ३३ । इति युक् ।) उत्तरपश्चिमकोणाधिपतिः । वाति यः । वातास इति भाषा । स च पञ्चभूतान्तर्गतभूतविशेषः । तद्विशेषविवरणं यथा । वायवः प्राणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती । अपानो नाम अवाग्गमनवान् पाय्वादिस्थानवर्त्ती । व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती । उदानः कण्ठस्थानीय ऊर्द्ध्वगमनवानुत्क्रमणवायुः । समानः शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणम् । केचित्तु नागकूर्म्मकृकरदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः । तत्र नागः उद्गिरणकरः । कूर्म्मः निमीलनादिकरः । कृकरः क्षुधाकरः । देवदत्तः जृम्भणकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चैवेति केचित् ॥ इदं प्राणादिपञ्चकं आकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं कर्म्मेन्द्रियसहितं सत् प्राणमयकोषो भवति । अस्य क्रियात्मकत्वेन रजोंऽशकार्य्यत्वम् । एतेषु कोषेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः । इति वेदान्तसारः ॥ तत्पर्य्यायः । श्वसनः २ स्पर्शनः ३ मातरिश्वा ४ सदागतिः ५ पृषदश्वः ६ गन्धवहः ७ गन्धवाहः ८ अनिलः ९ आशुगः १० समीरः ११ मारुतः १२ मरुत् १३ जगत्प्राणः १४ समीरणः १५ नभस्वान् १६ वातः १७ पवनः १८ पवमानः १९ प्रभञ्जनः २० । इत्यमरः ॥ अजगत्प्राणः २१ खश्वासः २२ वाहः २३ धूलिध्वजः २४ फणिप्रियः २५ वातिः २६ नभःप्राणः २७ भोगिकान्तः २८ स्वकम्पनः २९ अक्षतिः ३० कम्पलक्ष्मा ३१ शसीनिः ३२ आवकः ३३ हरिः ३४ । इति शब्दरत्नावली ॥ वासः ३५ सुखाशः ३६ मृगवाहनः ३७ सारः

३८ चपलः ३९ विहगः ४० प्रकम्पनः ४१ नभः-स्वरः ४२ निश्वासकः ४३ स्तनूनः ४४ पृषताम्पतिः । इति जटाधरः ॥ * ॥ स च सृष्टिकाले आकाशाज्जातः । यथा । तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः । इत्यादि तैत्तिरीयश्रुतिः ॥ * ॥ कश्यपाद्वायुरदितेः पुत्राः । ते सर्व्वे अप्रजाः । इन्द्रेण देवत्वं प्रापिताः । शरीरान्तर्व्वायुर्भेदेन दशधा । यथा । प्राणः १ । तस्य कर्म बहिर्गमनम् । अपानः २ । तस्य कर्म अधोगमनम् । व्यानः ३ । तस्य कर्म आकुञ्चनप्रसारणादि । समानः ४ । तस्य कर्म अशितपीतादीनां समं नयनम् । उदानः ५ । तस्य कर्म ऊर्द्ध्वनयनम् ।

"उद्गारे नाग ६ आख्यातः कूर्म्म ७ उन्मीलने स्मृतः ।
कृकरः ८ क्षुत्करो ज्ञेयो देवदत्तो ९ विजृम्भणे ।
न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः १० ॥"

इति भागवतटीकायां श्रीधरस्वामी ॥ * ॥

अन्यच्च ।

"द्वितीयं मारुतो भूतं त्वगध्यात्मञ्च विश्रुता ।
स्पर्शश्चाधिभूतञ्च विद्युत्तत्राधिदैवतम् ॥"

इति महाभारते आश्वमेधिकपर्व्व ॥

तस्य गुणाः । यथा,—

"वायोरनियमस्पर्शो वादस्थानं स्वतन्त्रता ।
बलं शैघ्र्यञ्च मोक्षञ्च कर्म्म चेष्टात्मता भवः ॥"

इति महाभारते मोक्षधर्म्मः ॥ * ॥

अनियमस्पर्शः । अनुष्णाशीतस्पर्शः १ । वादस्थानम् । वागिन्द्रियगोलकादि २ । स्वतन्त्रता । गमनादौ ३ । बलम् ४ । शैघ्र्यम् ५ । मोक्षः मूत्रादेः ६ । कर्म्म । उत्क्षेपणादि ७ । चेष्टा श्वासप्रश्वासादि ८ । आत्मता प्राणरूपेण चित्ताधिष्ठानम् ९ । भवः । जन्ममरणे १० । इति तट्टीका ॥ * ॥ न्यायमते अस्य गुणादिर्यथा,—

"अपाकजानुष्णाशीतस्पर्शस्तु पवने मतः ।
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ॥
पूर्व्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः ॥"

इति भाषापरिच्छेदः ॥

"वायुं निरूपयति अपाकज इति । अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वात् उक्तमनुष्णाशीत इति । एतेन वायोर्विजातीयस्पर्शो दर्शितः । तच्चलक्षणत्रयं बोध्यम् वायुत्वमिति भावः । एष वायुः स्पर्शादिलिङ्गकः । वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते । विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोरनुमानात् । मते च वायुर्न प्रत्यक्षस्तथापि वक्ष्यते । वायुर्द्विविधो नित्योऽनित्यश्च । नित्यः परमाणुरूपो नित्यस्तदन्योऽनित्यः अवयवी च । सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् । तत्र शरीरमयोनिजं पिशाचादीनाम् । इन्द्रियमपीति । शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् । तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् । अङ्गसंसर्गिसलिलशैत्यव्यञ्जकव्यजनवातवत् । विषयं दर्शयति प्राणादिरिति । यद्यप्येको वायुः चतुर्विधः तस्य चातुर्विध्यं प्राणादिना व्युत्क्रमाकरे । तथापि संक्षेपात् अत्र चैविध्यमुक्तं प्राणस्त्वेक एव मुखादिनिर्गमनाद्युपाधिभेदात् मूत्रनिर्गमनादिनानाक्रियावशाच्च नानासंज्ञां लभते इत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥ * ॥ अस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच ।

"प्रविश्य जठरं शुद्धो दैत्यमातुः पुरन्दरः ।
ददर्शोर्द्ध्वमुखं बालं कटिन्यस्तकरं महत् ॥
तेनैव गर्भं दितिजं वज्रेण शतपर्व्वणा ।
चिच्छेद सप्तधा मघवान् स करोद सुविस्वरम् ॥
शक्रोऽपि प्राह मा मा रुदस्वेति मघवरम् ।
इत्येवमुक्ता चैकैकं भूयश्चिच्छेद सप्तधा ।
ते जाता मरुतो नाम देवा दिव्याः शतक्रतोः ।
मातुर्वचनचारित्र बलवीर्य्यपुरस्कृताः ॥"

इति वामने ६८ अध्यायः ।

"यदमी भवता प्रोक्ता मरुतो दितिसम्भवाः ।
तत् केन पूर्व्वमासन् वै मरुन्मार्गेण कथ्यताम् ॥

पुलस्त्य उवाच ।

श्रूयतां पूर्व्वमरुतामुत्पत्तिं कथयामि ते ।
स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम् ॥
स्वायम्भुवस्य पुत्रोऽभून्मनोर्नाम प्रियव्रतः ।
तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः ॥

स्वसुत्यपानाय स कामचारी
समं महिष्या वसुमानपुत्रः ।
रराम तन्व्या सह कामचारी
ततोऽमरात् प्राप्य बलस्य शुक्रम् ॥

पतिभिः समनुज्ञाताः पयः पुष्करसंस्थितम् ।
तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदामलम् ॥
पीतमात्रेण शुक्रेण पार्थिवेन्द्रोद्भवेन च ।
ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम् ॥
सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम् ।
तेषां रुदितशब्देन सर्व्वमापूरितं जगत् ॥
अथाजगाम भगवान् ब्रह्मलोकात् पितामहः ।
समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः ॥
मरुतो नाम यूयं वै भविष्यध्वं विचक्षणाः ।
इत्येवमुक्ता देवेशो ब्रह्मा लोकपितामहः ॥
तानादाय विचचारी मारुतानादिदेश च ।
ते चासन् मरुतश्चाद्या मनोः स्वायम्भुवान्तरे ॥ * ॥
स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद ।
स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः ॥
तस्य पुत्रा भवन् सप्त सप्तार्च्चिःप्रतिमा मुने ।
तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः ॥
आराधयन्तो ब्रह्माणं परमैश्वर्य्यमीश्वरः ।
ततो विघ्नार्थमागाय सहस्राक्षो भयातुरः ।
पूतनामप्सरोमुख्यां प्राह नारद वाक्यवित् ॥
यथा हि तपसो विघ्नं तेषां भवति सुन्दरि ॥

तथा कुरुष्व मा तेषां . . .
इत्येवमुक्ता शक्रे . . .
तत्राजगाम त्वरिता यत्र ते . . .
आश्रमस्याविदूरे तु नद्यां . . .
तस्यां स्नातुं समायाता . . .
सा तु स्नातुं . . .

ददृशुस्ते तु या: स्नातुं तत्पुत्र . . .
तेषाञ्च प्राच्यवत् शुक्रं . . .
शङ्खिनी पावकात्मज महाग्रह . . .
ते वै निरुद्धतपसो जग्मू राज्ञ . . .
अथो बहुतिथे काले . . .
मरुद्भ्रुता . . .
स तां दृष्ट्वा महावतो . . .
निवेदयामास तदा . . .
तथाश्विन महाकायो . . .
जीवा स्वर्ग . . .
ततः क्रमात्तस्मिन्ना सा ग्रुरो . . .
जातमात्रेषु पुत्रेषु मोहभावमगा . . .
अमात्यपिदत्ता बाला . . .
जन्यायनो वै रुदद्भुराध्यात्मा . . .
मा रुदध्वमिति . . .
यूयं देवा
इत्येवमुक्त्वादाय सर्व्वान् . . .
नियोज्य च मरुन्मार्गे देवानमता . . .
एवमात्म च . . .
औत्तमे मरुतो ये च तान् . . .
औत्तमस्यान्ववाये च . . .
वपुष्मानिति विख्यातो वपुष्मा . . .
तस्य पुत्रो गरिष्ठो ज्योतिष्मान् . . .

स पुत्रार्थी . . .
तस्य भार्या च सुश्रोणी . . .
तपश्चरणयुक्तस्य बभूव परिचारि . . .
नियोगुक्ता सुचार्व्वङ्गी दृष्टा . . .
सा तथा चारुसर्व्वाङ्गी दृष्ट्वा . . .
पप्रच्छ तपसो हेतुं तस्यास्तद्वचो . . .
साब्रवीत्तनयार्थाय आशार्थ्य . . .
ते चास्यै वरदा ब्रह्मन् जाताः . . .
प्रजश्च तनयाः सप्त भविष्यन्ति . . .
गुणयोगसंयुक्ता महर्षीणां . . .
इत्येवमुक्ता जग्मुस्ते सर्व्व एव . . .
साऽपि राजर्षिरगमत् सभार्यो . . .
ततो बहुतिथे काले सा राज्ञी . . .
अवाप गर्भं तन्वङ्गी . . .
गुर्व्विण्यामथ भार्य्यायां ममार . . .
सा चाप्यारोढुमिच्छन्ती भर्त्तु . . .
निवारिता तदामात्यैर्न तथापि . . .
तस्यामालिङ्ग्य भर्त्तारं चिताया . . .
ततोऽग्निमध्यात् सलिले मांसपे . . .
साम्भसा सुखशीतेन संसिक्ता . . .
तेऽजायन्ताथ मरुत औत्तमस्य . . .

स्यान्तरे ये च मरुतोऽप्यभवन् पुरा ।
तं कीर्त्तयिष्यामि गीतनृत्यकलिप्रिय ! ॥
स्य मनोः पुत्र ऋतध्वज इति श्रुतः ।
र्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥
नि रोमकेशांश्च स्नायु मज्जा यकृद्व्रणम् ।
च विन्नसो राजा सुतार्थी चेति नः
श्रुतम् ॥
र्धमेध्याच ततः शुक्रपातादनन्तरम् ।
निपत्यैवासरत् शब्दः सोऽपि श्रुतो न्वतः ॥
माद्गुनवद्दान् सप्त तत्तेजसोपमाः ।
वः समजायन्त वै रुदन्तश्च तन्मुने ॥
तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः ।
न्य निवार्थाय स चक्रे मरुतः सुतान् ॥
मरुतो शर्व्वंस्तामसि देवनागणाः ।॥।
दन्वते तांश्च शृणुष्व त्वं तपोधन ॥
स्यान्ववाये तु राजासीद्रिपुजिद्बली ।
नमाम स ख्यातो न तस्यासीत् सुतः
किल ॥
माराध्य तपसा भास्करं तेजसां निधिम् ।
म कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥
पितृगृहे वसन् वसत्याश्च पिता स्वतः ।
दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥
तां वारयामासुरृषयः सप्त मानसाः ।
मासक्तचित्तास्तु सर्व्व एव तपोधनाः ॥
रयन्तो तद्दुःखं प्रज्ञात्वार्थिं विशेष च ।
पश्यन्त ऋययश्चित्ताभाविनास्तथा ॥
तां कन्यां दृष्ट्वा कष्टं कष्टेति वादिनः ।
नुश्च लताश्चापि समाजायन्त दारकाः ॥
माता विना भूता रुरुदुस्तान् पितामहः ।
रयित्वा कृतवान् लोकनाथो मरुद्गणान् ॥
स्यान्तरे जाता मरुतोऽमी तपोधन ।॥।
व कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥
सोमादीति विख्यातो तपस्वी सत्यवाक्
शुचिः ।
सारस्वते तीर्थे सोऽतप्यत महत्तपः ॥
थं तस्य तपसो देवाः संप्रेरयन् वधूम् ।
चाभ्येत्य देवीतीरं क्षोभयामास भाविनी ॥
स्य पार्थिव शुक्रं सप्त सारस्वते जले ।
स्वैराप्यर्सम्भूता तुनिर्मोद्गतको वधूम् ॥
सप्तस्मिन् सुते त्वं पापस्यास्य फलं महत् ।
भविष्यति हयो भवती यज्ञसंसदि ॥
मता सोऽपि श्रीमान् जगामाथ स्वमाश्रमम् ।
मर्भोद्धः सप्तधः सप्त वै मरुतोऽभवन् ॥
एते मयोक्ता मरुतः पुरा यथा
जाता दिवह्यनिकरा महर्षे ।
येषां श्रुते श्रवणेन पापहानि-
भवेच धर्माभ्युदयो महान् वै ॥"
इति वामने मरुतोत्पत्तिनाम ९८ अध्यायः ॥॥
स्थेष ।
नः परं प्रवक्ष्यामि मरुतोऽर्चीन् निर्दृत्
महान् ।
प्राणो विचारश्चैव उदयः संदहस्तथा ।

विवहः प्रवहश्चैव परिवाहस्तथैव च ।
अन्तरीक्षे च बाह्ये ते पृथङ्मार्गविचारिणः ॥
महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः ।॥।
सूर्य्याग्निश्च शुचिर्नामा वैद्युतः पावकः स्मृतः ॥
निर्मथ्य पवमानोऽग्निश्चयः प्रोक्ता इमेऽग्नयः ।
अग्नीनां पुत्त्रपौत्राश्च चत्वारिंशन्नवैव तु ।
मरुतामपि सर्व्वेषां विज्ञेयाः सप्त सप्तकाः ॥"
इति देवीपुराणे कालरथवस्थानामाध्यायः ॥॥
ऊनपञ्चाशद्वायुनामानि यथा,—
"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च ।
एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः ॥
इन्द्रश्च गत्यदृश्यस ततः प्रतिमकृत्परः ।
मितश्च संमितश्चैव सुमितश्च महाबलः ॥
ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा ।
अन्तिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥
ऋतश्च ऋतवाहश्च धर्त्ता च धरुणो ध्रुवः ।
विधारणो नाम तथा देवदेवो महाबलः ॥
ईदृक्षश्चाप्यदृक्षश्च एते दश मिताशिनः ।
व्रतिनः प्रसदृक्षश्च सभरश्च महायशाः ॥
धाता दुर्गो धृतिर्भीमस्त्वभियुक्तस्त्वपात सहः ।
द्युतिर्वपुरनाधृष्योऽथ वासः कामो जयो विराट् ।
इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वसंभवाः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥॥
वायोर्विकारहेतुर्यथा,—
"व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षया-
ज्जागरात्
वेगानाञ्च विधारणादतिशुचः शैत्यादति-
त्रासतः ।
रूक्षक्षारकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत्
वायुर्व्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि
च ॥"॥
तस्य लक्षणम् ।
"व्याभानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्प-
प्रतोदाः
कण्ठध्वंसावसादौ श्रमकविलपनं संमूल-
प्रभेदाः ।
पारुष्यं कर्णनादो विषमपरिणतिभ्रंशदृष्टि-
प्रतोदा
विस्फोटहृष्टादिग्लपनननशनं साहनं पीड्-
नञ्च ॥
वामोत्तानौ विपादो भ्रमपरिघट्टनं जृम्भणं
रोमहर्षो
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

तस्य प्रशमताकारणम् । यथा,—
"रूक्षशीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥
स्निग्धोष्णस्थिरगुर्व्वम्ललवणस्वादुस्वतैलातप-
स्नानाभ्यञ्जनवस्तिमांसमदिरासंवाहनोन्मर्द्दनैः ।
स्निग्धस्वेदनिरूहणोपशमनः स्वेदोपनाहादिकं
पानाहारविहारभेषजमिदं वातं प्रशान्तं
नयेत् ॥"॥
ऋतुभेदेन विहारादिना च तस्य चयप्रकोप-
प्रशमनानि यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
प्रायेणोपशमं याति स्वयमेव समीरणः ॥
शरत्काले वसन्ते च पित्तं प्रावृड्हृतौ कफः ।
चयकोपशमान्दोषा विहाराहारसेवनैः ।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्य्ययः ॥"॥
स च प्राणादिभेदेन पञ्चविधः । यथा,—
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥
वायुरायुर्ब्बलं वायुर्व्वायुर्धाता शरीरिणाम् ।
वायुर्व्विश्वमिदं सर्व्वं प्रभुर्व्वायुः प्रकीर्त्तितः ॥
वाह्यमण्डलचक्रेषु यथा राजा प्रशस्यते ।
तथा शरीरमध्येऽपि वायुरेकः परो विभुः ॥
वायुः प्राणादिभेदेन स च पञ्चविधः स्मृतः ।
हृदि प्राणो गुदेऽपानः समानो नाभिमध्यगः ॥
उदानः कण्ठदेशे तु व्यानः सर्व्वशरीरगः ।
योऽनिलो रक्तसञ्चारी स प्राणो नाम देहधृक् ॥
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चैवावलम्बते ।
कुपितः कुरुते रोगान् हिक्काश्वासादिकानपि ॥
उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिविशेषोऽपि प्रवर्त्तते ॥
ऊर्द्ध्वजत्रुगतान् रोगान् करोति कुपितश्च सः ।
आमपक्वाशयचरः समानोऽग्निसहायवान् ॥
अन्नं पचति तज्जांश्च विकारान् विविनक्ति सः ।
गुल्माग्निसादातीसारान् कुपितश्च करोति सः ॥
पक्वाशयस्थोऽपानस्तु काले कर्षति चाप्यधः ।
मारुतमूत्रपुरीषाणि शुक्रगर्भार्त्तवानि च ॥
क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।
सर्व्वदेहचरो व्यानो रससंवाहनोद्यतः ॥
स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ।
क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥
[illegible]
युगपत् कुपिताश्चामी देहं हन्युरसंशयः ॥"॥
[illegible] यथा,—
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः ।
प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः ॥
प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः ।
प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत् ॥
इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिले हृदि ।
नष्टे न दृश्यते सर्व्वं तस्मात् प्राणन्तु रक्षयेत् ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥
अपानयंस्तथाहारं मनुजानां यतोऽधमः ।
शुक्रमूत्रशकृद्वायुरपानस्तेन कीर्त्तितः ॥ * ॥
पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् ।
समं नयति गात्रेषु समानो नाम मारुतः ॥
समानोऽग्निसमीपस्थः कोष्ठे च चरति सर्व्वतः ।
अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥ * ॥
स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः ।
उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥ * ॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः ।
प्रीतिविनाशकश्चायं वाहकोत्पादकस्तथा ।” * ॥
वायूनां स्थानानि ।
“शिरसो नासिकाप्रान्तमुदानस्थानमुच्यते ।
नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥
शरीरव्यापको व्यानः प्राणः सकलनायकः ।
उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥
कृकरः क्षुधितो चैव देवदत्तो विजृम्भिते ।
धनञ्जयः स्थितो मेढ्रे मृतस्यापि न मुञ्चति ।
भूतान्यभिप्रतस्त्वस्य जायते भयगोचरान् ॥ * ॥
उत्साहोच्छ्वासनिःश्वासचेष्टाधातुगतिः समाः ।
समो मोक्षो गतिमतां वायोः कर्म्माविकारजम् ।”
इति सुखबोधः ॥ * ॥
अथ दिग्भववायुगुणाः ।
“प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः ।
वैरस्यशोथशोफानि करोत्यप्यशोफयोश्च ॥
अपोऽपि प्रचेतादिग्वातः क्षयदाहकृत् ।
स्वादुपानज्वरश्वासक्षयदोषार्त्तिविषक्रिमीन् ।
कोपयेदामवातञ्च धनसधानकारकम् ॥
दाक्षिणो मारुतो रक्तपथ्यः शस्त्रघातकः ।
मधुरश्चाविदाही च कषायानुरसो लघुः ॥
रक्तपित्तप्रशमनो न च मारुतकोपनः ।
स्कन्दरादिकोटावो जनकः प्राणवारकः ॥
पाश्चिमोऽपि प्रचुरं बलारोग्यविवर्द्धनः ।
कषायः शोषणः सर्व्वरोगघ्नो विषदो लघुः ॥
अयं लघुश्च दद्रौक्ष्यमूत्रकारकः ।
सर्व्वदोषविषघ्नभारवत्तीयवृतम् ।
वर्षारोगकरो दाहशोषप्रनाशनः ॥
कौबेरो मारुतः स्निग्धो मधुरो मधुर एव च ।
कषायानुरसः शीतः सर्व्वदोषप्रकोपनः ॥
अग्नेरीशानजो हितो दाहवारकः ।
ऐशानिकः कफाहारः वह्निदुग्धस्तनयद्रुमान् ॥
[illegible] वायुश्च, दक्षिणो नैऋतोद्भवम् ।
अकर्म्मण्यः सर्व्वतः इन्ना कुशोकान्तुरःपदः ।” * ॥

युगनवायुगुणाः ।
“मूर्च्छादाहतृषाम्वेदश्रमघ्नो युगनानिलः ।
तालवृन्तमयो वातस्त्रिदोषशमनो लघुः ॥
वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः ।
चालव्यजनमोत्थञ्च मक्षिकादीन् व्यपोहति ।
मायूरा वल्लभा वैत्रा वाता दोषत्रयापहाः ॥”
इति राजवल्लभः ॥ * ॥
अपि च । तत्र वायोः स्वरूपमाह ।
“दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥”
नेता स्थानान्तरे प्रापयिता । शीघ्रः आशुकारी । अन्यच्च ।
“उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ।
अनुग्रहात्यविरतो हृदयेन्द्रियचित्तधृक् ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥
स्वरो म्हट्टयोगवाही संयोगादुभयार्थकृत् ।
दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥”
एको वायुः पित्तवशात्नामस्थानकर्म्मभेदैः पञ्चविधः ॥ * ॥ तेषां वायूनां नामान्याह ।
“उदानस्तदनु प्राणः समानोऽपान एव च ।
व्यानश्चैतानि नामानि वायोः स्थानप्रभेदतः ॥”
अथोदानादीनां स्थानान्याह ।
“कण्ठे हृदि तथाधस्तात् कोष्ठवह्निमलाश्रये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥”
अथ तेषां कर्म्माण्याह ।
“उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ।
करोत्यूर्द्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः ॥
यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।
आमपक्वाशयचरः समानो वह्निसङ्गतः ॥
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥”
तज्जानित्याह अन्नजान् । रसमलमूत्रादीन् पृथक्करोतीत्यर्थः ।
“स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ।
पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ॥
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ।
क्रुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ॥”
स च ।
“कृत्स्नदेहचरो व्यानो रससंवहनो यतः ।
स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ।
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ॥

प्रस्यन्दनं चोद्वहनं पूरणञ्च [illegible]
धारणञ्चेति पञ्चैतान्येव [illegible]
क्रुद्धः स कुरुते रोगान् [illegible]
युगपत् कुपिता एते देहं [illegible]
देहं भिन्नं कुर्य्युर्मारयेयुरिति [illegible]
प्रकाशः ॥ * ॥ (अस्तुरविदेशः)
वंशे । २ । ८५ ।
“दीर्घशिक्षोऽकेनयनो [illegible]
वायुर्गरिष्ठो नखश्च [illegible]
वायुकेतुः, क्ली, (वायुः केतुर्ब्बेर्यस्याः ।) धूलिः । इति हारावली ।
वायुगण्डः, पुं, अजीर्णः । इति [illegible]
वायुगुल्मः, पुं (वायुना कृतो गुल्म इव) भ्रमः । इति त्रिकाण्डशेषः ।
वायुदारुः, पुं, (वायुना [illegible]) मेघः । इति त्रिकाण्डशेषः ।
वायुपुत्रः, पुं, (वायोः पुत्रः ।) धनञ्जयः । हनूमान् । यथा,—
“हनूमानञ्जनासूनुर्वायुपुत्रो [illegible]”
इति तस्य [illegible]
वायुफलं, क्ली, (वायुना फलति [illegible] फल + अच् ।) शक्रधनुः । करका । इति मेदिनी । ले, ११ ।
वायुभक्षः, पुं, (वायुर्भक्षोऽस्य ।) इति राजनिर्घण्टः । वातभक्षे, गो० रामायणे । २ । ११ । ११ ।
“स हि तेपे तपस्तीव्रं दशवर्षसहस्राणि वायुभक्षः”
वायुवर्त्म, [न्] क्ली, (वायोर्वर्त्म ।) इति शब्दचन्द्रिका ।
वायुवाहः, पुं, (वायुना उह्यते इति । वह + घञ् ।) धूमः । इति हेमचन्द्रः ।
वायुवाहिनी, स्त्री, (वायुं वहतीति । वह + णिनिः । ङीप् ।) [illegible] वैद्यकम् ।
वायुषः, पुं, मत्स्यविशेषः । भाषा । तस्य गुणाः ।
“वायुषो हंसको रुच्यो मधुरो [illegible]
वायुसखः, पुं, (वायोः सखा । [illegible] टच् ।” ५ । ४ । ९१ । इति टच् ।) इति भरतः ।
वायुसखा, [खि] पुं, (वायुः सखा यस्य । टजभावात् । “अनङ् सौ ।” ७ । १ [illegible] अनङादेशः ।) अग्निः । इत्यम[illegible]
वायुपथं, क्ली, ([illegible]) आकाशः । इति धनञ्जयः ।
वार्, क्ली, (वारयतीति । वृ + णिच् + क्विप् ।) जलम् । इत्यमरः । १ । १० । ३ ।
भागवते । १० । ३१ । २२ ।
“सम्बन्धपाणिभिरसुष्ट [illegible]
श्रान्ता गजीभिरिभराडिव [illegible]

...री, (वारयतीति । वृ + णिच् + अच् ।) ...पात्रम् । इति हेमचन्द्रः ॥
...ं, व, कुक्कुटः । यथा । वारंवारं मुहुः ...रिति हलायुधः ॥
...ः, (वारयति निषेधति । वृ + णिच् + ...। वृ + घञ् वा ।) समूहः । अवसरः । ...रः ॥ (यथा, महाभारते १।१६१।७ ।
...ान्यपि दुष्कराण्यसाणि धीमताम् । ...रां बहुभिर्वारैस्तत्सुतास्ते करे ॥") ...द्वारम् । हरः । चरः । कुब्जकः । ...ः । इति मेदिनी । रे, ६५ ॥ अथ ...रां संज्ञा ।
...: सौम्यो गुरुः शिवो मन्दः शुक्रो रविर्बुधः । ...श्च भार्गवो शिवो भौम उग्रः शशी मतः ॥
...श्रि: प्रयाणं प्रवेशं मङ्गले: ।
...नोपि च पौष्टं च स्थिरैश्चन्द्रादिभिः ॥
...िविशेषात् विषाद्यं शनिवारे प्रशस्यते ।
...ते तु सेवयामास कुर्य्यादेव रथादिकम् ॥
...ायं सौम्ये पुष्टं शस्त्राभ्यासः कुजे तथा ।
...कार्य्यं सततं यात्रा चैव बुधे स्मृता ॥
...ं देवपूजा च वस्त्राद्याभरणं गुरौ ।
...ादानं गजारोहः शुक्रे स्यात् सततः स्त्रियाः ।
...ं गृहप्रवेशश्च गजबन्धः शनौ शुभः ॥"
इति गारुडे ६८ अध्यायः ॥
...दिनवारप्रवृत्तिः सूर्य्योदयावधिरेव । ...निदान्ते ।
...ादिवसविच्छेदो दिनमासाब्दपालता ।
...यथभुक्तिश्च वासरेण प्रकीर्त्तिता ॥"
...े दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं ...लपनोक्तं व्यवहारोऽपि तादृगेव । तिथि-...द्धेऽपि । अतस्तु वारयोगे वक्तव्यं यदि वा ...दिनद्वयेऽसम्भवादित्युक्तम् । यावनदिन-...ेद सर्व्वसिद्धान्तः ।
...दयादोदयं भानोर्भौमसावनवासरा: ॥"
...ति विचारादिदिनशास्त्रार्थम् । यत्तु रेखा-...परयोरित्यादिना ज्योतिषे वारप्रवृत्तिरुक्ता ...ज्योतिःशास्त्रोक्तकालहोरादिज्ञानार्थमिति ...निरुक्तं बहुधा विस्तृतम् ।
...ास्तमनमर्कस्य नोदयः सर्व्वदा सतः ।
...दयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥
...त्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ॥"
...ति विष्णुपुराणात् सूर्य्यदर्शनयोग्यकालादेव ...षट्ककर्म्मसु स एव कालः । इति ज्योति-...स्वम् । * । अथ शोभनवाराः ।
...रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः । ...षां नामतो वारा विख्याताः सर्व्वकर्म्मसु ॥ ...न्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः । ...भृगुसुतमन्दानां शुभकर्म्मसु केष्वपि ॥"
इति ज्योतिःसागरः ॥
...थ वारवेला ।
"कलसुनियमशरमङ्गल-
रामतंतु भास्करादियामार्द्धे ।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय ॥"
अथ कालवेला ।
"कालस्य वेला रवितः शराब्धि-
र्बाणाग्नयाद्यास्तुरगौ शशीन्दू ।
दिने निशायामनुवेदवेद-
नगेषु रामा विधुरग्निनौ च ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
तयोर्लक्षणं यथा,—
"रवौ वर्ज्ज्यं चतुःपञ्च सोमे सप्तद्वयं तथा ।
कुजे षष्ठद्वयञ्चैव बुधे वारत्रयं तथा ॥
गुरौ सप्ताष्टकं चैव त्रिचत्वारि च भार्गवे ।
शनावाद्यञ्च षष्ठञ्च शेषञ्च परिवर्ज्जयेत् ॥ * ॥
रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ॥
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्ज्जयेत् ॥"
इति स्मारसंग्रहः ॥ * ॥
अथ स्त्रीणां प्रथमरजस्वलायां वारफलम् ।
"आदित्ये विधवा नारी सोमे चैव पतिव्रता ।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च ॥
वृहस्पतौ पतिः श्रीमान् शुक्रे पुत्रवती भवेत् ।
शनौ वन्ध्या तु विज्ञेया प्रथमर्त्तौ रजस्वला ॥"
इति मधुरेशकृतवारसंग्रहः ॥
(वालः । यथा, ऋग्वेदे । २ । ४ । ४ ।
"वियोभरिभ्रदोषधीषु जिह्वा-
मत्यो न रथ्यो दोधवीति वारान् ॥"
"रथ्यो रथार्होऽश्वोन यथा वारान् दंश-
वारकगणादीन् बालान् दोधवीति कम्पयति ।"
इति तद्भाष्ये सायणः ॥ वरणीये, त्रि, । यथा, ऋग्वेदे । १ । १२८ । ६ । [इष्यति ॥"
"विश्वस्मा इनसूकृते वारमृण्वत्यग्निर्द्वारान्
"वारं सर्व्वैर्वरणीयम् ॥" इति तद्भाष्ये सायणः ॥)
वारकं, क्ली, (वारयतीति । वृ + णिच् + ण्वुल् ।) कष्टस्थानम् । इति हारावली । १२८ ॥ ह्रीवे-रम् । इति हेमचन्द्रः । ४ । २२४ ॥
वारकः, पुं, (वृ + णिच् + ण्वुल् ।) अश्वविशेषः । इति विश्वः ॥ अश्वगतिः । निषेधके, त्रि । इति मेदिनी । के, १३१ ॥ (यथा, महाभारते ।१२। ३३१ । ३६ ।
"पुरा सम्भ्रमभावं प्रसुप्तरवदुःखिन ।
तदेव जीवितं यस्मिन्न चास्ति तस्य वारकः ॥")
वारकी, [न्] पुं, (वारकोऽस्त्यस्येति । इनिः ।) विपक्षः । शत्रुः । पर्णाजीवी । पयोधिः । इति मेदिनी । ने, १८५ ॥
वारकीरः, पुं, (वारो वरणीयः कीरः शुक इव । यद्वा, वारे अवसरे किरति कौतुकवाक्यमिति । कॄ + कः । निपातनात् दीर्घः । यद्वा, वारे अवसरे कीलति बध्नाति कौतुकार्थं रज्ज्वा प्रेमणा वा । कील + कः । लस्य रत्वम् ।) श्यालकः । इति त्रिकाण्डशेषः ॥ वाग्ग्राही । वाडवः । यूका । वेणिवेधिनी । नीराजितहयः । इति मेदिनी । रे, २८८ ॥
वारटः, पुं, भल्ली । इति त्रिकाण्डशेषः ॥
वारण्डः, पुं, (वारयतीति प्रियते इति वा । वृ + "वृङ्गोरण्डन्" उणा० १ । १२१ । इति अण्डच् । धातोर्ह्रस्वः ।) मद्गुरादिमुखः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ मुद् इति वाँट इति च भाषा ॥ (यथा, सुश्रुते । १ । ७ ।
"तत्र मत्सिकण्टकानि ****गलोद्भूतवद्ध-वृणवारण्डानि अल्पविवरभल्लोदरस्यार्थमुप-दिश्यन्ते ॥")
वारटं, क्ली, (वारं जलसमटति प्राप्नोतीति । अट् + अच् ।) क्षेत्रम् । इति त्रिकाण्डशेषः । क्षेत्रसमूहः । इति शब्दरत्नावली ॥
वारटा, स्त्री, (वारि जले अटतीति । अट् + अच् + टाप् ।) हंसी । इति हेमचन्द्रः ।४।३६३॥
वारणं, क्ली, (वृ + णिच् + ल्युट् ।) प्रतिषेधः । इति मेदिनी । णे, ६६ ॥ (यथा, हरिवंशे ।१८०।३५॥
"अस्त्राणां वारणार्थाय वासुदेवोऽभ्यसूयत ॥")
हस्तवारणम् । इति जटाधरः ॥*॥ दानकाले वारणनिषेधो यथा,—
"न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत् ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
वारणः, पुं, (वारयति परबलमिति । वृ + ल्युः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")
वारणवारः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ४ । ४० । २ ।
"वारणा यस्य सौवर्णाः पृष्ठे भासन्ति दंशिताः ।
सुपार्श्वं सुग्रहञ्चैव कस्यैतद्धनुरुत्तमम् ॥"
वारि जले रणति चरतीति । वार् + रण + अच् । जलचाते, त्रि । यथा, हरिवंशे ।३१।४८॥
"ततो वैमाण्डकिस्तस्य वारणं शक्रवारणम् ।
अवतारयामास महीं मन्त्रैर्बाहनसत्तमम् ॥"
"वारि जले रणति चरतीति वारणः समुद्रोद्भव इत्यर्थः ।" इति तट्टीकायां नीलकण्ठः ॥)
वारणबुषा, स्त्री, (बुष्यते इति । बुष उत्सर्गे + कः । वारणानां बुषा । यद्वा, वारणान् पुष्णा-तीति । पुष + कः । पृषोदरादित्वात् पस्य वः ।) कदली । इत्यमरः । २ । ४ । ११३ ॥
वारणवल्लभा, स्त्री, (वारणानां वल्लभा प्रिया ।) कदलीवृक्षः । इति त्रिकाण्डशेषः ॥
वारणसी, स्त्री, (वरणा च असी च नदीद्वयं तस्य अदूरे भवा । "अदूरभवश्च ।" ४।२।७० । इत्यण् । ङीप् । पृषोदरादित्वात् साधुः ।) वाराणसी । काशी । इति हेमचन्द्रः ॥
वारणीयं, त्रि, (वृ + णिच् + अनीयर् ।) वारण-योग्यम् । वृञ्धातोः णिजन्तादनीयप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे ।५७।३।

"अवारणीयं रिपुभिर्वारणीयं करं शुभः ।
वैरमस्य अचिन्दूरमसिं दूरमपच्छिदम् ।")
वारत्रं, क्ली, चर्म्मबन्धनी । इति केचित् ॥
वारवधूः, स्त्री, (वाराणां जनसमूहानां वधूः ।) वारमुख्या । इति हेमचन्द्रः । ३ । १९७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३२८ ।
"निजगात्रनिर्व्विशेषस्यापि समपि सारमखिल-
माहाय ।
निर्म्मोकमिव भुजङ्गी मुञ्चति पुरुषञ्च वारवधूः ।")
वारबाणः, पुं, क्ली, (वारं वारणीयं बाणं यस्मात् ।) कञ्चुकः । इत्यमरः । २ । ८ । ६३ ॥ (यथा, माघे । १५ । ८४ ।
"पीनकुचतटनिपीड़ित-
दरवारबाणसुरसा लिलिङ्गिरे ।")
वारबुषा, स्त्री, (वारान् बालकान् पुष्णातीति । पुष्+कः । पृषोदरादित्वात् पस्य बः ।) कदली । इति शब्दरत्नावली ॥
वारमुख्या, स्त्री, (वारेषु वेश्यासमूहेषु मुख्या श्रेष्ठा ।) जनैः सत्कृता वेश्या । इत्यमरः । २ । ६ । १९ ॥ (यथा, भागवते । १ । ११ । २० ।
"वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ।")
वारयिता, पुं, (वारयति दुर्नीतेरिति । वृ+णिच् +तृच् ।) पतिः । इति हलायुधः ॥
वारला, स्त्री, (वारं लातीति । ला+कः ।) वरटा । हंसी । इति हेमचन्द्रः । ४ । ३९३ ॥
वारलीकः, पुं, बल्वजा । इति शब्दरत्नावली । बाबुइ इति ख्यातः ॥
वारवाणिः, पुं, (वारं शब्दसमूहं वणते इति । वण+इन् ।) वंशीवादकः । इति त्रिकाण्ड-शेषः । उत्तमगायकः । इति शब्दरत्नावली ॥ धर्म्माध्यक्षः । संवत्सरः । इत्यजयपालः । एत-न्मते पञ्चम्यौवादिः ॥
वारवाणिः, स्त्री, (वारे अर्थदानावसरे वाणिः प्रियालापो यस्याः ।) वेश्या । इति त्रिकाण्ड-शेषः ॥
वारवाणी, स्त्री, (वारवाणि+पक्षे ङीष् ।) वार-मुख्या । इति शब्दरत्नावली ॥
वारविलासिनी, स्त्री, (वाराणां जनसमूहानां विलासिनी स्त्री । यद्वा, वारान् विलासयतीति । वि+लस+णिच्+णिनिः । ङीप् ।) वेश्या । इति शब्दरत्नावली । (यथा, कथासरित्-सागरे । १२ । ७८ ।
"अस्तीह मथुरा नाम पुरी कंसारिजन्मभूः ।
तस्यां रूपनिकेताभूत् ख्याता वारविला-
सिनी ।")
वारहरा, स्त्री, (वारान् दक्षिणमहान् वहतीति । हर+कः । टाप् । दक्षिणस्यैवाश्रयत्वा-दस्य ।) बदरी । इति शब्दरत्नावली ।
वारसुन्दरी, स्त्री, (वाराणां जनसमूहानां सुन्दरी ।) वेश्या । इति हारावली । १३३ ॥
वारसेवा, स्त्री, (वारे अवसरे सेवा ।) वेश्यानां प्रन्दः । वारो प्रन्दः । इति जटाधरः ॥

वारस्त्री, स्त्री, (वाराणां जनसमूहानां स्त्री ।) वेश्या । इत्यमरः । २ । ६ । १९ ॥
वारांनिधिः, पुं, (वारां जलानां निधिः । अलुक् समासः ।) समुद्रः । इति शब्दरत्नावली ॥
वाराणसी, स्त्री, (वरणा च असी च । तयोर्नद्यो-रदूरे भवा । "अदूरभवश्च ।" ४ । २ । ७० । इत्यण् । ङीप् । पृषोदरादित्वात् साधुः । अस्या निरुक्तिर्यथा,—
"वरणासी च नद्यौ द्वे पुण्ये पापहरे उभे ।
तयोरन्तर्गता या तु सैषा वाराणसी स्मृता ।")
मोक्षदपुरीविशेषः । बनारस् इति हिन्दी भाषा । तत्पर्य्यायः । वाराणसी २ काशी ३ शिवपुरी ४ । इति हेमचन्द्रः ॥ शिवरी ५ तपःस्थली ६ वरणसी ७ तीर्थराजी ८ काशिका ९ । इति शब्दरत्नावली ॥ तस्या माहात्म्यं यथा,—

ईश्वर उवाच ।
"परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी ।
सर्व्वेषामेव भूतानां संसारार्णवतारिणी ॥
तत्र भक्ता महादेवि ! मदीयं व्रतमाश्रिताः ।
निवसन्ति महात्मानः परं नियममास्थिताः ॥
उत्तमं सर्व्वतीर्थानां स्थानानामुत्तमञ्च यत् ।
ज्ञानानामुत्तमं ज्ञानं अविमुक्तपुरं मम ॥
स्थानान्तरं पवित्राणि तीर्थान्यायतनानि च ।
श्मशानसंस्थितान्येव दिव्यभूमिगतानि च ॥
भूर्लोके नैव संलग्नमन्तरीक्षे ममालयम् ।
अमुक्तास्तत्र पश्यन्ति मुक्ताः पश्यन्ति चेतसा ॥
श्मशानमेतद्विख्यातमविमुक्तमिति श्रुतम् ।
कालो भूत्वा जगदिदं संहराम्यत्र सुन्दरि ! ॥
देवीदं सर्व्वगुह्यानां स्थानं प्रियतरं मम ।
मद्भक्तास्तत्र गच्छन्ति मामेव प्रविशन्ति ते ॥
दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतञ्च यत् ।
ध्यानमध्ययनं ज्ञानं सर्व्वं तत्राक्षयं भवेत् ॥
जन्मान्तरसहस्रेषु यत् पापं पूर्व्वसञ्चितम् ।
अविमुक्तं प्रविष्टस्य तत्सर्व्वं व्रजति क्षयम् ॥
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्रा ये वर्णसङ्कराः ।
स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णाः पाप-
योनयः ।
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ताः अविमुक्ते वरानने ! ॥
चन्द्रार्द्धमौलयस्त्र्यक्षा महावृषभवाहनाः ।
शिवे मम पुरे देवि ! जायन्ते तत्र मानवाः ॥
नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी ।
ईश्वरानुगृहीता हि सर्व्वे यान्ति परां गतिम् ॥
मोक्षं सुदुर्लभं मत्वा संसारञ्चातिभीषणम् ।
अश्मना चरणौ हत्वा वाराणस्यां वसेन्नरः ॥
दुर्लभा तपसा चापि मृतस्य परमेश्वरि ! ।
यत्र तत्र विपन्नस्य गतिः संसारमोक्षणी ॥
प्रसादाज्जायते ह्येतन्मम शैलेन्द्रनन्दिनि ! ।
अप्रबुद्धा न पश्यन्ति मम मायाविमोहिताः ॥
अविमुक्तं न पश्यन्ति मूढा ये तमसावृताः ।
विण्मूत्ररेतसां मध्ये ते वसन्ति पुनः पुनः ॥

हन्यमानोऽपि यो
स यानि परमं
जन्ममृत्युजरायुक्तं परं यान्ति
अपुनर्मरणानां हि सा
यां प्राप्य कृतकृत्यः
न दानैर्न
प्राप्यते मनिवृन्दरा या
नानावर्णा
किल्बिषैः पूर्व्वदेहा ये वि
भेषजं परमं
अविमुक्तं परं ज्ञानम
अविमुक्तं परं तत्त्वम
तस्मा वै नैष्ठिकीं
तेषां तत् परमं ज्ञानं
प्रयागं नैमिषं पुण्यं
केदारं भद्रकर्णञ्च गया पुष्करे
कुरुक्षेत्रं
शालग्रामञ्च कुब्जाम्रं
प्रभासं विषयेशानं गोकर्णं
एतानि
न यास्यन्ति परं मोक्षं
वाराणस्यां
प्रविष्टा नाशयेत् पापं
अन्यच्च शुभगा
व्रतानि सर्व्वमेवैतत्
यत्रैव जुहुयान्नित्यं
वायुभक्षश्च सततं वाराणस्यां
यदि पापी यदि शठो
वाराणसीं समासाद्य पुनाति
वाराणस्यां महादेवं
सर्व्वपापविनिर्म्मुक्तास्ते
अन्यत्र योगज्ञानाभ्यां
प्राप्यते तत् परं स्थानं सहस्रै
ये भक्ता देवदेवेशं
ते विन्दन्ति परं मोक्षमेकेनैव
यत्र योगस्तथा ज्ञानं
अविमुक्तं समासाद्य
नानाश्रमाभिनिष्ठानां
या गतिर्विहिता सुभ्रु साविमुक्ते
यानि चैवाविमुक्तस्य देवि
पुरी वाराणसी तेभ्यः
यत्र साक्षान्महादेवो देहान्ते
व्याचष्टे तारकं ब्रह्म तत्रैव ह्यविमुक्ते
तत्तत् परतरं तत्त्वमविमुक्तमिति ध्रुवम्
एकेन जन्मना देवि वाराणस्यां
भ्रूमध्ये नाभिमध्ये च हृदये चैव मूर्द्ध्नि
यथाविमुक्तमादित्ये वाराणस्यां
वरणायास्तथा चास्या मध्ये वाराण
तत्रैव संस्थितं नित्यं निरामयमविमुक्तं
वाराणस्याः परं स्थानं न भूतं
यत्र नारायणो देवो महादेवो दिवे
तत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः

…शे को जनं हि देवेश: पितामह: ॥
…न्तिको ये च ये च वै पापकर्मणा: ।
…ऽपि स्मरणात् ते यान्ति परमां गतिम् ।
…मृत्युर्वैश्यो यत्र सरहस्यं मम ॥
…न्ते महादेवानुज्ञार्थं गत्वा विमुच्यते ।
…विना भविष्यन्ति पापोपहतचेतस: ॥
…नारायण: श्रेष्ठो देवानां पुरुषोत्तम: ।
…हानां गिरिश: स्थानानां वै तदुत्तमम् ॥
…मासाधिपो रुद्र: पूर्व्वमेव जगति ।
…न्ति परं क्षेत्रमविमुक्तं शिवालयम् ॥
…न्ति सदा स्नानं वदन्ति च पुरीमिमाम् ।
…विसृजन्ति निःशेषमिहामुत्र च पातकम् ॥
…दर्शनमिदं स्नानं शिवं मोक्षकाङ्क्षिणाम् ।
…ाय पुनर्जन्म न भूयो भवसागरे ॥
…न् सर्व्वप्रयत्नेन वाराणस्यां वसेन्नर: ।
…'पाण्डवपापीयो पापी वा पुण्यकृत्तम: ॥"
इति कौर्मे ३८ अध्याय: ॥ * ॥

…च ।
…ाणसी नाम पुरी गङ्गातीरे मनोहरे ।
…यागतथा परमेष्ठी कापालिन: सदा ॥
…हृदयगतस्य नित्यं वसति योगिनाम् ।
…योगिनकरो योगी स्वयं चाध्यात्मचिन्तक: ॥
…स्था या पुरी नित्यं भर्गयोगवताद्गृता ।
…प्राणं ददात्येव तत्र यो म्रियते जन: ॥
…स्वयं महादेव: संसारव्याधिमुक्तये ।
…त्वा परमो योगी स्वतन्त्र भवान्तरे ॥
…तेनैव निर्व्वाणमाप्नोति नरदाधम: ।
…हृतो महादेव: पार्व्वत्या सहित: सदा ॥
…न्ध्वैयवाप्नो मानुषाणाञ्च नित्यश: ।
…हर: प्रकाशत्व क्षेत्रं तच प्रकाशितम् ॥
…स्न कामदो देवो न चिराच्च प्रसीदति ।'
…प्राधितस्थिरं भक्त्या निर्व्वाणाय प्रसीदति ॥
…ादिवर्ज्जिता सा तु पुरी तत्र न गच्छति ।
…स्थानं महाक्षेत्रं कदाचिदपि शाङ्करी ॥
…मत्तं युवयो: क्षेत्रमिदं वाराणसी तु यत् ।
…मतं नातिदूरे च वर्त्ततेऽमरसत्तमौ ॥"
इति कालिकापुराणे ५० अध्याय: ॥ * ॥

…य काशीयात्राविधि: ।

सूत उवाच ।

…त्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
…ान् सिद्धिकामानां सत्यवत्या: सुतो मम ॥

व्यास उवाच ।

…णमय महाप्राज्ञ लोमहर्षण वच्मि ते ।
…ा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदे ॥
…दिसमादौ संस्नाय चक्रपुष्करिणीजले ।
…तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विन: ॥
…दित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
…मस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
…ानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
…तारकेशं समभ्यर्च्य महाकालेश्वरं तत: ॥
…त: पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
…नन्दिनी विधातव्या महाफलमभीप्सुभि: ॥ * ॥

ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
दिनमायतनानाञ्च कार्य्या यात्रा प्रयत्नत: ॥
कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभि: ॥
नक्तभोजी कृतस्नानस्तत्तल्लिङ्गप्रसाधक: ।
मौनेन यात्रां कुर्व्वाण: फलं प्राप्नोति यात्रिक: ॥
ॐकारं प्रथमं पश्येत् मत्स्योदर्य्यां कृतोदक: ।
त्रिविष्टपमहादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं तत: ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं तत: ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ।
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभि: ॥
यस्तु क्षेत्रस्थितस्यापि नैतां यात्रां समाचरेत् ।
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचका: ॥ * ॥
अष्टायतनयात्राऽन्या कर्त्तव्या विघ्नशान्तये ॥
दक्षेश: पार्व्वतीशञ्च तथा पशुपतीश्वर: ।
गङ्गेशो नर्म्मदेशश्च गभस्तीश: सतीश्वर: ॥
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषत: ।
द्रष्टव्यान्येतानि लिङ्गानि महापापप्रशान्तये ॥ * ॥
अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपशान्त्यै च कर्त्तव्या क्षेत्रवासिभि: ॥
शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् ।
चागम्य सङ्गमे स्नात्वा द्रष्टव्य: सङ्गमेश्वर: ॥
स्वर्लीनतीर्थे सुस्नात: पश्येत् स्वर्लीनमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वर: ॥
पश्येद्धिरण्यगर्भाख्यं तत्र तीर्थे कृतोदक: ।
पञ्चचूड़ाह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतु:समुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ।
शुक्रेश्वरं तत: पश्येत्तत्कूपविहितोदक: ।
दण्डखाते नर: स्नात्वा व्याघ्रेशं पूजयेत्तत: ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नर: ॥
क्वचिन्न जायते भूय: संसारे दु:खसागरे ।
समारभ्य प्रतिपदं यावत् कृष्णां चतुर्द्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नर: कृत्वा न भूयोऽप्यभिजायते ॥
अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा ।
अग्नीध्रकुण्डसुस्नात: पश्येदग्नीध्रमीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढ़ीशं ततो दृष्ट्वा भावभूतेश्वरं तत: ॥
लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मन:प्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं तत: ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नत: ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नर: ॥ * ॥
अत: परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ॥
शुक्लपक्षतृतीयायां या यात्रा विश्ववृद्धिका ।
गोप्रेक्षतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् ॥
ज्येष्ठवाप्यां नर: स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदकै: ॥

तत: शृङ्गारगौरीञ्च तत्रैव च कृतोदक: ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितामर्च्चयेत्तत: ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्या बिन्दुतीर्थकृतोदकै: ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ॥
इमां यात्रां नर: कृत्वा क्षेत्रेऽस्मिन्मुक्तिजन्मनि ।
न दु:खैरभिभूयेत इहामुत्रापि कुत्रचित् ॥ * ॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितु: सदा ।
ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे ॥
भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रां षष्ठ्यां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठ्यां चण्डीयात्रा शुभावहा ॥ * ॥
अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रात:स्नानं विधायादौ नत्वा पञ्च विनायकान् ।
नमस्कृत्वा च विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
गृहीत्वा नियमञ्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ नागौ वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं तत: ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्तीश्वरं तत: ।
कश्यपेशं नमस्कृत्य हरिकेशवनन्त्वथ ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतड़ागेऽथ दृष्ट्वा वै कीकसेश्वरम् ।
भावभूतं ततो नत्वा चित्रगुप्तेश्वरं तत: ॥
चित्रघण्टां प्रणम्याथ तत: पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलशेश्वरम् ॥
चन्द्रेशन्त्वथ वीरेशो विघ्नेशोऽग्नीश एव च ॥
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायक: ।
सेनाविनायकश्चाथ द्रष्टव्य: सर्व्वविघ्नहृत् ॥
वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ ।
द्रष्टव्यौ यत्नत: काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करुणेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वबाहुका ।
आशाविनायकश्चाथ वृद्धादित्यस्तत: पुन: ॥
चतुर्वक्त्रेश्वरं लिङ्गं ब्रह्मेशस्तु तत: परम् ।
ततो मन:प्रकामेश ईशानेशस्तत: परम् ॥
चण्डीचण्डीश्वरौ दृष्ट्वा भवानीशङ्करौ तत: ।
ढुण्ढिं प्रणम्य च ततो राजराजं समर्च्चयेत् ॥
लाङ्गलीशस्ततोऽभ्यर्च्यस्ततस्तु नकुलीश्वर: ।
परान्नेशमथो नत्वा परद्रव्येश्वरं तत: ॥
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्य तत: अप्सरसेश्वरम् ॥
गङ्गेशोऽर्च्यस्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं तत: ।
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्तत: ।
वीरभद्रेश्वरं नत्वा अविमुक्ते [illegible] ॥

[illegible]: तत्र विन्यस्य ततो यजेत् ।
[illegible] विनुन्दाय [illegible]ज्ञरीरवेत् ।
[illegible] याचेयं यदाहस्तृणया [illegible] ।
[illegible] ध्यानमनया [illegible] ।
इति मन्त्रं मनुमार्ग [illegible] मुक्तिमण्डपे ।
[illegible] वाराहरूपं [illegible] पुण्यवाहक: ॥०॥

[illegible]

वाराहपत्री, स्त्री, (वाराहस्तनुरूपं इव पत्र-मस्यस्याः । अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहाङ्गी, स्त्री, (वाराहमिवाङ्गमस्याः । ङीष् ।) दन्तीवृक्षः । इति भावप्रकाशः ॥

वाराही, स्त्री, (वाराह + ङीष् ।) ब्रह्माण्या-द्यष्टमातृकान्तर्गतमातृकाविशेषः । यथा,—
"वराहरूपधारी च वराहोपम उच्यते ।
वाराहजननी चाथ वाराही वराहवा ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥

योगिनीविशेषः । यथा,—
"दुर्गा चण्डेश्वरी चण्डी वाराही कार्त्तिकी तथा ।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा ।
भद्रकाली विशालाक्षी भैरवी कामरूपिणी ।
एताः सर्वाश्च योगिन्यो भृङ्गारैः स्नापयन्तु ते ॥"

तीर्थविशेषः । यथा,—
"वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुभैरवसागराः ।
मनुस्नानविधानाय सान्निध्यमिह कल्पय ॥"
इति हयशीर्षपञ्चरात्रे दुर्गापूजापद्धतिः ॥

वराहदेवस्य शक्तिः । यथा,—
"यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः ।
शक्तिः साप्यायया तत्र वाराही बिभ्रती तनुम् ॥"
इति चण्डी ॥

[illegible] च ।
"वाराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ।
शुभदां सुप्रभां शुभ्रां वाराहीं तां नमाम्यहम् ॥"
इति हयशीर्षपञ्चरात्रे दुर्गापूजापद्धतिः ॥

वराहक्रान्ता । [illegible] इति ख्यातः । तत्-पर्य्यायः । विष्वक्सेनप्रिया २ गृष्टिः ३ वदरा ४ । इत्यमरः । [illegible] ५ । इति भरतः ॥ शूकरी ६ क्रोष्टुकन्या ७ विष्वक्सेनकान्ता ८ वराही ९ कौमारी १० त्रिनेत्रा ११ ब्रह्मपुत्त्री १२ [illegible] १३ [illegible] १४ [illegible] १५ माधवेष्टा १६ शूकरकन्दः १७ क्रोडः १८ वनवासी १९ कुष्ठ-[illegible] २० [illegible] २१ [illegible] २२ महावीर्य्यः २३ महौषधम् २४ [illegible] २५ वराह-कन्दः २६ [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ । [illegible] गुणाः । तिक्तत्वम् । कटुत्वम् । [illegible] [illegible] । [illegible] । [illegible] । इति राजनिर्घण्टः ॥ अपि च ।
"[illegible]
[illegible] इव [illegible] ॥"
इति भावप्रकाशः ॥
[illegible] । इति राजनिर्घण्टः ॥ [illegible]
[illegible] ॥

वारि, क्ली, ([illegible]
"[illegible]
[illegible] ॥ इति [illegible] ।)

[illegible] मणौ ।
"न कुर्वीत वृथा चेष्टां [illegible]
[illegible]
[illegible]
"[illegible] वारि पूर्व्वमिह [illegible]
[illegible]
इति ब्रह्मवैवर्त्ते [illegible]
जलक्रीडायां [illegible]
"जलकेली [illegible]
[illegible]
इति कविकल्पलतायाम् । [illegible]
ह्रीवेरम् । इति हेमचन्द्रः ।

वारिः, स्त्री, (वारयतीति [illegible]
वाक् । सरस्वती । [illegible]
भूमिः । (यथा, रघौ । [illegible]
"[illegible]
[illegible]
[illegible]
[illegible]
वन्दिः । कलशीति भाषा । [illegible]
हेमचन्द्रः । (वरणीये, [illegible]
संहितायाम् । [illegible]
"[illegible]
[illegible] ॥"
"[illegible]
वारि [illegible]
[illegible] ।)

वारिकण्टकः, पुं, (वारिणः कण्टक [illegible]
टकः । इति जटाधरः । [illegible]

वारिकर्णिका, स्त्री, ([illegible]
यस्याः । गौरादित्वात् [illegible]
टाप् पृषोदरत्वात् ।) [illegible]
इत्यालो । [illegible]

वारिकपूरः, पुं, (वारिणः [illegible]
मत्स्यः । इति त्रिकाण्डशेषः ।

वारिकुब्जः, पुं, (वारिणः कुब्ज [illegible]
शृङ्गाटकः । इति [illegible]

वारिकुब्जकः, पुं, ([illegible]
शृङ्गाटकः । इति [illegible]

वारिक्रिमिः, पुं, (वारिणः क्रिमिः [illegible]
इति त्रिकाण्डशेषः ।

वारिचत्वरः, पुं, ([illegible]
कुम्भिका । इति [illegible]

वारिचरः, पुं, (वारिणि चरति [illegible]
मत्स्यः । इति शब्दर [illegible]
[illegible]
"[illegible]
[illegible]
[illegible]
[illegible]

...रङ्गुमात्रे, त्रि । (यथा, महाभारते । ...।२४७।१८।
...वारिचरः पक्षी न लिप्यति जले चरन् । ...त्मा तथा योगी गुणदोषैर्न लिप्यते ॥")
...मरं, क्ली, (वारिणश्चामरमिव तदा-...दृश्यत्वात् ।) शैवालः । इति त्रिकाण्ड-...॥
...क्ली, (वारिणि जायते इति । जन+डः ।) ...लवणम् । गौरसुवर्णम् । पद्मम् । (यथा, ...रामायणे । २ । ६ । २ ।
...स तत्र पद्माङ्कुशवारिजान्वित-...ध्वजादिचिह्नानि पदानि सर्वतः ॥")
...शम् । इति राजनिर्घण्टः ॥ (वारिजात-...ते, त्रि । यथा, महाभारते ।१।८२।१४।
...गोसर्गेण नृपते ! इमं देशमुपागतः । ...वारिजं किञ्चिदथवा मृगलिप्सया ॥" ...रिजं मीनपद्मादि वेति ।" तट्टीकायां नील-...ठः ॥)
...., पुं, (वारिणि जायते इति । जन+डः ।) ...। इति हेमचन्द्रः ॥ शम्बूकः । इति शब्द-...ला ॥
...स्करः, पुं, (वारिणस्तस्करः । चलाचल-...त्वेन तदपहारकत्वात्तथात्वम् ।) मेघः । इति ...दमाला ॥ वारिशोषणकर्त्तरि, त्रि । यथा,
...रूपधारिणीं चैमामानिनाय निशा-...श्रमम् ।
...सीं भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥" इति मार्कण्डेयपुराणम् ॥
...रा, स्त्री, (वारिणश्छायते इति । छै+डः । ...प् ।) छत्रम् । इति त्रिकाण्डशेषः ॥
...ई, क्ली, वाला । इति शब्दरत्नावली ॥
...दः, पुं, (वारि ददातीति । दा+"आतो-...पसर्गे कः ।" ३ । २ । ३ । इति कः ।) ...घः । (यथा, मृच्छकटिकनाटके । ५ अङ्के ।
...वियुद्वारिदगर्ज्जितैः सचकिता तद्दर्शना-...काङ्क्षिणी ।
...दौ नूपुरलग्नकर्द्दमधरौ प्रक्षालयन्ती ...स्थिता ॥")
...कः । इत्यमरः ॥ (यथा, सुश्रुते चिकित्-...स्थाने । ३८ अध्याये ।
...रासारग्वधवर्षाभूकटुकोशीरवारिदैः । ...गिमाणग्मनारक्तापञ्चमूलविभीतकैः ॥")
...रिदातरि, त्रि । यथा, मनौ । ४ । २२९ ।
...वारिदस्तृप्तिमाप्नोति दीर्घमायुर्हिरण्यदः । ...दीपदाता चक्षुरुत्तमं रूपदो रूपमुत्तमम् ॥")
...धिः, पुं, (वारीणि धीयन्ते अस्मिन्निति । ...धा+"कर्मण्यधिकरणे च ।" ३ । ३ । ९३ । ...ति किः ।) समुद्रः । इति शब्दरत्नावली ॥
...यथा, कथासरित्सागरे । १८ । ३०१ ।
..."तद्दोःस्वनतारैव वारिधौ स विदूषकः । ...जालपुरे ग्रामे सत्त्ववानवसीदति ॥")

वारिनाथः, पुं, (वारीणां नाथः ।) वरुणः । समुद्रः । मेघः । इति केचित् ॥
वारिनिधिः, पुं, (वारीणि निधीयन्ते अत्रेति । नि+धा+किः ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । ३ । ७८ ।
"पाराद्वारिनिधेः प्राप्ताः काश्मीरेष्वधुनापि ते । राज्ञो यात्रासु निर्यान्ति ख्याता वारिध्वजाः पुरः ॥")
वारिपथिकः, त्रि, (वारिपथेन गच्छतीति । वारिपथ+"उत्तरपथेनाहृतञ्च ।" ५ । १ । ७७ । इत्यत्र "आहृतप्रकरणे वारिजङ्गलकान्तारपूर्व्वादुपसंख्यानम् ।" इति वार्त्तिकसूत्रात् ठक् ।) जलपथगामी । वारिपथं गच्छतीत्यर्थे ठिक-प्रत्ययेन निष्पन्नः ॥ (वारिपथेन आहृतम् । इति काशिका ।)
वारिपर्णी, स्त्री, (वारिणि पर्णान्यस्या इति । वारिपर्ण+"पाककर्णपर्णपुष्पेति ।" ४ । १ । ६४ । इति ङीष् ।) कुम्भिका । इत्यमरः । १।१०।३८ ॥ अस्या गुणाः ।
"वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा पटुः । दोषत्रयकरी रूक्षा शोणितज्वरशोषकृत् ॥" इति राजवल्लभः ॥
वारिपालिका, स्त्री, (वारीणि पालयति सूर्य्यरश्म्यादिभ्यो रक्षतीति । पालि+ण्वुल् । टाप् । अत इत्वम् ।) खम्भालिका । इति शब्दमाला ॥
वारिप्रवाहः, पुं, (वारिणः प्रवाहः ।) निर्झरः । इति शब्दमाला ॥
वारिप्रश्नी, स्त्री, (वारिजाता प्रश्नी ।) वारिपर्णी । इति शब्दमाला ॥
वारिबदरा, स्त्री, (वारिपरिपूर्णा बदरेव ।) प्राचीनामलकम् । इति त्रिकाण्डशेषः ॥
वारिबालकं, क्ली, (वारिणो बालकम् ।) ह्रीबेरम् । इति हारावली । १७८ ॥
वारिभवं, क्ली, (वारिणि नेत्रजलाय भवति प्रभवतीति । भू+अच् ।) स्रोतोऽञ्जनम् । इति राजनिर्घण्टः ॥ (जलभवमात्रे, त्रि ॥)
वारिमसिः, पुं, (वारि मसिरिव श्यामताजनकं यस्य । सजलमेघस्यैव कृष्णवर्णत्वात् तथात्वम् ।) मेघः । इति त्रिकाण्डशेषः ॥
वारिमुक्, [च्] पुं, (वारि मुञ्चतीति । मुच्+क्विप् ।) मेघः । इति शब्दरत्नावली ॥ (यथा, रघौ । ४ । ८६ ।
"स विश्वजितमाजह्रे यज्ञं सर्व्वस्वदक्षिणम् । आदानं हि विसर्गाय सतां वारिमुचामिव ॥")
वारिमूली, स्त्री, (वारिणि मूलं यस्याः । "पाककर्णपर्णेति ।" ४ । १ । ६४ । इति ङीष् ।) वारिपर्णी । इति शब्दरत्नावली ॥
वारिरथः, पुं, (वारिषु रथ इव गमनसाधनत्वात् ।) भेलकः । इति त्रिकाण्डशेषः ॥
वारिराशिः, ...वारीणां राशयो यत्र ।) समुद्रः । ...त्यमरः ॥ (यथा, कथासरित्सागरे ...

"तस्य मथ्यतो हस्ताद्युतनैकमुद्गरम् । जघास शिशुमारोऽत्र वारिराशिजलाश्रयः" वारीणां राशिः । जलसमूहश्च । यथा, रघौ ४ । ३६ ।
"शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात् । पूर्व्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ॥")
वारिरुहं, क्ली, (वारिणि रोहति जायते इति रुह+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ इति कः ।) कमलम् । इति राजनिर्घण्टः (यथा, किरातार्ज्जुनीये । ५ । १३ ।
"विकचवारिरुहन्दधतं सरः सकलहंसगणं शुचिमानसम् । शिवमगात्मजया च कृतेर्ष्यया सकलहंसगणं शुचिमानसम् ॥")
जलजाते, त्रि ॥
वारिलोमा, [न्] पुं, (वारिणि लोमानि यस्य यद्वा, वारि लोम्नि यस्य ।) वरुणः । इति जटाधरः ॥
वारिवदनं, क्ली, (वारियुक्तं वदनं यस्मात् तत्सेवनेन मुखे जलनिस्रावात्तथात्वम् ।) प्राचीनामलकम् । इति भूरिप्रयोगः ॥
वारिवरं, क्ली, करमर्द्दकम् । इति जटाधरः ॥
वारिवल्लभा, स्त्री, (वारि वल्लभमस्याः । सजलकत्वात् ।) विदारी । इति राजनिर्घण्टः ॥
वारिवासः, पुं, (वारिसमीपे वासोऽस्य । यद्वा वारि पर्य्युषितामादिजलं वासयति सुगन्धीकरोतीति । वास+अण् ।) शौण्डिकः । इति हेमचन्द्रः । ३ । ५६५ ॥
वारिवाहः, पुं, (वारि वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) मेघः । मुस्ता । इत्यमरः ॥
वारिवाहनः, पुं, (वाहयतीति । वाहि+ल्युः । वारीणां वाहनः ।) मेघः । इति शब्दरत्नावली ॥
वारिशः, पुं, (वारिणि सागरजले शेते इति । शी+डः ।) विष्णुः । इति त्रिकाण्डशेषः ॥
वारिसम्भवं, क्ली, (वारिप्रधानदेशेषु सम्भव उत्पत्तिर्यस्य ।) लवङ्गम् । सौवीराञ्जनम् । उशीरम् । इति राजनिर्घण्टः ॥
वारिसम्भवः, पुं, (वारिप्रधानस्थानेषु सम्भव उत्पत्तिर्यस्य ।) वाणनामतरः । इति राजनिर्घण्टः ॥ (वारिषु सम्भवोऽस्य । वारिजातमात्रे, त्रि । यथा, रामायणे । ५ । ६६ । ९ ।
"इमन्तु किं दुःखकरं यदिमं वारिसम्भवम् । मणिं पश्यामि सौमित्रे ! वैदेहीमागतं ...
वारी, स्त्री, (वार्य्यतेऽनयेति । ... ...ह्र ।" उणा० ... ङीप् ।) ...

"स्वर्गं न विन्दन् इव [illegible]
[illegible] इव प्रभुः ।")

[illegible] । इति मेदिनी ॥

वारीटः, पुं, (वार्यां [illegible]टतीति । टट्+कः ।) हस्ती । इति शब्दमाला ॥

वारीशः, पुं, (वारीणामीशः ।) समुद्रः । इति हेमचन्द्रः । ४ । १४८ ॥

वारुः, पुं, (वारयति रिपूनिति । वृ + णिच् + बाहुलकात् उण् ।) विजयकुञ्जरः । इति त्रिकाण्डशेषः ॥

वारुण्ड, पुं, [illegible] । [illegible] । इति त्रिकाण्डशेषः ॥

वारुणी, स्त्री, (वरुणो देवतास्येति । वरुण + अण् ।) जलम् । इति राजनिर्घण्टः ॥ (शत-भिषानक्षत्रम् । यथा, [illegible] ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहणैः समा ॥"
पश्चिमदिक् । यथा, देवीभागवते । १ । ४ । १७ ।
"वारुणं [illegible] स्थानं [illegible]
शुभम् ।
[illegible]म् ।"
[illegible] । यथा, विष्णुपुराणे । ५ । ४ । ६ ।
"[illegible] वारुणः ।")
वरुणसम्बन्धि, त्रि । यथा,—
"[illegible] वारुणस्य प्रदृश्यते ।
[illegible] शुभं भवेत् ॥
[illegible] शुभः ।
[illegible] ॥"
इति मार्कण्डे ५१८ अध्यायः ॥
(यथा च महाभारते । १ । १०२ । १ ।
"[illegible] वारुणं [illegible] ।
[illegible] ॥")

वारुणकर्म्म, क्ली, (वारुणं वरुणसम्बन्धि कर्म्म ।) [illegible] । तत्र शुभाशुभफलादि यथा,—

[illegible] उवाच ।
"[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ॥"
इति [illegible] ॥

वारुणिः, पुं, (वरुणस्यापत्यं पुमान् । वरुण + इञ् ।) [illegible] । इति [illegible] ॥ (यथा, महाभारते । १ । १०८ । १ ।
"समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच महितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ।"
वशिष्ठः । यथा, महाभारते । १ । ९९ । ७ ।
"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम ! ।
वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ॥"
विमलापुत्रभेदः । यथा, महाभारते ।१।६५।४०।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः ॥"
भृगुः । यथा, शतपथब्राह्मणे । ११ । ६ । १ ।
"भृगुर्ह वै वारुणिः । वरुणं पितरं विद्यायाति-मेने । तद्ध वरुणो विदाञ्चकार ॥")

वारुणी, स्त्री, (वरुणस्येयम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ङीप् ।) सुरा । (यथा, मनौ । ११ । १४७ ।
"अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ।
मतिपूर्व्वमनिर्द्देश्यं प्राणान्तिकमिति स्थितिः ॥"
मदिराधिष्ठात्री देवी । यथा, विष्णुपुराणे । १ । ९ । ९३ ।
"क्षीरोदमथने दिवि चिन्तयत्सु ततः ।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥"
"वारुणी मदिराधिष्ठात्री देवी ।" इति तट्टी-कायां श्रीधरस्वामी ॥ वरुणपत्नी । वारुणी-वरुणयोः दर्शनात् ॥ यथा, महाभारते । २ । ९ । ६ ।
"वरुणासनस्थः वरुणो वारुण्या च समन्वितः ।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥"
नदीविशेषः । यथा, गो० रामायणे ।२।७०।१२।
"पूर्व्वेण वारुणीं तीर्त्त्वा कुरुक्षेत्रे सरस्वतीम् ।
वराणि च प्रफुल्लानि नदीश्च विमलोदकाः ॥")
पश्चिमदिक् । इत्यमरः । १ । ३ । ५१ ॥ (यथा, नैषधचरिते । ४ । ६० ।
"वद विधुन्तुदमालि मदीरितै-
स्त्यजसि किं द्विजराजधिया रिपुम् ।
किमु दिवं पुनरेति यदीदृशः
पतित एव निषेव्य हि वारुणीम् ॥"
विद्याविशेषः । यथा, तैत्तिरीयोपनिषदि (३ भृगुवल्लाम् ६ अनुवाके । "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्दं प्रयन्त्यभिसंविश-न्तीति । सैषा भार्गवी वारुणी विद्या ।"
आज्या? छायाविशेषः । यथा, अथर्व्ववेदे । २ । १७१ ।
"गुरुस्फटिकसङ्काशा शुचिस्मा चेह वारुणी ।")
दूर्वाविशेषः । इति हेमचन्द्रः ॥ गण्ड-दूर्वा । इति मेदिनी । णि, ६८ ॥ इन्द्रवारुणी । दूर्वा । इति राजनिर्घण्टः ॥ शतभिषानक्षत्र-युक्तचैत्रकृष्णत्रयोदशी । यथा, स्कन्दपुराणे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥"
वारुणं शतभिषा ।
"शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ।
शुभयोगसमायुक्ता शनौ [illegible]
महामहेति विख्याता [illegible]
अत्र संक्रान्तिः [illegible]
पतितयुक्तिसागरं [illegible]
वारुण्यायुक्तिसमीये । तेन [illegible]
पश्चि त्रयोदश्यां तिथौ [illegible]
महावारुण्यां यथावद् [illegible]
"स्नानं कुर्व्वन्ति या नार्य्यः
सम्यक् भवेयुस्ता [illegible]

"त्रयोदश्यां तृतीयायां [illegible]
शूद्रविट्क्षत्रियाः स्नानं [illegible]
इति [illegible]
अत्र स्नाननिषेध इति वाच्यम् ।
"भोगाय क्रियते यत्तु स्नानं [illegible]
तन्निषिद्धं दशम्यादौ नियतं [illegible]
इति हेमाद्रिधृतवचनेन [illegible]
निषेधात् तथापि [illegible]
त्रयोदश्यां पूर्व्वायां [illegible]
यत्र परदिने [illegible]
दिन एव स्नानम् । रात्रौ [illegible]
गङ्गायां स्नानम् ।
"दिवा रात्रौ च [illegible]
स्नात्वाश्वमेधजं पुण्यं [illegible]
इति ब्रह्माण्डपुराणे [illegible]
इति तिथ्यादितत्त्वम् । ७ । [illegible]
वनस्थरम्यतरुकोटरगा [illegible]
यथा,—
पराशर उवाच ।
"वने विचरतस्तस्य [illegible]
मातुवद्यप्रपन्नस्य [illegible]
निष्पादितोदकार्थस्य [illegible]
उपभोगार्थमत्यर्थं वरुणः [illegible]
अभीष्टा मदिरा यस्य [illegible]
अनन्तस्योपभोगाय तस्य [illegible]
इत्युक्ता वारुणी तेन [illegible]
इन्द्राग्निरोपसङ्करमा [illegible]
विचरन् मलरोऽपि [illegible]
आघ्राय [illegible]
ततः कदम्बात् [illegible]
पतन्तीं वीक्ष्य [illegible]
पपौ च गोपगोपीभिः [illegible]
उपगीयमानो [illegible]
इति विष्णुपुराणे । [illegible]

वारुणीवल्लभः, पुं, ([illegible]
[illegible]

वारुण्डः, पुं, [illegible]
[illegible]
[illegible]

वारुण्डः, पुं क्ली, ([illegible]
[illegible] । [illegible]
११ ॥

[illegible]

यथा,—

[illegible]

इति ...

वार्क्षी, स्त्री, (वृक्षस्यापत्यं स्त्री । वृक्ष+अण् ।) [illegible] । (यथा, महाभारते । १ । ७५ । १४ ।

[illegible] वार्क्षी [illegible] ।

[illegible] प्रचेतसः ।"

[illegible]

[illegible] यथा, विष्णुपुराणे १ । १५ । १—५९ ।

पराशर उवाच ।

तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥
नाशकन्मारुतो वातुं वृतं खमभवद् द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥
तान् दृष्ट्वा जलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च तेऽसृजन् जातमन्यवः ॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ।
तानग्निरदहद् घोरस्तत्राभूद् द्रुमसंक्षयः ॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥
कोपं यच्छत राजानः शृणुध्वञ्च वचो मम ।
सन्धानं वः करिष्यामि सह क्षितिरुहैरहम् ॥
रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यं जानता पूर्व्वं मया गोभिर्व्विवर्द्धिता ॥
मारिषा नाम नाम्नैषा वृक्षाणामिति निर्म्मिता ।
भार्य्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
तेजसाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥
कण्डुर्नाम मुनिः पूर्व्वमासीद् वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः ॥
तं प्राह महात्मानं गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन् अनुज्ञां दातुमर्हसि ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद् भद्रे स्थीयतामित्यभाषत ॥
एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन साकं महात्मना ॥
अनुज्ञां देहि भगवन् व्रजामि त्रिदशालयम् ।
उक्तस्तथेति स पुनः स्थीयतामित्यभाषत ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयस्मितशोभनम् ॥
उक्तस्तथैव स मुनिरुपगुह्यायतेक्षणाम् ।
प्राहास्यतां क्षणं सुभ्रु चिरं कालं गमि-
ष्यसि ॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत ॥
गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥
तं सा शापभयाद् भीता दाक्षिण्येन च
दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदिनी न जहौ मुनिम् ॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम् ।
नवं नवमभूत् प्रेम मन्मथाविष्टचेतसः ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा
भवेत् ॥
ततः प्रहस्य सुदती तं सा प्राह महामुनिम् ।
किमद्य सर्व्वधर्म्मज्ञ परिवृत्तमहस्तव ॥
बहूनां विप्र वर्षाणां परिवृत्तमहस्तव ।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम् ॥

मुनिरुवाच ।

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम् ॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥

प्रम्लोचोवाच ।

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥

सोम उवाच ।

ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणाम् ।
कथ्यतां भीरु कः कालस्त्वया मे रमतः सह ॥

प्रम्लोचोवाच ।

सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥

ऋषिरुवाच ।

सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥

प्रम्लोचोवाच ।

वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके ।
विशेषेणाद्य भवता पृष्टा मार्गानुवर्त्तिना ॥

सोम उवाच ।

निशम्य तद् वचः सत्यं स मुनिर्नृपनन्दनाः ।
धिङ्मां धिङ्मामतीवेत्थं निनिन्दात्मानमा-
त्मना ॥

मुनिरुवाच ।

तपांसि मम नष्टानि हतं ब्रह्मविदां धनम् ।
हतो विवेकः केनापि योषिन्मोहाय निर्म्मिता ॥
ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन धिक् तं काममहाग्रहम् ॥
व्रतानि वेदविद्याप्तिकारणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापहृतानि मे ॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥
गच्छ पापे यथाकामं यत् कार्य्यं तत्कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रमुषितोऽहं त्वया सह ॥
अथवा तव को दोषः किं वा कुप्याम्यहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥
यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ।
त्वया धिक् तां महामोहमञ्जूषां सुजुगुप्सिताम् ॥

सोम उवाच ।

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद्गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं स्विन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः ॥
वृक्षाद् वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्म्मार्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः ॥
तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥
वृक्षाग्रगर्भसम्भूता मारिषाख्या वरानना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्य-
ताम् ॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचातनया च सा ॥
स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः ।
ऊर्द्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः ॥")

वार्घः, पुं, हंसः । वारि चरतीत्यर्थे डप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

वार्णिकः, त्रि, (वर्णलेखनं शिल्पमस्य । वर्ण+ठण् ।) लेखकः । इति शब्दमाला ॥

वार्त्तं, क्ली, असारम् । आरोग्यम् । इत्यमरः । ३ । ३ । ७५ ॥

वार्त्तः, त्रि, (वृत्तिरस्यस्येति । "प्रज्ञाश्रद्धार्च्चावृत्तिभ्यो णः ।" ५ । २ । १०१ । इति णः ।) निरामयः । इत्यमरः । २ । ६ । ५७ ॥ वृत्तिशाली । इत्यजयपालः ॥

वार्त्तकः, पुं, पक्षिविशेषः । वटेर इति भाषा । यथा,—

"वार्त्ताकी वार्त्तकश्चिन्तस्तोऽन्या वर्त्तका स्मृता।
वर्त्तकोऽग्निकरः शीतो ज्वरदोषत्रयापहः।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाल्पगुणा मता॥"
इति भावप्रकाशः॥

वार्त्ता, स्त्री, (वृत्तिरस्या अस्तीति। "प्रज्ञाश्रद्धार्चाभ्यो णः।" ५।२।१०१। इति णः। ततष्टाप्।) दुर्गा। यथा,—
"पश्वादिपालनाद्देवी कृषिकर्म्मात्मकारणात्।
वर्त्तनाहारणाद्वापि वार्त्ता सा एव गीयते॥"
इति देवीपुराणे ४५ अध्यायः॥
वृत्तिः। जनश्रुतिः। इत्यमरः।१।६।६॥ उदन्तः। (यथा, मोहमुद्गरे। ८।
"यावद्वित्तोपार्ज्जनशक्तः
तावन्निजपरिवारो रक्तः।
तदनु च जरया जर्ज्जरदेहे
वार्त्तां कोऽपि न पृच्छति गेहे॥")
वार्त्तिकम्। कृष्यादि। इति मेदिनी। ते, ५६॥ (यथा, मनौ।९।३२६।
"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्।
वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे॥"
वार्त्तेयं चतुर्विधा। यथा, भागवते।१०।२४।२१।
"कृषिवाणिज्यगोरक्षाकुसीदं तुर्य्यमुच्यते।
वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्॥")

वार्त्ताकः, पुं, (वर्त्ततेऽनेनेति। वृत्+"वृतेर्वृद्धिश्च।" उणा० ३।७९। इति काकुः। "बाहुलकात् उकारस्यात्वे वार्त्ताकवार्त्ताक्यौ।" इत्युज्ज्वलदत्तोक्त्या सिद्धम्।) वार्त्ताकुः। इति त्रिकाण्डशेषः॥ वार्त्तकपक्षी। इति भावप्रकाशः॥

वार्त्ताकी, [न्] पुं, वार्त्ताकुः। इत्यमरटीकायां भरतः॥

वार्त्ताकी, स्त्री, बृहती। इति भावप्रकाशः॥ वार्त्ताकुः। इत्यमरः।२।४।११४॥

वार्त्ताकुः, स्त्री, (वर्त्तते इति। वृत्+"वृतेर्वृद्धिश्च।" उणा० ३।७९। इति काकुः।) स्वनामख्यातफलवृक्षः। वेगुन इति भाषा॥ तत्पर्य्यायः। हिङ्गुली २ सिंही ३ भण्टाकी ४ दुष्प्रधर्षिणी ५ वार्त्ताकी ६ वार्त्ता ७ वार्त्तिकः ८ वार्त्ताकः ९ मांसफलः १० राजकुष्माण्डः ११। इति जटाधरः॥ वार्त्तिकः १२ वार्त्तिमः १३ वृन्ताकः १४ वङ्गणः १५ भण्टुकः १६। इति शब्दरत्नावली॥ कण्टवृन्ताकी १७ कण्टालुः १८ कण्टपत्रिका १९ चित्रफला २० नीलकण्ठा २१ वृन्ताकी २२ महोटिका २३ चित्रफला २४ कण्टकिनी २५ महती २६ कटुफला २७ मिश्रवर्णफला २८ नीलफला २९ रक्तफला ३० शाकबिल्वा ३१ वृन्तफला ३२ दुर्ष्पधर्षफला ३३। अस्या गुणाः। कटुत्वम्। रुच्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। वलपुष्टिकारित्वम्। हृद्यत्वम्। गुरुत्वम्। वातरोगनिकृन्तनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"अग्निप्रदा मारुतनाशिनी च
शुक्रप्रदा शोणितवर्द्धिनी च।
हृत्कासकासारुचिनाशिनी च
वार्त्ताकुरेषा गुणसम्प्रयुक्ता॥
सा बाला कफवातघ्नी पक्वा सक्षारपित्तला।
सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी॥
अङ्गारपक्वा वार्त्ताकुः किञ्चित्पित्तकरी मता।
कफमेदोऽनिलहरा सरा लघुतरा परा॥"
इति राजवल्लभः॥

अन्यच्च।
"वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्।
ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु॥
तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु।
वृन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचितम्॥
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम्।
तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्॥
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्।
तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्वतः॥"
इति भावप्रकाशः॥

वार्त्ताकुः, पुं, (वृत्+काकुः।) वार्त्ताकी। इति त्रिकाण्डशेषः॥

वार्त्तायनः, पुं, (वार्त्तानामयनमनेनेति।) प्रवृत्तिज्ञः। तत्पर्य्यायः। हैरिकः २ गूढ़पुरुषः ३ प्रणिधिः ४ यथार्हवर्णः ५ अवसर्पः ६ मन्त्रवित् ७ चरः ८ स्पशः ९ चारः १०। इति हेमचन्द्रः।३।३९८॥

वार्त्तावहः, पुं, धान्यतण्डुलादेर्वार्त्तां वहति यः। पसारी इति भाषा। तत्पर्य्यायः। वैवधिकः २। इत्यमरभरतौ॥ वार्त्तावहः ३। इति शब्दरत्नावली॥ संवादवाहके, त्रि॥

वार्त्तिकः, पुं, (वृत्तिं वेदेति। वृत्ति+उक्थादित्वात् ठक्।) प्रवृत्तिज्ञः। चरः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे।३४।७६।
"दुर्गतो वार्त्तिकजनो लोभात् किं नाम ना चरेत्॥"
(वार्त्ता कृष्यादिस्तत्र साधुः। ठक्।) वैश्यः। (वार्त्तं आरोग्ये साधुरिति। ठक्।) वर्त्तिकपक्षी। इति राजनिर्घण्टः॥ वार्त्ताकी। इति शब्दरत्नावली॥ (वृत्तौ साधुरिति। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्। वृत्तवृत्तिनिपुणे, त्रि।)

वार्त्तिकं, क्ली, (वृत्तिर्ग्रन्थस्य विवृतिः। तत्र साधुः। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्।) उक्तानुक्तदुरुक्तार्थव्यक्तीकारकग्रन्थः। यथा,—
"उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम्॥"
इति हेमचन्द्रः॥

वार्त्तिका, स्त्री, (वार्त्तिक+टाप्।) पक्षिविशेषः। बटेर इति भाषा। तत्पर्य्यायः। विष्कुलिङ्गी २। इति तारापाली॥

वार्त्रघ्नः, पुं, (वृत्रघ्न इन्द्रस्तस्यापत्यं पुमान्। वृत्रहन्+अण्।) अर्ज्जुनः। इति त्रिकाण्डशेषः॥ जयन्तः। वृत्रघ्नसम्बन्धिनि, त्रि। (यथा, रघुवंशे।१२।३४।) ... वते।६।१२।३४।
"तदा च खे दुन्दुभयो विनेदु-
र्गन्धर्व्वसिद्धाः समहर्षिसङ्घाः।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना
मन्दैर्मुदा कुसुमैरभ्यवर्षन्॥"

वार्द्दरं, क्ली, दक्षिणावर्त्तशङ्खम्। काकचिञ्चा। भारती। ... कृमिजम्। जलम्। आम्रबीजम्।

वार्द्दलं, क्ली, (वार्भिः ... अच्।) सदा ... दुर्द्दिनम्। इति मेदिनी। ले,। मसीपात्रादिः। (वारल ...

वार्द्दलः, पुं, (वार्द्दलातीति। ... संज्ञायां घः प्रायेण।"३।३।... घः।) मेलानन्दा। ... मेदिनी। ले, ११९॥

वार्द्धकं, क्ली, (वृद्धानां समूहः। ... स्येति।" ४।२।३९। काश्यपीकोक्तिः वुञ्।) वृद्धसंघः। भावः कर्म्म वेति। ... वृद्धस्य भावः। वृद्धस्य कर्म्म। ... के, ५६॥ (यथा, ... २४।
"बाल्ये बालक्रिया पूर्व्वं ...
यौवने चापि या योग्या ...
त्रि, वृद्धः। यथा, वैश्यैः।१।४१।
"फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते।
स्थितैः क्षमादाय ...
वने सदातिथ्यमशिक्षि ...
"महर्षीणां सुनिविष्टानां मध्ये ...
सकलात्। स्त्रियां वार्द्धकी ...
संघयोरिति वलः।" इति तारा।

वार्द्धक्यं, क्ली, (वार्द्धकमेव। वार्द्धक+स्वार्थे ष्यञ्।) ... वार्द्धकम् २ वृद्धत्वम् ३ ... जटाधरः॥ (यथा, महाभारते ...
"आत्मानं ...
वार्द्धक्येन च राजेन्द्र। तथा वै ...

वार्द्धिः, पुं, (वारि जलानि ... धिः।) समुद्रः। इति ... देवीभागवते।८।२०।११।
"सोऽनन्तो भगवान् ...
अनन्तगुणवार्द्धिश्च ...

वार्द्धिभवं, क्ली, (वार्द्धौ समुद्रे भवम्।) द्रोणीलवणम्। इ...

वार्द्धुषिः, पुं, (वार्द्धुषिकः। ... कलोपः।) वृद्ध्याजीवः। इत्यमरः ... (यथा, मनौ।३।१५३।
"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी ...
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा ...

क:,पुं, (द्धार्थं द्रव्यं वृद्धिः तां प्रयच्छतीति।
च्छति गर्ह्यम्।”४।४।३०। इति ठक्।
द्वेर्द्धुषिभावो वक्तव्यः।” इति वार्त्तिकोक्तेः
षिभावः।) वृद्धिजीवी। कुसीदकः। वाड़ि-
र इति सुदखोर इति च भाषा। तत्प-
ः। कुसीदकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४।
मरः। कुसीदः ५ कुसीदिकः ६। इति
रत्नावली। तस्य लक्षणं यथा,—
र्घं धान्यमादाय महार्घं यः प्रयच्छति।
वार्द्धुषिको नाम हव्यकव्यबहिष्कृतः॥”
इति स्मृतिः॥
वृद्धिग्रहणनियमो यथा, मनुः।
शीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः
शतात्।
कं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन्॥
शतस्य गृह्णानो न भवत्यर्थकिल्विषी।
कार्षापणेऽशीतिभागं विंशतिकाः पणाः॥”
पुराणद्वयम्। एवंविधं नियममतिक्रम्य
आपदि स्वयमन्यद्वारा वा स्वाच्छन्द्येन यो
हरति तस्यैव प्रायश्चित्तम्। आपदि तु
र्थं कार्य्ये नियमातिक्रमे च न दोषः। इति
श्चित्तविवेकः। इत्याह्निकतत्त्वम्॥
, क्ली, (वार्द्धुषेर्भावः। वार्द्धुषि+ष्यञ्।)
ध्यर्द्धनम्। इति त्रिकाण्डशेषः॥ (यथा,
ते। ११। ६२।
।५। दूषणश्चैव वार्द्धुष्यं व्रतलोपनम्।
गारामदाराणामपत्यस्य च विक्रयः॥”)
क्ली, (वार्द्धेः समुद्रस्येदमिति। वार्द्धि+
।) म्नोयौलवणम्। इति राजनिर्घण्टः॥
क्ली,स्त्री,(वर्द्ध्र्या इदमिति। वर्द्ध्री+“चर्म्मणो
।”५।१।१५। इति अञ्।) चर्म्मरज्जुः।
मरटोकायां रायमुकुटः॥
नसः, पुं, (वार्द्ध्रीव नासिकास्येति। “अच्
सिकायाः संज्ञायां नसं चास्थूलात्।” ५।
।११८। इति अच् नसादेशश्च। “पूर्व्व-
रात् संज्ञायामगः।” ८।४।३। इति
त्वम्।) पशुविशेषः। यथा,—
त्रिवर्षं त्रिन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्।
द्ध्रीणसः प्रोच्यतेऽसौ हव्ये कव्ये च संतृप्तः॥”
क्षिविशेषः। यथा,—
नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः।
द्ध्रीणसः स्यात् पक्षीशो मम विष्णोरति-
प्रियः॥”
स्य बलिदानफलम्। यथा,—
रोहितस्य तु मत्स्यस्य मांसैर्वार्द्ध्रीणसस्य च।
निमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया॥
हिषाणाञ्च खड्गानां रुधिरैः शतवार्षि-
कीम्।
प्तिमाप्नोति परमां शार्द्दूलरुधिरैस्तथा॥”
इति कालिकापुराणे ६६ अध्यायः॥
तद्ग्रहणेन पितॄणामथ यथा,—
शार्द्ध्रीणसामिषं लौहं कालशाकं तथा मधु।

दौहित्रामिषमन्यच्च यद्दत्तं तत् कुलोद्भवैः॥
अनन्तां तां प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा।
पितॄणां नात्र सन्देहो गयाश्राद्धं च पुत्रक॥”
इति मार्कण्डेयपुराणे श्राद्धकल्पाध्यायः॥
“त्रिविधं त्रिन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्।
वार्द्ध्रीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्म्मणि॥
रक्तपादो रक्तशिरा रक्तचक्षुर्विहङ्गमः।
कृष्णवर्णेन च तथा पक्षी वार्द्ध्रीणसो मतः॥”
लौहं रक्तच्छागः।
“दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिलाः।
कपिलाया घृतञ्चैव दौहित्रमिति चोच्यते॥”
गौरीसुतः दशवर्षोढ़ाजः। इति तट्टीका॥
वार्द्ध्री(णी)नसः, पुं, वार्द्ध्रीव नासिका यस्य। नासाया
नसादेशः।) गण्डकः। गण्डार इति भाषा।
यथा,—
“वार्द्ध्रीनसस्त्वेकचरो गण्डोत्साहश्च गण्डकः॥”
इति त्रिकाण्डशेषः॥
वार्भटः, पुं, (वारि जले भट इव।) कुम्भीरः।
इति त्रिकाण्डशेषः॥
वार्म्मणं,क्ली, (वर्म्मणां समूहः। वर्म्मन्+“भिक्षा-
दिभ्योऽण्।”४।२।३८। इति अण्।)वर्म्मसमूहः।
इत्यमरटीकायां सारसुन्दरी॥
वार्म्मिणं, क्ली, (वर्म्मिणां समूहः। वर्म्मिन्+अण्।)
वर्म्मिसमूहः। इत्यमरटीकायां स्वामी॥
वार्म्मुक्, [च्] पुं, (वाः वारि मुञ्चतीति। मुच्+
क्विप्।) मेघः। इति शब्दरत्नावली॥ (यथा,
भागवते। १०। २४। ६।
“तं तात! वयमन्ये च वार्म्मुचां पतिमीश्वरम्।
द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ते क्रतुभिर्नराः॥”)
वार्य्युद्भवं, क्ली, (वारिणि उद्भव उत्पत्तिर्यस्य।)
पद्मम्। इति धनञ्जयः॥ जलजे, त्रि॥
वार्य्यं, त्रि, (वारि+ष्यञ्।) वारिसम्बन्धि। वारि-
शब्दात् ष्यप्रत्ययेन निष्पन्नम्॥ (वृङ् सम्भक्तौ
+“ऋहलोर्ण्यत्।” ३।१।१२४। इति ण्यत्।
वरणीये, त्रि। यथा, ऋग्वेदे। ३। २१। २।
“स्वधर्म्मन् देववीतये श्रेष्ठं नो धेहि वार्य्यम्॥”
निवारणीयः। यथा, महाभारते।५।१८८।६।
“स्त्रीभावे परिनिर्व्विण्णा पुंस्त्वार्थे कृतनिश्चया।
भीष्मे प्रतिचिकीर्षामि नास्मि वार्य्येति वै पुनः॥”)
वाराशिः, पुं, (वारां राशिर्यत्र।) समुद्रः। इति
पुराणम्॥ (वाराशनशब्दात् प्रामयं स्यात्॥)
वार्व्वटः, पुं, (वार्भिर्वेष्ट्यते वेष्ट्यते इति। वट+
घञर्थे कः।) वहित्रम्। इति त्रिकाण्डशेषः॥
वार्व्वणा, स्त्री, नीलमक्षिका। इति शब्दरत्ना-
वली॥
वार्षकं,क्ली, (वर्षस्येदम्। वर्ष+अण्। स्वार्थे कन्।)
सुदुग्धवृतपृथिवीदशभागान्तर्गतभागविशेषः।
यथा,—
“दशधा विभजन् क्षेत्रमकरोत् पृथिवीमिमाम्।
इक्ष्वाकुर्व्विदरायादौ मध्यदेशमथाक्रमात्।
कीर्त्त्यते वार्षकं क्षेत्रं रम्यश्रेष्ठं च॥”
इति वह्निपुराणे भारतीयाख्यानाध्यायः॥

वार्षभाणवी, स्त्री, (वृषभानोरपत्यं स्त्री। वृष-
भानु+अण्।) वृषभानुकन्या। श्रीराधा।
यथा,—
“यथा परात्परः कृष्णस्तथेयं वार्षभाणवी॥”
इति पाद्मोत्तरखण्डे ६७ अध्यायः॥
वार्षिकं, क्ली, (वर्षासु जातमिति। वर्षा+“वर्षाभ्य-
ष्ठक्।” ४।३।१८। इति ठक्।) त्राय-
माणा। इति मेदिनी। के, १५६॥
वार्षिकः, त्रि, (वर्षे भवः। वर्ष+“कालात् ठञ्।”
४।३।११। इति ठञ्।) वर्षभवः। वात्स-
रिकः। इति मेदिनी। के, १५६॥ (यथा,
भागवते। ११। ११। ३७।
“यात्राबलिविधानञ्च सर्व्ववार्षिकपर्व्वसु॥”)
यथाच।
“शरत्काले महापूजा क्रियते या च वार्षिकी।
तस्यां ममैतन्माहात्म्यं पठितव्यं समाहितैः॥”
इति मार्कण्डेयपुराणम्॥
वर्षाकालोद्भवश्च॥ (यथा, अध्यात्मरामायणे।
४। ४। १।
“तत्र वार्षिकदिनानि राघवो
लीलया मनिगुहासु सञ्चरन्।
पक्वमूलफलभोगतोषितो
लक्ष्मणेन सहितोऽवसत् सुखम्॥”)
वार्षिकी, स्त्री, (वर्षासु भवा। वर्ष+“वर्षाभ्य-
ष्ठक्।” ४।३।१८। इति ठक्। ङीप्।) त्राय-
माणा। इति राजनिर्घण्टः॥
वार्षिला, स्त्री, (वार्जाता शिला। “शाकपार्थि-
वादीनामुपसंख्यानं उत्तरपदलोपश्च।”२।१।
६०। इत्यस्य वार्त्तिकोक्त्या शाकपार्थिवादिवत्
समासः। पृषोदरादित्वात् शस्य षः।) करका।
इति शब्दचन्द्रिका॥
वार्ष्युकः, त्रि, वर्षणशीलः। वृषधातोरुकञ्प्रत्ययेन
निष्पन्नो वर्षुकः। ततः स्वार्थे ष्यप्रत्ययः॥
वा(बा)र्हतं, क्ली, (बृहत्याः फलमिति।“प्लक्षादि-
भ्योऽण्।”४।३।१६४। इति अण्। विधान-
सामर्थ्यात्तस्य फले न लुक्।)बृहतीफलम्। इत्य-
मरः॥
वा(बा)र्हद्रथः, पुं, (बृहद्रथस्यापत्यं पुमान्। बृहद्रथ
+अण्।) जरासन्धः। इति शब्दरत्नावली॥
(यथा, देवीभागवते। ४। १८। ११।
“कंसः कुलोऽथ यवनेन्द्रसुतश्च केशी-
बार्हद्रथो बकबकीखरमाल्यमुख्याः।”
बृहद्रथस्येदमिति अण्।) बृहद्रथराजसम्-
बन्धिनि, त्रि॥
वा(बा)र्हद्रथिः, पुं, (बृहद्रथस्यापत्यं पुमान्। बृह-
द्रथ+इञ्।) जरासन्धः। इति त्रिकाण्डशेषः॥
वा(बा)लकः, पुं, क्ली, पारिहार्य्यः। अङ्गुरीयकं,
त्रि। इति मेदिनी। के, १५३॥ अश्वाद्यङ्ग-
रादि वर्णादिवकारादौ द्रष्टव्यानि। (कङ्कणम्-
इत्यर्थेऽपि,पुं। यथा, हरिवंशे दिनायाम्।८८।४।
“मकुटैर्वर्ज्जलैश्च कुण्डलैरमलैर्वालकैस्तथा।
केयूरबालमित्यैश्चारितोऽसौ विराजितम्॥”)

वान्तः, पुं, वनाग्निकादशप्रकरणान्तर्गतद्वितीय-करणः। तत्र जातफलम्।

"कार्य्यस्य कर्त्ता स्वजनस्य भर्त्ता
सेनाप्रणेता कुलशीलयुक्तः।
उदारबुद्धिर्बलवान् मनुष्य-
श्चेद्वालवाख्ये जननं हि यस्य॥"

इति कोष्ठीप्रदीपः॥

वाल्कं, त्रि, (वल्कस्य वल्कलस्य विकारः। वल्क+"तस्य विकारः।" ४।३।१३४। इति अण्।) वल्कसम्बन्धिवस्त्रम्। क्षौमादि। इत्यमरः। (यथा, मार्कण्डेयपुराणे। १५। २८।
"तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते।
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता वकस्तथा॥")

वाल्कलं, त्रि, वल्कलनिर्मितम्। वल्कलस्येदं इत्यर्थे अण्प्रत्ययेन निष्पन्नम्॥

वाल्कली, स्त्री, मदिरा। इति त्रिकाण्डशेषः॥

वाल्मिकिः, पुं, (वल्मिके भवः। वल्मिक+इञ्।) वाल्मीकमुनिः। इति द्विरूपकोषः॥

वाल्मीकः, पुं, (वल्मीके भवः। वल्मीक+अण्।) रामायणकर्त्ता मुनिः। तत्पर्य्यायः। प्राचेतसः १ वाल्मीकिः २ कविज्येष्ठः ३ कुशीलवः ४ वल्मीकः ५। इति त्रिकाण्डशेषः॥ कविः ७ आद्यकविः ८। इति जटाधरः॥

वाल्मीकिः, पुं, (वल्मीके भवः। वल्मीक+इञ्।) भृगुवंशीयमुनिविशेषः। इति त्रिकाण्डशेषः॥ यथा —
"रामनामकरो राजा रघूणां वंशवर्द्धनः।
वाल्मीकिर्येन चरितं चक्रे भार्गवसत्तमः॥"
इति मात्स्ये १२ अध्यायः॥
(यथा च काव्यादर्शभूमिकायाम्।
"जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥")

वावदूकः, त्रि, (पुनः पुनरतिशयेन वा वदतीति। वद+यङ् लुक्+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकः। "वर्णस्ते तु 'यजजप-दशाभिनि।' ३। २। १६६। इति यङ्लुगन्त-वादयतेरपि भवत्यूकप्रत्ययः इति शब्दा वाव-दूक इति साधितम्।" इत्युणादिवृत्तौ उज्ज्वल-दत्तः।) अतिशयवक्तृशीलः। तत्पर्य्यायः। वाचोयुक्तिपटुः २ वाग्मी ३ वक्ता ४। इत्यमरः॥ वचक्नुः ५ सुवचाः ६ प्रवाक् ७। इति जटाधरः॥ (यथा, महाभारते। १२। १८। २४।
"अक्रन्दमायतनकारो वक्तारो जनसंसदि।
चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः॥")

वावयः, पुं, तुलसीविशेषः। इति शब्दचन्द्रिका॥ बाबुइतुलसी इति भाषा॥

वावुटः, पुं, वहित्रम्। इति शब्दरत्नावली॥

वावृत, य ङ उ संभक्तौ। वरणे। इति कविकल्प-द्रुमः॥ (दिवा०-आत्म०-सक०-सेट्। क्त्वावेट्।) य ङ, वावृत्यते। उ, वावर्त्तित्वा वावृत्त्वा। संभक्तिःसेवनम्। इति दुर्गादासः॥ ("ततो वावृत्यमानासौ रामशालां न्यविक्षत" भट्टिः।)

वाशकः, त्रि, शब्दकरः। इत्यमरः। ३।१।३२॥

वाश, य ङ ऋ शब्दे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-क्वचित् सक०-सेट्।) शब्द इह तिरश्चामेव। तिरश्चां वाशितं रुत-मित्यमरात्। य ङ, वाश्यते पक्षी। ऋ, अव-वाशत्। उद्वाश्यमानः पितरं स राममिति भट्टौ। अनेकार्थत्वाद्धातूनामर्थः। वासितं सुरभीकृते। ज्ञानमात्रे खगाराचे वासितं वस्त्र-वेष्टिते। इति विश्वप्रकाशादन्यत्रोऽप्ययमस्तीति। इति दुर्गादासः॥

वाशा, स्त्री, (वाश्यते इति। वाश शब्दे+"गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) वासकः। इति शब्दरत्नावली॥

वाशिः, पुं, (वाश्यते इति। वश+णिच्+"वसि-वपियजिराजिव्रजिसदिहनिवाशिवादीति।" उणा० ४। १२४। इति इण्।) अग्निः। इत्यु-णादिकोषः॥

वाशिका, स्त्री, (वाशा+स्वार्थे कन्। टाप्। अत इत्वम्।) वासकः। इति शब्दरत्नावली॥

वाशितं, क्ली, (वाश शब्दे+भावे क्तः।) पशु-पक्ष्यादीनां शब्दः। इत्यमरः॥ (यथा, महा-भारते। ६। ११। ५३।
"आर्त्तप्रलापान् मा तात! सलिलस्थः प्रभा-षिथाः।
नैतन्मनसि मे राजन्! वाशितं शकुने-रिव॥")

वाशितः, त्रि, (धातूनामनेकार्थत्वात् वाश सुरभी-करणे+क्तः।) सुरभीकृतः। इत्यमरटीकायां स्वामी॥

वाशिता, स्त्री, (वाश+क्त। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः॥

वाशिष्ठः, त्रि, वशिष्ठसम्बन्धी। वशिष्ठस्येदं इत्यर्थे अण्प्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। २। ११५। २।
"सोमवंशस्य तान् सर्व्वानाचख्यौ तत्र ताप-सान्।
भृगूनङ्गिरसश्चैव वाशिष्ठानथ काश्यपान्॥")
क्ली, उपपुराणविशेषः। यथा, देवीभागवते। १। ३। १६।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम्।
एतान्युपपुराणानि कथितानि महात्मभिः॥"
तीर्थभेदः। यथा, महाभारते। ३। ८४। ४५।
"अविमुक्तं समासाद्य वाशिष्ठञ्चैव भारत!।
वाशिष्ठं समतिक्रम्य सर्व्वे वर्णा द्विजातयः॥")

वाशिष्ठी, स्त्री, (वशिष्ठस्येयमिति। वशिष्ठ+अण्। ङीप्।) गोमतीनदी। इति हेमचन्द्रः॥

वाशुरा, स्त्री, (वाश्यते अस्यामिति। वाश शब्दे+"मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्।" उणा० १। ३८। इति उरच्। टाप्।) रात्रिः। इत्युणादिकोषः॥

वाश्मं, क्ली, (वाश्यतेऽस्मिन्निति। वाश+"स्यादि-र्व्वर्वषिकृकौ..." उणा० २। १३। इति [illegible]-रक्।) मन्दिरम्। [illegible] रे, ८३॥

वाश्रः, पुं, (वाश्यतेऽस्मिन्निति। [illegible] रक्तौति।" उणा० २। १३। [illegible]) दिवसः। इति मेदिनी। रे, ८३॥

वाष्पः, पुं, (वाधते इति। वाधृ लोडने+"शष्पवाष्परूपपर्पतल्पाः।" उणा० ३। [illegible] इति पप्रत्यये धस्य षत्वं निपात्यते।) [illegible] (यथा, रघौ। ७। ६८।
"तस्याः प्रतिद्वन्द्व[illegible]
सद्यो विमुक्तं मुखमारुतेन।
निश्वासवाष्पापगमात् प्रपन्नः
प्रसाद मात्मीयमिवात्मदर्शः॥")
लोहः। इति मेदिनी। पे, ११। [illegible]
मरः॥ (यथा,
"प्राङ्गण एव [illegible]
[illegible]

वाष्पकः, पुं, (वाष्प+संज्ञायां कन्।) नटिया शाक इति भाषा। यथा,—
"मारिषो वाष्पको मार्षः [illegible]
मारिषो मधुरः शीतो [illegible]
वातश्लेष्मकरो रक्तपित्तगुरुविषमार्त्तिनुत्।
रक्तमार्षो गुरुर्नाति [illegible]
श्लेष्मलः कटुकः मार्षः [illegible]"

वाष्पिका, स्त्री, (वाष्प+संज्ञायां कन्। अभिधानादिरभावः।) हिङ्गुपत्री। [illegible] रत्नावली॥

वाष्पिका, स्त्री, (वाष्प+संज्ञायां कन्। टाप्। अत इत्वम्।) हिङ्गुपत्री। कारवी २ पृथ्वी ३ कवरी ४ पृ[illegible] मरः॥ तन्वपत्री ६ वाष्पीका [illegible] इति तट्टीका॥

वाष्पी, स्त्री, (वाष्प+गौरादित्वात् ङीष्।) वाष्पिका। इति शब्दरत्नावली॥

वाष्पीका, स्त्री, हिङ्गुपत्री। इति [illegible] राँधुनी इति ख्यातम्। अस्य गु[णाः।] [कटु]त्वम्। तीक्ष्णत्वम्। उष्णत्वम्। [वात]घ्नत्व। इति राजवल्लभः॥

वास, गृ क उपसेवायाम्। इति [कविकल्पद्रुमः॥] (अदन्त चुरा०-पर०-सक०-सेट्।) [illegible] तु गुणान्तरारोपणम्। [illegible] इति दुर्गादासः॥

वासः, पुं, (वसन्त्यत्रेति। वस निवासे+[illegible] ३। ३। १२१। इति घञ्।) गृ[हम्। इत्य]मरः॥ (यथा, हरिवंशे। १०३। [illegible]
"उत्तिष्ठोत्तिष्ठ भद्रं ते विषादं [illegible]
नैवं विधेषु वासेषु भवमस्ति [illegible]")
वास्यते इति। वास+घञ्।) [illegible] तट्टीका॥ (वस+भावे घञ्।) [illegible]

मलकः। (यथा, महाभारते। १।
१०।
ाददर्शैः नौका वासवरोत्पत्तम् ॥")
। इति शब्दरत्नावली। सुमतिः। इति
सर्ह्णाम। ॥ माणविशेषे वासस्य
दर्शनं यथा,—
देवदानुवाच।
नाम बासापि काम्यानाम् गतागतिम्।
विभिषादे वा देव चापि वगावनम् ॥
तामिश्वरमोर्हं न चाप्तकं युभूपता।
गढीर्हंसेषु पासो मम न रोचते ॥
ताभिमन्दन्ति दृष्टेनाभिकन्ने च।
च वसेत् प्राज्ञः श्रेयोर्थी मायमुदिय ॥
नभिमानमन्ति दृष्टेनापि घनेन च।
धुषु वसनं न वासः श्रेय उच्यते ॥"
इति मार्कण्डेये २९ अध्यायः ॥ ॥
द।
रकैरापते ग्रामे न व्याधिबहुले भृशम्।
राष्ट्रे निवसेत् न पापजनैवृते ॥
हिन्दयोर्मध्यं पूर्वपश्चिमयोः शुभम्।
पसुद्रयोर्हिवं नान्यत्र निवसेत् द्विजः ॥
ह्मावर्तीकूलं वर्जयित्वा द्विजोत्तमः ॥
निवसेत् पुण्यं ग्रान्तजनसमन्वितम् ॥
पेच पतितैश्च चण्डालैश्च पुकशैः।
नैर्नावलिप्तैश्च नान्यैर्नान्त्यावसायिभिः ॥"
इति कौर्मे उपविभागे २५ अध्यायः ॥
सु] क्ली, (वस्यतेऽनेनेति। वस छादना-
"वसेर्णित्।" उणा० ४।२१०। इत्य-
। न च णित्।) वस्त्रम्। इत्यमरः ॥
मनौ। ४। ६६।
निर्णौ च वासश्च दृतमन्यैर्न धारयेत् ॥")
म्। इति राजनिर्घण्टः ॥
पुं, (वासयतीति। वासि+ण्वुल्।) वृक्ष-
। बाकस इति भाषा। तत्पर्यायः।
ता २ सिंही ३ वासिका ४ वृषः ५
पः ६ सिंहास्यः ७ वाजिदन्तकः ८।
रः॥ वासा ९ वाशिका १० वृषः ११
स्यः १२ वाशकः १३। इति तट्टीका॥
१४ वासः १५ वासी १६ वैद्यसिंही १७
सिंही १८। इति शब्दरत्नावली॥
ा १९ सिंहपर्णी २०। इति जटाधरः॥
का २१ भिषङ्माता २२ वसादनी २३
मुखी २४ कण्ठीरवी २५ शितकर्णी २६
दन्ती २७ नासा २८ पञ्चमुखी २९
पत्री ३० मृगेन्द्राणी ३१। अस्य गुणाः।
त्वम्। कटुत्वम्। शीतत्वम्। कासरक्त-
कामलाकफवैकल्यज्वरश्वासक्षयनाशित्वञ्च।
पगुणाः। कटुपाकित्वम्। तिक्तत्वम्। कास-
हरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
सको वासिका वासा भिषङ्माता च
सिंहिका।
रासो वाजिदन्तः स्यादाटरूपोऽटरूपकः॥

आटरूपो वृषो वासा सिंहपर्णश्च स स्मृतः।
वासको वातकृत् स्वर्यः कफपित्तास्रनाशनः॥
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृड्स्रहृत्।
श्वासकासज्वरच्छर्द्दिमेहकुष्ठक्षयापहः॥"
इति भावप्रकाशः॥ ॥
रागाङ्गविशेषः। यथा,—
"मनोहरोऽथ कन्दर्पश्चाकनन्दन एव च।
चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा॥"
केषाञ्चिन्मते नामान्यपि पृथक्।
"विनोदो वरदश्चैव नन्दः कुमुद एव च।
चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः॥"
इति सङ्गीतदामोदरः॥
(वासरः। इति वासकसज्जाशब्दार्थे व्यालङ्का-
रिकाः॥)
वासकर्णी, स्त्री, यज्ञशाला। इति शब्दरत्नावली॥
वासकसज्जा, स्त्री, (वासके प्रियसमागमवासरे
सज्जतीति। सज्ज्+अच्। टाप्। यद्वा, वासकं
वासवेश्म सज्जयतीति। सज्जि+अच्। टाप्।)
नायिकादिनायिकाभेदः। (यथा, गीतगोविन्दे।
६। ८।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा॥")
तस्या लक्षणं यथा। अद्य मे प्रियवासर इत्यं
निश्चित्य या सुरतसामग्रीं सज्जीकरोति सा
वासकसज्जा। वासको वासरः। अस्याश्चेष्टा
मनोरथसखीपरिहासदूतीप्रश्नसामग्रीविधान-
मार्गविलोकनादयः। मुग्धावासकसज्जा यथा,
"हारं गुम्फति तारकातिरुचिरं गृह्णाति
काञ्चीलतां
दीपं न्यस्यति किन्तु तत्र बहुलं स्नेहं न दत्ते
पुनः।
आलीनामिति वासकस्य रजनौ कामाकुलत्वात्
क्रिया:
साश्चिर्य्यसखी नवोढ़सखी दूरात् समुद्वी-
क्ष्यते॥"
मध्या वासकसज्जा यथा,—
"शिल्पं दर्शयितुं करोति कुतुकात् कह्लार-
हारस्रजं
चित्रप्रेक्षणकैतवेन किमपि द्वारं समुद्वीक्षते।
गृह्णात्याभरणं नवं सहचरी भूषाजिगीषामिया-
दित्थं मन्मथः प्रतीक्ष चरितं स्मेराननोऽभूत्
स्मरः॥"
प्रौढ़ा वासकसज्जा यथा,—
"कृतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः।
अकारि हरिणीदृशा भवनमेव देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम्॥"
मनोरथश्च यथा,—
"आवयोरङ्गयोर्देहे भूयो विरहपल्लवः।
अद्वैते च शितस्फीतं न स्यादन्योन्यवीच-
यम्॥"
परकीया वासकसज्जा यथा,—

"स्वस्थं स्नापयितुं छलेन च तिरोधत्ते प्रदीपा-
ङ्कुरान्
धत्ते श्रीघ्रकपोतपोतनिनदैः साङ्केतिकं
चेष्टितम्।
शय्यातुमार्श्वविसर्जिताङ्गलतिकं लोलत्कपोल-
द्युति
क्वापि क्वापि कराम्बुजं प्रियधिया तल्पान्तिके
न्यस्यति॥"
इति रसमञ्जरी॥
(तथाच साहित्यदर्पणे। ३। ८९।
"कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा॥")
वासका, स्त्री, (वासक+टाप्।) वासकवृक्षः।
इति जटाधरः॥
वासगृहं, क्ली, (वासाय गृहम्।) गर्भागारम्।
इत्यमरः॥ "हे गृहमध्यभागे शयनगृहे च
गृहाभ्यर्गृहे इत्येके निर्व्वातत्वात् गर्भ इवागारं
गर्भागारम्। वासाय गृहं वासगृहम्। वास-
वेश्मादि चात्र।" इति भरतः॥ (यथा, बृहत्-
संहितायाम्। ५३। ७०।
"वासगृहाणि च विन्द्यात्
विप्रादीनामुदग्दिगाद्यानि।
विशतां च यथा भवनम्
भवन्ति तान्येव दक्षिणतः॥")
वासतः, पुं, (वास्यते इति। वास शब्दे+बाहुल-
कात् अतच्।) गर्द्दभः। इति शब्दरत्नावली॥
वासतेयी, स्त्री, (वसतौ साधुरिति। वसति+
"पथ्यतिथिवसतिस्वपतेर्ढञ्।" ४।४।१०४।
इति ढञ्।) रात्रिः। इति त्रिकाण्डशेषः॥
(वसतिसाधुमात्रे, त्रि। यथा, भट्टौ। ४। ८।
"वनेषु वासतेयेषु निवसन् पर्णसंस्तरः।
शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे॥")
वासनं, क्ली, (वास्यते इति। वासि+ल्युट्।)
धूपनम्। वारिधानी। वस्त्रम्। इति मेदिनी।
ने, १२९॥ वासः। इति शब्दरत्नावली॥
ज्ञानम्। इति धरणिः॥ निक्षेपाधारः। यथा,
याज्ञवल्क्यः।
"आधिसीमोपनिक्षेपजड़बालधनैर्विना।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह॥"
उपनिक्षेपस्तु।
"वासनस्थमनाख्याय समुद्रं यद्विधीयते॥"
इति नारदोक्तेः॥
वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रं
मुद्रयादियुतम्। इति व्यवहारतत्त्वम्॥ वसन-
सम्बन्धिनि, त्रि॥ (वसनेन क्रीतमिति। वसन+
"शतमानविंशतिकसहस्रवसनादण्।"५।१।२७।
इति अण्। वसनेन क्रीते च, त्रि॥)
वासना, स्त्री, (वासयति कर्म्मणा योजयति जीव-
मनसीति। वस+णिच्+युच्। टाप्।)
प्रत्याशा। (यथा, भागवते। २। २। २।
"शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः।

परिभ्रमंश्चात्र न विन्दतेऽर्थान्
मायामये वासनया शयानः ।")
ज्ञानम् । इति मेदिनी । ने, १३० । स्मृतिहेतुः ।
तत्पर्य्यायः । संस्कारः २ भावना ३ । इति जटा-
धरः । देहात्मबुद्धिजन्यमिथ्यासंस्कारः । इति
न्यायशास्त्रम् । दुर्गा । यथा,—
"वसत्यहरहा सर्व्वेषु भूतेष्वसाध्वैताय च ।
धातुर्व्वस निवासेति वासना तेन सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(अर्कस्य भार्य्या । यथा, भागवते । ६।६।१३ ।
"अर्कस्य वासना भार्य्या पुत्त्रास्तर्षादयः
स्मृताः ॥")
वासन्तः, पुं, (वसन्ते भवः । वसन्त+"सन्धि-
वेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४।३।१६ । इति अण् ।
उष्ट्रः । इति मेदिनी । ते, १५२ । कोकिलः ।
इति राजनिर्घण्टः ॥ मलयवायुः । मुद्गः । इति
त्रिकाण्डशेषः ॥ कृष्णमुद्गः । इति हेमचन्द्रः ॥
मदनवृक्षः । इति शब्दमाला ॥ अवहिते, त्रि ।
इति मेदिनी । ते, १५२ ॥ (वसन्तेऽपि च त्रि ।
इति सिद्धान्तकौमुदी । ४ । ३ । ४६ ।)
वासन्तकं, त्रि, वसन्तसम्बन्धि । वसन्तस्येदमित्यर्थे
कण्प्रत्ययेन निष्पन्नम् ॥ (वसन्ते उप्तम् । वसन्त
+"ग्रीष्मवसन्तादन्यतरस्याम् ।" ४ । ३ । ४६ ।
इति वुञ् । (वसन्तेऽपि, त्रि ॥ इति सिद्धान्त-
कौमुदी ॥)
वासन्तिकः, त्रि, (वसन्तमधीते वेद वेति । वसन्त
+"वसन्तादिभ्यष्ठक् ।" ४।२।६३ । इति ठक् ।)
विदूषकः यथा । वासन्तिकः केलिकिलो वैहा-
सिको विदूषकः । इति हेमचन्द्रः ॥ (वसन्त-
स्येदमिदि । "वसन्तात् च ।" ४ । ३ । २० ।
इति ठञ् । वसन्तसम्बन्धिनि, त्रि । यथा,
भागवते । ५ । ८ । ५ ।
"सप्रश्रयशिरस्विपदां सावित्रीं ग्रैष्मवासन्ति-
कान् मासानधीयानमप्यसमवेतरूपं ग्राहयां-
मास ॥")
वासन्ती, स्त्री, (वसन्तस्येयमिति । वसन्त+अण् ।
ङीप् ।) माधवी । यूथी । इति मेदिनी । ते, १५२ ।
(यथा, रामायणे । ४ । १ । ७० ।
"मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ।
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥")
पाटला । इति विश्वः ॥ कामोत्सवः । तत्पर्य्यायः ।
चैत्रावली २ मधूत्सवः ३ सुवसन्तः ४ काम-
महः ५ कर्द्दमी ६ । इति त्रिकाण्डशेषः ॥
नवमल्लिका । पुष्पलताविशेषः । तत्पर्य्यायः ।
प्रहसन्ती २ वसन्तजा ३ माधवी ४ महा-
जातिः ५ शीतसहा ६ मधुबहुला ७ वसन्त-
दूती ८ । अस्या गुणाः । शिशिरत्वम् । हृद्यत्वम् ।
सुरभित्वम् । श्रमहारित्वम् । धम्मिल्लामोदित्वम् ।
मन्दमदोन्मादप्रदायित्वञ्च । इति राजनिर्घण्टः ॥
नवमल्लिका । नेवारि इति हिन्दी भाषा ।
यथा,—
"नेवाली कथिता तज्ज्ञैः सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयाप-
जित् ॥"
इति भावप्रकाशः ॥ * ॥
अथ वासन्तीदुर्गापूजाप्रमाणम् । तत्र भविष्य-
पुराणम् ।
"मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप ।
सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा ॥"
भविष्योत्तरे ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां दशम्याञ्च विसर्ज्जयेत् ॥"
कालकौमुद्यां जावालिः ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विविधैर्द्दिव्यैर्लवङ्गकुसुमैस्तथा ।
नानाविधैश्च बलिभिर्मेषाभेदोबहूत्तमैः ।
विविधाभरणैः माल्यै पट्टवस्त्रादिभिस्तथा ।
एवं यः कुरुते पूजां वर्षे वर्षे विधानतः ।
ईप्सितान् लभते कामान् पुत्त्रपौत्रादिकानपि ॥"
अत्र भविष्योत्तरे नियतपदमासशब्दसङ्गतात्
भविष्यपुराणवचने मीनराशिस्थित इति
मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम् । सौर-
रव्यारब्धत्वे कदाचित् सप्तम्यादितिथित्रयाला-
भात् तद्वर्षे तत्कृत्यलोपः स्यात् । न चैतावता
भविष्यपुराणे सदापदोपादानात् जावालिवचने
वर्षे वर्षे इत्युपादानाच्च नित्यत्वम् । एतद्विस्तृतं
कालविवेके । एवं जावाली शेषवचनपरार्द्धे
पुत्त्रादिरूपफलश्रवणात् काम्यत्वञ्च । ततश्च
काम्यतया पूजने कृते प्रसङ्गात् नित्यत्वसिद्धिः ।
"सिताष्टम्यान्तु चैत्रस्य पुष्पैस्तत्कालसम्भवैः ।
अशोकैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम् ।
न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः ॥"
इति कालिकापुराणवचनात् केवलाष्टमीकल्प
उक्तः । चैत्रमासमधिकृत्य ।
"नवम्यां पूजयेद्देवीं महिषासुरमर्द्दिनीम् ।
कुङ्कुमागुरुकस्तूरीधूपान्नध्वजतर्पणैः ।
दमनैर्मुरपत्रैश्च विजयाख्यपदं लभेत् ॥"
इत्यनेन केवलनवमीकल्प उक्तः । व्यवस्था तु
शारदीयपूजाप्रकरणोक्ता ग्राह्या । विशेषस्त्वत्र
बोधनप्रक्रिया नास्ति बोधितायाः बोधनासम्भ-
वात् । इति प्राक् विवृतम् । षोमादिकञ्च पूर्व्व-
वज्ज्ञेयमिति दिक् । इति दुर्गोत्सवविवेकः ॥ * ॥
अपि च ।
श्रीनारायण उवाच ।
"पुरा स्तुता सा गोलोके कृष्णेन परमात्मना ।
संपूज्य मधुमासे च प्रीतेन रासमण्डले ॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६२ अध्यायः ॥
(चतुर्द्दशाक्षरवृत्तिविशेषः । इति छन्दो-
मञ्जरी । अस्या लक्षणादिकं छन्दःशब्दे द्रष्ट-
व्यम् ॥)
वासन्तीपूजा, स्त्री, (वासन्ती तदाख्या पूजा ।)
चैत्रमासीयदुर्गापूजा । यथा,—
"चैत्रे मासि सिते पक्षे ...
प्रातः प्रातर्महादेवीं दुर्गां
तत्राष्टम्यां अशोकपूजा यथा,—
"तत्राष्टम्यामशोकाँ ...
इत्यशोकैस्तत्पुष्पैर्ब्बलिभि, ...
इति च ...
अपि च ।
"विशेषाच्चैत्रमासस्य या तिथि ...
तस्यां यः ...
इति
वासयोगः, पुं, (... युज+घञ् ।) चूर्णम् । इत्यमर ।
इति ख्याते । पटवास घोडे इति
प्रेमिके चूर्णानि चूर्णं प्रेरणे ...
करणे पुष्यन्ते उपपुष्यन्ते ...
योगः ।" इति तट्टीकायां भरतः ।
गन्धचूर्णम् २ पटवासम् ३ ...
शब्दरत्नावली ॥
वासरः, पुं क्ली, (वासयतीति । ...
"अर्त्तिकमिभ्रमिचमिदेवि वा ...
३ । १३२ । इति अरः ।) दिवा ।
(यथा, कथासरित्सागरे । ... ।
"प्रवृत्ते वासयोर्वाहे प्रयाता ...
नागभेदे, पुं । इति मेदिनी । रे,
वासवः, पुं, (वसुरेव । प्रज्ञाद्यण् ।)
मरः ॥ (यथा, महाभारते । १ ।
"सहसाक्षनियोगात् स मार्ग ...
अध्यक्रामदमेयात्मा द्वितीय ...
वासवी, स्त्री, (वसोरयं स्त्री ।
ङीप् ।) व्यासमाता । यथा,—
"व्यासस्यामा सत्यवती वासवी-
योजनगन्धा दाशेयी शौर्ले ...
(यथा, महाभारते । १ । ... ।
"दिशां तां वासवीं कर्य्यां ...
अङ्गमं मम कल्याणि ! ...
वाससज्जा, स्त्री, (वासं गृहं सज्जयति ...
णिच्+अण् । टाप् ।) नायिका ...
"स्वाधीनोत्कण्ठिता ...
कलहान्तरिता वाससज्जा ...
अभिसारिकाप्यष्टौ ता ...
इति
अस्या विवरणं ...
वासा, स्त्री, (वासयतीति । वस ...
टाप् ।) वासकः । इति शब्दरत्नावली ...
वैद्यके ।
"वासायां विद्यमानायामाशायां ...
रक्तपित्ती क्षयी कासी किमर्थं ...
वासागारं, क्ली, (वासाय ...
वासगृहम् । तत्पर्य्यायः ।

ाशाट: ४ निष्कुट: ५। इति त्रिकाण्ड-
:।
पुं, (वसनिवासे+“वसिवपियजिरा-
ति।”उणा० ४।१२४। इति इञ्। कुठार-
;। वाइस इति भाषा। इत्युणादिकोषः॥
ा, स्त्री, (वासैव। स्वार्थे कन्। टाप्। अत
श।) वासकः। इति शब्दरत्नावली॥
, क्ली, (वास्यते स्मेति। वास+क्तः।)
म्। इति मेदिनी। ते, १५२॥ ज्ञान-
म्। इति हेमचन्द्रः॥ खगवरः। इति
:॥
:, त्रि, (वास्यते स्मेति। वासि सुरभीकरणे
क्तः।) सुरभीकृतः। तत्पर्य्यायः। भावितः
इत्यमरः॥ हे सुगन्धिपुष्पादिवासितद्रव्ये।
दते प्राप्यते भावितं भू कड प्राप्तौ कर्म्मणि
। वासं सौरभं करोति इति ण्यन्तात्।
णि क्ते वासितम्। इति तट्टीकायां भरतः॥
ादौ वासितः। इति शब्दरत्नावली॥
नः। वस्त्रवेष्टितः। इति धरणिः॥
ा, स्त्री, (वासयतीति वस निवासे+णिच्+
। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः॥
ी, स्त्री, (वासोऽस्या अस्तीति। वास+
:।) शुक्लभिण्टी। इति शब्दचन्द्रिका॥
, क्ली, रुधिरम्। इति हेमचन्द्रः॥
, त्रि, वसिष्ठकृतयोगशास्त्रादि। वसिष्ठेन
मित्यादर्थे (अण्) प्रत्ययेन निष्पन्नम्॥
ष्ठमग्नि च॥
स्त्री, (वासयतीति वासि अच्। गौरादि-
ङीष्।) वचयी। वाइस इति ख्याता-
म्। इति त्रिकाण्डशेषः॥
पुं, (सर्व्वोऽत्र वसति सर्व्वत्रासौ वसतीति
। वस+बाहुलकात् उण्। इति ११ संख्यक
ादित्यत्वश्रुतौ उज्ज्वलदत्तः।) नारायणः।
त्रिकाण्डशेषः॥ श्रीनिवासोऽप्यतो वासुः।
जटाधरश्च। विश्वरूपः। पुनर्व्वसुः। इत्यु-
दिकोषः॥
:, पुं, वसुकस्यापत्यमिति। वसुक+इञ्।)
देपतिः। तत्पर्य्यायः। सर्पराजः २। इत्य-
:॥ वासुकेयः ३। इति शब्दरत्नावली।
ोत्पत्तिर्यथा,—
रुषा अग्निरं सर्पाणीयां राजा तु तक्षकः।
सुकिश्चैव नागानां गणाः क्रोधवशोऽधिकः॥”
इति वह्निपुराणे काश्यपीयवंशः॥
रत्कारुमुनिपत्नी मनसादेवी तु अस्यैव
गिनी।
मास्तीकस्य मुनेर्माता भगिनी वासुके स्तथा।
रत्कारुमुनेः पत्नी नागमातर्नमोऽस्तु ते॥”
इति मनसाध्यानमन्त्रः।)
ेयः, पुं, (वसुकस्यापत्यमिति। वसुक+
ढ।) वासुकिः। इति शब्दरत्नावली॥
ेवभगा, [न] स्त्री, (वासुदेवस्य वासुदे-
स्य भगिनी।) मनसादेवी। इत्यमरः॥

वासुदेवः, पुं, (वसुदेवस्यापत्यमिति। वसुदेव+
“ऋष्यन्धकवृष्णिकुरुभ्यश्च।” ४। १। ११४।
इति अण्। यद्वा, सर्व्वत्रासौ वसत्यात्मरूपेण
विश्वम्भरत्वादिति। वस्+बाहुलकात् उण्
वासुः। वासुश्चासौ देवश्चेति कर्म्मधारयः।
अस्य नामनिरुक्तिस्तु परतो ज्ञेया।) श्रीकृष्णः।
इत्यमरः॥ तत्पर्य्यायः। वसुदेवभूः २। इति
हेमचन्द्रः॥ सत्यः ३ सुभद्रः ४ वासुभद्रः ५
षडङ्गजित् ६ षड्बिन्दुः ७ प्रश्निशृङ्गः ८ प्रश्नि-
भद्रः ९ गदाग्रजः १० मार्जः ११ बभ्रुः १२
लोहिताक्षः १३ परमात्माङ्गकः १४। इति
शब्दमाला॥ अन्यत् कृष्णशब्दे द्रष्टव्यम्॥
श्रीकृष्णशरीरस्य नित्यत्वं यथा,—
श्रीसनत्कुमार उवाच।
“भद्रं वो मुनयः शश्वत्पश्यामि कुशलीप्सितम्।
कृष्णस्य कुशलप्रश्नं शिवबीजस्य निष्फलम्॥
साम्प्रतं कुशलं वच्म दर्शनं परमात्मनः।
भक्तानुरोधाद्देहस्य परस्य प्रकृतेरपि॥
निर्गुणस्य निरीहस्य सर्व्वबीजस्य तेजसः।
भारावतारणायैव चाविर्भूतस्य साम्प्रतम्॥
श्रीकृष्ण उवाच।
शरीरधारिणश्चापि कुशलप्रश्नमीप्सितम्।
तत्कथं कुशलप्रश्नं मयि विप्र न विद्यते॥
सनत्कुमार उवाच।
शरीरे प्राकृते नाथ सन्ततञ्च शुभाशुभम्।
नित्यदेहे चेमबीजे शिवप्रश्नमनर्थकम्॥
श्रीभगवानुवाच।
यो यो विग्रहधारी च स च प्राकृतिकः स्मृतः।
देहो न विद्यते विप्र तां नित्यां प्रकृतिं विना॥
सनत्कुमार उवाच।
रक्तबिन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः।
कथं प्रकृतिनाथस्य बीजस्य प्राकृतं वपुः॥
सर्व्वबीजस्य सर्व्वादिर्भवांश्च भगवान् स्वयम्।
सर्व्वेषामवताराणां प्रधानं बीजमव्ययम्॥
कृत्वा वदन्ति वेदाश्च नित्यं नित्यं सनातनम्।
ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम्॥
मायया सगुणश्चैव मायेशं निर्गुणं परम्।
प्रवदन्ति च वेदाज्ञास्तथा वेदविदः प्रभो॥
श्रीकृष्ण उवाच।
साम्प्रतं वासुदेवोऽहं भक्तबीजाधिनं वपुः।
कथं न प्राकृतो विप्र शिवप्रश्नमभीप्सितम्॥
सनत्कुमार उवाच।
वासः सर्व्वनिवासश्च विश्वानि यस्य लोमसु।
तस्य देवः परं ब्रह्म वासुदेव इतीरितः॥
वासुदेवेति सन्नाम वेदेषु च चतुर्षु च।
पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते॥
रक्तबीजोद्भवो देहः स्थूले देहे निरूपितः।
सावित्री नुनयश्चात्र धर्म्मः कर्म्मैव इत्र हि॥
सावित्री मम देहाश्च तदित्यमौ च साम्प्रतम्॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः॥
तस्य नामनिरुक्तिः।
“सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिगीयते॥”
इति विष्णुपुराणे १ अंशे २ अध्यायः॥
अपि च।
“सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेष्वपि च सर्व्वात्मा वासुदेवस्ततः स्मृतः॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥”
इति तत्रैव। ६। ५। ८०—८२॥
(तथा च महाभारते। ५। ७०। ३।
“वसनात् सर्व्वभूतानां वसुत्वात् देवयोनितः।
वासुदेवस्ततो वेद्यो बृहत्त्वात् विष्णुरुच्यते॥”)
अस्य अङ्गप्रत्यङ्गमन्त्रा यथा,—
“बीजन्तु वासुदेवस्य पूर्व्वं व प्रतिपादितम्।
तदङ्गमन्त्रं राजेन्द्र द्वादशार्णमुच्यते॥
ॐ नमो भगवते वासुदेवाय वै पदम्।
अङ्गमन्त्रं तथैतस्य वासुदेवस्य कीर्त्तितम्॥
अस्य प्रत्यङ्गरूपन्तु दधिवामनसंज्ञकम्।
तस्य मन्त्रं नरश्रेष्ठ शम्भुना भाषितं शृणु॥
ॐ नमो विष्णवे पूर्व्वं पदं तस्य प्रकीर्त्तितम्।
पदन्तु सुरपतये चतुर्थ्यन्तं महाबलम्॥
स्वाहान्तं हृदयाख्यं प्रत्यङ्गं वैष्णवं मतम्।
मन्त्रद्वयन्तु यो वेद बीजं प्रत्यङ्गमन्त्रकम्॥
स पूजा देवकायन्तु न स भूयोऽभिजायते।
सर्व्वन्तु तन्त्रोक्तः क्रमो ग्राह्यः प्रपूजने॥
त्रिषु मन्त्रेषु च सुधी विशेषं शृणु भूपते।
रूपन्तु बीजमन्त्रस्य प्रथमं शृणु भूपते॥
पूर्णचन्द्रोपमः शुक्लः पद्मरागोपरिस्थितः।
चतुर्भुजः पीतवस्त्रैस्त्रिभिः संवीतदेहभृत्॥
दक्षिणोर्द्ध्वे गदां धत्ते गदधो विकचाम्बुजम्।
वामोर्द्ध्वे चक्रमतुलं धत्तेऽधः शङ्खमेव च॥
श्रीवत्सवक्षाः सततं कौस्तुभं हृदि चाङ्गुलम्।
धत्ते वक्षे स्वधो वामे तूणीरं बाणपूरितम्॥
दक्षिणे कौघटं खड्गं नन्दकं सशरासनम्।
शीर्षे किरीटं सर्व्वाङ्गं कर्णयोः कुण्डलद्वयम्॥
आजानुलम्बिनीं चित्रां सर्व्वमालां समाश्रि-
ताम्।
दधानं दक्षिणे देवीं श्रियं पार्श्वे तु बिभ्रतम्॥
सरस्वतीं वामपार्श्वे विभ्रन्तं तं हरिम्।
मन्त्रस्य बीजरूपन्तु कथितं तव पार्थिव॥
द्वादशाक्षरमन्त्रस्य रूपमन्यत् शृणुष्व मे।
नीलोत्पलदलश्यामं सदैव च चतुर्भुजम्॥
दक्षिणोर्द्ध्वे स्थितं पद्मं तदाधः शङ्खमेव तु।
वामोर्द्ध्वचक्रमतुलमधः शङ्खं बिभ्रतम्।
विभ्रन्तं तं देवं सर्व्वमन्त्रस्य पूजने।
अष्टादशाक्षरमन्त्रस्य प्रत्यङ्गस्य च विस्तरम्।
शृणु राजशार्दूल शार्ङ्गिणो भवमङ्गलम्॥
पूर्णचन्द्रं वामे कुण्डलं विभ्रन्तम्।
करे विभ्रतं देवं पीतवासं पुरुषम्।
चक्रपाणिमंशुमन्तं तं दधन्तं सर्व्वभावनम्।
द्वादशाक्षरं देवं सर्व्वकामफलप्रदम्।

शुक्लवस्त्रधरं देवं प्रमाणाद्वामनं सदा ।
ईषद्धाससमायुक्तं त्रिलोकेशं त्रिविक्रमम् ।
चिन्तयेद्वरदं देवं सर्व्वकामफलप्रदम् ।"

इति कालिकापुराणे ८२ अध्यायः ॥०॥

तस्योत्पत्तिर्यथा,—
"ततस्तु दशमे मासि विधौ श्रवणसङ्गते ।
अष्टम्यामर्द्धरात्रौ च तस्यां जातो जनार्द्दनः ॥
इन्दीवरदलश्यामः पद्मपत्रायतेक्षणः ।
चतुर्भुजः सुन्दराङ्गो दिव्याभरणभूषितः ॥
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषितः ।
वसुदेवस्य जातोऽसौ वासुदेवः सनातनः ॥

इति पाद्मोत्तरखण्डे ६० अध्यायः ॥०॥

तस्य चतुर्द्धा मूर्त्तिर्यथा,—
"एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः ।
चतुर्द्धावस्थितो व्यापी सगुणो निर्गुणोऽपि च ॥
एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ॥
सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता ।
जगत् स्थापयते सर्व्वं सा विष्णुप्रकृतिर्ध्रुवा ॥
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी सुसंज्ञिता ।
राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टि-
कारिका ॥
यः स्वपित्यखिलं हत्वा प्रद्युम्नेन सह प्रभुः ।
नारायणाख्यो ब्रह्मासौ प्रजासर्गकरो हि सः ॥
या सा नारायणतनुः प्रद्युम्नाख्या शुभेश्वरा ।
तया संमोहयेद्विश्वं सदेवासुरमानुषम् ॥
सैव सर्व्वजगत्सूतिः प्रकृतिः परिकीर्त्तिता ।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः ॥
प्रधानं पुरुषः कालस्तत्त्वत्रयमनुत्तमम् ।
वासुदेवात्मकं नित्यमेतत् विज्ञानमुच्यते ॥
एकधेदं चतुर्द्धादं चतुर्द्धा पुनरच्युतः ।
विभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥"

इति कूर्म्मपुराणे ४८ अध्यायः ॥

वासुदेवप्रियङ्करी, स्त्री, (वासुदेवस्य प्रियङ्करी ।) शतावरी । इति राजनिर्घण्टः ॥ श्रीकृष्णप्रियकारिणी च ॥

वासुपूज्यः, पुं, (वासुर्नारायण इव पूज्यः ।) जिनविशेषः । इति हेमचन्द्रः । १ । २७ ॥

वासुभद्रः, पुं, श्रीकृष्णः । इति शब्दमाला ॥ (यथा, शिशुपालवधे-कौमारव्यवहृतौ । ३१ ।
"या वायावानुकूल्यात् सरति मणिरुचा भासमानासमाना
साकं साकम्पमंसे वसति विदधती वासुभद्रं सुभद्रम् ॥")

वासुरा, स्त्री, स्त्रीमात्रम् । करिणी । रात्रिः । भूमिः । इति हेमचन्द्रः ॥

वासूः, स्त्री, (वास्यते स्वरते इति । वास + बाहुलकात् ऊः ।) नाट्योक्तौ बाला । इत्यमरः ॥

वासौकः, [स्] क्ली, (वासाय ओकः स्थानम् ।) वासगृहम् । यथा,—
"सभागारेऽपवरके वासौकः शयनास्पदम् ।"

इति हेमचन्द्रः ॥

वास्तवं, क्ली, (वस्त्वेव । वस्तु + अण् ।) यथार्थभूतम् । यथा,—
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।"

इत्यादि श्रीभागवते प्रथमस्कन्धे १ अध्यायः ॥
"वास्तवं परमार्थभूतं वस्तु । यद्वा, वास्तवशब्देन वस्तुनोऽंशो जीवः वस्तुनः कार्य्यं जगच्च तत् सर्व्वं वस्त्वेव न ततः पृथक् ।" इति तट्टीकायां श्रीधरस्वामी ॥

वास्तविकं, त्रि, (वस्त्वेव वस्तु + ठक् ।) परमार्थभूतं वस्तु । वास्तवमेव इत्यर्थे वास्तवशब्दात् स्वार्थिकप्रत्ययेनापि निष्पन्नम् ॥

वास्तवेया, स्त्री, रात्रिः । इति त्रिकाण्डशेषः ॥ किन्तु वासतेया क्षपा इति नामद्वयमिति साधुपाठः ॥

वास्तव्यः, त्रि, वसतीति वस + "वसेस्तव्यत् कर्त्तरि णिच्च ।" ३ । १ । ९६ । इत्यस्य वार्त्तिकोक्त्या वासकर्त्ता । कर्त्तरितव्यन् । इति सिद्धान्तकौमुदी । (यथा, कथासरित्सागरे । ३८ । १०७ ।
"इहैवासि महाराज वास्तव्यो नगरे द्विजः ।")
वासयोग्यश्च । वसतौ, पुं ॥

वास्तु, क्ली, वास्तूकशाकम् । इति राजनिर्घण्टः ॥

वास्तु, क्ली पुं, (वसन्ति प्राणिनो यत्र । वस निवासे + "वसेरगारे णिच्च ।" उणा० १ । ७० । इति तुण् । स च णित् ।) गृहकरणयोग्यभूमिः । तत्पर्य्यायः । वेश्मभूः २ । इत्यमरः ॥ पोतः ३ वाटी ४ । इति जटाधरः ॥ वाटिका ५ गृहपोतकः ६ । इति शब्दरत्नावली ॥ वास्तुकरणप्रमाणादिर्यथा,—

श्रीहरिरुवाच ।
"वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम् ।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत् ॥
ईशाने च शिरःपादौ नैरृतेऽग्न्यानिले करौ ।
आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे ॥
प्रासादारामदुर्गेषु देवालयमठेषु च ।
द्वात्रिंशत्तु सुरान् बाह्ये तदन्तश्च त्रयोदश ॥
ईशश्चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षेत्रयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो गणाधिपः ।
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्री जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
देवानेकोत्तरानेतान् पूर्व्वादौ नामतः शृणु ॥

अर्य्यमा सविता चैव विवस्वान्
मित्रोऽथ राजयक्ष्मा ...
अष्टपञ्चाशदुक्ता वै ...
ईशानकोणादारभ्य कुर्य्यादेवं
आग्नेयकोणादारभ्य नैरृते ...
आदितिं हिमवन्तञ्च ...
नन्दिकां कालिकां नाम
वासुदेवान् पूजयित्वा ...
सुरेभ्यः पुरतः कार्य्यं दिक्पालेभ्यो ...
रूपनिर्गमनं येन पूर्व्वतः ...
गन्धपुष्पयवं कार्य्यमेतान्यां पूजयेत् ...
भाण्डागारञ्च कौवेर्य्यां ...
उदगाश्रयञ्च वारुण्यां ...
समिधस्तत्र मण्डपमायुधागारं ...
अभ्यागतालयं ...
तोयाग्निदीपसद्भक्ष्यैर्युक्तं दक्षिणे ...
गृहाण्यन्तराणि सर्व्वाणि बहवे ...
पञ्चवर्णैश्च कुसुमैः ...
प्राकारं तद्बहिर्दद्यात् पञ्चहस्तं
एवं विष्णाश्रमं कुर्य्याद्वेदोक्तं ...
चतुःषष्टिपदो वास्तुः ...
मध्ये चतुष्पदो ब्रह्मा ...
वर्ज्जं चैवाथ पश्चाद्दाष्टौ देवाः
शिष्योऽप्युभयतः सार्द्धं ...
चतुःषष्टिपदे देवा इत्येवं परिकीर्त्तिताः
चरकी च विदारी च ...
ईशानाद्यास्तथा बाह्ये ...
हेतुकस्त्रिपुरान्तश्च ...
अग्निजिह्वः कालकस्तु कराली ...
ईशान्यां भीमरूपस्तु पाताले ...
आकाशे गन्धमाली स्यात् ...

विस्ताराभिहतं दीर्घं ...
वसुभिर्भागशुद्धिञ्च शेषाद्द्वारादि ...
पुनर्गुणितमष्टाभिः सप्तभागम् ...
यच्छेषं तद्भवेदृक्षं भागैर्द्धं व्ययं ...
अथ चतुर्गुणं कृत्वा वसुभिर्भागं ...
शेषमंशं विजानीयात् देवस्य ...
अष्टाभिर्गुणितं पिण्डं षष्टिभिः
यच्छेषन्तु भवेज्जीव मरणं ...
वास्तुकोष्ठे गृहं कुर्य्यात् न गृहे ...
वामपार्श्वेन स्वपिति तत्र कार्य्या शिर ...
सिंहकन्यातुलायाञ्च द्वारं शुद्रवैश्य
एवञ्च वृश्चिकादौ स्यात् पूर्व्वदि...
द्वारं दीर्घार्द्धविस्तारं द्वाराणां
सुताश्वप्रेष्यनीचत्वं सुयानं ध्रुवम् ...
पुत्रहानिस्तु रोद्रे च वीर्य्यं दक्षिणे
वज्रोऽथवाग्नेयश्च पुत्रलाभं तु दद्यात्
धनदं नृपपीडारमर्थं रोगदं ...
नृपभीतिः सन्तापश्च धनदश्च ...
अर्थदं वायव्ये दोषदं पुत्रकुल...
द्वारान्युत्तरसंज्ञानि पूर्व्वद्वाराणि ...

…कोपदम् ।
…शीवरं पूर्व्वे वरुतो द्वारमीरितम् ।
…थौ भवेत् पूर्व्वे याम्ये द्वारौ तु दक्षिणे ।
…द्वारौ पश्चिमे स्यात् सौम्यद्वारौ तु चोत्तरे ।
…मी इतो भागे द्वाराणाञ्च फलाफलम् ।
…वटन्यग्रोधाः पूर्व्वादौ स्यादुडुम्बरः ।
…शोभनः प्रोक्त ईशाने चैव शाल्मलिः ।
…वी विजयादौ स्यात् प्रासादस्य गृहस्य
च ।”
…इति मात्स्ये वास्तुमानकथनं ४६ अध्यायः ।
…एतच्चतत् प्रासादशब्दे द्रष्टव्यम् । ● ।
…च ।

अथ वास्तुः ।

…प्रासादभवनादीनां निवेशं विस्तराद्वद ।
…केन विधानेन कस्य वास्तुरुदाहृतः ।

सूत उवाच ।

…भृगुरत्रिर्वसिष्ठश्च विश्वकर्म्मा मयस्तथा ।
…नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।
…ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
…वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।
…अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
…संक्षेपोपदिष्टं यन्मनवे मत्स्यरूपिणा ।
…तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
…पुरान्धकवधे घोरे घोररूपस्य शूलिनः ।
…ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
…करालवदनं तस्मात् भूतमुद्भूतमुल्बणम् ।
…ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
…ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ।
…तत् समरे सर्व्वं पतितं यन्महीतले ।
…तदपि तृप्तिमगमत् न तदा यदा ।
…सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
…क्षुधाविष्टस्तु त्रैलोक्यं भक्षितुं जगतां क्षयम् ।
…ततः कालेन सन्तुष्टो भैरवस्तस्य चादरात् ।
…वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ।
…उवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
…इच्छामि देवदेवेश तथेत्युक्तश्च शूलिना ।
…ततः त्रिदिवं सर्व्वं भूमण्डलमथावनः ।
…देवैरन्यैश्च बध्वाशं प्रापतद्भुवि ।
…स्थापितस्तु दैवैर्वास्तुरभूत् शूलिना ।
…सुरासुरैर्योगिभिरवष्टब्धं समन्ततः ।
…तदेव वास्तुनाम्ना स तस्मिन्नभवत् पुनः ।
…स्मात् सर्व्वदेवानां वास्तुरित्यभिधीयते ।
…तस्मिन् …पि विप्रेन्द्राः सर्व्वदेवताः ।
ानानि कुर्व्वन्ति सर्व्वभावेन नारद ! ।

ब्राह्मणानाञ्च ये कन्यां दास्यन्ति विधिवन्नरा: ॥
दानानां फलमेतेषां प्राप्नुयुस्ते विधानत: ।
तानि दानानि गृह्णन्ति दत्तानि विधिवत् सुरा: ।
यत्किञ्चित् कार्त्तिके दत्तं तपश्चैव तथा कृतम् ।
तदक्षयफलं प्रोक्तं विष्णुना लोककर्त्तृणा ॥
दयायां भोजनं चैव कार्त्तिके मासि यै: कृतम् ।
अश्वमेधादिकं पुण्यं तेषु प्राप्तं न संशय: ॥
तस्माद्यत्नेन विप्रेन्द्र कार्त्तिके मासि दीयते ।
यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवै: ॥
हुतं दत्तञ्च विप्रेन्द्र तपश्चैव तथा कृतम् ।
तदक्षयं लभन्ते ते अन्नदानं विशेषत: ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद ।
उदधीनाञ्च विप्रर्षे क्षयो नैवोपपद्यते ॥
तद्वत् कार्त्तिकमासे तु यत्किञ्चिद्दीयते मुने ।
न तस्यास्ति क्षयो विप्र पापं याति सहस्रधा ॥
तस्मात् सर्व्वप्रयत्नेन कर्म्मणा मनसा गिरा ।
पापं समाचरेन्नैव कार्त्तिके विष्णुतत्पर: ॥
अज्ञानाद्वा यदि वाज्ञानाद्दुष्कृतं येन यत्कृतम् ।
तत्तस्य नश्यति क्षिप्रं वायुना पांशवो यथा ॥
संप्राप्तं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत् ।
दिने दिने च कृच्छ्रस्य फलं प्राप्नोत्यसंशयम् ॥
प्रहृष्टानान्तु भक्ताय्यां कार्त्तिके नियमे कृते ।
अवश्यं विष्णुरूपत्वं प्राप्यते मुक्तिदं शुभम् ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
न चान्नेन समं दानं न सुखं भार्य्यया समम् ।
न कृषेस्तु समं वित्तं न लाभ: सुरभीसम: ॥
न तपोऽनशनैस्तुल्यं न दमात् परमो जय: ।
न च धर्म्मो दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥
न द्रुमो रसनातुल्या न प्रीतिस्तु सुतं विना ।
न कार्त्तिकसमो मासो वैष्णवानां प्रिय: सदा ॥
अव्रतेन क्षपेद्यस्तु मासं दामोदरप्रियम् ।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृत: ॥
दुर्लभं वैष्णवं ज्ञानं दुर्लभा वैष्णवी कथा ।
दुर्लभा वैष्णवी दीक्षा दुर्लभो जागरस्तथा ॥
दुर्लभं कपिलादानं दुर्लभं जाह्नवीजलम् ।
दुर्लभो वैष्णवो विप्रो दुर्लभं शीलमोचनम् ॥
दुर्लभं पुष्करे दानं दुर्लभा: कार्त्तिके तिला: ।
दुर्लभो जागरो विष्णो: पक्षयोरुभयोरपि ॥
दुर्लभा कार्त्तिके विप्र द्वादशी हरिबोधिनी ।
दुर्लभा मालतीपूजा दुर्लभा तुलसी मुने ॥
दुर्लभं कार्त्तिके स्नानं दुर्लभं साधुसङ्गमम् ।
शालग्रामशिलापूजा दुर्लभा मुनिपुङ्गव ॥
स्वानुगा नारी यत्र दुर्लभा श्रमशालिनाम् ।
कुलशीलवती कन्या दुर्लभा दम्पती द्विजाम् ॥
दुर्लभा जननी लोके पिता चैव विशेषत: ।
दुर्लभं साधुसङ्गानं दुर्लभो धार्म्मिक: सुत: ॥
दुर्लभैवारणी लोके [illegible] ।
[illegible] ॥
दुर्लभं वैष्णवे दानं [illegible] ।
[illegible] ॥
[illegible] दुर्लभं विप्र दुर्लभं [illegible] ॥

न्यायेनोपार्ज्जितं वित्तं दुर्लभं कुलवर्द्धनम् ।
दुर्लभं वत्स मथायां पात्रे यत् प्रतिपादितम् ॥
पात्राणामपि तत्पात्रं सदाचारक्रियान्वितम् ।
संप्राप्य कार्त्तिकं मासं विमुखा ये जनार्द्दने ।
तेषां यमपुरे वास: पितृभि: सह नारद ! ॥"

इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११४ अ: ॥

ब्रह्मोवाच ।

"कार्त्तिकस्य तु माहात्म्यं पुनरेव शृणुष्व मे ।
यत् श्रुत्वा मुनिशार्द्दूल ! सर्व्वान् कामानवाप्स्यसि ॥
व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम् ।
कर्त्तुर्विष्णुव्रतस्योक्तं शतजन्मानुगं फलम् ॥
आश्विनस्य सिते पक्षे एकादश्यां द्विजोत्तम ! ।
वैष्णवैर्वैष्णवं धर्म्मं प्रारम्भोऽस्य विधीयते ॥
यावत् कार्त्तिकशुक्लस्य पौर्णमासी तिथिर्भवेत् ।
तावदस्य व्रतस्योक्तं सम्यगाचरणं बुधै: ॥
अन्यथा तु कृतं विप्र व्रतमेतत् सुदुर्लभम् ।
कार्य्यं सद्भि: प्रयत्नेन कार्त्तिके तु विशेषत: ॥
त्रिंशद्दिनानि पुण्यानि विप्रप्रीतिकराणि वै ।
कार्त्तिकस्य व्रतं विप्र ! श्रीविष्णुप्रीतिकारणम् ॥
तदहं शोधस्य व्रतं मुने तुष्टिकरं परम् ।
पुण्यं पञ्चदिनं प्रोक्तं दत्तं तस्मै च विष्णुना ॥
नरो वा यदि वा नारी कुरुते वैष्णवं व्रतम् ।
दिने दिनेऽश्वमेधफलं भवेत्तस्यैव कार्त्तिके ॥
अतस्त्वं विधिवत् पुत्र ! वैष्णवं व्रतमुत्तमम् ।
श्रीदामोदरतुष्ट्यर्थं प्रकुरुष्व समाहित: ॥
रूप्ये मासि मुनिश्रेष्ठ प्रात:काले तथामले ।
गोष्पदेऽपि जले स्नानं भवेदं पापिनामपि ॥"

इति पाद्मे उत्तरखण्डे ११५ अध्याय: ॥

ब्रह्मोवाच ।

"पुराणश्रवणं यत्र कुर्व्वन्ति दिनागमे ।
तेषां करस्थिता मुक्तिर्विष्णो नात्र संशय: ॥
कार्त्तिके मासि यो भक्त्या कुर्य्याद्ब्राह्मणभोजनम् ।
प्रयाति विष्णुसारूप्यं स याति भवनं हरे: ।
कार्त्तिके मासि य: कुर्य्यात् तिलतैलेन दीपकम् ।
अहोरात्रान् मुनिश्रेष्ठ स याति परमं पदम् ॥
कार्त्तिके मासि यो दद्यात् पादत्राणं द्विजन्मने ।
दद्यादश्वान्वितं वत्स [illegible] ॥
[illegible] यो दद्यात् भूमिं वै ब्राह्मणाय तु ।
स याति [illegible] ॥
ताम्बूलञ्चैव यो दद्यात् [illegible] ।
[illegible] ॥
[illegible] यो दद्यात् [illegible] ।
[illegible] ॥
[illegible] ।
यो दद्यात् [illegible] ॥"

इति पाद्मे उत्तरखण्डे ११६ अध्याय: ॥

बाहुल्यं, क्ली, बहुलम् । बहुलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

बाहुसार:, पुं, [illegible] । इति [illegible] ॥ [illegible] ॥

वाह्यं, क्ली, (वाह्यते चाल्यते इति वाहि+ण्यत् ।) यानम् । यथा, हेमचन्द्रे ।
"यानं युग्यं पत्रं वाह्यं वह्यं वाहनधोरणे ।"
वाह्यः, त्रि, (वह+ण्यत् ।) वहनीयः । (यथा, रघुः । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कॢप्तविवाहवेशा ॥"
बहिस्+ष्यञ् ।) बहिः । बाहिर इति भाषा । यथा, स्मृतिः ।
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥"
वा(बा)ह्येन्द्रियं, क्ली, (वाह्यमिन्द्रियम् ।) वहिरिन्द्रियम् । तद्यथा । चक्षुः । जिह्वा । नासिका । त्वक् । श्रोत्रम् । एतदेकैकगुणाः । यथा,—
"एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
वाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥"
इति भाषापरिच्छेदः ॥
वाह्लिकः, पुं, वाह्लीकदेशः । इत्यमरटीकायां भरतः । (तद्देशजाते, त्रि । यथा, महाभारते । १ । २२१ । ४६ ।
"एह्लानामपि चान्यानां बाह्लिकानां जनार्द्दनः ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥")
वाह्लिकं, } क्ली, कुङ्कुमम् । हिङ्गु । इत्यमर-
वाह्लीकं, } मेदिनीकरौ ॥
वाह्लीकः, पुं, देशभेदः । बलख इति ख्यातो भाषा । तद्देशजातघोटकः । इत्यमरमेदिनीकरौ ॥ गन्धर्व्वविशेषः । इति शब्दरत्नावली ॥ (प्रतीपपुत्रविशेषः यथा, महाभारते ।१।६५।४४।
"प्रतीपः खलु शैव्यामुपयेमे सुनन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं वाह्लीकञ्चेति ॥")
वि, व्य, निग्रहः । नियोगः । पादपूरणम् । निश्चयः । असहनम् । हेतुः । व्याप्तिः । विनियोगः । ईषदर्थः । परिभवः । शुद्धम् । अवलम्बनम् । विज्ञानम् । इति मेदिनी । वे, ७६ ॥ विशेषः । गतिः । आलस्यः । पालनम् । इति शब्दरत्नावली । उपसर्गविशेषः । अस्यार्थाः । वि विशेषवैरूप्यनार्थं गतिदानेषु । इति मुग्धबोधटीकायां दुर्गादासः ॥
विः, पुं, स्त्री, (वाति गच्छतीति । वा+"वातेर्डिच ।" उणा० ४ । १३३ । इति इण् । स च डित् ।) पक्षी । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः ।
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ॥")
विंशः, त्रि, (विंशति+पूरणे डट् । तेर्लोपः ।) विंशतेः पूरणः । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः । ८ । ३९८ ।
"कुर्य्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ॥")

विंशकः, त्रि, (विंशत्या क्रीतः । विंशति+"विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ।" ५ । १ । २४ । इति ड्वुन् । "ति विंशतेर्डिति ।" ६ । ४ । १४२ । इति तिलोपः ।) विंशतिक्रीतः । इति सिद्धान्तकौमुदी ॥
विंशतिः, स्त्री, (द्वौ दश परिमाणमस्य । पङ्क्तिविंशतीति निपातनात् सिद्धम् ।) संख्याविशेषः । बिश इति कुड़ि इति च भाषा । यथा,—
"विंशत्याद्याः सदैकत्वे सर्व्वाः संख्येयसंख्ययोः ।
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ॥"
इत्यमरः ॥
तद्वाचकानि । रावणबाहुः १ । अङ्गुलिः २ । इति कविकल्पलता ॥ नखम् ३ । इति वृत्तरत्नावली ॥
विंशतिकः, त्रि, विंशतियोग्यः । यथा । संख्यायाः कन् स्यादार्हीयेऽर्थे । विंशतित्रिंशद्भ्यां कन् संज्ञायाम् । अन्या कन् स्यात् असंज्ञायान्तु ड्वुन् स्यात् । विंशकः । संज्ञायान्तु विंशतिकः । इति सिद्धान्तकौमुदी ॥
विंशतितमः, त्रि, (विंशतेः पूरणः । विंशति+डट् । "विंशत्यादिभ्यस्तमडन्यतरस्याम् ।" ५ । २ । ५६ । इति तमडागमः ।) विंशः । इति सिद्धान्तकौमुदी ॥
विंशी, पुं, विंशतिः । इति सिद्धान्तकौमुदी ।
विकं, क्ली, सद्यःप्रसूताया गोः क्षीरम् । यथा,—
"क्षीरं सद्यःप्रसूतायाः पेयूषं पालनं विकम् ।"
इति शब्दचन्द्रिका ॥
विकङ्कटः, पुं, गोक्षुरः । इति शब्दमाला ॥
विकङ्कतः, पुं, मदरीवक्षप्रसूपालकष्टचः । बैंइच इति भाषा । तत्पर्यायः । स्वादुकण्टकः २ सुवावृक्षः ३ ग्रन्थिलः ४ व्याघ्रपात् ५ । इत्यमरः ॥ श्रुवावृक्षः ६ मधुपर्णी ७ । इति रत्नमाला ॥ कण्टपादः ८ बहुफलः ९ गोपघण्टा १० सुवाहुमः ११ स्वादुफलः १२ दन्तकाष्ठः १३ यज्ञीयवृक्षपादपः १४ पिण्डारः १५ हिमकः १६ पूतः १७ किङ्किणी १८ मेकवृक्षः १९ पूतिद्रुः २० कण्टिकारी २१ । इति शब्दरत्नावली ॥ किङ्किरी २२ सुगवाद २३ । इति जटाधरः ॥ अस्य गुणाः । अम्लमधुरत्वम् । पाकेऽतिमधुरत्वम् । लघुत्वम् । दीपनत्वम् । कामलास्रदोषनाशित्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।
विकङ्कतफलं पक्वं मधुरं सर्व्वदोषजित् ॥"
इति भावप्रकाशः ॥
विकङ्कता, स्त्री, अतिबला । इति राजनिर्घण्टः ॥
विकचः, पुं, (विगतः कचो यस्य केशशून्यत्वात् । यद्वा, विशिष्टः कचो यस्य प्रभूतकेशत्वात् ।) क्षपणः । केतुः । इति मेदिनी । चे, ॥ (यथा, बृहत्संहितायाम् । ११ । २८ ।
"विकचा नाम गुरुसुताः
सितैकताराः शिखिपरित्यक्ताः ।

...र्ति: पञ्चभिरंशा
शिखा याम्याश्रिताः ...
विकचः, त्रि, (विकचति ...
+अच् ।) विकसितः ।
माघे । ११ । १९ ।
...
सुरभिमकरन्दं ...
...
(विगतः कचो यस्य ।) केशशून्यः ।
चे, ॥ (यथा, महाभारते । ...
...
विकचः प्रदरा याचो ...
विकचा, स्त्री, महाश्रावणिका ।
निर्घण्टः ॥
विकच्छः, त्रि, (विगतः कच्छो यस्य ...
रहितः । मुक्तकच्छः । इति ...
विकटः, पुं, (विकटति ...
वि+कट+पचाद्यच् ।) ...
शब्दरत्नावली । धार्त्तराष्ट्रः ...
निर्घण्टः ॥ (धृतराष्ट्र ...
महाभारते । १ । ६७ । ९८ ।
"दुर्म्मदो दुष्प्रधर्षश्च ...
विकटः, त्रि, (वि+"संप्रोदश्च कटच्"
इति कटच् ।) विशालः । (यथा, ...
"उत्तरीयविनयात्त्रपमाणा
रुन्धती किल तदीयकटीं ...
आवरिष्ट विकटेन विवोढु-
र्वक्षसैव कुचमण्डलमन्या ॥")
विकरालः । इति मेदिनी । टे ...
विन्ध्यः । दन्तुरः । इति धरणिः ।
काण्डे । ४३ । २० ।
"करालैर्विकटैः ...
पाशाङ्कुशाङ्कितः ...
विक्रतः । इति त्रिकाण्डशेषः ।
विकटा, स्त्री, (विकट+टाप् ।)
च बौद्धदेवीभेदः । तत्पर्यायः ।
त्रिमुखा ३ वज्रकालिका ...
गौरी ६ पोत्रिरथा ७ । इति ...
विकण्टकः, पुं, (विशिष्टः कण्टको यस्य ।
इति जटाधरः ॥ वृक्षविशेषः ।
स्वादुफलः २ ग्रन्थिलः ३ ...
गोकण्टकः ५ काकपादः ६ ...
द्रुमः ८ गर्भफलः ९ घनफलः १० ...
द्रुमः ११ सुदिरफलः १२ ...
फलः १४ व्यतिसफलः १५ । ...
काषायत्वम् । कटुत्वम् । उष्णत्वम् ।
त्वम् । दीपनत्वम् । कफहारित्वम् ।
विधायकत्वञ्च । इति राजनिर्घण्टः ।
विकत्थनं, क्ली, (विकत्थ्यते इति । वि+कत्थ ...
याम्+भावे ल्युट् ।) मिथ्याश्लाघा ।

:प्रशंसार्थवादः सा तु मिथ्याविकत्थनम् ।"
इति हेमचन्द्रः ॥
ं, भागवते । १ । १५ । १८ ।
ह्याशनाटनविकत्थनभोजनादि-
काद्वयस्य सखेति विप्रलब्धः ।"
थते आत्मानमिति । वि + कत्थ + ल्युः ।
-श्लाघाकारिणि, त्रि । यथा, महाभारते ।
.७३ । ३२ ।
-हयितारं हेरारं प्रचक्तारं विकत्थनम् ।
हैनमियोगात्ते हन्ताहं कर्णमाहवे ।"* ।
वि + कत्थ + णिच् + युच् । टाप् । आत्म-
। यथा, विद्यानविजयनाटके । २ ।
भवीत्तामि शक्तानां न प्रशस्ता विकत्थना ।
यिघनध्वानैर्नाभोभिः किं भवादृशाम् ।")
:, त्रि, विशेषेण कम्पविशिष्टः । विपूर्व्वक-
धातोः क्तप्रत्ययेन निष्पन्नः ॥
पुं, (विकीर्य्यते हस्तपदादिकमनेनेति ।
कृ + "ऋदोरप् ।" इत्यप् ।) रोगः ।
शब्दचन्द्रिका ॥
:, त्रि, (विशेषेण करालः ।) भयानकः ।
विकटशब्दार्थे मेदिनी ॥ (यथा, मार्क-
। ११८ । ४८ ।
करालं महावक्तमतिभीषणदर्शनम् ।
जनमहाशूलं प्रभूतमतिदारुणम् ।")
पुं, दुर्य्योधनपक्षीयशूरः । यथा,—
त्थामा विकर्णश्च सौमदत्तिर्जयद्रथः ।
च बहवः शूरा मदर्थे त्यक्तजीविताः ।"
इति भगवद्गीतायाम् १ अध्यायः ॥
गतौ कर्णौ यस्येति विग्रहे कर्णरहिते,
।)
कः, पुं, सारस्वतदेशः । इति हेमचन्द्रः ॥
:, पुं, (विशेषेण कर्त्तनं यस्य । विश्वकर्म्म-
खोदितत्वादस्य तथात्वम् ।) सूर्य्यः । अर्क-
: । इत्यमरः ॥
कृत्, त्रि, (विकर्म्म विरुद्धं कर्म्म करो-
ति । कृ + क्विप् ।) निषिद्धकर्म्मकारी । यथा,
साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ ।
श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥
ध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ।
वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ।"
इति मानवे । ८ । ६६ ॥
विकर्म्मकृत् निषिद्धकर्म्मकारी ।" इति कुल्लूक-
: ॥
स्थः, त्रि, (विकर्म्मणि विरुद्धाचारे तिष्ठ-
ति । स्था + कः ।) निषिद्धकृत् । यथा,—
पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान्
शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ।"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ।
यथा मनौ । ४ । ३० ।)
ः पुं, (विकृष्यतेऽसौ इति । यद्वा, विकृष्यन्ते
रश्मयः अनेनेति । वि + कृष् + घञ् ।)

याग: । इति त्रिकाण्डशेषः ॥ (वि + कृष +
भावे घञ् । विकर्षणम् ॥)
विकर्षणं, क्ली, (वि + कृष + ल्युट् ।) आकर्षणम् ।
विपूर्व्वकृषधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा,
किराते । ३ । ५७ ।
"अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म्मकार्म्मुकम् ।"
विभागः । यथा, भागवते । ३ । ७ । ३० ।
"वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ।
ऋषीणां जन्मकर्म्माणि वेदस्य च विकर्षणम् ।")
विकलः, त्रि, (विगतः कलो यस्माद्ध्वनिर्यस्य ।)
विह्वलः । इति जटाधरः ॥ स्वभावहीनः । इति
भरतः ॥ (यथा, महाभारते । १ । ४८ । १९ ।
"विधवानाथविकलान् कृपणांश्च बभार सः ।
सुदर्शः सर्व्वभूतानामासीत् सोम इवापरः ।")
विकलपाणिकः, पुं, (विकलः पाणिर्यस्य । कन् ।)
स्वभावहीनपाणियुक्तः । यथा । कुणिर्विकल-
पाणिकः । इति हलायुधः ॥
विकला, स्त्री, (विगतः कलो मधुरालापो यस्याः ।
ऋतौ तु स्त्रिया मौनित्वविहितत्वात् ।) ऋतु-
हीना । इति शब्दरत्नावली ॥
विकलाङ्गः, त्रि, (विकलानि अङ्गानि यस्य ।)
स्वभावतो न्यूनाङ्गः । तत्पर्य्यायः । अपोगण्डः
२ । इत्यमरः ॥ पोगण्डः ३ अङ्गहीनकः ४ ।
इति शब्दरत्नावली ॥ (यथा, महाभारते ।
१ । ३१ । ३४ ।
"जनयामास पुत्त्रौ द्वावरुणं गरुडं तथा ।
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ।")
विकली, स्त्री, (विगता कला यस्याः । गौरादि-
त्वात् ङीष् ।) ऋतुहीना । इति शब्दरत्ना-
वली ॥
विकल्पः, पुं, (विरुद्धं कल्पनमिति । वि +
कृप + घञ् ।) भ्रान्तिः । (यथा, देवीभाग-
वते । १ । १८ । ३२ ।
"विकल्पोपहतस्त्वं वै दूरदेशमुपागतः ।
न मे विकल्पसन्देहो निर्व्विकल्पोऽस्मि सर्व्वथा ।")
कल्पनम् । इति मेदिनी । पे, ॥ (यथा, भाग-
वते । ५ । १६ । २ ।
"तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः
सप्त सिन्धवः उपक्लृप्ताः । यत एतस्याः सप्त-
द्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचितः ।"
संशयः । यथा, रघुः । १७ । ४८ ।
"रात्रिन्दिवविभागेषु यथादिष्टं महीक्षिताम् ।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ।"
नानाविधः । यथा, मनुः । ६ । २२८ ।
"प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ।")
विविधकल्पः । स च द्विविधः । व्यवस्थितः ।
ऐच्छिकश्च । सोऽप्यष्टाष्टादशदोषदुष्टः । यथा
च भविष्ये ।
"व्रतिशाखि विकल्पस्तु व्याकाङ्क्षाद्दूरदोषवान् ।"
इच्छाविकल्पेऽष्टदोषाः । यथा,—

"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना ।
प्रत्युज्जीवनहानिभ्यां प्रत्येकमष्टदोषता ।"
व्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते । तत्र
व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः ।
अप्रतीतयवाप्रामाण्यपरिकल्पनम् । इदन्तु पूर्व्व-
स्मात् पृथक् वाक्यं अन्यथा समुच्चयेऽपि याग-
सिद्धिः स्यात् । अतएव विकल्पे न उभयः
शास्त्रार्थं इत्युक्तम् । प्रयोगान्तरे यवे उपा-
दीयमाने परित्यक्तयवप्रामाण्योज्जीवनं स्वीकृत-
यवाप्रामाण्यहानिरिति चत्वारो दोषाः । एवं
व्रीहावपि चत्वारः । इत्यष्टौ दोषा इच्छा-
विकल्पे । तथा चोक्तम् ।
"एवमेवाष्टदोषोऽपि यद्व्रीहियववाक्ययोः ।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते ।"
इति ।
एकार्थतया विविधं कल्प्यते इति विकल्पः ।
तस्मादष्टदोषभिया उपोष्य द्वे तिथी इत्यत्र
न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः ।
इत्येकादशीतत्त्वम् ॥ (अवान्तरः कल्पः । यथा,
भागवते । २ । ८ । ११ ।
"यावान् कल्पो विकल्पो वा यथा कालोऽनु-
मीयते ।"
देवता । यथा, भागवते । १० । ८५ । ११ ।
"वैकारिको विकल्पानां प्रधानमनुशायि-
नाम् ।"
"विविधं आधिदैवाध्यात्माधिभूतभेदेन कल्प्यन्ते
इति विकल्पा देवास्तेषां कारणं वैकारिकः
सात्त्विकोऽहङ्कारश्च त्वम् ।" इति तट्टीकायां
स्वामी ।)
विकश्वरः, त्रि, (वि + कश + वरच् ।) विकाशी ।
इत्यमरटीकायां भरतः ॥ (यथा, नैषधे ।२।५।
"अयमेत्य तडागनीडजै-
र्लघुपर्य्यव्रियताथ शङ्कितैः ।
उदडीयत वैकृतात् कर-
ग्रहजादस्य विकश्वरस्वरैः ।")
विकषा, स्त्री, (विकषतीति । वि + कष गतौ +
अच् । टाप् ।) मञ्जिष्ठा । इत्यमरटीकायां
रायमुकुटः ॥ मांसरोहिणी । इति राज-
निर्घण्टः ॥
वकस्वरः, त्रि, (वि + कस + वरच् ।) विकश्वरः ।
इत्यमरटीकायां भरतः ॥
विकसः, पुं, (विकसतीति । वि + कस + अच् ।)
चन्द्रः । इति त्रिकाण्डशेषः ॥
विकसा, स्त्री, (विकसतीति । वि + कस + अच् ।
टाप् ।) मञ्जिष्ठा । इत्यमरः ॥
विकसितं, त्रि, (वि + कस + क्तः ।) इत्यादामन्यो-
न्यविशेषः । तत्पर्य्यायः । उज्जृम्भितम् २ उज्जृ-
म्भम् ३ स्मितम् ४ उन्मिषितम् ५ विनिद्रम् ६
उन्निद्रम् ७ उन्मीलितम् ८ विजृम्भितम् ९
उद्बुद्धम् १० उन्निद्रुतम् ११ भिन्नम् १२ उद्-
भिन्नम् १३ दलितम् १४ विस्फुटम् १५ विक-
चम् १६ व्याकोशम् १७ फुल्लम् १८ संफुल्लम् १९

स्फुटम् २० उदितम् २१ दलितम् २२ दीर्णम् २३ स्फुटितम् २४ उत्फुल्लम् २५ प्रफुल्लम् २६ । इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम् । ४७६ ।
"यदवधिविटङ्कमाला विकसितकुसुमोत्करा प्रशस्ये़यी ।
पीतांशुकप्रियेयं तदवधि मल्लीपतेः पुत्री ॥")
विकस्वरः, त्रि, (विकसतीति । वि + कस गतौ + "स्थेशभासपिसकसो वरच् ।" ३ । २ । १७५ । इति वरच् ।) विकासशीलः । तत्पर्य्यायः । विकाशी २ । इत्यमरः ॥ "विकसति कस च गतौ दन्त्यान्तः याथाय भासकसेति वरे विकस्वरः । विकाशः स्फुटने थक्राविति दन्त्यान्ते घरपि ।
'कुशेशयैरत्र जलाशयोषिता
मुदा रमन्ते कलभा विकस्वरैः ।
प्रगीयते सिद्धगणैश्च योषिता
मुदा रमन्ते कलभा विकस्वरैः ॥'
इति माघयमकेऽपि दन्त्यवत्त्वम् । (४।३३) कष वधे मूर्द्धन्यान्त इत्यस्य रूपमिति केचित् । काश शब्दे इत्यस्य तालव्यान्तस्य रूपमिति केचित् ।" इति तट्टीकायां भरतः ॥ (यथा, कथासरित्सागरे । ४ । १५ ।
"एकस्याः सोत्सुका दृष्टिः पालोकविकस्वरा ।
श्रुतिः पार्श्वमपास्यान्यास्तदाख्यातुमिवाययौ ॥")
विकस्वरा, स्त्री, (विकस्वर + टाप् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (विवरणमस्या रक्तपुनर्नवाशब्दे ज्ञातव्यम् ॥)
विकारः, पुं, (वि + कृ + घञ् ।) प्रकृतेरन्यथाभावः । तत्पर्य्यायः । परिणामः २ विकृतिः ३ विक्रिया ४ । इत्यमरः ॥ विकृया ५ । इति भरतः ॥ केचित्तु पूर्व्वद्वयं प्रकृतिध्वंसजन्यविकारे यथा काष्ठस्य विकारो भस्म । मृत्तिकाया घट इति । परद्वयं विकारमात्रे यथा सुखस्य विकृतिः क्रोधरक्तता । काष्ठस्य भस्म च । इति भरतः ॥ (यथा, कुमारे । ७ । ६५ ।
"अपि शयनसखिभ्यो दत्तवाचं कथञ्चित्
प्रमथमुखविकारैर्हासयामास गूढम् ।"
प्रकृतिविकृतिः । यथा, हरिवंशे । २४८ । ३५ ।
"शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च ।
प्रकृतिश्च विकारश्च यथाश्वत्कारणं महत् ॥"
अस्य विशेषविवरणं विकृतिशब्दे द्रष्टव्यम् ॥) रोगः । इति मेदिनी । रे, २१८ ॥ (यथा,—
"विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते ।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥
मत्स्यः । तत्पर्य्यायो यथा,—
"मत्स्यो मीनो विसारश्च झषो वैसारिणोऽण्डजः ।
शकुलो पृथुरोमा च स सुनयन इत्यपि ॥
रोहिताद्यास्तु ये मीनास्ते मत्स्याः परिकीर्त्तिताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

विकालः, पुं, (विरुद्धः कार्य्यानर्हः कालः ।) दैवपैत्रादिकर्म्मणि विरुद्धकालः । वैकाल इति भाषा । तत्पर्य्यायः । सायः २ दिनान्तः ३ सायाह्नः ४ सायम् ५ । इति शब्दरत्नावली । उत्सयः ६ विकालकः ७ । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ३४ । ३० ।
"न लङ्घयेत् तथैवास्य क्षीवमोहनमादि च ।
भोज्यादादौ विकालेषु प्रायश्चित्तैर्नृदारक ॥")
विकालकः, पुं, (विकाल एव । स्वार्थे कन् ।) विकालः । इति त्रिकाण्डशेषः ॥
विकालिका, स्त्री, (विगतः कालो यया । कप् । टापि अत इत्वम् ।) मानरन्ध्रा । ताम्री । इति त्रिकाण्डशेषः ॥ तामी इति भाषा ॥
विकाशः, पुं, (वि + काश दीप्तौ + घञ् ।) रहः । प्रकाशः । इत्यमरटीकायां भरतः ॥ विकाशो विजने स्फुटे । इत्यजयः ॥ (यथा, राजतरङ्गिण्याम् । ४ । १५५८ ।
"विकाशः केषाञ्चित् नयनविषमैर्निष्कुटदृशैः
परैरासन्नमृतिः श्ववककटुभिर्दीर्घरसितैः ।
नदीष्टा काप्यन्योपहतिपरिहीणा जनतयो
जडो वर्षादिर्य्यं गमयति गुणं भास्य तु जनः ॥")
विकाशनं, क्ली, (वि + काश + ल्युट् ।) विकाशः । विपूर्व्व-काश ऋ दीप्तौ इत्यस्मात् अनट्प्रत्ययेन निष्पन्नम् ॥
विकाशी, [न्] त्रि, (विकाशोऽस्यास्तीति । विकाश + इनिः ।) विकाशशीलः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, मार्कण्डेये ।
"कालायमनी सुहृद्विरहलम्भात्
विकाशिवक्रास्तु विकाशिसायाः ॥")
विकाषी, [न्] त्रि, (विकाष + इनिः ।) विकाषशीलः । इत्यमरटीकायां भरतः ॥
विकासी, [न्] त्रि, (विकास + इनिः । विकासते इति । वि + कास + णिनिर्वा ।) विकस्वरः । इत्यमरः ॥
विकिरः, पुं, (विकिरति मृत्तिकादीन् भोजनार्थमिति । वि + कॄ विक्षेपे + इगुपधेति कः ।) पक्षी, इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
"पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः ।
शकुनिर्विः पतत्री च विष्किरो विकिरोऽण्डजः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) कूपः । इति त्रिकाण्डशेषः ॥ (विकीर्य्यते इति । वि + कॄ + घञर्थे कः ।) पूजाकालीनविघ्नोत्सारणार्थप्रक्षेपणीयतण्डुलादिः । यथा । यद्विति सप्त जप्वान् विकिरानादाय ।
"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥"
इति विकिरेत् ॥
यथा,—
"लाजचन्दनसिद्धार्थभस्मदूर्व्वाकुशाक्षताः ।
विकिरा इति सन्दिष्टाः सर्व्वविघ्नौघनाशकाः ॥"
इति तन्त्रसारः ॥

अविद्यन्त्याद्यैर्न विक्रम् ...
"अर्ध्यस्कन्दप्रभोदयाः ...
उच्छिष्टं भागधेयं स्याद्भ्यो ...
अपि च ।
"पिण्डनिर्वापरहितं यत् यद्...
सधावाचमनीयोऽत्र ...
(यथा च मार्कण्डेये । ३३ । ३३ ।
"ये वा दग्धाः कुले बालाः ...
विषमार्ष्टिः ...
जलविशेषे, क्ली । तथा च ...
गम् ।
"यथादिनिकटे भूमिर्या ...
उद्घाद्यते ततो यत्तु तज्जलं ...
विकिरं शीतलं स्वच्छं ...
तुवरं स्वादु पित्तघ्नं लघ्वाह ...
विकिरणं, क्ली, (वि + कृ + ल्युट् । ...
नम् ।) विक्षेपणम् । विक्षिरणम् ।...
इति कृपायवर्दशगात् । (
इत्यमरः । २ । ४ । ८० ।)
विकीरणः, पुं, अर्कवृक्षः । ...
(तदास्य पर्य्यायः ।
"अलर्को गणरूपः ...
श्वेतपुष्पः सदापुष्पः सवालार्कः ...
रक्तोपरोऽर्कनामा स्याद्विकीरणः ...
रक्तपुष्पः शुक्लफलस्तथास्फोटः ...
इति भावप्रकाशस्य पूर्व्वखण्डे ...
विकीर्णः, त्रि, (विकीर्य्यते स्मेति । ...
विक्षिप्तः । छड़ान इति भाषा । ...
"अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्द्धजा
समदुःखामिव कुर्व्वती स्थली ...
इति ...
विकीर्णरोम, [न्] क्ली, (...
मिति ।) स्थौणेयम् । इति ...
विकीर्णसंज्ञ, क्ली, (विकीर्णमि ...
स्थौणेयम् । इति राजनिर्घण्टः ।)
विकुक्षिः, पुं, इक्ष्वाकुराजपुत्रः । ...
"मैवस्वतमनोराशीदिक्ष्वाकुः पृथि ...
तस्य पुत्रशतस्यासीद्विकुक्षिर्ज्येष्ठ ...
सोऽयोध्याधिपतिर्वीरस्तस्य ...
इति ... । ११७ ...
विकुर्व्वाणः, त्रि, (विकुरुते इति । ...
शानच् ।) हर्षमाणः । इत्यमरः ...
प्राप्ते च । यथा, सांख्यदर्शने । ...
"आकाशस्तु विकुर्व्वाणः ...
बलवान् भवदाकुलस्य यस्यों गुणो ...
विकुसः, पुं, (विकसतीति । ...
कसेः ।" उणा० २ । २१ । इति ...
पथाया: ।) चन्द्रः । इत्युणादिकोष ...

., स्त्री, नासिका। इति हेमचन्द्रः॥
त, (वि+कृ+क्तः।) वीभत्सम्। रोगि-
असंस्कृतम्। इति मेदिनी। ते, १५८॥
विहीनम्। यथा, मनुः। ६। २४७।
ाश्च न प्रमीयन्ते विकृतं न च जायते॥"
तिश्यः। यथा, महाभारते।३।१११।६८।
"यथर्य्यस्य विकृतं समीक्ष्य
पुनः पुनः पीड्य च कायमस्य।
अवेक्षमाणा शनकैर्जगाम
कृत्वाभिषेकस्य तदाश्रमेशम्॥"॥
वी। यथा, रघुः। १२। ३६।
ाचः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम्।
शोरस्त्वनां पश्चात् बुबुधे विकृतेति ताम्॥")
स्त्री, विकारः। तस्य लक्षणम्। यथा,—
ानैर्यादिभिर्यत्र नोच्यते स्वं विवक्षितम्।
तं चेष्टयैवेदं विकृतं तद्विदुर्बुधाः॥"
इत्युज्ज्वलनीलमणिः॥
ादिगदिसंवत्सरान्तर्गतचतुर्विंशवर्षम्।
, भविष्यपुराणे।
भैरव उवाच।
ाः प्रजाः प्रमीयन्ते व्याधिः शोकश्च
जायते।
ोवधोविरोगाश्च पापादि विकृते जनाः॥"
इति ज्योतिस्तत्त्वम्॥
विकालद्वारविशेषः। यथा, साहित्य-
णे। ६। १२६।
क्वकालेऽप्यवचो व्रीडया विकृतं मम॥")
., स्त्री, (वि+कृ+क्तिन्।) विकारः।
गरः॥ (यथा, कुमारे। ७। ६७।
"यथाप्रदेशं भुजगेश्वराणां
करिष्यतामाभरणान्तरत्वम्।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः॥")
.। हिमः। मद्यादिः। इति हेमचन्द्रः॥
ोक्तोप्रविकृतिः। यथा, सांख्यकारिका-
म्। ३।
"मूलप्रकृतिरविकृति-
र्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो
न प्रकृतिर्न विकृतिः पुरुषः॥"
[illegible]

द्वारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एव-
महदङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृति-
र्विकृतिश्च महतः। एवं पञ्चतन्मात्राणि
भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाह-
ङ्कारस्य। अथ का विकृतिरेव कियती च इत्यत
उक्तं षोडशकस्तु विकार इति षोडशसंख्या-
परिमितो गणः षोडशकः। तु शब्दोऽवधारणे
भिन्नक्रमश्च। पञ्चमहाभूतान्येकादशेन्द्रियाणि
चेति षोडशको गणो विकार एव न प्रकृति-
रिति। यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो
विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादय-
स्तथापि गवादयो वीजादयो वा न पृथिव्यादिभ्य
स्तत्त्वान्तरम्। तत्त्वान्तरोपादानत्वञ्च प्रकृतित्व-
मिहाभिप्रेतमिति न दोषः सर्वेषां गोघटा-
दीनां स्थूलता इन्द्रियग्राह्यता च समेति न
तत्त्वान्तरम्। अनुभयरूपमुक्तं तदाह न प्रकृति-
र्न विकृतिः पुरुष इति तत्त्वकौमुदी॥ ३॥)
विकृष्टः, त्रि, विशेषेण कृष्टः। आकृष्टः। विपूर्व्व-
कृषधातोः क्तप्रत्ययेन निष्पन्नः॥
विकृष्टकालः, पुं, (विकृष्टः कालः।) चिरकालः।
यथा,—
"विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्द्धते।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधावति॥"
विकृष्टकाले: चिरेण। जत्रु कण्ठोरसोः सन्धिः।
इति भावप्रकाशः॥
विकेशी, स्त्री, (विगताः केशा यस्याः। ङीष्।)
केशवर्ज्जिता। खटवर्णिः। इति धरणिः॥
महोरूपविशेषस्य पत्नी। यथा,—
"सूर्य्या जलं मही वह्निर्वायुराकाशमेव च।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात्॥
सुवर्च्चला तथैवोषा विकेशी चापरा शिवा।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथा-
क्रमम्।
सूर्य्यादीनामिमाः पत्न्यो रुद्रादेर्नामभिः सह॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः॥
विकोषः, पुं, हृकारपुष्पः। स च कल्किदेवेन
हृतः। यथा,—
"कल्किः कोकविकोकाख्यौ महामायाविनौ
ततः।
बुबुधे विदुषे [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति कल्किपुराणे [illegible]
विकोषः, त्रि, (विगतः कोषो यस्य।) [illegible]
[illegible]

आच्छादनरहितः। यथा, मनौ। ११। ६६।
लोकटीकायां कुल्लूकः।
"गुरुभार्य्यागामी विकोषमेहनत्वमिति॥")
विक्कः, पुं, (विक् इति कायति शब्दायते इति।
कै+कः।) करिशावकः। इति त्रिकाण्डशेषः॥
विक्रमः, पुं, (विशेषेण क्रामतीति। वि+क्रम+
अच्।) विष्णुः। यथा, विष्णुसहस्रनामस्तोत्रे।
"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः॥"
(वि+क्रम+घञ्।) शौर्य्यातिशयः। तत्-
पर्य्यायः। अतिशक्तिता २। इत्यमरभरतौ॥
(यथा, रघुः। १२। ८०।
"अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात्।
रामरावणयोर्युद्धं चरितार्थमिवाभवत्॥")
क्रान्तिमात्रम्। इति मेदिनी। मे,५४॥ (पाद-
विक्षेपः। यथा, रामायणे। १। १। १०।
"आजानुबाहुः सुशिराः सुललाटः सुवि-
क्रमः॥")
विक्रमादित्यराजा। यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नश्लोकः॥
[illegible]। [illegible]। इति राजनिर्घण्टः॥
(शक्तिः। यथा, भागवते। ३। ८। ३०।
"[illegible] विक्रमः प्रतिसंक्रमः।
[illegible]
"विक्रमः [illegible] प्रतिसंक्रमो महाप्रलयः।"
इति [illegible]
[illegible]
"[illegible]
[illegible]"
इति ज्योतिस्तत्त्वम्॥
[illegible]
[illegible]
उक्तम्।
"[illegible]
[illegible]
[illegible]
[illegible]"
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

श्रीमद्विक्रमभूभुजा प्रतिदिनं सत्कामनिःस्वार्थिनो
मनोमात्सर्यभरत्वेनेव विहितो धर्मः सुवर्णा-
मनः ।"

अथास्य दिग्विजयमाह ।

"उद्दामद्रविडद्रुमैकमदगुलाटाटवीपावको
वङ्गाङ्गप्रसुभङ्गरागमदको गौडाब्धिकुम्भोद्भवः।
मत्तेद्गूर्जरराजसिन्धुरहरिर्धाराम्धकारार्यमा
काम्बोजाम्बुजचन्द्रमा विजयते श्रीविक्रमार्को
नृपः ।"

अथास्य प्रभुत्वादिगुणान् वर्णयति ।

"येनाप्तुनमहोदयानविजये दुर्वारमहावहो
नीत्वा कान्ति मनोज्ञनादविधया दत्तानि तेभ्यो
पुनः ।
[illegible]
श्रीमद्विक्रमभूभुजाखिलजनाम्भोजेन्दुना
गच्छते ।"

अस्य पुरीं वर्णयति ।

"यत्राभवत्सूज्जयिनी महापुरी
सदा महाकालमहेशयोगिनी ।
समाश्रितप्राज्यपवर्गदायिनी
श्रीविक्रमार्कोऽत्र नृपो जयत्यपि ।
[illegible]
[illegible] महावहे ।
[illegible]
श्रीविक्रमार्कः [illegible] ।
[illegible]
[illegible]
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible]"
इति ज्योतिर्विदाभरणम् ।)

विक्रमी, [न्] पुं (विक्रमोऽस्त्यस्येति । विक्रम + इनि ।) सिंहः । इति राजनिर्घण्टः । विष्णुः । यथा,—

[illegible]

"यमादिव्रतादिवृषयुक्ते
भेदाः क्रये विक्रये [illegible]
[illegible]
क्रये हिना विक्रये [illegible]
इति ज्योति [illegible]
क्रयविक्रयनिर्णयो यथा ।
[illegible]
[illegible]
"[illegible]
[illegible]
[illegible] ।
"[illegible]
[illegible]
क्रयविक्रये [illegible]
सिद्धिः । यथा मनुः ।
"क्रीत्वा विक्रीय वा किञ्चि [illegible]

[illegible]

त्वा व्याधिं करोति व्याधिं हत्वा
ं करोति। विक्रयपदं स्वत्वध्वंसकत्वात्
यति परा क्रिया निष्टिव्यर्थः। एवञ्च
शोर्मरणादिना व्याध्युद्धारे विक्रय-
कर्तृतुल्यस्वत्वजननात् तत्र तन्क्रेट-
त्वव्याधाध्युद्धारः कार्य्यः। इति।

ावरस्य समस्तस्य गोत्रसाधारणस्य च।
णाम् क्रयं दानं परस्परमतं विना॥
अविभक्ता वा सपिण्डाः स्थावरे समाः।
ेशः सर्व्वत्र दानाधमनविक्रये॥"
मवचनाभ्यामेकस्य दानबन्धकविक्रया-
इति वाच्यं यथेष्टविनियोगार्हत्वरूपस्य
न्तरान्तर इत्यास्याविशेषात् वच-
मित्वेन दुर्वृत्तपुरुषगोचरविक्रयादिना
रोधादधर्म्मज्ञापनार्थनिषेधरूपं न तु
तनिष्पत्त्यर्थमिति दायभागः॥ * ॥

: विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया॥"
स्थावरस्य केवलविक्रयप्रतिषेधात् एवं
: प्रतिगृह्णातीत्यादिवचने दानप्रशंसा-
े विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं
ानरूपेण स्थावरविक्रय इति विज्ञाने-
वस्तुतस्तु स्थावरविक्रयनिषेधो ऽवि-
ावरविषयः। तत्रापि यदि विक्रयं विना
िनं भवति तदा विक्रयः कर्त्तव्यः।
पार्ज्जितनष्टोद्धारे विशेषयति मिता-
ाम्।
र द्विपदश्चैव यद्यपि स्वयमर्ज्जितम्।
य सुतान् सर्व्वान् न दानं न च विक्रयः॥"
इत्यादि॥
यादमाह।
ापि स्थावरे कुर्य्याद्दानाधमनविक्रयम्।
ाले कुटुम्बार्थे धर्म्मार्थे च विशेषतः॥"
इति दायतत्त्वम्॥
ेषविक्रयनिषेधो यथा। स्मृतिः।
ाणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्।
गम्यागमनं शूद्रः पतति तत्क्षणात्॥
ाक्षीरपानेन ब्राह्मणीगमनेन च।
रविचारेण शूद्रश्चाण्डालतां व्रजेत्॥"
काशुराणम्।
यं सर्व्ववस्तूनां कुर्व्वन् शूद्रो न दोषभाक्।
र्म्मं सुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्॥"
।
: पतति मांसेन लाक्षया लवणेन च।
ा शूद्रीभवति ब्राह्मणः क्षीरविक्रयात्॥
ौ भेषजस्यार्थे यज्ञहेतोस्तथैव च।
ान्नु विक्रेयास्तिला धान्येन तत्समाः॥"
इत्याह्निकतत्त्वम्॥
विक्रयकारी च गवि लोमानि यानि च।
ेषसद्मानि गवां गोष्ठे क्रिमिर्भवेत्॥"
इति यमवचनम्॥

"गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयाः।
तड़ागारामदाराणामपत्यस्य च विक्रयः।
भृताच्चाध्ययनादानमपण्यानाञ्च विक्रयः॥"
इत्यादि मानवे ११ अध्याये उपपातकमध्ये
गणितम्॥

विक्रयणं, क्ली, (वि+क्री+ल्युट्।) विक्रयः। यथा,
"यमाहिशक्राग्निहुताशपूर्व्वा
नेष्टाः क्रये विक्रयणे प्रशस्ताः।
पौष्णाश्विचित्राशतविन्दुवाताः
क्रये हिता विक्रयणे निषिद्धाः॥"
इति ज्योतिःसारसंग्रहः॥

विक्रयिकः, पुं, (विक्रयेण जीवतीति। विक्रय+
"वस्नक्रयविक्रयात् ठन्।" ४।४।१३। इति
ठन्। यद्वा, विक्रीणातीति। वि+क्री+"क्रिय
इकन्।" उणा० २।४४। इति इकन्।)
विक्रेता। इत्यमरः॥ (यथा, महाभारते।
१२।३६।३०।
"दीक्षितस्य कदर्य्यस्य क्रतुविक्रयिकस्य च।
तक्ष्णश्चर्म्मावकर्त्तुश्च पुंश्चल्या रजकस्य च।
चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा॥")

विक्रयी, [न्] त्रि, (विक्रीणातीति। वि+क्री+
णिनिः।) विक्रयकर्त्ता। इति शब्दरत्नावली॥
(यथा, याज्ञवल्क्ये। २।१७३।
"क्रेता मूल्यमवाप्नोति तस्मात् यस्तस्य
विक्रयी॥")

विक्रान्तं, क्ली, (वि+क्रम+क्तः।) वैक्रान्त-
मणिः। इति राजनिर्घण्टः॥ (त्रिविक्रमाव-
तारस्य विष्णोर्द्वितीयपादक्षेपेण अन्तरिक्षं
विक्रान्तमिति ख्यातम्। तथा च वाजसनेय-
संहितायाम्। १०।१९।
"विष्णोर्विक्रमणमसि। विष्णोर्विक्रान्तमसि।
विष्णोः क्रान्तमसि।"
"हे द्वितीयप्रक्रम त्वं विष्णोर्विक्रान्तं द्वितीय-
पादप्रक्षेपेण जितमन्तरिक्षमसि।" "इमे वै
लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः
क्रान्तमिति श्रुतेः।" इति तद्भाष्ये महीधरः।)

विक्रान्तः, पुं, (वि+क्रम+क्तः।) शूरः। इत्य-
मरः॥ (वाच्यलिङ्गेऽपि दृश्यते। यथा, मुद्रा-
राक्षसे। १।
"विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीवक्र-
नासादिभिः॥")
सिंहः। इति राजनिर्घण्टः॥ (मदालसागर्भ-
जात-ऋतध्वजपुत्रः। यथा, मार्कण्डेये। २५।८।
"मदालसायाः सञ्जज्ञे पुत्त्रः प्रथमजस्ततः।
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः॥"
हिरण्याक्षपुत्त्रविशेषः। यथा, हरिवंशे। ३।
७८—७९।
"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः।
भर्झरः शकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च॥")

विक्रान्तिः, स्त्री, (वि+क्रम्+क्तिन्।) अश्व-
गतिः। तत्पर्य्यायः। पुलायितम् २। इति
त्रिकाण्डशेषः॥ विक्रमश्च॥ (यथा, राजतर-
ङ्गिण्याम्। ४।१७९।
"पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः॥"
पादन्यासः। यथा, शतपथब्राह्मणे। १।१।२।१३।
"विष्णुस्त्वाक्रमतामिति यज्ञो वै विष्णुः स देवेभ्य
इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्ति-
रिदमेव प्रथमेन पदेन पस्पारायेदमन्तरिक्षं
द्वितीयेन दिवमुत्तमेनैतां वेवैष एतस्मै विष्णु-
र्यज्ञो विक्रान्तिं विक्रमते॥")

विक्रायकः, पुं, (विक्रीणातीति। वि+क्री+
ण्वुल्।) विक्रेता। इति हेमचन्द्रः। ३। ५३२॥
(यथा, महाभारते। ५। ३८। ४।
"चिकित्सकः शल्यकर्त्तावकीर्णी
स्तेनः क्रूरो मद्यपो भ्रूणहा च।
सेनाजीवी श्रुतिविक्रायकश्च
भृशं प्रियोऽप्यतिथिर्नोदकार्हः॥")

विक्रिया, स्त्री, (विकरणमिति। वि+कृ+"कृञः
श च।" ३।३।१००। इति शः। टाप्।)
विकारः। इत्यमरः॥ (यथा, रघुः।१३।७१।
"श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान्॥"
प्रकृतेरन्यथाभावः। यथा, मार्कण्डेये। ३५।७।
"अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः॥"
विरुद्धा क्रिया। विरुद्धकार्य्यम्। यथा, रघुः।
१५।४८।
"इत्याप्तवचनाद्रामो विनेष्यन् वर्णविक्रियाम्।
दिशः पपात पत्त्रेण वेगनिष्कम्पकेतुना॥")

विक्रीतः, त्रि, (वि+क्री+क्तः।) कृतविक्रयः।
यथा, बृहस्पतिः।
"नाष्टिकश्चैव कुरुते तद्धनं ज्ञातिभिः स्वकम्।
अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनी॥"
इति प्रायश्चित्ततत्त्वम्॥

विक्रुष्टं, त्रि, (वि+क्रुश+क्तः।) निष्ठुरम्। इति
हेमचन्द्रः॥

विक्रेता, [ऋ] त्रि, (विक्रीणातीति। वि+क्री+
तृच्।) विक्रयकर्त्ता। तत्पर्य्यायः। विक्रयिकः
२। इत्यमरः॥ विक्रयी ३। इति शब्दरत्ना-
वली॥ विक्रायकः ४। इति हेमचन्द्रः॥
(यथा, याज्ञवल्क्यः। २।१७३।
"विक्रेतुर्दर्शनात् शुद्धिः स्वामी द्रव्यं नृपो दमम्।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी॥")

विक्रेयं, त्रि, (विक्रीयते इति। वि+क्री+"अचो
यत्।"३।१।९७। इति यत्।) विक्रययोग्यद्रव्यम्।
तत्पर्य्यायः। पणितव्यम् २ पण्यम् ३। इत्य-
मरः॥ विक्रययोग्यायोग्यानि यथा,—
"इदन्तु हरिवैकल्याचकल्पौ धर्म्मनैपुणम्।
विट्पण्यमुद्धृतोद्धारं विक्रेयं विक्रयार्हणम्॥
सर्व्वान्नमानयो रस कृतान्नञ्च तिलैः सह।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः।

क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ।
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥”
इति मानवे १०. अध्यायः ॥

विक्लवः, त्रि, (विक्लवते इति । वि+क्लु+पचाद्यच् ।) विह्वलः । इत्यमरः ॥ (यथा, माघे । १२ । ६३ ।
“नूनं सहायेन वियोगविक्लवा
पुरः पुरस्त्रीरपि निर्ययौ तदा ॥” * ॥
क्ली, दुःखम् । यथा, रामायणे । २।४४।२५ ।
“किमिदानीमिदं देवि ! करोषि हृदि विक्लवम् ॥”)

विक्लिन्नः, त्रि, (वि+क्लिद्+क्तः ।) जरया जीर्णः । शीर्णः । आर्द्रः । इति मेदिनी । ने, १३३ ॥

विक्षतः, त्रि, (वि+क्षण+क्तः ।) विशेषेण क्षतः । (यथा, महाभारते । २ । ४८ । ३३ ।
“अद्वारेण विनिर्गच्छन् द्वारसंस्थानरूपिणा ।
अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः ॥”)

विक्षावः, पुं, (विक्षवणमिति । वि+क्षु+“वौ क्षुश्रुवः ।” ३ । ३ । २५ । इति घञ् ।) शब्दः । इत्यमरः ॥ (यथा, भट्टिः । ७ । २६ ।
“यात यूयं यमश्रायं दिशं नायेन दक्षिणाम् ।
विक्षावैस्तोयविश्रावं तर्ज्जयन्तो महोदधेः ॥”)
कासः । इति स्वामिकलिङ्गौ । इति भरतः ॥

विक्षिप्तः, त्रि, (वि+क्षिप्+क्तः ।) व्यक्तः । (यथा, महाभारते । १ । २७ । ७ ।
“वायुविक्षिप्तकुसुमैस्तथान्यैरपि पादपैः ॥”
कम्पितः । यथा, भागवते । ८ । ८ । ४६ ।
“स व्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ।
दैत्ययूथपचेतःसु काममुद्दीपयन् मुहुः ॥”
क्ली चित्तवृत्तिविशेषः । यथा, पातञ्जलभाष्ये ।१।
“क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः ॥” “क्षिप्ताद्विशिष्टं विक्षिप्तमिति मणिप्रभा ॥”)

विक्षीरः, पुं, (विशिष्टं क्षीरं यत्र ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

विक्षेपः, पुं, (वि+क्षिप्+घञ् ।) प्रेरणम् । त्यागः । विक्षेपणम् । यथा,—
“कैकेय्यामिषुविक्षेपमतीत्य त्वधिकं भुवम् ॥”
इत्याद्याह्निकाचारतत्त्वम् ॥
(कम्पनम् । यथा, कुमारे । १ । १३ ।
“लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति वालव्यजनैश्चमर्य्यः ॥”)
अद्वितीयवस्त्वनवलम्बनेन चित्तस्य अन्यावलम्बनम् । इति वेदान्तसारः ।

विक्षेपशक्तिः, स्त्री, (विक्षेपाय शक्तिः ।) मायाशक्तिः । यथा । रज्जुज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति । एवं अज्ञानमपि स्वावृतात्मनि तथा विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम् । इति वेदान्तसारसुबोधिनीटीका ॥

विख्रः, त्रि, (विग्रः । निपातनात् साधुः ।) गतनासिकः । इति भरतद्विरूपकोषः ॥

विखनाः, [स्] पुं, ब्रह्मा । यथा,—
“न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥”
इति श्रीभागवते । १० । ३१ । ४ ॥

विखुः, त्रि, (विगता नासिका यस्य । बहुलवचनात् नासिकायाः खुः ।) गतनासिकः । इति भरतद्विरूपकोषः ॥

विखुरः, पुं, राक्षसः । इति त्रिकाण्डशेषः ॥ चौरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

विख्यः, त्रि, (विगता नासिकास्येति । “ख्यश्च ।” ८ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या नासिकायाः ख्यः ।) गतनासिकः । इति केचित् ॥

विख्यातः, त्रि, ख्यातिप्राप्तः । विपूर्व्वख्याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १ । ६० । १२ ।
“चन्द्रवर्म्मेति विख्यातः काम्बोजानां नराधिपः ॥”)

विख्यातिः, स्त्री, प्रसिद्धिः । सुख्यातिः । विपूर्व्वख्याधातोः क्तिप्रत्ययेन निष्पन्नः ॥

विख्यापनं, क्ली, (वि+ख्या+णिच्+ल्युट् ।) व्याख्यानम् । विपूर्व्वण्यन्तख्याधातोर्ल्युट्प्रत्ययेन निष्पन्नम् ॥

विख्रुः, } त्रि, (विगता नासिका यस्य । “ख्रु-
विख्रः, } ख्रौ च वक्तव्यौ ।” इति नासिकायाः ख्रुः ख्र च ।) अनासिकः । इति हेमचन्द्रः ॥ छिन्ननासिकः । इति शब्दरत्नावली ॥

विगणनं, क्ली, (वि+गण+ल्युट् ।) ऋणशुद्धिः । इति त्रिकाण्डशेषः ॥ (यथा, पाणिनिः । १ । ३ । ३६ ।
“संमाननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥” “विगणनं ऋणादेर्निर्यातनम् ।” इति काशिका ॥)

विगतः, त्रि, (वि+गम+क्तः ।) प्रभारहितः । तत्पर्य्यायः । निष्प्रभः २ अरोकः ३ । इत्यमरः ॥ धीतः ४ । इति रुद्रः ॥ विशेषेण गतः । इति हेमचन्द्रः ॥ (यथा, माघे । ११ । २६ ।
“विगततिमिरपङ्कं पश्यति व्योम यावत्
धुवति विरहखिन्नः पक्षती यावदेव ।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥”)

विगतश्रीकः, त्रि, श्रीरहितः । विगता श्रीर्यस्य इति बहुव्रीहौ कप्रत्ययेन निष्पन्नः ॥

विगतार्त्तवा, स्त्री, (विगतं आर्त्तवं रजो यस्याः ।) पञ्चपञ्चाशदब्देभ्य ऊर्द्ध्वं निवृत्तरजस्का । तत्पर्य्यायः । निष्कली २ निष्कला ३ निष्फली ४ निष्कला ५ विकली (इति हारावली ॥

विगमः, पुं, (वि+गम+“ ...
३ । ३ । ५८ । इति अप् ।) ...
...तर्हिबन्धो वैदान्तिनस्तु ...
प्रपञ्चो विशुद्धरूपा ...
कोपनम् । विदूषिकस्तु ...
जीवात्मनो लयो मोक्षः । ...
इमे तैरपि उपाधिविशे...
रूपतया तन्नोपाधिकः ...
भिदकोपाधिविगम एव जीव...
लयः । यथा घटाकाशः ...
आकाशे तस्य लयः । ...
वात्मनो जीवभाव इति ...
परमेश्वरमिश्रो मोक्षः । इ...
(विच्छेदः । यथा, भागवते । ...
“यथा क्रीडोपस्कराणां ...
इच्छया क्रीडितुः स्यात् ...

विगन्धकः, पुं, (विगतो गन्धो यस्मिन् इति स्वार्थे कः ।) इङ्गुदीवृक्षः । ...

विगन्धिका, स्त्री, हपुषा । ...

विगर्हणं, क्ली, (वि+गर्ह+ल्युट् ।) भर्त्सनम् । (यथा, हरिवंशे । ...
“शक्तिं च भवतो द्रष्टुं ...

विगर्हणा, स्त्री, (वि+गर्ह+... टाप् ।) निन्दनम् । ... भारते । १२ । ११४ । २१ ।
“विगर्हणां परमदुराकराः ...
सहेत यः संसदि दुर्जनात् ...

विगर्हितः, त्रि, (विशेषेण गर्हितः ।) (यथा, नैषधे । १ । १३ ।
“न केवलं प्राणिवधो वधो म...
त्वदीक्षणाद्विश्वसितान्तरा...
विगर्हितं धर्म्मधनैर्निबर्हणं
विशिष्य विश्वासजुषां...
निषिद्धः । इति विपूर्व्वगर्हधातोः ...
निष्पन्नः ।

विगलितः, त्रि, (विशेषेण गलितः ।) यथा, गीतगोविन्दे ५ सर्गे ।
“विगलितवसनं परिहृतरसनं
घटय जघनमपिधानम् ।
किशलयशयने पङ्कजनयने
निधिमिव हर्षनिधानम् ॥”

विगाढः, त्रि, (विगाह्यते स्मेति । वि+गाह+क्तः ।) स्नातः । अवगाहितः । विपूर्व्वगाहधातोः क्तप्रत्ययेन निष्पन्नः । (यथा, महाभारते । ३ । ४६ । ५ ।
“निर्गत्य चन्द्रोदयने विगाढे रजनी...
प्रस्थिता सा पृथुश्रोणी पार्थस्य भव...

विगानं, क्ली, (विरुद्धं गानं यस्य ।) ... इति हेमचन्द्रः ॥

...सारः, त्रि, (वि+गाह+णिनि ।)
...विकर्त्ता । अवगाहनकर्त्ता । विपूर्व्व-
...धातोः णिन्प्रत्ययेन निष्पन्नः ॥ (यथा,
...। १६ । १ ।
"...आत्मकः ...गुणज्ञः
...पदं विगाहेन विगाहमानः ।
...इत्यादरं धौम्य नृपः स जायी
...रामाभिधानो हरिरित्युवाच ॥")
... त्रि, (विपरीतो गुणो यस्य ।) गुण-
...विशिष्टः । यथा,—
...मनो ममाप्येवं नैवं माता यथा मम ।
...पि पुत्रेषु न माता विगुणा भवेत् ॥"
...मार्कण्डेयपुराणे वैवस्वतमन्वन्तराध्यायः ॥
...। यथा, भागवते । ७ । ८ । ४८ ।
...त्वमेव भगवो विगुणस्य भूमन्
...न्यदस्यपि मनो वचसा निरस्तम् ॥"
...हीनः । यथा, शिशुपालवधे । ८ । १२ ।
"...
...दपदोषतैव विगुणस्य गुणः ॥")
... त्रि, (विशेषेण गूढः ।) गर्हितः ।
...। इति मेदिनी । ढे, ८—१० ॥
... त्रि, (विगता नासिकास्य । "वेर्ग्रो
...।" ५ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या
...नासिकायाः ग्रः ।) गतनासिकः । इत्यमरः ॥
...,"विविधं ग्रहात्यर्थानिति विपूर्व्वात् ग्रहातेः
...न्यपि दृश्यते ।' इति ॥ ।" इति देव-
...यज्वा । मेधावी । इति निघण्टुः । ३ । १५ ॥
..., ऋग्वेदे । १ । ४ । ४ ।
...हि विग्रमप्तमिन्द्रं पृच्छाविपश्चितम् ॥")
..., पुं, (विविधं सुखदुःखादिकं गृह्णातीति ।
...+ग्रह+अच् । यद्वा, विविधैर्दुःखादिभि-
...ह्यते इति । वि+ग्रह+"ग्रहवृदृनिश्चि-
...श्च ।" ३ । ३ । ५८ । इति अप् ।) शरीरम् ।
...था, रघुः । ११ । १६ ।
"विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा ॥")
...म् । इत्यमरः ॥ (यथा, मनुः । ७ । १६० ।
...सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
...द्वैधीभावं संश्रयञ्च षड़्गुणांश्चिन्तयेत् सदा ॥"
...रोधमात्रम् । यथा, रघुः । ९ । ४७ ।
"त्यजत मानमलं बत विग्रहै-
र्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः ॥")
...भागः । इति मेदिनी । हे, २३ ॥ (यथा,
...भागवते । ३ । ३१ । ३ ।
...मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्ग-
विग्रहः ।
...नखलोमास्थिचर्म्माणि लिङ्गच्छिद्रोद्भव-
स्त्रिभिः ॥")
...वाक्यभेदः । स तु समासवाक्यम् । तत्पर्य्यायः ।
...विस्तरः २ । इत्यमरः ॥ (वीनां पक्षिणां ग्रहो
ग्रहणमिति वाक्ये विहङ्गग्रहणम् । यथा,
वक्रोक्तिपञ्चाशिकायाम् । ४ ।
"नो धन्या द्विजमत्तरा तव तनौ वत्स्याम्यहं
मन्निना
न धीताधि चरोव चेत्कथय तत् प्रश्नौमि किं
विग्रहम् ।
कार्य्यं तेन न किञ्चिदस्ति शठ मे वीनां ग्रहे-
चेति वो
दिश्याद्वः प्रतिवद्धकेलिशिवयोः श्रेयांसि
वक्रोक्तयः ॥")
देवविग्रहकरणादिप्रमाणं श्रीमूर्त्तिशब्दे द्रष्टव्यम् ॥
विग्रहः, पुं क्ली, (विगृह्णन्ति शत्रवो यस्मिन् ।
वि+ग्रह+अप् ।) युद्धम् । इत्यमरः ॥ (यथा,
मनुः । ७ । १७० ।
"यदा प्रहृष्टा मन्येत सर्व्वास्ताः प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥")
विग्रहावरं, क्ली, (विग्रहमावृणोतीति । आ+
वृ+अप् ।) पृष्ठम् । इति शब्दचन्द्रिका ॥
विघटिका, स्त्री, (विभक्ता घटिका यया ।)
पलम् । इति राजनिर्घण्टः ॥
विघट्टितं, त्रि, विशेषेण चालितम् । विपूर्व्वघट्ट-
धातोः क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, वृहत्-
संहितायाम् । ३५ । १ ।
"सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः
साभ्रे ।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः ॥"
पिष्टम् । यथा, माघे । ८ । २४ ।
"नश्यन्ती चलशफरीविघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य ॥")
विघसं, क्ली, (विशेषेण अद्यते इति । वि+अद्+
"उपसर्गेऽदः ।" ३ । ३ । ५९ । इति अप् ।
"घञपोश्च ।" २ । ४ । ३८ । इति घस्लृ-
आदेशः ।) सिक्थकम् । इति राजनिर्घण्टः ॥
विघसः, पुं, (वि+अद्+अप् ।) भोजनशेषः ।
इत्यमरः ॥ देवपित्रतिथिगुर्व्वादिभुक्तस्य शेषः ।
इति भरतः ॥ (यथा, मनुः । ३ । २८५ ।
"विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः ।
विघसो भुक्तशेषन्तु यज्ञशेषं तथामृतम् ॥")
आहारः । इति शब्दरत्नावली ॥ (यथा,—
"अयि वनप्रिय ! विस्मृत एव किं
बलिभुजो विघसो भवताधुना ।
यदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव ॥"
इत्युद्भटः ॥)
विघातः, पुं, (विशेषेण हननमिति । वि+हन+
घञ् ।) व्याघातः । यथा, अमरे ।
"दृष्टिघ्नं तद्विघातेऽवग्राहावग्रहौ समौ ॥".
व्याघातः । (यथा, महाभारते ।
"चक्रे शरविघातञ्च क्रीड़न्निव पितामहः ॥"
विनाशः । यथा महाभारते । १ । २८ । १३ ।
"क्षुत्पिपासाविघातार्थं भक्ष्यमाख्यातु मे
भवान् ॥")
विघाती, [न्] त्रि, निवारकः । घातकः । विघात-
शब्दादिन्प्रत्ययेन विपूर्व्वहनधातोर्ग्रहादित्वा-
णिनिप्रत्ययेन वा निष्पन्नः ॥ (यथा, हरि-
वंशे । ८७ । ४५ ।
"एवमूर्ज्जितवीर्य्यस्य ममामरविघातिनः ॥")
विघ्नः, पुं, (विहन्यते अनेनेति । वि+हन+
"घञर्थे कविधानम् ।" ३ । ३ । ५८ । इत्यस्य
वार्त्तिकोक्त्या कः ।) व्याघातः । तत्पर्य्यायः ।
अन्तरायः २ प्रत्यूहः ३ । इत्यमरः ॥ (यथा
मुद्राराक्षसे । २ ।
"प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमाना
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥"
कृष्णपाकफला । इति शब्दचन्द्रिका ॥ शेषार्थे
अमरे अविघ्न इति पाठः ॥
विघ्नकारी, [न्] त्रि, (विघ्नं कर्त्तुं शीलमस्येति ।
कृ+णिनिः ।) घोरदर्शनः । विघाती । इति
मेदिनी । ने, २५५ ॥
विघ्ननायकः, पुं, (विघ्नानां नायकः विघ्नाधीश्वर-
त्वात् ।) गणेशः । इति शब्दरत्नावली ॥
विघ्ननाशकः, पुं, (विघ्नानां नाशकः ।) गणेशः ।
इति शब्दरत्नावली ॥
विघ्ननाशनः, पुं, (नाशयतीति नाशनः विघ्नानां
नाशनः ।) गणेशः । इति शब्दरत्नावली ॥
विघ्नराजः, पुं, (विघ्नानां राजा । "राजाहः
सखिभ्यष्टच् ।" ५।४।९१ । इति टच् ।) गणेशः ।
इत्यमरः ॥ (यथा, कथासरित्सागरे ।२०।१०१।
"आर्य्यपुत्त्र पुरा गत्वा विघ्नराजमपूजयत् ॥")
विघ्नविनायकः, पुं, (विघ्नानां विनायकः ।) गणेशः ।
इति काशीखण्डः ॥
विघ्नहारी, [न्] पुं, (विघ्नं हर्त्तुं शीलमस्य इति ।
हृ+णिनिः ।) गणेशः । इति त्रिकाण्डशेषः ॥
विघ्ननाशके, त्रि ॥
विघ्नितः, त्रि, जातविघ्नः । विघ्नोऽस्य जात इत्यर्थे
विघ्नशब्दादितच्प्रत्ययेन निष्पन्नः ॥
विघ्नेशः, पुं, (विघ्नानां ईशः ।) गणेशः । इति शब्द-
रत्नावली ॥ (यथा कथासरित्सागरे ।२०।८३।
"विघ्नोऽत्र तव जातोऽयं विना विघ्नेशपूज-
नम् ॥")
विघ्नेशवाहनः, पुं, (विघ्नेशस्य वाहनः ।) महा-
मूषकः । इति राजनिर्घण्टः ॥
विघ्नेशानकान्ता, स्त्री, (विघ्नेशानस्य गणेशस्य
कान्ता प्रिया । तत् पूजायां एतस्याः प्राश-
स्त्यात् । श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥
विङ्कः पुं, अश्वखुरः । इति त्रिकाण्डशेषः ॥
विच, इर् लि ध औ ञ पृथक्त्वे । इति कवि-
कल्पद्रुमः ॥ (जुहो०-रुधा०-च-उभ०-
अक०-सक०-अनिट् ।) इर्, अविचत् ।
अवैक्षीत् । लि, ञ, वेवेक्ति वेविक्ते सुखान्
पण्डितः पृथक् स्यादित्यर्थः । विज इति जान्तो
यः स एव चान्तोऽपि पठ्यते कस्यचिन्मतेऽनुरोधात्

तेन निर्मा तेरैरचरित्यस्य श्ली विजयदयो- मैत्रास्य महत्वात् तेगुंषः । च च, विनक्ति विद्गते । विजितमपि दिवः सुरान् इति पृथक् करोमीत्यर्थः । स्त्री, वेला । इति दुर्गादासः ॥

विचकिलः, पुं, मल्लिकाभेदः । मदनकद्रुमः । इति मेदिनी । ले,१६४ ॥ (यथा, रातेन्द्रकर्णपूरे । ७० ।
"कुन्दः कन्दलितत्रयं विचकिलः कम्पाकुलं केतकः मालूरं मदनः सदैन्यमलसं सुक्लोऽतिमुक्तद्रुमः ।")

विचक्षणः, पुं, (विशेषेण चष्टे धर्मादिमुपदिशतीति । वि + चक्ष + "अनुदात्तेतश्च हलादेः ।" ३ । २ । १४९ । इति कर्त्तरि युच् ।) पण्डितः । इत्यमरः ॥ (यथा रघुवंशे । ५ । १९ ।
"ततो यथावद् विहिताध्वराय
तस्मै स्मयावेशविवर्ज्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी
विचक्षणः प्रस्तुतमाचचक्षे ।")
निपुणे, त्रि । इति राजनिर्घण्टः ॥ (यथा भागवते । १ । १ । ११ ।
"विचक्षणोऽस्यार्हति वेदितुं विभो
अनन्तपारस्य नियोगतः स्फुटम् ।"
मायादर्शी । यथा ऋग्वेदे । ४ । ५६ । २
"विचक्षणः प्रथयन्नापृणन्नुर्व्वजीजनत् सविता
सुम्नमुक्थ्यम् ।"
"विचक्षणः विविधं द्रष्टा ।" इति तद्भाष्ये सायणः ॥)

विचक्षणा, स्त्री, नागदन्ती । इति राजनिर्घण्टः ॥

विचक्षुः, [स्] त्रि, (विगतं प्रकाशितेऽपि वस्तुनि ग्रहणं चक्षुषेव ।) विमनाः । इति त्रिकाण्डशेषः ॥ (विगते नष्टे चक्षुषी यस्य ।) विगतचक्षुषि, त्रि ॥ (यथा, महाभारते । १२ । ६५ । १४ ।
"अन्धरा विचक्षं यान्ति यथा पथि विचक्षुषः ।"
विंशते चक्षुषी यस्य सः । दानवविशेषः कश्चिद् योद्धा । यथा, हरिवंशे । १४१ । ८ ।
"... विचक्षुररिमर्द्दनः ।")

विचयनं, क्ली, (विशेषेण चयनम् ।) मार्गणम् । इत्यमरः ॥

विचर्च्चिका, स्त्री, (विशेषेण चर्च्चयति पाकिवारस्य ... विदार्य्यते अथवा इति । चर्च्च अध्ययने + "रोगाख्यायां ण्वुल् बहुलम् ।" ३ । ३ । १०८ इति ण्वुल् । टापि अत इत्वम् ।) रोगविशेषः । खोस इति भाषा । तत्पर्य्यायः । कच्छूः २ पामा ३ पामा ४ । इत्यमरः ॥ अपि च ।
"कच्छुः कच्छूः पाम पामा पारदारी विचर्च्चिका ।"
इति शब्दरत्नावली ॥
... अथ तस्याः ... —
"... कुष्ठकण्टकम् ।
... ।
... ।"
इति गारुडे १८७ अध्यायः ॥ * ॥
अन्यच्च ।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ।
विशाला करवीरञ्च अर्कक्षीरं सकृत् पलम् ।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् ॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च ।
अभ्यङ्गेन प्रणश्यन्ति कौमल्यञ्च जायते ॥
प्रसूतान्यपि भिन्नानि तैलेनानेन रक्षयेत् ।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणाद्भवेत् ॥"
इति गारुडे १८८ अध्यायः ॥ * ॥
स्वल्पकुष्ठविशेषः । यथा ।
"एकं कुष्ठं स्मृतं पूर्व्वं गजचर्म्म ततः स्मृतम् ।
ततश्चर्म्मदलं प्रोक्तं ततश्चापि विचर्च्चिका ॥
विपादिकाभिधा सैव पामा कच्छूस्ततः परा ।
ततो दद्रुश्च विस्फोटः किटिमञ्च ततः परम् ॥
ततश्चालसकं प्रोक्तं शतारुश्च ततः परम् ।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः ॥
सकण्डूः पिडका श्यावा बहुस्रावा विचर्च्चिका ॥"
पिडका क्षुद्रपिडका ।
"दाल्यते त्वक् खरा रूक्षा पाण्योर्भृशं विचर्च्चिका ।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका ॥"
दाल्यते विदार्य्यते । केचिद्विचर्च्चिकातो विपादिकां विभिन्नमाहुः । इति भावप्रकाशः ॥ (सा च महापातकशेषभोगचिह्नं वैदिककर्म्मप्रतिबन्धिका च । यथा, शुद्धितत्त्वधृतभविष्यपुराणीयमध्यतन्त्रे महाध्याये ।
"स्वगु कुष्ठगतं विप्र उत्तरोत्तरतो गुरुम् ।
विचर्च्चिका तु दुश्चर्म्मा चर्म्मरीयस्तृतीयकः ।
विकर्णत्वकलात्र्यौ च लभ्यन्ते तथाष्टकम् ।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु ॥
भवत् सर्व्वगात्रेषु गच्छेत् भावे तथाप्यसि ।
स्नेहे च शोधयेत् तीर्थे अथवा तत्समूलके ॥"
कदाचित् अयिजन्मभूमिकस्योऽपि विचर्च्चिका उत्पद्यते । यथा बृहत्संहितायाम् । ३२ । १४ ।
"आग्नेयेऽम्बुदनाशः
सलिलाशयसम्भवो नृपतिवैरम् ।
दद्रुविचर्च्चिकाज्वर-
विसर्पिकाः पाण्डुरोगश्च ।")

विचलः, त्रि, अस्थिरः । विपूर्व्वचलधातोरल्-प्रत्ययेन निष्पन्नः ॥

विचलितः, त्रि, पतितः । चालितः । विपूर्व्वचलधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, मनुः । ७ । ८८ ।
"एतौ हि सममतू तेभ्यो दुर्द्धर्षाश्चान्तनामभिः ।
धर्म्मादविचलितं हन्ति नृपमेव सबान्धवम् ॥")

विचारः, पुं, (विशेषेण चरणं पदार्थादिनिर्णये प्रवर्त्तनम् । वि + चर + घञ् ।) तत्त्वनिर्णयः । इति शब्दरत्नावली । कान्त्यर्थे वस्तुनि प्रमा-
णेन तत्त्वपरीक्षा । ...
दर्पणपरीक्षायं विमर्शमावेदित ...
भरतः । तत्पर्य्यायः । तर्कः १
शुक्ला ४ चर्च्चा ५ । इति
संख्या ६ विचारणा ७ । इत्यमरः ।
संख्यानम् ८ । इति तट्टीका ।
वितर्कः ११ ऊहः १२ ऊहः ...
वितर्कणम् १५ । इति
ध्यानम् १६ समाधानम् १७ । ...
(यथा, कथासरित्सागरे । ३६ । ...
"न चैवं चमते नारी । ...
यदियं क्रमते राज्ञी
माध्योक्तश्चक्षुर्विशेषः ।
दर्पणे । ६ । ४४७ ।
"विचारो ..."

विचारणं, क्ली, (वि + चर + ...
विचारः । इति शब्दरत्नावली ।
भागवते । १२ । १३ । १९ ।
"तत्र ज्ञानविरागभक्तिसहितं ...
[illegible]
तत्तूर्णन् सुपठन् ...
[illegible]
"एकस्मिन् धर्म्मिणि ...
विचारणम् । स च संशयश्च
विशेषादर्शने समानधर्म्मदर्शना ...
रज्जुर्भु । द्वितीयो ...
शब्दो नित्योऽनित्यो वा । ...
धर्म्मजः यथा भू ...
ऽसाधारणधर्म्मः ...
करणं नित्यं अनित्यं वेति ...
"विचारणे पूर्व्वस्य ।" इति
तत्त्वपरिशिष्टे बोधायनकात्यायन ...

विचारणा, स्त्री, (वि + चर ...
टाप् ।) विचारः । इत्यमरः ।
भागवते । ३ । १८ । ४२ ।
"जीवो ब्रह्म ...
[illegible]
भेदबुद्धिस्तु संसारे वर्त्तमाना ...
मीमांसाशास्त्रम् । इति हेमचन्द्रः ।

विचारणीयं, त्रि, विचार्य्यम् । विपूर्व्व-चरधातोरनीयप्रत्ययेन निष्पन्नम् ॥
इति हेमचन्द्रः ।

विचारितः, त्रि, (विचार ...
विचार + "तदस्य संजातं ...
५ । २ । ३६ । इति इतच् ।)
तत्पर्य्यायः । विमृष्टः २ ...
(यथा, मनौ । ११ । ८८ ।
"आपत्कल्पेन यो धर्म्मं कुरुतेऽनापदि ...
स नाप्नोति फलं तस्य परत्रेति ...

विचार्य्यं, त्रि, विचारणीयम् । ...
विपूर्व्वचरधातोर्ण्यत्प्रत्ययेन ...
(यथा, मार्कण्डेये । ८ । १४ ।

ता दुष्टहृदयामादाय विजने वने ।
ाशु गैतन्ति विचार्य्यं वचनं मम ॥”)
त्रि, अभ्यन्तरम् । अन्तरालम् । इति
ः ॥ (पुं, संख्यान्तरापादनम् । यथा,
। । ५ । ३ । ४३ । “अधिकरणे विचाले

स्त्री, (विवेक्ति जलानि पृथगिव करोति ।
“इगुपधात् कित् ।” उणा० ४ । ११६ ।
। च कित् ।) वीची । तरङ्गः । इत्यमर-
ां भरतः ॥
ा, स्त्री, (विचिकित्सनमिति । वि+
सन्+अः । टाप् ।) सन्देहः । इत्य-
(यथा, भागवते । ३ । ६ । ३६ ।
ादिविचिकित्सायामात्मा मे दर्शितोऽवहिः ।
सलिले मूलं पुष्करस्य विचिन्वतः ॥”)
स्त्री, (विशेषेण चित्रम् ।) कर्व्वुरवर्णः ।
शब्दरत्नावली ॥ तद्वति, त्रि । (यथा,
ारते । ३ । ५४ । १० ।
त्रमाल्याभरणैर्व्वलैर्ह्यैः स्वलङ्कृतैः ॥”)
र्य्यम् । यथा,—
त्रमिदमाख्यातं भगवन् भवता मम ।
ारितमाहात्म्यं रक्तबीजवधाश्रितम् ॥”
इति देवीमाहात्म्यम् ॥
। च, उपदेशशतके । ३३ ।
ता विदेहभर्त्तुर्दाशरथेर्भामिनी सीता ।
ाप राक्षसीनां विधेर्व्विचित्रा गति-
र्व्वोध्या ॥”
आश्चर्ययुक्तः । यथा, मार्कण्डेये । ८४ । ३१ ।
ासेनो विचित्रश्च नयतिर्निर्भयो दृढः ।
: चक्रवृहिश्च सुव्रतश्चैव तत्सुताः ॥”
लङ्कारविशेषः । यथा, साहित्यदर्पणे ।
७२२ ।
यत्नं तद्विपरीतस्य कृतिरिष्टफलाय चेत् ।
,—
ुन्नतिहेतोर्नमति जीवनहेतोर्व्विसृजति प्राणान् ।
ाखमि सुखहेतोः को मूढ़ः सेवकादन्यः ॥”)
ः, पुं, (विविधानि चित्राणि यस्मिन् ।
ादौ कन् ।) भूर्ज्जवृक्षः । इति राज-
ण्टः ॥
देहः, पुं, (विचित्रा देहा यस्य सः ।)
। इति शब्दचन्द्रिका ॥ आश्चर्य्यशरीरे
ाश्चर्यदेहे च, त्रि ॥
वीर्य्यः, पुं, (विचित्राणि वीर्य्याणि यस्य
) चन्द्रवंशीयराजविशेषः । स च शान्तनो-
कन्यायां जातः । तस्य क्षेत्रे सत्यवत्या-
। व्यासो धृतराष्ट्रं पाण्डुञ्च जनयामास ।
श्रीभागवतम्मतम् ॥
वीर्य्यसूः, स्त्री, (विचित्रवीर्य्यस्य सूः प्रस-
वी ।) सत्यवती । इति शब्दरत्नावली ॥
ा, स्त्री, (विचित्रं नानाविधवर्णमस्त्यस्या
। । अर्श आदित्वादच् । स्त्रियां टाप् ।)
ाम्बिका । इति राजनिर्घण्टः ॥

विचित्राङ्गः, त्रि, (विचित्राणि अङ्गानि यस्य ।) मयूरः । इति शब्दरत्नावली ॥ व्याघ्रः । इति शब्दचन्द्रिका ॥ आश्चर्य्यशरीरे, त्रि ॥

विचित्रितः, त्रि, (विचित्रमस्य जातमिति । विचित्र+इतच् ।) नानावर्णयुक्तः । यथा,—
“आसनं सर्व्वशोभाढ्यं सद्रत्नमणिनिर्म्मितम् ।
विचित्रितञ्च चित्रेण गृह्यतां शोभनं हरे ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

विची, स्त्री, (विचि+कृदिकारादिति ङीष् ।) तरङ्गः । इति द्विरूपकोषः ॥

विचेताः, [स्] त्रि, (विगतं विरुद्धं वा चेतो यस्य ।) विगतचित्तः । (यथा, भागवते । ६ । ११ । ६ ।
“एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
अनदत् सुमहाप्राणो येन लोका विचेतसः ॥”)
विरुद्धचित्तः । दुष्टचित्तः ॥ तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ विमनाः ४ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । ४८ । १७ ।
“ये चास्य सचिवा मन्दाः कर्णसौवलका-
दयः ।
ते तस्य भूयसो दोषान् वर्द्धयन्ति विचेतनः ॥” * ॥
विशिष्टं चेतो यस्मादिति । विशिष्टज्ञानहेतु-
भूतः । यथा, ऋग्वेदे । १ । ८३ । १ ।
“तमित् पृणक्षि वसुना भवीयसा
सिन्धुमापो यथाभितो विचेतसः ॥”
“विचेतसः विशिष्टज्ञानहेतुभूता आपो यथा अभितः सर्व्वासु दिक्षु सिन्धुं समुद्रं पूरयन्ति तद्वत् ।” इति तद्भाष्ये सायणः ॥ * ॥ विशिष्टं चेतो यस्येति । विशिष्टज्ञानः । यथा, ऋग्वेदे । १ । ४५ । २ ।
“श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ॥”
“हे अग्ने विचेतसो विशिष्टप्रज्ञाना देवाः ।”
इति तद्भाष्ये सायणः ॥)

...ऽत्रापि संस्पृष्टः प्राप्तकालो न जीवति।")
...पुं, (विहः कर्ण इव पत्रमस्य।) विह-
...। इति भरतद्विरूपकोषः। (विह्नौ कर्णौ
...। इतकर्णभेदे, त्रि।)
..., स्त्री, विहकर्णी। इति भरतद्विरूप-
...।
...का, स्त्री, (विहकर्णी। स्वार्थे कन्।)
...र्णी। इति शब्दरत्नावली।
..., स्त्री, (विहः कर्ण इव पत्रमस्याः।)
...पर्यायः। अकनादि इति भाषा। तत्-
...। पाठा २ अम्बष्ठा ३ स्थापनी ४
...ी ५ रसा ६ एकाष्ठीला ७ पापचेली ८
...ला ९ वनतिक्तिका १०। इत्यमरः।
...कर्णी ११ अविद्धकर्णा १२। इति
...। अविद्धकर्णिका १३ विद्ध-
...का १४। इति शब्दरत्नावली। अन्यत्
...पाठाशब्दे ज्ञातव्यम्।
...नः, त्रि, (विद्+शानच्।) वर्त्तमानः।
...। सच्छब्दटीकायां भरतः। (यथा, वेदान्ते।
...र्यां विद्यमानायामाचार्यां जीवितस्य
च।")
...स्त्री, (विद्यतेऽसौ इति। विद्+"संज्ञायां
समजनिषदनिपतेति।" ३।३।९९। इति
...।) दुर्गा। इति शब्दरत्नावली। गन्धि-
...रिका। इति शब्दचन्द्रिका। ज्ञानम्। तत्तु
...धीः। इति जटाधरः। परमोत्तमपुरु-
...र्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा। इति
...गोजीभट्टः। मन्त्रः। यथा, शारदायाम्।
...ता दिवस्तनयनं श्वेतो मर्दिनि टद्वयम्।
...दाक्षरी समाख्याता विद्या महिषमर्दिनी।"
...भ्यारे।
...प्रकाराद्या जपेद्विद्यां मायाद्यां वा जपेत्
सुधीः।"
...महिषमर्दिनीमन्त्रः।
...दशाक्षरी समाख्याता विद्या त्रिभुवनेश्वरी।
...तथा माया भवेद्विद्या पुनर्दश।
...र्णं प्रणवमित्युक्तं भवेद्विद्या पुनर्दश।"
...मन्त्रः।
...नाद्या यदा विद्या वागीशत्वप्रदायिनी।
...माद्या च यदा विद्या सर्व्वकामप्रदायिनी।
...परमायादिका विद्या भोगमोक्षैकदायिनी।
...दीजाद्या भवेद्विद्या सद्गीर्लेखाङ्करूपगा।"
...नपूर्णमन्त्रः। इति तन्त्रसारः। ०। मन्त्र-
...दा। कर्त्ता सदा नानामन्त्रोपासनामयी पूजा
...सर्व्वत्र भविता। अधुना सा चारोप्यचारीपूजा
...इति ख्याता। यथा,—
...कस्मिन् काले सुरेशानि प्रकाशो जायते सति।
...तमोधर्म्मेण सर्व्वत्र देवतार्चनम् सदा।
...माघ चतुर्दश्यां नवम्यां शनिभौमयोः।

संक्रान्त्यां पक्षयोश्चापि पक्षयोरुभयोरपि।
छला तु पूजयिष्यन्ति महाविद्यां सभैरवाम्।
विद्याश्च विविधा देवि तथाप्यतिमां शुभाम्।
एवं हि तामसीं पूजामनिशाश्च भवेत् कलौ।"
इति मायातन्त्रे १७ पटलः।
शास्त्रम्। तत्तु अष्टादशविधम्। यथा। शिक्षा
१ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योति-
षम् ५ छन्दः ६ ऋग्वेदः ७ यजुर्वेदः ८ साम-
वेदः ९ अथर्ववेदः १० मीमांसा ११ न्यायः १२
धर्म्मशास्त्रम् १३ पुराणम् १४ आयुर्वेदः १५
धनुर्वेदः १६ गान्धर्व्ववेदः १७ अर्थशास्त्रम् १८।
यथा, विष्णुपुराणम्।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश।
आयुर्वेदो धनुर्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः।"
इति प्रायश्चित्ततत्त्वम्।*।
नीचादप्युत्तमा विद्या ग्राह्या यथा,—
"श्रद्दधानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपि।"
इति मानवे २ अध्यायः।*।
विद्याप्रशंसा यथा,—
"ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था अधना अदाराः।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति।
भोजने भोजनं चित्तं न कुर्य्याच्छास्त्रसेवकः।
सुदूरमपि विद्यार्थी व्रजेत् गरुडवेगवान्।
ये बालभावान्न पठन्ति विद्यां
कामातुरा यौवननष्टवित्ताः।
ते वृद्धकाले परिभूयमानाः
सन्दह्यमानाः शिशिरे यथाब्जम्।
माता शत्रुः पिता वैरी बालो येन न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा।
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या साधुजनप्रिया शुचिकरी विद्या गुरूणां
गुरुः।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं दैवतं
विद्या भोगयशःकुलोन्नतिकरी विद्याविहीनः
पशुः।
गृहे चाभ्यन्तरे द्रव्यं लग्नं चैव तु दृश्यते।
अशेषं हरणीयञ्च विद्या न ह्रियते परैः।"
इति गारुडे ११०।११५ अध्यायौ।
अथ विद्यादानफलम्।
"यस्तु देवा इह नित्यं विद्यादानं प्रवर्त्तयेत्।
स भवेत् सर्व्वलोकानां पूज्यः पूजापरं व्रजेत्।
विद्यादानं प्रवक्ष्यामि येन तुष्यन्ति मानवाः।
लिख्यते दीयते येन विधिना तं शृणुष्व मे।
विहासमीपशास्त्राणि वेदान् धर्म्मादिसाध-
नात्।
तदन्यान्यितिहासादि देवा धर्म्मादिसाधके।
गारुडं ... भूतस्मत्यादि ...।

शास्त्राणि पठनाद्दानात् मानवः फलदा
तृप्ताम्।
ज्योतिषं वेदशास्त्राणि कलाकार्य्यं समाप्नुतः।
दानादारोग्यमाप्नोति गन्धर्व्वं लभते पदम्।
विद्याभ्यो वर्त्तते लोको धर्म्माधर्म्मश्च दृश्यते।
तस्माद्विद्या सदा देया दृष्टादृष्टफलार्थिभिः।
महीदानञ्च गोदानं हैमवस्त्रतिला अन्नम्।
धान्यदीपान्नदानञ्च महादानानि दानतः।
इहात्र क्षीयते दानं दीयमानं नराधिप।
विद्या वृद्धिमवाप्नोति दीयमानापि नित्यशः।
एकधारेण भूदानं दत्तं भवति भूमिप।
नहि तद्विद्यते भूप देहपातादनन्तरम्।
विद्यादानं न तद्वत्स्यात् एकधा द्विधा भवेत्।
शतधा कोटिधा गच्छेद्विद्याम्नत्र च पारगः।
राजा तस्करदायाद्यैर्जलवह्निपरीक्षणैः।
सर्व्वदानानि क्षीयन्ते विद्या केनापि क्षीयते।
विद्यादानात् परं दानं न भूतं न भविष्यति।
विद्यादानेन दानानि नहि तुल्यानि बुद्धिमन्।
विद्या एव परं मन्ये यस्तत् पदमनामयम्।
ज्ञानमुत्पद्यते भक्तिर्भक्त्या गुरुमुपासते।
स च विद्यागमात् यस्मि विद्या पुस्ताश्रिता
नृप।
विद्याविवेकबोधेन शुभाशुभविचारिणाम्।
विद्यते सर्व्वकामासिस्तस्माद्विद्या परा मता।
विद्यादानात् परं दानं न भूतं न भविष्यति।
येन दत्तेन चाप्नोति शिवं परमकारणम्।
विद्याविचारतत्त्वज्ञा राज्ञः सर्व्वार्थगामिनः।
सञ्चितेऽपि हि भोगानि गच्छन्ति परमां
गतिम्।
अन्यथा अपि यां प्राप्य क्रीडन्ति मदरायमैः।
सा विद्या येन नीयेत यस्याः कोऽन्यः समो-
ऽपि न।
त्वरेव कुञ्जरं हन्ति सर्व्वैव तुरङ्गमम्।
मत्तिकायद्माश्चस्य विषस्य विषमा गतिः।
एवंविधं विधिं यत्र विद्याद्भुतप्रभावतः।
जीर्य्यते भक्षितं पुंभिस्तस्माद्विद्या परात्परा।
नहि विद्या कुलं जातिरूपं पौरुषमाश्रिताम्।
वदते सर्व्वलोकानां पठिता उपकारिका।
भूतैर्व्वं हीना विध्वस्ता दरा वा मदयन्तिः।
विद्या उत्थापयेत् यस्तु अन्यजन्मापि पुन-
श्चिता।
सर्व्वदानेव वृद्धानां विद्यावृद्धि हि मान्यता।
यतोवृद्धो हि मूर्खाणां विद्यानां धनवान् जनः।
धनिनाम् कीर्त्तिश्च विद्यानां प्राज्ञपालकः।
वित्तं यत्नवंदेव नरो विद्या यथोत्तरम्।
पूर्व्वोपाधि सर्व्वेषां विद्या देवा प्रतिष्ठिता।
गुरुपूरुषा विद्या पुस्तकेन धनेन वा।
विद्या लभ्यते विद्या चतुर्थी नोपलभ्यते।
यः कृपाणम् नरो दद्यात् वेदशास्त्र काल-
नम्।
स ... सर्व्वोनर्हैः ...।
... विद्यादानं हि ...।

संक्षेपात्र च विद्यादानस्य दानफलं ब्रवीमि ।
मीनादौ पवने सर्वे समे पत्रसुमञ्चिते ।
विचित्रर्क्ष विपार्श्वे च चर्म्मणा स्वटीलते ।
रक्तेन चाप शस्त्रेण मुद्राभावहितेन च ।
हृदुक्तसुवर्ण्णेन एवंविधशतैन च ।
यस्तु ग्रादशघाधर्मी संहितासुपवेसभेत् ।
ददाति चाभियुक्ताय स याति परमां गतिम् ।
पूर्व्वोत्तरप्लवे देशे सर्व्वबाधाविवर्ज्जिते ।
गोमयेन शुभेनैव कुर्य्यात्मण्डलकं बुधः ।
चतुर्हस्तप्रमाणेन शुभञ्च चतुरस्रकम् ।
तस्य मध्ये लिखेत् पद्मं धितरक्तरजादिभिः ।
सर्व्वसुंक्रमपैः पुष्पैर्भूषयेत् सर्व्वतो दिशम् ।
वितानं दापयेदूर्द्ध्वं शुभचित्रविचित्रितम् ।
पार्श्वतः किङ्किणीस्तु सम्यक् शोभां प्रकल्पयेत् ।
कदकेरङ्गपत्रैश्च दर्पणैश्चामरैस्तथा ।
वस्त्रादिभिर्विशस्त्रैश्च सर्व्वत्र उपकल्पयेत् ।
तस्य मध्ये न्यसेद्रूपकं नागदन्तमयं शुभम् ।
अधः कल्पितदण्डं पार्श्वतो हरिदन्तिभिः ।
कीलितं दृढबन्धेन सह दृष्टेन बुद्धिमान् ।
तन्मध्ये विन्यसेदेवाः पुस्तकं लिखितं शुभम् ।
[illegible] तथैव पूजयेद्विधिना ततः ।
[illegible] कृमिकीटविवर्जितैः ।
[illegible] तस्य भक्ष्याणि चाथ धूपयेत् ।
[illegible] गुग्गुलमिश्रितम् ।
[illegible] नैवेद्यं विविधं पुनः ।
[illegible] चोष्यचापि निवेदयेत् ।
[illegible] यथाक्रमम् ।
[illegible] तु संपूज्य मानवः [illegible] ताः ।
[illegible] विद्यानां वरिष्ठा यथा ।
[illegible] पूजयेत् ।
[illegible] सर्व्वमाशतम् ।
[illegible] मधुरस्वरम् ।
[illegible] पुस्तकेशकम् ।
[illegible]
[illegible]
[illegible] कारयेत् ।
[illegible] प्रकल्पयेत् ।
[illegible]
[illegible] विवर्ज्जयेत् ।
[illegible] दिने दिने ।
[illegible] च सुभवावरे ।
[illegible] प्रकल्पयेत् ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] प्रद ।
[illegible] कल्पयेत् ।

तथा तपस्विनः पूज्याः सर्व्वशास्त्रार्थपारगाः ।
शिवव्रतधरा शुद्धा विष्णुधर्म्मपरायणाः ।
महता जनसंघेन रथस्थं वाद्यवाहनैः ।
प्रधानेष्वपि तत्रेयं यस्य देवस्य चांशजम् ।
शामान्यं शिवतीर्थेषु मातरो भवनेषु च ।
तस्मिन् पूजां तथा कृत्वा देवदेवेन पूजिता ।
संस्पर्शयेत् प्रयत्नेन मातरः प्रीयतां मम ।
सदाध्ययनयुक्ताय विद्यादानरताय च ।
विद्यासंग्रहयुक्ताय सर्व्वशास्त्रलताश्रमे ।
तेनैव वर्त्तते यस्तु तस्य तं विनिवेदयेत् ।
जगद्धिताय वै शान्तिं सन्ध्यायां वाचयेत्तथा ।
तेन तोयेन दातारं मूर्द्ध्नि समभिषिञ्चयेत् ।
परमेतु ततः शब्दसुघार्थं जगतस्तथा ।
एवं कृते महाशान्तिर्देशस्य नगरस्य च ।
अनेन विधिना यस्तु सर्व्वबाधाः शमन्ति च ।
अनेन विधिना यस्तु विद्यादानं प्रयच्छति ।
स भवेत् सर्व्वलोकानां दर्शनादघनाशनः ।
ततोऽपि गच्छते स्थानं यत्र विष्णुरनव्ययम् ।
यत्र पूर्व्वापरान् वंशानात्मनः सर्व्व एव च ।
उद्धृत्य पापकलिलाद्विष्णुलोके महीयते ।
यावत् तत्पत्रसंख्यानमक्षराणि विधीयते ।
तावत् स विष्णुलोकेषु क्रीडते विविधैः सुखैः ।
तदा चितिं समायातो देवाः भक्तिरतो भवेत् ।
समस्तभोगसम्पन्नो विद्वान् संजायते कुले ।
विद्यादानप्रभावेन योगशास्त्रं ददेद्यदि ।
आत्मवित्तानुरूपेण यः प्रयच्छति मानवः ।
यथाख्यात् फलमाप्नोति सत्यं सत्यं न संशयः ।
स्त्रिया यानेन विधिना विद्यादानफलं लभेत्
भर्त्तुश्चाशुभया दत्तं विधवा वा तदाहृदम् ॥ ७ ॥
विद्यार्थिन सदा देयं वस्त्रमभ्यञ्जभोजनम् ।
हविष्या उदकं दीपं यथाशक्त्या विना नहि ।
शिरसीवटकं तीक्ष्णमनिमक्षत्र विरस्तोमू ।
दत्त्वा तु लभते यत्र विद्यादानमनुत्तमम् ।
पुस्तकाधारकं दत्त्वा तन्मयार्थं सुशोभनम् ।
विद्यादानमवाप्नोति तमवश्यं बुद्धिमान् ।
यत्रवासमान्यमुच्चै दत्तमनमथापि वा ।
विद्याधारप्रशीलाय दत्तं भवति चाक्षयम् ।
अक्षयं वेदपाठानां दत्तं विद्यापरायणे ।
भूमिं यच्छन् दीनम् सर्व्वराज्यफलप्रदाम् ।
यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्त्तते ।
तस्यापि भवने स्वर्गे तन्मात्रामरोधिप ।
तस्मात् सर्व्वप्रयत्नेन विद्या देया सदा नरैः ।
इह कीर्त्तिमवाप्नोति स्वर्गे याति परां गतिम् ।”
इति देवीपुराणे विद्यादानमहामाहात्म्यकथा-
ध्यायः । ७ । अपि च ।
“[illegible] तथैव [illegible] ।
[illegible] विद्यादानं विशिष्यते ।
[illegible] सर्व्वेषां दानम [illegible] ।
[illegible] विद्यादानम् [illegible] ।
[illegible] ।
[illegible] विद्यादानेन [illegible] ।
[illegible] ।

विप्राय वेदविदुषे
यत्फलं लभते विप्रो
कपिलानां
तत् फलं समवाप्नोति पुस्तक
यावच्च पातकं तेन
तत् सर्व्वं नाशयत्याशु
धर्म्मोपदेशं यः कुर्य्यात् शास्त्र
स्तस्य
विद्यादानात् परं दानं
येन दत्तेन
विद्या च श्रूयते
तस्माद्विद्या सदा देया
आत्मविद्याप्रदातारो ये
न पुनस्तेऽपि निरयं प्रविशन्ति
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्र
पुराणस्य च यो दद्यात् स
शास्त्रदृष्ट्या जगत्
तस्मात् शास्त्रं
वेदविद्याश्च यो दद्यात् स्वर्ग
आत्मविद्याश्च यो दद्यात् तस्य

चौरि
शास्त्रं कामदुघा धेनुः दधिरो
यत्किञ्चित् कार्त्तिके दत्तं विष्णु
तदक्षयञ्च लभते अमरादिके
इह लोके बहून् भोगान् भुक्त्वा

इति शास्त्रोक्तदानम् ॥
अथ विद्यारम्भविधिः ।
विष्णुधर्म्मोत्तरे ।
“संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने
षष्ठीं प्रतिपदञ्चैव वर्ज्जयित्वा
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिने
एवं सुनिश्चिते काले विद्यारम्भं
पूजयित्वा हरिं लक्ष्मीं देवीं
स्वविद्यासूत्रकारांश्च
नमसी बहुरूपाय विष्णवे परमात्मने
स्वाहेत्यनेन हरिं तिः पूजयेत्
भद्रकाली नमो नित्यं सरस्वत्यै
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य
स्वाहेति प्रणवपूर्व्वकेण च तिः
लिखनविधिमाह नन्दिपुराणम् ।
“शुभे नक्षत्रदिवसे शुभे वारे तिथौ
वीक्षयेत् पूज्य देवेशान्
पूर्व्वदिग्वदनो भूत्वा
निरोधी [illegible]
मत्स्यपुराणञ्च ।
“प्रीतिविनात् सुसंपूर्णात्
[illegible] देवान्

[illegible] ः ।
[illegible] र्त्तते च सीदति ।"
[illegible] ज्वलित [illegible] । शौनि-
[illegible] ।
[illegible]
[illegible] पुत्राश्चैव दारे ।
[illegible] नौकेषु [illegible]
[illegible] त्यत् सदैव ।"
[illegible] ।
[illegible] गुरुः [illegible] अनुशासयेत् ।
[illegible] ज्वलिता [illegible] ः ।
[illegible]
[illegible] करोतु [illegible] ।
[illegible] भवति [illegible] भविष्यति
[illegible] च गुरवः [illegible] ः ।
[illegible] ः ।
[illegible] विद्यारम्भः प्रशस्यते ।"॥
[illegible] ः ।
[illegible] गुरुः [illegible] मिदम् ।
[illegible] प्रथमं द्विजातिभिः प्रपूजितम् ।"
[illegible] पुराणम् ।
[illegible] गुरौ [illegible]
मानवाः ।"
[illegible] ।
[illegible] ः शिष्यमहत्तमाः ।
[illegible] धारयेत् स गुरुः स्मृतः ।"
[illegible] ः । ॥ । नन्दिपुराणम् ।
[illegible] कुर्यात् यतिविरामकम् ।"
[illegible] नहि [illegible] ॥ ॥ ।
[illegible] कुर्य्यादेव विचक्षणः ।
[illegible] भूयादस्तु [illegible] मिथ्या ।
[illegible] धर्म्मे राजा चास्तु सदा जयी ।
[illegible] गुरुश्चास्तु निरामयः ।॥।
[illegible] यथायामं गन्तव्यं विभाविते ।
[illegible] परतरं शास्त्रं चिन्तनीयं विचक्षणैः ।
[illegible] नानाव्याख्यानसम्भवैः ।
[illegible] द्याख्या चिन्तयेदपि स्वयं शतैः ।
[illegible] दिने व्याख्या श्लाघ्यामियतो नरः ।"
[illegible] पुराणम् ।
[illegible] ये च ते पतन्ति श्वभोजने ।"
[illegible] उवाच ।
"[illegible] हीनस्य नरस्य विद्या
[illegible] यथा कापुरुषस्य हस्ते ।
[illegible] न तुष्टिमुत्पादयते शरीरे
[illegible] दारा इव दर्शनीयाः ।"॥
[illegible] पुराणम् ।
[illegible] पूजयेन्नित्यं तस्य विद्या प्रसीदति ।
[illegible] यस्मात् स प्राप्नुते सर्व्वसम्पदः ।"
[illegible] ः ।
[illegible] गर्ज्जिते मेघे शास्त्रचिन्तां करोति
यः ।
[illegible] तस्य नश्यन्ति चायुर्विद्या यशो बलम् ।"

[illegible] शास्त्रमारुतं तथा च श्रुतिः ।
योऽधीतमिदिंयो विद्यां न प्रपश्येत् स [illegible]
स्यात् [illegible] इति । ॥ ।
[illegible] विशिष्यापेक्षि-
च [illegible] धीमद्भिर्निमन्त्र्यते ॥ ॥ ।
तथा च विष्णुपुराणम् ।
"[illegible] यत्नेन परस्य च ।
[illegible] तथैव मतिमान् भवेत् ।"
[illegible] ।
"[illegible] मन्दिरमस्तान्निगात् ।
[illegible] यः कुरुते [illegible] कथा ।
[illegible] लभते [illegible] सः ।
[illegible] तु समये [illegible] ः ।
[illegible] पुरा ।
उपदेशात् [illegible] च [illegible] गुरुतमौ स्मृतौ ।"
[illegible] । [illegible] गुरुः
[illegible] गुरुत्वम् । यथा,
महाभारते ।
"[illegible] प्राप्य [illegible] मदीमदम् ।
[illegible] सदा ।
[illegible] योगमासाद्य परं निश्चयमागतः ।"॥
[illegible] ।
"न वेदमनधीत्यान्यां विद्यामधीयीताप्यत्र वेदाङ्ग-
स्मृतिभ्यः ।" ॥ । अङ्गानि च ।
"शिक्षा कल्पो व्याकरणं छन्दो ज्योतिषमेव च ।
निरुक्तञ्चेति चाङ्गानि वेदानां गदितानि षट् ।"
स्मृतिस्तु धर्म्मसंहितेत्यमरः ॥ ॥ । शिष्यस्य
गुरुत्व [illegible] लघुहारीतः ।
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा सोऽनृणी भवेत् ।"
नन्दिपुराणम् ।
"यच्च गुरुत्वतः शास्त्रं संस्कारं प्राप्य वै दृढम् ।
अन्यस्य जनयेत् कीर्त्तिं गुरोः स [illegible] भवेत् ॥
विसरेच्च तथा मौढ्याद्योऽपि शास्त्रमनुत्तमम् ।
स याति नरकं घोरमक्षयं भीमदर्शनम् ।"॥
अतएव ब्रह्मचारीणामपि पुनरध्ययनमाह
आपस्तम्बः । यया विद्यया न विरोचेत पुनरा-
चार्य्यमुपेत्य साधयेदिति ॥ ॥ । विष्णुः । यच्च
विद्यामासाद्य तया जीवेत् न च सा तस्य पर-
लोकफलप्रदा भवति यच्च विद्यया परेषां यशो
हन्तीति । ॥ । देवलः ।
"दत्तं हुतमधीतं यद्विनश्यत्यनुकीर्त्तनात् ।
श्लाघानुशोचनाभ्याञ्च भग्नतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ।"
अनुकीर्त्तनं कथनम् । श्लाघा प्रशंसा । अनु-
शोचनं धनव्ययेन पश्चात्तापः । भग्नतेजः फल-
जनकशक्तिहीनम् । वृथा रक्षादिप्रयोजनं
विना ॥ ॥ । वेतनग्राही भविष्यपुराणम् ।
"उपाध्यायस्य यो वृत्तिं दत्त्वाध्यापयति
द्विजान् ।
किम्न दत्तं भवेत्तेन धर्म्मकामार्थमिच्छता ।"
इति ज्योतिस्तत्त्वम् ॥

विद्याधरः, } (विद्यया विरः । विद्या+"तिर-
विद्यागुरुः, } श्चिदुपुरुषस्यां ।" ५ । २ । ७६ ।
इति चणप् चुञ्चुप् च ।) विद्यया ख्यातः । इति
व्याकरणम् ॥
विद्यादलः, पुं, भूर्ज्जवृक्षः । इति शब्दमाला ॥
विद्यादाता, [ऋ] त्रि, (विद्यां ददातीति । दा+
तृच् ।) विद्यादानकर्त्ता । यथा,—
"अन्नदाता भयत्राता पत्नीतातस्तथैव च ।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
अपि च ।
"न च विद्यासमो बन्धुर्नास्ति कश्चित् गुरोः
परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ।"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
विद्यादानं, क्ली, (विद्याया दानम् ।) अध्यापनम् ।
पुस्तकदानम् । यथा,—
वशिष्ठ उवाच ।
"विद्यादानं प्रवक्ष्यामि याथातथ्यात्तवाधुना ।
तथा देयं फलं यच्च तच्छृणुष्व नृपोत्तम ! ॥
पुण्येऽह्नि शुभनक्षत्रे मण्डपं शुभवेदिकम् ।
चतुरस्रं वितानं वा कृत्वा तत्रोपवेशयेत् ॥
गोमयेनोपलिप्ते तु पुष्पप्राकरशोभिते ।
तत्र न्यस्यासनं दिव्यं दिव्यगन्धादिवासितम् ॥
संस्थाप्य पुस्तकं तत्र धर्म्मशास्त्रस्य धीमता ।
ब्राह्मणान् वेदसंपूर्णान् छन्दोलक्षणपारगान् ॥
वेतयित्वा तु यत्नेन तत्समग्रं शुभाक्षरैः ।
चन्द्रसूर्य्योपरागे वा संक्रान्त्ययनवासरे ॥
पुण्येऽह्नि तत् समभ्यर्च्य वस्त्रालङ्कारभूषणैः ।
एतधेन्वा युतं दद्यात् गुणवते ततः ॥
शास्त्रसद्भावविदुषे वाचकेऽतिप्रियंवदे ।
तच्छास्त्रं प्रयतो नित्यं जनानां नाशयन्नपि ।
दातुस्तस्माद्भवत्येवं फलं तच्छृणु भूपते ॥
यत् पुण्यं सर्व्वतीर्थानां विधिवद्यजतां तथा ।
तत् पुण्यं समवाप्नोति विधिवच्छास्त्रदः पुमान् ॥
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तद्दानात् सकलं लेभे धर्म्मशास्त्रप्रदायकः ॥
पुराणं भारतं वापि रामायणमथापि वा ।
दत्त्वा यत् फलमाप्नोति न तत् सर्व्वैर्महामखैः ॥
देवानामालये नित्यं धर्म्मशास्त्राणि यः पुमान् ।
अध्यापयति धर्म्मात्मा तस्य दानफलं शृणु ॥
धनभूमिहिरण्यानां दानेन यदवाप्यते ।
फलं तत् सकलं राजन् नित्यं कारापकस्य च ॥
योऽधीते धर्म्मशास्त्राणि देवानां पुरतोऽनिशम् ।
द्विजो वीप्सरथार्थानामेवमेवार्हति ध्रुवम् ॥
प्रातरुत्थाय यो वेदं वेदाङ्गं शास्त्रमेव वा ।
पृथिवीदानतुल्यं स्यात् फलं तस्य नृपोत्तम ॥
दानैर्योऽपि विभर्त्त्यतानर्थिप्रहर्षमतत्परः ।
द्विगुणं पृथिवीदानात् फलं तस्य भवेन्नृप ! ॥
यो भक्तं पठमानानां करोत्यनदिनं नृप ।
स यज्ञफलमाप्नोति दानाच्च
विवेकी जीवितं दीर्घं धर्म्म

[illegible]

इत्यमरः । इति मेदिनी । मे, ११ । (यथा, रघुः । १३ । १३ ।
"तवाधरस्पर्द्धिषु विद्रुमेषु
पर्यस्तमेतत् सहसोर्म्मिवेगात् ।
ऊर्द्ध्वाङ्कुरप्रोतमुखं कथञ्चित्
क्लेशादपक्रामति शङ्खयूथम् ॥")

विद्रुमलता, स्त्री, (विद्रुम इव लता ।) नलीनाम-गन्धद्रव्यम् । इत्यमरः ॥

विद्रुमलतिका, स्त्री, (विद्रुमलता । स्वार्थे कन् । टापि अत इत्वम् ।) नलिका । इति राजनिर्घण्टः ॥

विद्वत्कल्पः, त्रि, (विद्वस् + कल्पः ।) ईषदूनो विद्वान् । इति मुग्धबोधव्याकरणम् ॥

विद्वत्तमः, त्रि, (विद्वस् + तमप् ।) अयमेषामतिशयेन विद्वान् । इति व्याकरणम् ॥

विद्वत्तरः, त्रि, (विद्वस् + तरप् ।) अयमनयोरतिशयेन विद्वान् । इति व्याकरणम् ॥

विद्वद्देशीयः, त्रि, (ईषदूनो विद्वान् । विद्वस् + देशीयर् ।) विद्वत्कल्पः । इति व्याकरणम् ॥

विद्वद्देश्यः, त्रि, (ईषदूनो विद्वान् । विद्वस् + देश्य ।) विद्वत्कल्पः । इति मुग्धबोधव्याकरणम् ॥

विद्वान्, [स्] त्रि, (वेत्तीति । विद् + शतृ । "विदेः शतुर्वसुः ।" ७ । १ । ३६ । इति वस्वादेशः ।) आत्मवित् । प्राज्ञः । पण्डितः । इति मेदिनी ॥ (यथा, मनुः । २ । ११० ।
"[illegible] विद्वान् [illegible] :
[illegible] ।")

विद्विषः, पुं, (विशेषेण द्वेष्टीति । वि + द्विष + इगुपधेति कः ।) शत्रुः । विद्विषी, त्रि, [illegible] ॥

विद्वेषः, पुं, (वि + द्विष + घञ् ।) शत्रुता । [illegible] । इत्यमरः ॥ [illegible] । इति शब्दरत्नावली ॥ (यथा, [illegible] । ६० ।
"[illegible]
[illegible] ।")

[illegible]

अभिचारकर्म्मविशेषः । [illegible]
यथा,—
"शुभोदये समारभ्य [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।
भूमोदयविषमसाह ।
"[illegible]
[illegible]

विद्विषमसाह ।
"[illegible]

[illegible]

रते । १३ । १४५ । ५८ ।
स्वल्पविद्यागा धर्मविद्देषिणो नराः ।
न् वेदविदुषो नेच्छन्ति परिसर्पितुम् ॥")
वधो । इति कविकल्पद्रुमः ॥ (तुरा०-
क०-सेट् ।) विधिर्विधानम् । श, विधति
गत् । अनेकार्थत्वात् छिद्रकरणेऽप्ययम् ।
च्छिद्रितौ विद्धे । इत्यमरः ॥ कर्णवेधः ।
गोदास: ॥
(विध्यते क्रियते इति । विध + घञर्थे
विमानम् । इस्यमम् । प्रकारः । वेध-
कृतिः । इति भरतद्विरूपकोषः ॥
स्त्री, कम्पनम् । विपूर्व्वधूधातोर्भावे अनट्
प्रत्ययेन निष्पन्नम् ॥
स्त्री, (विगतो धवो भर्त्ता यस्याः ।) मृत-
। तत्पर्य्यायः । विश्वस्ता २ । इत्यमरः ॥
का ३ रण्डा ४ यतिनी ५ यतिः ६ । इति
त्नावली ॥ (यथा, ऋग्वेदे ।१०।४०।२।
"को वां शयुत्रा विधवेव देवरं
मर्य्यं न योषा कृणुते सधस्थ आ ॥")
कर्त्तव्याकर्त्तव्यानि यथा । विष्णुः ।
र्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति ।"
र्यं मैथुनवर्ज्जनं ताम्बूलादिवर्ज्जनञ्च ।
प्रचेताः ।
लाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
ब्रह्मचारी च विधवा च विवर्ज्जयेत् ॥"
जनं आयुर्वेदोक्तं पारिभाषिकम् । स्मृतिः ।
हारः सदा कार्य्यो न द्वितीयः कदाचन ।
शायिनी नारी विधवा पातयेत् पतिम् ॥
यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ॥"
तर्पणं पुत्रपौत्राद्यभाव इति मदनपारि-
: ॥
शाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥"
इति शुद्धितत्त्वम् ॥*॥
च ।
स्त्री पतिहीना या भवेन्निष्कामिनी सदा ।
क्ता दिनान्ते सा हविष्यान्नरता सदा ॥
दिव्यवस्त्रञ्च गन्धद्रव्यं सुतैलकम् ।
च चन्दनञ्चैव शङ्खसिन्दूरभूषणम् ॥
मलिनवस्त्रा स्वामित्यं नारायणं स्मरेत् ।
रायणस्य सेवाञ्च कुरुते नित्यमेव च ॥
मोच्चारणं शश्वत् कुरुतेऽनन्यभक्तितः ।
तुल्यञ्च पुरुषं सदा पश्यति धर्म्मतः ॥
न्नं न च भुङ्क्ते सा न कुर्य्याद्विभवं व्रतम् ।
दश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने ॥
रामस्य नवम्याञ्च शिवरात्रौ पवित्रया ।
रायाञ्च प्रेतायां चन्द्रसूर्य्योपरागयोः ॥
नयं परित्याज्यं भुज्यते परमेव च ।
पूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
मांसिनाञ्च गोमांसं सुरातुल्यं श्रुतौ श्रुतम् ॥
शाकं मसूरञ्च जम्बीरं पर्णमेव च ।

अलाबुर्वर्त्तुलाकारा वर्ज्जनीया च तैरपि ॥
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ।
यान आरोहणं कृत्वा विधवा नरकं व्रजेत् ॥
न कुर्य्यात् केशसंस्कारं गात्रसंस्कारमेव च ।
केशवेणीजटारूपं ततश्चीरं तीर्थकं विना ॥
तैलाभ्यङ्गं न कुर्व्वीत न हि पश्यति दर्पणम् ।
मुखञ्च परपुंसाञ्च यात्रां नृत्यं महोत्सवम् ॥
नर्त्तकं गायनञ्चैव सुवेशं पुरुषं शुभम् ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥
(विधवायास्तु पत्यन्तर-ग्रहणं निषिद्धं न
तद्विवाहशब्दवाच्यञ्च । तत्तु विशेषतो विचा-
रेण ग्रन्थविस्तृतिर्भवेदतस्तस्मात् केवलं कति-
पयानि वचनान्युद्धृत्य दर्शयामि तानि
सुधीभिर्व्विचारणीयानीति ॥ तत्र याज्ञवल्क्यः ।
"अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥"
अनन्यपूर्व्विकां दानेनोपभोगेन वा पुरुषान्तरा-
परिगृहीताम् ॥ याज्ञ: । २ । ३ ।
"सवर्णामसमानार्षाममातृपितृगोत्रजाम् ।
अनन्यपूर्व्विकां लघ्वीं शुभलक्षणसंयुताम् ॥"
गोतमः । ४ । १ ।
"गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्व्वि-
काम् ॥"
वशिष्ठः । ८ । १ ।
"गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः
स्नात्वा असमानार्षामस्पृष्टमैथुनां भार्य्यां
विन्देत ॥" हारीतः । ४ । १ ।
"असमानार्षगोत्रां हि कन्यां सभ्रातृकां शुभाम् ।
सर्व्वावयवसम्पन्नां सुवृत्तामुद्वहेन्नरः ॥"
पारस्करगृह्यसूत्रम् ।
"अग्निमुपधाय कुमार्य्याः पाणिं गृह्णीयात्
त्रिषु त्रिषूत्तरादिषु ॥"
कन्याशब्दार्थः कथ्यते । "कन्या कुमारी" इत्य-
मरः । "कन्यापदस्यादत्तस्त्रीमात्रवचनेन ।"
इत्यादि दायभागटीकायां आचार्य्यचूड़ा-
मणिः । "कन्यापदस्यापरिणीतामात्रवचनात् ।"
इति रघुनन्दनः ॥ "अनूढ़ात्वेन कन्यापदस्य
सपत्नीकन्या बोधकतया असुस्थत्वप्रसक्तेः तद्रूपे-
णैव कन्यापदस्य शक्तिः ।" इति श्रीकृष्णतर्का-
लङ्कारः ॥ पूर्व्वोक्तैर्व्वचनैः कुमारीणामेव परि-
णये विवाहशब्दवाच्यत्वं गतूढानाम् ॥
मनुः । ५ । १५१—१५२ ।
"यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत् ॥
मङ्गलार्थं स्वस्त्ययनं यज्ञस्तासां प्रजापतेः ।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥"
तत्रैव । १६०—१६१ ।
"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ।
अपत्यलोभाद् या तु स्त्री भर्त्तारमतिवर्त्तते ।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥
नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे ।

न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
लघुहारीतः ।
"स्वगोत्राद् भ्रश्यते नारी विवाहात् सप्तमे पदे ।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥"
मनुः । ९ । ४७ ।
"सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाहुर्ददानीति त्रीण्येतानि सतां सकृत् ॥"
तत्रैव । ५९—६५ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन ।
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ॥
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्म्मतस्तयोः ॥
विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषाग-गुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजा-
तिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सना-
तनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं क्वचित् ॥"
"न च विवाहविधायकशास्त्रे अन्येन पुरुषेण
सह पुनर्व्विवाह उक्तः ॥" इति कुल्लूकः ॥
तत्रैव । ६८—७० ।
"ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेदाप्रसवात् सकृत् सकृदृतावृतौ ॥"
"आगर्भग्रहणात् सकृद्गमनोपदेशाच्च यस्मै
वाग्दत्ता तस्यैवापत्यं भवति ।" इति कुल्लूक-
भट्टः ॥ तत्रैव । ७१ ।
"न दत्त्वा कस्यचित् कन्यां पुनर्दद्याद्विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥"
तत्रैव । ७९ ।
"उन्मत्तं पतितं क्लीवमबीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्त्तनम् ॥"
तत्रैव । ८० ।
"कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥"
आश्वलायनगृह्यसूत्रम् । ४ । २ । २१ ।
तामुत्थापयेद् देवरः पतिस्थानीयः अन्तेवासी
जरद्दासः । उदीर्ष्व नार्य्यभि जीवलोकम् ॥
अथ पत्नीमुत्थापयेत् कः देवरः पतिस्थानीयः
स पतिस्थानीय इत्युच्यते । अनेन ज्ञायते
पुत्रिकर्त्तृकं कर्म्म पुंसवनादि तदभावे देवरः

कुर्वन् । [illegible] कथा [illegible]
[illegible] । मरालमः ।
[illegible]

[illegible]

मंत्रमैदोषः मानेषु मधुवर्ष्यं यथोन्मिधः ।
एतौरन्निमरेवान्तु पुत्रमिव परिप्लवः ।
गृहेषु रामणीयानकुत्रमिवाहं मोरियाम् ।
भोग्यानना यद्यप्यस्य मोदंसेवानिहूरतः ।
प्रायमारिवृ मूलस्य पद्मनादिक्रियापि च ।
प्रायश्चित्तं च एव वृद्धादिमरणं तथा ।
एतानि लोकगुप्तार्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः ।
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् ॥”
आदित्यपुराणम् । १ । ६९ ।
“अमत पतीयते कन्या वरं लोकाद्गतम्भावत् ।
एतामपि हरेत् कन्या मेधावीद्गर प्राप्नेत् ॥”
बौधायनः । ·
“प्रतिगृह्य पाण्यधर्म्मेन शुल्काय न दद्यात् ॥”
वशिष्ठः ।
“कुलशीलविहीनस्य षण्ढादिपतितस्य च ।
अपस्मारिविधर्म्मस्य रोगिणां वेषधारिणाम् ।
दत्तामपि हरेत् कन्यां सगोत्रोढां तथैव च ॥”
वशिष्ठः कात्यायनश्च ।
“अद्भिर्वाचा प्रदत्तायां म्रियेताथो वरो यदि ।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥”
कात्यायनश्च । यमः ।
“नोदकेन न वा वाचा कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥”
अत्रापस्तम्बो कात्यायनः ।
“वरयित्वा तु यः कश्चित् प्रणश्येत् पुरुषो यदा ।
ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेत् पतिम् ॥”
[illegible]
न [illegible]
[illegible] सुप्रतिष्ठितम् ।
[illegible] पीयते ॥”
[illegible]
“[illegible] नाम्यमाश्रिता ।
[illegible] अन्यमाश्रयेत् ।
[illegible] पतिते पतौ ।
[illegible] विधीयते ।
[illegible] पतिम् ।
[illegible] समाश्रयेत् ।
[illegible] तथा
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥”
[illegible]
[illegible] ॥”
[illegible]

वर उच्यते । [illegible]
[illegible]
इति [illegible]
[illegible]
[illegible]
[illegible]
एतेन [illegible]
प्रतीयते यत् [illegible]
देवरादिना [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
विधा, स्त्री, ([illegible]
विधिः । प्रकारः । [illegible]
[illegible] । १ । १० । ११
“तस्मात् यथा [illegible]

[illegible] । [illegible] । [illegible]
[illegible] । [illegible]
वेतनम् । इति [illegible]
[illegible]
“[illegible]
“विधाभियाँ [illegible]
दिति विधा [illegible]
[illegible]
[illegible] इति श्रीधर [illegible]
धरः ॥)
विधाः, [न्] पुं, ब्रह्मा । [illegible]
विधाता, [ऋ] पुं, ([illegible]
[illegible] ।) ब्रह्मा । [illegible]
महाभारते । १३ । [illegible]
“[illegible]
“[illegible]
च दयानीति [illegible]
भाष्यम् । ७ । [illegible]
[illegible]
“[illegible]
[illegible]

ग्रंतिर्विधिना च दुर्ज्ञेया भुवनत्रये ॥”
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
। च ।
भगवानुवाच ।
मन्यो हि विधिवशो न मे साध्यो प्रजाधिप ।
पनिर्योगकर्त्ता जन्मदानादमेव च ॥
कस्य पत्नी कन्या वा वरः को वा सनातनः ।
ादुरूपफलदः सर्व्वेषां कारणं विधिः ।
तथं कृतं कर्म्म तदमोघं श्रुतौ श्रुतम् ॥
ाया निष्फलं सर्व्वमनीशस्योद्यमो यथा ।
ानुप्रिया धात्रा लिखिता चेत् सुता मम ।
भूतेव को वाहं केनान्येन निवार्य्यते ॥”
। ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अः ॥*॥
ाथ ।
ाे दोषः कामुकीनां शापभाक् पापभाक्
गृही ।
ा जगद्विधातापि न विरक्तः कलत्रवान् ।
ो दोषस्तु कदाचिन्नास्माकं व्यक्तयोषि-
ताम् ॥”*॥
रेच ।
मार्द्दुःखेन दुःखार्त्तो यो यं शपति निश्चितम् ।
ापं खण्डितुं शक्तो न विधाता जगत्-
प्रभुः ॥”
। ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अः ॥*॥
ो जगतां पतिर्यथा,—
ा धाता च विधाता च पौराणौ जगतां
पती ।
ाधाताराै त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकी-
र्त्तितौ ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥
, मेधावी । इति निघण्टुः । ३ । १५ ॥
हितकर्म्मानुष्ठाता । यथा, मनुः ।११।३५।
ाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते ।
ै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ॥”
ा । सर्व्वसमर्थः । यथा, रघुः । १ । ७० ।
ाया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
ं स्वयमिव क्षेत्रादवन्ध्यमाश्रमपादपम् ॥”
ायिता । दाता । यथा, कुमारे । २ । ५७ ।
“स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥”)
भूः, पुं, (विधातुर्ब्रह्मणो भूरुत्पत्तिर्यस्य ।)
रदमुनिः । इति त्रिकाण्डशेषः ॥
ायुः, [स्] पुं, (विधातुरायुर्ब्बोधक-
त्पर्य्यारम्भो यस्मात् । सूर्य्यक्रियां विना मत्स्य-
ादिमानाभावादेवास्य तथात्वम् ।) सूर्य्यः ।
ा,—
ादानी विधात्रायुर्द्दिव्यवक्त्रो दिवाकरः ॥”
इति शब्दचन्द्रिका ॥
ा, ब्रह्मणो वयः । तद्यथा । चतुर्द्दश-
न्तरैः मन्वन्तरैरेकं दिनं भवति । तत्तुल्य-
ात्रिकैः कल्पस्त्रिंशत्कल्पे ब्रह्मण एको
ासो भवति । एताद्दृशैर्द्वादशमासैर्ब्रह्मणः

संवत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः ।
तत्र पञ्चाशत् वर्षा अतीताः । एकपञ्चाशद्वर्षा-
रम्भेऽधुना श्वेतवाराहकल्पः । अत्र मन्वन्त-
राणि अतीतानि षट् अधुना वैवस्वतमन्वन्तरं
वर्त्तते । इति श्रीभागवतमतम् ॥
विधात्री, स्त्री, (वि + धा + तृच् । ङीप् ।) पिप्पली ।
इति शब्दचन्द्रिका ॥ विधानकर्त्री । यथा,—
“गतास्तेनां वाहुप्रकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
प्रयुक्तां त्वां ध्यायन् जननि जड़चेता अपि
कविः ॥”
इति तन्त्रसारे कर्पूरादिस्तोत्रम् ॥
विधानं, क्ली, (वि + धा + ल्युट् ।) विधिः । इति
जटाधरः ॥ (यथा, मनुः । ७ । १८१ ।
“यदातु यानमातिष्ठेत् परराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥”)
करणम् । इति नानार्थविधिशब्दटीकायां
भरतः ॥ (यथा, रघुः । ७ । १४ ।
“परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥”)
करिकवलः । इति हारावली ।१६१ ॥ (वेदादि-
शास्त्रम् । यथा, मनुः । १ । ३ ।
“त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः ।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो ! ॥”
नाटकाङ्गविशेषः । यथा, साहित्यदर्पणे । ६ ।
३४६ ।
“सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम् ॥”
यथा, वालचरिते ।
“उत्तमाद्दातिशयं वत्स तव बाल्यञ्च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥”)
विधानकं, क्ली, व्यथा । इति शब्दरत्नावली ॥
(विधिः । यथा, कथासरित्सागरे ।२८।१८० ।
“ततस्तुष्टो भरतोऽसौ तस्मायादित्यशर्म्मणे ।
ददौ सुलोचनामस्मद्दर्शितं सविधानकम् ॥”)
विधानवैगरि, त्रि ॥
विधानगः, पुं, (विधानं गायतीति । गै + टक् ।)
पण्डितः । इति शब्दरत्नावली ॥
विधायकः, त्रि, विपूर्व्वधाञ्धातोर्णक(ण्वुल्)प्रत्य-
येन निष्पन्नः ॥ विधानकर्त्ता । (यथा, राज-
तरङ्गिण्याम् । १ । १६८ ।
“स विहारस्य निर्म्माता शुष्को शुष्कपुरस्य यः ।
जयस्वामिपुरस्यापि शुद्धधीः स विधायकः ॥”)
विधिज्ञापकः ॥
विधायी, [न्] त्रि, विधानकर्त्ता । विपूर्व्वकधाञ्-
धातोर्णिनिप्रत्ययेन निष्पन्नः ॥ (यथा, कथा-
सरित्सागरे । ३२ । ११३ ।
“भार्य्याच मायालङ्कारां तादृक्कार्य्यविधा-
यिनीम् ।
भूत्वैव निश्चित्यैव मामां मां दुःखदायिनीम् ॥”)

विधार्य्यं, क्ली, कम्पनम् । विपूर्व्वधृधातोर्ण्यत्प्रत्ययेन
निष्पन्नम् ॥
विधिः, पुं, (विधति विदधाति विश्वमिति । विध
विधाने + “इगुपधात् कित् ।” उणा० ४।११९ ।
इति इन् । स च कित् ।) ब्रह्मा । (यथा,
नैषधे । २२ । ४७ ।
“विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥”*॥
विधीयेते सुखदुःखे अनेनेति । वि + धा +
“उपसर्गे घोः किः ।” ३ । ३ । ९२ । इति किः ।)
भाग्यम् । (यथा, मार्कण्डेये । ८ । १८२ ।
“राज्यनाशं सुहृत्त्यागो भार्य्यातनयविक्रयः ।
हरिश्चन्द्रस्य राजर्षेः किं विधे ! न कृतं त्वया ॥”)
क्रमः । विधानम् । इत्यमरः ॥ कालः । इति
मेदिनी । धे, १७ ॥ विधिवाक्यम् । (यथा,
गीतायाम् । १६ । २३ ।
“यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥”)
प्रकारः । नियोगः । इति हेमचन्द्रः ॥ विष्णुः ।
इति हलायुधः ॥ कर्म्म । इति त्रिकाण्डशेषः ॥
(यथा, देवीपुराणे ।
“तस्मात् सर्व्वः प्रयाङ्गस्य चयत्रिविधेर्व्विभुः ॥”)
गजान्नम् । इति जटाधरः ॥ वैद्यः । इति
राजनिर्घण्टः ॥ यागोपदेशकग्रन्थः । इति
भरतधृतकोषः ॥ षड्विधसूत्रलक्षणान्तर्गत-
लक्षणविशेषः । यथा,—
“संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥”
अप्राप्तप्रापको विधिः । स तु द्विविधः । वर्णोत्-
पादनरूपोऽभावरूपश्च । वर्णोत्पादनरूपो यथा
सहर्षे घं इत्यादि । अभावरूपो द्विविधः ।
नाशो निषेधरूपश्च । नाशविधिर्यथा । लोपो-
ऽश्वोमाठोरित्यादि । निषेधविधिर्यथा । नाजो-
ऽन्त इत्यादि । सामान्यप्राप्तस्य विशेषावधारणं
नियमविधिः । यथा । इको धिः सुपि इत्यादि ।
अन्यधर्म्मस्यान्यत्रारोपणमतिदेशविधिः यथा ।
इन्वदिक् इत्यादि । पूर्व्वसूत्रस्थितपदस्य पर-
सूत्रेषूपस्थितिरधिकारविधिः । स तु त्रिविधः ।
“सिंहावलोकितञ्चैव मण्डूकप्लुतिरेव च ।
गङ्गास्रोत इति ख्यातस्त्वधिकारास्त्रयो मताः ॥”
सिंहावलोकितो यथा । चवर्गादन्ति इत्यस्मात्
दान्ते इति पदस्य अचदाति इत्यत्रोपस्थितिः ।
मण्डूकप्लुतिर्यथा । टाभिसूङेर्भोऽस्मात् आत
इति पदस्य व्यासिसभवि इत्यत्रोपस्थितिः ।
गङ्गास्रोतो यथा । ङेः सि श्चौ जस् इत्यस्मात्
डेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिरिति ।
इत्यत्र ।
“कार्य्यं कार्य्यं निमित्तञ्च विधिः सन्नयतात्-
मनम् ।
यदाचित् कार्य्यिकार्य्याभ्यां प्रविश् कार्य्यनिमि-
त्ततः ।
यत्र निर्द्दिश्यते कार्य्यं स कार्य्यो गदितो बुधैः ।

क्रियते यत्तु तत् कार्य्यमादेशप्रत्ययागमम् ।
यस्मात् परं परे यस्मिन् तन्निमित्तं द्विधा मतम् ।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत् ।”
इति ।

अन्यच्च ।
“बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली ।
प्रत्ययाश्रितकार्य्यन्तु बहिरङ्गमुदाहृतम् ।
प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।
प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथा ।
सावकाशविधिभ्यः स्याद्बली निरवकाशकः ।
कस्यचिद्भिन्नकार्य्यस्य प्रथमे परतस्तथा ।
सम्भवेद्विषयो यस्य स भवेत् सावकाशकः ।
आदौ हि विषयो यस्य परतो न हि संभवेत् ।
स पण्डितगणैरुक्तो विधिर्निरवकाशकः ।
तथा सामान्यकार्य्येभ्यो विशेषकविधिर्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ।
स्वल्पः स्याद्विषयो यस्य स विशेषविधिर्मतः ।
आगमादेशयोर्मध्ये बलीयानागमो विधिः ।
प्रकृतिं प्रत्ययञ्चापि यो न हन्ति स आगमः ।
आदेश उपघातो यः प्रकृतेः प्रत्ययस्य वा ।
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ।”
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥ * ॥
अथ विधिभेदाः । तत्र कश्चित् प्रधानविधिः । स तु स्वतः फलहेतुक्रियाबोधकः । यथा । यजेत स्वर्गकाम इत्यादि । कश्चिदङ्गविधिः । स तु स्वतः फलहेतुक्रियायां कथमित्याकाङ्क्षायां विधायकः । यथा । दर्शपूर्णमासाभ्यां यजेत इत्यादि । कश्चित् प्रयोगविधिः । स तु यावदङ्गयुक्तक्रियाबोधकः । यथा । यावदङ्गयुक्तं यजेत विश्वजित्स्वर्गकाम इत्यादि । कश्चिद्गुणफलविधिः । स तु आकाङ्क्षानिवृत्तौ अधिकफलाय प्राप्तकर्म्मणि गुणविधिः । यथा । गोदोहनेन पशुकामस्य प्रणयेत् इत्यादि । प्रधानविधिश्च द्विविधः । उत्पत्तिर्विनियोगश्चेति । तत्रोत्पत्तिस्तु कर्म्मस्वरूपबोधकः । यथा आग्नेयोऽष्टाकपालः अमावास्यायां पौर्णमास्याञ्चाच्युतो भवति इत्यादि । विनियोगश्च स्वर्गकामाद्यधिकारिबोधकः । यथा । स्वर्गकामो यजेत इत्यादि । अङ्गविधिस्तु कालदेशकर्त्त्रादिबोधकतया अनियत एव । प्रधानाङ्गविध्योर्विधेयाप्राप्तिप्राप्तिभ्यां त्रैविध्यम् । तत्र अप्राप्तौ द्वैविध्यम् । तत्रात्यन्ताप्राप्तौ अपूर्व्वविधिः । पक्षतोऽप्राप्तौ नियमविधिः । विधेयतदन्यतिपक्षयोः प्राप्तौ परिसंख्याविधिः । तदप्युक्तम् ।
“विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्या विधीयते ।”
तत्र प्रधानस्य विधिभेदो यथा । अहरहः सन्ध्यामुपासीत इत्यादिरपूर्व्वविधिः । अत्र विधेयस्य सन्ध्यादेः शास्त्रतो रागतो न्यायतो वा कश्चिदप्राप्तिः । तथा ऋतौ भार्य्यामुपेयात् इत्यादिर्नियमविधिः । विधेयस्य भार्य्याभिगमनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तिः । तथा । पौर्णिमासीं गृह्णीत इत्यादिः परिसंख्याविधिः । विधेयस्य पौर्णिमासीमासभक्षणस्य च रागतः प्राप्तिः । अङ्गस्य विधिभेदो यथा । शारदीयपूजायामष्टम्यामुपवसेत् इत्यादिरपूर्व्वविधिः । अत्र विधेयस्योपवासस्य एतदन्यशास्त्रतो रागतो न्यायतो वा कश्चिदप्राप्तिः । तथा श्राद्धे गृह्णीत पित्र्यं सतिलमित्यादिर्नियमविधिः । विधेयस्य श्राद्धीयभोजनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तिः । तथा । दक्षिणाग्रे प्रागग्राम्रिताम् विप्रान् इत्यादिः परिसंख्याविधिः । तत्र विधेयस्य प्रातर्निमन्त्रणस्य तदन्यनिपक्षस्य पूर्व्वदिनवार्य्यं निमन्त्रणस्य च पार्व्वणश्राद्धे नः प्राप्तिरिति स्मृतेरुदाहरणम् । इति धर्म्मदीपिका ॥ * ॥ न्यायमते विधिर्यथा,—
“प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ।”
विधिजन्यज्ञानात् प्रवृत्तिर्जायते सा इच्छातः चिकीर्षितः चिकीर्षा च कृतिसाध्यत्वेष्टसाधनत्वज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचीनमतम् । अमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः । इति हरिदासीयकुसुमाञ्जलिः ॥ * ॥ अपि च न्यायमतसम्बन्ध प्रत्ययोपस्थापितेष्टसाधनत्वान्वितस्वार्थपरपदघटितवाक्यत्वं विधित्वम् । मीमांसकमते इष्टसाधनत्वं कृतिसाध्यत्वञ्च एतद्विध्यर्थः । इति गदाधरभट्टाचार्य्यकृतविधिस्वरूपः ॥
विधिदर्शी, [न्] पुं, (विधिं द्रष्टुं शीलमस्य । दृश् + णिनिः ।) सदस्यः । इत्यमरः ॥
विधिदेशकः, पुं, (विधिं दिशतीति । दिश + ण्वुल् ।) सदस्यः । इति शब्दरत्नावली ॥
विधिवत्, व्य, यथाविधि । विध्यनुसारेण । यथा,—
“तोषयेत् सततं भार्य्यां विधिवत् पाणिपीडिताम् ।”
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
अपि च ।
“सन्ध्यासमाप्तौ विधिवत् बिल्वपत्रादुपास्येत् ।”
इति शिवरात्रिव्रतकथा ॥ * ॥
अन्यच्च ।
“पूजयेद्गन्धविष्णुर्कैरुदकसात्मक शुभम् ।
सतोपचारैर्विधिवत् श्रद्धया च विमत्सरः ।”
इति मत्स्यपुराणे योगमाहात्म्यम् ४८ अध्यायः ॥
अपरञ्च ।
“इति नक्षत्रपुरुषमुपोष्य विधिवत् स्वयम् ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ।”
इति तत्रैव ५१ अध्यायः ॥
विधुः, पुं, (विध्यति विरहिणं विध्यते राहुणेति वा । व्यध ताडे + “पृभिदिव्यधीति ।” उणा० १ । २३ । इति कुः ।) चन्द्रः । (यथा,—
“विज । विधुना ...
कामपि चन्द्रांशोःशुभः ...
तनुभयोरेतिमं हि ...
कथमहो समता ...
विध्यति असुरानिति ।) विष्णुः । इति मेदिनी । धे, ११ ॥ ब्रह्मा । रत्नावली । राक्षस । इति ... वायुः । इति ...
चन्द्रस्य ...
“चन्द्रस्य द्वादशावस्था ...
विधुविधुः च तस्यैव सर्व्वदा ...
प्रवासस्थं पुनर्नष्टं ...
हास्यावस्थं ...
विवादावस्थाभोगस्थे ...
कम्पावस्थं सुप्तावस्थे ...
प्रवासो हानिर्मृत्यु जयो ...
शोको भोगी ज्वरः कम्प. ...

जन्मस्थ, कुरुते तुष्टिं ...
तृतीये राजसम्मानं चतुर्थे कलहस्तथा ।
पञ्चमेन स्त्रीलाभेन ...
धनधान्यागमः षष्ठे रतिः ...
अष्टमे प्राणसन्देहो नवमे कोशसञ्चयः ।
दशमे कार्य्यसिद्धिः स्यादेकादशे सदा ।
द्वादशेन प्रमादेन स्फुरेत ...
इति गारुडे । ११२-२
चन्द्रस्य वयस्त्रिकारणम् यथा,—
नकोवाच ।
“राका चानुमती चैव दि...
सिनीवाली कुहूश्चैव ...
अमा नाम रवेः रश्मिसहस्रे ...
यस्मात् ...
पूर्व्वोदितकलाभिर्यत्पौर्णमासा ।
पूर्णिमानुमती ज्ञेया पश्चाद् ...
यस्मात्तामनुमन्यन्ते देवताः ।
तस्मादनुमती ...
यदा चास्तमिते सूर्ये ...
पूर्णमत्र सोमतः राकासंज्ञा ...
राकां तामनुमन्यन्ते देवताः ।
रञ्जनाच्चैव चन्द्रस्य राकेति ...
सिनीवालीप्रमाणन्तु ...
अमावास्या विश्वर्क्क ...
कुहूरिति कोकिलेनोक्तो यः ...
तत्कालसंज्ञा तेषा वै ...
अनुमत्याश्च काञ्ची ...

एतासां निरत: काल: कुमारा ...
कला: षोडश सोमस्य शुक्ले वर्द्धते ।
अमृतेनाम्बुनं तत्र पीयते देवैः ।
प्रथमां पिबते वह्निर्द्वितीयां पवनः ।
विश्वेदेवास्तृतीयान्तु चतुर्थीं ...
पञ्चमीं वरुणश्चापि षष्ठीं पिबते ...

ौ दिवा चन्द्रोऽर्द्धं रसात्मनीम् ।
न्द्रमसा दिशत्यौः कलाः ।
समाप्ति स्तं द्वयाद्वं कलाम् ।
कला विमुच्य स्वोदयी ।
मनुष्यैः कला पिबन्ति पितरः ।
दनोदेव पिबन्ति पितरः कलाम् ।
ो विनीय: प्रविष्टः सूर्यमण्डलम् ।
मिति तस्य अमावास्या ततः स्मृता ।
दृश्यते चार्के सायाह्ने तु चन्द्रमसम् ।
विप्रःपश्यतु स्वधौमित्याविरतायः ।
मेह: सोमस्य द्विधा कल्येनया ।
समाप्त्याविर्ष्यातयति चौषधी: ।
लितं मासवल्यायः पिबन्ति च ।
सतं सोमः सौरभ्यमयाणि ।
स्तं भूला मन्दभूतं द्विजात्यः ।
ारवप्नव्यादौ ऽस्यादृगयः क्रमात् ।
दु देवाय पुनः सोमं विवर्द्धयेत् ।
ीयते भीमः सौरवायाध्यागे पुनः ।
र्ध: मसाद्स्य चयप्रहविधिर्गिषु: ।”
ति देवीपुराणे चन्द्रचयप्रद्धिः ॥ ० ॥
मकोयाच ।
यते लोके चास्मिमसाम्प्रदायते ।
ंप्रवल्यामि चन्द्रग्रहोपयानिकम् ॥
मयं ग्रहाभिनोधाभिदिवाकरः ।
ीदरस्यैन राहुर्न अमात्त ततः ॥
राहुगाक्रम्य शत्रुपर्थं प्रवेशितः ।
ं दयनेदोर्द्धैः शस्त्रधा न विश्वयितः ॥
व पुनर्दूतधेयात्स्नदनः ।
ावयन्तं तेजो न स्मात्स्वपारितः ॥
ा द्रोय निर्व्यातः कथं दीघ्रतरोऽभवत् ।
तेजसी राशी राशीपक्षं गमिष्यति ॥
ं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
मस्तव्यापि सभा सं सृष्टतेजसा ॥
मुन्यं देवाः पिबन्त्य स्वधात्मकम् ।
त्रिंशतरेव चत्रिंशत्तथैव च ॥
विवशात्य देवाः सोमं पिबन्ति ये ।
सृष्टस्तं भाग्यं पुरा सृष्टं स्वयम्भुवा ॥
तदाहुरागत्य पातुमिच्छति पर्व्वसु ।
पार्थिवी छाया महाकारान्तमोमय: ॥
मवन् सनच्चिन्दुमाच्छादयति छायया ।
च चन्द्रमभ्येति राशौ पर्व्वसि भास्करम् ॥
ायमनंस्यन्तु चन्द्रमेव जिघांसति ।
त् पिबति तं राहुस्तमुमस्याविनाशयन् ॥
हिंसन् यथा पद्मं पिबति भ्रमरो मधु ।
स्यमन्तं तद्वद्भेदाद्राहुरच्युते ॥
कान्तो मल्लिर्यद्वशुचिनं चरते चयात् ।
मपि न दौयेन तेजसा नैव लुप्यते ॥
ं सर्व्वमतिः सूर्य्याद्भुत्पाद्य पावकं शुभम् ।
ानलश्चदीनोऽपि तेजसा नैव लुप्यते ॥
चन्द्रस्य सूर्य्यस्य छादितावपि राहुणा ।
समा न लुप्येते नाङ्गहीनौ बभूवतुः ॥
स्यस्य च चन्द्रस्य माणिक्यकलसाकृतिः ।

सोमो देवमर्त्यानां छायायोगाच्च पार्थिवात् ।
राशेश्च वर्त्मनाद्दै चन्द्रदेवतं शशी ॥
सर्व्वदेवानि गच्छति यतनं दृष्ट्वा च गौर्यदा ।
वाड्मादेव चर्व्वेन चौरं सचेद्धः स्वरतोऽन्तरम् ।
पिबेत् सूर्य्यो देवानां सोमो मातेव मच्यते ॥
यथा मातुः स्तनं पीत्वा जीवन्ति सर्व्वजन्तवः ।
सोमात्मकं यथा सोमात् तृप्यन्ति सर्व्वदेवताः ॥
अमा तं सर्व्वयोगेषु तथायं चरते शशी ।
तं चरन्तं यथाभागमुपजीवन्ति देवताः ॥
तस्मिन् काले समभ्येति राहुरप्यपकर्षति ।
सर्व्वमर्हन्ति भागञ्च पादं पादार्द्धमेव च ॥
आक्रम्य पार्थिवी छाया यावती चन्द्रमण्डलम् ।
स्तन: स भागो राहोस्तु देवभागास्तु शेषकाः ॥
इति विधाय देवानां राहोः पर्व्वगतस्य च ।
चन्द्रो न चयमायाति तेजसा नैव लुप्यते ॥
तिथिभागाश्च यावन्तः पुनस्तके प्रमाणतः ।
सर्व्वच्छायात्मितः कालच्छायाभैव प्रकीर्त्तितः ॥
अनो राहुभुक्तः सोमः सोमाद्भूर्द्धं दिवाकरः ।
पर्व्वकाले स्थितिस्तेषं विपरीताः पुनः पुनः ॥
आलम्बादयते राहुरभवच्छशिभास्करौ ।
राहुरभवसंस्थानः सोममाच्छाद्य तिष्ठति ॥
एतत्य पार्थिवी छाया धूमैव इवोत्थितः ।
चन्द्रस्य यद्ययाव्यं राहुणा भास्करस्य च ॥
साम्प्रायपयितं तस्य केवलं चामलीकृतम् ।
कर्द्दमेन यथा वस्त्रं गुरुमप्युपपद्यते ॥
दशोदेशाच सर्व्वदा राहुणा चन्द्रमाखपा ।
प्रक्षालितं तदेवाच पुनः शुक्लतरं भवेत् ॥
राहुमुक्तं भवेत्तद्वन्निर्म्मलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ चापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम् ।
एवं न ग्रस्यते सूर्य्यचन्द्रमाश्च ग्रस्यते ॥
चक्षुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः ।
जगतुपमोदनं चैतत् ग्रहणं चन्द्रसूर्य्ययोः ॥”
इत्यादि देवीपुराणे ग्रहणविकल्पः ॥ ० ॥
विधोर्दैवपित्राद्यन्नकारणत्वं राजयक्ष्मादिकार-
णत्वञ्च कालिकापुराणे २०।२१ अध्याययोर्द्रष्ट-
व्यम् ॥ ० ॥ (कर्त्तरि, त्रि । यथा, ऋग्वेदे ।
१०।५५।५ ।
"विधुं दद्राणं समने बहूनां
युवानं सन्तं पलितो जगार ॥”
“विधुं विधातारं सर्व्वस्य युद्धादेः कर्त्तारं
विपूर्ब्बो दधातिः करोत्यर्थे ।” इति तद्भाष्ये
सायणः ॥)
विधुतः, त्रि, (वि+धु+क्तः ।) त्यक्तः । इत्य-
मरः ॥ (यथा, भागवते । ६ । १६ । २५ ।
"स तत्र निर्म्मुक्तसमस्तसङ्ग
आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे
लेभे गतिं भागवतीं प्रतीतः ॥”)
कम्पितश्च ॥
विधुतिः, स्त्री, कम्पनम् । विपूर्व्वधूधातोः क्तिप्रत्य-
येन निष्पन्ना ॥ (यथा, भागवते ।१०।३३।८।

"पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासै-
र्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥”
निराकृतिः । यथा, तत्रैव । ४ । ७७ । ३८ ।
"यस्मिन्निदं सदसदात्मतया विभाति
मायाविवेकविधुतिस्रजि वाहिबुद्धिः ॥”)
विधुननं, क्ली, (वि+धू+णिच् । ल्युट् । नुक्
च । पृषोदरादित्वात् ह्रस्वः ।) कम्पनम् । इति
जटाधरः ॥
विधुन्तुदः, पुं, (विधुं तुदति पीड़यतीति । विधु+
तुद+“विध्वरुषोस्तुदः ।” ३ । २ । ३५ । इति
खश् । मुम् ।) राहुः । इत्यमरः ॥ (यथा,
माघे । २ । ६१ ।
"नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥”)
विधुपञ्जरः, पुं, (विधोः पञ्जरः पञ्जरास्थि इव तनु-
साहश्यात् ।) खड्गः । इति शब्दमाला ॥
विधुप्रिया, स्त्री, (विधोश्चन्द्रस्य प्रिया ।) चन्द्र-
पत्नी । यथा । दाचायण्यो विधुप्रिया । इति
कोषान्तरम् ॥
विधुरं, क्ली, (विगता धूर्भारो यस्मात् । समासे
अः ।) प्रविश्लेषः । इत्यमरः ॥ केवलम् । इति
त्रिकाण्डशेषः ॥ (प्रत्यवायः । कष्टम् । यथा,
किरातटीकायां मल्लिनाथधृतवैजयन्ती ।
"विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि ॥”
तथा च किराते । २ । ७ ।
"विधुरं किमतः परं परै-
रवगीतां गमिते दशामिमाम् ।
अवसीदति यत् सुरैरपि
त्वयि सम्भावितवृत्ति पौरुषम् ॥”)
विधुरः, त्रि, (विगता धूः कार्य्यभारो यस्मात् ।
अकपूरित्यः ।) विकलः । इति मेदिनी । रे,
२१६ ॥ (यथा, कुमारे । ४ । ३२ ।
"तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्ज्जनात्
ननु मां प्रापय पत्युरन्तिकम् ॥”)
विधुरा, स्त्री, रसाला । इति मेदिनी । रे, २१६ ॥
(जत्रूर्द्ध्वस्थमर्म्म । यथा, सुश्रुते । ३ । ६ ।
"जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे
कृकाटिके द्वे विधुरे ॥”)
विधुवनं, क्ली, (वि+धु+ल्युट् । कुटादित्वात्
साधुः ।) कम्पनम् ।इत्यमरः ।३। २।४॥
विधूतं, त्रि, (वि+धू+क्तः ।) कम्पितम् । (यथा,
कलाविलासे । २ । २८ ।
“तं वदति सौऽप्यदृष्टिः सभूभङ्गं विधूतहस्ताग्रः ।
वचकवचनः पापो दृतिर्न्योयः कृतोऽयमा-
यातः ॥”)
त्यक्तम् । इति हेमचन्द्रः ॥ (यथा, महापद्म-
पतिस्तोत्रे । १ ।
"योगं योगविदां विधूतविविधव्यासङ्गशुद्धाशय-
प्रादुर्भूतसुधारसप्रसरमध्यानाम्बुधौरासि-
काम् ॥"

विधूतिः, स्त्री, कम्पनम्। विपूर्व्वधूधातोः क्तिप्रत्ययेन निष्पन्नमिति ॥

विधूननं, क्ली, (वि+धू+णिच्+ल्युट्। नुक् च।) कम्पनम्। तत्पर्य्यायः। विधुवनम् २। इत्यमरः। ३। २। ४। विधुननम् ३। इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे। ३। १४२।
"केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात्।
प्राहुः कुट्टमितं नाम शिरःकरविधूननम् ॥")

विधूनितं, त्रि, कम्पितम्। विपूर्व्वण्यन्तधूधातोः क्तप्रत्ययेन निष्पन्नम् ॥

विधृतं, क्ली, विशेषेण धृतम्। यथा,—
"अथावलम्ब्य विधृतं लोष्टकाष्ठतृणादिना।
उदक्शिरास्तिष्ठेद्दूरं विधृतमेहनः ॥"
इत्याह्निकतत्त्वम् ॥

विधेयः, त्रि, विधातुं शक्यः। (वि+धा+"अचो यत्।"३।१।९७। इति यत्। "ईद्यति।"६।४।६५। इति आत ईत्।) वाक्यस्थः। तत्पर्य्यायः। विनयग्राही २ वचनेस्थितः ३ आश्रवः ४। इत्यमरः ॥ (यथा, महाभारते। ५। २३। १३।
"कच्चिद्राजा कुशली तात कच्चित्
सुयोधनो यस्य मन्त्री विधेयः ॥")
विधिजन्यबोधविषयः। यथा,—
"अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत्।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥"
इत्येकादशीतत्त्वम् ॥
अपि च। प्रमाणान्तरानधिगतं कर्म्म प्रथमं श्रुतौ न विषयीभवति शब्दादेव तस्य कर्म्मण उपस्थितिरित्युपादेये विधेये कर्म्मणि पूजादौ शुचित्वकालजीविनः कर्म्माधिकारात् प्रमाणान्तरलभ्यत्वेनाविधेयत्वात्तिथ्यादिर्गुणः। इति तिथ्यादितत्त्वम्। (कर्त्तव्यम्। यथा, वृहत्संहितायाम्। ९५। ६९।
"द्वात्रिंशत्प्रविभक्ते दिक्चक्रे यद्यथा समुद्दिष्टम्।
तत्तथा विधेयं गुणदोषफलं वियाद्गनाम्।"॥
अधीनः। यथा, रघुः। १९। ४।
"सन्निवेश्य सचिवेष्वतः परं
स्त्रीविधेयनवयौवनोऽभवत् ॥"
तथा च तत्रैव। ७। ६२।
"तस्यौ ध्वजस्तम्भनिषण्णदेहं
निद्राविधेयं नरदेवसैन्यम् ॥")

विधेयता, स्त्री, (विधेयस्य भावः। विधेय+तल्।) विधेयत्वम्। विधिजन्यबोधविषयत्वम्। यथा। यथा मद्यपानादिषु पापस्य निषिद्धत्वोपयुक्तब्राह्मणादिपदार्थे वैगुण्यं तथा सुरापानादिषु दुरत्तस्य विधेयतावच्छेदकसुरादिपदार्थे वैगुण्यम्। इति प्रायश्चित्ततत्त्वम्। (अधीनता। यथा, किराते। ११। ३३।
"मरुतामपि सत्पथो भोपदर्शिरपथः।
अरिषड्वर्गविरिषुशस्त्रोदिनैवीस विधेयनाम् ॥")

विध्वंसः, पुं, (वि+ध्वंस+घञ्।) विनाशः। यथा, तिथ्यादितत्त्वे।
"हरिते रोगोऽनुतापः शस्त्रानामोभिरिव
विध्वंसः।
कपिले शीघ्रगमस्त्रमे ध्वंसेऽथ दुर्भिक्षम् ॥"
(अपकारः। यथा, किराते। ३। १६।
"विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते ॥")

विनतः, त्रि, (वि+नम+क्तः।) प्रणतः। (यथा, आर्य्यासप्तशत्याम्। ६१६।
"सखि दुरवगाहगहनो विदधानो विप्रियं
प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतमुखस्योपरि स्थितः
कोपः ॥")
भुग्नः। (यथा, वृहत्संहितायाम्। ६९। ३।
"दशनपत्नुइन्यः प्रलम्बमुखानना विनतपृष्ठाः।
कृशस्थूलग्रीवा यवमध्या दारितपुराश्च ॥")
शिक्षितः। इति मेदिनी। ते, १५६। (सङ्कुचितः। यथा, रामायणे। १। ४३। २१।
"विनतं क्वचिदुद्भूतं क्वचिद्याति शनैः शनैः।
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥"
पुं, स्वनामख्यातवानरविशेषः। यथा, भट्टिः। ७। ५२।
"प्राचीं तावद्भिरव्यग्रः कपिभिर्विनतो ययौ।
अप्रयावैरिवादित्यो वाजिभिर्दूरपातिभिः ॥")

विनता, स्त्री, गरुड़माता। (सा तु दक्षप्रजापतेः कन्या। यथा, महाभारते। १। ६५। १२।
"क्रोधा प्राधा च विश्वा च विनता कपिला
मुनिः।
कद्रूश्च मनुजव्याघ्र दक्षकन्यैव भारत ॥")
पिड़काभेदः। इति मेदिनी। ते, १५६। (यथा, सुश्रुते। २। ६।
"महती पिड़का नीला पिड़का विनता स्मृता।")

विनतासूनुः, पुं, (विनतायाः सूनुः पुत्त्रः।) अरुणः। इति हेमचन्द्रः ॥ गरुड़श्च ॥

विनदः, पुं, (विशेषेण नदति शब्दायते पत्रफलादिनेति। नद्+अच्।) विश्वाकरुणः। इति शब्दचन्द्रिका ॥ क्वातियाम् इति ख्यातः ॥

विनम्रकं, क्ली, तगरपुष्पम्। इति राजनिर्घण्टः ॥

विनयः, त्रि, वणिक्। क्षिप्तः। निभृतः। जितेन्द्रियः। इत्यजयपालः ॥ (विशेषेण नयतीति। नी+अच्। विशेषेण प्रापकः। पृथक्कर्त्ता। यथा, ऋग्वेदे। २। २४। ९।
"स संनयः स विनयः पुरोहितः
ससुष्टुतः सयुधि ब्रह्मणस्पतिः ॥"
"विनयः संगतानां विविधं नेता पृथक्कर्त्ता च एव।" इति तद्भाष्ये सायणः ॥)

विनयः, पुं, (वि+नी+अच्।) शिक्षा। (यथा, रघुः। १। २४।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः ॥")
प्रणतिः। इति मेदिनी। ये, ...
"जितेन्द्रियत्वं विनय...
गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः।
...
अथ विनयाध्यायः।
"इन्द्रियाणां जये ...
तेभ्यो हि शिक्षेत् विनयं ...
...
धमयो ...
...
...
इति मत्स्यपुराणे १५...
(विशिष्टो नयः।) एकः। इति
"पूर्व्वमाचारमेदृयस्तु ...
...
मध्यादयः सोऽप्यसतारो ...
...
इति ॥
तत्पूर्व्वापेक्षया ...
एकस्यापि स्वप्रहस्तविषयवत्। ...
तेन अधिकरणाभावमात्र ...
'पारुष्ये साहसे चैव युगपत्सम्प्रवर्त्तिते
विशेषश्चेन्न लभ्येत विनयः ...
विनयो दण्डः।" इति ...

विनयग्राही, [न्] त्रि, (... +णिनिः।) वचनेस्थितः ...

विनयस्थः, त्रि, (विनये तिष्ठतीति ...) आज्ञाकारी। तत्पर्य्यायः ... २ वचनस्थितः ३ ... इति हेमचन्द्रः। ३। ९६ ॥

विनया, स्त्री, बाट्यालकः। इति ...

विनशनं, क्ली, (विनश्यति ... चेति। वि+नश+अधिकरणे ल्युट्।) ... पोवनम्। तत्र सरस्वतीनद्याः ... इति त्रिकाण्डशेषः ॥ (यथा, ... ८२। १०५।
"ततो विनशनं गच्छेन्नियतो ...
गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे ...
वि+नश+भावे ल्युट्।) विनाशः।

विनष्टः, त्रि, (वि+नश+क्तः।) ध्वंसविशिष्टः। यथा। श्रीभा... नष्टः। इति विशेषणार्थोदर्शनात् ... पतितः। यथा नारदः।
"विनष्टे त्वाश्रमस्थे पितर्युपरतस्पृहे।"
विनष्टे पतिते। इति दायभागः ॥

विनष्टिः, स्त्री, विनाशः। इति ... क्तिप्रत्ययेन निष्पन्नमिति। इति ... कौमुदी। (यथा, भागवते। ३। ११। ...
"तस्मात् शुचात्र ...
वर्णं यथा ...

ांसद्भया जन्धमयानुशोषन्
रस्नमौ प्रत्यगियाय तूष्णीम् ॥")
न, (विगता नासिका यस्य । नसादेशः।)
सकः। तत्पर्य्यायः। विग्रः २ विख्नः ३
कः ४। इति जटाधरः ॥
(वि+"विनञ्भ्यां नानाञौ न सह।"
२७। इति ना।) वर्ज्जनम्। तत्पर्य्यायः।
२ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना
त्यमरः ॥ (शब्देनानेन योगे "पृथग्-
।" २। ३।३२। इत्यनेन तृतीया पञ्चमी
न्। एवं "पृथग्विना नानाभिरिति
भागो द्वितीयार्थः ॥" इति काशिकोक्ता
ापि। यथा, तत्रैव।
वातं विना वर्षं विद्युत्प्रपतनं विना।
हस्तिकृतान्दोषान् केनेमौ पातितौ द्रुमौ ॥"
प्रयोगो यथा, रघुवंशे २। १४।
श्राम दृष्टापि विना दवाग्निः ॥"
प्रयोगो यथा, सांख्यकारिकायाम् ।४१।
चत्रं यथाश्रयन्ते
एवादिभ्यो विना यथा च्छाया।
द्विना विशेषै-
तिष्ठति निराश्रयं लिङ्गम् ॥")
, त्रि, (विना अन्तरेण क्षतम्।) त्यक्तम्।
निकाण्डशेषः ॥
:,पुं, (विशिष्टो नायकः।) बुद्धः। गणेशः।
रः ॥ (यथा, कथासरित्सागरे।३०। ५५।
क्रीड प्रमदोद्याने तरुमण्डलमध्यगः।
भावो वरदो देवदेवो विनायकः ॥")
ः। विघ्नः। (यथा, हरिवंशे।१८२।६५।
चसाश्च पिशाचाश्च भूतानि च विना-
यकाः ॥")
। इति मेदिनी। के, ११२ ॥ * ॥ विना-
ादो यथा,—
ज्ञेयो विघ्नवश्चैव द्वौ विज्ञेयौ विनायकौ ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥
ायकस्योत्पत्तिर्यथा,—
प्रजापाल उवाच।
गणपतेर्जन्म मूर्त्तिमत्त्वञ्च सत्तम !।
मि संशयं छिन्धि पृतिकष्टं व्यवस्थितम् ॥
महातपा उवाच।
देवगणाः सर्व्वे ऋषयश्च तपोधनाः।
ारम्भे यथा प्राप्ताः सिद्धिं ते च न संशयः।
ार्मांवस्थिषु यथा सिध्यन्ति विघ्नतः क्रियाः।
ुकारिषु सर्व्वेषु तद्देयमविघ्नतः ॥
देवाः सपितरश्चिन्तयामासुरोजसा।
कार्य्येषु विघ्नार्थं सर्व्वे एवाभ्यमन्त्रयन् ॥
ोका तदा मतं कुर्व्वतां त्रिदिवौकसाम्।
बुद्धिर्गमने रुद्रं प्रति महामते ॥
च इदमामन्त्र्य कैलासनिलयं गुरुम्।
ः सविनयं सर्व्वे प्रणिपामपुरःसरम् ॥
देवा ऊचुः।
देव महादेव शूलपाणे त्रिलोचन।

विघ्नार्थमविशिष्टानां उत्पादयितुमर्हसि ॥
एवमुक्तस्तदा देवैर्भवः परमया मुदा।
उमां निरीक्षयामास चक्षुषानिमिषेण ह ॥
देवानां सन्निधौ तस्य पश्यतो मां महात्मनः।
चिन्ताभूद्व्योम्नि मूर्त्तिभ्यो दृश्यते केन हेतुना ॥
पृथिव्या विद्यते मूर्त्तिरपां मूर्त्तिस्तथैव च।
तेजसः श्वसनस्यापि मूर्त्तिरेषा तु दृश्यते ॥
आकाशस्य कथं नेति मत्वा देवो जहास च।
ज्ञानशक्तिः परान् दृष्ट्वा यद्दृष्टं व्योम्नि शम्भुना ॥
यच्चोक्तं ब्रह्मणा पूर्व्वं शरीरन्तु शरीरिणाम्।
यच्चापि हसितं तेन देवेन परमेष्ठिना ॥
एतत्कार्य्यचतुष्केण पृथिव्यादिचतुर्ष्वपि।
मूर्त्तिमानतितेजस्वी हसतः परमेष्ठिनः ॥
प्रदीप्तास्यो महादीप्तः कुमारो भासयन् दिशम्।
परमेष्ठिगुणैर्युक्तः साक्षाद्रुद्र इवापरः ॥
उत्पन्नमात्रो देवानां योषितः संप्रमोहयन्।
कान्त्या दीप्त्या तथा मूर्त्त्या रूपेण च
महात्मवान् ॥
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः।
उमा निमिषनेत्राभ्यां तमपश्यत भामिनी ॥
तं दृष्ट्वा कुपितो देवस्त्रीप्रकोपसमन्वितः।
मत्वा कुमाररूपन्तु शोभनं मोहनं दृशाम्।
ततः शशाप तं देवो गणेशं परमेश्वरः ॥
कुमार गजवक्त्रस्त्वं प्रलम्बजठरस्तथा।
भविष्यसि तथा सर्पैरुपवीतगतिर्ध्रुवम् ॥
एवं शशाप तं देवस्त्रीप्रकोपसमन्वितः।
धुन्वन् शरीरमुत्थाय ततो देवो रुषान्वितः ॥
यथा यथासौ स शरीरमाद्यं
धुनोति देवस्त्रिशिखास्त्रपाणिः।
तथा तथा चाङ्गरुहाश्च कायं
जलं क्षितौ संन्यपतंस्तथान्ये ॥
विनायकानेकरुचो गजास्या-
स्तमालनीलाञ्जनसन्निकाशाः।
उत्तस्थुरन्यैर्विविधाश्च हस्ता-
जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान् ।
न ददात्युत्तरं पृष्टो विवक्षुर्मोहमेति च ।
अपार्थं बहु सङ्कीर्णं भाषते चापि मूढवत् ।
अङ्गुलीः स्फोटयेदुर्व्वीं विलिखेत् प्रहसेदपि ।
वेपथुश्चास्य भवति त्रस्तश्चैकैकमीक्षते ।
विवर्णवक्त्रो ध्यामश्च नखैः किञ्चिच्छिनत्ति च ।
आलभेत सकृद्दीनः करेण च शिरोरुहान् ।
निर्यियासुरपद्वारैर्वीक्षते च पुनः पुनः ।
वर्त्तते विपरीतञ्च विषदाता विचेतनः ॥"
इङ्गितमभिप्रायसूचक आकारः । मुखवैकृतं मुखवैवर्ण्यादिः । एभिर्लिङ्गैः वक्ष्यमाणैः । न ददात्युत्तरं पृष्टः स्वीयापराधजनितव्यामोहात् । सङ्कीर्णं अस्फुटम् । भयजवायुजनितपर्व्वशब्दापनोदायाङ्गुलीः स्फोटयेत् । प्रहसेत् अहेतावपि । ध्यामः दग्धसमानवर्णः । आलभेत् स्पृशेत् । विपरीतं यथा स्यादेवं वर्त्तते ।
जङ्गमविषाणां सामान्यानां कार्य्यमाह ।
"निद्रां तन्द्रां क्लमं दाहं सम्पाकं लोमहर्षणम् ।
शोथञ्चैवातिसारञ्च कुरुते जङ्गमं विषम् ॥"
जङ्गमेषु तीक्ष्णतरत्वेन सर्पानाह ।
"वातपित्तकफात्मानो भोगिमण्डलिराजिलाः ।
यथाक्रमं समाख्याता द्व्यन्तरा द्वन्द्वरूपिणः ॥"
भोगिनः फणिनः । ते च विंशतिः ।
"मण्डलैर्व्विविधैश्चित्राः पृथवो मन्दगामिनः ।
षट् ते मण्डलिनो ज्ञेया ज्वलनार्कसमा विषैः ॥
स्निग्धा विविधवर्णाभिस्तिर्य्यगूर्द्ध्वञ्च राजिभिः ।
चित्रिता इव ये भान्ति राजिलास्ते हि तेऽपि षट् ॥"
एते यथाक्रमं वातपित्तकफात्मानः । द्व्यन्तरा द्वे अन्तरे भेदौ येषां ते द्व्यन्तराः । यथा भोगिनो मण्डलिभ्यो जाताः इत्यादि ॥ * ॥
भोगिप्रभृतिसर्पदंशलक्षणभेदमाह ।
"दंशो भोगिकृतः कृष्णः सर्व्ववातविकारकृत् ।
पीतो मण्डलिनः शोथो मृदुः पित्तविकारवान् ।
राजिलोत्थो भवेद्दंशः स्थिरशोथश्च पिच्छिलः ।
पाण्डुः स्निग्धोऽतिसान्द्रासृक् सर्व्वश्लेष्मविकारवान् ॥"
देशविशेषे कालविशेषे च दष्टस्यासाध्यत्वमाह ।

"अश्वत्थदेवायतनश्मशान-
वल्मीकसन्ध्यासु चतुष्पथेषु ।
याम्ये सपित्र्ये परिवर्ज्जनीया
ऋक्षे नरा मर्म्मसु ये च दष्टाः ॥"

याम्ये भरण्याम् । पित्र्ये मघायाम् ।

"दर्व्वीकराणां विषमाशु हन्ति
सर्व्वाणि चोष्णे द्विगुणीभवन्ति ॥"

उष्णे उष्णसंयोगे । दर्व्वीकरलक्षणमाह ।
"रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ।
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥"
नरेषु येषु विषमाशु मारकं भवति तानाह ।

"अजीर्णपित्तातपपीडितेषु
बालेषु वृद्धेषु बुभुक्षितेषु ।
ग्रीवा नते केशविशीर्णता वा
हनुग्रहे गर्भवतीषु चापि ।
प्रस्रवते यस्य न रक्तमङ्गात्
राज्यो लताभिश्च न संभवन्ति
शीताभिरद्भिश्च न रोमहर्षो
विषाभिभूतं परिवर्जयेत्तम् ।
जिह्मं मुखं यस्य च केशशातो
नासावसादश्च सकण्ठभङ्गः ।
कृष्णश्च रक्तः श्वयथुश्च दंशे
हन्वोः स्थिरत्वञ्च"

केशशातः आकर्षणात् । ... नतत्वम् । कण्ठभङ्गः ... स्थिरत्वं चर्व्वणाक्षमता ॥ * ॥ अपि च ।

"वर्त्तिर्घना यस्य निरेति वक्त्रा-
द्रक्तं स्रवेदूर्द्ध्वमधश्च यस्य ।
दंष्ट्रानिपाताश्चतुरश्च यस्य
यस्यापि वैद्यः परिवर्जयेत्तम् ॥"

वर्त्तिः वर्त्तिरूपम् । रक्तं यस्य च ।

"उन्मत्तमत्यर्थमुपद्रुतं वा
हीनस्वरं वाप्यथवा विवर्णम् ।
सारिष्टमत्यर्थमवेगिनञ्च
जह्यान्नरं तस्य न"

अत्यर्थमुपद्रुतं वा ... उपद्रुतम् । हीनस्वरं स्वल्पस्वरम् । सारिष्टं ... अवेगिनं वेगो विषवेगः तद्रहितम् ॥ * ॥ स्थावरं ... जीर्णत्वादिभिः कारणैर्दूषीविषं तदाह ।

"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितं वा ।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति ॥"

जीर्णं अतिपुराणम् । विषघ्नौषधीभिर्वीर्य्यहीनीकृतम् । गुणविप्रहीनं स्वभावादेव दश- मध्ये द्वित्र्यादिगुणहीनम् ॥ * ॥ ... कार्य्यमाह ।

"वीर्य्याल्पभावान्न ...
कफान्वितं वर्षगणानुबन्धि ।
तेनार्द्दितो भिन्नपुरीषवर्णो
विगन्धवैरस्ययुतः पिपासी ।
मूर्च्छां भ्रमं गद्गदवाक्यताञ्च
विचेष्टमानोऽरतिमाप्नुयाच्च ।"

न निपातयेत् न मारयति । ... मन्दीकृततीक्ष्णादिगुणम् । ... भिन्नपुरीषवर्णः भिन्नपुरीषो ... विचेष्टमानो ... व्याधीन् लभते ॥ * ॥ अपरोऽपि विषे विशेषमाह ।

ामा ग्रयस्थे कफवातरोगी
ाशयस्थोऽनिलपित्तरोगी ।
ान् मस्तकस्थाश्च शिरोग्रहश्च
तुङ्गमपक्ष यथा विहङ्गः ।”
शरीरस्थ: केशा: अङ्गरुहि च रोमाणि
। एतदपि लिङ्गं पक्वाशयस्थे दूषीविषे
। स्थिरं रसादिष्वथ वद्ययोक्तान्
धातुप्रभवान् विकारान् । तत् दूषी-
यथोक्तान् जनयते व्याधिस्तद्दोषी-
। * । दूषीविषस्य प्रकोपसमयमाह ।
होमन्तु शीतानिलदुर्दिनेषु
ाशु पूर्वं शृणु तस्य रूपम् ।” * ।
तस्य दूषीविषस्य पूर्वरूपमाह ।
निद्रागुरुत्वञ्च विजृम्भणञ्च
हर्षोऽथवाङ्गमर्दः ।”
ात्रप्रशिथिलम् । हर्षः रोमाञ्चः । * ।
: ।
ततः करोत्यन्नमदाविपाका-
रोचकं मण्डलकोठमोहम् ।
क्षयं पाणिपदास्यशोथं
रो तथा छर्द्दिमथातिसारम् ।”
श्वासतृषौ ज्वरांश्च कुर्य्यात् प्रवृद्धिं
चापि । अन्नमदः अन्ने भुक्ते पुनरुद्-
: अविपाकः । * । अन्यस्य दूषीविष-
नकारभेदमाह ।
टस्थादन्यदन्यद्वयेत्तथान्य-
ाद्गारन्यत् जनयेच्च गुल्मम् ।
ाद्गगदमन्यज्जनयेच्च कुष्ठं
तांस्तान् विकारांश्च बहुप्रकारान् ।”
दूषीविषम् । तांस्तान् विकारान् विसर्प-
ादीन् । * । दूषीविषस्य निरुक्तिमाह ।
देशकालान्नदिवास्वप्नैरभीक्ष्णशः ।
संदूषयेद्धातून् तस्मात् दूषीविषं स्मृतम् ।”
अनूपादिः । कालो दुर्दिनादिः । अन्नं
तिलमसुरादि । धातुदूषकत्वाद्दूषीवि-
* । दूषीविषस्य साध्यत्वादिकमाह ।
मात्मवतः सद्यो याप्यं संवत्सरोषितम् ।
ासाध्यं स्यात् क्षीणस्याहितसेविनः ।”
विषं द्विविधम् । एकं सविषं दूषीविष-
। अपरमविषं तदेव गरसंज्ञम् । तथा च
सर्पादिनामान् ।
गरश्च द्विविधं द्वितीयं विषमुच्यते ।
यत्तु सविषमविषं गर उच्यते ।”
ां कृत्रिमं विषम् । द्वितीयं स्वाभावि-
। मध द्विविधम् । * । तत्र दूषीविष-
ाय गरं दर्शयितुमाह ।
ाम्यापि स्त्रियः स्नेहरतोलाभाज्जनात्
[illegible] ।
[illegible] यतात् प्रयच्छन्त्यनभिज्ञाताः ।”*
[illegible]माह ।
[illegible] धातुक्षीणत्वादिभ्युपद्रवान्वि-
[illegible] ।

मर्म्मप्रधमनाभानं हृत्तयोः शोफसम्भवः ।
जठरं ग्रहणीरोगा यक्ष्मा गुल्मः क्षयो ज्वरः ।
एवंविधस्य चान्यस्य व्याधेर्लिङ्गञ्च जायते ।”
तैर्गरैः स्त्रीरजःप्रभृतिभिः । ज्वरश्वासोप-
जायन इति अपाकात् । मर्म्मप्रधमनं मर्म्म-
व्यथाम् । क्षयो धातुक्षयः । * । लूतानां जन्म-
विशिष्टामुत्पत्तिं संख्याञ्चाह ।
“यस्मात् लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः ।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु
षोड़श ।”
तत्र सुश्रुतः ।
“विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम् ।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल ।
कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दवः ।
अपतन्दर्शनादेव रुषस्तस्तीव्रवर्च्चसः ।
लूने तृणे महर्षेस्तु धेन्वर्थे सम्भृतेऽपि च ।
ततो जातास्त्विमे घोरा नानारूपा महाविषाः ।
साध्यासाध्या कष्टसाध्या वर्ण्यास्ताश्च एव हि ।
तत्र तृणलताप्रभृतयोऽष्टौ कष्टसाध्याः । सौव-
र्णिकाप्रभृतयोऽष्टावसाध्याः । * । तासां सामा-
न्यानां दंशलक्षणमाह ।
“ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च ।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदो-
षजाः ।
पिड़का विविधाकारा मण्डलानि महान्ति च ।
शोथो महान्तो मृदवो रक्ताः श्यावाश्चला-
स्तथा ।
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम् ।”
दंशकोथः दंशमध्ये पूतिभावः ।
“दंशमध्ये तु यत् कृष्णं श्यावं वा जालमावृतम् ।
दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम् ।
दूषीविषाभिस्तामिस्तं दष्टमिति निर्द्दिशेत् ।”
सौवर्णिकादयोऽष्टावसाध्याः प्राणहरास्तासां
लक्षणमाह ।
“शोथः श्वेता सिता रक्ता पीता वा पिड़का
ज्वरः ।
प्राणान्तिको भवेद्दाहः श्वासहिक्का शिरो-
ग्रहः ।”
आखुदूषीविषलक्षणमाह ।
“आदंशाच्छोणितं याति मण्डलानि ज्वरो-
ऽरुचिः ।
लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्द्दिते ।”
[illegible]माह ।
“[illegible] ।
[illegible] ।”
[illegible] इति तन्त्रा-
न्तरे । * । [illegible]माह ।
“[illegible] च ।
[illegible] ।”
[illegible] लक्षणमाह ।
“[illegible] च ।
[illegible] ।”

असाध्यवृश्चिकदष्टस्य लक्षणमाह ।
“दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः ।
मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून् ।”
असाध्यैर्वृश्चिकैस्त्रिपालिकादिभिः । हृद्घ्राणर-
सनः हृदादिकार्य्यरहितो भवति । अत्यर्थं
वेदनार्त्तः इत्यन्वयः । कणभदष्टस्य लक्षणमाह ।
“विसर्पः श्वयथुः शूलं ज्वरश्छर्द्दिरथापि च ।
लक्षणं कणभैर्दष्टे दंशश्चैवावशीर्य्यते ।”
कणभः कीटविशेषः । उच्चिटिङ्गदष्टस्य लक्षण-
माह ।
“हृष्टरोमोच्चिटिङ्गेन स्तब्धलिङ्गो भृशार्त्ति-
मान् ।
दष्टः शीतोदकेनैव सिक्तान्यङ्गानि मन्यते ।”
हृष्टरोमा अधिकमहृष्टरोमा । उच्चिटिङ्ग-
श्चोटाकीटविशेषः । * । सविषमण्डूकदष्टस्य
लक्षणमाह ।
“एकदंष्ट्रार्द्दितः शूनः सरुजः पीतकः सतृट् ।
छर्द्दिर्निद्रावान् दष्टो मण्डूकैः सविषैर्भवेत् ।”
एकदंष्ट्रार्द्दितः स्वभावादेकयैव दंष्ट्रया दष्टो
भवति । * । मत्स्यविषस्य कार्य्यमाह ।
“मत्स्यास्तु सविषाः कुर्य्युर्दाहं शोथं रुजं तथा ।”
जलौकोविषकार्य्यमाह ।
“कण्डूशोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः ।”
कुर्य्युरिति शेषः । * । गृहगोधिकाविषकार्य्य-
लक्षणमाह ।
“विदाहं श्वयथुं तोदं स्वेदं गृहगोधिका ।”
कुर्य्युः । इति शेषः । * । शतपदीविषकार्य्यमाह ।
“दंशे स्वेदं रुजं दाहं कुर्य्यात् शतपदीविषम् ।”
शतपदी गिजाइ इति लोके । * । मशकविष-
कार्य्यमाह ।
“कण्डूमान् मशकैरीषच्छोथः स्यान्मन्दवेदनः ।”
असाध्यमशकलक्षणमाह ।
“असाध्यकीटसदृशमसाध्यं मशकक्षतम् ।”
असाध्यकीटसदृशं असाध्यैः कीटैस्तुल्यम् । क्षतं
दंशः मशकदंशनम् । * । मक्षिकादष्टस्य
लक्षणमाह ।
“सद्यःप्रस्राविणी श्यावा दाहमूर्च्छाज्वरा-
न्विता ।
पिड़का मक्षिकादंशे तासान्तु स्थगिकासुहृत् ।”
[illegible] । तासां [illegible] मध्ये
[illegible]
[illegible] । [illegible] कार्य्यमाह ।
“[illegible] ।
[illegible] ।”
[illegible] ।
[illegible] । [illegible]
लक्षणमाह ।
“[illegible]
[illegible] ।
[illegible]
[illegible] ।”
[illegible]

अर्कमूला। ईशुरमूल इति भाषा। इति शब्द-
चन्द्रिका। (अस्याः पर्य्यायो यथा,—
"अर्कपत्रा सुनन्दा स्यादर्कमूला विषापहा।"
इति वैद्यकरत्नमालायाम्।)
सर्पकङ्कालिका। इति रत्नमाला।

विषाभावा, स्त्री, (विषस्याभावो यत्र सा।)
निर्व्विषा। इति राजनिर्घण्टः।

विषायुधः, पुं, (विषमेवायुधं यस्य।) सर्पः। इति
शब्दरत्नावली। विषयुक्तास्त्रे, क्ली।

विषारः, पुं. (विषेण ऋच्छतीति। ऋ + अण्।
लस्य रत्वम्।) सर्पः। इति शब्दचन्द्रिका।

विषारातिः, पुं, (विषस्यारातिः नाशकः।) कृष्ण-
धत्तूरकः। इति राजनिर्घण्टः।

विषारिः, पुं, (विषस्यारिः।) महाचञ्चुशाकः।
घृतकरञ्जः। इति राजनिर्घण्टः। (विषनाशक-
मात्रे, त्रि।)

विषास्यः, पुं, (विषमास्ये यस्य।) सर्पः। इति
शब्दरत्नावली। विषयुक्तमुखे, त्रि।

विषास्या, स्त्री, भल्लातकः। इति शब्दचन्द्रिका।
(भल्लातकशब्देऽस्या विषयो विज्ञेयः।)

विषु, व, साम्यम्। इति विषुवच्छन्दटीकायां
भरतः। नानारूपम्। इति रामाश्रमः।

विषुणः, पुं, (विषु साम्यमस्यास्तीति। "लोमा-
दीति।" ५। २। १००। इति नः। णत्वात्
णत्वम्।) विषुवम्। यथा। "विषु नानारूपं
समत्वं विश्वक् तदस्यास्तीति विग्रहे पामिलु-
गादिपरलोपश्चालतसर्व्वैरिति पामादि सूत्रेण
नः णत्वम्।" इत्यमरटीकायां रामाश्रमः।
(नानारूपम्। यथा, ऋग्वेदे। ३। ५४। ८।
"चरत्पतत्रि विषुणं विजातम्।"
"विषुणं विश्वक् नानारूपम्।" इति तद्भाष्ये
सायणः। कर्म्मठः। यथा, ऋग्वेदे।८।२९।१।
"बभ्रुरेको विषुणः।"
"विषुणः विस्वञ्चनः।" इति तद्भाष्ये सायणः।
विप्रकीर्णः। यथा, ऋग्वेदे। ५। १२। ५।
"सखायस्ते विषुणा अग्न एते।"
"विषुणाः विप्रकीर्णाः सर्व्वथाप्राः।" इति तद्-
भाष्ये सायणः। पराङ्मुखः। यथा, ऋग्वेदे।
५। ३४। ६।
"विभञ्जनुः सम्रनौ चक्रमासजो-
ऽसुम्रनो विषुणः सुम्रनो वृधः।"
"विषुणः पराङ्मुखः।" इति तद्भाष्ये सायणः।)

विषुवं, क्ली, विषुवम्। इत्यमरटीकायां भरतः।

विषुवं, क्ली, समरात्रिन्दिवकालः। तत्पर्य्यायः।
विषुवत् २। इत्यमरः। विषुवम् ३ विषुवत् ४
विषुवन् ५। इति शब्दरत्नावली। विषुणः ६।
इति रामाश्रमः। विषुवः ७। इति मुकुटः।
तत्तु मेषतुलयोः संक्रान्तौ। यथा,—
"मकरकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापराः।"
इति तिथ्यादितत्त्वम्॥*॥
* तु मकरादिषट्कराशिविषुवनामभ्यां क्रमेण ख्याते।

यथा,—
"विषुवाख्यो वत्सरः स्यादिति शब्दविदां मतम्।
महाविषुवमाख्यातं ऋतिभिश्चैत्रचिह्नितम्।
तथा स्याज्जलविषुवं क्रमादाश्विनचिह्नितम्॥"
इति शब्दरत्नावली॥*॥

विषुवारम्भकालो यथा,—
"मृगसंक्रान्तितः पूर्व्वं पश्चात् तारा दिनान्तरे।
एकवर्षे चतुःपञ्चपलभागक्रमेण तु।
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
पुनःक्रमेण च तद्वत् स्यादुदगयानं रवेर्ध्रुवम्।
कर्किसंक्रमणे तद्दभितो दक्षिणायनम्॥
अयनांशक्रमेणैव विषुवारम्भणं तथा।
रविसंक्रान्तितो मेषतुलयोरभितः पुनः॥
विषुवं मीनकन्यार्द्धे लेकाश्चीन्द्रशकाब्दके।
दिनमानाय मीनार्द्धं मेषार्द्धं पालिकं शतम्॥
ततो वृषार्द्धपर्य्यन्तमशीतिः पलभागिनी।
मिथुनार्द्धं चतुस्त्रिंशत्पलानां वर्द्धते क्रमात्॥
कर्कटार्द्धेषु षट्त्रिंशत् सिंहार्द्धेषु द्वाशीतकम्।
कन्यार्द्धेषु द्विनवतिः क्रमात् त्रुट्यति वासरे॥
कन्यार्द्धादिनमानं बोध्यं पूर्व्वक्रमेण हि।
दिने दिने भागहारान्मानं बोध्यं दिवानिशोः॥
एकमानं दशवर्षस्या अक्षांशमानिर्णयः।
षट्षष्टिवत्सरानेवं ततः स्यात् षोड़शांशके।
पुनस्तद्वत्सरांस्तद्वत् एवं चमदशादिके॥"
इति ज्योतिस्तत्त्वम्॥*॥

अन्यच्च
"मेषसंक्रमतः पूर्व्वं पश्चात्तारा दिनान्तरे।
प्रातिलोम्यानुलोम्येन विषुवारम्भणं भवेत्॥
षयोदशदिने सौरे चैत्रे नक्षतिथौ शके।
विषुवारम्भणं तत्र समं मानं दिवानिशोः॥
ततः प्रतिदिनं वेला अपादत्रिपलात्मिका।
वर्द्धते मेषविन्धांशपर्य्यन्तं स्थूलमानतः।
तथा ज्येष्ठान्तपर्य्यन्तं पादोनत्रिपलात्मिका।
तादृगाषाढ़पर्य्यन्तं पलैकप्रमिता मता॥
ततः कर्कटविन्धांशपर्य्यन्तं प्रत्यहं क्रमात्।
अपादपलमानेन वेला त्रुट्यति निश्चितम्॥
तादृग्भाद्रान्तपर्य्यन्तं पादोनत्रिपलात्मिका।
तादृगाश्विनशेषान्तं त्वरनैत्रपलात्मिका॥
दिवामानं दशघटिकाधिका रात्रेः प्रमाणकम्।
वैशाखादौ दिवामानं रात्रिमानं तुलादिषु॥
षट्षष्टिवत्सरानेवं ततः स्यात् द्वादशांशके।
पुनस्तद्वत्सरांस्तद्वत् तत एकादशादिके॥"
इति मनुष्यमुक्तावली॥

विषुवत्, क्ली, विषुवम्। इत्यमरः॥ (यथा, महा-
भारते। १। १६८। १२१।
"भवति सहस्रगुणं दिवसस्य रात्रौ-
र्विषुवति चाक्षयमश्नुते फलम्॥"
व्यापकः। यथा, ऋग्वेदे। १। ८४। १०।
"स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्य्यः।"
"विषुवत व्याप्तवतः प्रकारेण सर्व्वेषु यज्ञेषु
व्याप्नुवतः * * * विषुव व्याप्तौ अस्मा-

दौवादिकः कृप्रत्ययः। ततो
भूमावलुविति मतुप् उदात्तम्।
वयस इति संहितायां दीर्घ-
त्वम्।" इति तद्भाष्ये सायणः।)

विषौषधी, स्त्री, (विषस्यौषधी
इति रत्नमाला।

विष्कम्भः, पुं,
शुभकर्म्मणि
"अगादौ पञ्च
गण्डव्याघातयोः षट् च
वैधृतिव्यतिपातौ
तत्र आतपकम्।
... ...

विस्तारः। (यथा,
प्रतिबन्धः। रूपकाङ्गभेदः।
भेदः। इति मेदिनी। भे, १६।
अयः। अर्गला। इति भरतः।

विष्कम्भी, [न्] पुं, (
ष्कम्भ + णिनिः।) अर्गला।
१ मेलं च वा। इत्यमरटीका
अर्गलं हुड़्कादश इति ख्यात
विष्कम्भाति ...
ष्कम्भी महेश्वरत्
नाम च हृषीके।
पाठः। विष्कम्भो ...
भट्टः। इति मुकुटः।
'विष्कम्भो योगभेदे स्यात्
कपाटाङ्गप्रभेदे च।' इति
विष्कम्भ इति पाठः।" इति

विष्कलः, पुं, (विषं विष्ठां करोति।
कल + अच्।) ग्राम्यशूकरः।
निर्घण्टः।

विष्किरः, पुं, (विकिरतीति।
इगुपधेति कः। "विष्किरः शकुनि
६। १। १५०। इति सुट्। ष
णत्वम्।) पक्षी। इत्यमरः।
मयूरकुक्कुटादयः।
...
लघवः शीतमधुराः कषायाः।
इति राज

अथ विष्किराणां प्रकारा
"वर्त्तकालावविकिर
कलिङ्गकुक्कुटाद्याश्च
विकीर्य्य भक्षयन्तीते
कपिञ्जल इति प्राग्
कुलिङ्ग गवेधा इति

करा मधुराः शीताः कषायाः कटु-
पाकिनः ।
तृष्णाश्लेष्मदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥"
इति भावप्रकाशः ॥
...शालितिलिरविपिष्टलवर्त्तिरविर्त्तिकावर्त्तक-
...चामीकरचकोरकपिञ्जलमयरक्रकरीपचक-
...गारद्धमलपन्तकुलिङ्गलिङ्गिकुरबानुकप्रय-
...तनयक्ष्याह्वा विष्किरा लघवः शीत-
...: कषाया दोषशमनाश्च ॥" इति सुश्रुते
...ने ४६ अध्यायः ॥ * ॥ दर्व्वीकराज्जगेल-
...विषः । यथा,— "पुण्डरीको भ्रुकुटी
... विष्किरः पुष्पाभिकर्णो गिरिसर्पं शत्रु-
...श्वेतोदरो महाशिरा अलगर्द्दो आशी-
...ति ॥" इति च सुश्रुते कल्पस्थाने चतुर्थे-
...ऽः ॥)
...न, प्रविष्टः । विशधातोः क्तप्रत्ययेन
...सिद्धम् ॥
...ती, ("विटपविष्टपविशिपोलपाः ।" इत्यु-
...सूत्रे विष्टपस्थाने विष्टपपाठेन विशधातोः
...प्रत्ययेन साधुः इति केचित् ।) भुवनम् ।
...रः ॥ विष्टपं विष्टपः । इति तट्टीकायां
...यम् ॥ (यथा, रघुः । ११ । १८ ।
"वाणभिन्नहृदया निपेतुषी
सा स्वकाननभुवं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां
रावणश्रियमपि व्यकम्पयत् ॥")
पुं, (वि + स्तम्भ + क्तः ।) प्रतिबन्धः ।
, भागवते । ५ । २२ । १९ ।
॥ इष्टिविष्टम्भदोषशमनः ॥" * ॥
...मथम् । यथा, भारविः । १३ । १६ ।
"प्रविकर्षनिनादभिन्नरन्ध्रः
पदविष्टम्भनिपीडितस्तदानीम् ॥")
...रशेषः । इति मेदिनी । भे, २० ॥ स तु
...ष्टरोगः । तस्य लक्षणमाह ।
"आमं शकृद्वा निचितं क्रमेण
भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं नयथास्वमेनं
विकारमानाहमुदाहरन्ति ॥"
अपक्वमाहाररसं शकृत् पुरीषं वा
निचितं सञ्चितम् । भूयो विगुणानिलेन
...ना विबद्धं आमशोषितं वा यथास्वं
...प्रवर्त्तमानं एनं विकारं आनाह-
... ॥ * ॥ तन्नामजमानाहमाह ।
"तस्मिन् भवत्यामसमुद्भवे तु
तृष्णा प्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं
हृत्स्तम्भ उद्गारविघातनञ्च ॥"
...नं आमशूलिः ॥ * ॥ शकृज्जमाह ।
"स्तम्भः कटीपृष्ठपुरीषमूत्रे
शूलोऽथ मूर्च्छा शकृतो वमिश्च ।
श्वासश्च पक्वाशयजे भवन्ति
तथालसोक्तानि च लक्षणानि ॥"

पक्वाशयजे शकृज्जन्यजे । अलसोक्तानि
आध्मानवातनिरोधादीनि ॥ * ॥ आनाहोदा-
वर्त्तयोश्चिकित्सायास्तुल्यत्वादुभयचिकित्सा अत्र
लिख्यते । अथोदावर्त्तानां चिकित्सा ।
"अधोवातनिरोधोत्थे गुदावर्त्ते हितं मतम् ।
स्नेहपानं तथा स्वेदो वर्त्तयश्चानुलोमनम् ॥
विड्विघातसमुत्थे तु विड्भेद्यं तथौषधम् ।
वर्त्त्यभ्यङ्गावगाहश्च स्वेदो वस्तिर्हितो मतः ॥"
वर्त्तिः फलवर्त्तिः ।
"मूत्रावरोधजनिते क्षीरवारिपिबेत् पिबेत् ।
दुःस्पर्शास्वरसं चापि कषायं ककुभस्य च ॥
दुःस्पर्शा कण्टकारी दुरालभा च तुल्यगुणत्वात् ।
एर्व्वारुबीजं तोयेन पिबेद्वा लवणीकृतम् ।
सितामिक्षुरसं क्षीरं द्राक्षारसमथापि वा ॥
सर्व्वथैव प्रकुर्व्वीत मूत्रकृच्छ्रापहं विधिम् ।
जृम्भाभिघातजे स्नेहं स्वेदं चापि प्रयोजयेत् ॥
अश्रुजामपि युञ्जीत समीरणहरान् विधीन् ।
नेत्रनीरावरोधोत्थे सुप्रेद्वृद्धे प्रशोजलम् ॥
सुप्यात् सुखेन तस्याग्रे कथयेच्च कथाः प्रियाः ।
क्षवाभिघातजे तीक्ष्णाघ्राणनस्यार्कदर्शनैः ॥
प्रवर्त्तयेत् क्षुतं सक्तं स्नेहस्वेदौ प्रशीलयेत् ॥"
तीक्ष्णं मरीचराजिकादि ।
"उद्गारस्यावरोधे तु स्नैहिकं धूममाचरेत् ॥
छर्द्दिनिग्रहसञ्जाते वमनं लङ्घनं हितम् ।
विरेचनं चात्र मतं तैलेनाभ्यञ्जनं तथा ॥
वस्तिशुद्धिकरैः सिद्धं चतुर्गुणजलं पयः ।
आवारिनाशात् क्वथितं पीतवन्तं प्रकामतः ॥
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम् ।
तस्याभ्यङ्गोऽवगाहश्च मदिरा चरणायुधः ॥
शालिः पयो निरूहश्च हितं मैथुनमेव च ।
क्षुद्विघातसमुद्भूते स्निग्धमुष्णं तथा लघु ॥
रुच्यमल्पं हितं भक्ष्यं पुष्पं सेव्यं सुगन्धि यत् ।
तृषाविघातसंभूते शीतः सर्व्वो विधिर्हितः ॥
कर्पूरशिशिरं स्वल्पं पिबेत्तोयं शनैः शनैः ।
श्रमश्वासे धृते शस्तो विश्रामः सरसौदनः ॥
निद्रावेगविघातोत्थे पिबेत् क्षीरं सितायुतम् ।
सुवाहनं सुशय्यात्र हिताः श्रोत्रप्रियाः कथाः ॥"
वातादिवेगविघातजनितानामुदावर्त्तानां चिकि-
त्सामभिधाय रूक्षादिकुपितवातजनितस्य उदा-
वर्त्तस्य चिकित्सामाह ।
"हिङ्गुमाक्षिकसिन्धूत्थैः पिष्टैर्वर्त्तिविनिर्म्मिताम् ।
घृताभ्यक्तां गुदे न्यस्येदुदावर्त्तविनाशिनीम् ॥"
फलवर्त्तिः ।
"मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षीरसमायुक्ता फलवर्त्तिरिहोदिता ॥"
मदनफलादिवर्त्तिः ॥ * ॥
"खण्डपलं त्रिवृताक्षः कृष्णाकर्षं द्वयोश्चूर्णम् ।
प्राग्भोजनस्य मधुना विडालपदकं नरो
लिह्यात् ॥
एतद्गाढ़पुरीषे देयं विज्ञैरुदावर्त्ते ।
मधुरं नरपतियोग्यं चूर्णं नाराचकं नाम्ना ॥"
इति नाराचचूर्णम् ॥ * ॥

"सव्योषं पिप्पलीमूलं त्रिवृद्दन्ती च चित्र-
कम् ।
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम्ना बलवर्णाग्निवर्द्धनम् ।
उदावर्त्तप्लीहगुल्मशोथपाण्डामयापहम् ॥"
इति गुडाष्टकम् ॥ * ॥
"मूलकं शुष्कमार्द्रञ्च वर्षाभूपञ्चमूलकम् ।
हस्तमालफलं चाम्लं पक्वा तेन घृतं
पचेत् ।
तत् पीतं शमयेत् क्षिप्रमुदावर्त्तमशेषतः ॥"
पञ्चमूलकमत्र हस्वम् । शुष्कमूलकाद्यघृतम् ॥ * ॥
अथ आनाहस्य चिकित्सा ।
"तुल्यकारणकार्य्यत्वादुदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ॥
त्रिवृत्कृष्णाहरीतक्यो द्विचतुःपञ्चभागिकाः ।
गुडेन तुल्या वटिका हरन्त्यानाहमुल्वणम् ॥
वर्त्तिस्त्रिकटुसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्वैर्निहिता स्वाङ्गुष्ठपरि-
माणा ॥
वर्त्तिरियं दृष्टफला शनैः प्रणिहिता गुदे घृता-
भ्यक्ते ।
आनाहोदावर्त्तौ शमयति जठरं तथा
गुल्मम् ॥"
त्रिकट्वाद्या वर्त्तिः ॥ इति भावप्रकाशः ॥
(त्रि, विशेषेण स्तम्भयिता । यथा, ऋग्वेदे ।
९ । ८६ । ३५ ।
"दिवो विष्टम्भ उपमो विचक्षणः ॥")
विष्टम्भी, [न्] त्रि, (विष्टभ्नातीति । वि + स्तम्भ
+ णिनिः ।) विष्टम्भरोगजनकः । यथा,—
"वैदला गुरवो भक्ष्या विष्टम्भिष्टमारुताः ॥"
इति राजवल्लभः ॥
(यथा च सुश्रुते । १ । ४५ ।
"प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीत-
लम् ॥"
विष्टम्भोऽस्यास्तीति । विष्टम्भ + इनिः ।)
विष्टम्भरोगविशिष्टश्च ॥
विष्टरः, पुं, (विस्तीर्य्यते इति । वि + स्तृ + अप् ।
"वृक्षासनयोर्विष्टरः ।" ८ । ३ । ९३ । इति
निपातनात् षत्वम् ।) विटपी । इत्युणादिः ।
पीठाद्यासनम् । इत्यमरः ॥ आदिना कुशा-
सनादिग्रहः । इति भरतः ॥ * ॥ (यथा,
भागवते । ३ । २८ । १६ ।
"काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम् ।
दर्शनीयतमं शान्तं मनोनयनवर्द्धनम् ॥")
विष्टरलक्षणमाह । विष्टरस्तु सार्द्धहस्तचामा-
वर्त्तवलितधोमुखाग्रा असंख्यातदर्भाः । तथा
च गृह्यासंग्रहः ।
"ऊर्द्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥"
इति ॥
छन्दोगपरिशिष्टम् ।
"दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥"

एवच ।
"पश्चाशद्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः ।"
इति यदि समूलं तदा ग्राह्यमत्रीयम् । एतेन विष्टरे पञ्चविंशतिसंख्या भवदेवभट्टोक्ता निरस्ता । एवं विष्टरग्रहणं हस्ताभ्यामपि यदुक्तं तदपि निरस्तम् ।
"यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ।"
इति छन्दोगपरिशिष्टात् । इति संस्कारतत्त्वम् ॥

विष्टरश्रवाः, [स्] पुं, ("विष्टराविव श्रवसी यस्येति ।" शिशुपालवधस्य १७ । १९ । टीकायां मल्लिनाथः । "विष्टरेऽश्वत्थवृक्षे श्रूयते नित्यं तत्र वसतीति ।" उणा० ४ । २२६ । इत्यत्र उज्ज्वलदत्तः ।) विष्णुः । इत्यमरः । (यथा, हरिवंशे भविष्यपर्व्वणि । ५१ । १७ ।
"उत्पाद्य हृष्टं दैत्येन्द्रः शतशाखं महाशिखम् ।
तेन तं योधयामास विष्टरश्रवसं प्रभुम् ।")

विष्टरा, स्त्री, गुण्डासिनी । इति राजनिर्घण्टः ॥

विष्टरुहा, स्त्री, स्वर्णकेतकी । इति राजनिर्घण्टः ॥ विष्टारुहा इति च क्वचित् पाठः ॥

विष्टारः, पुं, छन्दोविशेषः । यथा, विष्टारः पङ्क्तिश्छन्दः । इति षत्वप्रकरणे दुर्गादासः ॥

विष्टिः, स्त्री, (विष + क्तिन् ।) वेतनं विना हठाद्वारोद्वहनादिक्लेशः । वेगार इति ख्यातः । तत्पर्य्यायः । आजूः २ । इत्यमरः ॥ हठादभृतिकः क्लेशो विनासरूपो विष्टिरिति भट्टस्वामी । हे वेतनमन्तरेण कर्म्मकरणे कर्म्मकारिणि चेष्यते । विष्टु कर्म्मकरे विष्टिः स्त्रियामभृतिकर्म्मणीति रुद्रः । इति भरतः ॥ * ॥ (यथा, रामायणे । २ । ८२ । २० ।
"विष्टिकर्म्मान्तिकाः सर्व्वे मार्गशोधकरक्षकाः ।")
वेतनम् । कर्म्म । इति मेदिनी । टे, २६ ॥ (यथा, भागवते । ७ । ८ । ५५ ।
"वयमीश किन्नरगणास्तवानुगा
दितिजेन विष्टिममुनानुकारिताः ।")
भद्रा । वर्षणम् । इति विश्वः ॥ प्रेषणम् । इति हेमचन्द्रः ॥ सा च भद्रा ववाद्येकादशकरणान्तर्गतसप्तमकरणं पञ्जिकायां तस्या चक्रं भूष्यम् । यथा,—
"ववबालवकौलवतैतिल
गरवणिजः सविष्टयः सप्त ।
शकुनिचतुष्पदनागाः
किन्तुघ्न ध्रुवाणि करणानि ॥
शुक्लादितिथिशेषार्द्धात् प्रथमे तत्तुरीयके ।
आद्यन्ताद्धांत् क्रमेण स्युरष्टावृत्त्या ववादयः ।
शुक्लादशम्याश्चतुर्थ्याश्च शेषार्द्धे शुक्लपक्षके ।
अष्टमीपौर्णमास्योश्च पूर्व्वार्द्धे विष्टिरीरिता ।
कृष्णपक्षे तृतीयाया दशम्याश्च परार्द्धतः ।
सप्तम्याश्च चतुर्दश्याः पूर्व्वार्द्धे विष्टिसम्भवः ।
विष्टिश्च विघ्नदानि विष्टिं यत्नेन वर्ज्जयेत् ।
विष्टिशेषे निषक्ते हि पुच्छे कार्य्यं जयावहम् ।"
कर्म्मप्रकाशे ।
"नाशस्तु यत्र वदने गलकण्ठयेका
वक्षो दशैकमहिता नियतं पतङ्गः ।
नाभिः कटिः षडथ पुच्छमता च तिस्रो
विष्टेर्यमे निगदितोऽत्र विभाग एषः ॥
मुखे कार्य्यक्षतिर्भवति मरणं चाथ गलके
धनच्छानिर्वक्षस्यथ कटितटे बुद्धिविलयः ।
कलिर्नाभीदेशे विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः इपगिनि फलं पूर्व्वमुनयः ॥
मनुवसुनगतिथिश्रुतदश-
शिवगुणवसंख्यासु तिथिषु पूर्व्वान्ययोः ।
१४ । ८ । ७ । १५ । ४ । १० । ११ । ३ ।
आयाति विष्टिरेषा एते शुभदा पुरस्तशुभदा ॥"
पूर्व्वान्ययोः पूर्व्वान्याद्दिवरात्र्योर्भवति इत्यर्थः ॥
"एकैव होना द्विगुणा तिथिस्तु
सप्ताविशिष्टं करणं ववादि ।
पूर्व्वे परेऽथ्यैवमयं विशेषो
दिवं गुणा चन्द्रविवर्ज्जिता च ॥
किंस्तुघ्नसंज्ञं करणं प्रदिष्ट-
मादेक्षिपेरादिरवे सदैव ।
उपान्त्यशेषे शकुनिस्तु दर्शे
पूर्व्वे चतुष्पादपरे च नागः ॥
इन्द्रकमलभविश्वार्य्यमभूमिपः सयमा ववादेः ।
कलिवृषफणिमारुताः पतयः शकुन्यादेः ।"
ववाद्यधिपकथनम् ॥
"पौष्टिकस्थिरशुभानि ववाख्ये
बालवे द्विजहितादपि कर्म्म ।
कौलवे प्रमदामित्रविधानं
तैतिले शुभगताश्रयकर्म्म ॥
गरे च बीजाश्रयकर्षणानि
वणिज्यपि स्थैर्य्यवणिक्क्रिया च ।
न सिद्धिमाप्नोति कृतञ्च विष्ट्यां
विषाभिघातादिषु तत्र सिद्धिः ॥
मन्त्रौषधानि शकुनौ च सपौष्टिकानि
गोविप्रराज्यपितृकर्म्म चतुष्पदे तु ।
सौभाग्यदारुणस्थितिध्रुवकर्म्मनागे
किंस्तुघ्ननाम्नि शुभपौष्टिकमङ्गलानि ॥"
इति ज्योतिस्तत्त्वम् ॥
(यथा, कलाविलासे । २ । ११ ।
"कश्चिद्वदति धनेश दरिद्रं निःस्पृहं कृतगन्धाक्षि ।
आतःपरं प्रभाते विष्टिदिनं किं करोम्यद्य ।")

विष्टिः, त्रि, (विष + क्तिप् ।) कर्म्मकरः । इति मेदिनी । टे, २६ ॥

विष्ठलं, क्ली, (विदूरं स्थलम् ।) दूरस्थानम् । यथा । विकुशमिपरिभ्यः स्थलस्य । एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलं कुष्ठलं शमिष्ठलं परिष्ठलम् । इति सिद्धान्तकौमुदी ॥

विष्ठा, स्त्री, (विविधप्रकारेण तिष्ठति उदरे इति । वि + स्था + कः । उपसर्गादिति षः ।) विविधप्रकारेणोदरे तिष्ठति या ।
१ अवस्करः २ शमलम् ३ शकृत्
पुरीषम् ७ वर्च्चस्कम् ८ विट् ९
वर्च्चः १० । इति जटाधरः । कोल
१२ कल्कम् १३ मलम् १४ । टी
वणी । किट्टम् १५ पूतिक...
निर्घण्टः । (यथा,—
"गुरोरुच्छिष्टं प्रकीर्णं
अहिनाचरणादेव विष्ठायां
इ...
तद्दर्शननिषेधो यथा,—
"न पश्येत् विण्मूत्रे
न च मूत्रं पुरीषं वा न च
जले तद्दूषणनिषेधो यथा,—
"नाप्सु श्लेष्म च ष्ठीवनं वाप्सु...

मोक्षदः संविशेन्निशं न
इति कौर्म्मे ...
तद्दूषणविधानं
यम् ॥

विष्णुः, पुं, अग्निः । इति हेमचन्द्रः ।
वसुदेवता । इति शब्दर... । (...
नामधेयतमः । यथा, महाभार...
"एकादशस्तथा त्वष्टा द्वादशो...
...
धर्म्मशास्त्रकर्त्तृमुनिविशेषः । यथ...
...
यमापस्तम्बसंवर्त्ताः कात्यायन...
पराशरव्यासशङ्खलिखिता दक्ष...
शातातपो वशिष्ठश्च
इति
नारायणो रूपविशेषः । तत्...
वेवेष्टि व्याप्नोति विश्वं यः ।
व्याप्नोति विश्वमिति वा । विश...
भक्तान् मायापाशादेव ...
विशति सर्व्वभूतानि विश...
चक्रेति वा ।
"यस्माद्विश्वमिदं सर्व्वं ...
तस्मात् स प्रोच्यते विष्णुर्विशधातोः...
इति विष्णुपुराणम् । इत्यमरटी...
("बृहत्त्वात् विष्णुरुच्यते ।" ...
५ । ७० । ३ ॥) तत्पर्य्यायः ।
वैकुण्ठः ४ विष्टरश्रवाः ५ दामोदर...
७ केशवः ८ माधवः ९ स्वभूः १० ...
पुण्डरीकाक्षः १२ गोविन्दः ...
पीताम्बरः १५ अच्युतः १६ शार्ङ्गी...
वैशः १८ जनार्द्दनः १९ उपेन्द्र...
२१ चक्रपाणिः २२ चतुर्भुजः ...
मधुरिपुः २५ वासुदेवः २६ ...
देवकीनन्दनः २८ शौरिः २९ ...
पुरुषोत्तमः ३१ वनमाली ३२ ...
कंसारातिः ३४ अधोक्षजः ३५ ...

...न ३७ विभु: ३८ श्रीवत्सलाञ्छन: ३९ ।
...: । पुराणपुरुष: ४० वलि: ४१ शत-
...४२ सनातन: ४३ पद्मनाभ: ४४ जग-
...४५ विश्वरूप: ४६ महानन्द: ४७ मुकुन्द:
...हुषी ४९ वामन: ५० शिपिविष्ट: ५१
...ण: ५२ अज: ५३ वासु: ५४ । इति
...र: । शौरि: ५५ कंसारि: ५६ मुरारि:
...विशु: ५८ मधुजित ५९ मधुसूदन: ६०
... ६१ पुरुष: ६२ श्रीगर्भ: ६३ श्रीकर: ६४
... ६५ श्रीधर: ६६ श्रीनिकेतन: ६७
...ल: ६८ श्रीश: ६९ प्रभु: ७० सुरधीधर:
...जगदीश: ७२ गदाधर: ७३ नन्दात्मज:
...ारसिंह: ७५ हरेश: ७६ गोपाल: ७७
...न्दन: ७८ नरकजित् ७९ श्यामगर्भ: ८०
...: ८१ जितामित्र: ८२ भगधामा ८३
...न्द्र: ८४ पुरकेशु: ८५ आदिदेव: ८६
...ह: ८७ सहस्रवदन: ८८ त्रिपात् ८९
...श: ९० हरि: ९१ यदुश: ९२ यादव: ९३
...दसूदन: ९४ पूतनारि: ९५ महायोगी ९६
...९७ चाणूरसूदन: ९८ हंसगत: ९९ शता-
१०० कालनेमिरिपु: १०१ धेनुकारि: १०२
...म्नु: १०३ विरिश्चि: १०४ धरणीधर:
...यदुभर्त्ता १०६ वर्द्धमान: १०७ शतानन्द:
...दयात्मक: १०८ मधुरेश: ११० द्वारकेश:
...रक्तिदेव: ११२ दयाकपि: ११३ । इति
...रत्नावली । जिष्णु: ११४ दाशार्ह: ११५
...शयन: ११६ इन्द्रानुज: ११७ नरायण:
...जलशय: ११९ यज्ञपुरुष: १२० तार्क्ष-
... १२१ षड्बिन्दु: १२२ पद्मेश: १२३ मार्ज:
...जित: १२५ कुमोदक: १२६ जहु: १२७
... १२८ शतावर्त्त: १२९ शङ्खकेशी १३०
... १३१ वेधा: १३२ पृश्निगर्भ: १३३ आत्मभू:
...पाण्डवायन: १३५ सुवर्णबिन्दु: १३६
...स: १३७ देवकीसुनु: १३८ गोविन्द: १३९
...ङ्गधर: १४० यदुनाथ: १४१ गदाभृत् १४२
...भृत् १४३ चक्रभृत् १४४ श्रीवत्सभृत् १४५
...भृत् १४६ ।*। अस्य वध्यादयो यथा,—
...ुधेनुकचाणूरपूतनायमलार्ज्जुना: ।
...नेमिहयग्रीवशकटारिष्टकैटभा: ।
...केशिमुरौ साल्वमैन्दद्विविदराहव: ।
...ण्यकशिपुर्व्वाण: कालीयो नरको बलि: ।
...ुपालश्चास्य वध्या वैनतेयश्च वाहनम् ।
...ोऽस्य पाञ्चजन्योऽङ्क: श्रीवत्सोऽसिस्तु
नन्दक: ।
...ा कौमोदकी चापं शार्ङ्गं चक्रं सुदर्शनम् ।
...ि: स्यमन्तको हस्ते भुजमध्ये तु कौस्तुभ: ।”
इति हेमचन्द्र: ।*।
...य शतनामानि पाद्मोत्तरखण्डे १११ अध्याये
...हस्रनामानि च महाभारतीयशान्तिपर्व्वणि
...९ अध्याये द्रष्टव्यानि ।*। अस्य मन्त्रो वर्णश्च
...ा,—
...रमाद्यं द्वितीयञ्च उपान्त्यं चान्त्यमेव च ।

वासुदेवो बल: कामो ह्यनिरुद्धो यथाक्रमम् ।
शगवजात् गदिक्लेनन् हुं फों भृङ्गिमन्त्रका: ।
नारायणस्तथा ब्रह्मा विष्णु: सिंहो वराह-
राट् ।
सितारक्तहरिद्राभा नीलश्यामललोहिता: ।
मेघाग्निमधुपिङ्गाभा वर्णतो नव नायका: ।”*।
अस्याङ्गानि तेषां मन्त्रवर्णाश्च यथा,—
“कं टं पं शं गरुत्मानं स्याज्जं खं वं सुदर्शनम् ।
खं चं फं षं गदादेवी छं नं मं चाच शङ्खकम् ।
घं टं भं हं भवेच्छ्रीश्च गं जं वं शश्च पुष्टिकम् ।
घं यं मं वनमाला स्याच्छ्रीवत्सं सं दं नं भवेत् ।
छं तं पं कौस्तुभ: प्रोक्तश्चानन्तो ह्यहमेव च ।
इत्यङ्गानि यथायोगं देवदेवस्य वै दश ।*।
गरुडोऽम्बुजसङ्काशो गदा चैवासिताकृति: ।
पुष्टि: शिरीषपुष्पाभा लक्ष्मी: काञ्चनसन्निभा ।
पूर्णचन्द्रनिभ: शङ्ख: कौस्तुभस्तरुणद्युति: ।
चक्रं सूर्य्यसहस्राभं श्रीवत्स: कुन्दसन्निभ: ।
पञ्चवर्णा मता माला ह्यनन्तो मेघसन्निभ: ।
विद्युद्रूपाणि चास्त्राणि यानि नोक्तानि वर्णत: ।
इति गारुडे ११ अध्याय: ।*।
तस्य जगत्पालनादिर्यथा,—
“रजोगुणमयं चान्यद्रूपं तस्यैव धीमत: ।
चतुर्म्मुख: स भगवान् जगत्सृष्टौ प्रवर्त्तते ।
सृष्टञ्च पाति सकलं विश्वात्मा विश्वतोमुख: ।
सत्त्वं गुणमुपाश्रित्य विष्णुर्व्विश्वेश्वर: स्वयम् ।
अन्तकाले स्वयं देव: सर्व्वात्मा परमेश्वर: ।
तमोगुणं समाश्रित्य रुद्र: संहरते जगत् ।
एकोऽपि सन्महादेवस्त्रिधासौ समवस्थित: ।
सर्गरक्षालयगुणैर्न्निर्गुणोऽपि निरञ्जन: ।
एक: सन् स द्विधा चैव त्रिधा च बहुधा पुन: ।
त्रिधा विभज्य चात्मानं त्रैलोक्ये संप्रवर्त्तते ।
सृजते वीक्षते चैव ग्रसते च विशेषत: ।
यस्मात् सृष्ट्वानुगृह्णाति ग्रसते च पुन: प्रजा: ।
गुणात्मकत्वात्त्रैलोक्ये तस्मादेक: स उच्यते ।
अग्रे हिरण्यगर्भ: स प्रादुर्भूत: सनातन: ।
आदित्वादादिदेवोऽसावजातत्वादज: स्मृत: ।
देवेषु च महादेवो महादेव इति स्मृत: ।
पाति यस्मात् प्रजा: सर्व्वा: प्रजापतिरिति
स्मृत: ।
बृहत्त्वाच्च स्मृतो ब्रह्मा परत्वात् परमेश्वर: ।
वशित्वादप्यवश्यत्वादीश्वर: परिभाषित: ।
ऋषि: सर्व्वत्रगत्वेन हरि: सर्व्वहरो यत: ।
अनुत्पादात् चाग्रपूर्व्वात् स्वयम्भुरिति स स्मृत: ।
नराणामयनं यस्मात् तस्मान्नारायण: स्मृत: ।
हर: संसारहरणाद्विभुत्वाद्विष्णुरुच्यते ।
भगवान् सर्व्वविज्ञानादवनादोमिति स्मृत: ।
सर्व्वज्ञ: सर्व्वविज्ञानाच्छर्व्व: सर्व्वमयो यत: ।
शिव: स्यान्निर्म्मलो यस्माद्विभु: सर्व्वगतो
यत: ।
तारणात् सर्व्वदु:खानां तारक: परिगीयते ।
बहुनात्र किमुक्तेन सर्व्वं विष्णुमयं जगत् ।”
इति कौर्म्मे ४ अध्याय: ।*।

अपि च ।
मत्स्य उवाच ।
“महाप्रलयकालान्तु एतदासीत्तमोमयम् ।
प्रसुप्तमिव चातर्क्यमप्रज्ञातमलक्षणम् ।
अविज्ञेयमविज्ञातं जगत् स्थास्नु चरिष्णु च ।
तत: स्वयम्भूरव्यक्त: प्रभव: पुण्यकर्म्मणाम् ।
व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुद: ।
योऽतीन्द्रिय: परो व्यक्तादणुर्ज्यायान् सनातन: ।
नारायण इति ख्यात: स एव स्वयमुद्बभौ ।
स्वशरीरादभिध्यायन् सिसृक्षुर्व्विविधं जगत् ।
अप एव ससर्ज्जादौ तासु वीजमवासृजत् ।
तदेवाण्डं समभवद्धेमरूप्यमयं महत् ।
संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम् ।
प्रविश्यान्तर्म्महातेजा: स्वयमेवात्मसम्भव: ।
प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत् पुन: ।”
इति मात्स्ये २ अध्याय: ।*।
अस्य तिस्रो मूर्त्तयो यथा ।
“सृष्टिस्थित्यन्तकरणात् ब्रह्मविष्णुशिवात्मिका: ।
स संज्ञां याति भगवान् एक एव जनार्द्दन: ।
ब्रह्मत्वे सृजते चैव विष्णुत्वे पाति नित्यश: ।
रुद्रत्वे चैव संहर्त्ता एको देवस्त्रिधा स्थित: ।
स एव सृज्य: स च सर्गकर्त्ता
स एव पाता स च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्त्ति-
र्व्विष्णुर्व्वरिष्ठो वरदो वरेण्य: ।”
इति वह्निपुराणे सर्गानुशासननामाध्याय: ।*।
नारायणस्य मूर्त्तिविशेषो यथा ।
“योऽसौ नारायणो देव: परात्परतरो नृप ।
तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम ।
सृष्टा चेयं महासृष्टि: पालनीया मयैव हि ।
कर्म्मकाण्डस्त्वमूर्त्तेन कर्त्तुं नेवेह शक्यते ।
तस्मात् मूर्त्तिं सृजाम्येकां यया पाल्यमिदं
जगत् ।
एवं चिन्तयतस्तस्य सत्त्वाभिध्यायितो नृप ।
प्राक्सृष्टिजातं राजन् वै मूर्त्तिमत्तत्पुरो बभौ ।
पुरोभूते ततस्तस्मिन् देवो नारायण: स्वयम् ।
प्रविशन्तं ददर्शाथ त्रैलोक्यं तस्य देहत: ।
तत: सस्मार भगवान् वरदानं पुरातनम् ।
वाणादीनां ततस्तुष्ट: प्रादात्तस्य पुनर्व्वरम् ।
सर्व्वज्ञ: सर्व्वकर्त्ता त्वं सर्व्वलोकनमस्कृत: ।
त्रैलोक्यप्रतिपालश्च भव विष्णु: सनातन: ।
देवानां सर्व्वदा कार्य्यं कर्त्तव्यं ब्रह्मणस्तथा ।
सर्व्वज्ञत्वञ्च भवतु तव देव न संशय: ।
एवमुक्ता ततो देव: प्रकृतिस्थो बभूव ह ।
विष्णुरप्यधुना पूर्व्वां बुद्धिं सस्मार स प्रभु: ।
तदा संचिन्त्य भगवान् योगनिद्रां महातपा: ।
तस्यां संस्थाप्य भगवान् इन्द्रियार्थोद्भवा:
प्रजा: ।
ध्यात्वा परेण रूपेण तत: सुष्वाप वै प्रभु: ।
तस्य सुप्तस्य जठरान्महत् पद्मं विनि:सृतम् ।
सप्तद्वीपवती पृथ्वी ससमुद्रा सकानना ।
तस्य मूलस्य विस्तारं पातालतलसंस्थितम् ।

कर्णिकायां तथा मेरुस्तन्मध्ये ब्रह्मणो भवः ।
एवं दृष्ट्वा परं तस्य शरीरस्य तु सम्भवम् ।
सम्मुखे मच्छरीरस्थो वायुर्वायुसमं सृजत् ॥
अविघ्नविजयश्चेमं शङ्खरूपेण धारय ।
अज्ञानच्छेदनार्थाय खड्गं तेऽस्तु तथा करे ॥
कालचक्रमयं घोरं चक्रं त्वं धारयाच्युत ।
अधर्म्मराजघातार्थं गदां धारय केशव ॥
मालेयं भूतमाला ते कण्ठे तिष्ठतु सर्व्वदा ।
श्रीवत्सकौस्तुभौ चेमौ चन्द्रादित्यच्छलेन च ॥
मारुतस्ते गतिर्वीर ! गरुत्मांस्तव कीर्त्तितः ।
त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ॥
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ।
घृताशनो भवेद्यस्तु द्वादश्यां तत्परायणः ॥
स्वर्गवासी च भवतु पुमान् स्त्री वा विशेषतः ।
एवं विष्णुस्तथाख्यातो मूर्त्तयो देवदानवाः ॥
इत्थं यानि शरीराणि सृजन्त्यन्यानि चात्मनः ।
युगे युगे सर्व्वगोऽयं वेदान्ते पुरुषो ह्ययम् ।
न चोनबुद्ध्या वक्तव्यो मनुष्योऽयं कदाचन ।”
इति वाराहे परापरनिर्णयनामाध्यायः ॥ * ॥
ब्रह्मविष्णुशिवानामैकत्वं यथा,—
“ततो मम शरीरं तत् त्रिधा चक्रे महेश्वरः ।
प्रधानेच्छावशाच्छम्भोस्त्रिगुणं त्रिगुणीकृतम् ॥
तदूर्द्धभागः संजातश्चतुर्वक्त्रश्चतुर्भुजः ।
स्फटिकाभसमः कायः शुक्लः स चन्द्रशेखरः ॥
ईशस्ततो ब्रह्मकाये सृष्टिशक्तिं न्ययोजयत् ।
स्वयमेवाभवत् स्रष्टा ब्रह्मरूपेण लोककृत् ॥
स्थितिशक्तिं निजां मायां मध्यभागे न्ययोजयत् ।
महेशो वैष्णवे काये ज्ञानशक्तिं निजां तथा ॥
स्थितिकर्त्ताभवद्विष्णुस्स्वयमेव महेश्वरः ।
सर्व्वशक्तिवियोगेन सदा तद्रूपता मम ॥
अन्तशक्तिं तथा काये शम्भवे स न्ययोजयत् ।
अन्तकर्त्ताभवच्छम्भुः स एव परमेश्वरः ॥
चतस्त्रिषु शरीरेषु स्वयमेव प्रकाशते ।
याबद्रूपं परं ज्योतिरनादिर्भगवान् प्रभुः ॥
सृष्टिस्थित्यन्तकरणादेक एव महेश्वरः ।
ब्रह्मा विष्णुः शिवश्चेति संज्ञामाप पृथक् पृथक् ।
अनन्तश्च विधाता च तथाहमपि भो पृथक् ।
एवं शरीरं ज्ञायस्व प्रधानस्यात्मनस्तदा ।”
इति कालिकापुराणे १९ अध्यायः ॥ * ॥
अन्यच्च ।
“पुराणोऽथ स भगवान् व्यापकः पुरुषः परः ।
अव्यक्तोऽव्ययात्मा च सर्व्वात्मिकमतादभूत् ।
विष्णुश्च स च गोविन्द ईश्वरश्च सनातनः ।
सर्व्वं वेद महाकायं स चोत्पन्नो उच्यते ।”
इति वामनपुराणे ६२ अध्यायः ॥ * ॥
तेन गजेन्द्रमोक्षणं यथा,—
पुलस्त्य उवाच ।
“गजेन्द्रं तदाधःसंलिप्य व्याप्तग्राहोऽप्यदर्शनः ।
ह्यथ ग्राह आदाय शङ्खचक्रगदाधरः ।
आकर्षं जलमध्याच्च गजेन्द्रं सरसि दीर्घतः ।
गरुडस्थो जगन्नाथो लोकाधारस्तपोधनः ॥
ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात् ।
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः ॥
स्थलस्थं दारयामास ग्राहं चक्रेण माधवः ।
मोचयामास नागेन्द्रं पाशेभ्यः शरणागतम् ॥
स हि देवलशापेन हूहूर्गन्धर्व्वसत्तमः ।
ग्राहत्वमगमत् कृष्णाद्वधं प्राप्य दिवङ्गतः ।
गजोऽपि विष्णुना स्पृष्टो जातो दिव्यवपुः पुमान् ।”
इति वामनपुराणे ८१ अध्यायः ॥ * ॥
अस्य मन्त्रपूजादिर्यथा,—
“अथ वक्ष्ये महामन्त्रान् विष्णोः सर्व्वार्थसाधकान् ।
यस्य संस्मरणात् सन्तो भवाब्धेः पारमाश्रिताः ॥
तारं नमः पद ब्रूयात् नरौ दीर्घसमन्वितौ ।
पवनो णाय मन्त्रोऽयं प्रोक्तो वस्वक्षरः परः ॥”
अस्य पूजाप्रयोगः । प्रातःकृत्यादिस्नानान्तं कर्म्म कृत्वा पूजामण्डपमागत्य वैष्णवाचमनं कुर्य्यात् । तद्यथा गौतमीये ।
“केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ ।
द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यां स्पृश्यानुखं ततः ।
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः ॥
आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् ।
स्पृशेदेवं भवेदाचमनञ्च वैष्णवान्वये ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ।”
केशवाद्यस्तु केशवनारायणमाधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्द्दनोपेन्द्रहरिविष्णवः । वाक्यन्तु प्रणवादि केशवाय नम इत्यादि । तथा च ।
“चतुर्थ्यन्तनमोऽन्तैश्च नामभिर्विन्यसेत् सुधीः ।”
ततः सामान्यार्घ्यादिमातृकान्तं कर्म्म विधाय केशवकीर्त्त्यादिन्यासं कुर्य्यात् । अस्य ऋष्यादिन्यासः । शिरसि प्रजापतये ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि अष्टलक्ष्मीहरये देवतायै नमः ॥ * ॥ ततः कराङ्गन्यासौ । श्रीं अङ्गुष्ठाभ्यां नम इत्यादि । श्रीं हृदयाय नम इत्यादि । तथा च गौतमीये ।
“ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अष्टलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षडङ्गकम् ।”
ततो ध्यानम् ।
“उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ।”
एवं ध्यात्वा न्यसेत् । यथा । अं केशवाय कीर्त्त्यै नमः ललाटे । वर्णानुक्त्वा साष्टचन्द्रान् पुरस्तादिन्द्रादिर्म्मेनान् सर्व्वत्र सानुस्वारः । आं
नारायणाय कान्त्यै नमो मुखे । इं
तुष्ट्यै नमो दक्षनेत्रे । ईं
वामनेत्रे । उं विष्णवे
मधुसूदनाय शान्त्यै वामकर्णे ।
क्रियायै दक्षनासापुटे । ऋं
वामनासापुटे । लृं श्रीधराय
लॄं हृषीकेशाय हर्षायै वामगण्डे ।
नाभाय श्रद्धायै ओष्ठे । ऐं
अधरे । ओं वासुदेवाय
औं सङ्कर्षणाय सरस्वत्यै
प्रद्युम्नाय प्रीत्यै मस्तके । अः
मुखे । कं चक्रिणे जयायै । खं
गं शार्ङ्गिणे प्रभायै । घं
ङं शङ्खिने
हलिने वाण्यै । छं
शूलिने विजयायै ।
पाशुपिने विरजायै
सकुन्दाय विनदायै ।
ढं नन्दिने स्मृत्यै । ढं
जिते समृद्ध्यै दक्षपादमूलसन्धौ
शुद्ध्यै । थं छन्नाय बुद्ध्यै ।
धं सात्वताय मत्यै । नं शौरये
पादमूलसन्ध्यग्रेषु । पं
पार्श्वे ।
भूधराय क्षान्त्यै पृष्ठे । मं
नाभौ । मं वैकुण्ठाय
त्मने पुरुषोत्तमाय वसुधरायै
गात्मने बलिने परायै
बलानुजाय परायणायै
बलाय सूक्ष्मायै वामांसे ।
शाय सन्ध्यायै हृदादिदक्ष
वृषाय प्रज्ञायै हृदादिवामकरे ।
हंसाय प्रभायै हृदादिदक्ष
वराहाय निशायै हृदादि
त्मने विमलाय अमोघायै
क्रोधात्मने नृसिंहाय विद्युतायै
इति न्यसेत् ॥ * ॥ तथा च
“केशवादिरयं न्यासो
अच्युतत्वं ददात्येव
मातृकार्णं समुच्चार्य
कीर्त्त्यां च नमसा
केशवाय ततः कीर्त्त्यै
इत्याद्यगस्त्यसंहिता
केशवकीर्त्तिभ्यां नम इति
मिच्छता अयं न्यासः
यथा । श्रीं अं केशवाय
तथा च गौतमीये ।
“एवं प्रविन्यसेत्
स्तुतिं धृतिं महालक्ष्मी
ततस्तत्त्वन्यासपीठन्यास
दिन्यासान् कुर्य्यात् ।

...दा कोला: । * । ततो ध्यायेत् ।
...ोदिदिवाकरायुतनिभं शङ्खं गदां
पङ्कजं
...नांसिन्दिरासमुपगीभिंशोभिपार्श्वद्वयम् ।
...इदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
...दधरं नवनगिलसणोपवायिद्धं भजे ।"
...ना मानसैः संपूज्य शङ्खस्थापनं
...तत्र वैष्णवपात्रं शोभयेत् ।
...ताम्रं विप्रर्षे त्रिलोकेऽतिप्रियं मम ।
...पात्रं सुभगं शङ्खं प्रकीर्त्तितम् ।
... तथा प्रोक्तं रजतं वा राजतं तथा ।
...हरेः शुद्धं नान्यत्र नियोजयेत् ।"
...ति तु तत्रैव ।
...ा ताम्रपात्रे वा रौप्ये वा पङ्कजे हरेः ।"
...ल्पद्रुमे ।
... राजतं वापि ताम्रं स्फटिकमेव वा ।
...श्रीहरेः पात्रं नैवेद्ये कल्पयेद्बुधः ।"
...यन्त्रिकायाम् । सुवर्णे राजते रैत्ये
। * । ततः सामान्यपीटपूजा-
...विमलादिशक्तियुक्तपीठमन्त्रान्तं पूजां
...नध्यात्वा मूलेन कल्पितमूर्त्तावावाह-
...पुष्पाञ्जलिदानपर्य्यन्तं विधाय आव-
... कुर्य्यात् । अग्न्यादिचतुष्कोणेषु दिक्षु
...क्रुद्धोल्काय हृदयाय नमः इत्यादिना
। * । ततः केशरेषु पूर्व्वादि ॐ नमः
...मों नमः नों नमः रां नमः यं नमः
...: यं नमः । ततो दलेषु पूर्व्वादिदिक्षु
...देवाय नमः । एवं सङ्कर्षणाय प्रद्युम्नाय
...द्धाय । अग्न्यादिकोणदलेषु ॐ शान्त्यै
...ं श्रियै सरस्वत्यै रत्यै । ततः पत्राग्रेषु
ॐ चक्राय नमः एवं शङ्खाय गदायै
कौस्तुभाय मुषलाय खड्गाय वन-
। तद्बहिरग्रे ॐ गरुड़ाय नमः ।
ॐ शङ्खनिधये नमः । वामे ॐ पद्म-
...नमः । पश्चिमे ॐ ध्वजाय नमः । अग्नि-
ॐ विघ्नाय नमः । नैरृते ॐ आर्य्यायै
वायुकोणे ॐ दुर्गायै नमः । ईशाने
...न्यै नमः । एवं सर्व्वत्र । तद्बहि-
...न् वज्रादींश्च पूजयित्वा धूपदीपौ दत्त्वा
दद्यात् । * । यथा । नैवेद्यमानीय
मूलेन पाद्यार्घ्याचमनीयं दत्त्वा फडिति
नैवेद्यं संप्रोक्ष्य चक्रमुद्रयाभिरक्ष्य
...मन्त्रेण दोषसमूहं संशोष्य रमिति दोषं
...मकरसौधधाराभिपूर्णं वमिति मन्त्रेण
...कृत्य मूलमन्त्रमष्टधा जपेत् । ततो
...धेनुमुद्रयामृतीकृत्य गन्धपुष्पाभ्यां संपूज्य
...लः सन् हरिं प्रार्थयेत् । अस्य मुखतो
...सिवेदिति विभाव्य स्वाहान्तं मूलमुच्चार्य्य
...जलं दद्यात् । ततो मूलमुच्चार्य्य एतन्नैवेद्यं
...देवतायै नमः । ततो नैवेद्यं हस्ताभ्या-
ॐ निवेदयामि भवते जुषाणेदं हवि-
...त नैवेद्यं समर्प्य अमुकदेवतायै एतज्जल

मन्त्रोपकरणमर्प्पयामीति जलं दत्त्वा वामहस्ते ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादिमुद्राः प्रदर्शयेत् । * । यथा । ॐ प्राणाय स्वाहेति कनिष्ठानामिके अङ्गुष्ठेन स्पर्शयेत् । ॐ अपानाय स्वाहेति तर्ज्जनीमध्यमे अङ्गुष्ठेन स्पर्शयेत् । ॐ व्यानाय स्वाहेति मध्यमानामे अङ्गुष्ठेन स्पर्शयेत् ॐ उदानाय स्वाहेति तर्ज्जनीमध्यमानामा अङ्गुष्ठेन स्पर्शयेत् । ॐ समानाय स्वाहेति सर्व्वाङ्गुलीरङ्गुष्ठेन स्पर्शयेत् । ततः अङ्गुष्ठाभ्यामनामिकाग्रं स्पृशन् ओं नमः पराय अन्तरात्मने अनिरुद्धाय नैवेद्यं कल्पयामीति नैवेद्यमुद्रां प्रदर्श्य मूलमुच्चार्य्य अमुकदेवतां तर्पयामीति चतुर्द्धा संतर्प्य अमुकदेवतायै एतज्जलममृतापिधानमसि इति जलं दत्त्वा आचमनीयादिकं दद्यात् । * । वैष्णवे तु नैवेद्यदाने सर्व्वत्रायमेव विधिः । ततः सामान्यपूजापद्धत्युक्तक्रमेण विसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं षोड़शलक्षजपः । तथा च ।

"विकारलक्षं प्रजपेन्मनुमेनं समाहितः ।
तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः ।"

इति तन्त्रसारः ।

स्मृत्युक्तविष्णुपूजा आह्निकतत्त्वादौ द्रष्टव्या । * । शिवस्याष्टमूर्त्तिपूजानन्तरं तत्रैव विष्णोरष्टमूर्त्तिपूजा यथा,—

"कृता पूजा मया देवि अष्टमूर्त्तेः शिवस्य च ।
यथा हि परमेशानि तच्छृणुष्व वरानने ।"

इत्युपक्रम्य ।

"कृत्वा पूजां महेशानि कूष्णज्या यां शिवेहने ।
अष्ट विष्णोर्महेशानि नामानि शृणु कामिनि ।
उग्रं विष्णुं महाविष्णुं ज्वलन्तं संप्रतापनम् ।
नृसिंहं भीषणं भीमं मृत्युमृत्युं प्रकीर्त्तितम् ।
एतान् विष्णून् महेशानि यथा संपूज्य तच्छृणु ।
वसुखादिक्रमाद्देवि पूजयेद्विष्णुमव्ययम् ।
तमस्त्वं शृणु चार्व्वङ्गि ज्ञानसारं वरानने ।"

ॐ उग्राय विष्णवे नमः । ॐ महाविष्णवे नमः । ॐ ज्वलन्ताय विष्णवे नमः । ॐ संप्रतापनाय विष्णवे नमः । ॐ नृसिंहाय विष्णवे नमः । ॐ भीषणाय विष्णवे नमः । ॐ भीमाय विष्णवे नमः । ॐ मृत्युञ्जयाय विष्णवे नमः ।

"इति पूजां महेशानि कृत्वा हि परमेश्वरि ।
विष्णुज्ञानं मया प्रोक्तं सर्व्वशक्तिसमन्वितम् ।"

इति निर्व्वाणतन्त्रे ७ पटलः ।

तस्य नमस्कारस्तत्फलादिश्च यथा,—

सूत उवाच ।

"मुक्तिहेतुमनाद्यन्तमजमक्षयमव्ययम् ।
यो नमेत् सर्व्वलोकस्य नमस्यो जायते नरः ।
विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुम् ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयम् ।
योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम् ।
तं सर्व्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम् ।
साध्विनापि नमस्कारप्रयुक्तश्चक्रपाणये ।
संसारशूलवर्णानामुद्वेजनकरो हि सः ।
कृष्णे स्फुरत्कलधरोदरचारुकृष्णे
लोकाधिकारिपुरुषे परमेऽप्रमेये ।
एकोऽपि चारुगुणमात्रकृतप्रणामः
सद्यः श्वपाकमपि शोधयितुं समर्थः ।
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ।
दुर्गसंसारकान्ताराकूपारमभिधावताम् ।
एकः कृष्णनमस्कारः अस्ति तीरस्य देशकः ।
आसीनो वा शयानो वा तिष्ठन् वा यत्र तत्र वा ।
नमो नारायणायेति मन्त्रैकशरणो भवेत् ।
नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके घोरे पतन्तीति किमद्भुतम् ।
चतुर्मुखायुर्यदि कोटिवक्त्रो
भवेन्नरः कोऽपि विशुद्धचेताः ।
सर्व्वे गुणानामयुतैकदेशं
वदेन्न वा देववरस्य विष्णोः ।
व्यासाद्या मुनयः सर्व्वे स्तुवन्तो मधुसूदनम् ।
मतिक्षयान्निवर्त्तन्ते न गोविन्दगुणक्षयात् ।
अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ।
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ।
स्वप्नेऽपि नामस्मृतिरादिपुंसः
क्षयं करोत्यक्षयपापराशिम् ।
प्रत्यक्षतः किं पुनरत्र पुंसां
संकीर्त्तिते नाम्नि जनार्द्दनस्य ।
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्विप्र न ते यमपुरं ययुः ।
शमायालं जलं वह्नेस्तमसो भास्करोदयः ।
शान्तिः कलेरघौघस्य नामसंकीर्त्तनं हरेः ।
क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् ।
क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ।
गच्छतां दूरमध्वानं तृष्णामूर्च्छितचेतसाम् ।
पाथेयं पुण्डरीकाक्षनामसंकीर्त्तनामृतम् ।
नम इत्येव यो ब्रूयात् तद्भक्तः श्रद्धयान्वितः ।
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि शौनक ।
संसारसर्पदष्टस्य निर्व्विचेष्टैकभेषजम् ।
कृष्णेति वैष्णवं मन्त्रं जप्त्वा मुक्तो भवेन्नरः ।
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्त्य केशवम् ।
नूनं तत्कण्ठशालूकमथवा प्रतिजिह्विका ।
रोगाधारा न सा जिह्वा या न वक्ति हरे-
र्गुणान् ।
कुरुक्षेत्रेण किं तस्य काश्या वा शान्तिकेन वा ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ।
विज्ञानदुष्कृतसहस्रसमावृतोऽपि
श्रेयः परन्तु परिशुद्धिमभीप्समानः ।
स्वप्नान्तरेऽपि किल योनिभयं न पश्ये-
न्नारायणस्तुतिकथापरमो मनुष्यः ।"

इत्यादि गारुड़े नारायणभक्तिनमस्कारो नाम २३२ अध्यायः । * ।

सूत उवाच ।
"असारभूते संसारे सारमेकं विनिर्द्दिशेत् ।
समाराधिलोकस्य सारमाराधनं हरेः ॥
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्च्चितं स्यात्तदा चैव तेन सर्व्वं चराचरम् ॥
मात्स्यवत् परिरत्नमां सृष्टिसंहारकारकम् ।
यो न पूजयते विष्णुं तं विद्याद्ब्रह्मघातकम् ॥
यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम् ।
स्वकर्म्मणा तमभ्यर्च्च्य सिद्धिं विन्दन्ति मानवाः ॥
नरके पच्यते यस्तु यमेन परिभाषितः ।
किं त्वया नार्च्चितो देवः केशवः क्लेशनाशनः ॥
उदकेनाप्यभावेन द्रव्याणामर्च्चितः प्रभुः ।
यो ददाति स्वकं लोकं स त्वया किं न चार्च्चितः ॥
न तत् करोति या माता न पिता नापि
बान्धवाः ।
यत् करोति हृषीकेशः सन्तुष्टः श्रद्धयार्च्चितः ॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
सम्पदैश्वर्य्यमाहात्म्यज्ञानसन्ततिकर्म्मणाम् ।
विमुक्तेश्चैकतालभ्यं मूलमाराधनं हरेः ॥
प्रणामैस्तुष्यते विष्णुरेतद्धि परमं धनम् ।
अन्यथा वा विधिना कस्समर्च्चितुमर्हति ॥"
इति गारुडे पूजास्तुतिः २२२ अध्यायः ॥ * ॥
सूत उवाच ।
"आलोक्य बहुशास्त्राणि विचार्य्य च पुनः
पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः किम-
ध्वरैः ।
यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥
अतितीर्थसहस्राणि अतितीर्थशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम् ॥
प्रायश्चित्तान्यशेषाणि तपःकर्म्मादिकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परम् ॥
मुहूर्त्तमपि यो ध्यायेन्नारायणमतन्द्रितः ।
सोऽपि तद्गतिमाप्नोति किं पुनस्तत्परायणः ॥
जाग्रत्स्वप्नसुषुप्तेषु योगस्थस्य च योगिनः ।
या काचिन्मनसो वृत्तिः सा भवत्यच्युताश्रया ॥
उत्तिष्ठन्निपतन् गच्छन् प्रबुवन् वै विवसंस्तथा ।
भुञ्जन् स्वपंश्च चापश्च गोविन्दं माधवं स्मरेत् ।
स्वे स्वे कर्म्मण्यभिरतः कुर्य्याच्चित्तं जनार्द्दने ।
एवं शास्त्रानुसारोक्तैः किमन्यैर्बहुभाषितैः ॥
ध्यानमेव परो धर्म्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्मात् ध्यानपरो भवेत् ॥
नास्ति विष्णोः परं ध्येयं नास्ति नामश्मनात्
परम् ।
तस्मात् ध्यानमन्त्रोक्तं वासुदेवस्य चिन्तनम् ॥
यद्रूपेणे परं ब्रह्म सनको यत्र गोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥
प्रमादात् कुर्व्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥
ध्यानेन सदृशं नास्ति शोधनं पापकर्म्मणाम् ।
आगामिदेहहेतूनां दाहकोऽप्येष पावकः ॥
विनिष्पन्नसमाधिस्तु मुक्तिमत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मचयोऽचिरात् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्व्वकिल्बिषम् ॥
यथाग्निदाहात् कनकमपदोषं प्रजायते ।
संश्लिष्टं वासुदेवेन मनुष्याणां तथा मनः ॥
गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत् पापं विलयं याति स्मृते नश्यति तद्धरौ ॥
प्राणायामसहस्रैस्तु यत् पापं नश्यति ध्रुवम् ।
क्षणमात्रेण तत् पापं हरेर्ध्यानात् प्रणश्यति ॥
एकस्मिन्नप्यतिक्रान्ते मुहूर्त्ते ध्यानवर्ज्जिते ।
दस्युभिर्म्मुषितेनेव युक्तमाक्रन्दितं भृशम् ॥
कलिप्रभावो दुष्टोक्तिः पाषण्डानां तथोक्तयः ।
न क्रमेरन् मनस्तस्य यस्य चेतसि केशवः ॥
सा तिथिस्तदहोरात्रं स योगः स च चन्द्रमाः ।
लग्नं तदेव विख्यातं यत्र सम्मर्य्यते हरिः ॥
सा हानिस्तन्महच्छिद्रं सा चान्धजड़मूकता ।
यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥
कलिः कृतयुगन्तस्य कलिस्तस्य कृते युगे ।
हृदये यस्य गोविन्दो यस्य चेतसि नाच्युतः ॥
यस्याग्रतस्तथा पृष्ठे गच्छतस्तिष्ठतोऽपि वा ।
गोविन्दे नियतं चित्तं कृतकृत्यः सदैव सः ॥
वासुदेवे मनो यस्य जपहोमार्च्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥
असंख्यत्र च गार्हस्थ्यमतन्द्रा च महत्तपः ।
छिनत्ति वैष्णवीं मायां केशवार्पितमानसः ॥
क्षमां कुर्व्वन्ति क्रुद्धेषु दयां मूर्खेषु मानवाः ।
मुदञ्च धर्म्मशीलेषु गोविन्दे हृदयस्थिते ॥
ध्यायेन्नारायणं देवं स्नानादिषु च कर्म्मसु ।
प्रायश्चित्तं हि सर्व्वस्य दुष्कृतस्येति निश्चितम् ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्द्दनः ॥
कीटपक्षिगणानाञ्च हरौ संन्यस्तचेतसाम् ।
ऊर्द्ध्वमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् ॥
वासुदेवतरुच्छाया नातिशीता न घर्म्मदा ।
नरकद्वारशमनी सा किमर्थं न सेव्यते ॥
न च दुर्व्वाससः शापो वज्रञ्चापि शचीपतेः ।
हन्तुं समर्थो हि सखे हृद्गते मधुसूदने ।
वदतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति यदा चिन्ता सिद्धां मन्ये च धारणाम् ॥
ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
चिन्तय बहुनोक्तेन शुभाशुभपुना हरिम् ।
स्मरनाहर्निशं विष्णुमशेषदुरितापहम् ॥
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि भुञ्जान. ...
यदा चित्तं समासक्तं ...
यदि नारायणेऽप्यर्थे को ...
प्रत्यक्षमिनमेदं ...
वचसामात्मसंवेद्यं ...
तज्ज्ञानया ...
संसारकर्म्मणोऽप्येते वा ...

इति गारुडे ...
तस्य माहात्म्यं यथा,—
सूत उवाच ।
"विष्णुचित्तो भवेद्यस्तु ...
तमेवैष्यति सुत ...
तद्दानं यत्र गोविन्दः ...
तत् कर्म्म यत्तदर्थाय ...
सा जिह्वा या हरिं स्तौति ...
तावेव केवलौ श्लाघ्यौ ...
प्रणाममीशस्य शिरःफलं वि...
तद्दर्शनं पावनं हि नेत्र...
मनःफलं तद्गुणकर्म्मचिन्तनं
वाचस्तु गोविन्दगुणस्तवः ...
मेरुमन्दरमात्रोऽपि राशिः ...
केशवं वैद्यमासाद्य दुर्व्या...
यत्किञ्चित् कुरुते ...
सर्व्वं नारायणे न्यस्य कुर्व्वी...
ब्रह्मादिचतुरास्यान्तं ...
चराचरं जगत् सर्व्वं प्रभुः ...
यस्मिन्न्यस्तमतिर्न याति ...

विष्णौ यत्र ...

मुक्तिं चेतसि ...

किञ्चित्रं दुरितं प्रयाति विलं...

महता पुण्यपण्येन येन ...
तस्य विष्णोः प्रसादेन ...
अभिकार्य्यं जपं यावं विधे...
गन्तुं दुःखोदधेः पारं कुर्व्व...
राहुस्य शरणं राजा विराटे ...
धर्म्मस्य सर्व्वमर्य्यादा यस्य ...
ये नमन्ति जगद्योनिं ...
न तेभ्यो विद्यते तीर्थमधि...
अनर्घरत्नपूजासु कुर्य्यात् ...
तं समुद्दिश्य गोविन्द भावता...
शूद्रं वा भगवद्भक्तं निषादं ...
द्विजजातिसमं मन्ये न वर्णि...
आदरेण यथा स्तौति धनवन्तं ...
तथा कृष्णं कर्त्तारं ...
यथा जातरूपो वह्निरेकः ...
तथाविधः स्तुतो विष्णुर्निजा...
प्रदीप्तं पश्चतां यदा राज...

…द्यानि सर्व्वाणि यीताम्बरधरं नरम् ।
… यान्ति दिव्याभरणा किङ्किणी नादगी ।
…दाखिंस्ति स्पृहन्ते प्रभाव: परिकीर्त्तिये ॥
…स्ति गोविन्दं दर्शनीयाकृत: मानवम् ।
…त्यागो मनक्रं यं पुनरागुपराधनः ॥
…दं देवो सुनिर्वेन्द्र सत्य सभा हृदयन्ति: ।
…ष्णा नाशते तावद्यावन्नार्चयते हरिम् ॥”
… नारदे विष्णुमाहात्म्ये ८३५ अध्याय: ॥
… पादोदकपानादिफलम् ।
…दि दर्पं सुरी नाम नैवेद्यमृदरे हरेः ।
…दकच निर्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलं पिवेच ।
योऽश्नाति नित्यं पुरतो मुरारेः
प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥
…दा हन्ति यद्ब्रह्महत्तुलसी क्षेपच पादोदकं
…दं बहुमद्यपानदुरितं गुर्व्वङ्गनागमनम् ।”
इति पाद्मोत्तरखण्डे १० अध्याय: ॥ ॥
…स नाम्नां मुख्यार्थो यथा,—
इषिरुवाच ।
…तेषु शेषो भवसि समानेरपोऽपि कीर्त्तितः ।
…मोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु ।
…न व्ययसे स्थानात्तस्मात् कीर्त्त्यसेऽच्युतः ।
…णामिन्द्रं रुद्रञ्च यमं वरुणमेव च ।
…त्य हरसे यस्मात्तस्माद्धरिरिहोच्यसे ॥
…मानयसि भूतानि वपुषा यशसा श्रिया ।
…रेण वपुषा देव तस्मात्त्वासि सनातनः ॥
…आद्ब्रह्मादयो देवा मुनयश्चोग्रतेजसः ।
…ते त्वधिगच्छन्ति तेनानन्तस्त्वमुच्यसे ॥
…क्षीयसे न क्षरसे कल्पकोटिशतैरपि ।
…स्मात्त्वमक्षरत्वाच्च विष्णुर्वेति प्रकीर्त्त्यसे ॥
…ष्टब्ध त्वया सर्व्वं जगत् स्थावरजङ्गमम् ।
…हिरम्भनास्येव विष्णुर्वेति प्रकीर्त्त्यसे ॥
…ष्टभ्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम् ।
…यक्षगन्धर्व्वनरं समहद्भूतपन्नगम् ।
…प्य त्वामेव विशते त्रैलोक्यं सचराचरम् ।
…आद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ॥
…रा इत्युच्यते ह्याप: ऋषिभिस्तत्त्वदर्शिभिः ।
…यनं तस्य तत्पूर्व्वं तेन नारायणः स्मृतः ॥
…गे युगे प्रनष्टां गां विष्णो विन्दसि तत्त्वतः ।
…विन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ॥
…षीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः ।
…शित्वे वर्त्तसे तेषां हृषीकेशस्ततोच्यसे ॥
…सन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये ।
…वा वससि भूतेषु वासुदेवस्ततुच्यसे ॥
…सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः ।
…तः सङ्कर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः ॥
…व्यूहेन न तिष्ठन्ति सदेवासुरराक्षसाः ।
…विद्युः सर्व्वधर्म्माणां प्रद्युम्नस्तेन चोच्यते ॥
…निरोधो विद्यते यस्मान्न ते भूतेषु कश्चन ।
…अनिरुद्धस्ततः प्रोक्तः पूर्व्वमेव महर्षिभिः ॥”
इति मात्स्ये २२२ अध्याय: ॥ ॥

विष्णुलोकगमनकारणं यथा,—
“स्वर्गभोगी सकामः स्याद्निष्कामो निरुपद्रवः ।
स याति देहं त्यक्त्वा च पदं विष्णोर्निरामयम् ।
पुनरागमनं नास्ति तेषां निष्कामिनां सति ॥
ये सेवन्ते च द्विभुजं कृष्णमात्मानमेव च ।
गोलोकं ते नरा यान्ति दिव्यरूपविधारिणः ॥
ये च नारायणं भक्त्या सेवन्ते च चतुर्भुजम् ।
वैकुण्ठं यान्ति ते सर्व्वे दिव्यरूपविधारिणः ॥
सकामिनो वैष्णवाश्च गत्वा वैकुण्ठमेव च ।
भारतं पुनरायान्ति तेषां जन्म द्विजातिषु ॥
कालेन ते च निष्कामा भवन्त्येव क्रमेण च ।
भक्तिञ्च निर्म्मलां बुद्धिं तेभ्यो दास्यति निश्चितम् ।
हरिभक्ताश्च निष्कामाः स्वधर्म्मरहिता द्विजाः ।
तेऽपि यान्ति हरेर्लोकं क्रमाद्भक्तिबलाद्धो ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्याय: ॥

विष्णुश्रवणं, क्ली, (विष्ण्वधिदेवताकं श्रवणम् ।) श्रवणानक्षत्रम् । यथा,—
“उपोष्य द्वादशीं पुण्यां विष्णुश्रवणेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयः ॥”
इति तिथ्यादितत्त्वम् ॥

विष्णुकन्दः, पुं, (विष्णुप्रियः कन्दः ।) मूलविशेषः । तत्पर्य्यायः । विष्णुगुप्तः २ सुपुटः ३ बहुसंपुटः ४ जलवासः ५ हस्तुकन्दः ६ दीर्घपत्रः ७ हरिप्रियः ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । पित्तदाहशोषहरत्वम् । रुच्यत्वम् । सन्तर्पणकारित्वञ्च । इति राजनिर्घण्टः ॥

विष्णुक्रान्ता, स्त्री, अपराजिता । इत्यमरः ॥ अपराजिताया अन्या क्षुपजातिः । तत्पर्य्यायः । हरिक्रान्ता २ नीलपुष्पा ३ अपराजिता ४ नीलक्रान्ता ५ सुनीला ६ विक्रान्ता ७ छर्द्दिका ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कफवातामयविषदोषनाशित्वम् । मेधाकारित्वम् । पावनित्वम् । शुभदत्वञ्च । इति राजनिर्घण्टः ॥

विष्णुगुप्तः, पुं, (विष्णुना गुप्तः ।) वात्स्यायनमुनिः । यथा,—
“विष्णुगुप्तस्तु कौटिल्यश्चाणक्यो द्रामिलोऽङ्गुलः ।
वात्स्यायनो मल्लनागः पक्षिलस्वामिनावपि ॥”
इति त्रिकाण्डशेषः ॥

विष्णुकन्दः । इति राजनिर्घण्टः ॥

विष्णुगुप्तकं, क्ली, चाणक्यमूलकम् । इति राजनिर्घण्टः ॥

विष्णुगृहं, क्ली, (विष्णवे प्रतिष्ठितं गृहम् ।) विष्णुमन्दिरम् । तम्रपुरम् । इति हेमचन्द्रः ॥
विष्णुगृहकरणफलं यथा,—
“अष्टेष्टकासमायुक्तं यः कुर्य्याद्वैष्णवं गृहम् ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥”
इति हरिभक्तिविलासे । २० । १४ ॥
“यैस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ।
कारयेन्मृण्मयं वापि शृणु तस्य फलं मुने ॥
अहन्यहनि योगेन यजतो यन्महाफलम् ।
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ॥
कुलानां शतमागामि समतीतं तथा शतम् ।
कारयेद्भगवद्धाम नयत्यच्युतलोकताम् ॥
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ॥
सप्तलोकमयो विष्णुर्यस्तस्य कुरुते गृहम् ।
प्रतिष्ठां समवाप्नोति स नरः साप्तलौकिकीम् ॥
प्रशस्तदेशे भूभागे प्रशस्तं भवनं हरेः ।
कारयन्निखिलान् लोकान् स नरः प्रतिपद्यते ॥
इष्टकानाञ्च विन्यासो यावद्वर्षाणि तिष्ठति ।
तावद्वर्षसहस्राणि तत्कर्त्ता दिवि संस्थितः ॥
चिकीर्षोरपि कृष्णस्य मन्दिरं पुण्यकारिणः ।
नरस्य क्षयमायाति पापं जन्मशतोद्भवम् ॥
ये ध्यायन्ति सदा हृत्वा करिष्यामि हरेर्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥
येऽनुमोदन्ति कृष्णस्य क्रियमाणं हरेर्गृहम् ।
तेऽपि पापविनिर्म्मुक्ता वैष्णवं लोकमाप्नुयुः ॥
कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ।
स्वर्गञ्च वैष्णवं लोकं मोक्षञ्च लभते क्रमात् ॥
समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥
दुष्प्राप्यं यत् फलं विप्रा वाजिमेधादिभिर्म्मखैः ।
प्राप्यते तत् सुखेनैव निवेश्य भवनं हरेः ॥
ये हताभिमुखाः शूरा गोविप्रार्थे रणाजिरे ।
स तत्फलमवाप्नोति कारयित्वा हरेर्गृहम् ॥
पक्वेष्टरचितं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो व्रजेद्दिवम् ॥
सञ्चेयार्हमहस्रेण शतेनार्द्धेन वा हरेः ।
तुल्यं फलं समाख्यातं तदीश्वरदरिद्रयोः ॥
पतितं पतमानन्तु तथार्द्धपतितं तथा ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥”
इति वह्निपुराणे वैष्णवक्रियायोगे यमानुशासननामाध्यायः ॥

विष्णुचक्रं, क्ली, (विष्णोश्चक्रमिव ।) हस्तस्थरेखामयचक्रविशेषः । यथा,—
“विष्णुचक्रं करे चिह्नं सर्व्वेषां चक्रवर्त्तिनाम् ।
भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ॥”
इति विष्णुपुराणे १ अंशे १३ अध्यायः ॥
रेखान्तरानाकुलं रेखामयचक्रम् । इति तट्टीका ॥
सुदर्शनचक्रञ्च ॥

विष्णुतैलं, क्ली, (विष्णुनामकं तैलम् ।) अश्विनीकुमारकृतपक्वतैलविशेषः । यथा,—
“आनीयं विष्णुतैलञ्च स्वर्व्वैद्येन विनिर्म्मितम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १३ अध्यायः ॥ ॥
अथ स्वल्पविष्णुतैलम् ।
“शालपर्णीपृश्निपर्णीबलागोक्षुरकाङ्कुराः ।
एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ॥
शतावरी सहचरं पचेदेतैः पलोन्मितैः ।
तैलप्रस्थं पयो दत्त्वा गव्यं वाजं चतुर्गुणम् ॥
अस्य तैलस्य पक्वस्य शृणु वीर्य्यमतः परम् ।
वातार्त्ता नरनागाश्च पीत्वा दृढ़तनुत्वचः ॥
हनुपार्श्वगले वातास्ये गलगण्डेऽर्द्दिते च यः ।
शर्कराश्मरिपाण्डुत्वकामलाद्यावभेदके ।

क्षीणेन्द्रियेऽल्पहृष्टौ च जराजर्ज्जरिते हितम् ।
वन्ध्यानामश्वतरीणाञ्च गर्भस्थितिकरं परम् ।
एतद्वरं तैलं विष्णुना परिकीर्त्तितम् ॥”
तण्डुलः गौरचतण्डुलः । हस्त्योर्हस्तीकाट-
कार्य्यौ । पूतिको नाटाकरञ्जः । सहचरो
भिण्टी । अत्र क्वाथान्तराभावात् क्षीरस्य
चतुर्गुणं जलं कश्चिद्ददाति ।
“स्वरसक्षीरमाङ्गल्यैः पाको यत्रेरितः क्वचित् ।
जलं चतुर्गुणं तत्र वीर्य्याधानार्थमावपेत् ॥”
इति परिभाषाबलात् ।
क्वचिदिति पाठात् क्वाथान्तररहिते केवल-
क्षीरादिसहिततैलादिपाके सामर्थ्यं न तु सर्व्वत्र ।
“एलाचन्दनकुङ्कुमागुरुसुराककोलमांसीशटी-
शैवालम्बरयष्टिपर्णशशभृन्नखचोचीध्वजीशी-
रकम् ।
कस्तूरिनखपूतिशैलजलदसेयीलवङ्गादिकं
गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु ॥”
अथ हस्तविष्णुतैलम् ।
“अश्वगन्धाश्वगन्धाजीवकर्षभकौ शटी ।
काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका ॥
मधूरिका देवदारु पद्मकाष्ठञ्च सैन्धवम् ।
मांसी चैला त्वचं कुष्ठं रक्तचन्दनशैलजम् ॥
मञ्जिष्ठा मृगनाभिश्च श्वेतचन्दनकुङ्कुमम् ।
पर्णी कुन्दुरु सौटिश्च ग्रन्थिकश्च नखी तथा ॥
एतेषां पलिकैर्भागैस्तैलस्यापि तथाढकम् ।
शतावरीरससमं दुग्धञ्चापि समं भवेत् ॥
विष्णुतैलवरं श्रेष्ठं सर्व्ववातविकारनुत् ।
ऊर्द्ध्ववाते ह्यधोवाते अङ्गविपक्ष एव च ॥
शिरोमध्यगता ये च मन्या स्तम्भे गलग्रहे ।
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विकला ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
सर्व्वांस्तानाशयत्याशु सूर्य्यस्तम इवोदितः ॥”
इति भैषज्यरत्नावली ॥

विष्णुदैवतं, } त्रि, (विष्णुर्द्दैवतं दैवतं वा यस्य ।)
विष्णुदैवत्यं, } विष्ण्वधिष्ठातृदेवताकम् । यथा,—
“यज्ञोपकरणं सर्व्वं वाचनं सर्व्वदैवतम् ।
इदन्तु सर्व्वदैवत्यं यदुक्तं द्विजोत्तमाः ।
तद्वदेवं विष्णुदैवत्यं सर्व्वं वा विष्णुदैवतम् ॥”
इति वह्निपुराणे विष्णुधर्म्मोत्तरवचनम् ॥
क्ली, श्रवणानक्षत्रम् । इति ज्योतिषम् ॥

विष्णुदैवत्या, स्त्री, (विष्णुर्द्दैवतमस्याः ।) एका-
दशीतिथिः । द्वादशीतिथिः । यथा,—
“एकादशी द्वादशी च प्रोक्ता श्रीपतिभाविनः ।
त्रयोदशी अनङ्गस्य शिवसौम्या चतुर्द्दशी ॥”
इति स्मृतिः ॥
“एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्द्देवता हरिः ॥”
इति तिथ्यादितत्त्वम् ॥

विष्णुधर्म्मः, पुं, (विष्णुकथितो धर्म्मो यत्र ।) ग्रन्थ-
विशेषः । यथा । “अष्टादशपुराणानि मविष्य-
पुराणम् ।
अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ।
कार्ष्णश्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥’
जयत्यनेन संसारमिति जयस्तादृग्ग्रन्थः ॥” इति
तिथ्यादितत्त्वम् ॥ * ॥ विद्याविशेषः । यथा,—
“अत्रापि जप्त्वा येन्द्रत्वं विष्णुधर्म्माख्यविद्यया ।
सर्व्वान् शत्रून् विनिर्जित्य गाथ वली महेश्वर ॥
पादयोर्जानुनोरूर्व्वोरुदरे हृदयोरसि ।
मुखे शिरस्यानुपूर्व्व्यादोङ्कारादीन् विनिर्द्दिशेत् ॥
ॐ नमो नारायणायेति विपर्य्ययमथापि वा ।
करन्यासं ततः कुर्य्यात् द्वादशाक्षरविद्यया ॥
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्व्वसु ।
न्यसेत् हृदय ॐकारं नकारं मम मूर्द्धनि ॥
मोकारन्तु भ्रुवोर्म्मध्ये शिखानेत्रादिमर्द्दतः ।
ॐ विष्णवे नम इति इमं मन्त्रमुदाहरेत् ॥
आत्मानं परमं ध्यायेच्छ्रियषट्शक्तिभिर्युतम् ।
मम रक्षां ततः कुर्य्यात्तत्स्वमूर्त्तिर्भवेत्ऽवतु ॥
त्रिविक्रमस्तथाकाशे स्वले रक्षतु वामनः ।
अटव्यां नरसिंहस्तु रामो रक्षतु पर्व्वते ॥
भूमौ रक्षतु वाराहो व्योम्नि नारायणोऽवतु ।
कर्म्मबन्धाच्च कापिल्यदत्तो योगात्तु रक्षतु ॥
हयग्रीवो देवनायाः कुमारो मकरध्वजात् ।
नारदोऽन्याभिगात् पायात् कूर्म्मो वै नैरृते:
सदा ॥
धन्वन्तरिरपथ्याच्च नागः क्रोधवशात् किल ।
यज्ञलोकाहलः कालाद्रामो ज्ञानाच्च रक्षतु ॥
बुद्धः पाषण्डसंघातात् कल्किरव्यात् कलेः समम् ।
मायामध्यं दिने विष्णुः प्रातर्नारायणोऽवतु ॥
मधुहा चापराह्णे च सायं रक्षतु माधवः ।
हृषीकेशः प्रदोषेऽव्यात् प्रत्यूषेऽथाव्यजनार्द्दनः ॥
श्रीधरोऽव्यादर्द्धरात्रे पद्मनाभो निशान्तके ।
चक्रकौमोदकीशाखाः घ्नन्तु शत्रूंश्च राक्षसान् ॥
शङ्खशब्दश्च शत्रुभ्यः शार्ङ्गी वै गरुडस्तथा ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥
शेषः सर्व्वमुदापनः सदा सर्व्वत्र पातु माम् ।
विदिक्षु दिक्षु च सदा नरसिंहश्च रक्षतु ॥
एतद्धारयमाणश्च यं यं पश्यति चक्षुषा ।
स वशी स्यात्प्रिपाप्मा च रोगान्मुक्तो दिवं
व्रजेत् ॥”
इति गारुडे २०१ अध्यायः ॥

विष्णुधर्म्मोत्तरं, क्ली, संहिताविशेषः । तस्य प्रश्न-
कर्त्ता जनमेजयसुतः । वक्तारः शौनकाद्या
ऋषयः । तत्र १०० दशाष्टास्तदुपरि सर्गाः ॥

विष्णुपञ्जरं, क्ली, (विष्णुरेव पञ्जरमिव यस्मिन् ।
तद्धारयितुर्निर्भयरक्षकारित्वादस्य तथात्वम् ।)
विष्णुकवचविशेषः । यथा,—
“प्रवक्ष्याम्यधुना ह्येतद्वैष्णवं पञ्जरं शुभम् ।
नमो नमस्ते गोविन्द चक्रं गृह्य सुदर्शनम् ।
प्राच्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ।
गदां कौमोदकीं गृह्य पद्मनाभामितद्युते ।
याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः ।
हलमादाय सौनन्दं नमस्ते पुरु...
प्रतीच्यां रक्ष मां विष्णो
पाञ्चजन्यं तथा ...
प्रगृह्य रक्ष मां ...
चर्म्म सूर्य्यशतं गृह्य खड्गं
नैरृत्यां माञ्च रक्षस्व ...
वैजयन्तीं प्रगृह्य त्वं श्रीवत्सकण्ठ...
वायव्यां रक्ष मां देव अश्व...
वैनतेयं समारुह्य अन्तरीक्षे जना...
मां ...
विशालाक्षं समारुह्य रक्ष मां ...
अकूपार नमस्तुभ्यं
करशीर्षाङ्घ्रिपर्व्वसु तथाष्टभुजाय...
कृत्वा त्वं रक्ष मां देव ...
एतदुक्तं भगवता वैष्णवं पञ्जरं मह...
पुरा रक्षार्थमीशेन ...
यद्दः या नाशयामास दानवं ...
चामरं ...
इति ...

विष्णुपदं, क्ली, (विष्णोः पदम् ।) ...
इत्यमरः ॥ (यथा, रघुवंशे । १३ ।
“वसुन्धराविष्णुपदं द्वितीय-
मध्यारुरोहेव रजस्तरेण ॥”)
क्षीरोदः । इति मेदिनी । पद्म । ...
चक्रः । (तीर्थविशेषः । यथा, ...
७ । ८३ । ८५ ।
“तत्र विष्णुपदे स्नात्वा अर्च्च ...
सर्व्वपापविशुद्धात्मा विष्णुलोकं ...
कैलासपर्व्वतस्य स्थानविशेषः । म.
भारते । ५ । १११ । २२ ।
“अत्र विष्णुपदं नाम ...
पर्व्वतविशेषः । यथा, हरिवंशे । ...
“तेन चित्ररथेनाथ तदा विष्णुपदे गि...
विष्णोः स्थानम् । यथा,
“अपुण्यपुण्योपरमे यस्मिन्निःशेष...
यत्र गत्वा न शोचन्ति तद्विष्णोः ...
धर्म्मधुवाद्यास्तिष्ठन्ति यत्र ...
तत्साष्टोत्तरयोगेशास्तद्विष्णोः परमं ...
यत्रैतदोतं प्रोतं च यद्भूतं सचराचर...
भाव्यञ्च विश्वं मैत्रेय तद्विष्णोः परमं ...
दिवीव चक्षुराततं विमलं ...
विवेकज्ञानदृष्टञ्च तद्विष्णोः ...
इति विष्णुपुराणे २ ...
भ्रूमध्यम् । यथा,—
“अव्यक्ती भ्रुवोर्विष्णोर्यो ...
आसमस्तद्वर्ती पश्यत्यपूर्व्वं मण्डल...
अवन्ध्यतो भवेज्जिह्वा शुभो नर
विष्णोः पदानि भूमध्ये ...
इति काशीखण्डे ४१ अध्याये । ...

विष्णुपदी, स्त्री, (विष्णोः पदं ...
गौरादित्वात् ङीष् ।) गङ्गा । ...
भागवते । ९ । १६ । ७ ।

[illegible]

नाम्ना विष्णुपदी सा च गङ्गा ...

[illegible]

निर्मला विष्णुपादाब्जात् सेव विष्णुपदी स्मृता ॥"

इति श्रीमद्देवीभागवते [illegible] ८ अध्यायः ॥ वृषवृश्चिकसिंहकुम्भसंक्रान्तयः ।

यथा, [illegible] ।

"षडशीतिमुखञ्चापि तोये च षडशीतयः ।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥"

अपि च ।

"इष्वश्च षडशीत्यादिमध्यकालमसलभकाशम् ।
अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश ।
कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्त्तितः ॥"

इति ग्रामलयोर्यं दिवा विष्णुपदीविषयम् ।

अमरत्व जावालोक्तदर्शिनी ।

"पुण्याया विष्णुपद्याश्च प्राक् पश्चादपि षोडश ।"

तत्र स्नानादिफलम् ।

"अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षडशीतिसहस्रन्तु षडशीत्यामुदाहृतम् ॥"

इति तिथ्यादितत्त्वम् ॥

विष्णुपदीचक्रं, क्ली, (विष्णुपद्याश्चक्रम् ।) ज्यैष्ठाषाढ़ाश्वयभाद्रफाल्गुनमार्गीयरविसंक्रमकालीननक्षत्रविन्यासानुक्रमशुभाशुभफलज्ञापकनराकारचक्रम् । यथा,—

"आर्द्धे संक्रमर्क्षं यत्र विष्णुपद्यां रवेस्तु सत् ।

[illegible]

इति भक्तिविवेकम् ॥

विष्णुभक्तिः, स्त्री, (विष्णौ भक्तिः ।) भगवद्भक्तिः ॥ यथा,—

ब्रह्म पुराणे ।

"विष्णुभक्तिं प्रवक्ष्यामि यया सर्व्वमवाप्यते ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ।
स विप्रेन्द्रो मुनिः श्रीमान् स यति: स च पण्डितः ।
[illegible]
[illegible]
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ।
पठनाय श्रवणाय नमस्कारे च यो वदेत् ।
[illegible]
[illegible]
सर्व्ववेदान्तवित् कोट्या विष्णुभक्तो विशिष्यते ।
ऐकान्तिकाश्च पुरुषा गच्छन्ति परमं पदम् ।
एकान्तिनामसौ विष्णुर्यस्तादेको परायणः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥
प्रियाणामपि सर्व्वेषां देवदेवस्य सुप्रियः ।
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
विष्णुं संस्मरतः सा मे हृदयान्नापसर्पतु ॥
अन्तर्गतोऽपि वेदानां सर्व्वशास्त्रार्थवेद्यपि ।
यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥
नाधीतवेदशास्त्रोऽपि न कृताध्वरसंस्तरः ।
यो भक्तिं वहति विष्णौ तेन सर्व्वं कृतं भवेत् ॥
यज्ञानां क्रतुमुख्यानां सर्व्वेषां पारगा अपि ।
न तां यान्ति गतिं भक्ता यां यान्ति मुनिसत्तम ॥
यः कश्चिद्वैष्णवो लोके मिथ्याचारोऽप्यनाश्रमी ।
पुनाति सकलान् लोकान् सहस्रांशुरिवोदितः ॥
ये नृशंसा [illegible]ाः पापाचाररतास्तथा ।

तेऽपि यान्ति परं स्थानं नारायणपरायणाः ।
दृढ़ा जनार्द्दने भक्तिर्यदैवाव्यभिचारिणी ।
तदा क्रियत् स्वर्गसुखं सैव निर्व्वाणहेतुकी ॥
भ्राम्यतां तत्र संसारे नराणां कर्म्मदुर्गमे ।
हस्तावलम्बनो ह्येको भक्तिक्रीतो जनार्द्दनः ॥
न शृणोति गुणान् दिव्यान् देवदेवस्य चक्रिणः ।
स नरो वधिरो ज्ञेयः सर्व्वधर्म्मवहिष्कृतः ॥
नास्ति संकीर्त्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोद्भासि तद्भवेत् कुणपोपमम् ॥
यस्मिन् न्यस्ते द्विजश्रेष्ठ मुक्तिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ॥

स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ।
द्विजेन्द्र प्रतिजानीहि विष्णुभक्तो न नश्यति ॥
धर्म्मार्थकामैः किमस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ॥
दैवी ह्येषा गुणमयी हरेर्म्माया दुरत्यया ।
तमेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
किमाराधने पुंसामिष्यते हरिमेधसः ।
मनोऽराधने विष्णुर्मांसलतोयकारणम् ॥
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्वा समागमः ॥

पत्रेषु पुष्पेषु फलेषु तोये-
ष्वक्रयलभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मुक्त्यै कथं न क्रियते प्रयत्नः ॥

आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥

कदाचिन्नः सुरवरं समधिश्रयन्ति
ये पार्थिवोऽपि हि सुधाक्षुधीधनाद्याः ।
मुक्तिं गताः स्वरसमात्रविधूतपापाः
कः संशयः परममक्तिमतां जनानाम् ॥

ध्यात्वा तं प्रवरा ये ध्यानयोगविवर्ज्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं परम् ॥

मनोहरकैटभदानवलया
मदधर्म्मदलितयदुवैः पथैः ।
विरच्यतां माधव मे मनोहर-
चरणप्रणतौ हृदयाम्बुजे ॥

विष्णुरेव परं ब्रह्म त्रिभिर्भेदैरिह पठ्यते ।
वेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ॥

यजन्ति कुर्व्वि सदा तपने च सन्तापम्
सर्व्वं तुष्यन्ति सम्मोहात् सौभ्रदतः ।
नित्यदर्शनमिन्द्रमादाय मोहनाः
वदन्ति वादनमेव मानवाः ॥"

इति नारदे ३३ अध्यायः ॥

विष्णुमाया, स्त्री, (विष्णोर्माया ।) दुर्गा । यथा,—

नारद उवाच ।

"दुर्गा नारायणीशाना विष्णुमाया शिवा सती ।
नित्या सत्या भगवती सर्व्वाणी सर्व्वमङ्गला ॥
अम्बिका वैष्णवी गौरी पार्व्वती च सनातनी ।
नामानि कौथुमोक्तानि शुभानि शुभदानि च ॥
अर्थं षोड़शनाम्नाञ्च सर्व्वेषामीप्सितं वरम् ।
ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्व्वसम्मतम् ॥

नारायण उवाच ।

सृष्टा मायां पुरा सृष्टौ विष्णुना परमात्मना ।
मोहितं मायया विश्वं विष्णुमाया च
कीर्त्तिता ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥

अपि च ।

ब्रह्मोवाच ।

"विष्णुमायाम्बिके देव्य महामायां जगन्मयीम् ।
नान्या संमोहकर्त्री स्यात् सन्ध्या सावित्र्य-
धिका ॥
तस्मादहं विष्णुमायां योगनिद्रां जगत्प्रसूम् ।
स्तौमि सा चारुरूपेण शङ्करं मोहयिष्यति ॥
भवांश्च दक्ष तामेव यजतां विश्वरूपिणीम् ।
यथा तव सुता भूत्वा हरजाया भविष्यति ॥"

इति कालिकापुराणे ५ अध्यायः ॥

विष्णुयशाः, [स्] पुं, (विष्णु व्यापकं यशो यस्य । नारायणपितृत्वादेवास्य तथात्वम् । यद्वा, विष्णुना गृहीतजन्मना यशो यस्य ।) ब्रह्म-यशःपुत्रः । स च कल्किपिता । यथा,—

नारद उवाच ।

"ब्राह्मी बलवती माया सर्व्वाश्चर्य्यमयी शुभा ।
पितरं मातरं विष्णोर्नैव मुञ्चति कर्हिचित् ॥
पूर्णो नारायणो यस्य सुतः कल्किर्जगत्पतिः ।
तं विहाय विष्णुयशा मत्तो मुक्तिमभीप्सति ॥
विविक्तेऽस्य ब्रह्मसुतः प्राह ब्रह्मयशःसुतम् ।
विविक्ते विष्णुयशसं ब्रह्मसम्पद्विवर्द्धनम् ॥"

इति कल्किपुराणे ३० अध्यायः ॥

विष्णुरथः, पुं, (विष्णो रथः ।) गरुड़ः । इत्यमरः ॥ विष्णोः स्यन्दनश्च ॥

विष्णुरातः, पुं, (विष्णुना रातो रक्षितः ।) परीक्षिद्राजः । यथा,—

"दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ।
रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥
तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति ।
न सन्देहो महाभाग महाभागवतो महान् ॥"

इति श्रीभागवते १ स्कन्धे १२ अध्यायः ॥

विष्णुलिङ्गी, स्त्री, वर्त्तिकापक्षी । इति त्रिकाण्डशेषः ॥

विष्णुवल्लभा, स्त्री, (विष्णोर्व्वल्लभा ।) तुलसी । इति राजनिर्घण्टः ॥ लक्ष्मीः । यथा,—

"त्रैलोक्यपूजिते मातः कमले विष्णुवल्लभे ।
यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ॥"

इति तन्त्रसारः ॥

अग्निशिखावृक्षः । इति शब्दचन्द्रिका ॥

विष्णुवाहनं, स्त्री, (विष्णोर्व्वाहनम्
इति हेमचन्द्रः । २ । ३॥

विष्णुवाह्यः, पुं, (विष्णुर्व्वाह्यो
इति शब्दरत्नावली ॥

विष्णुशिला, स्त्री, (...
शालग्रामशिला । ...
यथा,—
"अयुतान्दे कर्त्तयति
सदर्द्धाष्टाङ्गशीतोयं ...
इति मेरु ...

विष्णुशृङ्खलः, पुं, योगविशे...
"द्वादशी ...
स एव वैष्णवो योगो ...
तस्मिन्नुपोष्य विधिवन्न...
प्राप्नोत्युत्तमां सिद्धिं ...

विष्णुधर्म्मोत्तरे ...
"एकादशी ...
तद्विष्णुशृङ्खलं नाम ...

इति श्रीहरिभक्तिविला...

विष्फारः, पुं (वि + स्फुर ...
स्फुलत्योर्घञि ।" ६।१।४७ ...
स्फुलत्योर्निर्निविभ्यः ।" ८।३।७६ ...
धनुर्गुणशब्दः । इत्यमरः । ...
टङ्कारो विष्फारः । ...
धनस्य दैर्घ्योदेति विस्ता...
रूपं विस्फारितो इत्या...
इत्यमो मूर्द्धन्यश्च । इति भर...

विष्यः, त्रि, (विषेण वध्यः ।
धर्म्मेति ।" ४।४।९१ । इत्य...
वध्यः । इत्यमरः । (विषे...
हित इति वा । इत्य...
५ । १ । २ । इति य ।)

विष्वः, त्रि, हिंस्रः । इत्युणादिको...

विष्वक्, व्य, सर्व्वतः । अस्य...
भागवते । १ । ८ । ११ ।
"तमात्मनः ...
विष्वग्विवर्द्धमानं तमङ्गुष्ठ...

विष्वक्, स्त्री, विषूणम् । ...
विष्वं अञ्चति इत्यर्थे क्विप्...
वते । १ । ८ । १३ ।

विष्वक्सेनः, पुं, विष्णुः । ...
भागवते । १० । ११ ।

...सेनसेविष्णुवाहनानि...
विष्णोर्व्विश्वोत्सवकारी । ...
"विश्वोत्सवकारी विष्व...
शङ्खचक्रगदापद्मधरोऽसि...
इत्यग्निपुराणवर्द्धि ...

...ीय: स्वरान्तिम संयुतो विन्दुमेखला ।
...तंमकलत मनोऽयं तेन तं परिपूजयेत् ॥"
इति कालिकापुराणे ८५ अध्यायः ॥
...द्रुतमनुः । यथा,—
...ञ्च मैत्रावरुणं जनकसुतमीशः स्मृतः ।
...ञ्च अनुपामा च विश्वकर्म्मणो महात्मना ॥"
इति मात्स्ये ८ अध्यायः ॥
...र्म्मप्रिया, स्त्री, (विश्वकर्म्मणः प्रिया ।)
...हरी । इत्यमरः ॥ आमार आतु इति
...ा ॥ लक्ष्मीः । इति मेदिनी । थे, १६६ ॥
...ता, स्त्री, प्रियङ्गुः । इत्यमरः ॥
...ं, स्त्री, शोभनम् । इति जटाधरः ॥
...द्रकरणम् । यथा । विश्वसति वीणा । इति
...बोधव्याकरणम् ॥
...[च] त्रि, (विष्वगञ्चतीति । विषु +
...। "विष्वग्देवयोश्चेति ।" ६।३।९२। इति
...स्थाने अद्र्यादेशः ।) सर्व्वतोगामी ।
...मरः ॥ (यथा, माघे । १८ । ५४ ।
"विष्वद्रीचीर्विक्षिपन् सैन्यवीची-
... राजावलः क्वापि दूरं प्रयातम् ॥")
...:, पुं, भक्षणम् । इति हेमचन्द्रः ॥
...स्त्री, कमलम् । इत्यमरः ॥ (यथा, कला-
...ाशे । ६ ।
"नवविसकिसलयकवलन-
...कषायकलहंसकलरवो यत्र ।
...कमलवनेषु प्रसरति
...सन्ध्या इव नूपुरारावः ॥")
...:, पुं, (वि + सं + वद + घञ् ।) विप्र-
...ः । इत्यमरः ॥ (यथा, महाभारते ।१२ ।
...८ । ११ ।
...दोऽयमविसंवादं प्रवर्त्तन्ते तदाश्रयाः ॥")
...ण्ठिका, स्त्री, (विससदृशः शुभ्रः कण्ठो
...ा इति बहुव्रीहौ कन् टापि अत इत्वम् ।)
...ाका । इत्यमरः ॥
...सुमं, स्त्री, (विसस्य कुसुमम् ।) कमलम् ।
... राजनिर्घण्टः ॥
...टः, पुं, सिंहः । इति शब्दचन्द्रिका ॥
...रीटकः । इति राजनिर्घण्टः ॥
..., स्त्री, (विसाज्जायते इति । जन् + डः ।)
...म् । विसं मृणालं तत्र जातत्वात् ॥
...भिः, पुं, (विसं नाभिरुत्पत्तिस्थानं यस्य ।)
...नी । पद्मसमूहः । इति त्रिकाण्डशेषः ॥
...सूनं, स्त्री, पद्मम् । इत्यमरः ॥ (यथा, शिशु-
...वधे । ५ । २८ ।
"अन्तर्विसं घृतविकासिविसप्रसूनाः ॥")
..., पुं, (विसरतीति । वि + सृ + पचाद्यच् ।)
...हः । इत्यमरः ॥ प्रसरः । इति मेदिनी ।
... ।२१० ॥
...:, पुं, (वि + सृज + घञ् ।) दानम् । (यथा,
...वंशे । ४ । ८६ ।
...ादानं हि विसर्गाय सतां जलमुचामिव ॥")
...गः । (यथा, महाभारते । १ । ३२ । १३ ।
"भ्रामाश्चविसर्गैस्तैर्ध्यमानः समन्ततः ॥")
समन्ततः । विसर्जनीयः । (यथा, भाग-
वते । ६ । ८ । १० ।
"सविसर्गं फडन्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥")
वर्णव्यायमभेदः । इति मेदिनी । गे, ५० ॥
मोक्षः । इति हलायुधः ॥ विरहः । इति
शब्दरत्नावली ॥ विशेषसृष्टिः । यथा,—
"पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो वीजाद्वीजं चराचरम् ॥"
इति श्रीभागवतम् ॥
विसर्ज्जनीयस्य पर्य्यायः ।
"अः सर्गो रसना वक्त्रं विसर्गश्च द्विविन्दुकः ।
नादोऽर्द्धेन्दुरर्द्धमात्रा कला रात्री महाशिवः ।
अनुत्तार्थो तुरीया च विश्वमातृकला परा ॥"
इति वीजाभिधानम् ॥
अपि च ।
"अः कण्ठको महासेनः कला पूर्णामृता हरिः ।
इच्छा भद्रा गणेशश्च रतिविद्यासुखी सुखम् ॥
द्विविन्दुरसना सोमोऽनिरुद्धो दुःखसूचकः ।
द्विजिह्वः कुण्डलं वक्त्रं सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्ता गणनाथो महेश्वरः ॥"
इति वीजवर्णाभिधानान्तरम् ॥
अन्यच्च ।
"विसर्गः सर्गमाख्यातो वियद्द्वियमासनः ।
अनिरुद्धो महेशानि कालसोऽपि रमापि च ॥"
इति वर्णाभिधानम् ॥
(प्रयोगः । यथा, भागवते । १ । ५ । ११ ।
"तद्वाग्विसर्गो जनताघविप्लवः ॥")
विसर्ज्जनं, स्त्री, (वि + सृज + ल्युट् ।) दानम् ।
परित्यागः । इत्यमरः ॥ (यथा, रघुवंशे ।८।२५।
"श्रुतदेहविसर्ज्जनं पितु-
श्चिरमश्रूणि विमुच्य राघवः ॥")
संप्रेषणम् । इति मेदिनी । ने,२०५॥ (पुं, यदुवं-
शीयानामन्यतमः । यथा,भागवते ।११।३०।१८।
"विसर्ज्जना: कुकुराः कुन्तयश्च
मिथस्तु जघ्नुः सुविसृज्य सौहृदम् ॥"
विशेषेण सृज्यते इति । वि + सृज + कर्म्मणि
ल्युट् । उत्पादिते, त्रि । यथा, भागवते । १० ।
१६ । ५७ ।
"त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्ज्जनम् ॥")
विसर्पः, पुं, (वि + सृप + घञ् ।) रोगविशेषः ।
तत्पर्य्यायः । विसर्पिः २ सर्व्विवामयः ३ । इति
राजनिर्घण्टः ॥ तस्य विप्रकृष्टं निदानं संख्यां
निरुक्तिञ्चाह ।
"लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः ।
विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् ॥"
आदिशब्दाच्चरकोक्तदधिशाकशिण्डाकप्रभृ-
तीनां ग्रहणम् ॥ * ॥ सप्तधात्वं विवृणोति ।
"पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः ।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः ॥
आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः ।
यस्तु कर्द्दमको घोरः स पित्तकफसम्भवः ॥" * ॥
विसर्पदोषदूष्याणि संख्याह ।
"रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः ।
विसर्पाणां समुत्पत्तौ हेतवः सप्त धातवः ॥"
त्रयो मलाः वातपित्तकफाः । दोषाः दूषका
इत्यर्थः । अन्यथा दोषा मला इत्यत्र पुनरुक्ति-
दोषोऽशक्यत ॥ * ॥ वातिकस्य लक्षणमाह ।
"तत्र वातात् परीसर्पो वातज्वरसमव्यथः ।
शोफस्फुरणनिस्तोदभेदायामार्त्तिहर्षवान् ॥"
परीसर्पो विसर्पः । वातज्वरसमव्यथः शिरो-
हृद्गात्रोदरशूलादियुक्तः । भेदः विदारणेनेव
व्यथा । आयामः आकर्षणेनेव व्यथा ॥ * ॥
पैत्तिकमाह ।
"पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥"
द्रुतगतिः शीघ्रप्रसरणशीलः ॥ * ॥ श्लैष्मिक-
माह ।
"कफात् कण्डुयुतः स्निग्धः कफज्वरसमानरुक् ॥"
सान्निपातिकमाह ।
"सन्निपातसमुत्थश्च सर्व्वरूपसमन्वितः ॥" * ॥
वातपैत्तिकस्याग्निविसर्पाख्यस्य च लक्षणमाह ।
"वातपित्तज्वरच्छर्द्दिमूर्च्छातीसारतृड्भ्रमैः ।
अस्थिभेदाग्निसदनतमकारोचकैर्युतः ॥
करोति सर्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च संसर्पति भवेत् स सः ॥
शान्ताङ्गारासितो नीलो रक्तो वा स्वयमीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वात् द्रुतश्च सः ॥
मर्म्मानुसारी वीसर्पः स्यादतोऽतिबलस्ततः ।
व्यथेताङ्गं हरेत् संज्ञां निद्राञ्च श्वासमीरयेत् ॥
हिक्काञ्च संगतोऽवस्थामीदृशीं लभते नरः ।
क्वचिच्छर्म्मारतिग्रस्तो भूमिशय्यासनादिषु ॥
चेष्टमानस्ततः क्लिष्टो मनोदेहसमुद्भवाम् ।
दुःप्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥"
स्फोटैः उपचीयत इत्यन्वयः । मर्म्मानुसारी
हृदयानुसारी । हरेत् वीसर्प इत्यन्वयः । हिक्कां
हिक्काम् । ईरयेत् उत्पत्तुं प्रेरयेत् । मनोदेह-
समुद्भवां निद्रां मरणरूपाम् । अश्नुते प्राप्नोति ॥ * ॥
वातश्लैष्मिकग्रन्थिविसर्पमाह ।
"कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा वृद्धरक्तस्य त्वक्शिरास्नायुमांसगम् ॥
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम् ॥
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतः ।
इत्ययं ग्रन्थिवीसर्पो वातश्लेष्मप्रकोपजः ॥"
कफेन स्वहेतुदुष्टेन पवनोऽपि स्वहेतुदुष्टः ।
तेनायं वातश्लैष्मिकः । तं कफं बहुधा भित्त्वा
रक्तं वा दूषयित्वा इत्यन्वयः । त्वगादिकमिति
रक्तविशेषणम् ॥ * ॥ पित्तश्लैष्मिकं कर्द्दमाख्यं
विसर्पमाह ।
"कफपित्तज्वरास्तम्भो निद्रातन्द्राशिरोरुजा ।
अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः ॥
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ।

आमोपवेशनं लेपसेवनमाशु विसर्पति ।
प्रायेणामाशये गृह्णन्नेकदेशं न चातिरुक् ।
पिड़कैरवकीर्णोऽतिपीतलोहितपाण्डुरैः ।
स्निग्धोऽसितो मेचकाभो मलिनः शोफवान् गुरुः ।
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नो विदीर्य्यते ।
पङ्कवत् शीर्णमांसश्च स्पष्टस्नायुशिरागणः ।
शवगन्धिश्च वीसर्पः कर्द्दमाख्यमुशन्ति तम् ।"
न च सर्पति एकदेशमित्यन्वयः । पिड़कैः पिड़काभिः । अवकीर्णः व्याप्तः । असितः कृष्णः । मेचकः कृष्णवर्णः । प्राज्योष्मा प्रचुरोष्मा । स्पृष्टः क्लिन्नोऽविदीर्य्यते स्पृष्टः सन्नार्द्रो भवति विदीर्य्यते च । पङ्कवत् कर्द्दमवर्णा त्वग् यत्र सः । शीर्णमांसः गलितमांसः । अतएव स्पष्टस्नायुशिरागणः । * । सान्निपातिकमाह ।
"सन्निपातसमुत्थस्तु सर्व्वरूपसमन्वितः ।" * ।
क्षतजञ्च विसर्पमाह ।
"बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ।
वीसर्पं मारुतः कुर्य्यात् कुलत्थसदृशैश्चितः ।
स्फोटैः शोथज्वररुजा दाहाढ्यं श्यावशोणितम् ।"
बाह्यहेतोः शस्त्रप्रहारव्यालदन्तनखाद्यागन्तुहेतोः । श्यावशोणितं धूम्रवर्णरक्तम् । * ।
उपद्रवानाह ।
"ज्वरातीसारवमथुत्वङ्मांसदरणक्लमाः ।
अरोचकविपाकौ च विसर्पाणामुपद्रवाः ।" * ।
साध्यादिकमाह ।
"सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्व्वात्मकः क्षतकृतश्च न सिद्धिमेति ।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
कृच्छ्राश्च मर्म्मसु भवन्ति च सर्व्व एव ।"
पित्तात्मकोऽञ्जनवपुः पित्तजः सन् कज्जलवर्णः । सर्व्वे द्वन्द्वजा अपि । * । अथ विसर्पस्य चिकित्सा ।
"विरेकवमनालेपसेचनासृग्विमोक्षणैः ।
उपाचरेद्यथादोषं विसर्पानविदाहिभिः ।
रास्ना नीलोत्पलं दारु चन्दनं मधुकं बला ।
घृतं क्षीरयुतो लेपो वातवीसर्पनाशनः ।"
चन्दनमत्र रक्तं ग्राह्यम् ।
"कसेरुशृङ्गाटकपद्मगुन्द्रैः
सशैवलैः सोत्पलकर्द्दमैश्च ।
वस्त्रान्तरैः पित्तकृते विसर्पे
लेपो विधेयः सघृतः सुशीतः ।" * ।
त्रिफलापद्मकोशीरसमङ्गाकरवीरकम् ।
नलमूलमनन्ता च लेपः श्लेष्मविसर्पहा ।
समङ्गा लज्जालुः ।
"वातपित्तप्रशमनमपि वीसर्पे हितम् ।
वातघ्नं दारुणं कर्म पित्तविसर्पे हितम् ।
पित्तघ्नं दशकं हितं कर्द्दमसंज्ञके ।
विशेषतश्चैतत् कुर्य्यात् विसर्पे विषमाश्रयम् । * ।
शिरीषयष्टीनतचन्दनैला
मांसीहरिद्राद्वयकुष्ठवालैः ।
लेपो दशाङ्गः सघृतः प्रयोज्यो
विसर्पकुष्ठज्वरशोथहारी ।"
नतं तगरम् । चन्दनमत्र रक्तं ग्राह्यम् ।
दशाङ्गो लेपः । * ।
"परिषेकाः प्रलेपाश्च शस्यन्ते पञ्चवल्कलैः ।
पद्मकोशीरमधुकं चन्दनैर्वा विसर्पिणि ।
भूनिम्बवासा कटुका पटोल-
फलत्रयं चन्दननिम्बसिद्धः ।
विसर्पदाहज्वरशोथकण्डू-
विस्फोटतृष्णावमिहृत् कषायः ।
कुष्ठानि यानि सर्पींषि व्रणेषु विविधेषु च ।
विसर्पे तानि योज्यानि सेकालेपनभोजने ।" * ।
करञ्जसप्तच्छदलाङ्गलीक-
स्नुह्यर्कदुग्धानलभृङ्गराजैः ।
तैलं विपाच्यं सविषैर्विपक्वं
विसर्पविस्फोटविचर्च्चिकाघ्नम् ।
इति करञ्जादितैलम् । * ।
"कुष्ठामयस्फोटमसूरिकोक्त-
चिकित्सयाप्याशु हरेद्विसर्पान् ।
सर्व्वान् विकारान् परिशोध्य धीमान्
व्रणं क्रमेणोपचरेद्यथोक्तम् ।"
इति विसर्पाधिकारः । * । इति भावप्रकाशः ॥
(वेगः । यथा, उत्तरचरिते ।
"प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।"
नाट्यालङ्कारविशेषः । तल्लक्षणादिकं यथा, साहित्यदर्पणे । ६ । ३८५ ।
"विसर्पो यत्समारब्धं कर्म्मानिष्टफलप्रदम् ।"
यथा वेण्याम् । एकस्य तावत् पाकोऽयमित्यादि ।)

विसर्पणं, क्ली, (वि+सृप+ल्युट् ।) प्रसरः । इत्यमरः ॥ तत्पुनर्विटपादेर्विसर्पणम् । इति भरतः ॥ (निक्षेपः । यथा, महाभारते । ७ । ८ । १६ ।
"शोषणं सागरस्येव मेरोरिव विसर्पणम् ।
पतनं भास्करस्येव न मृष्ये द्रोणपातनम् ।")

विसर्पिः, पुं. विसर्पः । इति राजनिर्घण्टः ॥

विसलं, क्ली, (विसं लातीति । ला+कः ।) पल्लवः । इति त्रिकाण्डशेषः ॥

विसारः, पुं, (विशेषेण सरतीति । सृ गतौ + "व्याधिमत्स्यबलेष्विति वक्तव्यम् ।" ३ । ३ । १७ । इत्यस्य वार्त्तिकोक्त्या घञ् ।) मत्स्यः । इत्यमरः ॥ (भावे घञ् । निर्गमः । यथा, ऋग्वेदे । १ । ७९ । १ ।
"हिरण्यकेशो रजसो विसारे
ऽहिर्धुनिर्वात इव ध्रजीमान् ।"
"रजस उदकस्य विसारे विसरणे मेघान्निर्गमने ।" इति तद्भाष्ये सायणः ।)

विसारिणी, स्त्री, (विशेषेण सरतीति । सृ+णिनिः । ङीप् ।) माषपर्णी । इति राजनिर्घण्टः ॥ (प्रसरणशीला । यथा, राजतरङ्गिण्याम् । ८ । १८२ ।
"विधूमस्य विसारिण्यो ज्वाला हव्यभुजो दधुः ।")

विसारितः, त्रि, प्रसारितः । ...
क्तप्रत्ययेन निष्पन्नमिदम् ।

विसारी, [न्] त्रि, (वि+सृ+णिनि ।)
शीलः । तत्पर्य्यायः । ...
प्रसारी ४ । इत्यमरः ॥ (यथा,
"अरिष्टशय्यां परितो विसारि
सुजन्मनस्तस्य निजेन तेजसा ।"

विसिनी, स्त्री, (विसमस्त्यस्या इति ।
"पुष्करादिभ्यश्च ।" इति इनिः ।)
पद्मिनी । इत्यमरः ॥ ...
निर्घण्टः ॥

विसूचिका, स्त्री, (विसूची+स्वार्थे कन्)
अजीर्णरोगविशेषः । इति ...
(अस्या विशेषविवरणमस्तु ...
योर्द्रष्टव्या ।)

विसूची, स्त्री, (विशेषेण सूचयति ...
वि+सूच्+अच् । स्त्रियां ङीष् ...
सूचीव ।) अजीर्णरोगविशेषः । ...
इति भाषा । तस्य निरुक्तिर्यथा,—
"सूचीभिरिव गात्राणि ...
यस्याजीर्णेन सा वैद्यैर्विसूचीति ...
तस्या निदानमाह ।
"न तां परिमिताहारा लभन्ते ...
मूढ़ास्तामजितात्मानो ...
[illegible]
तस्या लक्षणमाह ।
"मूर्च्छातिसारौ वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः ।"
उद्वेष्टनं हस्तपादयोः । शिरसो भेदः
शूलम् । * । तस्या उपद्रवानाह ।
"निद्रानाशोऽरतिः कम्पो ...
[illegible]
अमी उपद्रवा घोरा विसूच्याः ...
अमी उपद्रवा घोराः ...
उपद्रवाः ...
विसूच्याः पञ्च दारुणाः ...
यदि स्युस्तदा दारुणाः ...
तस्या अरिष्टमाह ।
"यः श्यावदन्तौष्ठनखो ...
...
...
...
सर्व्वविमुक्तसन्धिः ...
सन्धयो यस्य सः । इति भावप्रकाशः ।
अस्याश्चिकित्सा अजीर्णशब्दे द्रष्टव्या ।

विसृतं, क्ली, अनुतापः । इति ...

विसृतं, त्रि, (वि+सृ+क्तः ।) विस्तृतम् ...
मरः ॥

विसृत्वरः, त्रि, (विसरति इति ...
"दृश्यन्ते विसृत्वरैः ..."

...म् । छन्दसीति गुण् ।) प्रसरणशीलः ।
। "विसरणम् । गतिविशेषः । विसृ-
:। विसत्वरी नदी । विसत्वरं तैल-
'। विसरति विसत्वरः स गतो त्वरम्-
ति त्वरम् स्वस्य तन् पिति तन् ।" इति

वि. (विशेषेण सरति तच्छीलः । वि+
सृघस्यदः क्मरच् ।"३।२।१६०। इति
।) प्रसरणशीलः । इत्यमरः ॥
म, (वि+सृज्+क्तः ।) निक्षिप्तः ।
टाधरः ॥ (यथा, मृच्छकटिके । १ अङ्के ।
इयचक्रलकटाक्षविसृष्टदृष्टि-
गुसारचकिता हरिणीव यासि ॥")
। दत्तः । (त्यक्तः । यथा, भागवते ।
। २४ ।
धन्तर्हितस्य सारसी विसृष्टा
णि निर्व्वाणविलम्बितानि ।"
। यथा, रघुः । ५ । ३८ ।
व्याप्तः कुमारानयनोत्सुकेन
गौतेन दूतो रघवे विसृष्टः ॥"
:। विस्फुटयरूपः । यथा, कातन्त्रे ।८।२।
रयकारयोर्विसृष्टः ॥")
, स्त्री, (विष उत्सर्गे + क्तः ।) देव्यो-
षष्ठीविरक्तिकापरिमितस्वर्णम् । इत्य-

पुं, (वि+सृ+"प्रथने वावशब्दे ।"
। इति घञ् प्रतिषेधे "ऋदोरप् ।"
) शब्दस्य विस्तारः । इत्यमरः ॥ (यथा,
लवधे । २ । २४ ।
रवरा वाचो भाव्यभूता भवन्तु मे ॥"
म् । यथा, भागवते । ३ । ३ । २ ।
नेः सङ्क्षेपोक्तं प्रश्नाधीत्य सविस्तरम् ॥")
। (यथा, गीतायाम् । १० । १९ ।
न्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥")
। इति मेदिनी ॥ पीठः । समूहः । इति
नावली ॥ (त्रि, बहुः । यथा, साहित्य-
६ । ३१४ ।
तं परित्यज्य नीरसं वस्तु विस्तरम् ।
न्दर्शयेच्छेशमासस्वानन्तरं तदा ॥")
पुं, (वि+स्तृ+"प्रथने वावशब्दे ।"
। ३३ । इति घञ् ।) विटपः । विस्तो-
तत्पर्य्यायः । विग्रहः २ व्यासः ३ ।
:॥ (यथा, आर्य्यासप्तशत्याम् । ५५८ ।
सलमनं यद्यो विस्तारो गुणस्य याव-
नतिः ।
स्य खलस्य च निशाङ्कसमप्रभाप्राय ॥")
। इति मेदिनी । रे, २१५ ॥
, त्रि, (वि+स्तृ+क्तः । "रदाभ्या-
।" ८।२।४२। इति नः ।) विपुलम् ।
म् । यथा,—
र्णं विकटं बड्ं विशालं विपुलं पृथु ।"
इति जटाधरः ॥

(यथा,—
"पर्णानि स्वर्णवर्णानि विस्तीर्णकर्णलोचने ।
तूर्णमानीयतां चूर्णं पूर्णचन्द्रनिभानने ॥"
इत्युद्भटः ॥)

विस्तीर्णपर्णं, क्ली, (विस्तीर्णं पर्णं पत्रमस्य ।)
मानकम् । इति शब्दचन्द्रिका ॥

विस्तृतः, त्रि, (वि+स्तृ+क्तः ।) लब्धविस्तारः ।
तत्पर्य्यायः । विततम् २ ततम् ३ । इत्यमरः ॥
(यथा, भागवते । २ । २४ । ६० ।
"तत्त्वं ब्रह्मपरं ज्योतिराकाशमिव विस्तृतम् ॥")

विस्पष्टः, त्रि, (विशेषेण स्पष्टः ।) सुस्पष्टः । यथा,
"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥"
इति तिथ्यादितत्त्वम् ॥

विस्फारः, पुं, (वि+स्फुर+घञ् । "स्फुरति-
स्फुलत्योर्घञि ।" ६।१।४७ । इत्यात्वम् ।) धनु-
र्गुणशब्दः । इत्यमरः ॥ अस्य विवरणं मूर्द्धन्य-
षकारमध्यविष्फारशब्दे द्रष्टव्यम् ॥ (यथा,
महाभारते । ३ । २७८ । ३६ ।
"विस्फारस्तस्य धनुषो यन्त्रस्येव तदा बभौ ॥"
विस्तृतिः । यथा, साहित्यदर्पणे । ३ । २०७ ।
"विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ॥")

विस्फारितः, त्रि, प्रकाशितः । चलितः । विपूर्व्व-
ण्यन्तस्फरधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥
(यथा, महाभारते । ३ । ११ । २० ।
"स नष्टमायोऽतिबलो क्रोधविस्फारितेक्षणः ।
कालमूर्त्तिधरः क्रूरः कालकल्पो व्यदृश्यत ॥"
निर्घोषितः । यथा, किराते । १४ । ३० ।
"उदूढवक्षःस्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः ॥")

विस्फुरितः, त्रि, (वि+स्फुर+क्तः ।) स्फूर्त्ति-
विशिष्टः । चञ्चलः । यथा,—
"रक्तरक्तोत्पलाङ्गञ्च रक्तविस्फुरितेक्षणम् ।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ॥"
इति दशभुजादुर्गाध्यानैकदेशः ॥

विस्फुलिङ्गः, पुं, विषभेदः । इति हेमचन्द्रः ॥
(विशिष्टः स्फुलिङ्गः ।) अग्निकणा च ॥

विस्फोटः, पुं, (विस्फोटतीति । वि+स्फुट्+
अच् ।) विषहस्फोटकः । विस्फोड़ा इति
भाषा । तत्पर्य्यायः । पिटकः २ पिटका ३
पिटकम् ४ । इत्यमरः । विटकः ५ विटका ६
विटकम् ७ । इति तट्टीका ॥ स्फोटकः ८
स्फोटः ९ । इति राजनिर्घण्टः ॥ (यथा,
कथासरित्सागरे । ८५ । १८ ।
"किमेतदिति संभ्रान्तः प्रबुद्धोऽथ ददर्श सः ।
उत्थाय राजा विस्फोटानङ्गे तस्या विनि-
र्गतान् ॥")

तस्य विप्रकृष्टनिदानपूर्व्विकां संप्राप्तिमाह ।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्षारैरजीर्णाध्यशनातपैश्च ।
तथर्त्तुदोषेण विपर्य्ययेण
कुप्यन्ति दोषा पवनादयस्तु ॥
त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च ।
घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वान् ज्वरपुरः-
सरान् ॥"

ऋतुदोषेण ऋतुहेतुकशीतोष्णादीनामनियोगेन ।
ऋतूचिताहारविहारवैपरीत्येन त्वचमाश्रित्य
विस्फोटान् कुर्व्वन्तीत्यर्थः । ज्वरपुरःसरान्
ज्वरपूर्व्वान् ॥ * ॥ रूपमाह ।
"अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः ।
क्वचित् सर्व्वत्र वा देहे विस्फोटा इति ते
स्मृताः ॥"

रक्तपित्तजाः एतेन सर्व्वेषु विस्फोटेषु रक्त-
पित्तयोः प्रधानकारणत्वम् । यथा शूलेषु वातस्य
तथा वातानुगतिरपि बोद्धव्या । तथा च भोजः ।
"यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि ।
अग्निदग्धनिभान् स्फोटान् कुरुतः सर्व्वदेह-
गान् ॥" * ॥

वातिकमाह ।
"शिरोरुक्शूलभूयिष्ठज्वरतृट्पर्व्वभेदनम् ।
सकृष्णवर्णता चेति वातविस्फोटलक्षणम् ॥"
शूलमत्र तोदरूपम् ॥ * ॥ पैत्तिकमाह ।
"ज्वरदाहरुजापाकः स्रावतृष्णासमन्वितम् ।
पीतलोहितवर्णञ्च पित्तविस्फोटलक्षणम् ॥"
रुजादित्रयं स्फोटेषु ॥ * ॥ वातपैत्तिकमाह ।
"वातपित्तकृतो यस्तु तत्र स्युस्तीव्रवेदनाः ।
स्तैमित्यं गौरवं कण्डुर्भवेद्वातबलासजे ॥" * ॥
पित्तश्लैष्मिकमाह ।
"कण्डूर्दाहो ज्वरश्छर्द्दिर्जायते कफपैत्तिके ॥"
सान्निपातिकमाह ।
"मध्ये निम्नोन्नतस्फोटः कठिनः स्वल्पपाकवान् ।
रागदाहतृषामोहच्छर्द्दिमूर्च्छारुजाज्वराः ।
प्रलापो वेपथुर्यत्र सोऽसाध्यश्च त्रिदोषजः ॥"
मोहो विपरीतज्ञानम् । मूर्च्छा सर्व्वथा ज्ञान-
शून्यता ॥ * ॥ रक्तजमाह ।
"वेदितव्याश्च रक्तेन पैत्तिकेन च हेतुना ।
गुञ्जाफलसमा रक्ता रक्तस्रावा विदाहिनः ।
न ते सिद्धिं समायान्ति शुद्धैर्योगशतैरपि ॥"
पैत्तिकेन च हेतुना पित्तस्यहेतुना कट्वादिना
रक्तस्य पित्तस्य तुल्यत्वात् न च ते साध्याः ।
"एवं चाष्टविधा दाह्या आन्तरोऽपि भवेदयम् ।
सन्निपातान्तरोऽथ तीव्रा ज्वरयुक्ताभिजायते ॥
तस्मिन् बहिर्गते स्वास्थ्यम् यानस्य बहिर्गतिः ।
तत्र वातिकविस्फोटक्रिया कार्य्या विजानता ॥"
उपद्रवानाह ।
"तृट्श्वासमांससङ्कोचदाहहिक्कामदज्वराः ।
विसर्पमर्म्मसंरोधालेपाश्चोक्ता उपद्रवाः ॥"
मांससङ्कोचः मांसस्य शटितत्वम् । मर्म्मसंरोधो
मर्म्मव्यथा । तेषां विस्फोटकानाम् ॥ * ॥
केचिदुपद्रवान् लक्षणान्तरं पठन्ति ।
"हिक्का श्वासोऽरुचिस्तृष्णा साङ्गमर्द्दो हृदि-
व्यथा ।
विसर्पज्वरहृल्लासा विस्फोटानामुपद्रवाः ॥"
साध्यत्वादिकमाह ।

"रक्तदोषोत्थितः श्वाषः ... दिरो-
... ।
... मूर्च्छाकरः ।"
अथ विस्फोटस्य चिकित्सा ।
"विस्फोटे लङ्घनं कार्य्यं वमनं पथ्यभोजनम् ।
... विरेचनम् ॥
[illegible]

विस्मयः, पुं, (वि+स्मि+"एरच् ।" इत्यच् ।) आश्चर्य्यम् । तत्पर्य्यायः । अद्भुतः २ ... इत्यमरः । "अन्यदद्भुतमस्ते इत्ययम् ।
'अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।'
इति भावरसयोः पर्य्यायत्वं अद्भुतस्य विस्मय-स्थायिभावात्मकत्वात् ।" इति भरतः ॥ * ॥
तस्य लक्षणम् । यथा,—
"विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु ।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ॥"
इति साहित्यदर्पणम् ।
(अस्मात्तपःक्षयो भवति । यथा, मनुः । ४ । २३७ ।
"यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ॥")
दर्पः । इति मेदिनी । सन्देहः । इति शब्द-रत्नावली । (विगतः स्मयो गर्व्वो यस्येति । गतगर्व्वे, त्रि । यथा, भागवते । ३ । १७ । १० ।
"तं वीरमारादभिपद्य विस्मयः
प्रविश्यसे वीरभये न्यभिर्वृतः ॥")
विस्मयान्वितः, त्रि, (विस्मयेन अन्वितः युक्तः ।) विस्मययुक्तः । आश्चर्य्यविस्मितः । तत्पर्य्यायः । विलक्षः २ । इत्यमरः ।
विस्माप(य)नः, पुं, (विस्माप(य)यतीति । वि+स्मि+णिच्+ल्युः ।) कुहकः । गन्धर्व्वनगरम् । कामदेवः । इति मेदिनी । क्ली, विस्मापनम् ।
(यथा, हरिवंशे । १२६ । ५६ ।
"पारिजातनदीः पुष्पं तस्य दत्तं मयानघ ।
विस्मापनार्थं देवेश प्रतीनामुपलेखकः ॥"
विस्मापककारके, त्रि । यथा, भागवते । १ । १५ । ५ ।
"वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा ।
येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥")
विस्मितः, त्रि, (वि+स्मि+क्तः ।) विस्मयान्वितः । यथा,—
"महाराज्ञस्तमान् दृष्ट्वा समुत्थाय महेश्वरः ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।"
इति वामने ४७ अध्यायः ।
विस्मृतिः, स्त्री, विस्मरणम् । [illegible]
[illegible] ।
विस्मृतः, त्रि, (वि + स्मृ + क्तः ।) स्मरणाविषयः । [illegible] । इत्यमरः । (यथा,
"[illegible]
[illegible] ।"
[illegible] ।)
विस्मृतिः, स्त्री, विस्मरणम् । [illegible] । (यथा, कथा-सरित्सागरे । ३३ । ८६ ।

"आमातस्य च यथा ...
यथा तस्य विषा ..."
विसं, क्ली, आमयम् । [illegible]
धूमादियते [illegible]
भरतः । (यथा, [illegible]
"समाहितं [illegible]
[illegible]
[illegible] । वि । घ, ८२ । ७ ।
विस्मयघ्ना, स्त्री, ([illegible]
इति रात्रनिर्घण्टः ।
[illegible]

…गुरैव विहगैर्व्वियियो महारघान् ।")
। चन्द्र: । इति शब्दरत्नावली । ग्रह: ।
…र्ग: ।
पुं, (विहायसा गच्छतीति । ३।२।३८ ।
"गमे: सुपीति ।" खच् । "विहायसो
व ।" इति विहादेश: । "खच डिद्दा
: ।" इति डिच ।) पक्षी । इत्यमर: ।
, रघुवंशे । १ । ४१ ।
…ते मुनिकन्याभिस्तत्नीवारभिक्तसमकम् ।
…ाय विहङ्गानामाम्यानामुपायिनाम् ।")
। (यथा, महाभारते । ८ । ६६ । ३५ ।
…प्रेरितैर्लोहिताङ्गैर्व्विहङ्गै: ।")
चन्द्र: । सूर्य्य: । इति शब्दरत्नावली ।
…विशेष: । १ । ५७ । ११ ।
…ङ्ग: शरभो मेद: प्रमोद: संहतोपन: ।")
, पुं, (विहायसा गच्छतीति । ३।२।३८ ।
। "खच्प्रकरणे गमे: सुप्युपसंख्यानम् ।"
कार्शिकोक्त्या खच् । "विहायसो विह
इति विहादेश: ।) पक्षी । इत्यमर: ।
, महाभारते । ३ । २७४ । ३६ ।
…स्य रक्तान्यहरत्कामरूपी विहङ्गम: ।"
। यथा, मार्कण्डेये । १०८ । ६७ ।
…भिरश्वरूपैश्च मत्तद्युक्तैर्व्विहङ्ग-
मम् ।")
…, स्त्री, भारयष्टि: । इति शब्दरत्नावली ।
इति भाषा ।
…ज:, पुं, (विहङ्गानां राजा । समासे
) गरुड: । इति हलायुध: । (यथा,
…ालवधे । १ । ७ ।
"विहङ्गराजाङ्गरुहैरिवायते-
र्हिरण्मयोर्व्वीरुहवल्लितन्तुभि: ।")
…, स्त्री, भारयष्टि: । इत्यमर: । बाँक
भाषा ।
स्त्री, गर्भोपघातिनी गौ: । इति संक्षिप्त-
…ादिवृत्ति: ।
त्रि, विशेषेण हत: । विनष्ट: । विपूर्व्वक-
…तो: क्तप्रत्ययेन निष्पन्नमिदम् ।
क्ली, (वि+हन+ल्युट् ।) विघ्न: ।
। तूलपिञ्जल: । इति मेदिनी । ने, ८१ ।
पुं, (वि+हृ+अप् ।) वियोग: । इति
…ुध: ।
क्ली, विहार: । विपूर्व्वकहृधातोरनट्-
…न निष्पन्नमिदम् । (यथा, भागवते ।१० ।
१० ।
"विहरणञ्च ते ध्यानमङ्गलम् ।"
…रणम् । यथा, पाणिनौ । १ । ३ । २० ।
"व्याङो दोऽनास्यविहरणे ।"
…त्यम् । यथा, मार्कण्डेये । १६ । ६७ ।
…विहरणश्चैव क्रतुभावश्च लप्यते ।
…ायनमस्माकं विना होमेन जायते ।")
, क्ली, (वि+हस्+क्त: ।) मध्यम-
…म् । इत्यमर: ।

विहस्त:, त्रि, व्याकुल: । इत्यमर: । (यथा,
रघु: । ५ । २८ ।
"रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार ।")
पण्डित: । इति मेदिनी । (यथा, हरिवंशे ।
७३७ । २८ ।
"नानायुधविहस्तानां त्वरितानां प्रधावताम् ।
दृंहितोत्कृष्टनिनदैर्गजबृंहितनिस्वनै: ।")
विकर: । (यथा, विख्यातविजये । २ अङ्के ।
"विगतरथविहस्तन्यस्तशस्त्रप्रमत्त-
स्खलितगतिभयार्त्तान् नैव जातु प्रहर्त्ता ।")
षण्डे, पुं । इति शब्दरत्नावली ।
विहा, अ, (ओहाक् त्यागे + "विपाविहा ।"
उणा० ४ । ३६ । इति निपातनात् आ ।)
स्वर्ग: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ।
विहापितं, क्ली, (वि+हा+णिच्+क्त: ।)
दानम् । इत्यमर: ।
विहाय:, [स्] क्ली पुं, आकाश: । इत्यमर: ।
(यथा, साहित्यदर्पणे । १० ।
"कान्तायते स्पर्शसुखेन वारि
वारीयते स्वच्छतया विहाय: ।"
त्रि, महान् । यथा, निरुक्ते । ४ । १५ । "विहा-
यसस्तेभिरिन्द्रम् ।" "विहायसो महान्त: ।"
इति यास्क: । यथा च निघण्टुटीकायाम् । ३ ।
३।१२ । "विहाया: । वहिहाधाञ्भ्यश्छन्दसि ।
उणा० ४ । २१५ । इति जहातेर्निहीतेर्व्वा
बाहुलकात् णुगभावेऽपि युगागमो निपात्यते ।"
यथा, ऋग्वेदे । ४ । ११ । ४ ।
"तद्वाजी वाजंभरो विहाया: ।"
"विहाया: महान् ।" इति तद्भाष्ये सायण: ।)
विहाया:, [स्] पुं, पक्षी । इत्यमर: ।
विहायसं, क्ली पुं, आकाश: । इत्यमरटीकायां
मथुरेश: । (यथा, महाभारते ।१।८३।१४।
"आतिष्ठस्व रथं राजन् विक्रमस्व विहाय-
सम् ।")
विहायस:, पुं, पक्षी । इत्यमरटीकायां भरत: ।
विहायसा, अ, आकाश: । इत्यमरटीकायां मथु-
रेश: हेमचन्द्रश्च । (पाणिनौ च "स्वरादि-
निपातमव्ययम् ।" १।१।३७ । इत्यत्र गणितम् ।)
विहार:, पुं, (वि+हृ+घञ् ।) क्रीडार्थं पद्भ्यां
गमनम् । तत्पर्य्याय: । परिक्रम: २ । इत्यमर: ।
(यथा, गीतायाम् । ११ । ४२ ।
"यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।")
भ्रमणम् । स्कन्ध: । लीला । (यथा, रघुवंशे ।
६ । ४८ ।
"प्रासादवातायनविहारकाले ।")
सुगतालय: । इति मेदिनी । विम्बिरेलकपक्षी ।
इति शब्दचन्द्रिका । वैजयन्त: । इति शब्द-
माला ।
विहारी, [न्] त्रि, (विहर्त्तुं शीलमस्येति । वि+
हृ+णिनि: ।) परिक्रमी । विहारकर्त्ता ।
विहारशब्दादस्त्यर्थे इनुप्रत्ययेन निष्पन्नमिदम् ।
(यथा, नैषधे । ३ । १५ ।
"धार्य्य: कथङ्कारमहं भवत्या
वियद्विहारी वसुधैकगत्या ।")
विहित:, त्रि, (वि+धा+क्त: ।) विधेय: । यथा,
"विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नर: पतनमृच्छति ।"
इति प्रायश्चित्ततत्त्वम् ।
विहिति:, स्त्री, (वि+धा+क्तिन् ।) विधानम् ।
यथा,—
"चितिविजितिस्थितिविहितिव्रतरतय: पर-
गतय: ।
उरु रुरुधुर्गुरु दुधुवुर्युधि कुरव: स्वमरिकुलम् ।"
इति दण्डी ।
विहीन:, त्रि, (वि+हा+क्त: ।) विशेषेण हीन: ।
यथा, तन्त्रसारे ।
"षोढान्यासविहीनो य: प्रणमेदपि पार्व्वतीम् ।
सोऽचिरान्मृत्युमाप्नोति नरकञ्च प्रपद्यते ।"
त्यक्त: । यथा,—
"विहीनश्च धनैर्दारै: पुत्त्रैरादाय मे धनम् ।
वनमभ्यागतो दु:खी निरस्तश्चाप्तबन्धुभि: ।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ।
विहृतं, क्ली, (वि+हृ+क्त: ।) स्त्रीणां स्वाभाविक-
दशविधालङ्कारान्तर्गतालङ्कारविशेष: । यथा,
"लीला विलासो विच्छित्तिर्व्विव्वोक: किल-
किञ्चितम् ।
मोट्टायितं कुट्टमितं ललितं विहृतं तथा ।
विभ्रमश्चेत्यलङ्कारा: स्त्रीणां स्वाभाविका दश ।"
इति हेमचन्द्र: ।
विहृति:, स्त्री, विशेषेण हरणम् । विशेषेण बला-
त्कार: । विपूर्व्वहृधातो: क्तिप्रत्ययेन निष्पन्न-
मिदम् ।
विहेठ:, पुं, (वि+हेठ+अच् ।) विहेठनम् ।
विपूर्व्वहेठधातोरल्प्रत्ययेन निष्पन्नमिदम् ।
विहेठनं, क्ली, (वि+हेठ+ल्युट् ।) हिंसा ।
मर्द्दनम् । विडम्बनम् । इति मेदिनी । विबाधा ।
इति त्रिकाण्डशेष: ।
विह्वल:, त्रि, (वि+ह्वल+अच् ।) भयादिना-
भिभूत: । स्वाङ्गधारणाशक्त: । तत्पर्य्याय: ।
विक्लव: २ । इत्यमर: । (यथा, रघु: ।८।३७।
"अयमाश्वसखीं सुतास्तयो:
स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी ।")
विलीनम् । इति हेमचन्द्र: ।
वी, ल ईंशवत् । कान्तिगतिव्याप्तिक्षेपप्रजनखादने ।
इति कविकल्पद्रुम: । (अदा०-पर०-कान्तौ
अक०-गतौ व्याप्तौ क्षेपे प्रजने खादने च सक०-
अनिट् ।) ल, वेति । इति दुर्गादास: ।
वी:, पुं, (वयनमिति । वी गतौ+सम्पदादित्वात् भावे
क्विप् । अभिधानात् पुंस्त्वम् ।) गमनम् । इत्ये-
काक्षरकोष: ।

वीकः, पुं, (अजतीति । अज+"अजियुधूनीभ्यो दीर्घश्च ।"उणा० ३।४७। कन् । अजे वींभावः ।) वायुः । पक्षी । इत्युणादिकोषः । मनः । इति संक्षिप्तसारोणादिवृत्तिः ।

वीकाशः, पुं, (विकशनमिति । वि+कश+घञ् । "इकःकाशे ।"६ । ३ । १२३। इति वेरुपसर्गस्य दीर्घः ।) रहः । प्रकाशः । इत्यमरः ।

वीचः, पुं स्त्री, दृष्टिः । विपूर्व्वेक्षधातोरल्प्रत्ययेन निष्पन्नमिदम् ।

वीक्षणं, क्ली, विशेषेण ईक्षणम् । दर्शनम् । विपूर्व्वेक्षधातोर्ल्युट् (ल्युट्) प्रत्ययेन निष्पन्नम् । (यथा, भागवते । ६ । १८ । २८ ।
"मनो जग्राह भावज्ञा सस्मितापाङ्गवीक्षणैः ।")

वीक्षापन्नः, त्रि, (वीक्षामापन्नः ।) विस्मयापन्नः । इति हेमचन्द्रः ।३।८७। (वीक्षापन्नः । इत्येवमेव ।)

वीक्षितः, त्रि, (वि+ईक्ष+क्तः ।) विशेषेण ईक्षितः । दृष्टः । यथा,—
"पापर्क्षे प्रश्नलग्ने तु पापसंयुतवीक्षिते ।
तथैव चाष्टमस्थाने रोगिणां मरणं दिशेत् ।"
इति दीपिका ।

वीक्ष्यं, क्ली, (वीक्ष्यते इति । वि+ईक्ष+ण्यत् ।) विस्मयः । दृश्यम् । इति मेदिनी । ये, ५६ ।

वीक्ष्यः, पुं, (वि+ईक्ष दर्शने+ण्यत् ।) लासकः । घोटकः । इति मेदिनी । दर्शनीये, त्रि ।

वीङ्खा, स्त्री, (वीङ्खनमिति । वि+इङ्ख+"गुरोश्च हलः ।" इति अः । टाप् ।) शूकशिम्बी । गतिभेदः । नर्त्तनम् । इति हेमचन्द्रः । अश्वगतिभेदः । सन्धिः । इति शब्दरत्नावली ।

वीचिः, पुं,स्त्री, (वयति जलं तटे वह्वयतीति । वे+"वेञो डिच्च ।"उणा० ४ । ७२ । ईचिः । स च डित् ।) तरङ्गः । इत्यमरः । (यथा, रघुवंशे । १ । ४३ ।
"सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिश्वासानुकारिणम् ।")
स्वल्पतरङ्गः । अवकाशः । सुखम् । इति मेदिनी । चे, १० । अल्पः । इति हेमचन्द्रः । किरणः । इति जटाधरः ।

वीची, स्त्री, (वीचि+कृदिकारादिति ङीष् ।) वीचिः । इत्यमरटीकायां भरतः । (यथा, बृहत्संहितायाम् । ५६ । ४ ।
"सरःसु नलिनीच्छन्ननिरस्तरविरश्मिषु ।
हंसांसाक्षिप्तकह्लारवीचीविमलवारिषु ।")

वीचीतरङ्गः, पु, न्यायविशेषः । स तु श्रोत्रे शब्दस्य उत्पत्तिकारणरूपः । यथा,—
"वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता ।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ।"
इति भाषापरिच्छेदः ।
ननु भेर्य्यादिदेशस्थेनैवोत्पन्ने शब्दे श्रोत्रे कथमनुपलब्धिरिति अत आह वीचीति आद्यशब्दस्य बहिर्दशदिक्ष्वच्छिन्नः शब्दस्तेनैव शब्देन अन्यस्तेन चापरस्तद्व्यापक एव क्रमेण श्रोत्रोत्पन्नो गृह्यत इति । कदम्ब इति आद्यशब्दाद्दश-
दिक्षु दश शब्दा उत्पद्यन्ते तेभ्यश्च दश शब्दा उत्पद्यन्ते इति भावः । अस्मिन् कल्पे गौरवात् उक्तं कस्यचिन्मते इति । इति सिद्धान्तमुक्तावली ।

वी(बी)जं, क्ली, (विशेषेण कार्य्यरूपेण अपत्यतया च जायते इति । वि+जन+"उपसर्गे च संज्ञायाम् ।" इति डः । "अन्येषामपीति ।" उपसर्गस्य दीर्घः । यद्वा विशेषेण ईजते कुक्षिं गच्छति शरीरं वा । ईज गतिकुत्सनयोः+पचाद्यच् । यद्वा, वीजते गच्छति गर्भाशयमिति । वीज्+अच् । यद्वा, "वीजप्रजननकान्त्यसनखादनेषु । इत्यस्मादच्प्रत्ययः । तथा च भोजराजीये वियो जक् इति सुनुपादितम् । बवयोरभेदः । वेति प्रजायते गच्छत्यनेनाङ्गुरं पितेति वा । अत्र चीरस्वामी बीज्यते वेति वा बीजं वाणिलौकिकः इति । वीजिः स्यात् प्रेरणक्रिया इति माधवः । प्रेर्य्यते हि कार्य्यकरणाय वा बीजम् ।" इति निघण्टौ देवराजयज्वा । २ । २ । १५ ।) कारणम् । (यथा, गीतायाम् । ७ । १० ।
"वीजं मां सर्व्वभूतानां विद्धि पार्थ सनातनम् ।"
यथा च मनौ । १ । ५६ ।
"यदाणुमात्रिको भूत्वा वीजं स्थास्नु चरिष्णु च ।")
शुक्रम् । इत्यमरः । (यथा मनौ । १ । ८ ।
"अप एव ससर्ज्जादौ तासु वीजमवासृजत् ।"
वीजं शुक्रम् । इति मेधातिथिः । वीजं शक्तिरूपम् । इति कुल्लूकः । यथा च तत्रैव ।१०।७२।
"यस्माद्वीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद्वीजं प्रशस्यते ।")
श्रीकृष्णस्य सर्व्वावतारवीजत्वं यथा,—
दानव उवाच ।
"अधुना शम्भुरूपस्त्वं परिपूर्णतमः स्वयम् ।
सर्व्वेषामवताराणां वीजरूपः सनातनः ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २२ अध्यायः ।
अङ्कुरः । (यथा, महाभारते । ५ । १२ । १८ ।
"न तस्य वीजं रोहति वीजकाले
न चास्य वर्षं वर्षति वर्षकाले ।
भीतं प्रपन्नं प्रददाति शत्रवे
न त्रातारं लभते त्राणमिच्छन् ।")
तत्त्वाधानम् । इति मेदिनी । मज्जा । इति राजनिर्घण्टः । गणितविशेषः । यथा,—
"उत्पादकं यत्प्रवदन्ति बुद्धे-
रधिष्ठितं सत्पुरुषेण सांख्याः ।
व्यक्तस्य कृत्स्नस्य तदेकवीज-
मव्यक्तमीशं गणितं च वन्दे ।
पूर्व्वं प्रोक्तं व्यक्तमव्यक्तवीजं
प्रायः प्रश्ना नो विना व्यक्तयुक्त्या ।
ज्ञातुं शक्या मन्दधीभिर्नितान्तं
यस्मात्तस्माद्वच्मि वीजक्रियाञ्च ।"
इति भास्कराचार्य्यविरचिते सिद्धान्तशिरोमणौ वीजगणिताध्यायस्य प्रथमद्वितीयश्लोकौ ।*।
मन्त्रः । यथा । अथ भुवनेश्वरीमन्त्रः ।
"नकुलीशोऽग्निमारूढो
वीजं तस्याः समाख्यातं

नकुलीशो हकारः । ...
मीकारः । अर्द्धचन्द्रोऽनुस्वारः ।
अन्नपूर्णाया वीजम् । ह्रीं ...
श्वरि अन्नपूर्णे स्वाहा ।*।
वीजम् । श्रीं ह्रीं क्लीं ।*। ...
ह्रीं हुं ...
अथ त्रिपुरावीजम् । ऐं क्लीं ...
स्वाहा ।*। ...
क्लिन्ने मदद्रवे स्वाहा ।*।
ॐ ह्रीं दुं दुर्गायै नमः ।*।
वीजम् । ॐ महिषम ...
वीजम् । ॐ दुर्गे दुर्गे रक्षि
शूलिनीवीजम् । ज्वल ज्वल
हुं फट् स्वाहा ।*। ...
वद वाग्वादिनि स्वाहा ।*।
सरस्वतीवीजम् । ॐ ह्रीं ...
सरस्वत्यै नमः ।*। ...
हेरम्बवीजम् । ॐ गं ...
गणेशवीजम् । ग्लौं ।*। ...
महालक्ष्मीवीजम् । ॐ ...
भगवत्यै नमः ।*। ...
सूर्य्य आदित्य ।*। श्रीरामचन्द्राय
नमः । जानकीवल्लभाय हुं ...
वीजम् । ॐ नमो नारायणाय ।
वीजम् । गोपीजनवल्लभाय ...
देवस्य । ॐ नमो भगवते
बालगोपालस्य । ॐ ...
वासुदेवस्य । ॐ ह्रीं ह्रीं ...
देवाय नमः ।*। ...
विद्माने सुरपतये महाबल...
हयग्रीवस्य ।
ॐ ...
सर्व्वेश्वरमयाचिन्त्य ...
नृसिंहस्य ।
उग्रं वीरं महाविष्णुं ज्वलन्तं ...
नृसिंहं भीषणं भद्रं ...
नरहरिवीजम् । ...
हरिहरस्य । ॐ ह्रीं ह्रीं ...
नमः ह्रौं ह्रीं ॐ ।*। ...
भगवते वराहरूपाय भूर्भुवः...
मे देहि ददापय स्वाहा ।*।
ह्रौं ।*। मृत्युञ्जयस्य । ॐ ...
दक्षिणामूर्त्तिवीजम् । ॐ नमो ...
मूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा ।*।
मणिवीजम् । ...
नीलकण्ठस्य । प्रौं ह्रीं ठः ...
चण्डस्य । रुद्र फट् ।*। क्षेत्र...
क्षेत्रपालाय नमः ।*। बटुकभैरव...
वटुकाय आपदुद्धारणाय ...

[illegible]

हृद्गमहँ। शूलकन्यहँ।…।… ः। हृदम्बाँ। हूदलनन्दीं। हुं। …। हुं। शूलनन्दा। मूलक्रन्दीं। स्थौः।… हयीवस्तः। हूँ। हृदयन्दीं। …। महानेत्रायाः। ऐं। मदनन्दीं। …। सिद्धलक्ष्म्याः। ऐं क्लीं सौः।… हृदयायाः। ऐं क्लीं सौः। हस्तीं। मः। हसौँ। हस्तौः। हृदयन्दीं। …। मातृचक्रेश्वर्याः। ॐ ह्रीं श्रीं क्लीं अर्द्धि मातङ्गि सर्वजने स्वाहा।… हृदः। मर्द्धेन हीं। हृदयन्दीं। ह्रीं।… छिन्नमस्तायाः। श्रीं क्लीं हूं वज्रवैरोचनीये हूं हूं फट् स्वाहा।… याः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।… कालिकायाः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।… भद्रकाल्याः। क्रीं क्रीं क्रीं हूं हूं ह्रीं भद्रकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।… श्मशानकालिकायाः। क्रीं क्रीं क्रीं हूं ह्रीं ह्रीं श्मशानकालि क्रीं क्रीं क्रीं हूं ह्रीं ह्रीं स्वाहा।… महाकाल्याः। क्रीं क्रीं हूं हूं ह्रीं ह्रीं महाकालि क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।… तारायाः। ह्रीं स्त्रीं हूं फट्।… चण्डोग्रशूलपाणेः। ह्रीं हूं शिवाय फट्।… मातङ्ग्याः। ह्रीं क्लीं हूं मातङ्ग्यै फट् स्वाहा।… उच्छिष्टचाण्डालिन्याः। उच्छिष्टचाण्डालिनी सुमुखी देवी महापिशाचिनी ह्रीं ठः ठः ठः।… धूमावत्याः। धूं धूं स्वाहा।… भद्रकाल्याः। कालि महाकालि किलि किलि फट् स्वाहा।… उच्छिष्टगणेशस्य। ॐ हस्तिपिशाचि लिखे स्वाहा।… धनदायाः। धं धीं देवि रतिप्रिये स्वाहा।… दक्षिणकालिकायाः। ऐं ह्रीं श्रीं क्लीं कालिके क्लीं श्रीं ह्रीं।… बगलायाः। ॐ ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय ह्रीं ॐ स्वाहा।… कर्णपिशाच्याः। ॐ कर्णपिशाचि अतीतानागतशब्दं ह्रीं स्वाहा।… मञ्जुघोषस्य। श्रीं ह्रीं श्रीं।… मातृकायाः। ह्रीं हसदेवि ह्रीं क्लीं ऐं।… सारस्वत-

बीजम्। ऐं।… त्वरितायाः। ॐ ह्रीं हूं खे च छे क्षः स्त्रीं हूं क्षे ह्रीं फट्।… नित्यायाः। हूं।… नित्यक्लिन्नायाः। ॐ ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा।… वज्रप्रस्तारिण्याः। ह्रीं नित्ये मदद्रवे वज्रप्रस्तारिणि हूं फट् स्वाहा।… दुर्गायाः। ह्रीं दुं दुर्गायै नमः।… स्वाहा।… सर्वसिद्धिप्रदायाः। ॐ ह्रीं नमो ब्रह्मादिभ्यो नमः।… सर्वेभ्यो नमो नमः।… स्वाहा। … स्कन्दस्य। ॐ स्कन्दाय नमः।… गरुडस्य। क्षिप ॐ स्वाहा।… विषहरविद्याबीजम्। स्वः सं।… उच्चाटनबीजम्। ॐ मारय रक्षः। ॐ छिलि छिलि छिलि फट्। ॐ छिलि छिलि छिलि छिलि फट्। उल्कामुखः। सर्वकर्मोच्चाटनम्।… भूतविद्वेषण-बीजम्। ॐ श्रीं फें हूं। आकाशभैरवायाः ॐ सां सीं सः।… सर्वकामाङ्गम्। ॐ भ्रमरि भ्रामरि भ्रामरि छः। … स्तम्भनबीजम्। … भवति।… आकर्षणम्। ॐ ह्रीं क्रौं हूं फट् ॐ स्वाहा मन्त्र हूं फट्।… सर्वकार्यसिद्धि-बीजम्। ॐ नमो भगवते विष्णवे सर हर हर हूं फट् स्वाहा।… सुदर्शनमन्त्रः। ॐ श्वेत सवाच वाचि वाचि मनोहर शुच शुच स्वाहा। ॐ शुभाः याता विद्याश्च शुभाः … शुभः सर्वभयादृगर्भं … आयौ आवेश स्वाहा। … दीर्घं … शुभदायिनी भवति।… रक्षणः। एं रक्षकैः महाभैरवाय हूं फट्।… वीरनाथस्य। एं पवनसूनवे स्वाहा।… अथ आर्द्रपटी। ॐ नमो भगवति आर्द्रपटे रक्तवाससि अग्नि-कुण्डपुत्रकाले घरुकवधाय विपिने स्वाहा। आर्द्रपटकाण्डः महाकालिविशतिगटे उपरभूमौ वा दक्षिणामुखे यावत् पटः शुष्यति तावत् प्राणाः शुष्यन्ति शत्रोः।… श्मशानभैरव्याः। श्मशानभैरवि नरमुण्डधराशिवशवासने सिद्धिं मे देहि मम मनोरथान् पूरय हूं फट् स्वाहा।… ज्वाला-मालिन्याः। ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते हूं फट् स्वाहा।… महा-कालाः। ॐ फ्रें फ्रें क्रों क्रों पशून् गृहाण हूं फट् स्वाहा।… अथ निगडबन्धन-मोचनस्य। ॐ नम पते निकृते तिग्मतेजो यस्यायं विश्वे मा बन्धनेभ्यः यमेन दत्तं तस्या संविदा मोचने नाके अघोर्वोऽरैरम्।… अथ चिटि-मन्त्रः। ॐ चिटि चिटि चाण्डालि महा-चाण्डालि अमुकं मे वशमानय स्वाहा।… गायत्र्यस्य।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनात् मृत्योर्मुक्षीयमामृतात्।
अथ मृतसञ्जीवनीमन्त्रः। हौं ॐ जुं सः ॐ भूर्भुवः स्वः।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।
ॐ भूर्भुवः स्वः। इत्यादि तन्त्रसारः। नाम-तन्त्रादिनं नानि बाह्वृच्यप्रकाशकानि।… (अथ बीजाभिधानम्। यथा, —
"बीजानुत्तमं वक्ष्यामि तन्त्राणां मन्त्राणां।
बीजानामपि कतिचित् तस्यामि विद्यां शुभे।
माया लज्जा परा संवित् त्रिभुवना भुवनेश्वरी।
हृल्लेखा शम्भुवनिता शक्तिर्देवीश्वरी शिवा।
महामाया पार्वती च संस्थानमध्यनी।
परमेश्वरी च भुवना धात्री बीजमयाना। ह्रीं।
वह्निहीनेन्दुयुक्तेयं त्रिगुणा प्रकीर्तिता।
श्रीं।
शान्तिशालिबिन्दुनादैर्बीजानां उच्यते।
कीर्णवीबिन्दुवर्णेता रमा बीजमनुत्तमा। क्लीं।
बीजगुणमतं वह्निमाशिबिन्दुसंयुतम्।
चन्द्रार्कसमप्रख्यं वधूबीजमिदं स्मृतम्।
वधूर्ब्रह्मा योगिनीकान्ता कौलिकामिनी। स्त्रीं
नादबिन्दुसमायुक्तो हृदयम्बुजो मतम्।
योनिः सरस्वतीबीजमयं वाग्भवस्तु वाक्। ऐं
ह्रकारो वामकर्णाढ्यो नादबिन्दुविभूषितः।
कूर्चं क्रोधं उग्रदर्पं दीर्घहुङ्कार उच्यते।
मन्त्रम् दीर्घवर्णं तारं प्रणव इत्यपि। हूं।
कामाक्षरं वह्निसंस्थं रतिबिन्दुविभूषितम्।
कामबीजमिदं प्रोक्तं रतिबीजमतीव हि। क्लीं।
कामाक्षरं धरासंस्थं रतिबिन्दुविभूषितम्।
गुप्तकामबीजमिदं गोपनबीजमित्यपि।
मन्त्राणां बीजं वामेशो बीजं प्रक्षिप्तमौ परा। स्त्रीं।
महाप्रसुक्तयोरसिद्धबीजं पाशादसून्यते। हौं।
कलादं सेश्वरीबीजं क्रोधाश्वकुशाभिधः। क्रों।
आकारो बिन्दुमान् पाशः शेषश्च समुद्धरितः।
मकला भुवनेशानी कामेशी बीजमुच्यते।
नमस्तु हृदयं स्वाहा द्विठवुगलं ठठः।
नमः। स्वाहा।
वषट्युग्मं शिवो वेदमाता ज्वलनसुन्दरी।
स्वाहा परा देवभोग्यं हृदयं चन्द्रयुग्मकम्।
सुरी हविर्वेदमाता देवास्यं वह्निसुन्दरी। स्वाहा।
शिखा वषट् शिरोमध्य शक्रमाता हरप्रिया।
शिखा वषट् च। वषट् कवचं क्रोधो वर्मकृमि-त्यपि।
क्रोधास्त्रोऽहं तनुत्यत्र शस्त्रादौ रिपुसंचकः। हुं।
वृक, ङ आदाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, वर्कते। वरीवृकते। इति दुर्गादासः॥

वृकः, पुं, (वृणोतीति। वृ+"सृवृभृशुषिमुषिभ्यः कक्।" उणा० ३। ४१। इति कक्।) कुक्कुरप्रमाणहरिणघातकपशुविशेषः। केँद इति ख्यातः। हुँडार इति हिन्दी भाषा। तत्पर्य्यायः। कोकः २ ईहामृगः ३। इत्यमरः॥ वत्सादनः ४ विगक् ५ गोवत्सादी ६ छागभोजी ७ छागमारी ८ वनाश्रयः ९। इति राजनिर्घण्टः॥ (यथा, भागवते। ३। १०। २३।
"श्वा सृगालो वृको व्याघ्रो मार्ज्जारः शश-शल्लकौ॥")
काकः। क्षत्रियविशेषः॥ (पौलकः। इत्युणादि-टीकायामुज्ज्वलदत्तः। ३। ४१॥) वकवृक्षः। इति शब्दरत्नावली॥ शृगालः। इति धारावली॥ (यथा, मनुः। ८। २३५।
"अजाविके तु संरुद्धे वृकैः पाले त्वनायति।
यां प्रसह्य वृको हन्यात् पाले तत् किल्विषं भवेत्॥"
"वृकैः शृगालप्रभृतिभिः।" इति मेधातिथिः॥)
क्षत्रियः। अर्नकधूपः। सरलद्रवः। इति भरतधृतरभसः॥ (तस्करः। इति निघण्टुः। ३। २४॥ *॥ वर्कते ग्रहणप्रायानादत्ते इति। वृक आदाने+कः। वज्रः। इति निघण्टुः। २। २०॥)

वृकदंशः, पुं, (वृकान् दशतीति। दन्श+अण्।) कुक्कुरः। इति हेमचन्द्रः॥

वृकधूपः, पुं, (वृकोऽनेकधूपः एव धूपः। वृकः सरलद्रवस्तत्प्रधानो धूपो वा।) नानासुगन्धिद्रव्यकृतदशाङ्गादिधूपः। तत्पर्य्यायः। कृत्रिमधूपकः २। इत्यमरः॥ वकधूपः ३। इति तट्टीका॥ सरलद्रवरसः। टारपिन् इति भाषा। तत्पर्य्यायः। पायसः २ श्रीवासः ३ श्रीवेष्टः ४ सरलद्रवः ५। इत्यमरः॥

वृकधूर्त्तः, पुं, (धूर्त्तो वृकः राजदन्तादिवत् पूर्व्वनिपातः।) शृगालः। इति धारावली॥

वृका, स्त्री, अम्बष्ठा। इति रत्नमाला॥

वृकाक्षी, स्त्री, (वृकस्याक्षीव अक्षि चिह्नं यस्याः।) त्रिवृत्। इति रत्नमाला॥

वृकारातिः, पुं, (वृकस्यारातिः।) कुक्कुरः। इति शब्दमाला॥

वृकारिः, पुं, (वृकस्यारिः।) कुक्कुरः। इति राजनिर्घण्टः॥

वृकी, स्त्री, पाठा। इति राजनिर्घण्टः॥

वृकोदरः, पुं, (वृकस्येवोदरो यस्य। यद्वा, वृकः वृकनामकोऽग्निरुदरे यस्य।) भीमसेनः। तत्पर्य्यायः। भीमः २ मरुत्पुत्रः ३ किर्म्मीरनिसूदनः ४ जीमूतकनिसूदनः ५ बकनिसूदनः ६ हिडिम्बनिसूदनः ७। इति हेमचन्द्रः॥ बकवैरी ८ मारुतिः ९। इति जटाधरः॥ अस्य व्युत्पत्तिर्यथा,—
"कथाञ्च भीमसेनेन परिष्टः प्रतापवान्।
त्वया दृष्टस्तु धर्म्मस्य रहस्यस्यास्य भेदनम्॥
भविता न तदा यज्ञन् कथां चैव वृकोदरः।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुपुत्रमंस्थापनः॥
यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः॥"
इति मात्स्ये ६५ अध्यायः॥

वृक्णं, त्रि, (व्रश्च+क्तः।) छिन्नम्। इत्यमरः॥ (यथा, सांख्यतत्त्वकौमुद्याम्।
"नहि पार्थो वृक्णे स्तने वा याते कुमारी स्तनन्धया देति॥")

वृच, ङ वृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) मनमध्यस्वरी। ङ, वृचते वरं कन्या। इति दुर्गादासः॥

वृक्षः, पुं, (व्रश्च छेदने+"स्नुव्रश्चिकृत्यृषिभ्यः कित्।" उणा० ३।६६। इति सः। स च कित्। "वृक्ष वरणे। वरोऽस्याश्रमणोतीति वृक्ष इति सिद्धे प्रपञ्चार्थं प्रतिपदपाठम्।" इति तट्टीकायामुज्ज्वलदत्तः।) स्थावरयोनिविशेषः। गाछ इति भाषा। तत्पर्य्यायः। महीरुहः २ शाखी ३ विटपी ४ पादपः ५ तरुः ६ अनोकहः ७ कुटः ८ सालः ९ पलाशी १० द्रुः ११ द्रुमः १२ आगमः १३। इत्यमरः॥ अगच्छः १४ विटरः १५ महीरुट् १६ कुचिः १७ स्थिरः १८ कारस्करः १९ नगः २० अगः २१ कुटारः २२। इति शब्दरत्नावली॥ विटपः २३ क्षुपः २४ वनस्पतिः २५ अद्रिः २६ शिखरी २७ कुटः २८। इति जटाधरः॥ क्ष्माजः २९ क्षितिरुहः ३० अङ्घ्रिपः ३१ भूरुहः ३२ भूजः ३३ महीजः ३४ धरणीरुहः ३५ क्षितिजः ३६ शालः ३७। इति राजनिर्घण्टः॥ तस्य षड्जातिर्यथा,—
"कुरण्टाद्या अग्रबीजा मूलजास्तूत्पलादयः।
पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः सल्लकीमुखाः॥
शाल्यादयो बीजरुहाः संमूर्च्छनजास्तृणादयः।
स्युर्वनस्पतिकायस्य षडेते मूलजातयः॥"
इति हेमचन्द्रः॥
"संस्वेदजापि विज्ञेया वृक्षगोपभुजन्तवः।"
इत्यग्निपुराणम्॥
भद्रप्रदवृक्षा यथा,—
श्रीभगवानुवाच।
"आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रदः।
शिविरस्य यदीशाने पूर्व्वे पुत्रप्रदस्तरुः॥
सर्व्वत्र मङ्गलार्हश्च तरुराजो मनोहरः।
रसालवृक्षः पूर्व्वस्मिन् नृणां सम्पत्प्रदस्तथा॥
शुभप्रदश्च सर्व्वत्र तरुकारो निशामय।
विल्वश्च पनसश्चैव जम्बीरो वदरी तथा।
प्रजाप्रदश्च पूर्व्वस्मिन् दक्षिणे धनदस्तथा॥

सम्पत्प्रदश्च सर्व्वत्र यतो हि वर्द्धते यशो ।
जम्बूश्च दाड़िमः कदल्याम्रातकस्तथा ॥
बन्धुप्रदश्च पूर्व्वस्मिन् दक्षिणे मित्रदस्तथा ।
सर्व्वत्र शुभदश्चैव धनपुत्रशुभप्रदः ।
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ।
ईशाने सुखदश्चैव सर्व्वत्रैवं निशामय ॥
सर्व्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा ।
अलाबूश्चापि कुष्माण्डो मायाम्बुश्च शुकाशुकः ॥
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदा ।
वार्त्ताकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
निषिद्धवृक्षा यथा,—
"प्रशस्तं कथितं कान्ते ! निषिद्धञ्च निशामय ।
वन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च ॥
वटो निषिद्धः शिविरे नित्यं चौरभयं ततः ।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा ॥
हे कान्ते ! तिन्तिड़ीवृक्षो यत्नात्तं परिवर्ज्जयेत् ।
शरेच धनहानिः स्यात् प्रजाहानिर्भवेद्ध्रुवम् ॥
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च ।
न निषिद्धः प्रसिद्धश्च नगरेषु तथा पुरे ॥
वाप्यामतिनिषिद्धश्च यात्नस्तं परिवर्ज्जयेत् ।
खर्ज्जूरश्च तथैव निषिद्धः शिविरे तथा ॥
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ।
वृक्षश्च चणकादीनां धान्यञ्च मङ्गलप्रदम् ॥
ग्रामेषु नगरे चापि शिविरे च तथैव च ।
इक्षुवृक्षश्च शुभदः सन्ततं शुभदस्तथा ॥
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः ।
कर्पूरी हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ॥
हरीतकी च शुभदा ग्रामेषु नगरेषु च ।
न वाप्यां भद्रदा नित्यं तथा चामलकी ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अः ॥
अपि च ।
"अपुत्रस्य च पुत्रत्वं पादपा इह कुर्व्वते ।
यत्नेनापि च राजेन्द्र ! अश्वत्थारोपणं कुरु ॥
स ते पुत्रसहस्राणां कार्य्यमेकः करिष्यति ।
धनी चाश्वत्थवृक्षेण अशोकः शोकनाशनः ॥
प्लक्षो यज्ञप्रदः प्रोक्तो निम्बश्चायुप्रदः स्मृतः ।
जम्बुकी नाकदा प्रोक्ता भार्य्यादा दाड़िमी तथा ॥
दुम्बरी रोगनाशाय पलाशो ब्रह्मदस्तथा ।
अर्कपुष्पारोपकाणां नित्यं तुष्येद्दिवाकरः ॥
श्रीवृक्षः शङ्करो देवः पाटलायान्तु पार्व्वती ।
शिंशपायामप्सरसः कुन्दे गन्धर्व्वसत्तमाः ॥
विभीतके दासवृद्धिर्बकुलो दासदस्तथा ।
अपत्यनाशकस्तालो बकुलः कुलवर्द्धनः ।
बहुभार्य्या नारिकेली द्राक्षा सर्व्वाङ्गसुन्दरः ।
रतिप्रदा तथा कैली केतकी सर्व्वनाशिनी ।
प्रतिष्ठां ते गमिष्यन्ति ये नराः वृक्षरोपकाः ॥"
इति पाद्मे सृष्टिखण्डे वृक्षारोपणं नाम २६ अध्यायः ॥ * ॥ अस्य रोपणफलम् ।

यम उवाच ।

"वृक्षगुल्मलताबल्लीत्वक्सारतृणजातयः ।
वर्द्धते वृक्षजातीयास्तासां रोपे फलं शृणु ।
यः पुमान् रोपयेद्वृक्षान् छायापुष्पफलोपगान् ।
सर्व्वसत्त्वोपभोगाय न याति परमां गतिम् ॥
छायापुष्पोपगान्वृक्षान् फलपुष्पप्रदांस्तथा ।
रोपयित्वा द्रुमांस्तांस्तु नरो न नरकं व्रजेत् ॥
देवदानवगन्धर्व्वाः किन्नरोरगराक्षसाः ।
पशुपक्षिमनुष्याश्च संश्रयन्ति सदा द्रुमान् ॥
पुष्पैः सुरगणाः सर्व्वे फलैश्च पितरः सदा ।
छायया ये मनुष्यास्तु पशुपक्ष्यादयस्तथा ॥
पुष्पोपगान्वाथ फलोपगान्वा
यः पादपान्रोपयते मनुष्यः ।
सन्तुष्टदेवो नरके नरेन्द्रो
लभेदधिष्ठानवरं स विप्रः ॥
तस्मात् सुबहवो वृक्षा रोप्याः श्रेयोऽभिवाञ्छता ।
पुत्रवत् परिपाल्याश्च ते पुत्रा धर्म्मतः स्मृताः ॥
किं धर्म्मविमुखैर्मोर्खैः केवलं स्वार्थहेतुभिः ।
तरुपुत्रा वरं ये तु परार्थैकानुरागिणः ॥
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
परेषामुपकुर्व्वन्ति तारयन्ति पितामहान् ॥
छेत्तारमपि संप्राप्तं छायापुष्पफलादिभिः ।
पूजयन्त्येव तरवो हानिवृद्धिविवर्ज्जिताः ॥
पितरं गोपयिष्यन्ति द्रुमा अवियजोऽभवः ।
तारयन्ति च ये सम्यक् सर्व्वस्यातिथ्यदायकाः ॥
तस्मात्ते पुत्रवत् स्थाप्या विधिवद्द्विजपुङ्गव ।
द्विजैः पितृमनुष्याणामभोज्याः स्युर्मदा सदा ॥
अलङ्कृत् वृक्षरोपी यः प्रतिमाहारवर्जितः ।
एते स्वर्गात्र चीयन्ते ये चान्ये सत्यवादिनः ॥"
इत्याद्ये वह्निपुराणे तड़ागवृक्षप्रशंसानामाध्यायः ॥ * ॥ अपि च ।
"भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः ।
ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोहणे ॥
अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः ।
द्वे द्वे तथा दाड़िममातुलुङ्गे
पञ्चाम्ररोपी नरकं न याति ॥
यथा सुपुत्रः कुलमुद्धरेद्धि
यथातिजस्तस्मात्प्रियमप्रधनात् ।
तथाच वृक्षाः फलपुष्पभूताः
स्वं स्वामिनं नरकादुद्धरन्ति ॥

गोकर्ण उवाच ।

इन्धनार्थं यथा गोत्रमपि दीनं सदुच्यते ।
छायाविश्रामपथिकैः पक्षिणां निलयेन च ।
पत्रमूलत्वगाद्यैश्च औषधार्थन्तु देहिनाम् ॥
उपकुर्व्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते ।
यज्ञपात्राणि काष्ठानि स्रुवस्त्रुग्वहास्तथा ॥
सम्यग्निर्व्वृत्तं प्रोक्तं भिन्ना पत्रैः समाकुलाः ।
फलन्ति वत्सरे मध्ये द्विवारं श्राकुनादयः ॥
सांवत्सरं पितुर्मातुरुपकारं फलैः कृतम् ।
एवं पुत्र समारोप्याः एवं तत्त्वविदो विदुः ॥"
इत्यादि वाराहपुराणे गोकर्णमाहात्म्यनामाध्यायः ॥ * ॥ अस्पृश्यवृक्षा यथा,—
"अश्वत्थो वटवृक्षश्च न स्प्रष्टव्यः कदाचन ।

न चैतयो ...
कर्म्मण्याचैव ये ...
इति ...
ध्यायः ॥ * ॥ वृक्षोपवास-
"पुरेषु तेषु वृक्षस्य ...
कदल्यो वा कुलको वा ...
अरोगा वा शिवा यत्तं ...

पत्रं पुष्पं तथा ...
पुष्पेऽस्मा दर्शयन्ति ...
चीरं क्षीरं ...
शुष्कवृक्षरोगाः ...

उत्तिष्ठन्तीव पतिताः ...
एवं वक्ष्यामि ते ब्रह्मन् ...
रोहते व्याधिमर्थ्यं ...
शास्त्रप्रयत्ने ...
वाणानां ...
शराहभेदं कुरुते ...
वायं सर्व्वत्र गोदीरे ...
वाहनानयं सर्वं ...
मधुसारे भवेद्याधिर्व्वाः ...
अरोगं शोधकं ...
शुष्केषु ...
उत्थाने पतितानाञ्च ...
स्थानात् स्थानन्तु ...
व्यक्तस्थापि च ...
एतत् पूजितवृक्षेषु सर्व्वं ...
पुष्पे पत्रे वा विकृते राज्ञो ...
अन्येषु दैवयुक्तेषु वृक्षेषु ...
आच्छादयित्वा तं वृक्षं ...
वृक्षोपरि तथा ...
शिवमभ्यर्च्य वेदेन पञ्चाक्षेत ...
मूलेभ्य इति यज्ञोमा ...
मध्यान्यनुक्तेन तु ...
संपूज्य विप्रांस्तु ...
गीतेन नृत्येन तथार्च्चन ...
देवं हरं पापविनाशनेन ...
...
२०६ अध्यायः ॥ * ॥

भीष्म उवाच ।

"पादपानां विधिं ब्रह्मन् ...
विधिना येन कर्त्तव्यं ...
ये च लोकाः स्मृतास्तेषां ...

पुलस्त्य उवाच ।

पादपानां विधिं वक्ष्ये ...
तड़ागविधिवत् सर्व्वं ...
कृत्वा मण्डपसम्भारं ...
पूजयेद्ब्राह्मणं तद्वदेव ...
सर्व्वौषध्युदकैः ...
वृक्षाणामधिवासं ...
सूत्रा चैव तथा कार्य्यं ...

…पि दातव्यं तद्धेमशलाकया ॥
…म षष्ठौ वा कर्णवेधानि कारयेत् ।
…वृक्षाणां देयां तानधिवासयेत् ॥
…गुरु श्रेष्ठं ताम्रपात्रैरधिष्ठितम् ।
…न्यभ्रन: कृत्वा गन्धमाल्यानुलेपनै: ॥
…सर्व्ववृक्षेषु स्थापयित्वा व्रती स्वयम् ।
… दिगन्ते च कुर्य्याद्द्विजगमन्तगम् ॥
…लोकपालानामिन्द्रादीनां विधानत: ।
…धिवासमेवं कार्य्यं द्विजातिभि: ॥
…म्बरधर: सौवर्णकृतशेखराम् ।
… कांस्यदोहां गां दद्यात्कुम्भशालि-
नीम् ॥
…वृक्षमध्यादुत्सृष्टेनैशानुदङ्मुखीम् ।
…कमन्त्रेण वाद्यमङ्गलगीतकै: ॥
…सामाथर्व्वाणां धारणैरभितस्तथा ।
…: संस्नपनं कुर्य्याद्ब्राह्मणपुङ्गव: ॥
…धर: शुद्धो यजमान: स्वयं जपेत् ।
…वत: सार्व्वानृत्विजस्तु समाहित: ॥
…सकटकैरङ्गुलीयै: पवित्रकै: ।
…शयनीयैश्च सद्योपस्करपादुकै: ॥
…र्व्विलि दद्यादृयावद्दिनचतुष्टयम् ।
…पिषा कार्य्यो यवै: कृष्णतिलैरपि ॥
…मध: शस्तश्चतुर्थेऽह्नि तथोत्सव: ।
… पुनस्तद्वत् श्रेष्ठा तत्रापि शस्त्रित: ॥
…प्रमं किञ्चित्तद्दद्यादमत्सर: ।
…द्विगुणं दत्त्वा प्रणिपत्य समापयेत् ॥
…विना यस्तु कुर्य्याद्वृक्षोत्सवं सदा ।
…मानवाप्नोति तत् तदानन्त्यमश्नुते ॥
… राजेन्द्र वृक्षं संस्थापयेद्बुध: ।
…र्गे वसेद्राजन् यावदिन्द्रशतत्रयम् ॥
… मनुजांस्तारयेद्रोमसम्मितान् ।
…सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥
…शृणुयान्नित्यं श्रावयेद्वापि मानव: ।
…पूज्यते देवैर्ब्रह्मलोके महीयते ॥”
…पाद्मे सृष्टिखण्डे २६ अध्याय: ॥ * ॥
… दोषो यथा,—
…च्छेदयेत् वृक्षान् सपुष्पफलितान् कदा ।
…फलवृद्धिश्च धनवृद्धिश्च शाश्वतीम् ॥
…वतानाञ्च श्लेष्मकाचितानपि ।
…दयेल्लोकान् नरकरष्टिसुदुर्द्दये: ॥
…भवेत्क्रूरोर्ध्वं चिपाहत्ये निपातिते ।
… क्षयं याति सीमावृक्षे निपातिते ।
…च्छेदयेद्वृक्षं देवताश्रितं क्वचित् ।
…तडागानां छेदने रोपने कृते ।
…लतां यान्ति नराणां सदुरात्मनाम् ॥
…दयेद्यस्तु वृक्षान् छायासुशीतलान् ।
…ने घोरे पीड्यते यमकिङ्करै: ॥
…नि वृक्षान् प्रमादाद्धि च्छिनत्ति य: ।
…रकं नाम कुम्भकं रौद्रदर्शनम् ॥
…पालनं कुर्य्यात्शुभं भयदमन्यथा ।
…रोपयेत् यश्च यदि स्वर्गाय दीयते ॥”

अथ वृक्षारोपणनक्षत्रादि । शतभिषा मूलं विशाखा मृगशिर: उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी हस्ता पुष्य: रेवती च ॥ * ॥ राजमार्त्तण्डे ।

“प्राजेशश्रवणोत्तरादितिमघामार्त्तण्डतिष्याश्विनी-
पौष्णाशुष्ममरीचय: शतभिषा स्वातिर्विशाखा तथा ।
जिवार्केन्दुसितेन्दुनन्दनदिने वारे स्थिरस्योदये
शस्यानां वपने भवन्ति लवने शस्ते तिथौ रोपणे ॥ * ॥
हैमाम्भसा वृक्षवीजं स्नातो मन्त्रेण रोपयेत् ।
वसुधेति सुशीतेति पुण्यदेति धरेति च ।
नमस्ते सुभगे नित्यं द्रुमोऽयं वर्द्धतामिति ॥” * ॥

अथ वृक्षप्रतिष्ठानक्षत्राणि । पुष्य: अश्विनी ज्येष्ठा पूर्व्वफल्गुनी धनिष्ठा मृगशिर: स्वाती आर्द्रा मघा रोहिणी मूलं हस्ता रेवती अनुराधा श्रवणा पुनर्व्वसुश्च । यथा हि ।

“पुष्याश्विशक्रभगदैवतवासवेषु
चन्द्रानिलेशमवरोहिणिमूलहस्ते ।
पौष्णानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥” * ॥

अथ विहिततिथ्यादि: । भविष्ये ।

“प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो वृहस्पतिश्चैव शुक्रश्चैव तथा बुध: ।
एते सौम्यग्रहा: प्रोक्ता: प्रतिष्ठायागकर्म्मणि ॥”
इति ज्योतिस्तत्त्वम् ॥

वृक्षक:, पुं, कुटजवृक्ष: । इति रत्नमाला ॥ वृक्ष-मात्रञ्च ॥ (यथा, रघुवंशे । १ । ३० ।
“सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥”)

वृक्षचर:, पुं, (वृक्षे चरतीति । चर+ट: ।) वानर: । इति धनञ्जय: ॥

वृक्षच्छायं, क्ली, बहूनां वृक्षाणां छाया । यथा । वृक्षस्य वृक्षयोर्वा छाया वृक्षच्छाया वृक्षच्छायम् । बहुत्वे तु वृक्षच्छायमिति । षष्ठाच्छाया बहूनाञ्चेदिति क्लीवत्वम् । इति स्त्री नपुंसकलिङ्गसंग्रहे भरत: ॥

वृक्षधूप:, पुं, श्रीवेष्ट: । इति राजनिर्घण्ट: ॥

वृक्षनाथ:, पुं, (वृक्षाणां नाथ: ।) वटवृक्ष: । इति शब्दरत्नावली ॥

वृक्षपाक:, पुं. वटवृक्ष: । इति शब्दचन्द्रिका ॥

वृक्षभवनं क्ली, (वृक्षस्थितं भवनम् ।) वृक्षकोटरम् । इति शब्दचन्द्रिका ॥

वृक्षभक्षा, स्त्री, (वृक्षं भक्षयतीति । भक्ष+अच् । ततष्टाप् ।) वन्दाक: । इति भावप्रकाश: ॥

वृक्षभित्, } स्त्री, (वृक्षं भिनत्तीति । भिद्+क्विप् ।)
वृक्षभिद्, } वासी । इति हेमचन्द्र: ॥

वृक्षभेदी, [न्] पुं, (वृक्षं भिनत्तीति । भिद्+णिनि: ।) वृक्षादन: । इत्यमर: ॥ नेहानि इति …

वृक्षमर्कटिका, स्त्री, (वृक्षस्य मर्कटिका ।) जन्तु-विशेष: । काठ्‌विड़ाल इति भाषा ॥ इति केचित् ॥

वृक्षरुह:, पुं, (वृक्षरुहि भवतीति । भू+क्विप् ।) जलवेतस: । इति शब्दचन्द्रिका ॥

वृक्षरुहा, स्त्री, (वृक्षे रोहतीति । रुह+क: । ततष्टाप् ।) वन्दा । इत्यमर: ॥ अमृतस्रवा । इति राजनिर्घण्ट: ॥

वृक्षवाटिका, स्त्री, (वृक्षस्य वाटिका ।) अमात्य-गणिकागेहोपवनम् । इत्यमर: ॥

वृक्षादन:, पुं, (वृक्षमत्ति नाशयतीति । अद्+ल्यु: ।) वृक्षभेदी । इत्यमर: ॥ नेहानि इति भाषा । (यथा, महाभारते । ५ । १५४ । ८ ।
“सकीलकक्रकचा: सर्व्वे वासी वृक्षादनान्विता: ॥”)
अश्वत्थवृक्ष: । मधुच्छत्रम् । कुठार: । इति मेदिनी ॥ पियाल: । इति धरणि: ॥

वृक्षादनी, स्त्री, (वृक्षमत्तीति । अद+ल्यु: । स्त्रियां ङीप् ।) वन्दा । विदारीकन्द: । इति मेदिनी । ने, २१३ ॥

वृक्षाधिरुहकं, } क्ली, आलिङ्गनम् । इति शब्द-
वृक्षाधिरूढ़कं, } माला ॥

वृक्षाम्लं, क्ली, (वृक्षस्याम्लम् ।) महाम्लम् । तेन्तु-लीति ख्यातम् । इति रायमुकुट: ॥ महाद्रा । इति भरतादय: ॥ अम्लकुटा । इति सार-सुन्दरी ॥ चुका । इति भानुदीक्षितादय: ॥ तत्पर्य्याय: । तिन्तिड़ीकम् २ चुक्रम् ३ । इत्य-मर: ॥ अम्लशाकम् ४ चुक्राम्लम् ५ तिन्तिड़ी-फलम् ६ शाकाम्लम् ७ अम्लपूरम् ८ पूराम्लम् ९ रक्तपूरकम् १० चुड़ाम्लम् ११ वीजाम्लम् १२ फलाम्लकम् १३ अम्लवृक्षम् १४ अम्लफलम् १५ रसाम्लम् १६ श्रेष्ठाम्लम् १७ अत्यम्लम् १८ अम्लवीजम् १९ चुक्रफलम् २० । अस्य गुणा: । कटुत्वम् । कषायत्वम् । उष्णत्वम् । कफार्श-स्तृष्णासमीरोदरहृद्गदादिगुल्मातिसारव्रणदोष-नाशित्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।
“वृक्षाम्लमाममम्लोष्णं वातघ्नं कफपित्तलम् ।
पक्वन्तु गुरु संग्राहि कटुकं तुवरं लघु ॥
अम्लोष्णं रोचनं रूक्षं दीपनं कफवातनुत् ।
तृष्णाशर्श्रोग्रहणीगुल्मशूलहृद्रोगजन्तुजित् ॥”
इति भावप्रकाश: ॥

वृक्षाम्ल:, पुं, (वृक्षे अम्लो यस्य ।) आम्रातक: । इति शब्दचन्द्रिका ॥

वृक्षायुर्व्वेद:, पुं, (वृक्षस्यायुर्व्वेद: ।) तरुचिकित्-सादिशास्त्रम् । तद्यथा,—
धन्वन्तरिरुवाच ।
“वृक्षायुर्व्वेदमाख्यास्ये प्लक्षश्चोत्तरत: शुभ: ।
प्राग्वटो याम्यतश्चाम्र आप्योऽश्वत्थं क्रमेण तु ।
दक्षिणा दिग्रुत्पन्ना: समीपे कण्टकद्रुमा: ।
उद्यानं गृहवासे स्यात् तिलान् वाप्यथ पुष्पितान् ।
गृहीत्वारोपयेद्वृक्षान् द्विजं चन्द्रं प्रपूजयेत् ।

मत्स्याम्भसा तथा सक्तं प्रसूयन्ते द्रुमरोपणे ।
प्रवेशयेन्नदीवाहान् पुष्करिण्यास्तु कारयेत् ।
हस्ता मघा तथा मैत्रमाद्यं पुष्यं सवासवम् ।
जलाशयसमारम्भे वारुणञ्चोत्तरात्रयम् ।
संपूज्य वरुणं विष्णुं पर्ज्जन्यं तत् समारभेत् ।
अरिष्टाशोकपुन्नागशिरीषाश्च प्रियङ्गवः ।
अशोककदलीजम्बुस्तथा वकुलदाड़िमाः ।
सायं प्रातस्तु घर्म्मर्त्तौ शीतकाले दिनान्तरे ।
वर्षारात्रे भुवः शोषे सेक्तव्या रोपिता द्रुमाः ।
उत्तमं विंशतिर्हस्ता मध्यमं षोड़शान्तरम् ।
स्थानात् स्थानान्तरं कार्य्यं वृक्षाणां द्वादशा-
न्तरम् ।
विफलाः स्युर्घना वृक्षाः शस्त्रेणादौ हि शोध-
नम् ।
विडङ्गघृतपङ्काक्तान् सेचयेच्छीतवारिणा ।
फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः ।
घृतशीतपयःसेकः फलपुष्पाय सर्व्वदा ।
आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च ।
गोमांसमुदकञ्चेति सप्तरात्रं निधापयेत् ।
उत्सेकः सर्व्ववृक्षाणां फलपुष्पादिवृद्धिदः ।
मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः ।
विडङ्गतण्डुलोपेतं मत्स्यं मांसं हि दोहदम् ।
सर्व्वेषामविशेषेण वृक्षाणां रोगवर्द्धनम् ।”
इत्याग्नेये महापुराणे वृक्षायुर्व्वेदः ।
(अस्याप्यद्भिवरणं वृहत्संहितायां ५५ अध्याये
द्रष्टव्यम् ।)
वृक्षार्हा, स्त्री, (वृक्षे अर्हतीति । अर्ह + अच् ।
टाप् ।) महामेदा । इति राजनिर्घण्टः ।
वृक्षालयः, पुं, (वृक्ष आलयो यस्य ।) पक्षी ।
इति शब्दमाला ।
वृक्षावासः, पुं, (वृक्षे आवासो यस्य ।) वृक्षकोटर-
वासी । इति केचित् ।
वृक्षाश्रयी, [न्] पुं, (वृक्षमाश्रयतीति । आ + श्रि
+ णिनिः ।) क्षुद्रोलूकः । इति राजनिर्घण्टः ।
वृक्षोत्पल, पुं, कर्णिकारः । इति रत्नमाला ।
वृच, ई ध वृतौ । इति कविकल्पद्रुमः । (रुधा०-
पर०-सक०-सेट् । अनिट्निष्ठः ।) ई, वृक्तः ।
ध, वृणक्ति । वरीऽव्यते । वर्ज्जनार्थोऽयमित्येके ।
इति दुर्गादासः ।
वृज, ई कि त्यागे । इति कविकल्पद्रुमः । (चुरा०-
आ० च-पर०-सक०-सेट् । अनिट्निष्ठः ।) ई,
वृक्तः । कि,वर्ज्जयति वर्ज्जति । इति दुर्गादासः ।
वृज, ई ध वृतौ । त्यागे । इति कविकल्पद्रुमः ।
(रुधा० पर०-सक०-सेट् । अनिट्निष्ठः ।) ई,
वृक्तः । ध, वृणक्ति । वरीवृज्यते । इति दुर्गादासः ।
वृज, ल ङ र त्यागे । इति कविकल्पद्रुमः ।
(अदा०-आत्म०-सक०-सेट् ।) सवर्ण्णसखरौ । ल,
ङ, वृक्ते । र, वृज्जाने । इति दुर्गादासः ।
वृज, ल ङ ई त्यागे । इति कविकल्पद्रुमः ।
(अदा०-आत्म०-सक०-सेट् । अनिट्निष्ठः ।)
सवर्णसखरौ । ल, ङ, वृक्ते । ई, वृक्तः । इति
दुर्गादासः ।

वृजनं, क्ली, (वृज + “कॄपॄवृजीति ।” उणा० २ ।८१ ।
इति क्युः ।) पापम् । इत्युणादिकोषः । आका-
शम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
निराकरणम् । इति संक्षिप्तसारोणादिवृत्तिः ।
(संग्रामः । यथा, ऋग्वेदे । १ । ६२ । ३ ।
“त्वं शुष्णं वृजने पृक्षे ।”
“वृजन इत्यादीनि त्रीणि संग्रामनामानि अत्र
पूर्व्वे विशेषणे वृजने वर्ज्जनयुक्ते संग्रामे हि
धीराः पुरुषा वर्ज्जयन्ते हिंस्यन्ते ।” इति तद्भाष्ये
सायणः । बलम् । इति निघण्टुः । २ । ९ ।
यथा, ऋग्वेदे । १ । १६६ । १५ ।
“विद्यामेषं वृजनं जीरदानुम् ।”
“वृजनं बलम् ।” इति तद्भाष्ये सायणः ।
प्राणिजातम् । यथा, ऋग्वेदे ।१ । ४८ । ५ ।
“जरयन्ती वृजनं पद्वदीयते ।”
“वृजनं गमनशीलं जङ्गमं प्राणिजातं जर-
यन्ती * * * वृजनं वृजी वर्ज्जने । वर्ज्यते इति
वृजनं प्राणिजातम् । कॄ पॄ वृजिमन्दिनिधा-
ञ्भ्यः क्युरिति क्युप्रत्ययः । कित्वाल्लघूपधगुणा-
भावः योरनादेशे प्रत्ययस्वरः ।” इति तद्भाष्ये
सायणः ।)
वृजनः, पुं, (वृज + क्युः ।) केशः । कुटिले, त्रि ।
इत्युणादिकोषः । (बाधके च त्रि । यथा,
ऋग्वेदे । ६ । ३५ । ५ ।
“तमागृभं वृजनमन्यथा चिच्छूरो ।”
“वृजनं बाधकम् ।” इति तद्भाष्ये सायणः ।)
वृजिः, स्त्री, प्रजभूमिः । इति केचित् ।
वृजिनं, क्ली, (वृजी वर्ज्जने + “वृजेः किच ।”
उणा० २ । ४७ । इति इनच्, स च कित् ।)
पापम् । इत्यमरः । (यथा, भागवते । १० ।
२९ । ३८ ।
“तन्नः प्रसीद वृजिनार्द्दन तेऽङ्घ्रिमूलम् ।”
दुःखम् । यथा, तत्रैव । १ । ७ । ४६ ।
“वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ।”
पापविशिष्टे, त्रि । यथा, महाभारते ।१।२२।४।
“वृजिना गतिमाप्नोति श्रेयसोऽप्युपहन्ति च ।”)
रक्तचर्म्म । भुग्नम् । इति हेमचन्द्रः ।
वृजिनः, पुं, केशः । कुटिले, त्रि । इति मेदिनी ।
ने, १३६ । (यथा, ऋग्वेदे । ६ । ४६ । १२ ।
“अधसमे अध्वनि वृजिने पथि श्येना इव श्रव-
स्यतः ।”
“वृजिने कुटिले पथि ।” इति तद्भाष्ये सायणः ।)
वृण, इ ण उ भक्षे । इति कविकल्पद्रुमः । (तना०-
उभ०-सक०-सेट् । क्त्वावेट् ।) इ, ण, वृणोति
वर्णोति वृणुते वर्णुते । उ, वर्णित्वा वृत्वा ।
इति दुर्गादासः ।
वृत, क दीप्तौ । इति कविकल्पद्रुमः । (चुरा०-पर०
-अक०-सेट् ।) क, वर्त्तयति । इति दुर्गादासः ।
वृत, ङ उ व ऌ वर्त्तने । इति कविकल्पद्रुमः । (भ्वा०-
आत्म०-स्यसनोः उभ०-अक०-सेट् । क्त्वावेट् ।)
ङ, वर्त्तते । उ, वर्त्तित्वा वृत्वा । व, वर्त्स्यति
विवृत्सति । ऌ, अवृतत् । इति दुर्गादासः ।

वृत, य ङ उ सम्भक्तौ । वर्त्ते । ...
द्रुमः । (दिवा०-आत्म०-अ...
य ङ, वृत्यते । उ, वर्त्तित्वा
वृत्वा । इति दुर्गादासः ।
वृतः, त्रि, (वृ + क्त ।) ...
वृतः २ वारितः ३ । ...
र्व्वे । १२७ । १७ ।
“तथा वृतवती ...
आवृतञ्च ।
वृतपत्रा, स्त्री, (वृतानि ...
इति राजनिर्घण्टः ।
वृतिः, स्त्री, (वृ + क्तिन् ।) ...
वरः २ । इत्यमरः । (यथा,
“न हि ...
...
...

प्रार्थनाविशेषः । ...
णम् । इति मेदिनी । ...
रञ्जावणी ।
वृतिङ्करः, पुं, विकङ्कतः । ...
पक्षी । वृतिकारके, त्रि ।
वृत्तं, क्ली, (वृत + क्तः ।) ...
कथासरित्सागरे । ३ । ...
“तत्र तस्यविनीतान् भर्त्तुः
आपद्यपि सदोदयं ... वृत्त ...
पद्यम् । इत्यमरः । यथा, ...
“पद्यं चतुष्पदी तच्च वृत्तं
वृत्तमक्षरसंख्यातं ...
समममर्द्धसमं वृत्तं विषमं ...
वृत्तिः । इति मेदिनी । ...
परिमाणम् । ...
भरतः । (यथा, ...
५८ । ११६ ।
“न मार्यं ...
आचारः । यथा, मनौ । ...
“अनेन विप्रो वृत्तेन
यथेतरूपः ...
वृत्तः, त्रि, (वृत् + क्तः ।) ...
रामायणे । २ । ९० । ...
“जानन् दशरथं वृत्तं ...
“वृत्तमतीतम् ।” इति ...
वर्त्तुलः । (यथा, माघे । ...
“स्तनौ ... कठोरौ ...
छन्दोवृत्तः । इत्यमरटीका । ...
इति मेदिनी । (निष्पन्नः । यथा, ...
“स वृत्तचूडश्चलकाकपक्षै-
रमात्यपुत्रैः सवयोभिरन्वितः ।”
जातः । यथा, रघुवंशे । ३ । ...
“समन्वमाभाषणपूर्व्वमुक्तं
वृत्तः स नौ सङ्गत...

[illegible]

[illegible] (सम्यो वृत्तः । तस्यार्थे कन् ।) वृत्तः । इति राजनिर्घण्टः ॥ (छन्दोविशेषः । यथा, [illegible] १ । १४ । १० ।
[illegible] ")

[illegible] ०, स्त्री, (वृत्ता वर्त्तुला कर्कटी ।) [illegible] । इति राजनिर्घण्टः ॥

[illegible] ०, क्ली, ([illegible] यस्य तत्) मत्स्यविशेषः । तस्य लक्षणं यथा,—
"[illegible] ।
[illegible] ॥"
उदाहरणं यथा । जय जय जनार्द्दन [illegible] [illegible] [illegible] [illegible] [illegible] । इति छन्दोमञ्जर्य्याम् ६ स्तवकः ॥

[illegible] ०, पुं, तक्रविशेषः । तत्पर्य्यायः । वृत्तः १ [illegible] २ कलायः ३ । [illegible] २ । द्वितीयो लघुः । अस्य गुणाः । मधुरम् । शीतलम् । कफपित्तातिसारदाहरक्त-दोषघ्नम् । तेषां मध्ये स्थूलरक्ताधिकगुणम् । इति राजनिर्घण्टः ॥

[illegible] [म्] च, (वृत्त + तसिल् ।) वृत्तेन । यथा, [illegible] तृतीयायाः । [illegible] तृतीयान्तात् वा तसिः स्यात् । अध्य-[illegible] । वृत्तेन न व्यथते वृत्ततो न [illegible] । वृत्तेन न चलतीत्यर्थः । पक्षे । वृत्तेन [illegible] वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । [illegible] प्रयोगाच्च । हीयमानपापयुक्तादपि तृतीयान्तात्तसिः । वृत्तेन हीयते [illegible] पापः वृत्ततः । इति सिद्धान्तकौमुदी ॥

[illegible] ०, पुं, (वृत्तस्तण्डुलः ।) यावनालः । इति राजनिर्घण्टः ॥

[illegible] ०, स्त्री, नखनिष्पावी । इति राजनिर्घण्टः ॥

[illegible] ०, स्त्री, (वृत्तं वर्त्तुलं पर्णं यस्याः । ङीप् ।) [illegible] पुष्पिका । पाठा । इति राजनिर्घण्टः ॥

वृत्त[illegible], पुं, (वृत्तं वर्त्तुलं [illegible] यस्य ।) शिरीषः । कटभः । मार्जारः । कुरङ्गः । शूकरः । इति राजनिर्घण्टः ॥

वृत्तपर्णं, क्ली, (वृत्तं वर्त्तुलं पर्णं यस्य ।) [illegible]-च्छम् । इति राजनिर्घण्टः ॥ [illegible] ॥

वृत्तफलः, पुं, (वृत्तं फलं यस्य ।) दाडिमः । वदरः । इति राजनिर्घण्टः ॥

वृत्तपत्रा, स्त्री, (वृत्तं वर्त्तुलं पत्रं यस्याः ।) दाक्षायणी । महाकन्दी । क्षामकण्डी । इति राजनिर्घण्टः ॥

वृत्तबीजः, पुं, (वृत्तं बीजं यस्य ।) शिम्बा । इति राजनिर्घण्टः ॥

वृत्तबीजिका, स्त्री, (वृत्तं वर्त्तुलं बीजं यस्याः । कन् ततष्टाप् ।) माषपर्णी । इति राजनिर्घण्टः ॥

वृत्तबीजा, स्त्री, (वृत्तं बीजं यस्याः ।) आढकी । इति राजनिर्घण्टः ॥

वृत्तमल्लिका, स्त्री, (वृत्ता मल्लिकेव ।) चिनार्कः । मौद्रिकी । इति राजनिर्घण्टः ॥

वृत्तस्थः, त्रि, (वृत्त + स्था + कः ।) वृत्ते तिष्ठति यः । यथा, मनुः ।
"[illegible] ।
[illegible] ॥"
वृत्तं यथा,—
"[illegible] ।
[illegible] ॥"
इति गोपालचम्पानलसंहितायाम् ॥

वृत्ता, स्त्री, त्रिविधा रेणुका । प्रियङ्गुः । मांसरोहिणी । इति राजनिर्घण्टः ॥

वृत्ताध्ययनर्द्धिः, स्त्री, (वृत्ताध्ययनयोर्ऋद्धिः ।) ब्रह्मवर्च्चसम् । इत्यमरः । वेदबोधितस्वाचारस्य परिपालनं वृत्तम् । ब्रह्मचर्य्यपूर्ब्बकं गुरुकुले विद्याभ्यासः अध्ययनम् । तयोर्ऋद्धिस्तत्परिपालनजनितेन उपचयो ब्रह्मवर्च्चसं स्यात् । ब्रह्मवर्च्चसमिति च । इति भरतः ॥

वृत्तान्तः, पुं, संवादः । तत्पर्य्यायः । वार्त्ता २ प्रवृत्तिः ३ उदन्तः ४ । इत्यमरः । श्रुतिः ५ । इति जटाधरः ॥ उदन्तकः ६ । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ४।२८ ।
"सर्व्वमाजन्म वृत्तान्तं विस्तरादिदमब्रवीत् ॥")
प्रक्रिया । कार्त्स्न्यम् । वार्त्ताप्रभेदः । प्रस्तावः । इति मेदिनी ॥ (यथा, मनौ । ३ । १४ ।
"न ब्राह्मणक्षत्त्रिययोरापद्यपि हि तिष्ठतोः ।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्य्योपदिश्यते ॥"
"वृत्तान्ते इतिहासाख्याने ।" इति कुल्लूकमेधातिथी ॥) अवसरः । भावः । एकान्तवाचकः । इति विश्वः ॥

वृत्तिः, स्त्री, (वृत + क्तिन् ।) जीविका । इत्यमरः ॥ (यथा, मनौ । ४ । २५९ ।
"एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ॥")
विवरणम् । (यथा, कातन्त्रे । "सूत्रस्यार्थविवरणं वृत्तिः ।") कौशिक्यादिः । प्रवर्त्तनम् । इति मेदिनी ॥ (यथा, शाकुन्तले । ४ ।

"उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् ॥")
स्थितिः । इति धरणिः ॥ * ॥ कौशिक्यादिवृत्तयो यथा,—
"शृङ्गारे कौशिकी वीरे सात्त्वत्यारभटी पुनः ।
रसे रौद्रे च बीभत्से वृत्तिः सर्व्वत्र भारती ।
चतस्रो वृत्तयो ह्येताः सर्व्वनाट्यस्य मातृकाः ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥
वृत्तिहरणे दोषो यथा,—
श्रीनारायण उवाच ।
"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति विष्ठायां यावच्चन्द्रदिवाकरौ ॥
यावन्तो रेणवः सिक्ता विप्राणां नेत्रविन्दुभिः ।
तावद्वर्षसहस्रञ्च कुम्भीपाके स तिष्ठति ।
ततो नारकभोगान्ते यावच्च मन्वन्तरम् ।
ततोऽङ्गारे च शयनं ताडितो यमकिङ्करैः ॥
ततः श्वा च महापापी विष्ठायां जायते कृमिः ।
षष्टिवर्षसहस्राणि देवमानेन भारते ।
ततो भूमिविहीनश्च प्रजाहीनश्च मानवः ।
दरिद्रः कृपणो रोगी शूद्रो निन्द्यस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६८ अध्यायः ॥
(व्यवहारः । यथा, मनौ । २ । २०५ ।
"गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ॥"
वर्त्तनमित्यपि व्युत्पत्त्या । व्यापारः । यथा, न्यायपञ्चके । १ । "साध्याभाववदवृत्तित्वम् ।"
यथा च भाषापरिच्छेदे ।
"विषाविषयता शून्या विद्विषैव न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥"
चित्तस्यावस्थाविशेषः । यथा, पातञ्जले । २ ।
"योगश्चित्तवृत्तिनिरोधः ॥" चित्तवृत्तिप्रकारास्तु तत्रैव द्रष्टव्याः ॥ * ॥ व्यापारः । यथा, सांख्यतत्त्वकौमुद्याम् । ५ ।
"अर्थसन्निकृष्टस्य इन्द्रियस्य वृत्तौ सत्यां तमोऽभिभवे यः सत्त्वसमुद्रेकः ॥" युक्तार्थः । यथा, कातन्त्रव्याकरणादौ ।
"कारकप्रतियोगिभ्यां यद्दयदन्यदपेक्षते ।
अर्थव्यङ्कुलत्वाचित्वाद्वृत्तिस्तत्र तु नेष्यते ॥")

वृत्तिस्थः, पुं, (वृत्तौ तिष्ठतीति । स्था + कः ।) सरटः । इति राजनिर्घण्टः ॥ वृत्तौ तिष्ठति, त्रि ॥

वृत्त्यर्व्वारुः, पुं, (वृत्तो वर्त्तुल इर्व्वारुः ।) पट्-सुखा । इति राजनिर्घण्टः ॥

वृत्यं, त्रि, वरणीयम् । वृतधातोः क्यपा वृणधातोश्च क्यप्तुक्प्रत्ययाभ्याञ्च निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥

वृ(त्र)त्रः, पुं, (वृत् + "स्फायितञ्चिवञ्चीति ।" उणा० २ । १३ । इति रक् ।) अन्धकारः । शत्रुः । (यथा, ऋग्वेदे । ७ । ४८ । २ ।
"इन्द्रेण युजा तरुषेम वृत्रम् ।"
"वृत्रं शत्रुम् ।" इति तद्भाष्ये सायणः ॥)
दानवविशेषः । स तु त्वष्टृपुत्त्र इन्द्रेण हतः । इत्यमरः ॥ (यथा, हरिवंशे । १२७ । १७ ।

"तदा वृथयो ग्रामे माद्यामार्थं वृत्रो मया।" [illegible] देवीभागवते षष्ठस्कन्धे १ अध्यायमारभ्य द्रष्टव्यम्। ०।) मेघः। (यथा, ऋग्वेदे। १।३२।६।

"इन्द्रो यद्वा अरदद्वज्रबाहु-
र्यादन् वृत्रं परिधिं नदीनाम्।"

"वृत्रं वृणोति आकाशमिति वृत्रो मेघस्तं मेघम्[illegible] अवधीत्।" इति तद्भाष्ये सायणः।) पर्व्वतविशेषः। इति मेदिनी। ध्वान्तः। इति [illegible]। शब्दः। इति सिद्धान्तकौमुद्यामुणादि-वृत्तिः।

वृत्रद्विट्, [ष्] पुं, (वृत्रं द्वेष्टि। द्विष्+क्विप्।) इन्द्रः। इति हेमचन्द्रः।

वृत्रभोजन, पुं, [illegible] इति ख्यातः। इति शब्दचन्द्रिका।

वृत्रहा, [न्] पुं, (वृत्रं हतवान्। हन्+"ब्रह्मभ्रूणवृत्रेषु क्विप्।" ३।२।८७। इति क्विप्।) इन्द्रः। इत्यमरः। (यथा, भागवते ६।१०।१८।

"[illegible] वृत्रहा।"

यथा च ऋग्वेदे। १।१०६।६।

"इन्द्रं कुत्सो वृत्रहणं शचीपतिम्।"

"वृत्रहणं [illegible]।" इति तद्भाष्ये सायणः।)

वृत्रारि, पुं, (वृत्रस्यारिः।) इन्द्रः। इति हला-युधः।

वृथा, व्य, निरर्थक। तत्पर्यायः। मुधा २ व्यर्थकम् ३ [illegible]। इत्यमरः। यथा,—

"[illegible]।
[illegible] वृथा [illegible]।"

इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः। [illegible]

"[illegible] वृथा।
[illegible] वृथा।"

इति मार्कण्डेये ११५ अध्यायः।

[illegible], [न्] क्ली, (वृथा निरर्थकं जन्म।) [illegible]। यथा,—

"[illegible] वृथा [illegible]।
[illegible]।
[illegible] वृथा [illegible]।
[illegible]।"

इति वह्निपुराणे [illegible]। [illegible]

"[illegible]
[illegible] वृथा [illegible]।
[illegible]
[illegible] वृथा [illegible]।"

इति पुराणम्।

वृथादानं, क्ली, वृथा निरर्थकं दानम्। विफल-दानम्। [illegible]। यथा,—

"[illegible]।
[illegible]।
[illegible]।

गुरवेऽप्यनतस्ता यः स्तेनाय पतिताय च।
कृतघ्नाय च यद्दत्तं सर्व्वदा भ्रष्टविधिषे।
याचकाय च सर्व्वस्य वृषल्याः पतये तथा।
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च।
इत्येतानि तु राजेन्द्र वृथादानानि षोड़श।"

इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः। अन्यच्च। न्यायमार्गेण यद्दत्तं तत् सप्तविधमपि पुनर्नापहर्त्तव्यम्। यत् पुनरन्यायेन दत्तं तददत्तं षोड़शमपि प्रत्याहर्त्तव्यमेव। इत्यर्थादुक्तं भवति। नारदेन च।

"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम्।"

इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम्।

"पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः।
अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः।
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम्।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत्।
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतम्।"

इति मिताक्षरा।

वृथामांसं, क्ली, (वृथा निरर्थकं मांसम्।) देवपितृ-गुद्दिष्टमांसम्। तद्भक्षणे प्रेतत्वं भवति। यथा,

"वृथारेता वृथामांसो वृथावादी वृथामतिः।
निन्दको द्विजदेवानां स प्रेतो जायते नरः।"

इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः।

वृद्धं, क्ली, शैलजनामगन्धद्रव्यम्। इत्यमरः।

वृद्धः, पुं, वृद्धदारकः। इति राजनिर्घण्टः।

वृद्धः, त्रि, (वृधु वृद्धौ+क्तः। "यस्य विभाषा।" ७।२।१५। इति नेट्।) गतयौवनः। प्रवृद्धः। (यथा, मनुः। २।१५६।

"न तेन वृद्धो भवति येनास्य पलितं शिरः।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः।")

पण्डितः। इति मेदिनी। आद्यस्य पर्यायः। प्रवयाः २ स्थविरः ३ जीनः ४ जीर्णः ५ जरन् ६। इत्यमरः। यातयामः ७ जर्ज्जरः ८। इति राजनिर्घण्टः। पलितः। इति जटाधरः।

वृद्धकाकः, पुं, (वृद्धः काकः।) काकविशेषः। दाँड़काक इति भाषा। तत्पर्यायः। द्रोणकाकः २ दग्धकाकः ३ [illegible] ४ पर्व्वतकाकः ५ वनाश्रयः ६ काकोलः ७। इति हेमचन्द्रः।

वृद्धगङ्गा, स्त्री, (वृद्धा गङ्गा।) नदीविशेषः। बुड़ीगङ्गा इति ख्याता। यथा,—

"[illegible]।
[illegible] नरः।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।"

या निःसृता [illegible]
स्वर्णग्रीवेति विख्याता [illegible]
इति कालिकापुराणे
८२ अध्यायः।

वृद्धत्वं, क्ली, (वृद्ध+त्व।) [illegible]
पर्य्यायः। स्थाविरम् २। [illegible]
वार्द्धकम् ४। इति [illegible]
रघुः। १।२३।
"अनाकृष्टस्य विषयैर्विद्या [illegible]
तस्य [illegible]
बाल्यादेरवधिमाह सुश्रुतः।
"वयस्तु त्रिविधं बाल्यं [illegible]
ऊनषोड़शवर्षस्तु नरो [illegible]
त्रिविधः सोऽपि दुग्धाशी [illegible]

दुग्धाशी वर्षपर्य्यन्तं [illegible]
तदुत्तरं स्यादन्नाशी [illegible]
मध्यं षोड़शसप्तत्योर्मध्यमः [illegible]
चतुर्थी मध्यमं प्राहुर्युग [illegible]
चत्वारिंशत्समा [illegible]
ततः क्रमेण क्षीणः [illegible]
वीर्य्यादीनामियन्त्येव [illegible]
बलोत्साहा उपक्षीणा [illegible]
बलोत्साहैर्हीनः।
"ततस्तु सप्ततेरूर्द्ध्वं क्षीणधातु[illegible]
क्षीयमाणेन्द्रियबलः [illegible]
वलीपलितखालित्ययुक्तः [illegible]
कासश्वासादिभिः क्लिष्टो [illegible]
यातो जिरह्री [illegible]

वार्द्धक्ये वर्द्धते वायु[illegible]
उपक्रमेत् चिकित्सितुं। [illegible]
"बाल्यं वृद्धिश्छविर्मेधा [illegible]
बुद्धिः कर्म्मेन्द्रियं चेतो जीवितं [illegible]
इति [illegible]

वृद्धदारकः, पुं, [illegible]
बीरताड़कवृक्षः। इति भरतः।
बीजताड़का इति च [illegible]
हिन्दीभाषा। तत्पर्यायः। [illegible]
लाङ्गली ७ आवेगी ८ [illegible]
अन्त्यगन्धा ९ [illegible]
जुङ्गा १०। इति [illegible]
१२ छागः १३। इति [illegible]
१४ हस्तिनासिका १५। [illegible]
दीर्घवालुका १६ [illegible]
कोटरपुष्पी १८ [illegible]
तत्पत्राणि कोटरपुष्पी [illegible]
पाटः। चर्म्म दुर्गन्धः। [illegible]
त्वम्। [illegible]
नाशः। इति राजनिर्घण्टः। [illegible]
"वृद्धदारो वृद्धदारः [illegible]
[illegible]

…स्त्री, (वृद्धत्वनाशकं दारु यस्य ।) वृद्ध-
…वृक्षः । यथा, राजनिर्घण्टे ।
…दारुद्वयं गौल्यं पिच्छिलं कफवातनुत् ।
…सामदोषघ्नं द्वितीयं स्वल्पवीर्य्यदम् ॥”
…, त्रि, (वृद्धः प्रवृद्धो नाभिर्यस्य ।) उन्नत-
…। गोँड़नाभियुक्तव्यक्ति इति भाषा ।
…यः । तुण्डिलः २ तुण्डिभः ३ । इत्यमरः ॥
…महः, पुं, (प्रपितामहाद्वृद्धः ।) प्रपिता-
…तः । इति शब्दरत्नावली ॥ तत्र कन्यायाः
…ता नास्ति । यथा । तेनात्मपञ्चमे वृद्ध-
…महे सापिण्ड्यं निवर्त्तते इति प्रतिपादि-
अतएव प्रपितामहभ्रात्रा तत्सन्ततिभिः
…सापिण्ड्याभावात् कन्याजननमरणयोस्तेषां
…शौचं नास्ति किन्तु समानोदकनिमित्त-
…चमिति । इति शुद्धितत्त्वम् ॥
… स्त्री, (वृद्धा बला ।) महासमङ्गा । इति
निर्घण्टः ॥
…, पुं, अम्लवेतसः । यथा,—
…ल्लो वृद्धराजश्च द्वावेतौ तत्र कीर्त्तितौ ॥”
इति केचित् ॥
…, पुं, आम्रवृक्षः । यथा । सुपक्वो वृद्ध-
…। इति केचित् ॥
…तकः, पुं, (वृद्धः प्रवृद्धो विभीतक इव ।)
…तकः । इति शब्दमाला ॥
…, [स्] पुं, (वृद्धात् वृद्धस्यतेः शृणोतीति ।
असुन् । “वृद्धेभ्यः शृणोतीति वृद्धश्रवाः ।”
…लदत्तः । ४ । २२६ । “वृद्धं प्रभूतं श्रवः
… स्तोत्रं हविर्लक्षणमन्नं वा यस्य ।” इति
भाष्ये सायणः । १ । ८९ । ६ । “वृद्धं श्रवो
कीर्त्तिर्वा यस्य ।” इति वेददीपे महीधरः ।
। ६ ।) इन्द्रः । इत्यमरः ॥
…, पुं, वृद्धानां समूहः । तत्पर्य्यायः । वार्द्ध-
… इत्यमरः । २ । ६ । ४० ॥
…कं, स्त्री, (वृद्धस्य सूत्रम् । ततः स्वार्थे
…) इन्द्रतूलम् । बुड़ीर सुता इति भाषा ।
…, हारावल्याम् ।
…सूत्रकमित्याहुरिन्द्रतूलं मनीषिणः ।
…पांशु वंशकफं वाततूलं मरुद्ध्वजम् ॥”
…स्त्री, (वृद्ध+टाप् ।) गतयौवना । बुड़ी
… भाषा । तत्पर्य्यायः । पलिक्नी २ । इत्य-
… ॥ पलिता ३ । इति भरतः ॥ स्थविरा ४
…ला ५ जरती ६ गतार्त्तवा ७ । इति
…निर्घण्टः ॥ तदवस्थाकालो यथा,—
…षोड़शाब्दवेद्बाला तरुणी त्रिंशता मता ।
…पञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥”
इति कालिदासः ॥ * ॥
…पि च ।
…वेति गीयते नारी यावद्वर्षाणि षोड़श ।
…स्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि ॥
…र्द्धमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
…त तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥”
इति भावप्रकाशः ॥ * ॥

तस्याः सम्भोगे दोषो यथा,—
“बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥
नार्त्तवे षोड़शाद्वर्षात् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
पञ्चपञ्चाशतो नारी सप्तसप्ततितः पुमान् ।
द्वावेतौ न प्रसूयेते प्रसूयेते विपर्य्ययात् ॥”
इति राजवल्लभः ॥ * ॥
“शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥”
इति चाणक्यम् ॥ * ॥
अङ्गुष्ठः । इति शब्दरत्नावली ॥ महाश्राव-
णिका । इति राजनिर्घण्टः ॥
वृद्धाङ्गुलिः, स्त्री, (वृद्धा अङ्गुलिः ।) हस्तपादयोः
स्थूलाङ्गुलिः । बुड़ आङ्गुल इति भाषा । तत्-
पर्य्यायः । अङ्गुष्ठः २ वृद्धा ३ । इति शब्दरत्ना-
वली ॥
वृद्धिः, स्त्री, (वृध+क्तिन् ।) अष्टवर्गान्तर्गतौ-
षधविशेषः । तत्पर्य्यायः । योग्या २ ऋद्धिः ३
सिद्धिः ४ लक्ष्मीः ५ । इत्यमरः ॥ पुष्टा ६ वृद्धि-
दात्री ७ मङ्गल्या ८ श्रीः ९ सम्पत् १० आशीः
११ जनेष्टा १२ भूतिः १३ सुत् १४ सुखम् १५
जीवभद्रा १६ । अस्या गुणाः ।
“ऋद्धिर्वृद्धिश्च मधुरा सुस्निग्धा तिक्तशीतला ।
रुचिमेधाकरी श्लेष्मकुष्ठक्रिमिहरा परा ॥
प्रयोगेष्वनयोरेकं यथालाभं प्रयोजयेत् ।
तत्र यद्यातुमिष्टिः स्यात्तद्द्वयमप्यत्र योजयेत् ॥”
इति राजनिर्घण्टः ॥ * ॥
ऋद्धिवृद्धोरुत्पत्तिलक्षणनामगुणाः ।
“ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोषयामले ।
श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः ॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्यनयोर्ब्रुवे ।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा ॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः ।
ऋद्धिर्योग्या सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
प्राणैश्वर्य्यकरी मूर्च्छारक्तपित्तविनाशिनी ॥
वृद्धिर्गर्भप्रदा शीता बृंहणी मधुरा स्मृता ।
तृष्णा पित्तास्रशमनी क्षतकासक्षयापहा ॥
राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः ।
तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् ॥”
तत्प्रयत्नः प्रतिनिधिः ॥ * ॥ एतस्य प्रतिनिधि-
माह ।
“मेदा जीवककाकोली ऋद्धिद्वन्द्वेऽपि चासति ।
वरीविदार्य्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् ॥”
मेदा महामेदास्थाने शतावरीमूलं जीवकर्षभक-
स्थाने विदारीमूलं काकोलीक्षीरकाकोलीस्थाने-
ऽश्वगन्धामूलं ऋद्धिवृद्धिस्थाने वाराहीकन्दं
गुणैस्तत्तुल्यं क्षिपेत् । इति भावप्रकाशः ॥ * ॥
नीतिवेदिनां षड्गुणादिविस्तारोऽन्यं तदतिदेशः ।

इत्यमरः ॥ नीतिवेदिनां नीतिशास्त्रज्ञानां
क्षयादिभिस्त्रिवर्गः । अन्येषान्तु धर्म्मकामार्थः
पूर्व्वमुक्तः । अष्टवर्गस्यापचयः क्षयः । तस्यैवोप-
चयो वृद्धिः । तस्य नोपचयो नाप्यपचयः
स्थानम् । अष्टवर्गो यथा,—
कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरबलादानं सैन्यानाञ्च निवेशनम् ॥
अष्टवर्गः स्मृतो राज्ञामिति भरतः ॥ * ॥
वर्द्धनम् । तत्पर्य्यायः । स्फातिः २ । इत्यमरः ॥
(यथा, मनुः । १२ । १२४ ।
“एष सर्व्वाणि भूतानि पञ्चभिर्व्याप्य मूर्त्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥”)
विष्कम्भादिसप्तविंशतियोगान्तर्गतैकादशयोगः ।
तत्र जातफलं यथा,—
“प्रसूतिकाले यदि वृद्धियोगो
नरः सुभोगी विनयान्वितश्च ।
धनप्रयोगग्रहणेषु दक्षो
विचक्षणः स्यात् क्रयविक्रयाभ्याम् ॥”
इति कोष्ठीप्रदीपः ॥ * ॥
कलान्तरम् । सुद् इति भाषा । अभ्युदयः ।
समृद्धिः । इति मेदिनी ॥ (यथा, शिशुपाल-
वधे । १५ । १ ।
“अथ तत्र पाण्डुतनयेन
सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः
परवृद्धिमत्सरि मनो हि मानिनाम् ॥”)
वृद्धिग्रहणनियमो यथा,—
“अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ।
वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥”
मासि मासि प्रतिमासं बन्धकं विश्वासार्थं यदा-
धीयते चाधिरिति यावत् । बन्धकेन सह वर्त्तत
इति सबन्धकः प्रयोगस्तस्मिन् सबन्धके प्रयोगे
प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या
भवति । अन्यथा बन्धकरहिते प्रयोगे वर्णानां
ब्राह्मणादीनां क्रमेण द्वित्रिचतुःपञ्चकं शतं धर्म्यं
भवति । ब्राह्मणेऽधमर्णे द्विकं शतम् । क्षत्त्रिये
त्रिकम् । वैश्ये चतुष्कम् । शूद्रे पञ्चकम् । मासि
मासीत्येव । द्वौ वा त्रयो वा चत्वारो वा पञ्च वा
इति द्वित्रिचतुःपञ्चाः । द्वित्रिचतुःपञ्चा अस्मिन्
शते वृद्धिर्दीयत इति द्वित्रिचतुःपञ्चकं शतम् ।
तदस्मिन् वृद्ध्या यत्नाभशुल्कोपदा दीयते इति
कन् । इयं वृद्धिर्मासि मासि ग्रहणं इति
कालिका । इयमेव वृद्धिर्दिवसगणनया विभज्य
प्रतिदिवसं गृह्यमाणा कायिका भवति । तथा च
नारदेन ।
“कायिका कालिका चैव कारिता च तथा परा ।
चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा ॥”
वृहस्पतिः ।
“कायाविरोधिनी शश्वत् पणपादादि कायिका ।
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता ॥
वृद्धिः सा कारिता नाम दर्शितेन स्वयं कृता ।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता ॥”

गृहीत्वविशेषणेन वृद्धिः प्रकारान्तरमाह। कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्। कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः ये वृद्ध्या धनं गृहीत्वा अधिकलाभार्थं अतिगहनं प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशकं शतं दद्युः। ये च समुद्रगास्ते विंशकं शतं मासि मासीत्येव। एतदुक्तं भवति कान्तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतं उत्तमर्णं आददीत्। मूलविनाशस्यापि शङ्कितत्वात् इति। *। इदानीं कारिता वृद्धिमाह।

"दद्युर्वा स्वकृतां वृद्धिं सर्व्वे सर्व्वासु जातिषु।"

सर्व्वे ब्राह्मणादयोऽधमर्णा अबन्धके सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्व्वासु जातिषु दद्युः। क्वचिदकृतापि वृद्धिर्भवति यथाह नारदः।

"न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्।
अनाकारितमप्यूर्द्धं वत्सरार्द्धाद्विवर्द्धते।" इति।

यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति कात्यायनेनोक्तम्।

"यो याचितकमादाय तमदत्त्वा दिशं व्रजेत्।
ऊर्द्धं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्।" इति।

यस्तु याचितकमादाय याचितोऽप्यदत्त्वा देशान्तरं याति तं प्रति तेनैवोक्तम्।

"कृत्वोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्।
ऊर्द्धं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्।" इति।

यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयेद्राजा। यथाह।

"स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्।
तं ततो कारितां वृद्धिमनिच्छन्तञ्च दापयेत्।" इति।

अनाकारितवृद्धेरपवादो नारदेनोक्तः।

"पण्यमूल्यं भृतिस्त्यासो दण्डो यश्च प्रकल्पितः।
वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः।
अविवक्षिता अनाकारिता इति। *। अधुना द्रव्यविशेषे वृद्धिविशेषमाह। सन्ततिस्तु पशुस्त्रीणाम्। पशूनां स्त्रीणां सन्ततिरेव वृद्धिः। पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः सम्भवति। वहयश्च चौरपरिचर्य्यार्थिनः। अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह। रसस्याष्टगुणा परा।

"वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा।"

रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा नातःपरं वर्द्धते। तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणाः त्रिगुणा द्विगुणा च वृद्धिः परा। अतिरेव तु रसस्य चैगुण्यमुक्तम्। त्रिगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च। तुला धृतं त्वष्टगुणमिति। मनुना तु धान्यस्य पुष्पमूलफलादीनाञ्च पञ्चगुणत्वमुक्तम्। "धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चतामिति।" शदः क्षेत्रफलं पुष्पमूलफलादि। लवो मेषोर्णाचमरीकेशादि। वाह्यो बलीवर्द्दतुरगादि। धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वं नातिक्रामतीति। तच्चाधमर्णयोग्यतातारतम्येन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यम्। पुरुषान्तरसंक्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे अनेकशः प्रयोगान्तरकरणे सुवर्णादिकं द्वैगुण्यादतिक्रम्य पूर्व्ववद्वर्द्धते। सकृत्प्रयोगेऽपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यसम्भवात्। पूर्व्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्द्धत एव। यथाह मनुः। कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता। सकृदाहितेत्यपि पाठोऽस्ति। उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति। यदि सकृदाहिता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति सकृदाहृतेति पाठे शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाधमर्णादाहृता द्वैगुण्यं नात्येतीति व्याख्येयम्। तथा गौतमेनाप्युक्तम्। चिरस्थाने द्वैगुण्यं प्रयोगस्येति प्रयोगस्येत्येकवचननिर्द्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थान इति निर्द्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः। इति मिताक्षरा। कुरण्डरोगः। वर्द्धः। इति हेमचन्द्रः। समूहः। इति शब्दचन्द्रिका। शैलेयम्। धनम्। इति राजनिर्घण्टः। *।

वृद्धिका, स्त्री, (वृद्धिरेव। स्वार्थे कन्।) ऋद्धिनामौषधम्। इति शब्दमाला।

वृद्धिजीविका, स्त्री, (वृद्ध्या जीविका।) ऋणदानजीविका। तत्पर्य्यायः। अर्थप्रयोगः २ कुसीदम् ३। इत्यमरः। कलान्तिका ४। इति शब्दरत्नावली।

वृद्धिदः, पु, (वृद्धिं ददातीति। दा + कः।) जीवकः। शूकरकन्दः। इति राजनिर्घण्टः। वृद्धिदातरि, त्रि। (यथा, वृहत्संहितायाम्। ५३। ६७।

"प्राक्शाखया वियुक्तं सचैत्रं वृद्धिदं वास्तु।")

वृद्धिश्राद्धं, क्ली, (वृद्धये यत् श्राद्धम्।) वृद्धिनिमित्तकश्राद्धम्। तत्तु अभ्युदयनिमित्तं पित्राद्युद्देशेन श्रद्धया अन्नादेर्द्दानम्। तत् कर्म्मविशेषात् पूर्व्वं कर्त्तव्यं यथा। निर्णयामृते मत्स्यपुराणम्।

"अन्नप्राशे च सीमन्ते पुत्त्रोत्पत्तिनिमित्तके।
पुंसवने निषेके च नववेश्मप्रवेशने।
देववृक्षजलादीनां प्रतिष्ठायां विशेषतः।
तीर्थयात्रावृषोत्सर्गे ...
वृद्धिश्राद्धं प्रकीर्त्तितम्।"

... आभ्युदयिकश्राद्धम्।
यथा,—
"वृद्धिश्राद्धं प्रवक्ष्यामि ...
... मातृपूर्व्वकम् ...
तृप्तेषु ...
... कर्त्तव्यम्। दक्षिणस्य ...
... पितामहप्रपितामह ...
प्रमातामहानां ...
नान्दीमुखानां श्राद्धं कर्त्तुं ...
विश्वेदेवानां श्राद्धं ...
कर्त्तव्यमिति ...
... इत्येते ...
गृहीत्वा देवश्राद्धं ...
अमुकगोत्राणां मातृपितामह ...
नान्दीमुख्याः श्राद्धं ...
कर्त्तव्यमिति ...
करिष्यामीति तैरुक्ते इत्येते ...
... आसनम्। ...
आवाहनम्। ...
आगच्छन्तु महाभागा ...
ॐ विश्वेदेवाः शृणुतेमं ...
उपहूतास्त्वे ये अग्निष्वात्ता ...
सदास्मिन् बर्हिषि मादयध्वम्। ...
इति विश्वेदेवावाहनं ...
... आवाहनम्। ततः ...
... आसनम्। ...
दानञ्च। अर्घ्यदानादि ...
पितामह्या मातुः। तत ...
आसनमासनमावाहनं ...
वृद्धप्रपितामहादीनां
ॐ वसुरुद्रादित्यसंज्ञकेभ्यो विश्वेभ्यो देव ...
सपृतं समाभीयं सयवं दधि ...
बिल्वार्च्चितं नमः। इति
ॐ अमुकगोत्रे मातृपितामहि ...
नान्दीमुखि एतत्ते ...
मातामहप्रमातामहेभ्यः।" इति ...
अध्यायः। अन्यच्च।
"तृतीयमाभ्युदयिकं वृद्धिश्राद्धं ...
उत्सवानन्दसम्भारे यज्ञोद्वाहादिकेषु।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम्।
ततो मातामहा राजन् विश्वेदेवास्तथैव च।
प्रदक्षिणोपचारेण दध्यक्षतफलोदकैः।
प्राङ्मुखो निर्व्वपेत् पिण्डान् दूर्व्वया ...

सम्पन्नमित्यभ्युदये दद्यादर्घ्यं द्वयोर्द्वयोः।

...ति पुष्पाः प्रसवार्थं सम्भवन्ति ।
...र्थ: कर्मणि क्तः । ...
... कर्मणि ...
...ि शास्त्रो ... ।
... पति पुत्रोत्पादनात् पुत्रः ।
...: ... प्रमाणात् प्रमाः ।
...नाशान्तर ... पर: ।"
... ... नाम
...प. । विकारत् ...
। ... ।
. (... । "...
।" ५ । ४ । ८७ । ...
) ... । तत्पर्य्यायः । ... ।
। (यथा, कुमारसम्भवे । ५ । ७० ।
...ितीक्ष ...
... ।")
, त्रि, (... । ...+
... ।) ... । तत्पर्य्यायः ।
.२. बाहुलिकः ३ पुष्पेदः ४ पुर्णादिश;
...ि शब्दरत्नावली । स्त्रियां ६ । इति
: ।
... । इति कविकल्पद्रुमः । (भ्वा०-
आत्म०-सेट् । शादेट् ।) ङ, वर्द्धिता
। वर्द्धते जनः । च, वर्द्धति विकाशति ।
... । इति दुर्गादासः ।
...नौ । इति कविकल्पद्रुमः । (चुरा०-
प०-सेट् ।) च, वर्द्धयति । इति दुर्गा-

पुं. (वृध+"कनुग्जिहर्षीति ।" उणा०
।। इत्यनेन चाभावः । स च कित् ।)
। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
...ि, त्रि । यथा, ऋग्वेदे । १ । २ । ५ ।
...शिशो वृषणासु जभुरन् ।"
...ासु प्रवर्द्धमानासु ।" इति सायणः
। यथा च तत्रैव । ८ । ३ । ६ ।
'...दियासु वृषणो
...दि बाह्नाताय प्रतवसे शुभं यो ।"
...ः वृत्ताच्छादिभिर्वर्द्धमानस्तम् ।" इति
...सायणः ।)
पुं, (वृध+बाहुलकात् क्वाशुच् । स च
) पुरुषः । यज्ञम् । क्षतिः । इत्युणादि-
।
; (वृध+"इगुपधाज्ञाकृकिरः कः ।"
। ११० । इति कप् ।) वर्द्धनीयम् ।
...ः कप्रत्ययेन निष्पन्नमिदम् ।
; फलपुष्पपत्रादिर्येन धार्य्यते तत् । बोटा
...ाषा । तत्पर्य्यायः । प्रसवबन्धनम् २ ।
...: । (यथा, रघुवंशे । ५ । ६९ ।
...र्थं हरति पुष्पमनोकहानाम् ।")
...रा । कुचाग्रम् । इति मेदिनी ।
पुं, वार्त्ताकी । इति शब्दरत्नावली ।
। स्त्री, वार्त्ताकी । इति राजनिर्घण्टः ।

वृन्दिता, स्त्री, अट्टुम्बा । इति शब्दचन्द्रिका ।
वृन्दं, क्ली, (वृञ्+"वृञ्दादयश्चेति ।" उणा० ४
। ९८ । इति वन् नुम् गुणाभावश्च निपात्यते ।)
समूहः । इत्यमरः । (यथा, भागवते । ३ ।
२८ । ३० ।
"भृत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ।")
वृन्दः, पुं, समार्बुदः । शतकोटिरिति यावत् । इति
ज्योतिषम् । अस्य नामान्तरं महार्बुदः ।
वृन्दा, स्त्री, तुलसी । इति शब्दरत्नावली । वन-
स्पतविशेषः । अस्या विवरणं तुलसीशब्दे द्रष्टव्यम् ।
केदारराजकन्या । राधायोड़शनामान्तर्गत-
नामविशेषः । एतद्विवरणं वृन्दावनशब्दे द्रष्ट-
व्यम् ।
वृन्दारः, त्रि, मनोज्ञम् । इति शब्दमाला ।
वृन्दारकः, पुं, (वृन्दमस्यास्तीति । वृन्द+"शृङ्ग-
वृन्दाभ्यामारकन् वक्तव्यः ।" ५ । २ । १२२ ।
इत्यस्य वार्त्तिकोक्त्या आरकन् ।) देवता ।
इत्यमरः । (यथा, भागवते । ६ । १० । ३० ।
"अपि वृन्दारका यूयं न जानीथ शरीरि-
णाम् ।")
यूथपालः । यथा,—
"वृन्दारकः सुरे ख्रैष्ठे मनोज्ञे यूथपालके ।"
इति भरतधृतकोषः ।
वृन्दारकः, त्रि, (वृन्दार+स्वार्थे कन् ।) मनोज्ञः ।
(यथा, महाभारते । ११ । १६ । ५ ।
"मुषा वृन्दारकः सर्वोविकलैः पुरुषर्षभः ।")
श्रेष्ठः । इति मेदिनी । तत्पर्य्यायाः प्रवर्हादिः ।
वृन्दारकी स्त्रीमुख्यौ । इत्यमरः ।
वृन्दावनं, क्ली, मथुरामण्डलान्तर्गततीर्थम् । तन्नामकारणं
यथा,—

श्रीनारायण उवाच ।

"पुरा केदारनृपतिः सप्तद्वीपपतिः स्वयम् ।
आसीत् सत्ययुगे ब्रह्मन् सत्यधर्मरतः सदा ॥
स रेमे सह नारीभिः पुत्रपौत्रगणैः सह ।
पुत्रानिव प्रजाः सर्व्वाः पालयामास धार्म्मिकः ॥
कृत्वा शतक्रतुं राजा लेभे शिक्रत्वमीप्सितम् ।
कृत्वा नानाविधं पुण्यं फलकाङ्क्षी न च स्वयम् ॥
नित्यं नैमित्तिकं सर्व्वं श्रीकृष्णप्रीतिपूर्ब्बकम् ।
केदारतुल्यो राजेन्द्रो न भूतो भविता पुनः ॥
पुत्रेषु राज्यं संन्यस्य प्रिया त्रैलोक्यमोहिनी ।
जैगीषव्योपदेशेन जगाम तपसे वनम् ॥
हरेरैकान्तिकी भक्तो ध्यायते सन्ततं हरिम् ।
आस्ते सुदर्शनं चक्रमस्ति यत्सन्निधौ मुने ॥
चिरं तप्त्वा नृपश्रेष्ठो गोलोकञ्च जगाम सः ।
केदारनामतीर्थं तत्तन्नाम्ना च बभूव ह ॥
अद्यापि तत्र स्नातः प्राणी सद्यो मुक्तो भवेत् ध्रुवम् ।
कमलांशा तस्य कन्या नाम्ना वृन्दा तपस्विनी ॥
न वव्रे सा वरं कञ्चित् योगशास्त्रविशारदा ।
दत्तं दुर्व्वाससा तस्मै हरेर्मन्त्रं सुदुर्लभम् ॥
सा विरक्ता गृहं त्यक्त्वा जगाम तपसे वनम् ।
षष्टिं वर्षसहस्राणि तपस्तेपे सुनिर्ज्जने ॥
आविर्ब्बभूव श्रीकृष्णस्तत्पुरो भक्तवत्सलः ।
प्रसन्नवदनः श्रीमान् वरं दृणीष्वेत्युवाच सः ॥
दृष्ट्वा सा राधिकाकान्तं शान्तं सुन्दरविग्रहम् ।
मूर्च्छां संप्राप सा सद्यः कामबाणप्रपीड़िता ॥
सा च वव्रे वरं यत्र पतिस्त्वं मे भवेति च ।
ओमित्युक्ता च रहसि चिरं रेमे तया सह ॥
सा जगाम च गोलोकं कृष्णेन सह कौतुकात् ।
राधासमा सा सौभाग्यात् गोपीश्रेष्ठा बभूव सा ॥
वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ।
वृन्दा यत्र कृता क्रीड़ा तेन वा मुनिपुङ्गव ॥
अथान्यदपि इतिहासं शृणु वत्स पुराकृतम् ।
येन वृन्दावनं नाम निबोध कथयामि ते ॥
कुशध्वजस्य कन्ये द्वे धर्म्मशास्त्रविशारदे ।
तुलसीवेदवत्यौ च विरक्ते भवकर्म्मणि ॥
तपस्तप्त्वा वेदवती प्राप नारायणं परम् ।
सीता जनककन्या सा सर्व्वत्र परिकीर्त्तिता ॥
तुलसी च तपस्तप्त्वा वाञ्छां कृत्वा हरिं पतिम् ।
दैवाद्दुर्व्वाससः शापात् प्राप्य शङ्खचूड़ं पतिम् ॥
पश्चात् संप्राप कमलाकान्तं कान्तं मनोहरम् ।
तस्याश्च तपसः स्थानं उदितश्च तपोधन ।
तेन वृन्दावनं नाम प्रवदन्ति मनीषिणः ॥ ॥
अथवा ते प्रवक्ष्यामि परं हेत्वन्तरं शृणु ।
येन वृन्दावनं नाम पुण्यक्षेत्रञ्च भारते ॥
राधाषोड़शनाम्नाञ्च वृन्दा नाम श्रुतौ श्रुतम् ।
तस्याः क्रीड़ावनं रम्यं तेन वृन्दावनं स्मृतम् ॥
गोलोके प्रीतये तस्याः कृष्णेन निर्म्मितं पुरा ।
क्रीड़ार्थं भुवि तन्नाम्ना वनं वृन्दावनं स्मृतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वृन्दावन-
प्रस्तावः १७ अध्यायः ॥ ॥
अथ वृन्दावनवर्णनम् ।

ईश्वर उवाच ।

"गुह्याद्गुह्यतरं रम्यं परमानन्दकारणम् ।
चमत्कृतं रहस्यानां रहस्यं परमं परम् ॥
दुर्लभानाञ्च परमं दुर्लभं मोहनं परम् ।
सर्व्वशक्तिमयं देवि सर्व्वस्थानेषु गोपितम् ॥
सात्वतां स्थानमूर्द्धन्यं विष्णोरत्यन्तवल्लभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥
पूर्णब्रह्मसुखैश्वर्य्यं नित्यमानन्दमव्ययम् ।
वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि ॥
गोलोकैश्वर्य्यं यत्किञ्चित् गोकुले तत्प्रकीर्त्तितम् ।
वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशयेत् ॥
यद्ब्रह्मपरमैश्वर्य्यं नित्यं वृन्दावनाश्रयम् ।
तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता ॥
यत् स्थाक्षाच्छुरकं धाम विष्णोरत्यन्तवल्लभम् ।
स्वस्थानमधिकं नामधेयं माथुरमण्डलम् ॥
निगूढ़ं परमं स्थानं पुर्य्यभ्यन्तरसंस्थितम् ।
सहस्रपत्रकमलाकारं माथुरमण्डलम् ॥
विष्णुचक्रपरिभ्रामधाम वैष्णवमद्भुतम् ।
कर्णिकापत्रविस्तारं रहस्यक्रमसंस्थितम् ॥
प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात् ।
भद्रश्रीलोहभाण्डीरमहातालखदीरकाः ॥
बकुलं कुमुदं काम्यं मधु वृन्दावनं तथा ।
द्वादशैता वने संख्याः कालिन्द्याः सप्त पश्चिमे ।

पूर्व्वे पद्मवनं प्रोक्तं तत्रास्ति शुभमुत्तमम् ।
महावनं गोकुलाख्यं रम्यं मधुवनं तथा ॥
पूर्व्वे तु पञ्च महाद्वादशाद्याः सप्त पश्चिमे ।
काम्यकोपवनं प्रोक्तं तत्क्रीडारसस्थलम् ॥
कदम्बखण्डिकं नन्दवनं नन्दीश्वरं तथा ।
नन्दनानन्दखण्डस्य पालाशाशोककेतकम् ॥
सुगन्धिमादनं कैलासाख्यं भोजनस्थलम् ।
सुधाप्रभावनं तत्र दहनं पेयपानकम् ॥
स्नानमुख्य दधिपानं चक्रभानुपुरं तथा ।
अद्भुतं त्रिदशैर्बालक्रीडस्य धूसरम् ॥
सेतुबन्धं सरो वीरस्तत्कथाथापि नन्दनम् ।
तत्रैव वने सङ्कालिङ्ग्य तोयवनं स्मृतम् ॥
पूर्व्वोक्तं द्वादशारण्यं प्रधानं वनमुत्तमम् ।
तयोरन्तरे चतुर्थेच वनञ्च समुदाहृतम् ॥
नानाविधरसक्रीडानानालीलारसस्थलम् ।
दर्शनस्पर्शनालापरसमक्षममीरितम् ॥
अष्टपत्रकमध्ये गोकुलाख्यं महत् पदम् ।
कर्णिका तन्महाधाम गोविन्दस्थानमुत्तमम् ॥
तस्योपरि स्वर्णपीठे मणिमण्डपमण्डितम् ।
तत्र तत्र प्रमाणेन दिक्षु दलमीरितम् ॥
यद्रूपं तद्विधं प्रोक्तं परं गुह्यतमोत्तमम् ।
तस्मिन् दले महापीठं निगमागमदुर्गमम् ॥
योगीन्द्रैरपि दुष्प्रापं सर्व्वात्मा यत्र गोकुलम् ।
द्वितीयं दलमाग्नेयं तद्दलं द्विधा तथा ॥
गुह्यकन्दपीठोरुकुटीरौ तद्दले स्थितौ ।
पूर्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते ॥
तत्रादिपञ्चमीयोगे समीक्ष्य नगुर्व्यं भवेत् ।
चतुर्थदले याम्ये सिद्धपीठेऽपि वर्षकम् ॥
कात्यायन् पूजया गौरी यत्र कात्यायनीं लभेत् ।
वस्त्रालङ्कारहरणं तद्दले समुदाहृतम् ॥
उत्तरे पञ्चमं प्रोक्तं दलं सर्व्वदलोत्तमम् ।
द्वादशादित्यमध्ये च दलञ्च कर्णिकासमम् ॥
वायव्ये षष्ठं दलं तत्र कालीहृदः स्मृतः ।
दलानामुत्तमञ्चैव प्रधानस्थानमुच्यते ॥
कर्णिकामध्ये चैव पश्चिमे सप्तमं दलम् ।
यज्ञपत्नीकामाय ददावभिमतवरप्रदम् ॥
अघासुरस्य निर्वाणं चक्रे निरदर्शितम् ।
ब्रह्ममोहनमत्रैव दलं च भक्तिरसाश्रयम् ॥
नैर्ऋत्याम् दलं प्रोक्तमष्टमं व्योमघातनम् ।
शङ्खचूडवधश्चात्र नानाकेलिरसस्थलम् ॥
अष्टमदलं प्रोक्तं वृन्दारण्यावतरणम् ।
श्रीमद्वृन्दावनं धन्यं यमुनायाः प्रदक्षिणम् ॥
हिरण्यकण्ठपद्माभा इतो योगीश्वरादिभिः ।
तदङ्के षोडशदल स्थिता पूर्वं तदीरितम् ॥
[illegible] शैलं [illegible] ।
[illegible] महद्धाम प्रधानं षोडशं दलम् ॥
[illegible] कर्णिकासमम् ।
[illegible] मथुरं प्रोक्तं तत्र [illegible] ।
[illegible] कन्दर्पकारकम् ।
[illegible] ॥
[illegible] विविधाकारसम्भवम् ।
[illegible] दलञ्च समुदाहृतम् ॥

सर्व्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम् ।
तत्र गोवर्द्धने रम्ये नित्यानन्दरसाश्रये ॥
कर्णिकायां महालीला तल्लीला रसगह्वरे ।
यत्र कृष्णो नित्यवृन्दाकाननस्य पतिर्भवेत् ॥
कृष्णो गोविन्दतां प्राप्तः किमन्यैर्बहुभाषितैः ।
दलं तृतीयमाख्यातं सर्व्वश्रेष्ठोत्तमोत्तमम् ॥
चतुर्थदलमाख्यातं महाद्भुतरसस्थलम् ।
हरिर्वंशस्य पतिः श्यामानित्यं गोवर्द्धनः स्वयम् ॥
कदम्बखण्डी तत्रैव पूर्णानन्दरसाश्रयः ।
स्निग्धं हृद्यं प्रियं रम्यं दलञ्च समुदाहृतम् ॥
नन्दीश्वरदलं रम्यं तत्र नन्दालयः स्मृतः ।
कर्णिकादलमाहात्म्यं पञ्चमं दलमुच्यते ॥
अधिष्ठातात्र गोपालो धेनुपालस्ततः परम् ।
दलं षष्ठं यदाख्यातं तत्र नन्दवनं स्मृतम् ॥
सप्तमं बकुलारण्यं दलं रम्यं प्रकीर्त्तितम् ।
दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः ॥
नवमं कुमुदारण्यं दलं रम्यं प्रकीर्त्तितम् ।
काम्यारण्यं दलं हृद्यं दशमं सर्व्वकारणम् ॥
भक्तप्रसादनं तत्र विष्णुदन्तं प्रदर्शितम् ।
लयक्रीडारसस्थानं प्रधानं दलमुच्यते ॥
दलमेकादशं प्रोक्तं भक्तानुग्रहकारणम् ।
निर्व्वाणं सेतुबन्धस्य नानारससमन्वितम् ॥
भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम् ।
कृष्णक्रीडारसस्तत्र श्रीदामादिभिरावृतः ।
त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम् ॥
चतुर्द्दशदलं प्रोक्तं सर्व्वसिद्धिप्रदायकम् ।
श्रीवनं तत्र [illegible] सर्व्वैश्वर्य्यस्य कारणम् ॥
कृष्णलीला[illegible] क्रीडाशिकामिवर्द्धनम् ।
पञ्च[illegible]दलं [illegible] तत्र लौहवनं स्मृतम् ॥
[illegible] षोडशदलं माहात्म्ये कर्णिकासमम् ।
[illegible] महावन तत्र यत्र तत्रास्ति गुह्यमन्दम् ॥
[illegible] बालक्रीडारसस्तत्र वत्सपालैः समाहृतः ।
[illegible] पूतनादिवधस्तत्र यमलार्ज्जुनभञ्जनम् ॥
[illegible] अधिष्ठाता तत्र बालगोपालः पञ्चमाब्दिकः ।
[illegible] नाम्ना दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः ॥
[illegible] प्रसिद्धमाख्यातं सर्व्वश्रेष्ठोत्तमम् ।
[illegible] क्रीडा च कृष्णस्य विहारस्तत्र वर्णिते ।
[illegible] प्रधानं कृष्णस्य दलञ्च समुदाहृतम् ॥ ०

पार्व्वत्युवाच ।

वृन्दावनस्य माहात्म्यं रहस्यं परमाद्भुतम् ।
तदहं श्रोतुमिच्छामि कथयस्व महाप्रभो ॥

ईश्वर उवाच ।

कथितं ते प्रियतमे गुह्याद्गुह्यतमोत्तमम् ।
रहस्यानां रहस्यं यद्दुर्लभानाञ्च दुर्लभम् ।
त्रैलोक्यगोप्यं [illegible] देवेश्वरपूजितम् ॥
ब्रह्मादिमुनिभिः [illegible] सुरसिद्धादिसेवितम् ।
योगीन्द्रा ध्यानमग्नास्तत्र [illegible] रम ॥
वृन्दावनं रम्यं पूर्णानन्दरसाश्रयम् ।
चिन्तामणिमयी भूमिस्तत्र [illegible] ।
[illegible] सुरद्रुमास्तत्र सुरभिवृन्दसेविताः ॥
[illegible] ज्ञानी पुरुषो विष्णुवर्द्धनो [illegible] ।

तत्र कैशोरवयसं [illegible]
मतिमांश्च वयस्यं [illegible]
सुहृदश्च [illegible]
पूर्णानन्दसुखि तथं [illegible]
प्रमत्तकोटिमुग्धादि [illegible]
कपोलयुग्मं [illegible]
सुमङ्गलसुखादि [illegible]
नानावर्णैश्च [illegible]
सु [illegible]
मन्दमारुतसंविकासित [illegible]
पूर्णेन्दुनिभाननं [illegible]
चतुःसमुन्नतिश्चैव [illegible]
कलौघयत्नादर्वविक [illegible]
पूर्णानन्दावतारं पूर्ण [illegible]
गुह्यानीतं परं धाम [illegible]
यत्र कृष्णादिरूपैः [illegible]
किं पुनर्दर्शनात् [illegible]
गोविन्दादिरूपवर्णं [illegible]
सहस्रवदनं [illegible]
तत्र कल्पवृक्षमूले [illegible]
गुह्याद्गुह्यतमं [illegible]
चतुर्वर्ग विवर्ज्जितं [illegible]
गोविन्दोद्देशे [illegible]
मुनिगणा यतः [illegible]
[illegible]
वृन्दावनविहारी [illegible]
[illegible]
[illegible]

मा गुणातीतः साक्षाद्वृन्दावनेश्वरः ।
करलीलायां वासुदेवोऽभवत् प्रभुः ॥
कामपूरणाय नित्यानां रमणाय च ।
नां विनोदाय स्वयं नन्दसुतोऽभवत् ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥
री, स्त्री (वृन्दावनस्येश्वरी ।) राधा ।

निऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
र्म्मांस्तु विज्ञेया प्राकट्येनैव पार्व्वति ! ॥
सुता या तु नित्यानन्दस्वरूपिणी ।
कान्तलीलायां श्रीः श्यामा कृष्णवल्लभा ।
श्वरी राधा साक्षात् कृष्णात्मिका परा ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥
त्रि, (अयमेषामतिशयेन वृन्दारकः
वृन्दारक + इष्ठन् । "प्रियस्थिरेति ।"
७ । वृन्दादेशः ।) अयमनयोरेषां वा
येन वृन्दारको देवो मुख्यो वा । इति
धटीकायां दुर्गादासः ॥
[स्] त्रि, (अयमनयोरतिशयेन वृन्दा-
वृन्दारक + ईयसुन् । प्रियस्थिरेति वृन्दा-
) वृन्दिष्ठः । अयमनयोरेषां वा अति-
वृन्दारकः इत्यर्थे ईयसुप्रत्ययेन निष्पन्न-
। इति मुग्धबोधव्याकरणम् ॥
य वृत्याम् । इति कविकल्पद्रुमः ॥
-पर०-सक०-सेट् ।) इर्, अवृश्चत् अव-
अत्रात् पुषादित्वान्नित्यं ङ इत्यन्ये । य,
वरं कन्या । इति दुर्गादासः ॥
(व्रश्च + "वनिदाश्युसृहमदीति ।" उणा०
४ । इति शक् ।) उन्दुरः । इति
मावली ॥ वासकः । इत्यमरटीकायां
॥
, ओषधीविशेषः । इत्युणादिकोषः ।
, (व्रश्च छेदने + "वृश्चिकृष्योः किकन् ।"
२ । ४० । इति किकन् ।) शूककीटः ।
: । सुयापोका इति भाषा । तत्पर्य्यायः ।
टकः २ । इति शब्दरत्नावली ॥ कीट-
। विछा इति भाषा । तत्पर्य्यायः ।
२ द्रोणः ३ वृषनः ४ । इति राज-
: ॥ दुणः ५ । इति शब्दरत्नावली ॥
६ अलः ७ अली ८ । इति जटा-
* । वृश्चिकविषस्य लक्षणमाह ।
विरिवाग्नि च भिनत्तीवोर्द्ध्वमाशु च ।
स्य विषं याति पश्चाद्दंशोऽवतिष्ठते ॥"
वृश्चिकदष्टस्य लक्षणमाह ।
साध्यैस्तु वृश्चिकैर्दष्टो नरः ।
पतद्भिरवधं वेदनार्त्तो जहात्यसून् ॥"
वृश्चिकैस्तेषामेवानुक्तैः । उदारादिमृ-
उदारादिकार्म्मैर्दष्टो भवति । अल्पं
मि इत्यन्वयः ॥ * । अस्य चिकित्सा ।
कस्य दलः कल्को घृतसैन्धवसंयुतः ।
यो मधुना लेपाद्वृश्चिकस्य विषं हरेत् ॥
गाय हरितसंज्ञावर्त्तदलस्य तु ।

वृश्चिकेन नरो विद्धः क्षणाद्भवति निर्व्विषः ॥"
इति भावप्रकाशः ॥ * ॥
अथ वृश्चिकविषहरमन्त्रः । ॐ सर स्फुः ह ॐ
छिलि मिलि चिलि चिलि स्फुः अव्रवी स्फुः
सर्व्वेभ्यो देवेभ्यः स्फुः । इति तन्त्रसारः ॥ * ॥
(यथा, ऋग्वेदे । १ । १९१ । १६ ।
"वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥"
"वृश्चिकस्यैतद्विषं अरसमसारं वाधकं न भवति ।"
इति तद्भाष्ये सायणः ॥ विषस्य विशेषविवरणन्तु
अत्रैव १—१६ मन्त्रेषु द्रष्टव्यम् ॥ * ॥) मेषादि-
द्वादशराश्यन्तर्गताष्टमराशिः । अस्याधिष्ठात्री
देवता वृश्चिकः । विशाखाशेषपादानुराधा-
ज्येष्ठासमुदायेनैतद्राशिर्भवति । स च शीर्षो-
दयः । श्वेतवर्णः । जलराशिः । उत्तरदिक्पतिः ।
कफप्रकृतिः । जलचरः । बहुपुत्रः । बहुस्त्री-
सङ्गः । चित्रतनुः । विप्रवर्णश्च । अस्य विशेष-
संज्ञाः । सौम्यः । अङ्गना । ब्राह्मनः । चरः ।
स्थिरः । पुष्करः । सरीसृपजातिः । ग्राम्यः ।
तद्राशिजात एतादृशो भवति । मौनी । मन्द-
गतिः । कृपालुः । कुबुद्धिः । नीचसङ्गश्च । इति
वृहज्जातकादयः ॥ * ॥ तल्लग्नजातफलम् ।
"वृश्चिकोदयसञ्जातः शौर्य्यवानतिदुष्टधीः ।
भवेद्विज्ञानसम्पन्नो विग्रही सुभगः सुधीः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
ओषधीभेदः । इति मेदिनी ॥ द्वालिकः ।
द्वालः । इति संक्षिप्तसारोणादिवृत्तिः ॥ मदन-
वृक्षः । कर्कटः । गोमयकीटः । इति भरतः ॥
अग्रहायणमासः । इति सारसुन्दरी ॥
वृश्चिकप्रिया, स्त्री, (वृश्चिकस्य प्रिया ।) पूतिका ।
इति शब्दमाला ॥
वृश्चिकर्णी, स्त्री, आखुकर्णी । इति राजनिर्घण्टः ॥
वृश्चिका, स्त्री, क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । नख-
पर्णी २ पिच्छिला ३ अलिपत्रिका ४ । अस्या
गुणाः । पिच्छिलत्वम् । अम्लत्वम् । अन्तर्वृद्धा-
दिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥
वृश्चिकाली, स्त्री, (वृश्चिकानामालिर्यत्र ।) क्षुप-
विशेषः । बिछाटी इति भाषा । तत्पर्य्यायः ।
वृश्चिपत्री २ विषघ्नी ३ नागदन्तिका ४ सर्प-
दंष्ट्रा ५ अमरा ६ काली ७ उष्ट्रधूसर-
पुच्छिका ८ । इति रत्नमाला ॥ विषाणी ९
नेत्ररोगहा १० उष्ट्रिका ११ अलिपर्णी १२
दक्षिणावर्त्तकी १३ कालिका १४ आगमा-
वर्त्ता १५ देवलाङ्गूलिका १६ करभी १७ भूरि-
दुग्धा १८ कर्कशा १९ स्वर्णदा २० शुभ्रफला २१
क्षीरविषाणिका २२ भासुरपुष्पा २३ । अस्या
गुणाः । कटुत्वम् । तिक्तत्वम् । मूत्रकृच्छ्रात-
कारित्वम् । रक्तपित्तविषस्फोटाश्मदोषहरत्वम् ।
दन्त्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वृश्चिकाली विषघ्नी तु कासमारुतनाशिनी ।"
इति राजवल्लभः ॥
वृश्चिपत्री, स्त्री, वृश्चिकाली । इति रत्नमाला ॥
वृश्चीरः, पुं, श्वेतपुनर्नवा । इति रत्नमाला ॥

वृष, उ सेचने । प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-सक०-अक० च-सेट् । क्त्वावेट् ।)
उ, वर्षित्वा वृष्ट्वा । इति दुर्गादासः ॥
वृष, क ङ प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥
(चुरा०-आत्म०-अक०-सेट् ।) क ङ, वर्षयते ।
अस्य पञ्चमस्वरानुबन्धो वैयाकरणक्रमकृत:
सुधीभिर्हेयः । चान्तेभ्यः सर्व्वत्र नित्यम् साम्प्र-
दायिकत्वात् । न च ग्रन्थानुरोधात् पाठः
इति वाच्यम् । तर्हि अनुक् यक्षौ । क ङ वञ्च
वञ्चने । वृत क ङ दीप्तौ । दिव क ङ परि-
कूजने । कदि वर्द्धे । वृष क ङ शक्तिबन्धे ।
जसक् वधेऽनादरे । इत्येषामष्टानामपि पञ्चम-
स्वरानुबन्धापत्तिः वस्तुतस्तु एषां पञ्चमस्वरानु-
बन्धः प्राचीनपठितोऽप्यनर्थः । अतएव रमा-
नाथोऽपि एतासुदनुबन्धः पूर्व्वपठितधातवो-
ऽर्थान्तरेषु चुरादयः स्युर्नत्वेते पृथग्धातव
इति ज्ञापनार्थं इत्याह । प्रजनो गर्भग्रहणं
ऐश्वर्य्यमैश्वर्य्यम् । इति दुर्गादासः ॥
वृषं, स्त्री, (वृष ऐश्वर्य्ये + कः ।) वर्द्धम् । इति शब्द-
माला ॥
वृषः, पुं, (वर्षति सिञ्चति रेत इति । वृष सेचने
+ कः ।) पुरुषगवः । एँड़े इति भाषा । तत्-
पर्य्यायः । उक्षा २ भद्रः ३ बलीवर्द्दः ४ ऋषभः ५
वृषभः ६ अनड्वान् ७ सौरभेयः ८ गौः ९ ।
इत्यमरः ॥ शृङ्गी १० ककुद्वान् ११ । इति
शब्दरत्नावली ॥ शिखी १२ गन्धमैथुनः १३
पुङ्गवः १४ । इति जटाधरः ॥ * ॥ अस्य
लक्षणादि यथा,—
"अश्विभक्तवधे शुक्ला वध्यन्तेऽन्ये चतुष्पदाः ।
गावः कृतयुगे सृष्टाः स्वयमेव स्वयम्भुवा ।
ब्रह्मक्षत्रियविट्शूद्रजातिभेदाच्चतुर्व्विधाः ॥
शुक्लाङ्गाः शुचयोऽक्रुद्धा स्त्रवः शुद्धचेतसः ।
अल्पाशिनो बहुबला वृषभा ब्रह्मजातयः ॥
द्वयोर्लक्षणसम्बन्धात् द्विजातिर्वृषभो भवेत् ।
त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ॥
पीताङ्गा स्तब्धः शुद्धा अक्रोधा भारवाहिनः ।
यदृच्छाभोजिनः चीरा वृषभा वैश्यजातयः ॥
कृष्णाङ्गाः क्रूरहृदया अपवित्राः महाशिनः ।
एवंवृषपरीषास वृषभाः शूद्रजातयः ॥
द्वयोर्लक्षणसम्पर्कात् द्विजातिर्वृषभो भवेत् ॥" * ॥
वाक्यन्तु ।
"एष्वोंसहे सतत्पन्ना गवाश्वा ये चतुष्पदाः ।
गुणत्रयविभेदेन तेषां भेदत्रयं भवेत् ।
तल्लक्षणानुसारेण भोजः प्राह महीपतिः ॥
ये शुक्लाः शुचयः शुद्धा भद्रं भारवहा अपि ।
महाशिनः स्वल्परोषाश्च वृषाः सात्त्विका
मताः ॥
यत्रालस्यदयः शुद्धा दृढा भारवहाः शुभाः ।
महाशिनो बहुबलाः वृषा राजसा मताः ॥
विदर्द्धा विकृताङ्गाश्च निर्व्वला मन्दभोजिनः ।
अनर्हिता हरद्राताल वृषास्तामसा मताः ॥
लक्षणद्वयसम्बन्धात् द्विगुणो वृषभो भवेत् ।

त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ।”७।

अथ गुणाः ।

“नीलः शुभो ध्वजो वामः क्षेमो भद्रः शिवः

स्थिरः ।

भोजदेवेन लिखिता इत्यष्टौ वृषभे गुणाः ।”

तद्यथा,—

“श्वेतादन्यतरो वर्णः श्वेतः खुरविषाणयोः ।

ललाटपुच्छयोः श्वेतः स नीलः शुभमावहेत् ॥१॥

यो वृत्तपृष्ठो रम्यात्मा सुविभक्ततनुः शुभः ।

कुरुते धनवृद्धिं स दीर्घमुष्को यदा स्वयम् ॥२॥

वर्णैस्तु बहुभः पुच्छो रम्यश्च ध्वज उच्यते ।

भर्त्तुः कुलं धनं धान्यं विवर्द्धयति निश्चयम् ॥३॥

पूर्व्वार्द्धे चोन्नतो यस्तु परार्द्धे चैव नीचकः ।

निर्द्दोषो वाम इत्येष कुरुते रिपुसंक्षयम् ॥४॥

चन्द्रकं दृश्यते यस्य ललाटे देवनिर्म्मितम् ।

क्षेमनामा वृषः कुर्य्याद् धनधान्यविवर्द्धनम् ॥५॥

आवर्त्ताश्च शुभा यस्य शुक्तयश्चापि वा शुभाः ।

भद्रनामा वृषः कुर्य्यात् भर्त्तुः सर्व्वार्थसाधनम् ॥

६ ॥

आवर्त्तशुक्तिविज्ञानं ज्ञेयेषु वृषभेष्वपि ।

पादाः सर्व्वे सिता यस्य पुच्छभालौ सितौ तथा ।

महोच्चा चायते नेत्रे कर्णौ चातिलघू स्थिरौ ।

मुष्कयोः क्षयता चैव श्रृङ्गे चातिशुभे दृढ़े ॥

तनुरोमा महावेगः स्निग्धगम्भीरनिस्वनः ।

शिव इत्येव कथितः शिवं प्रकुरुते ध्रुवम् ॥७॥

चरणाः पञ्जराः स्थूलाः शिरः शुभ्रं भवेत्तनुः ।

आपुच्छादायता शुभ्रा रेखा मस्तकगामिनी ॥

रक्तताल्वोष्ठजिह्वस्तु स्थिरः क्षेमङ्करः श्रियाः ।

नात्यपुण्येन लभ्योऽयं वृषभः शुभलक्षणः ।”८।

गर्गेस्तु ।

“महत्त्वं तनुलोमत्वं पृष्टता भारवाहिता ।

कुमारकत्वमित्येते वृषभाणां गुणा मताः ।”*।

अथ दोषाः ।

“खञ्जो विवर्णो विषमः श्वित्री धूम्रश्चलः खरः ।

एते सप्त महादोषा वृषभाणामुदीरिताः ॥

विषाणौ विषमौ यस्य खुराश्च विषमास्तथा ।

नेत्रकान्तिरथवा गात्रे पञ्जरे वैकृतं भवेत् ।

खञ्ज इत्येष कथितो धनधान्यविनाशनः ॥१॥

पूर्व्वार्द्धमन्यवर्णन्तु परार्द्धं चान्यवर्णकम् ।

एष क्रोडो विवर्णो वा त्रिवर्णः कुलनाशनः ॥२॥

परार्द्धमुन्नतं यस्य पूर्व्वार्द्धञ्चातिनीचकम् ।

गच्छतश्चरणौ श्लथौ शब्दायेते खरस्वरः ।

विषमो नाम वृषभः सम्पत्तिक्षयकारकः ॥३॥

हिमकुन्देन्दुसङ्काशा गात्रेषु लोमबिन्दवः ।

श्वित्री नाम महादोषो दूरतस्तं परित्यजेत् ॥४॥

स्कन्धाग्रे दीपिकाकारं ज्वलते कैकरे दृशौ ।

कपिलः पुच्छभागश्चेत् स धूम्रो मृत्युमावहेत् ॥५

दन्तश्रृङ्गखुरादीनां यद्येकोऽपि चलेत् स्वयम् ।

मुष्को वा चलते यस्य स चलः कुलनाशनः ॥६॥

आवर्त्ताः शुक्तयो रेखा त्रिषमाश्च विसंस्थिताः ।

न्यूनाधिकाः पञ्जरास्तु खुरास्तु विषमास्तथा ।

गुदाच्छिद्रान्तरे यावद्रेखा चर्क्रैव दृश्यते ।

विज्ञेये विषमे चोभे जिह्वा नैवासिता भवेत् ।

स खरो दूरतस्त्याज्यो भर्त्तुः सर्व्वार्थनाशनः ॥

७ ॥

महत्ता दीर्घरोमत्वं पीनता भारवाहिता ।

अङ्गत्वं मारकत्वञ्च वृषदोषा उदाहृताः ॥ * ॥

प्रभावादिभिर्निर्द्दिष्टेन चत्वारो ये वृषा मताः ।

चतुर्भिर्धान्ता नीलाद्याः न तत्र स्युः शुभावहाः ॥

यो नीलादन्यजातीयं कुरुते वृषभं नरः ।

तस्य नश्यन्ति वित्तानि धनमायुः कुलं बलम् ॥

वातपित्तकफोद्रेका व्याधयो ये वृषे मताः ।

तेषामुपशमः कार्य्यो यथाशास्त्रं विधिना बुधैः ।”

इति वृषभदोषाः । इति भोजराजकृतयुक्ति-

कल्पतरुः ॥ * ॥ अथ लक्षणं उक्तमंशस्त्रिविध

यथा,—

मनुरुवाच ।

“भगवन् श्रोतुमिच्छामि वृषभस्य च लक्षणम् ।

वृषोत्सर्गविधिश्चैव तथा पुण्यफलं महत् ॥

मत्स्य उवाच ।

धेनुमादौ परीक्षेत सुशीलां लक्षणान्विताम् ।

अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीम् ॥

स्निग्धवर्णां स्निग्धखुरां स्निग्धश्रृङ्गां तथैव च ।

मनोहराकृतिं सौम्यां सुप्रमाणामदुष्टताम् ॥

आवर्त्तैर्द्दक्षिणावर्त्तैर्युक्ता दक्षिणतश्च या ।

वामावर्त्तैर्वामतश्च शिलोर्ध्वतश्च या तथा ॥

मृदुसंहतताम्रोष्ठीं रक्तजिह्वां सुपूजिताम् ।

अश्यावदीर्घस्फुटिता रक्तजिह्वा तथा च या ॥

असंश्लिष्टनेत्रा च नखैरविरलैर्दृढैः ।

वैदूर्य्यमधुवर्णैश्च जलबुद्बुदसन्निभैः ॥

रक्तस्निग्धैश्च नयनैस्तथा रक्तकनीनिकैः ।

सप्त चतुर्द्दश दन्तास्तथा चाश्यामतालुका ॥

षडुन्नता समाश्रोरू पृथु पञ्च समायताः ।

अष्टायतशिरोग्रीवाधराश्वसुलक्षणा ॥

मनुरुवाच ।

षडुन्नताः के भगवन् ! के च पञ्च समायताः ।

आयताश्च तथैवाष्टौ धेनूनां के शुभावहाः ॥

मत्स्य उवाच ।

उरः पृष्ठं शिरः कुक्षिः श्रोणी च वसुधाधिप ।

षडुन्नतानि धेनूनां पूजयन्ति विचक्षणाः ॥

कर्णनेत्रललाटञ्च पञ्च भास्करनन्दन ! ।

समायतानि शस्यन्ते पुच्छं सास्ना च सक्थिनी ॥

चत्वारश्च समा राजन्नेवमष्टौ मनीषिभिः ।

शिरोग्रीवायताश्चेति भूमिपाल स्मृता इयम् ॥

तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितम् ।

उन्नतस्कन्धककुदन्ऋजुलाङ्गूलकम्बलम् ॥

महाकटितटस्कन्धं वैदूर्य्यमणिलोचनम् ।

प्रवालगर्भश्रृङ्गाग्रं सुदीर्घपृथुवालधिम् ॥

नवाष्टदशसंख्यैर्वा तीक्ष्णाग्रैर्द्दशनैः शुभैः ।

मल्लिकाक्षश्च नीलश्च यद्येऽपि धनधान्यदः ॥

वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्यते ।

श्वेतो रक्तश्च कृष्णश्च गौरः पाटल एव च ॥

भद्रियस्तत्पृष्ठश्च शबलः पञ्चकालकः ।

पृथुकर्णो महास्कन्धः मृदुरोमा च यो भवेत् ॥

रक्ताक्षः कपिलः स्व (३०)

नीलोदरः सम्पूर्णो

त्रिवारतिन वर्द्धन

काञ्चनामेन

यस्य ग्रासार्थे श्रृङ्गे

सर्व्वगामेव वर्ण्यते

मार्ज्जारपादः कपि

नीलोमार्गोदरास्तु यो

कटः त्रिकृष्णश्चैव

सर्व्वपादसितो

कपिलपविमो

आकर्णपूर्णात्

मन्दीमुखः स त्रिविधो

श्वेतश्च जठरं यस्य गौरः

वृषभः स

मल्लिकाक्षः

कर्म्मणैमेघनेत्राणि

अतसीपुष्पवर्णस्तु तथा

एते धन्यास्तथाश्यान्

अथ लक्ष्यौ वृषाश्च

आहूयश्चतर्वाश्च

कृष्णः काकास्यश्च

त्रिपमश्चैतनादाश्च

केते वृषाः

नीलश्चापाश्च धाम्याश्च

स्वस्तिकाकारश्रृङ्गाश्च

महाप्रमाणश्च तथा

शिरः कर्णौ ललाटञ्च बालधिश्च

नेत्रे पार्श्वे च कृष्णानि यस्य

श्वेतान्येतानि शस्यन्ते कृष्णस्तु

भूमौ कर्षति लाङ्गूलं

पुरस्तादुन्नतो नीलः

शुक्तिश्च सुपताकाभा येषां

अनडुहस्ते धन्या विवर्द्धय

प्रदक्षिणं निवर्त्तन्ते स्वयं

समुन्नतशिरोग्रीवा

रक्तश्रृङ्गाग्रनयनः श्वेतवर्णो

सर्व्वैः प्रवालसदृशैर्वापि

एते धार्य्याः प्रयत्नेन नीलः

धारिता यदि वा सम्यक्

चरयानि सुखं पुच्छं यस्य

लाक्षारससवर्णश्च तनौ

वृष एव स नीलस्यो

तद्धर्म्मेवाचरति लोके

एष्टव्या बहवः पुत्रा यद्येकोऽपि

गौरीं वाप्युद्वहेद्भार्य्यां नीलं वा

एव वृषं लक्षणसंयुतं

यद्योमिनं नौलवापि

सुक्ता न शोचेन्मरणं महात्मा
मोचे मतिश्चाहमतोऽभिधास्ये ॥”
...नान्से वृषभलक्षणं नाम १८१ अध्यायः ॥
...नार्थमागतवृषस्य निवारणे दोषो यथा,
...तृष्णाभिभूतानां पानार्थमभिधावताम् ।
...णयो भवेद्यस्तु स भवेद्ब्रह्मघातकः ॥”
इति कर्मलोचनम् ॥ * ॥
...दानविधिर्यथा,—
वशिष्ठ उवाच ।
...धरो दरिद्रो वा करोति विधिना नृप ।
सर्व्वगुणोपेतं तच्छृणुष्व यथातथम् ॥
...दशत्रिपलान्तश्च वृषं कृत्वा विधानतः ।
...न्नाथवा दद्याच्छक्तितो नृपसत्तम ॥
...ा धेनवः प्रोक्ता वृषास्तावन्त एव हि ।
...ीति नियोज्याः सुवर्णाय च तथा वृषाः ॥
...भावात्ततो राजन् तिलपात्राणि नित्यशः ।
...पापविनाशाय दीयन्ते नृपसत्तम ॥
...येन समालिप्य यवचूर्णसमावृते ।
...हैममयं तत्र रौप्यं वा रत्नसंयुतम् ॥
...नीलमयैः शृङ्गैर्मौक्तिकाश्चिक्षयो रदाः ।
...शिच्छुभवच्चापि विद्रुमौष्ठौ सुनासिका ॥
...कतौ विनिर्द्दिष्टा कर्णौ चैवासकौ मतौ ।
...गस्य वै पादाः खुरा रौप्यमयास्तथा ॥
...तान्यस्य रोमाणि चामवस्त्रेण कम्बलम् ।
॥ पुच्छमुद्दिष्टं सर्व्वेषामप्ययं विधिः ॥
...ी स्फटिकस्यापि लिङ्गे मणिः प्रकीर्त्तितः ।
...धेनुस्तथानड्वान् सुवर्णस्य तु कारयेत् ॥
...षां फलमाप्नोति धेनूनां वृषभप्रदः ।
...: स विभवाद्दानं भक्त्या यः प्रतिपादयेत् ॥
...स्याप्यशक्तौ हि तदनन्तफलं स्मृतम् ।
...ौ वाप्येवमेवं हि कृत्वा व्रतमतन्द्रितः ।
...लं समवाप्नोति स्वल्पदानान्न संशयः ॥”
इति वह्निपुराणे वृषदानाध्यायः ॥ * ॥
...नफलं यथा,—
...न्यादानं वृषोत्सर्गं तीर्थसेवां श्रुतं तथा ।
...कुर्व्वन्ति गृहस्थास्तु न वै तद्विषयोपगाः ॥”
इति तत्रैव कन्यादाननामाध्यायः ॥ * ॥
...पे च ।
ब्रह्मोवाच ।
...षणावौ समादाय युवानौ लक्षणान्वितौ ।
...शृङ्गौ शुक्ले दंष्ट्रे सवत्सौ पूजयेन्मुने ! ॥
...षोमां पूजयित्वा तु तद्दिने यः प्रयच्छति ।
...षभक्ताय विप्राय रोहिण्यां वा मृगेऽथ वा ॥
...वियोगो भवेत्तस्य सुतपत्नीपतेः कृतः ।
...तरं हंसवैमानैर्गच्छेच्छिवपुरं द्विज ॥
...भोगांश्चिरं भुक्त्वा इह आगत्य जायते ।
...ढौ धनधान्याभ्यां पुत्त्रमित्रसमाकुलः ॥
...वा रत्नसमायुक्तं गोयुगं पूजयेन्मुने ।
...यच्छति शिवोमा च प्रीयेतां भावितात्मनः ॥
...सर्व्वपापदुःखाभ्यां विमुक्तः क्रीडते सदा ।
...च लोके भवेद्धन्यो देहान्ते परमं पदम् ॥”
इति देवीपुराणे गोरत्नदाननामाध्यायः ॥ * ॥

शिववृषकारणं यथा,—
श्रीकृष्ण उवाच ।
“अथ गर्व्वान्वितो रुद्रो हन्तुं त्रिपुरमुल्वणम् ।
मत्वा मनसि संहर्त्ता सर्व्वेषां जगतामिति ।
कोऽयं पतङ्गवद्दैत्य इति मत्वा ययौ रणम् ।
विहाय शूलं मद्दत्तं मदीयं कवचं परम् ॥
चिरं बभूव समरं वर्षमेकं दिवानिशम् ।
न कोऽपि जेतुं कं शक्तो द्वौ समौ समरे सदा ॥
दृषिघाश्च रथं कृत्वा दैत्येन्द्रो मायया प्रिये ।
अत्यूर्द्ध्वं समुत्तस्थौ पञ्चाशत्कोटियोजनम् ॥
उत्तस्थौ शङ्करस्तूर्णं हन्तुं दैत्यं जगत्प्रभुः ।
जघान मुष्टिना रुद्रो दानवेन्द्रं प्रकोपतः ॥
वज्रमुष्टिप्रहारेण सद्यो मूर्च्छामवाप सः ।
क्षणेन चेतनां प्राप्य कोपाद्दानवपुङ्गवः ।
शिवं सयानमुत्तोल्य पातयामास भूतले ॥
तदाहं कलया शीघ्रं वृषरूपं विधाय च ।
सयानं शङ्करं धृत्वा विषाणाभ्यामुदक्रमम् ।
ददौ तस्मै स्वकवचं स्वशूलमरिमर्द्दनम् ॥
मया दत्तेन शूलेन जघान त्रिपुरं हरः ।
मामेव दर्पहन्तारं तुष्टाव व्रीडितः पुनः ॥
तत्याज शङ्करो दर्पं विमदीनं ततो विभुः ।
ज्ञानानन्दस्वरूपश्च निर्लिप्तः सर्व्वकर्म्मसु ॥
ततोऽहं वृषरूपेण वहामि तेन तं प्रियम् ।
मम प्रियतमो नास्ति त्रैलोक्येषु शिवात् परः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥
मेषादिद्वादशराश्यन्तर्गतद्वितीयराशिः । तत्पर्य्यायः । तावुरिः २ । अस्य विशेषसंज्ञा । सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः । पुष्करः । अयं चतुष्पात् । निशासु गाम्यः । दिवा वन्यः । ह्रस्वाख्यः । दक्षिणदिक्पतिः । निशाख्यः । पृष्ठोदयाख्यः । अस्याधिष्ठात्री देवता वृषः । कृत्तिकापादत्रयरोहिणीसमुदायमृगशिरोऽर्द्धेनैतद्राशिर्भवति । स च शीलस्वभावः । सुन्दरभूमिस्वामी । वातप्रकृतिः । श्वेतवर्णः । वैश्यजातिः । महाशब्दकरः । मध्यमस्त्रीसङ्गः । मध्यमसन्तानश्च । एतद्राशिजात एतादृग्भवति । दाता । वाग्दुःस्वरः । निर्भयः । परदाराभिलाषी । इति वृहज्जातकादयः ॥ * ॥
एतद्राशिजातफलम् ।
“स्थिरमतिं सुमतिं कमनीयतां
कृशलतां हि तृणासुपभोगताम् ।
वृषगतो हिमगुर्भृशमादिशेत्
सुकृतिनः कृतिनश्च सुखान्यपि ॥” * ॥
तल्लग्नजातफलम् ।
“वृषलग्ने भवेज्जातो गुरुभक्तः प्रियंवदः ।
शुची कृती धनी लुब्धः शूरः सर्व्वजनप्रियः ॥”
इति कोष्ठीप्रदीपः ॥ * ॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । (यथा,—
“पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम् ॥”
इति रतिमञ्जरी ॥)

तस्य लक्षणं यथा,—
“बहुगुणबहुबन्धः शीघ्रकामी नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥”
इति च रतिमञ्जरी ॥ * ॥
एकादशमन्वन्तरीयेन्द्रः । यथा,—
“धर्म्मपुत्त्रस्य वै पुत्त्रान् वक्ष्याम्येकादशस्य तु ।
सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरुर्गुरुः ॥
क्षत्त्रवृद्धा दृढायुश्च आर्द्रकः पुत्त्रकस्तथा ।
विहङ्गमाः कामगमा निर्माणरुचयस्तथा ॥
एकैकस्त्रिंशकस्तेषां गणाश्चेन्द्रश्च वै वृषः ।
दशग्रीवो रिपुस्तस्य स्त्रीरूपी घातयिष्यति ॥”
इति गारुडे ८७ अध्यायः ॥
(कामान् वर्षतीति । वृष + कः ।) धर्म्मः । (यथा, मनुः । ८ । १६ ।
“वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्देवास्तस्माद्धर्म्मं न लोपयेत् ॥”)
शृङ्गी । उत्तरपदस्थश्चेत् श्रेष्ठः । (यथा, हरिवंशे । १४१ । ३८ ।
“शारदं वर्षणं यद्वत् सहेद्वीरो गवांपतिः ।
तद्वद्युद्धवृषः सेहे बाणवर्षमरिन्दमः ॥”)
मूषिकः । शुक्लः । वास्तुस्थानभेदः । इति मेदिनी ॥ वासकः । इति विश्वः ॥ श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ शत्रुः । इति जटाधरः ॥ कामः । बलवान् । इत्यनेकार्थकोषः ॥ ऋषभनामौषधम् । इति राजनिर्घण्टः ॥ (पतिः । यथा, काशीखण्डे ।
“स्ववृषं या परित्यज्य परवृषे वृषायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ॥”)

वृषकर्णी, स्त्री, सुदर्शना । इति रत्नमाला ॥ सुदर्शनगुलञ्च इति भाषा ॥

वृषगन्धा, स्त्री, (वृषस्य गन्धो यस्याः ।) वस्तान्त्री । इति राजनिर्घण्टः ॥

वृषचक्रं, क्ली, (वृषाकारं चक्रम् ।) कृषिकर्म्मोक्तवृषाकारचक्रम् । यथा,—
“वृषचक्रं वृषाकारं सर्व्वावयवसंयुतम् ।
लिखित्वा विन्यसेद्भानि वृषनामर्क्षपूर्व्वकम् ॥
मुखाश्रिकर्णशीर्षेषु शृङ्गे स्कन्धे द्विकं द्विकम् ।
श्रोणि पृष्ठे द्वयं पुच्छेऽष्टौ पादे तूदरे त्रिकम् ॥
हलप्रवाहणेऽभ्यासे प्रारम्भादिदिनर्क्षकम् ।
यदङ्गेषु स्थितं तस्माद्वक्ष्ये गर्भे शुभाशुभम् ॥
आस्ये हानिः सुखं नेत्रे कर्णे भिक्षाटनं तथा ।
शीर्षे धृतिस्तथा शृङ्गे सौख्यं स्कन्धे च सङ्गमम् ॥
पृष्ठे वरं शुभं पुच्छे भ्रमः पादे सुखं हृदि ।
चन्द्रयोगादिदं प्रोक्तं वृषचक्रं फलं बुधैः ॥”
इति ज्योतिस्तत्त्वम् ॥

वृषणः, पुं, अण्डकोषः । इत्यमरः ॥ तस्य लक्षणं यथा,—
“स्थूलशिश्नो दरिद्रः स्याद्दुःस्थैकवृषणो भवेत् ।
विषमे स्त्रीचपलो वै नृपः स्याद्वृषणे समे ।
प्रलम्बवृषणोऽल्पायुर्निर्द्धनो नातिभिर्भवेत् ॥”
अपि च ।
“नलान्त रक्तपदो वृषणाभ्यां नरः श्रियम् ।

समाभ्यां चितिपः प्रोक्तः प्रलम्बेन समान्वितः।"
इति गारुडे १९१।६५ अध्यायौ ।

वृषणकच्छूः, स्त्री, (वृषणस्य कच्छूः ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा,—
"स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः ।
प्रक्लिद्यते यदा स्वेदात् कण्डूं जनयते तदा ॥
ततः कण्डूयनात् क्षिप्रं स्फोटः स्रावश्च जायते ।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम् ॥
उत्सादनं उद्वर्त्तनम् । मल, मैल इति लोके । प्रक्लिद्यते आर्द्रो भवति ॥ * ॥ तच्चिकित्सा यथा,—
"सर्ज्जाब्दकुष्ठसैन्धवसितसिद्धार्थैः प्रकल्पितो योगः ।
उद्वर्त्तनेन नियतं शमयति वृषणस्य कच्छूतिम् ॥
भिषग्वृषणकच्छून्तु चिकित्सेत् पामरोगवत् ।
व्याधिपूतननिर्द्दिष्टक्रिययापि च तां हरेत् ॥"
इति भावप्रकाशः ॥

वृषणश्वः, पुं, इन्द्रस्य घोटकः । इति त्रिकाण्डशेषः ॥ (एतन्नामकनृपविशेषः । यथा, ऋग्वेदे । १ । ५१ । १३ ।
"मेनाभवो वृषणश्वस्य सुक्रतो ।"
"वृषणश्वस्य एतन्नाम्नः राज्ञः मेनाभवो मेनानाम कन्या भूः ।" इति तद्भाष्ये सायणः ॥ * ॥ सेचनसमर्थाश्वयुक्ते, त्रि । यथा, ऋग्वेदे । ८ । २० । १० ।
"वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।"
"वृषणश्वेन वृषभिः सेचनसमर्थैरश्वैरुपेतेन ।"
इति तद्भाष्ये सायणः ॥)

वृषण्वसु, स्त्री, इन्द्रस्य धनम् । इति जटाधरः ॥ (त्रि, वर्षणकर्त्ता । यथा, ऋग्वेदे ।२।४१।८।
"न यत्परो नान्तर आदधर्षद्वृषण्वसू ।"
"वृषण्वसू हे धनस्य वर्षितारौ ।" इति तद्भाष्ये सायणः ॥)

वृषदंशकः, पुं, (वृषं मूषिकं दशतीति । दंश + ण्वुल् ।) विडालः । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
"विपदि युक्तं वृषदंशकवदने ।")

वृषध्वजः, पुं, (वृषो ध्वजो वाहनं यस्य ।) शिवः । इत्यमरः ॥ (यथा, काव्यादर्शे २ स्वभावाख्याने ।
"जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः ॥")
हेरम्बः । पुण्यकर्म्मा । इति विश्वः ॥

वृषध्वाङ्क्षी, स्त्री, नागरमुस्ता । इति राजनिर्घण्टः ॥

वृषनाशनः, पुं, (वृषस्य नाशनं यस्मात् ।) विडङ्गः । इति शब्दमाला ॥

वृषपतिः, पुं, (वृषस्य पतिः ।) षण्डः । शिवः । इति केचित् ॥

वृषपत्रिका, स्त्री, वस्तान्त्री । इति राजनिर्घण्टः ॥

वृषपर्णी, स्त्री, (वृषस्य मूषिकस्य कर्ण इव पर्णं यस्याः । ङीष् ।) आखुपर्णी । इति रत्नमाला ॥
वृन्तविशेषः । पुरानी इति भाषा । तत्पर्यायः । दध्यानी १ चक्राङ्गी २ सुदर्शना ३ । इति राजनिर्घण्टः ॥

वृषपर्व्वा, [न्] पुं, शिवः । दैत्यभेदः । (यथा, महाभारते । १ । ६० । २६ ।
"वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महासुरः ।"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम् ॥ * ॥) भृङ्गराजः । कशेरुः । इति विश्वः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ३१ ।
"वृषाही वृषभो विष्णुर्वृषपर्व्वा वृषोदरः ।"
राजविशेषः । यथा, मार्कण्डेयपुराणे ।१३३।५।
"जग्राह नरराजस्य सकाशाद्वृषपर्व्वणः ।")

वृषभः, पुं, (वृष सेचने । वृष + "ऋषिवृषिभ्यां कित् ।" उणा० ३ । १२३ । इति अभच् । स च कित् ।) वृषः । (यथा, मनौ । ९ । ५० ।
"यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।")
श्रेष्ठः । (यथा, महाभारते । १ । ११ । ८० ।
"सृञ्जयैः सह कैकेयैर्ख्यातो वृषभश्च च ।")
वैदर्भीरीतिभेदः । इति मेदिनी ॥ व्याधिभित् । इति हेमचन्द्रः ॥ कर्णरन्ध्रम् । ऋषभनामौषधम् । इत्युणादिकोषः ॥ * ॥ (चतुर्व्विधपुरुषान्तर्गतपुरुषविशेषः । यथा,—
"शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ।"
इति रतिमञ्जरी ॥)
गोशब्दे अलिखनात् प्रसङ्गादत्र व्यासोद्देशिक-गोहत्या लिख्यते ।
"ग्रामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत् ।
याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत् सः ॥
दण्डैर्गास्ताडयन्मूढो यो विप्रो वृषवाहनः ।
दिने दिने गवां हत्यां लभते नात्र संशयः ॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् ।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम् ॥
वृषलीपतिं याजयेद्यो भुङ्क्तेऽन्नं तस्य यो नरः ।
गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥
पादं ददाति वह्नौ यो गाश्च पादेन ताडयेत् ।
गृहं विशेदधौताङ्घ्रिः स्नात्वा गोवधमालभेत् ॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च ।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद्ध्रुवम् ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम् ॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः ।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद्ध्रुवम् ॥
स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या ।
कटूक्त्या ताडयेत् कान्तं सा गोहत्यां लभेद्ध्रुवम् ।
गोमार्गं खननं कृत्वा ददाति शस्यमेव च ।
तडागे वा तदूर्द्ध्वे वा स गोहत्यां लभेद्ध्रुवम् ॥
प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम् ।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेद्ध्रुवम् ॥
राजके दैवके यत्नाद्गोस्वामी गां न पालयेत् ।
दुःखं ददाति ...
प्राणिनं ताडयेद् यो हि ...
नैवेद्यं पूजनञ्च न ...
गण्डमालाकृतिं यो वा ...
द्विपदी गुरवो न मोदते ...
देवमायतिमां दृष्ट्वा सुरं ...
न गच्छमाज्ञनेद्यो हि ...
न ददात्याश्रितं ...
पिण्डार्थिने च विद्यार्थ ...
गोहत्या ब्रह्महत्या च ...
यथा पुरं सूर्य्यवन्तं ...
इति ब्रह्मवैवर्त्ते ...

वृषभगतिः, पुं, (वृषभेण गच्छति ।) ...
हारावली ॥

वृषभध्वजः, पुं, (वृषभः ध्वजो ...
शिवः । इति केचित् ॥ (यथा, कु...
"अमुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽसौ वृषभध्वजेन ।"

वृषभाक्षी, स्त्री, इन्द्रवारुणी । ...

वृषभानुजा, स्त्री ।

वृषभानुः, पुं, सुरभानुपुत्र ...
यथा,—
"सुचन्द्रो वृषभानुश्च ...
पद्मावत्याश्च जठरे सुरभानस्य ...
जातिस्मरो हरेरंशः ...
नवद्वादशे तत्र प्रजगौ ...
कलावती कान्यकुब्जे बभूवास्य ...
जातिस्मरा महासाध्वी सुन्दरी ।

कान्यकुब्जे वृषभेशो भलन्दन ...
स तां संप्राप्य धीमान् ...
कृत्वा यदपि राजेन्द्र ...
मालावती सुतं ...
ददर्श नन्दः पथि तौ ...
नन्द उवाच ।
शृणु राजेन्द्र वक्ष्यामि विशेषतः ...
सम्बन्धं कुरु कन्याया ...
सुरभानसुतः श्रीमान् वृषभानुः ...
नारायणांशो गुणवान् ...
कन्या तेऽयोनिसम्भूता ...
त्रैलोक्यमोहिनी शान्ता ...
स च योग्यस्तद्दुहितुस्तथैव ...
भलन्दन उवाच ।
सम्बन्धो हि विधिकृतो न ...
प्रजापतिर्योगकर्त्ता जगत्ताते ...
वृषभानुप्रिया धात्रा लिखिता ...
पुरा भूतैव को वाहं केनापि ...
कृपाशुक्लासमादाय व्रजश्रेष्ठो ...
गत्वा स कथयामास सुरभान ...
सुरभानश्च यत्नेन नन्देन ...
सम्बन्धं योजयामास गान्धारा ...
वृषभानुर्मुदा युक्तः प्राप्य ...

निष्कृते रम्ये बुबुधे न दिवानिशम् ।
कन्या च कालेन राधिका या बभूव ह ।
श्रीदामशापेन श्रीकृष्णस्याज्ञया पुरा ॥
नसम्भवा सा च कृष्णप्राणाधिका सती ॥"
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥
, स्त्री, (वृषेण धर्म्मेण भासते इति । भास
त् । स्त्रियां टाप् ।) अमरावती । इति
ण्डशेषः ॥
, (वृ + "वृषादिभ्यः कित् + "उणा० ४ ।
इति कयन् युगागमश्च ।) व्याश्रयः ।
ादिकोषः ॥
, सज्जनः । शूद्रः । (यथा, मनौ । ४ ।
।
ातेन समं गच्छेन्नैको न वृषलैः सह ॥"
नामनिरुक्तिर्यथा, तत्रैव । ८ । १६ ।
हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
तं विदुर्देवास्तस्माद्धर्म्मं न लोपयेत् ॥")
मराजः । वाजी । इति मेदिनी ॥
र्म्मिकः । इति जटाधरः ॥
जः, त्रि, (वृषलस्यात्मजः ।) अधार्म्मिक-
। इति केचित् ॥ शूद्रोद्भवश्च ॥
स्त्री, पितृगृहे अविवाहिता रजस्वला
। यथा । अत्रिकाश्यपौ ।
र्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
त्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥"
इत्युद्वाहतत्त्वम् ।
ं परित्यज्य या परपतिगामिनी । यथा,—
यं या परित्यज्य परस्मै वृषायते ।
सा हि विज्ञेया न शूद्री वृषली भवेत् ॥"
इति काशीखण्डः ।
स्य भार्य्या । ङीप् ।) शूद्री च ॥ (यथा,
निर्व्वाणतन्त्रे । १ । ४० ।
भोजिनः क्रूरा वृषलीरतिकामुकाः ॥")
तः, पुं, (वृषल्याः पतिः ।) वृषलीविवाह-
। यथा,—
तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
हेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥"
इत्युद्वाहतत्त्वम् ।
शूद्रां व्रजेत् विप्रो वृषलीपतिरेव सः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥
नः, पुं, (वृषस्य लोचने इव लोचने यस्य ।)
कः । इति हेमचन्द्रः ॥ वृषनयने, स्त्री ॥
नः, पुं, (वृषो वाहनं यस्य ।) शिवः । इति
म् ॥
, पुं, (वृषस्यासुरविशेषस्य शत्रुः ।)
। इति त्रिकाण्डशेषः ॥
, [न्] पुं, भृङ्गरोलः । इति शब्दमाला ॥
, स्त्री, (वृषं नरं शुक्रं वा इच्छति
ाय । वृष + "सुप आत्मनः क्यच् ।" ३ ।
८ । इति क्यच् । "अश्वक्षीरेति ।" ७ । १ ।
। इति सुगागमः । ततः । "लटः शतृ-
चाविति ।" ३ । २ । १२४ । इति शतृ ।
"उगितश्च ।" ४।१।६ । इति ङीप् ।) कामुकी ।
इत्यमरः ॥ वृषेण जन्तुमिच्छन्ती गौः । इति
व्याकरणम् ॥ तथा च ।
"लज्जयं सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथमानमतिः पुनः ॥"
इति भट्टिः ॥
वृषा, स्त्री, मूषिकपर्णी । इत्यमरः ॥ कपिकच्छूः ।
इति हेमचन्द्रः ॥
वृषा, [न्] पुं, (वर्षतीति । वृष सेचने + "कनिन्
युवृषितक्षीति ।" उणा० १ । १५६ । इति
कनिन् ।) इन्द्रः । (यथा, रघुः । १० । ५२ ।
"प्राजापत्योपनीतं तत् अन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥")
कर्णः । वेदनाज्ञानम् । दुःखम् । इति मेदिनी ॥
वृषः । (यथा, ऋग्वेदे । १० । ४३ । ८ ।
"वृषा न क्रुद्धः पतयत् रजःसु ॥"
"रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन्
प्रतिवृषभवधाय पतयत् गच्छति ।" इति तद्-
भाष्ये सायणः ॥) घोटकः । इति हेमचन्द्रः ॥
(यथा, ऋग्वेदे । ७ । ६९ । १ ।
"आवां रथो रोदसी बद्बधानो
हिरण्ययो वृषभिर्यात्वश्वैः ॥"
"हे अश्विनौ वां रथो वृषभिः युवभिरश्वैर्युक्तः
समायातु ।" इति तद्भाष्ये सायणः ॥ पिता ।
यथा, ऋग्वेदे । ७ । २० । ५ ।
"वृषा जजान वृषणं रणाय ॥"
"वृषा सेक्ता पिता कश्यपो वृषणं कामानां
वर्षितारमिन्द्रम् ।" इति तद्भाष्ये सायणः ॥
त्रि, वर्षकः । यथा, ऋग्वेदे । १० । ६७ । ७ ।
"ब्रह्मणस्पतिर्वृषभिर्वराहैः ॥"
"वृषभिर्वर्षिष्ठभिर्वराहैर्वराहारैः ।" इति तद्-
भाष्ये सायणः ॥)
वृषाकपायी, स्त्री, (वृषाकपेः विष्णोः शिवस्य अथे-
न्द्रस्य वा भार्य्या । वृषाकपि + "वृषाकप्यग्नीति ।"
४।१।३७। इति ङीप् । ऐकारादेशश्च ।) लक्ष्मीः ।
गौरी । इत्यमरः ॥ स्वाहा । इति भरतः ॥
शची । इति स्वामी ॥ (यथा, ऋग्वेदे । १० । ८६ । १३ ।
"वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।"
"हे वृषाकपायि कामानां वर्षकत्वादभीष्टदेश-
गमनाच्चेन्द्रो वृषाकपिस्तस्य पत्नि ।" इति तद्भाष्ये
सायणः ॥) जीवन्ती । शतावरी । इति मेदिनी ॥
वृषाकपिः, पुं, ("वृषः कपिरस्येति । अन्येषा-
मपीति दीर्घः ।" इति उणा० ४ । १४३ ।
इत्यस्य वृत्तौ उज्ज्वलदत्तः ।) विष्णुः । (यथा
हरिवंशे । २१६ । ४७ ।
"ततो विभुः प्रवरवराहरूपधृक्
वृषाकपिः प्रसभमथैकदंष्ट्रया ।")
शिवः । (यथा, हरिवंशे । १ । ५२ ।
"वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा ।")
अग्निः । इति मेदिनी ॥ इन्द्रः । इति वृषाक-
पायीशब्दस्य शचीवाचकत्वदर्शनात् ॥ (यथा,
भागवते । ६ । १३ । १० ।
"एवं सञ्चोदितो विप्रैर्मरुत्वानहनद्रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥"
सूर्य्यः । यथा, महाभारते । ३ । ३ । ६१ ।
"त्वं हंसः सविता भानुरंशुमाली वृषाकपिः ॥")
वृषाकरः, पुं, माषः । इति राजनिर्घण्टः ॥
वृषाङ्कः, पुं, (वृषोऽङ्कोऽस्य ।) शिवः । (यथा,
भागवते । ८ । ८ । १ ।
"पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ॥")
साधुः । भल्लातकः । षण्डः । इति मेदिनी ॥
वृषाङ्कजः, पुं, डमरुः । इति शब्दरत्नावली ॥
वृषाञ्चनः, पुं, (वृषेण अञ्चति गच्छतीति । अञ्चु-
गतौ + ल्युः ।) शिवः । इति त्रिकाण्डशेषः ॥
वृषाणकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥
वृषान्तकः, पुं, (वृषस्यासुरस्यान्तकः ।) विष्णुः ।
इति शब्दरत्नावली ॥
वृषायणः, पुं, चटकः । इति हारावली ॥ (वृषेण
अयनं गमनं यस्य ।) शिवश्च ॥
वृषाहारः, पुं, (वृष उन्दुर आहारो यस्य ।)
विड़ालः । इति हारावली ॥
वृषी, [न्] पुं, मयूरः । इति शब्दमाला ॥
वृषी, स्त्री, व्रतिनां कुशादिमयासनम् । इत्यमरः ॥
(यथा, देवीभागवते । ५ । ३२ । ३० ।
"शिष्यो ददौ वृषीं तस्मै गुरुणा नोदित-
स्तदा ॥")
वृषोत्सर्गः, पुं, (वृषस्योत्सर्गः ।) अशौचान्त-
द्वितीयदिनादिकर्त्तव्यत्रिशूलचक्राङ्कितवत्सतरी-
चतुष्टययुक्तवृषत्यागः । वृषाभावे तत्प्रतिनिधि-
र्यथा,—
"एकादशेऽह्नि सम्प्राप्ते वृषाभावो भवेद्यदि ।
दर्भैः पिष्टैस्तु संपाद्य तं वृषं मोचयेद्बुधः ॥
वृषोत्सर्जनवेलायां वृषाभावः कथञ्चन ।
मृत्तिकाभिस्तु दर्भैर्व्वा वृषं कृत्वा विमोचयेत् ॥"
इति गारुड़े प्रेतकल्पे ६ अध्यायः ॥
तस्य विधिर्यथा । कालविवेकेऽग्निपुराणम् ।
"एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।
प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति ॥
आद्यश्राद्धे त्रिपक्षे वा षष्ठे मासि च वत्सरे ।
वृषोत्सर्गश्च कर्त्तव्यो यावन्न स्यात् सपिण्डता ।
सपिण्डीकरणादूर्द्ध्वं कालोऽन्यः शास्त्रचोदितः ॥"
अस्य प्रेतस्येति सामान्यतः श्रुतेः पितृभार्य्या-
स्यापि वृषोत्सर्गः प्रतीयते ॥ * ॥ अथ वृषोत्-
सर्गे कालमाह । कार्त्तिक्यां पौर्णमास्यां
रेवत्यामाश्वयुज्यां इत्यादि गते संवत्सरेऽतीते
चेति । अत्र स्मृतिनिषिद्धादाय संवत्सरमध्ये
दशाहदिवसनिषेधः । एकादशाह इति श्राद्ध-
श्राद्ध इति चाशौचान्ताद्वितीयदिनपरम् ।
"अशौचान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदाम्पत्यं नानाभरणभूषितं ।
वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा ॥"
इति मत्स्यपुराणे नैवाचकल्पात् ॥
प्रेतवृषोत्सर्गे वत्सिकाः न कर्त्तव्याः ।

और्व्व उवाच।

तनस्तयोर्नाम चक्रे नारदो भगवानृषिः।
ज्येष्ठो भैरवनामाभूत् वीरः पुत्रो भयङ्करः॥
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः॥"

इति कालिकापुराणे ४८ अध्यायः॥

वेतालभट्टः, पुं, राजविक्रमादित्यस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"

इति नवरत्नश्लोकः॥

वेत्ता, [ऋ] त्रि, ज्ञाता। वेत्तीति विदधातोस्तृच्प्रत्ययेन निष्पन्नमिदम्॥ (यथा, हितोपदेशे।

"यथा खरश्चन्दनभारवाही
भारस्य वेत्ता नतु चन्दनस्य॥")

वेत्रः, पुं, (वी+"गुधृवीपचीति।" उणा० ४।१६६। इति त्रः।) स्वनामख्यातक्षुपः। तत्पर्य्यायः। वेतः २ योगिदण्डः ३ शरदण्डः ४ मृदुपर्व्वकः ५। (यथा, शाकुन्तले। ५।

"आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः॥")

अस्य पर्य्यायः। तस्य गुणाः। शीतलत्वम्। कषायत्वम्। भूतपित्तहरत्वञ्च। इति राजनिर्घण्टः॥ तत्फलं वेताग् इति ख्यातम्। तद्गुणाः। रोचनत्वम्। कफत्वम्। तिक्तत्वम्। [illegible]। तद्वन्तगुणाः। वातपित्तनाशित्वम्। [illegible]। इति राजवल्लभः॥ अङ्गुरिदेवः। तस्य प्रमाणं वेत्रासुरशब्दे द्रष्टव्यम्॥

वेत्रकीयः, त्रि, (वेत्र+"नडादीनां कुक् च।"४।२।९१। इति कुक् छच।) वेत्रबहुलदेशादिः। इति सिद्धान्तकौमुदी। (एकचक्रा नगरी तु वेत्रकीयगृहमिति महाभारते प्रसिद्धा। यथा, महाभारते। १। १६१। ९।

"वेत्रकीयगृहे राजा नायं नयमिहास्थितः।
उपायं तं न कुरुते यत्नादपि स मन्दधीः॥")

वेत्रधरः, पुं, (वेत्रस्य धरः।) द्वारपालः। इति जटाधरः॥ वेत्रधारके, त्रि।

वेत्रधारकः, पुं, (वेत्रस्य धारकः।) द्वारपालः। इति जटाधरः।

वेत्रवती, स्त्री, नदीविशेषः। इत्यमरः॥ सा तु [illegible] बहुमायी [illegible]। वेत्रवतीमाला। यथा, वराहपुराणे।

"वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत्॥"

वेत्रहा, [न्] पुं, (वेत्रं हतवान्। हन+क्विप्।) इन्द्रः। इत्यमरः॥

वेत्रवती, स्त्री, वेत्रवती नदी। यथा,—

"नवजलधर [illegible]
[illegible] वेत्रवती [illegible]॥"

इति [illegible]॥

वेत्रासनं, क्ली, (वेत्रस्यासनम्।) वेत्रनिर्म्मितासनम्। तत्पर्य्यायः। आसन्दी २। इति हेमचन्द्रः॥

वेत्रासुरः, पुं, (वेत्रनामकोऽसुरः।) स्वनामख्यातासुरः। तस्योत्पत्तिर्यथा,—

महातपा उवाच।

"आसीत्राजा पुरा राजन् सिन्धुद्वीपः प्रतापवान्।
वारुणांशो महाराजोऽसौऽरण्ये तपसि स्थितः॥
पुत्त्रो मे शत्रुनाशाय भवेदिति नराधिपः।
एवं कृतमतिः सोऽथ महता तपसा स्वकम्।
कलेवरं स्थिरो भूत्वा शोषयामास सुव्रतः॥

प्रजापाल उवाच।

कथं तस्य द्विजश्रेष्ठ शक्रेणापकृतं भवेत्।
येनासौ तद्विनाशाय पुत्त्रमिच्छन् व्रते स्थितः॥

महातपा उवाच।

सोऽन्यजन्मनि पुत्त्रोऽभूत् त्वष्टुर्बलवतां वरः।
अवध्यः सर्व्वशस्त्रौघैरपां फेनेन नाशितः॥
जलफेनेन निहितस्त्रिलयमवाप्नुयात्।
पुण्यांशेनान्वयो जातः सिन्धुद्वीपेतिसंज्ञितः॥
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन्।
ततः कालेन महता नदी वेत्रवती शुभा॥
मानुषं रूपमास्थाय बालहारा मनोरमम्।
आजगाम यतो राजा तेपे परमकं तपः॥
तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः।
उवाच कासि सुश्रोणि सत्यं कथय भामिनि॥

नद्युवाच।

अहं जलपतेः पत्नी वरुणस्य महात्मनः।
नाम्ना वेत्रवती पुण्या त्वामिच्छन्तीह चागता॥
साभिलाषां परस्त्रीं यो भजमानां विसर्ज्जयेत्।
स पापपुरुषो ज्ञेयो ब्रह्महत्याञ्च विन्दति॥
एवं ज्ञात्वा महाराज भजमानां भजस्व माम्।
एवमुक्तस्तया राजा साभिलाषोपभुक्तवान्॥
तस्य सद्योऽभवत् पुत्त्रो द्वादशार्कसमप्रभः।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत्॥
यथावानतितेजस्वी प्राग्ज्योतिषः पतिर्भवेत्।
स कालेन युवा जातो बलवान् दृढविक्रमः॥
महायोगेन संयुक्तो जिगाय च वसुन्धराम्।
सप्तद्वीपवतीं यथाब्धिपर्य्यन्तमावहन्।
तथेन्द्रं प्रथमं जित्वा पश्चादग्निं यमं ततः॥"

इति वराहपुराणे देव्युत्पत्तिनामाध्यायः॥

वेत्री, [न्] पुं, (वेत्रोऽस्त्यस्येति। वेत्र+इनिः।) द्वारपालकः। इति हेमचन्द्रः॥ वेत्रयुक्ते, त्रि॥

वेथ, ऋ ङ याचे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-द्विक०-सेट्।) ऋ, अविवेथत्। ङ, वेथते। इति दुर्गादासः॥

वेदः, पुं, (विद+घञ्।) विष्णुः। यथा,—

"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः॥"

इति विष्णुसहस्रनामस्तोत्रम्॥

ज्ञानम्। इति मेदिनी॥ क्वचित् पुस्तके वित्तमित्यपि पाठः॥ वृत्ताद्यम्। इति नानार्थरत्नमाला॥ मोक्षपदरोदरस्कन्देन मन्त्रब्राह्मणम्।

इति न्यायशास्त्रम्।
ऋग्वेदशास्त्रम्। इति [illegible]
निर्मलधर्म्मज्ञापकशास्त्रम्। [illegible]
तत्पर्य्यायः। श्रुतिः २ [illegible]
मरः॥ छन्दः ४ मन्त्र [illegible]
शब्दरत्नावली॥ [illegible]
धरः॥*॥ वेदस्य प्रादुर्भावे [illegible]
कथं स्रक्ष्यामीति ध्यायतः
एभ्यश्चत्वारो वेदाः प्रादुरा[illegible]
विंशतिशाखात्मक-ऋक् १।
यजुः २ सहस्रशाखात्मक [illegible]
मथार्व्व ४। इति पुराणम्।
श्रीमार्कण्डेय उवाच।
"तस्मादण्डाद्विनि [illegible]
ऋचो बभूवुः प्रथमं [illegible]
जपापुष्पनिभाः [illegible]
पृथक् पृथग्विभिन्नाश्च [illegible]
यजूंषि इन्द्रियादन [illegible]
यादृगवर्णं [illegible]
पश्चिमं यद्विभोर्वक्त्रं ब्रह्म[illegible]
आविर्भूतानि सामानि [illegible]
अथर्व्वाणमशेषेण भृङ्गराज[illegible]
[illegible]
उत्तरात् प्रकटीभूतं [illegible]
सुखं सत्त्वतमःप्रायं [illegible]
ऋचो रजोगुणाः सर्व्वं [illegible]
[illegible]
एतानि त्ववमावाणि [illegible]
पृथक् पृथगवस्थानं भाति [illegible]
ततस्तदाद्यं यदेव [illegible]
[illegible]
यथा यजुर्म्मयं तेजो [illegible]
[illegible]
प्रातःकं पौर्व्वाह्णिकं [illegible]
ऋगादिषु तथं [illegible]
ततो विश्वमिदं
सभावनीय [illegible]
तदस्तमस्तमीभूतं [illegible]
परेण तेजसा [illegible]
आदित्यसंज्ञामगमदाद्यो [illegible]
विश्वस्यास्य [illegible]
प्रातर्मध्यन्दिने [illegible]
त्रयी तपति सा [illegible]
ऋचस्तपन्ति पूर्व्वाह्णे [illegible]
सामानि चापराह्णे तु [illegible]
प्रातःकं चतु पूर्व्वाह्णे [illegible]
अपराह्णे स्थितं [illegible]
एषो च ऋग्वो [illegible]
यदः साममयोऽसौ च [illegible]
नदेव भगवान् [illegible]
वेदविद्यात्मकश्चैव परः [illegible]
सर्व्वस्थितमवेद्यः [illegible]

[illegible]
[illegible]
[illegible]
...र्थं ... वेदवक्ता
...: परमः परेभ्यः ॥”
...र्भमार्कण्डेयपुराणे ... कूर्म्मपुराणे ... सर्व्व-
...अध्यायः ॥ * ॥ अन्यच्च ।
...विंशे पुनः प्राप्ते ह्यस्मिन् वै द्वापरे द्विजाः ।
...रसुतो व्यासः कृष्णद्वैपायनोऽभवत् ॥
...सर्व्ववेदानां पुराणानां प्रदर्शकः ।
...राशरी महायोगी कृष्णद्वैपायनो हरिः ॥
...य देवमीशानं दृष्ट्वा साम्बं त्रिलोचनम् ।
...सादतो व्यासो वेदानामसृजत् प्रभुः ॥
...शिष्यान् प्रजग्राह चतुरो वेदपारगान् ।
...मिनं सुमन्तुञ्च वैशम्पायनमेव च ॥
...लो जघन्यं पञ्चमं मां महामुनिः ।
...श्रावकं पैलं प्रजग्राह महामुनिः ॥
...दप्रवक्तारं वैशम्पायनमेव च ।
...ं सामवेदस्य श्रावकं सोऽन्वपद्यत ॥
...थर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ।
...तिहासपुराणानि प्रवक्तुं मामयोजयत् ॥
...वासीद्यजुर्वेदस्तं चतुर्द्धा व्यकल्पयत् ।
...र्यमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
...र्य्यं यजुर्भिस्तु ऋग्भिर्होत्रं द्विजोत्तमाः ।
...त्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
...स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
...च यजुर्वेदं सामवेदञ्च सामभिः ॥
...तिभेदेन ऋग्वेदं कृतवान् पुरा ।
...ाणां शतेनाथ यजुर्वेदमथाकरोत् ॥
...दं सहस्रेण शाखानाञ्च विभेद सः ।
...र्व्वाणमथो वेदं बिभेद नवकेन तु ॥
...दशैर्व्यासः पुराणं कृतवान् प्रभुः ।
...मेकश्चतुष्पादो वेदः पूर्व्वं पुरातनात् ॥
...रो ब्रह्मणो जातः स दोषविशोधनः ।
...ो हि भगवान् वासुदेवः सनातनः ॥
...यते परो देवो यो वेदैनं स वेदवित् ।
...परतरं ब्रह्मज्योतिरानन्दमुत्तमम् ॥
...वेदोदितं तत्त्वं वासुदेवं परं पदम् ।
...मिदं वेत्ति वेदं वेदपरो मुनिः ॥
...परमं वेत्ति वेदनिष्ठः महेश्वरः ।
...वेदो वेद्यश्च तमेवाश्रित्य मुच्यते ॥
...क्षरं वेद्यमोङ्कारं वेदमव्ययम् ।
...च विजानाति पाराशर्य्यो महामुनिः ॥”
इति कौर्म्मे ४९ अध्यायः ॥*॥
...ध्ययनधर्म्मं यथा,—
व्यास उवाच ।
...दण्डादिभिर्युक्तः शौचाचारसमन्वितः ।
...तोऽध्ययनं कुर्य्यादीक्षमाणो गुरोर्मुखम् ।
...मुद्यतपाणिः स्यात् साध्वाचारः सुसंयतः ।
...तामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥

नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥
नीचं शय्यासनं चास्य सर्व्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥
नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम् ॥
गुरोर्यत्र प्रतीवादो निन्दा चापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
न चैवास्योत्तरं ब्रूयात् स्थिते नासीत सन्निधौ ॥
उदकुम्भं कुशान् पुष्पं समिधोऽस्याहरेत् सदा ।
मार्ज्जनं लेपनं नित्यमङ्गानां वै समाचरेत् ॥
नास्य निर्म्माल्यशयनं पादुकोपानहावपि ।
आक्रामेदासनञ्चास्य छायादीन् वै कदाचन ॥
साधयेद्दन्तकाष्ठादीन् लब्धञ्चास्मै निवेदयेत् ।
अनापृच्छ्य न गन्तव्यं भवेत् प्रियहिते रतः ॥
न पादौ धावयेदस्य सन्निधाने कदाचन ।
जृम्भितं हसितञ्चैव कण्ठप्रावरणं तथा ॥
वर्ज्जयेत् सन्निधौ नित्यमवस्फोटनमेव च ।
यथाकालमधीयीत यावन्न विमना गुरुः ॥
आसीनाधो गुरोर्द्दर्भे फलके वा समाहितः ।
आसने शयने याने नैव तिष्ठेत् कथञ्चन ॥
धावन्तमनुधावेत्तं गच्छन्तमनुगच्छति ।
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ॥
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ।
जितेन्द्रियः स्यात् सततं वश्यात्माक्रोधनः
शुचिः ॥
प्रयुञ्जीत सदा वाचं मधुरां हितकारिणीम् ।
गन्धं माल्यं रसं कन्यां शुक्तं प्राणिविहिंसनम् ॥
अभ्यङ्गञ्चाञ्जनोपानच्छत्रधारणमेव च ।
कामं लोभं भयं निद्रां गीतं वादित्रनृत्यकम् ॥
आतर्ज्जनं परीवादं स्त्रीप्रेक्षालम्भनं तथा ।
परोपघातपैशुन्यं प्रयत्नेन विवर्ज्जयेत् ॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्ष्यञ्चाहरहश्चरेत् ॥
कृतञ्च लवणं सर्व्वं वर्ज्यं पर्य्युषितञ्च यत् ।
अनृत्यदर्शी सततं भवेद्गीतादिनिःस्पृहः ॥
नादित्यं वै समीक्षेत नाचरेद्दन्तधावनम् ।
एकान्तमशुचिस्त्रीभिः शूद्रान्त्यैरभिभाषणम् ॥
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः ।
कलापकर्षणं स्नानं नाचरेद्धि कथञ्चन ॥
न कुर्य्यान्मानसं विप्र गुरोस्त्यागे कथञ्चन ।
मोहाद्वा यदि वा लोभात्त्यक्तेन पतितो भवेत् ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तन्न द्रुह्येत् कदाचन ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य मनुस्त्यागं समब्रवीत् ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चातिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्म्माद्धितञ्चोपदिशत्स्वपि ॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्त्रेषु दारेषु गुरोश्चैव स्वबन्धुषु ॥

बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनं वा गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्त्रस्य पादयोः शौचमेव च ॥
गुरुवत् प्रतिपूज्यास्तु सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नी तु युवती नाभिवाद्येह पादयोः ।
कुर्व्वीत वन्दनं भूमावसावहमिति च ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ।
संपूज्या गुरुपत्नी च समस्ता गुरुभार्य्यया ॥
भ्रातुर्भार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥
एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद्धर्म्मं पुराणाङ्गानि नित्यशः ॥
तथा चिरोषिते शिष्ये गुरुर्ज्ञानमनिर्द्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्यैवं ततो गुरुः ॥
आचार्य्यपुत्त्रः शुश्रूषुर्ज्ञानदो धार्म्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्म्मतः ॥
कृतज्ञश्च तथाद्रोही मेधावी शुभकृन्नरः ।
आप्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजातयः ।
एतेषु ब्रह्मणो दानमन्यत्र तु यथोदितात् ॥”*॥
वेदाध्ययनविधिर्यथा,—
“आचम्य संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्मुखम् ॥
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारभेत् ।
प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥
कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्व्वतः ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीतानध्ययन्नित्यं ब्राह्मण्याद्धीयतेऽन्यथा ।
अधीयीत ऋचो नित्यं क्षीरहुत्या सदेवताः ।
प्रीणाति तर्पयन्त्येनं कामैस्तृप्ताः सदेवताः ।
यजूंष्यधीते नियतं दध्ना प्रीणाति देवताः ॥
सामान्यधीते प्रीणाति घृताहुतिभिरन्वहम् ।
अथर्व्वाङ्गिरसो नित्यं मध्वा प्रीणाति देवताः ॥
धर्म्माङ्गानि पुराणानि मांसैस्तर्पयते सुरान् ।
अपां समीपे प्रयतो नैत्यिकं विधिमाश्रितः ॥
गायत्त्रीमप्यधीयीत गत्वारण्यं समाहितः ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्त्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्त्तितः ।
गायत्त्रीञ्चैव वेदांश्च तुलयातोलयत् प्रभुः ।
एकतश्चतुरो वेदान् गायत्त्रीञ्च तथैकतः ॥
ओङ्कारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ।
ततोऽधीयीत सावित्त्रीमेकाग्रः श्रद्धयान्वितः ॥

[illegible]

एकाक्षरमथैकं वा यजुः सामाथवा पुनः ।
अष्टकाद्यासमधीयीत सावित्रीं चाभिनायति ॥
अनध्यायेषु सर्व्वेषु नित्यहोमसुरालयोः ।
न धर्मोद्भासिरस्वेषु धर्म्मस्त्वेतानि वर्ज्जयेत् ॥ ७ ॥
एष धर्म्मः समासेन कीर्त्तितो ब्रह्मचारिणाम् ।
ब्रह्मणाभिहितः पूर्व्वमृषीणां भावितात्मनाम् ॥
योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजाः ।
स संमूढो न संभाष्यो वेदवाह्यो द्विजातिभिः ॥
न वेदपाठमात्रेण सन्तुष्टो वै भवेत् द्विजः ।
पाठमात्रावसन्नस्तु पङ्के गौरिव सीदति ॥
अधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रकल्पः पात्रतां न प्रपद्यते ॥
यदि त्वात्यन्तिकं वासं कर्त्तुमिच्छति वै गुरौ ।
युक्तः परिचरेदेनं न शरीरविमोक्षणम् ॥
गत्वा वनं वा विधिवज्जुहुयाज्जातवेदसम् ।
अभ्यसेत्तु सदा निष्ठं ब्रह्मनिष्ठः समाहितः ॥
सावित्रीं शतरुद्रीयं वेदान्तांश्च विशेषतः ।
अभ्यसेत् सततं युक्तो भस्मस्नानपरायणः ॥

एतद्विधानं परमं पुराणं
वेदागमे सम्यगिहेरितं वः ।
पुरा महर्षिप्रवराभिपृष्टः
स्वायम्भुवो यन्मनुराह देवः ॥
एवमीश्वरसमर्पितान्तरो
योऽनुतिष्ठति विधिं विधानवित् ।
मोहजालमपहाय सोऽमृतो
याति तत्पदमनामयं शिवम् ॥"

इति कौर्म्मे उपविभागे १४ अध्यायः ॥

अथ वेदस्य संहिता ।
"विभेद प्रथमं विप्र पैलः ऋग्वेदपादपम् ।
इन्द्रप्रमतये प्रादात् बाष्कलाय च संहिते ।
चतुर्धा स विभेदाथ बाष्कलो निजसंहिताम् ।
बोध्यादिभ्यो ददौ ताश्च शिष्येभ्यः स महामतिः ।
बोध्याग्निमाठरौ तद्वत् याज्ञवल्क्यपराशरौ ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ।
इन्द्रप्रमतिरेकान्तु संहितां स्वसुतं ततः ।
माण्डूकेयं महात्मानं मैत्रेयाध्यापयत्तदा ।
तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यक्रमाद्ययौ ।
वेदमित्रस्तु शाकल्यः संहितां तामधीतवान् ।
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्यास्तु ये पञ्च तेषां नामानि मे शृणु ।
मुद्गलो गोमुखश्चैव वात्स्यः शालीय एव च ।
शिशिरः पञ्चमश्चासीत् मैत्रेय सुमहामतिः ।
संहितात्रितयं चक्रे शाकपूर्णिस्तथेतरः ।
निरुक्तमकरोत्तद्वत् चतुर्थं मुनिसत्तम ।
क्रौञ्चो वैतालिकस्तद्वद्बलाकश्च महामतिः ।
निरुक्तकृच्चतुर्थोऽभूद्वेदवेदाङ्गपारगः ।
इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम ।
बाष्कलश्चापरास्तिस्रः संहिताः कृतवान्
द्विज ।
शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च कथाजवः ।
इत्येते बह्वृचाः प्रोक्ताः संहिता यैः प्रवर्त्तिताः ॥"

इति विष्णुपुराणे ३ अंशे ४ अध्यायः ॥

[illegible]

भूत् सुकर्म्मांस्वाप्यभूत् सुतः ।
। संहिता तौ महामुनी ॥
ं सुकर्म्मा तत्सुतस्ततः ।
ण्यौ जगृहाते महाव्रतौ ॥
ाशल्य: पौष्यञ्जिश्च द्विजोत्तमः ।
: शिष्यास्तस्य पञ्चशताः
स्मृताः ॥
वत्य: संहिता येर्हिरण्योत्तम ।
ोच्यन्ते पण्डितैः प्राच्य सामगाः॥
मश्चैव कुथोदिर्लाङ्गलिस्तथा ।
ाद्वैरैः संहिता बहुलीकृताः ॥
यश्च चतुर्विंशतिसंहिताः ।
मासौ शिष्येभ्यः सुमहामतिः ॥
ोऽसौ शाखाभिर्बहुलीकृतः ॥”*
हिता यथा,—
। वत्ते संहितानां ससुचयम् ।
ुनिः सुमन्तुरमितद्युतिः ॥
ामास कवन्धं सोऽपि तद्द्विधा ।
ायं तथा पथ्याय दत्तवान् ॥
थ्यास्तु मोदो ब्रह्मवलिस्तथा ।
पिप्पलादस्तथान्यो मुनिसत्तम: ॥
: शिष्याः कृता येर्हिरण्य संहिताः।
ादादिश्च तृतीयः शौनको द्विज ॥
ा कृत्वा ददावेकान्तु वभ्रवे ।
ताां प्रादात् सैन्धवायनसंज्ञिने ॥
केशाश्च भिन्नवेदा द्विधा पुनः ।
वेदानां संहितानान्तथैव च ॥
ङ्गिरसः शान्तिकल्पश्च पञ्चमः ।
ायामेते संहितानां विकल्पकाः ॥”
विष्णुपुराणे ३ अंशे ६ अध्यायः ॥
पुराणवत् । * । अपरञ्च ।
ाक् सावित्री वेदमाता प्रतिष्ठिता ।
नृत्तसत्रं तेन विप्राः प्रतिष्ठिताः ॥
्कृता ये ब्राह्मणा ब्रह्मवादिनः ।
लोकानां त्रयाणामिह पोषकाः ॥
दानादितपःस्वाध्यायसंयमैः ।
हरिं भक्त्या वेदतन्त्रविधानतः ॥”
ति कल्किपुराणे २ अध्यायः । * ।
त कर्त्तव्यं यथा,—
तमदाचारविहितं कर्म्म केवलम् ।
दसुर्व्वैर्भगवद्भिः केशवं सदा ॥
निरयं याति कुमार्गगमसेवनात् ।
विरुद्धार्थं शास्त्रोक्तं कर्म्म संत्यजेत् ॥”
पाताखण्डे १७ अध्यायः । * ।
ालौकिकाचारो वलवान् यथा,—
पार्व्वत्युवाच ।
वेदशास्त्रिविद्य कः करोति विनिर्णयम् ।
लौकिको देशलोकाचारश्च कस्य जेत् ॥”
द्मवैवर्त्ते गणपतिखण्डे ७ अध्यायः ॥६॥
देस्य स्थितिकालः ।
प्रसहमान्ते यथौ व्यक्ता हरेः पदम् ।

वेदोक्तानि च कर्म्माणि यदुक्तैः साहमेव च ।
हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ॥
वेदाङ्गानि च शास्त्राणि यदुक्तैः साहमेव च ।
सत्यञ्च धर्म्मः सत्यञ्च वेदाश्च ग्रामदेवताः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥*॥
आयुर्व्वेदस्योत्पत्तिलक्षणे यथा,—
“षडङ्गेभ्यः पञ्चसंख्यागतेभ्यो
वेदा जाता ऋग्यजुःसामभेदाः ।
आयुर्व्वेदोऽथर्व्ववेदश्चेति कणादः ॥
आस्ते वेदः पञ्चमो वैद्यकाख्यो
वेत्ता कश्चित्तस्य नास्ति मदेशात् ।
तस्माद्धाताध्यैत तस्मात्पुराणात्-
तस्मान्ज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥”
इति गूढ़बोधः ॥
“हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते ॥”
इति सुखबोधः ॥ * ॥ * ॥
चतुर्वेदानां विवरणं यथा । अथातश्चरणव्यूहं व्याख्यास्यामः । तत्र यदुक्तं चातुर्व्वेद्यम् । चत्वारो वेदा विज्ञाता भवन्ति । ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्ववेदश्चेति । तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति । चर्चाश्रावकः १ चर्चकः २ श्रवणीयपारः ३ क्रमपारः ४ क्रमरथः ५ क्रमजटः ६ क्रमशटः ७ क्रमदण्डश्चेति ८ । चतुष्पारायणमेतेषाम् । शाखाः पञ्चविधा भवन्ति । आश्वलायनी १ सांख्यायनी २ शाकला ३ वास्कला ४ माण्डूकेयाश्चेति ५ । तेषामध्ययनम् । अध्यायाश्चतुःषष्टिः । मण्डलानि च दशैव तु ।
“एकर्चं एकवर्गस्यादेकञ्च नवकस्तथा ।
द्वौ वर्गौ द्वे ऋचौ ज्ञेये त्रीणि ऋक्शतं
स्मृतम् ॥
चतुर्ऋचं समाख्यातं षट्सप्तत्युत्तरं शतम् ।
पञ्चर्चं द्वादश शतान्यष्टाविंशोत्तराणि च ॥
शतत्रयं षडर्चञ्च सप्तपञ्चाशदुत्तरम् ।
सप्तर्चमेकाज्ञ त्रिंशदुत्तरं शतमेककम् ॥
अष्टर्चाः पञ्चपञ्चाशद्वर्गाः स्युर्नाधिकोत्तराः ।
वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे ।
सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पनाम् ।
दशसप्तत पञ्चाशत् संख्यातं वै पदक्रमम् ॥
एकशतं सहस्रं वा द्विपञ्चाशत् सहस्राहेम् ।
एतानि च चतुर्द्दश पाशिष्ठानाम् । इतरेषां पञ्चाशीतिक्रमकाण्डे तु देवयम् । चतुस्त्रिंशत्-
सहस्राणि हिरण्मानां सहस्राणां द्वात्रिंशत् षोड़शोत्तराः । चत्वारिंशत्सहस्राणि द्वात्रिं-
शत्पञ्चाक्षरसहस्राणि ।
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥
एवं चर्च्चैर्वर्गाश्च दशश्च नवतस्तथा ।
द्वौ वर्गौ द्वे ऋचौ द्वेधे त्रीणि त्रीणि प्रत-
ष्टता ॥
———नें सूक्तानां पदानां स्तनार्द्धेऽ:नि: ।

[illegible], त्रि ॥
[illegible] स्त्री, ([illegible] भावः ।) [illegible] ।
[illegible],—
"वैरान्तकेषु [illegible]
[illegible] ।
[illegible]
[illegible] ॥"
इति महानाटके ५ अङ्कः ॥
[illegible] । यथा, महाभारते । ५ ।
३ । ८ ।
"[illegible] प्रवर्त्तन्ति देशा-
[illegible] ॥"
[illegible] । यथा, तत्रैव । १५ । ३४० । ८ ।
"[illegible] दर्शने प्रतिकूलतः ॥")
[illegible], पुं, (विरोचनस्यापत्यम् । विरोचन +
[illegible] ।) शुक्रः । बलिराजः । (यथा, महा-
भारते । ३ । ९८ । १७ ।
"[illegible] वैरोचने दैत्यानिमान् विहाय [illegible]
[illegible] ॥")
[illegible] । सूर्य्यपुत्रः । [illegible] । इति
शब्दरत्नावली ॥
वैरोचननिकेतनं, क्ली, (वैरोचनस्य बलिनिके-
तनम् ।) पातालम् । इति हलायुधः ॥
वैरोचिः, पुं, (विरोचनस्यापत्यम् । विरोचन +
इञ् ।) शुक्रः । बलिराजः । (यथा, विष्णु-
[illegible] । १ ।
"[illegible] वैरोचनोऽस्मै सुमहदपि विभवं [illegible]-
[illegible] ॥")
सूर्य्यपुत्रः । इति मेदिनी ॥
[illegible], पुं, वासुदेवः । यथा । वैरोचिर्व्वासि-
[illegible] । इति शब्दरत्नावली ॥

वैलक्षः, पुं, ([illegible] ।) [illegible]
[illegible] । यथा,—
"[illegible] वैलक्ष्यं यथा ।
[illegible] ॥"
इति शब्दरत्नावली ॥
वैलक्षण्यं, क्ली, (विलक्षणस्य भावः । विलक्षण +
ष्यञ् ।) विलक्षणत्वम् । विलक्षणस्य भाव
इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा,
भागवते । १० । ४४ । ३८ ।
"[illegible] दैवेन [illegible] ॥"
[illegible] । यथा, माघे कुमुदः । १ । ८४ ।
"[illegible] धर्म्मवैल-
क्षण्यम् ॥")
वैल्व, क्ली, (बिल्वस्येदम् । अण् ।) बिल्वफलम् ।
इत्यमरटीका ॥ बिल्वसम्बन्धिनि, त्रि ॥ (यथा,
माघे । ४ । ६४ ।
"[illegible] वैल्वयानानि पाचिती वाट-
माहिते ॥")
वैवधिकः, त्रि, (विवधेन धान्यतण्डुलादिना चर-
तीति । "विभाषा विवधवीवधात् ।" ४ । ४ ।
१७ । इति ठक् ।) विवधेन धान्यतण्डुलादिना
चरतीति यः । पथादि इति भाषा । (यथा,
राजतरङ्गिण्याम् । ६ । १०८ ।
"वल्गाभिधा वैवधिको वल्गाभटसमाह्वयः ॥")
तत्पर्य्यायः । वार्त्तावहः २ । इत्यमरभरतौ ॥
वार्त्तिवहः ३ । इति शब्दरत्नावली ॥
वैवर्ण्यं, क्ली, (विवर्णस्य भावः ।) विवर्णता ।
विवर्णस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्न-
मिदम् ॥ (यथा, कथासरित्सागरे ।१६।६८।
"सा यामी चर्म्मगात्रस्य तथा वैवर्ण्यदायिनी ॥"
तत्तु स्त्रीणां सात्त्विकभावाभावान्ततमम् । यथा,
साहित्यदर्पणे । ३ । १६६ ।
"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥")
वैवस्वतः, पुं, (विवस्वतोऽपत्यमिति । अण् ।) यमः ।
इत्यमरः ॥ (यथा, हरिवंशे दशमायाम् ।६८।२३।
"एवं प्रजाः समतिदायमोऽयं
वैवस्वतस्यालयमभ्युपैति ॥"
यथा च ऋग्वेदे । १० । १४ । १ ।
"वैवस्वतं संगमनं जनानां
यमं राजानं हविषा दुवस्य ॥"
"वैवस्वतं विवस्वतः सूर्य्यस्य पुत्रम् ।" इति तद्-
भाष्ये सायणः । यथा च राजतरङ्गिण्याम् ।
३ । १५१ ।
"वसराजिस्तामयेन दिशं वैवस्वताङ्किताम् ॥")
रुद्रविशेषः । इति जटाधरः ॥ शनिः । सप्तमो
मनुः । (यथा, रघुवंशे । १ । ११ ।
"वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ॥")
वर्त्तमानोऽयम् । अस्मिन्मन्वन्तरे वामनोऽव-
तारः । पुरन्दरः इन्द्रः । आदित्या वसवो
रुद्रा विश्वेदेवा मरुद्गणाः । अश्विनावृभवः ।
इत्याद्या देवाः । कश्यपः अत्रिः वशिष्ठः

विश्वामित्रः गौतमः जमदग्निः भरद्वाजः इति
सप्तर्षयः । इक्ष्वाकुः नृगः शर्य्यातिः दिष्टः धृष्टः
करूषः नरिष्यन्तः पृषध्रः नाभागः कविः
इति मनुपुत्राः दश । इति श्रीभागवतमतम् ॥*॥
अपि च ।
"सप्तमं प्रवक्ष्यामि यद्वैवस्वतमुच्यते ।
अत्रिश्चैव वशिष्ठश्च कश्यपो गौतमस्तथा ॥
भरद्वाजस्तथा योगी विश्वामित्रः प्रतापवान् ।
जमदग्निश्च सप्तैते सांप्रतं ये महर्षयः ॥
साध्या विश्वाश्च रुद्राश्च मरुतो वसवोऽश्विनौ ।
आदित्याश्च सुरास्तद्वत् सप्त देवगणाः स्मृताः ॥
इक्ष्वाकुप्रमुखाश्चास्य दशपुत्राः स्मृता भुवि ।
मन्वन्तरेषु सर्व्वेषु सप्त सप्त महर्षयः ॥
कृत्वा धर्म्मव्यवस्थानं प्रयान्ति परमं पदम् ॥"
इति मात्स्ये मन्वन्तरानुकीर्त्तनो नाम ९ अः ॥
अन्यच्च ।
श्रीमार्कण्डेय उवाच ।
"आदित्या वसवो रुद्राः साध्या विश्वे मरुद्-
गणाः ।
भृग्वोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च मरुतो विश्वे धर्म्मपुत्रा-गणास्त्रयः ॥
भार्गवास्तु भृगोः पुत्राः स्मृताङ्गिरसोऽङ्गिरसः सुताः ।
एष सर्गस्तु मारीचो विज्ञेयः सांप्रताधिपः ॥
तेजस्वी नाम चेन्द्रोऽपि महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्त्तन्ते ये च सांप्रतम् ॥
सर्व्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व्व एव पुरन्दराः ॥
मघवन्तो वृषाः सर्व्वे शृङ्गिणो गजगामिनः ।
ते शतक्रतवः सर्व्वे भूताभिभवतेजसः ॥
धर्म्माद्यैः कारणैरेतैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ॥
भूर्लोकोऽयं स्मृतो भूमिरन्तरीक्षं भुवः स्मृतम् ।
स्वराख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रश्च कौशिकः ॥
तथैव पुत्रो भगवानृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते मुनयोऽत्र तथान्तरे ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च ॥
करूषश्च पृषध्रश्च भूमिपा लोकविश्रुताः ।
मनोर्व्वैवस्वतस्यैते नव पुत्राः प्रकीर्त्तिताः ॥
वैवस्वतमिदं देवि ! कथितं ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ।
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरं समाप्तम् ॥
वैवस्वती, स्त्री, (वैवस्वतस्य इयम् । अण् । ततो
ङीप् ।) दक्षिणदिक् । इति राजनिर्घण्टः ॥
वैवाहिकः, पुं, (विवाहाद्भवः । विवा[illegible] ।)
कन्यापुत्रयोः श्वशुरः । वैवाह[illegible] [illegible] ॥
समधी इति हिन्दीभाषा । ([illegible] सम[illegible]
२ ॥ यथा, कौतुकसर्व्वस्वे

"असमामसमागतासखसुतावैवाहिक-
शालक-
श्वश्रूकासुकरथ्यया गनवती श्वाश्वा सदैषा मम।")
विवाहसम्बन्धिनि, त्रि। यथा,—
"पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया।
ते च सन्तानिनः सर्व्वे पतिताः शूद्रतां गताः॥"
इत्युद्वाहतत्त्वम्॥

अपि च।
"कन्याभ्यश्च पितृद्रव्यात् देयं वैवाहिकं वसु।
अपुत्त्रकस्य कन्या स्वा धर्म्मजा पुत्त्रवद्धरेत्॥"
इति दायतत्त्वे देवलः॥

(यथा च मनुः। २। ६७।
"वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः
स्मृतः॥")

वैशम्पायनः, पुं, (विशम्पस्य गोत्रापत्यम्। "अश्वा-
दिभ्यः फञ्।" ४।१।११०। इति फञ्।)
मुनिविशेषः। यथा,—
"अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान्।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च॥
पैलं तेषां चतुर्थञ्च परमं मां महामुनिः।
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च॥"
इति कौर्म्मे ४९ अध्यायः॥

स च वस्त्रधारकः। यथा,—
"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव षड़ेते वस्त्रधारकाः॥"
इति पुराणम्॥

वैशस्त्रं, क्ली, (विशस्तुर्धर्म्मोऽयम्। विशसितृ+
"शतोऽण्।" ४।३।४९। इति अण्। तत्र
"विशसितुरिड्लोपश्च।" इति काशिकोक्त्या
इड्लोपः।) अधिकारः। शस्त्राभावविशि-
ष्टत्वम्। विगतं शस्त्रं यत्र। विपूर्व्वशस्त्रशब्दा-
दण्प्रत्ययेन निष्पन्नमिदम्। इति सिद्धान्त-
कौमुदी।

वैशाखं, क्ली, (विशाख एव। स्वार्थे अण्।) धनु-
र्द्धरां संस्थानभेदः। यथा,—
"स्थानान्यालीढ़वैशाखप्रत्यालीढ़ानि मण्डलम्।
समपादञ्च———————————॥"
इति हेमचन्द्रः॥

(यथा, हरिवंशे। ११०। ४४।
"वज्रपातनिभं वेगं पातयित्वा ममोपरि।
भूयः प्रहर्त्तुकामो मां वैशाखस्थायिनो
महीम्॥"
कुटरिदेशः। यथा, कथासरित्सागरे। ६०।५।
"वैशाखाख्ये पुरे राज्ञः पुत्रावास्तां हिमाक्षको।")

वैशाखः, पुं, (विशाखा युक्ता पौर्णमास्यत्र। विशाखा
+"विशाखाषाढ़ादिति।" ५।१।११०।
इति अण्।) मन्थानदण्डः। (यथा, शिशुपाल-
वधे। ११। ८।
"दधतदूरदलाः शिशुवैशाखदैः॥"
वैशाखी पौर्णमासी अस्मिन्। "सास्मिन्
.........।" ४।२।२१। इति अण्।)
द्वादशमासान्तर्गतप्रथममासः। तत्पर्य्यायः।
माधवः २ राधः ३। इत्यमरः॥ चान्द्रस्य
तस्य लक्षणम्।
"विशाखातारकायुक्ता वैशाखी पूर्णिमा भवेत्।
सा वैशाखी यत्र मासे स वैशाखः प्रकीर्त्तितः॥"
इति शब्दरत्नावली॥

स तु मेषस्थरविकः सौरः। तत्र जातफलम्।
"पुमान् विनीतो द्विजदेवभक्तो
धर्म्मस्य कर्त्ता सुजनस्य भर्त्ता।
गुणाभिरामोऽथ जनप्रियः स्यात्
वैशाखमासे खलु जन्म यस्य॥"
इति कोष्ठीप्रदीपः॥ * ॥

अथ वैशाखकृत्यम्। तत्र पद्मपुराणम्।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥"
वैष्णवाम्भृते।
"गवामर्द्धप्रसूतानां लक्षं दत्त्वा तु यत् फलम्।
तत् फलं लभते राजन् मेषे स्नात्वा तु जाह्न-
वीम्॥"

पितामहः।
"कार्त्तिकस्य तु यत् स्नानं माघे मासि विशेषतः।
हृच्छ्रादिनियमानाञ्च चान्द्रभागप्रमाणतः॥"
आभ्यां कार्त्तिकादिस्नाने सौरचान्द्रयोर्व्विकल्पे-
नानुष्ठानम्। तत्र चान्द्रमपि द्विविधम्। तथा
च विष्णुः।
"दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे॥"
दर्शं दर्शान्तयागसम्बन्धिनीं प्रतिपदमारभ्य
त्रिंशत्तिथिम्। नारायणोपाध्यायस्तु दर्शपौर्ण-
मासीति पूर्व्वदिनसङ्कल्पपरमिति। तत्र सौर-
स्थे राघवखः कार्य्यः।
"संक्रान्तिविहिते कार्य्ये संक्रान्तिः परि-
कीर्त्तिता।
मासोऽखिलश्चेतरस्मिन् रविराशिस्थितिस्तथा॥"
इति गारुड़ात्॥ * ॥

ततश्चारुणोदयकाले मण्डलं कृत्वाचम्य उदङ्-
मुखः ॐ तत् सदित्युच्चार्य्य अद्य वैशाखे मासि
अमुकपक्षे अमुकतिथावारभ्य मेषस्थरविं यावत्
प्रत्यहं अमुकगोत्रः श्रीअमुकदेवशर्म्मा श्रीविष्णु-
प्रीतिकामः प्रातःस्नानमहं करिष्ये। इति।
गङ्गायान्तु अर्द्धप्रहनगनोलचदाननन्यफलसम-
फलप्राप्तिकामो विष्णुप्रीतिकामो वा इति
सङ्कल्प्य यथोक्तविधिना स्नायात्। प्रतिदिन-
सङ्कल्पे तु आरभ्य मेषस्थरविं यावत् प्रत्यह-
मिति न वक्तव्यं किन्तु मासोऽयमन्तरं मेष-
राशिस्थरवौ इत्यधिकं वक्तव्यम्। चान्द्रे तु
मासानन्तरं शुक्लपक्षे प्रतिपदि तिथावारभ्य
दर्शपर्य्यन्तमित्युल्लेखनीयम्। प्रतिदिनसङ्कल्पे
आरभ्य प्रत्यहमित्यन्तं न वक्तव्यम्। एवं तथा-
प्रतिपदारम्भे ऊहनीयम्। एवं मासान्तरे
बोद्धव्यम्। सङ्कल्पादौ भविष्यपुराणम्।

"सङ्कल्पेन विना राजन् यत्...
फलं चाल्पाल्पकं...
महार्णवे।
"यो ददाति हि मेषादौ...
पितृनुद्दिश्य विप्रेभ्यः धर्म्मघटं...
विप्रेभ्यः पादुकां छत्रं...
पितृभ्यः पितृनुद्दिश्य। अत्र।
"अयने कोटिगुणितं लक्षं...
षड़शीतिसहस्रन्तु...
शतमिन्दुक्षये पुण्यं सहस्रन्तु...
विषुवे शतसाहस्रमा का...
इति ... ।
अनन्तकविन ।२...
संक्रान्तिपुण्यकालपरम्।
कालपनापत्तिः। यद्यहारोऽपि तथा।
सा पुण्यकालस्तु दिनसंक्रमणे...
"षड़शीतिमुखेऽतीते इत्थं च...
भविष्यदयने पुण्यमतीते...
इति तु पुण्यतरकालपर...
विहितविंशतिदण्डादीनां...
स्यापि पुण्यत्वम्। रात्रिसंक्रमे तु
प्रथमयामद्वयाभ्यन्तरे...
पुण्यम्। दण्डद्वयात्मकमध्यरात्रे...
तिथिरभेदे तु ...
भेदे तु तद्दिनीयशेषयामद्वयं पुण्यं
मीयाद्ययामद्वयञ्च। तिथ्यभेदे...
तद्दिनीयशेषयामद्वयम्।
दिनीयशेषयामद्वयम्।
रात्रिसंक्रमणे परदिनाद्ययामद्वयम्।
संक्रमणे तु दिनद्वयं दिवस...
पर्य्यन्तेति॥ * ॥ संक्रान्तौ
अनिष्टसंक्रमणे तु तद्दोषशान्त्यर्थं
सलिलेन सर्व्वौषधिजलेन च स्नानं।
सप्तमन्त्रपः। संक्रान्तिकाल एव।
वर्ज्यम्। इन्दुक्षयेऽमावास्यायाम्।...
चये। आ-का मा-वेडु आषाढ़ा।
वैशाखपौर्णमासीषु॥ * ॥ तत...
प्राङ्मुख उदङ्मुखं नाभ्यं...
लिखा जलघटान्वितमर्घ्यं च
प्रभुभ्यो नमः इति...
दत्त्वा घटं संप्रोक्ष्य वामहस्ते कुशा...
तिलजलान्यादाय ॐ तत् सदिद्य-
अद्यामुके मास्यमुकपक्षेऽमुकतिथौ...
संक्रान्त्यां अमुकगोत्रस्य...
सर्व्वपापविमुक्तिकामः इमान्
प्रसून् विष्णुदैवताकान् अमुकगोत्राय
देवशर्म्मणे ब्राह्मणाय तुभ्यमहं
ब्राह्मणहस्ते जलं दद्यात्...
हस्ततलमध्यभागानयनेन कोटिदश...
धृत्वा स्वस्तीत्युक्त्वा गायत्रीं ब्राह्मण...
जलघटान्विताः प्रसूनो विष्णुदैवताः।
वदेत्। ततो दक्षिणां दद्यात्। यथा...

...दि इत्येवत् जलघटान्नितरक्तुदानकर्म्मणः ...र्थं दक्षिणां किञ्चित् काञ्चनमूल्यं ब्राह्म... ...णं ददानीति। ततः अच्छिद्रावधारणम्। ...कविशेषानुपदेशे यथासम्भवगोत्रनाम्नो ...लावेति विशेषः। तत्र ब्राह्मणासन्निधाने ...मिति न देयम्। भूमौ त्यागजलप्रक्षेपः। ...त्रापि सम्प्रदाने इति वाक्ये विशेषः। ...भावे तत्स्वेऽपि तत्त्कामो विष्णुप्रीति... ...मो वा विष्णवे दत्त्वा ब्राह्मणाय पश्चात् ...दयेत्।

"दत्त्वा तु दानानि देवे दत्त्वा तु दक्षिणाम्।
सर्वं ब्राह्मणे दद्यादन्यथा निष्फलं भवेत्॥"

इति मत्स्यसूक्तात्॥

...दत्र देयानीति वाराहीये पाठः॥ *॥

"...शाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
...दत्त्वा राजेन्द्र स याति परमां गतिम्॥"

...पि यथायोग्यं संपूज्य पूर्ववद्वाक्येन मनो... ...फलार्थिना सभोज्यघटो देयः॥ *॥ स्मृतिः।

"...मादौ प्रकवो देया वारिपूर्णा च गर्गरी॥"

...पि यथायोग्यं संपूज्य पूर्ववत् वाक्यं कृत्वा ...त्

"... एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
...स्य प्रदानात् सफला मम सन्तु मनोरथाः॥"

इति मन्त्रलिङ्गान्मनोरथफलं ज्ञेयम्॥ *॥ ...कृत्यामलौ।

"...शरं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ।
...पि रोषान्वितस्यास्य तक्षकः किं करिष्यति॥"

...स्पराहे तु।

"...ष्मे च विषं तत्र नास्त्यत्र विषजं भयम्॥"

इति संवत्सरप्रदीपे पाठः॥

...तेन मेषस्थरविस्थितिकाले सक्तुं निम्बपत्र... ...दिन भक्षयेत्॥ *॥ भविष्ये।

"...दा शुक्ला तदाशु सवैशाखे मासि वै तिथिः ...कोपा सा यया ख्याता सर्व्वाभिरपि वन्दिता॥ ...भ्यां ददाति करकान् वारिधानसमन्वितान्। ...यान् पुरुषो वीर लोकान् वै हेममालिनः॥"

...त्सहम्। हेममालिनः सूर्य्यस्य। तस्यै जलाद... ...र्म्मकरकदाने सूर्य्यलोकगमनं फलम्। ...दानदानं पूर्ववत्॥ *॥ ब्रह्मपुराणम्।

"वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्। ...र्त्तिके शुक्लपक्षे च त्रेता च नवमेऽहनि॥ ...च भाद्रपदे मासि त्रयोदश्यां तु द्वापरम्। ...र्गे तु पौर्णमास्यां तु घोरं कलियुगं स्मृतम्॥ ...गुगामास्तु विषयो युगाद्यास्तेन विश्रुताः॥"

...तत्र वैशाखादयः पौर्णमास्यन्ता इव तदेव... ...विधिकाभिधानात्। शुक्लपक्षादित्वे कार्त्तिके ...कालेऽस्तीति सितौ शुक्लपक्ष इति सर्व्व... ...तान्॥ *॥ अत्रां पूर्णमासाह विष्णुपुराणम्।

"एता युगाद्याः कथिताः पुराणे-
...नन्तपुण्यास्तिथयस्तथास्ताः।

...

पानीयमप्यत्र तिलैश्च मिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥"

उपनये प्रदहेत्॥ *॥ देवीपुराणम्।

"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता॥" *॥

अक्षयतृतीयामधिकृत्य ब्रह्मपुराणम्।

"तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत्।
यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्यवान्॥
पूजयेच्छङ्करं गङ्गां कैलासञ्च हिमालयम्।
भगीरथञ्च नृपतिं सागराणां सुखावहम्॥" *॥

स्कान्दे।

"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता।
तत्र मां लेपयेद्गन्धैर्लेपनैरतिशोभनैः॥"

मां जगन्नाथम्॥ *॥ अन्यत्रापि।

तथा च युगाद्यास्नानमधिकृत्य भविष्ये।

"संवत्सरफलं राजन् नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च मासत्रयफलं भवेत्॥" *॥

मन्वादयस्तु भविष्यमात्स्ययोः।

"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी॥
श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः॥"

अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः तथ्यकोप... संवादयोः शुक्लाक्षीर्त्तनात्॥ *॥ नारदीये।

"वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः।
तस्यां प्रीतमनोऽपि स्थापयेत् वैष्णवं शुचिः॥"

एवं विस्मृतवद्द्वादशी। माघ शुक्लादशैवा। तत्र विष्णुपूजने उपदासीवरविधानात्॥ *॥ अथ पवित्रयादम्। तत्र वैशाखशुक्लपक्षे शुक्ल... ...

...इति ...॥ *॥ *॥ अथ वैशाख-माहात्म्यम्।

...

तत् सर्व्वं भूपतिश्रेष्ठ सकलमक्षयमुच्यते।
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः।
भूप वैशाखमासस्य कोट्यंशेनापि नो समाः॥
मेरुतुल्यानि हेमानि सर्व्वदानानि चैकतः।
एकतः सर्व्वदा भूप माधवो माधवप्रियः॥
असंख्यानि च पापानि बहुजन्मार्ज्जितानि च।
निमेषार्द्धेन राजेन्द्र विलयं यान्ति माधवे॥
वैशाखमागतं दृष्ट्वा पितृणामुत्सवो भवेत्।
पुत्रो नियममाचर्य्य अस्मास्तूद्धरिष्यति॥
आगतं माधवं दृष्ट्वा कम्पन्ते पापसञ्चयाः।
अस्माकं नाशकालोऽयं भूपते मुखमागतः॥
वैशाखं परमं मासं माधवस्येति च प्रियम्।
नियमेन समाचर्य्य न भूयो जायते नरः॥
मनसा संस्मरेद्यस्तु नियमं माधवोद्भवम्।
पूयते पातकैः सर्व्वैः प्रक्षीणं सह मोदते॥
यश्च यो वदेद्भूप वैशाखं माधवप्रियम्।
अहं समाचरिष्यामि स गच्छेद्ब्रह्मणः पुरम्॥
यः समाचरते भूप नियमेन तु माधवम्।
स विष्णोः रूपमासाद्य विष्णुना सह मोदते॥
नियमेन समाचर्य्य एकाहमपि भूपते।
पितरस्तारितास्तेन यास्यन्ति परमां गतिम्॥
तस्मिन् स्नात्वा विशुद्धात्मा दशमासानुसेवनात्।
...

[illegible]

...

विश्वानर एव। स्वार्थे अण्। यद्वा, “विश्वान् नरान् इतो लोकात् लोकान्तरं नयति। इदमर्थेन विश्वानराणां नेतृत्वेन सम्पद्यन्ते वा कर्म्मार्थप्रनेतृत्वेन यस्मादिनोऽस्य वैश्वानरः। ‘अन्येषामपि दृश्यते।’ ६।३।१३७। इति दीर्घः। अपि वा विश्वान् नरान् नरः। नरः नरौ इत्यस्य छान्दसत्वात् नरादपि उपपदविभक्तेरालुक्। ‘सर्व्वाणि भूतानि नरः प्रत्यत्र प्रतिगतः प्रविष्टति विश्वानरः प्राणः। तेन जन्यमानत्वात् तस्यापत्यं वैश्वानरः।’ इति निघण्टुटीकायां देवराजयज्वा।५।१।) अग्निः। (यथा, गीतायाम्।१५।१४।

“अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्व्विधम्॥”)

चित्रकवृक्षः। इत्यमरः॥ अग्नेरुत्पत्तिकारणं यथा,—

“तथापि दृष्टो यो रूपे द्वे ह्रे प्रविकथोऽधुना।
भूतकार्य्येष्वभूतेन देवलोके तु मूर्त्तिना॥
निष्ठ्वमपि कालान्ते लयं त्वाविशतु द्रुतम्।
शरीराणि पुनर्नैव कर्त्तव्योऽहमिति क्वचित्॥
मूर्त्तानाञ्च तथा तुभ्यं दृष्टा नामानि योऽधुना।
अग्निर्वैश्वानरो नाम प्राणापानौ तथाश्विनौ॥
भविष्यति तथा गौरी हिमशैलसुता तथा।
पृथिव्यादिगणस्तेष गणवक्त्रो भविष्यति॥
शरीरधातवस्तेते नानाभूतानि एव तु।
अहङ्कारस्तथा स्कन्दः कार्त्तिकेयो भविष्यति॥”

इति वाराहे आदिवितायां महातपोपाख्याननामाध्यायः॥

वैश्वी, स्त्री, उत्तराषाढानक्षत्रम्। इति हेमचन्द्रः॥

वैषम्यं, क्ली, (विषम + भावे ष्यञ्।) विषमत्वम्। विषमशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम्। (नतोन्नतत्वम्। यथा, महाभारते।१२।५६।११४।

“समतां वसुधायाश्च स सम्यगुदपादयत्।
वैषम्यं हि परं भूमेरासीदिति च नः श्रुतम्॥”

तारतम्यम्। यथा, महाभारते।३।२०८।२१।
“महच्च फलवैषम्यं दृश्यते कर्म्मसन्धिषु॥”
दुःखम्। यथा, तत्रैव।३।४१।२०।
“वैषम्यं परमं प्राप्तो दुःखितो गतचेतनः।
भर्त्ता तेऽहं निबोधेदं वचनं हितमात्मनः॥”)

वैषयिकः, त्रि, विषयसम्बन्धी। विषयशब्दात् ष्णिक-प्रत्ययेन निष्पन्नः॥ (यथा, साहित्यदर्पणे।३।८४०।

“यथाभिन्न सुखाभावोऽप्युक्तस्तस्य वैषयिक-सुखपरत्वान्न विरोधः॥”)

वैष्टुतं, क्ली, होमभस्म। इति हेमचन्द्रः॥

वेष्टं, क्ली, (विष + “भृमृशीङ्तॄचरित्सरितनिधनिमिमस्जिभ्य उत्।” उणा० ४।१५५। इति दृन् रहितश्च।) पिष्टपम्। इत्युणादिकोषः॥ द्यौः। वायुः। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः॥

वैष्णवं, क्ली, (विष्णोरिदम्। विष्णु + अण्।) होमभस्म। इति शब्दरत्नावली॥ (महापुराण-विशेषः। यथा देवीभागवते।१।३।८।

“त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम्।”)

विष्णुसम्बन्धिनि, त्रि। (यथा, रघुः।११।८५।

“तां गमस्य नर धाम वैष्णवं
कोपितो ह्यसि मया दिदृक्षुणा।”)

वैष्णवः, पुं, (विष्णुर्देवता अस्य। अण्।) विष्णूपासकः। विष्णुभक्तः। तत्पर्य्यायः। कार्ष्णः २ श्वारः ३। तस्य लक्षणं यथा,—

“गृहीतविष्णुदीक्षाको विष्णुपूजापरो नरः।
वैष्णवोऽभिहितोऽभिज्ञैरितरोऽस्मादवैष्णवः॥”

तथा च स्कान्दे।

“परमापदमापन्नो हर्षे वा समुपस्थिते।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥
समात्मा सर्व्वजीवेषु निजाचारादविप्लुतः।
विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते॥”

इति श्रीहरिभक्तिविलासे ११ विलासः॥ *॥

अथ श्रीवैष्णवनिन्दादिदोषः। स्कान्दे मार्कण्डेय-भगीरथसंवादे।

“यो हि भागवतं लोकमुपहासं नृपोत्तम।
करोति तस्य नश्यन्ति अर्थधर्म्मयशःसुताः॥” *

अथ वैष्णवसमागमविधिः। तत्रैवादित्यपुराणे।

“वैष्णवो वैष्णवं दृष्ट्वा दण्डवत् प्रणमेद्भुवि।
उभयोरन्तरा विष्णुः शङ्खचक्रगदाधरः॥” *।

अथ वैष्णवसम्मानननित्यता। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

“दृष्ट्वा भागवतं दूरात् संमुखे यो न याति हि।
न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीम्॥”

अथ वैष्णवस्तुतिः। स्कान्दे।

“धन्योऽहं कृतकृत्योऽहं यद्यूयं गृहमागताः।
दुर्लभं दर्शनं नूनं वैष्णवानां यथा हरेः॥” *।

अथ वैष्णवाभिगमनमाहात्म्यम्। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

“संमुखं व्रजमानस्य वैष्णवानां नराधिप।
पदे पदे यज्ञफलं प्राहुः पौराणिका द्विजाः॥”

अथ वैष्णवस्तुतिमाहात्म्यम्। तत्रैव।

“प्रत्यक्षं वा परोक्षं वा यः प्रशंसति वैष्णवम्।
ब्रह्महा मद्यपः स्तेयी गुरुगामी सदा नृपाम्।
मुच्यते पातकात् सद्यो विष्णुराह नृपोत्तम॥” *

अथ वैष्णवसम्माननमाहात्म्यम्। तत्रैवामृतसारोद्धारे।

“श्रद्धया दत्तमन्नञ्च वैष्णवायेषु कीर्त्यते।
तदन्नं मेरुणा तुल्यं भवते च दिने दिने॥” *।

अथ वैष्णवशास्त्रमाहात्म्यम्। स्कान्दे श्रीब्रह्मनारदसंवादे।

“वैष्णवानि च शास्त्राणि ये शृण्वन्ति पठन्ति च।
धन्यास्ते मानवा लोके तेषां कृष्णः प्रसीदति॥”

इति च श्रीहरिभक्तिविलासे १० विलासः॥

तस्य लक्षणमाहात्म्यादि यथा,—

“फलसन्धानरहिता विष्णुभक्ताश्च वैष्णवाः।
सत्यौतिभक्तिकामास्ते सर्व्वदा सर्व्वकर्म्मसु॥
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।

कीटानुणं [illegible]
गुरुणाणां [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
पादोदकं [illegible]
इति [illegible]
अपि च।

श्रीशिव उवाच।

“[illegible]
[illegible] वैष्णवानाम् [illegible]
ददाति वैष्णवेभ्यश्च यो [illegible]
[illegible]
[illegible] वैष्णवानां [illegible]
[illegible]
[illegible]
विष्णुमन्त्रोपासनया [illegible]
ये ब्राह्मणा वैष्णवाश्च [illegible]
[illegible]
[illegible] ब्राह्मणाः [illegible]
विष्णुमन्त्रविहीनेभ्यो [illegible]
[illegible] वैष्णवा [illegible]
[illegible]
यथा वह्नौ शुष्कतृणं भस्मीभूतं [illegible]
तथा पापं वैष्णवेषु [illegible]
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे [illegible]
तं वैष्णवं महापूतं प्रवदन्ति [illegible]
[illegible]
स्वोदराच्च [illegible] वैष्णवः
गयायां पिण्डदानेन पितरः
समुद्धरन्ति पुत्राश्च वैष्णवाश्च [illegible]
[illegible] भवेन्नरः।
यमस्तस्माद्भीतो [illegible]
[illegible] तीर्थानि गङ्गादीनि च
कृष्णमन्त्रोपासकांश्च स्पर्शमात्रेण [illegible]
पापानि पापिनां तीर्थे यान्ति [illegible]
नश्यन्ति तानि सर्व्वाणि [illegible]
कृष्णमन्त्रोपासकानां [illegible]
सद्यो मुक्ता पातकेभ्यो [illegible]
वायुश्च वरुणो वह्निः सूर्य्यः सर्व्वं [illegible]
एते पूता वैष्णवानां स्पर्शमात्रेण [illegible]
[illegible] च [illegible]
एते [illegible] वाञ्छन्ति वैष्णवानां [illegible]
फलं कर्म्मानुसारेण सर्व्वेषां भारते [illegible]
न भवेद्वैष्णवे च [illegible]
[illegible] तेषां कर्म्म पूर्व्वं [illegible]

...का अहं तेभ्यो ददाम्येव ध्यानिधिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५७ अध्यायः ॥ * ॥
अन्यच्च ।

श्रीभगवानुवाच ।
...अहं प्राणा वैष्णवानां मम प्राणाश्च वैष्णवाः ।
...वेष्टि यो मूढो ममात्मानं स हिंसकः ॥
...पौत्रान् कलत्रांश्च राज्यलक्ष्मीं विहाय च ।
...यन्ति सततं ये मां को मे तेभ्यः परः प्रियः ॥
...रा भक्ता न मे प्राणा न च लक्ष्मीर्न शङ्करः ।
...भारती न च ब्रह्मा न दुर्गा न गणेश्वरः ॥
...माद्या न वेदाश्च न वेदजननी सुराः ।
...गोपी न च गोपाला न राधा प्राणतः प्रिया ॥
...दं कथितं सर्व्वं सत्यं नारद पावनम् ।
...प्राणात् परं तेषां ते च प्राणाधिकाः प्रियाः ॥
...द्विषन्ति च ये मूढा ज्ञानहीनाश्च वञ्चिताः ।
...कामश्च न जानन्ति ते यान्ति निरयं चिरम् ॥
...द्विषन्ति च मद्भक्तान् प्राणानामधिकप्रियान् ।
...षां शास्ताहं तूर्णञ्च पतञ्च निरयं चिरम् ॥
...नतोऽहञ्च सर्व्वेषामीश्वरः परिपालकः ।
...तथापि न स्वतन्त्रोऽहं भक्ताधीनो दिवानिशम् ।
...गोलोके चाथ वैकुण्ठे द्विभुजश्च चतुर्भुजम् ।
...करमात्रमिदं सर्व्वं प्राणा मे भक्तसन्निधौ ॥
...महतं भक्तदत्तञ्च भक्ष्याभक्ष्यञ्च सत्तम ।
...अभक्ष्यं दत्तमन्येन दत्तचेदस्तनोपमम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
अपि च ।
"सर्व्वान् कामान् परित्यज्य इष्टभक्तिञ्च साधयेत् ।
स एव वैष्णवाचारः कामसङ्कल्पवर्ज्जितः ॥"
इत्याचारभेदतत्त्वम् ॥ * ॥
अन्यच्च ।
"रजस्वलायाः संभोगे कर्म्मक्षेत्रे च भारते ।
तयोश्च भवेत् पापं नाच स्वर्गे च सुन्दरि!
कर्म्मक्षेत्रे च यत् कर्म्म यद्वेदोक्तं शुभाशुभम् ॥
न भवेद्वैष्णवानाञ्च ज्वलतां ब्रह्मतेजसा ॥
यथा प्रदीप्तवह्नौ च शुष्काणि च तृणानि च ।
भवन्ति भस्मीभूतानि तथा पापानि वैष्णवे ॥
...चाण्डालेभ्यस्तेजीयान् वैष्णवः सदा ।
...रक्षितो विष्णुचक्रेण स्वतन्त्रो मत्तकुञ्जरः ॥
न विचारो न भोगश्च वैष्णवानां स्वकर्म्मणाम् ।
...लिखितं साध्वि कौथुम्यां कुरु प्रश्नं इदमानितम् ॥
...धर्म्माश्च सर्व्वे जानन्ति चन्द्रवंश्याश्च वैष्णवान् ।
...देवमन्यं न सेवन्ते चन्द्रवंश्या हरिं विना ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥
अपि च ।

सूत उवाच ।
"अथ वेन इयाजाथ सोऽश्वमेधेन भूपतिः ।
ब्राह्मणेभ्यो ददौ दानं नानारूपमनेकधा ॥
जगाम वैष्णवं लोकं सकायो जगतीपतिः ।
विष्णुना सह धर्म्मात्मा नित्यमेव प्रवर्त्तते ।
एतत्ते सर्व्वमाख्यातं चरितं तस्य भूपतेः ॥
यदेषां वैष्णवदेषी सर्व्वधर्म्मबहिष्कृतः ।
एदुना पुत्रतीर्थेन पवित्रोऽगात् परं पदम् ॥

गत्पुत्रं परमं तीर्थं प्राप्य तुष्यन्ति पूर्व्वजाः ।
पितापि पापमुक्तः स्यात् जाते पुत्रे महात्मनि ॥
वैष्णवो यदि पुत्रः स्यात् स तारयति पूर्व्वजान् ।
पितृगधस्ततथा वंशांस्तारयन्त्यतिपावनाः ॥"
इति पाद्मे भूमिखण्डे १२० अध्यायः ॥ * ॥
अथ वैष्णवधर्म्मान्तर्गतकर्त्तव्यपञ्चविधपूजा । यथा,—
श्रीपार्व्वत्युवाच ।
"वैष्णवानाञ्च यद्धर्म्मं कर्म्मापि तस्य तद्वद ।
यत् कृत्वा मानवाः सर्व्वे भवाम्भोधौ तरन्ति वै ॥
ईश्वर उवाच ।
अथ द्वादश शुद्धिश्च वैष्णवानामिहोच्यते ।
गृहोपसर्पणञ्चैव तथानुगमनं हरेः ॥
भक्त्या प्रदक्षिणञ्चैव पादयोः शोधनं पुनः ॥१।२
पूजार्थं पत्रपुष्पाणां भक्त्यैवोत्तोलनं हरेः ।
करयोः सर्व्वशुद्धीनामियं शुद्धिर्विशिष्यते ।३।४।
तन्नामकीर्त्तनञ्चैव गुणानाञ्चैव कीर्त्तनम् ।
भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते ॥ ५ ॥
तत्कथाश्रवणञ्चैव तस्योत्सवनिरीक्षणम् ।
श्रोत्रयोर्नयनयोश्चैव शुद्धिः सम्यगिहोच्यते । ६ ।
७ । ८ । ९ ॥
पादोदकञ्च निर्म्माल्यं मालानामपि धारणम् ।
उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुनः ॥१०॥
आघ्राणं गन्धपुष्पादेर्निर्म्माल्यस्य तपोधने ।
विशुद्धिः स्यादनन्तस्य घ्राणस्यापि विधीयते ।११।
१२ ॥
तत्र पुष्पादिकं यच्च कृष्णपादयुगार्पितम् ।
तदेव पावनं लोके तद्धि सर्व्वं विशोधयेत् ॥*॥
पूजा च पञ्चधा प्रोक्ता तासां भेदान् शृणुष्व
मे ।
अभिगमनमुपादानं योगः स्वाध्याय एव च ॥
इज्याः पञ्चप्रकारार्च्चाः क्रमेण कथयामि ते ।
तत्राभिगमनं नाम देवतास्थानमार्ज्जनम् ॥
उपलेपननिर्म्माल्यदूरीकरणमेव च । १ ।
उपादानं नाम गन्धपुष्पादिचयनं यथा ॥ २ ॥
इज्या नाम हि चेष्टादेः पूजनञ्च यथार्थतः ।३ ।
स्वाध्यायो मन्त्रराजस्य अर्थसन्धानतो जपः ॥
सूक्तस्तोत्रादिपाठश्च हरेः संकीर्त्तनं तथा ।
तन्नामशास्त्राभ्यासश्च स्वाध्यायः परिकीर्त्तितः ॥
४ ॥
योगो नाम स्वदेवस्य चात्मने यैव भावना ।५ ।
इति पञ्चप्रकारार्च्चाः कथितास्तव सुव्रते ॥"
इति पाद्मे पातालखण्डे १० अध्यायः ॥*॥
अथ वैष्णवानां खाद्याखाद्यम् ।
"सायं प्रातर्द्विजातीनां सूक्तमशनं तथा ।
विष्णुभुक्तावशिष्टेन दिनपापात् प्रमुच्यते ॥
यन्न ब्रह्मा रुद्रो विष्णुः खादयमास चोचरन् ।
एवं ज्ञात्वा तु यो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते ॥
अलाबुं वर्त्तुलाकारं मसूरञ्च सवल्कलम् ।
तालं शृङ्गन्तु वार्त्ताकुं न खादेद्वैष्णवो जनः ॥
वटाश्वत्थार्कपत्रेषु कुम्भीतिन्दुकपत्रयोः ।
कोविदारकदम्बे च न खादेद्वैष्णवो नरः ॥
श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे त्यजेत् ।

दुग्धन्तु आश्विने मासि कार्त्तिके चामिषं
त्यजेत् ॥
दुग्धमन्नञ्च जम्बीरं यद्विष्णोरनिवेदितम् ।
बीजपूरञ्च शाकञ्च प्रत्यचलवणन्तथा ॥
यदि दैवाच्च भुञ्जन्ते तदा तन्नामकं स्मरेत् ॥
कलायं कङ्गुधान्यानि शाकञ्च हिलमोचिकाम् ।
षष्टिकाकालशाकञ्च मुस्तकं क्रमुकं तथा ॥
लवणे सैन्धवं प्रोक्तं वचा च दधिसर्पिषी ।
पयोऽनुद्धृतसारञ्च पनसाम्रे हरीतकी ॥
पिप्पलीजीरकञ्चैव नागरङ्गकतिन्तिड़ी ।
कदलीलवलीधात्रीफलान्यगुड़मैक्षवम् ।
घृतैलपक्कं भुञ्जीत हविष्येषु प्रचक्षते ॥"
इति पाद्मे पातालखण्डे ११ अध्यायः ॥*॥
अथ वैष्णवलक्षणविशेषादिः ।
"माहात्म्यमथ भक्तानां यत् कार्य्यं यच्च लक्ष-
णम् ।
करणीयं हरेर्विप्र सावधानमनाः शृणु ॥
हरिरेव सदा सेव्यो नान्यो यस्य महात्मनः ।
लोकस्य जगदाराध्यो हरिभक्तः स उच्यते ॥
अनन्यनिर्म्माल्यभुजो भक्तास्तेऽनन्यमानसाः ।
गोविन्दोपासका ये तु नित्यं देवान्तरं विना ॥
अनन्यधिषणोऽनन्यहृदयोऽनन्यसेवकः ।
केवलं हरिसेवज्ञ स भक्तः परिकीर्त्तितः ॥
सत्त्वं सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम् ।
योऽनन्यत्वेन मनसा सात्त्वतः समुदाहृतः ॥
सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः ।
एतत्तदीयसेवायां स भागवत उच्यते ॥
विहाय काम्यकर्म्मादीन् भजेदेकाकिनं हरिम् ।
सत्यं सत्त्वगुणोपेतो भक्त्या तं सात्त्वतं विदुः ॥
मुकुन्दपादसेवायां तन्नामश्रवणेऽपि च ।
कीर्त्तने च रतो भक्तो नाम्नः स्यात् स्मरणे
हरेः ॥
वन्दनार्च्चनयोर्भक्तिरनिशं दास्यसख्ययोः ।
रतिरात्मार्पणे यस्य दृढ़ानन्तस्य सात्त्वतः ॥
स्मर्त्तव्यः कीर्त्तनीयश्च श्रोतव्यः पूज्य एव च ।
यस्यैको विष्णुराराध्यो वैष्णवः समुदाहृतः ॥
यथालब्धोऽपि सन्तुष्टः समचित्तो जितेन्द्रियः ।
हरिपादाश्रयो लोके विप्रः साधुरनिन्दकः ॥
निर्व्वैरः सदयः शान्तो दम्भाहङ्कारवर्ज्जितः ।
निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥
लोभमोहमदक्रोधकामादिरहितः सुखी ।
कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः ॥
यद्विष्णूपासना नित्यं विष्णुर्यस्येश्वरो मुने ।
पूज्यो यस्यैकविष्णुः स्यादिष्टो लोके स वैष्णवः ।
हरेः सर्व्वावताराणां मत्स्यादीनामुपासकाः ।
तन्मन्त्रेष्टा अनन्यास्ते वैष्णवास्ते न संशयः ॥
यदिष्टो रघुनाथस्तु नृसिंहो वामनो हरिः ।
एतन्मन्त्रो वराहादिर्वासुदेवः स वैष्णवः ॥
विष्णोरुपासको दासस्तन्मन्त्रस्तदाश्रयः ।
तमाहुर्वैष्णवं लोके विष्णुसेवापरायणम् ॥
साध्वी यथा पतिं नारी नान्यं जानाति नं
विना ।

तदन्तीदं तदास्थो यदि विष्णुं स वैष्णवः ।
सर्वानिमो मुनिः पूर्णो गोविन्दचरणाश्रयः ।
सर्वभूतदयः कार्यो विवेकी साधुसत्तमः ।

कृष्णार्पितप्राणशरीरबुद्धिः
दारात्मजक्षेत्रधनादिकादिः ।
आनन्दचित्तः सततादिभक्ति-
रसैव साधुः कथनं स्वरूपे ।
कृष्णाश्रयः कृष्णकथानुरक्तः
कृष्णेकभक्ताश्रितपूजनीयः ।
कृष्णादिप्रश्नानमथानकथो
यो वै न साधुर्मुनिरेव कार्यः ।
[illegible] प्राप्तं श्रीभगवान् हरिः ।
[illegible] भक्ता भागवतश्च यः ।
ये [illegible] ये [illegible] ।
ये [illegible] दानात्ते परि-
कीर्त्तिताः ।"

इति पाद्मे [illegible] ९९ अध्यायः ॥०॥

अन्यच्च ।

[illegible]

"[illegible]
[illegible]

बृहन्नारदीये ।

[illegible]

पद्मपुराणे ।

[illegible]

ध्यायन्ति तुलसीमूलाद्बुधे चिन्वन्ति नरोत्तमाः ।
सिञ्चन्ति तुलसीं ये च विज्ञेयास्ते च वैष्णवाः ।
तुलसीमूलमृद्भिश्च तिलकानि नयन्ति ये ।
तुलसीकाष्ठमण्डैश्च विज्ञेया वैष्णवा जनाः ।
गङ्गास्नानपरा ये च गङ्गानामपरायणाः ।
गङ्गामाहात्म्यवक्तारो विज्ञेयास्ते च वैष्णवाः ।
धात्रीफलसजो येषां गलेषु कमलानन ।
धत्तन्ति ये च सततैर्विज्ञेयास्ते च वैष्णवाः ।
शालग्रामशिला येषां गृहे वसति सर्वदा ।
शास्त्रं भागवतञ्चैव ज्ञेयास्ते वैष्णवा जनाः ।
सम्मार्जयन्ति ये नित्यं मम स्थानानि सर्वदा ।
दीपं यच्छन्ति तत्रैव ज्ञेयास्ते वैष्णवा जनाः ।
जीर्णं मन्मन्दिरं ये च कुर्वते नूतनं पुनः ।
तन्नायनञ्च शोभाञ्च ज्ञेयास्ते वैष्णवा जनाः ।
अभयं ये च यच्छन्ति भीतेभ्यश्चतुरानन ।
विद्यादानञ्च विप्रेभ्यो ज्ञेयास्ते वैष्णवा जनाः ।
क्षुत्तृट्प्रपीडितेभ्यश्च ये यच्छन्त्यन्नमम्बु च ।
कुर्युर्ये रोगिशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ।
आरामकारिणो ये च पिप्पलारोपिणोऽपि च ।
गोसेवां ये च कुर्वन्ति ज्ञेयास्ते वैष्णवा जनाः ।
अन्नमभक्ता ये सततं पितृयज्ञं प्रकुर्वते ।
कुर्वन्ति दीनशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ।
तडागग्रामकर्त्तारः कन्यादानप्रदाश्च ये ।
सेवन्ते सद्गुरुं ये च ज्ञेयास्ते वैष्णवा जनाः ।
सेवन्ते ज्येष्ठभगिनीं ज्येष्ठं भ्रातरमेव च ।
परनिन्दां न कुर्वन्ति ज्ञेयास्ते वैष्णवा जनाः ।
देवस्वं ब्राह्मणस्वं परस्वञ्च चतुर्मुख ।
पश्यन्ति विषवद्ये च ज्ञेयास्ते वैष्णवा जनाः ।
मायाकपटरहिताः प्रियभक्तिपरायणाः ।
चतुर्दशीव्रतरता ज्ञेयास्ते वैष्णवा जनाः ।
बहुनात्र किमुक्तेन भाषितेन पुनः पुनः ।
मदर्चां ये च कुर्वन्ति ज्ञेयास्ते वैष्णवा जनाः ।
वैष्णवेषु गुणाः सर्व्वे दोषलेशो न विद्यते ।
तस्मात्त्वमपि भव वैष्णवो भव साम्प्रतम् ।
समाराधय मां नित्यं क्रियायोगैः प्रजापते ।
सर्व्वमेव शुभन्ते भविष्यति न संशयः ।
भूयः पूर्व्वमानमिव सृष्टवती सकलं जगत् ।
इत्युक्त्वान्तर्दधे देवश्चैव जगदीश्वरः ।
ततस्तु पूर्ववद्ब्रह्मा ससर्ज सकलं जगत् ।
क्रियायोगैर्हरिं यष्ट्वा जगाम परमं पदम् ।
ये पठन्ति समाध्यायं भक्त्या नारायणाग्रतः ।
सर्व्वपापविनिर्मुक्ता यान्ति यान्ति हरेः परम् ।"

इति पाद्मे क्रियायोगसारे ५ अध्यायः ॥०॥

कापिलिङ्ग उवाच ।

"कालिकाले कलिर्दुष्टो दयालुः परमो मम ।
कलिर्दिष्टदोषैर्मुक्तं संवादं प्रवीमि ते ।
[illegible]
[illegible] यन्न शक्यं कर्तुमन्यैः ।
[illegible]
[illegible] वैष्णवानाम् ।"

इति [illegible] अध्यायः ॥०॥ अपि च ।

"कर्म्मयथावि कर्मानि [illegible]

अपि न भौतिको देहो वैष्णव
इति कल्पसूत्रे ।

वैष्णवाचमनं, क्ली, ([illegible]
पूजादिपूर्ब्बकर्त्तव्यकर्त्तव्याचमन [illegible]
[illegible]
मासादि । यथा,—
"त्रिःपाने केशवं नारायणं
प्रक्षालने द्वयोः पाणोर्मौलिम
मधुसूदनमेकञ्च माधवं [illegible]
[illegible]
प्रक्षालने पुनः पाणोर्द्वयोरेव
पद्मनाभं प्रोक्षणे तु [illegible]
वासुदेवं हृदि [illegible]
[illegible]
[illegible]

वैष्णवाचारः, पुं, ([illegible]
[illegible]

[illegible]

...नयेन्नोद्यान यक्षीयांश्चैत्यया: ॥
...मेध्यास्त्राणि नाभिवीक्षेत च प्रभो ।
...त्याश्चैव शवगन्धो हि सोमज: ॥
...र्यं चैवतरं श्लेष्मगोपवनानि च ।
...शयनकर्मेष वर्ज्जयेन्निशि सर्व्वदा ॥
...मिमण्योतिष्ठायां नातिक्रमेद्बुध: ।
...शून्याटवीं गच्छेन्न च शून्यं गृहं व्रजेत् ॥
...केशकण्टकामेध्यबलिभस्मतुषांस्तथा ।
...स्नानार्द्रां धरणीं चैव दूरत: परिवर्ज्जयेत् ॥
...नाश्रयेत् कांश्चिन्न जिह्मं रोचयेद्बुध: ।
...नैव च यालांश्चिरं तिष्ठेन्न चोत्थित: ॥
...जागरं चैव तथा देवपराङ्मुखान् ।
...सक्रियातीतान् दूरत: परिवर्ज्जयेत् ॥
...ङ्गारस्पर्शो वहतु स्थानासने बुध: ।
...न तथा शय्यां यायामश्च नरेश्वर ॥
...: दंष्ट्रिणश्चैव प्राज्ञो दूरेण वर्ज्जयेत् ।
...वायश्च राजेन्द्र पुरोवातातपौ तथा ॥
...स्नान स्वपेन्नग्नो न चैवोपस्पृशेद्बुध: ।
...श्च नाचामेद्देवार्च्चाश्च वर्ज्जयेत् ॥
...: प्रवर्त्तेत द्विजवाचनके जपे ।" * ॥
...।
...निर्धूनयेत् केशांशामाचामेन्नैव चोत्थित: ।
...नाक्रमेत् पादं न पूज्याभिमुखं नयेत् ॥
...ं नैव गच्छेद्देवागारचतुष्पथान् ।
...मुञ्चोच्च तथा विपरीतान्न दक्षिणाम् ॥
...सोमार्क्काग्निवायूनां पूज्यानाञ्च न संमुखम् ।
...शौचविण्मूत्रसञ्चारांश्च पण्डित: ॥
...मनदेवतादि पन्थानं नावमन्नयेत् ।
...भूदूरस्थानि सर्व्वदैव न लङ्घयेत् ॥
...देवद्विजौ नामकाले प्रशस्तके ।
...क्षकल्पाद्यौ न होमे न महाजने ॥
...सो नावमन्येत न चाधौ विन्यसेद्बुध: ।
...योषिद् भर्त्सनासु नाधिकुर्य्यात् कदाचन ॥
...स्वपरश्चाप्यपूज्यानामभिवाद्य च ।
...ऋतावेत् यथात् प्राज्ञ: सदाचारपरो नर: ॥
...ब्राह्मणेभ्योऽर्थादौ तु पर्व्वस्वाध्यायकादिषु ।
...रं बुध: कुर्य्यादुपरागादिके तथा ॥
...रादिके च न्यायी दण्डी राष्ट्रादेषु च ।
...लोकामी वै सोपानत्क: सदा व्रजेत् ॥
...न त्रियंक् दूरं वा निरीक्षन् पर्य्यटेद्बुध: ।
...नाथं मनोपदिष्टं नरो गच्छेद्विलोकयन् ।" * ॥
...।
...युक्तं हितं चैतदिति मत्वा न तद्वदेत् ।
...परीहितं वाक्यं यद्यप्यत्यन्तमप्रियम् ॥
...परानुपकाराय यद्देवं परत्र च ।
...वा मनसा वाचा तदेव मतिमान्
भवेत् ।" * ॥
...पुराणे सदाचारपद्धतौ ।
...नमस्कारमिति दूर्व्वादिको वै ह्यभिवादने ।
...र्मं धर्मं दानं दैवताभ्यर्चनं तथा ॥
...नरोदवै च धर्मं नाभिवादयेत् ।
...पापं प्रकर्व्वं [illegible]

सङ्गानश्च शयानश्च अभ्यक्तशिरसस्तथा ।
भिक्षान्नधारिणं चैव रमन्तं जलमध्यगम् ॥
कृताभिवादनो यो न कुर्य्यात् प्रत्यभिवादनम् ।
नाभिवाद्य: स विज्ञेयो यथा शूद्रस्तथैव स: ।" *
मार्कण्डेयपुराणे मदालसालर्कसंवादे ।
"असत्प्रलापमनृतं वाक्पारुष्यञ्च वर्ज्जयेत् ।
असच्छास्त्रमसद्वादमसत्सेवाञ्च पुत्त्रक ॥
केशप्रसाधनादर्शदर्शनं दन्तधावनम् ।
पूर्व्वाह्ण एव कार्य्याणि देवतानाञ्च तर्पणम् ॥
उदक्यादर्शनं स्पर्शं वर्ज्जेत् सम्भाषणं तथा ।
न चाभीक्ष्णं शिर:स्नानं कुर्य्यान्निष्कारणं नर: ॥
शिर:स्नातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत् ।
पन्था देयो ब्राह्मणानां राज्ञो दु:खातुरस्य च ॥
विद्याधिकस्य गुर्व्विण्या भारार्त्तस्य महीयस: ।
मूकान्धबधिराणाञ्च मत्तस्योन्मत्तकस्य च ॥
पुंश्चल्या: कृतवैरस्य बालस्य पतितस्य च ।
उपानद्वस्त्रमाल्यानि धृतान्यन्यैर्न धारयेत् ॥
उपवीतमलङ्कारं करकञ्चैव वर्ज्जयेत् ।
न शिरोबाहुजङ्घश्च प्राज्ञस्तिष्ठेत् कदाचन ॥
न चापि विक्षिपेत् पादौ वाससी न च धूनयेत् ।
मूर्खोन्मत्तव्यसनिनो विरूपान् मायिनस्तथा ॥
न्यूनाङ्गांश्चाधमांश्चैव नोपहासेन दूषयेत् ।
परस्य दण्डं नोद्यच्छेत् शिक्षार्थं पुत्त्रशिष्ययो: ॥
नानुलेपनमादद्यादद्यात: स्नातकी क्वचित् ।
न चापि रक्तवासा: स्याच्चित्रवासधरोऽपि वा ॥
क्षुरकर्म्मणि वान्ते च स्त्रीसम्भोगे च पुत्त्रक ।
स्नायीत चैलवान् प्राज्ञ: कटभूमिमुपेत्य च ।
द्युगपच्चलमपि च विश्वयान्न विचक्षण: ।"
कटभूमिं श्मशानम् ।
"नाचक्षीत धयन्तीं गां जलं नाञ्जलिना
पिबेत् ।"
धयन्तीं पिबन्तीम् ।
"शौचकालेषु सर्व्वेषु गुरुष्वल्पेषु वा पुन: ।
न विलम्बेत शौचार्थं न मुखेनानलं धमेत् ॥
शिशुर्वो गणिकाद्याश्च दुष्टसङ्गादयोऽपि च ।
अजाश्वौ सुखतो मेध्यौ न गौर्न तृणस्य चाननम् ।
मातु: प्रस्रवणे मेध्यं शकुनि: फलपातने ।
उदक्याशौचिन्दाश्च सूतिकान्त्यादयोऽपि च ।
स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिण: ।
नारं स्पृष्ट्वास्थि सस्नेहं स्नात: शुध्यति मानव: ।
आचम्यैव तु नि:स्नेहं गामालभ्यार्कमीक्ष्य वा ॥
न चालयेत् जलं क्लिष्टं वीरहोमौ तथा श्लिष्टम् ।
देवतापितृसच्छास्त्रयज्ञमन्त्रादिनिन्दकै: ।
कृत्वा तु स्पर्शमालापं शुद्ध्यतेऽर्कावलोकनात् ॥
अवलोक्य तथोदक्यामन्त्यजं पतितं मृतम् ।
विधर्म्मिसूतिकाषण्डविवस्त्रान्त्यावसायिन: ।
मृतनिर्यातकाश्चैव परदाररताश्च ये ।
एतदेव हि कर्त्तव्यं प्राज्ञै: शोधनकारकम् ।" * ॥
किञ्च ।
"यद्यपि [illegible] ।
[illegible] ।" * ॥
[illegible] ।

"उपासते न ये पूर्व्वां द्विजा: सन्ध्यां न पश्चि-
माम् ।
सर्व्वांस्तान् धार्म्मिको राजा शूद्रकर्म्मणि योज-
येत् ॥
दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टोत्सर्ज्जनं भूप सदा कार्य्यं हितैषिणा ॥
उच्छिष्टो न स्पृशेच्छीर्षं सर्व्वे प्राणास्तदाश्रया: ।
केशग्रहान् प्रहारांश्च शिरस्येतानि वर्ज्जयेत् ॥
न पाणिभ्यामुभाभ्यान्तु कण्डूयाच्चात्मन: शिर: ।"
किञ्च ।
"सुवासिनीं गुर्व्विणीञ्च वृद्धं बालातुरौ तथा ।
भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ॥
अघं स केवलं भुङ्क्ते यदि गोवाहनादिके ।
यो भुङ्क्ते भाजयेत्तु प्रेषितानप्रदाय च ॥
वर्ज्जयेद्दधि सक्तुञ्च रात्रौ धानाश्च वासरे ।"
किञ्च ।
"सजञ्च नापकर्षेत न बहिर्धारयीत च ।
रहे पारावता धन्या: शुकाश्च सहकारिका: ।"
कौर्म्मे व्यासगीतायाम् ।
"द्रव्यं वा यदि वा शाकं फलं वा जलमेव वा ।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते ॥
न राज्ञ: प्रतिगृह्णीयान्न शूद्रात् पतितादपि ।
नान्यस्मादयाचकत्वञ्च निन्दिताद्वर्ज्जयेद्बुध: ॥
नित्यं याचनको न स्यात् पुनस्तञ्चैव याचयेत् ।
प्राणानपहरत्येष याचकस्तस्य दुर्म्मति: ॥
न देवद्रव्यहारी स्याद्विशेषेण द्विजोत्तमा: ।
ब्रह्मस्वञ्च नापहरेदापद्यपि कदाचन ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
देवस्वं चापि यत्नेन सदा परिहरेत्तत: ॥
न धर्म्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
व्रतेन पापं प्रच्छाद्य कुर्व्वन् स्त्रीशूद्रदम्भनम् ॥
प्रेत्येह चेदृशो विप्रो गर्ह्यते ब्रह्मवादिभि: ।
देवद्रोहाद्गुरुद्रोह: कोटिकोटिगुणाधिक: ॥
ज्ञानापवादो नास्तिक्यं तस्मात् कोटिगुणा-
धिकम् ।" * ॥
किञ्च ।
"हिमवद्विन्ध्ययोर्मध्ये पूर्व्वपश्चिमयो: शुभम् ।
मुक्ता समुद्रयोर्देशं नान्यत्र निवसेद्द्विज: ॥
कृष्णो वा यत्र चरति मृगो नित्यं स्वभावत: ।
पुण्याश्च विश्रुता नद्यस्तत्र वा निवसेद्द्विज: ।
अर्द्धक्रोशान्नदीकूलं वर्ज्जयित्वा द्विजोत्तमा: ।"
किञ्च ।
"[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

कर्णौ पिधाय गन्तव्यं न चैनमवलोकयेत् ।
वर्ज्जयेद्वै रहस्यञ्च परेषां गूहयेद्बुधः ॥
विवादं स्वजनैः सार्द्धं न कुर्य्याद्वै कदाचन ।
न पापं पापिनां ब्रूयादपापं वा द्विजोत्तमाः ॥
नेक्षेतोद्यन्तमादित्यं शशिनं वानिमित्ततः ।
नास्तं यान्तं न वारिस्थं नोपसृष्टं न मध्यगम् ॥
तिरोहितं वाससा वा नादर्शान्तरगामिनम् ।
नग्नां स्त्रियं पुमांसं वा पुरीषं मूत्रमेव वा ॥
पतितव्यङ्गचाण्डालानुच्छिष्टान्नावलोकयेत् ।
न मुक्तवस्त्रनारीं वा नोन्मत्तं मत्तमेव वा ॥
स्पृशेन्न भोजने पत्नीं नैनामीक्षेत मेहतीम् ।
ऋतुवर्त्तीं जृम्भमाणां वा नासनस्थां यथासुखम् ॥
नोदके चात्मनो रूपं न कूलं श्वभ्रमेव वा ।
न शूद्राय मतिं दद्यात् कृसरं पायसं दधि ॥
नोच्छिष्टं वा घृतमधु न च कृष्णाजिनं हविः ।
न कुर्य्यात् कस्यचित् पीड़ां सुतं शिष्यञ्च ताड़-
येत् ॥
नाम्नागमनमन्येत दैन्यं यत्नेन वर्ज्जयेत् ।
न च मिथ्याम सत् कुर्य्यान्नात्मानं शंसयेद्बुधः ॥
न नग्नाय नदीं ब्रूयात् पर्व्वतेषु न पर्व्वतम् ।
आवसेत्तेन नैवापि यस्त्यजेत् सहवासिनम् ॥
शिरोऽभ्यङ्गावशिष्टेन तैलेनाङ्गं न लेपयेत् ।
रोमाणि च रहस्यानि स्वानि खानि च न
स्पृशेत् ॥
न पाणिपादवाङ्नेत्रचापलानि समाश्रयेत् ।
नाभिहन्याज्जलं पद्भ्यां पाणिना न कदाचन ॥
न घातयेदिष्टकाभिः फलानि न फलेन च ।
न म्लेच्छभाषां शिक्षेत कर्षेच्च पदासनम् ॥
नोत्सङ्गे भक्षयेद्भक्ष्यान् गात्रं संवेशयेन्न हि ।
नाप्तैः क्रीड़न् धावेत स्त्रीभिर्द्वारं न चाचरेत् ॥
न दन्तैर्नखलोमानि छिन्द्यात् सुप्तं न बोधयेत् ।
न बालातपमासेवेत् प्रेतधूमं विवर्ज्जयेत् ॥
नैकः सुप्यात् शून्यगृहे स्वयं नोपानहौ वहेत् ।
नाकारणाद्वा निष्ठीवेन्न बाहुभ्यां नदीं तरेत् ॥
न पादक्षालनं कुर्य्यात् पादेनैव कदाचन ।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः ॥
नाभिप्रसारयेद्देवान् ब्राह्मणान् गामथापि वा ।
न स्पृशेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणा-
नलान् ॥
न चैवान्नं पदा वापि न देवप्रतिमां स्पृशेत् ।
नोपरिष्टदुपस्थस्य धरणीं नो चाभिक्रमेत् ॥
चैत्यं वृक्षं वैव छिन्द्यान्नाप्सु ष्ठीवनमाचरेत् ।
न चापि लङ्घयेद्धीमान् नोपरुध्यादधः क्वचित् ॥
न चेत् पादनः कुर्य्यात् निजवृहं विधि त्यजेत् ।
न शूद्रमरोहेत नाचक्षीतास्थितः क्वचित् ॥
अपो न प्रक्षिपेन्नद्यां नाद्भिः प्रक्षमयेत्तथा ।
हस्तश्वरकमार्गेण वा न स्वयं सारयेत् परान् ॥
अरत्नमन्त्र मन्त्रं वा विरुद्धं न प्रयोजयेत् ।
मूलस्थानोद्वमस्थाने कौमान्तं वा करेण तु ।
न भिन्द्यात् पूर्व्वसमयं कथोरेणं कदाचन ।
मत्सरं मन्त्र वाचान् पक्षिणो न च
बोधयेत् ॥

कारयित्वा स्वकर्म्माणि कारून् विद्वान् न
वञ्चयेत् ।
वहिर्गन्धञ्च कुद्वारप्रवेशञ्च विवर्ज्जयेत् ॥
नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्जयेत् ।
न वीजयेद्वा वस्त्रेण न देवायतने स्वपेत् ।
नाग्निगोब्राह्मणादीनामन्तरेण व्रजेत् क्वचित् ।
नाक्रामेत् कामतश्छायां ब्राह्मणानां गवामपि ॥
स्वान्तु नाक्रामयेच्छायां पतिताद्यैर्न रोगिभिः ।
वर्ज्जयेन्मार्ज्जनीरेणुं स्नानवस्त्रघटोदकम् ॥
नाश्नीयात् पयसा तक्रं न वीजान्युपजीवयेत् ।
विवत्सायाश्च गोः क्षीरमौष्ट्रं वा निर्द्दशस्य च ।
आविकं सन्धिनीक्षीरमपेयं मनुरब्रवीत् ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुध्येत परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रं तस्माच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमिष्यते ॥”
मार्कण्डेये ।
“भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्वा तु न भोक्तव्यं यथा विभवमात्मनः ॥”
काशीखण्डे ।
“नैवोत्कटासनेऽश्नीयान्नाग्नौ चाशुचि क्षिपेत् ।
श्राद्धं कृत्वा परश्राद्धे योऽश्नीयात् ज्ञानवर्जितः ।
दातुः श्राद्धफलं नास्ति भोक्ता किल्विषभुग्-
भवेत् ॥
नोत्पाटयेल्लोमनखं दशनेन कदाचन ।
करजैः करजच्छेदं करेणैव विवर्ज्जयेत् ।
अपद्वारे न गन्तव्यं स्ववेश्मपरवेश्मनोः ।
उल्कोपप्लुतदेवार्च्चनं दूरात् परित्यजेत् ।
निष्ठीवनञ्च वेश्मानं यत्नात् दूरे विनिःक्षिपेत् ।
उद्धृत्य पञ्चमृत्पिण्डान् स्नायात् परजलाशये ।
अनुद्धृत्य च तत्कर्त्तुरेनसः स्यात्तुरीयभाक् ॥”
गार्ग्ये ।
“यस्तु पाणितले भुङ्क्ते यस्तु फुत्कारसंयुतम् ।
प्रसृताङ्गुलिभिर्यस्तु तस्य गोमांसवच्च तत् ॥”
अत्रिस्मृतौ ।
“अनापितस्नातो या गौर्यावत्राभयचारिणी ।
तयोर्दुग्धं न होतव्यं न पातव्यं कदाचन ॥
अजा गावो महिष्यश्च अमेध्यमपि भक्षयेत् ।
दश्ये वत्से च तद्दुग्धं गोमयञ्च विवर्ज्जयेत् ।
अकृत्वा दन्तकाष्ठञ्च प्रक्षालनक्रमं तथा ।
मृत्तिकाप्राशनञ्चैव तुल्यं गोमांसभक्षणैः ॥”
अत्रापवादो मनुस्मृतौ ।
“नाद्यन्तं सेवयेदेव नद्यां परमाद्धृते ।
प्रत्यक्षे अपि तौ भाष्ये निषिद्धजन्यगोचरः ॥”
अत्रिस्मृतौ ।
“दिवा कपित्थच्छाया च निशायां दधिभो-
जनम् ।
कार्पासं दन्तकाष्ठञ्च शक्रादपि हरेत् श्रियम् ॥”
विष्णुस्मृतौ च ।
“कांस्यपात्रे पयः पीत्वा शूद्रस्तु नरकं व्रजेत् ।
सोमपीथं निवेदिमो विप्रः स्यादन्यथा पशुः ॥
परिहर्त्तुं पुनर्नैवं तत्पश्चात्तोलमन्यथा ।

यद्वत्र लिखितं किञ्चित्
आचाराद्वैष्णवाः सन्ति परे...
ते लोकप्राप्ततो
नित्यत्वमेषां माहात्म्यमथ...

इति श्रीहरिभक्तिविलासे
नाम ११ विलासः ॥

वैष्णवी, स्त्री, (विष्णोरियम् ।
स्त्रियां ङीप् ।) विष्णुशक्तिः । यथ,
“एषा विष्णुशक्तिवद्दिष्टा
एषा श्वेता परा दृष्टिः
एषैव कृष्णा तमसि रौद्री देवी
अष्टादश यथा कोशो वैष्णवी
या विष्णो राजसी शक्तिः
इति वाराहे ।
अपि च ।
“शङ्खचक्रगदाधारी विष्णुमाता
विष्णुरूपापरा
इति देवीपुराणे ॥
अपरञ्च ।
“विष्णुभक्ता विष्णुरूपा
सृष्टौ च विष्णुना सृष्टा वैष्णवी
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ॥
दुर्गा । इति शब्दरत्नावली ।
पद्मपुराणम् ।
“विष्णोः पादप्रसूतासि
पाहि
इत्यादि आह्निकाचारतत्त्व
मन्त्रः । अन्यच्च ।
सर्व्वत्र रक्ष मां नित्यं महा
इति
अपराजिता । इति शब्दचन्द्रिका ।
इति राजनिर्घण्टः । तुलसी ।
माता ।

वैसारिणः, पुं, (विशेषेण सरतीति ।
स एव । “विसारिणो मत्स्ये ।”
इति अण् ।) मत्स्यः । इत्यमरः ।

वैसृपनं, क्ली, (विशेषेण सृपनमिति
तदेव । स्वार्थे अण् ।)
धारणम् । इति केचित् ।

वैहार्य्यः, त्रि, (विशेषेण ह्रियते इति
ण्यत् । विहार्य्य एव । स्वार्थे ष्यञ् ।
हासेन लालनीयः ।
सम्बन्धिः । यथा —
“यथा वाक्येषु नारीषु वैहार्य्येषु तथै
सम्बन्धेषु निपातेषु तथापराधेषु वा
अनृतं नोल्लङ्घ्ये मे तेन सत्येन
इति महाभारते उप

वैहासिकः, पुं, (विहास+ठक् ।
करोति यः । भण्ड इति ख्यातः ।

...ण्टकः ३ वैशिखिकः ४ विट्चरः ४
...रामोचक ५ शौलिकः ६ । इति हेमचन्द्रः ॥
(यथा, नैषधे । १६ । ६२ ।
"...क्रोडीकृतकुचकलश...
...स्मरकृतनखक्षतास्तैर्व्यपदिश्यतेऽयम् ॥")
...ढा, स्त्री, दासी । यथा,—
"वोढा वोढा च चेटी च दासी च कुट-
हारिका ॥"
इति हेमचन्द्रः ॥
...ः, पुं, गुवाकः । इति शब्दरत्नावली ॥ जटा-
धरे भूरियोगे च वोड़ इति पाठः ॥
...ः, पुं, गोनसमर्पः । वोड़ा इति भाषा । यथा ।
गोनासो गोनसो वोड़ः । इति भरतधृत-
त्रिकाण्डशेषः ॥ मत्स्यविशेषः । इति मेदिनी ॥
...ढ़ी, स्त्री, पणचतुर्थांशः । इति मेदिनी ॥ वुड़ि
इति भाषा ॥
...ढ्य:, त्रि, वहधातोस्तव्यप्रत्ययेन निष्पन्नमेतत् ।
वहनीयः । धार्य्यः । इति मुग्धबोधव्याकरणम् ॥
(यथा, हरिवंशे । ७५ । ८८ ।
"वोढ्या दुष्टमनैव धुःसदा रथमर्हसि ॥"
परिणेतव्यः । यथा, महाभारते ।१।१८।१८४।
"न दैवेभ्यः प्रदातव्या न वोढ्या तथाविधा ॥")
...ढा, [ऋ] पुं, (वहतीति । वह+तृच् ।
"सहिवहोरोदवर्णस्य ।" ६ । ३ । ११२ । इति
अकारस्यौकारः ।) भारिकः । (यथा, भाग-
वते । ५ । १० । २ ।
"विषमगतां शिबिकां रहूगण उपधार्य
पुरुषानधिवहत आह हे वोढारः साध्वति-
क्रमत ।") सूतः । परिणेता । इति शब्द-
रत्नावली ॥ (यथा, मनुः । ८ । २०४ ।
"अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते ।
उभे ते एकशुल्केन वहेदित्यब्रवीन्मनुः ॥")
...सः । इति मेदिनी ॥ अनड्वान् । ऋषभः ।
इति राजनिर्घण्टः ॥ (यथा, महाभारते ।
११ । २६ । ५ ।
"तपोवीर्यं ब्राह्मणी धत्ते गर्भं
गौर्वोढारं धाववारं तुरङ्गी ॥"
...वहनकर्त्तरि, त्रि । यथा, कुमारे । १ । १५ ।
"भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः ।")
...ढुः, पुं, मुनिविशेषः । यथा,—
"सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
सर्व्वे ते ब्रह्मणः पुत्त्रा महात्मानो महा ॥"
इत्याह्निकाचारतत्त्वम् ॥
...ण्टः, पुं, वृन्तम् । इति शब्दरत्नावली ॥ वोँटा
इति भाषा ॥ किन्तु लिपिकरप्रमादपाठोऽयम् ।
यथा मुग्धबोधे ।
"तथा वोँट इति ख्याते वृन्तं प्रसवबन्धनम् ॥"
...द्रः, त्रि, आर्द्रः । इति त्रिकाण्डशेषः ॥
...दालः, पुं, (वोदः आर्द्रः सन् अलतीति । अल+
अच् ।) मत्स्यविशेषः । बोयालि इति भाषा ।
तत्पर्य्यायः । सहस्रदंष्ट्री २ पाठीनः ३ वदा-
लकः ४ । इति शब्दरत्नावली ॥

वोरकः, पुं, लेखकः । इति त्रिकाण्डशेषः ॥
वोरटः, पुं, कुन्दपुष्पम् । इति त्रिकाण्डशेषः ॥
वोरपट्टी, स्त्री, मन्दुरा । इति शब्दमाला ॥ मादुर
इति भाषा ॥
वोरवः, पुं, धान्यविशेषः । वोरो इति भाषा ।
अस्य गुणाः ।
"वोरवस्तु बुधैः प्रोक्तस्त्रिदोषघ्नः प्रकीर्त्तितः ।
मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः ॥"
इति राजवल्लभः ॥
वोरवाणः, पुं पाटलवर्णाश्वः । इति हेमचन्द्रः ॥
वोलं, क्ली, (वोलयति प्रायशो निमग्नं भवतीति ।
वुल+अच् । यद्वा,वा गतौ विश्वादित्वात् कलच् ।)
स्वनामख्यातगन्धद्रव्यम् । तत्पर्य्यायः । रक्ता-
पहम् २ मुण्डम् ३ सुरसम् ४ पिण्डकम् ५ विषम् ६
निर्लोहम् ७ वर्व्वरम् ८ पिण्डम् ९ गौरसम् १०
रक्तगन्धकम् ११ रसगन्धम् १२ महागन्धम् १३
विश्वम् १४ शुभगन्धम् १५ विश्वगन्धम् १६
गन्धरसम् १७ शफारिः १८ । अस्य गुणाः ।
"वोलञ्च कटु तिक्तोष्णं कषायं रक्तदोषनुत् ।
कफपित्तामयान् हन्ति प्रदरादिकतापहम् ॥"
इति राजनिर्घण्टः ॥
तत्पर्य्यायगुणाः ।
"वोलं गन्धरसः प्राणपिण्डगोपरसाः समाः ।
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनम् ॥
मधुरं कटु तिक्तञ्च दाहस्वेदत्रिदोषजित् ।
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धिकृत् ॥"
इति भावप्रकाशः ॥
वोलः, पुं, (वातीति । वा+कलच् ।) रसगन्धः ।
इत्यमरः ॥
वोलकः, पुं, वेदकः । इति शब्दरत्नावली ॥
वोल्लाहः, पुं, अश्वविशेषः । यथा,—
"वोल्लाहस्त्वयमेव स्यात् पाण्डुकेशरवालधिः ।"
इति हेमचन्द्रः ॥
वोहित्थं, क्ली, यानपात्रम् । इति हेमचन्द्रः ॥
जाहाज इति भाषा ॥
वौ(दौ)द्धं, क्ली, (बुद्धेन कृतम् । बुद्ध+अण् ।) बुद्ध-
कृतनिरीश्वरशास्त्रम् । तत् सर्व्वैः शास्त्रकारैः
दूषितं वेदविरुद्धत्वात् । जिनधर्म्मः । यथा,
"ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम् ।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्म्मणा ॥
गत्वाथ मोहयामास राजपुत्त्रान् बृहस्पतिः ।
जिनधर्म्मं समास्थाय वेदबाह्यं स वेदवित् ॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः ।
वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान् ।
जघान शक्रो वज्रेण सर्व्वान् धर्म्मबहिष्कृतान् ॥"
इति मात्स्ये सोमवंशानुकीर्त्तनं नाम २४ अः ॥
बुद्धसम्बन्धिनि, त्रि ॥
वौषट्, अ, (उह्यते अनेन हविरिति । वह+डौषट्प्र-
त्ययात् वौषट् ।) देवहविर्दानमन्त्रः । तत्पर्य्यायः ।
स्वाहा २ श्रौषट् ३ वषट् ४ स्वधा ५ । इत्य-
मरः ॥ एते पञ्च शब्दा देवहविर्दाने वह्नि-
सुतायाहुतौ वर्त्तन्ते । देवाय हविषो दानं देव-
हविर्दानम् । तत्र देवा इन्द्रादयः अत्र पितरो
देवता इति स्तुतेस्तेऽपि देवा हविर्दान इत्यनेन
एते मन्त्रा इति सूचितम् । अमन्त्रके स्वाहयैव
हविर्भुक्तमिति रघुः । स्वाहादयं मन्त्रभेदे
स्त्रियां स्वाहाद्वयौ यतीति कोषान्तरम् । स्वाहा
इत्यादि । श्रौषट् तालव्यादि मूर्द्धन्यमध्यम् ।
वौषट् वषट्द्वयं मूर्द्धन्यमध्यम् । स्वधा दन्त्यादि ।
इन्द्राय स्वाहा । इत्यादिप्रयोगः । इति भरतः ॥
व्यंशकः, पुं, (विगतोऽंशो विभागो यस्य ।
छेदादिना प्रायो विभागानर्हत्वादस्य तथा-
त्वम् ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥
व्यंसकः, पुं, (वि+ + अंस+ण्वुल् ।) धूर्त्तः । इति
हेमचन्द्रः ॥
व्यंसितः, त्रि, (वि+अंस+क्तः ।) प्रतारितः ।
इति त्रिकाण्डशेषः ॥
व्यक्तः, त्रि, (वि+अञ्ज व्यक्तौ+क्तः ।) प्राज्ञः ।
इत्यमरः ॥ स्फुटः । इति मेदिनी ॥ (यथा,
साहित्यदर्पणे । ३ । १ ।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥")
पुं, विष्णुः । यथा,—
"व्यक्तो वायुरधोक्षजः ।"
इति तस्य सहस्रनामस्तोत्रम् ॥
व्यक्तदृष्टार्थः, पुं, (व्यक्तं स्फुटं यथा स्यात् तथा
दृष्टोऽर्थो येन ।) साक्षी । तत्पर्य्यायः । प्रत्यक्षी
२ । इति त्रिकाण्डशेषः ॥
व्यक्तरूपः, पुं, (व्यक्तं रूपं यस्य ।) विष्णुः । यथा,
"अव्यक्तो व्यक्तरूपश्च सहस्रजिदनन्तजित् ।"
इति तस्य सहस्रनामस्तोत्रम् ॥
स्पष्टरूपयुक्ते, त्रि ॥
व्यक्तिः, स्त्री, (व्यज्यतेऽनयेति । वि+अञ्ज+
क्तिन् ।) पृथगात्मिका । इत्यमरः ॥ जनः । इति
हेमचन्द्रः ॥ स्फुटता च ॥ (यथा, रघुः ।१।१०।
"तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि
वा ॥"
भूतमात्रम् । यथा, गीतायाम् । ८ । १८ ।
"अव्यक्ताद्व्यक्तयः सर्व्वाः प्रभवन्त्यहरागमे ।"
"व्यक्तयश्चराचराणि भूतानि ।" इति तट्टी-
कायां स्वामी ॥ न्यायशास्त्रोक्तपदार्थः ।
यथा, साहित्यदर्पणे । २ । २५ ।
"सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥")
व्यग्रः, त्रि, (विगतं अग्रं अवलम्बनम् । अग्र+अन्ये-
ष्वपि साधुः ।) आसक्तः । (यथा, महा-
निर्व्वाणतन्त्रे । ३ । १२४ ।
"पुत्त्रा धनार्ज्जने व्यग्राः सदा अधमनसः ।")
आकुलः । इत्यमरः ॥ (यथा, कुमारे ।७।२।
"वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् ।"

व्यञ्जनम्। इति क्षीरस्वामी। यथा, माघे। ११। १८।

"स्वं व्यञ्जनं दिविजादनेन
[illegible]")

पुं, चिह्नः। यथा,—

"[illegible]"

इति [illegible]।

[illegible] पुं, ([illegible]) [illegible]।

इति [illegible]। ([illegible]) तस्य लक्षणं यथा,—

"[illegible]"

इति माधवकरः।

[illegible]

"[illegible]"

इति [illegible]।

[illegible]

शालयवगोधूमाः। तैलस्नेहमम्। अधिकाचिकारकत्वञ्च। इति राजवल्लभः॥

व्यञ्जकः, पुं, (व्यनक्तीति। वि + अन्ज + ण्वुल्।) अभिनयः। इत्यमरः॥ हृदगतक्रोधादिभावाभिव्यञ्जके। व्यनक्तीति, व्यञ्जकः। अन्ज व्यक्ति गति म्रक्षणेषु क्तः। आङ्गिकवाचिकसात्त्विकाहार्य्यभेदात् व्यञ्जकश्चतुर्विधः। अभिमुखं नीयते अर्थोऽनेन इति अभिनयः। णी ञ प्रापणे अप्। हस्तादिभिः प्रकाशतादिप्रदर्शनमभिनयः। घटाद्याकारद्योतकं करादिसंस्थानमभिनयः इत्यन्योऽपि। इति भरतः॥ व्यञ्जनया प्रतिपादकः। (यथा, साहित्यदर्पणे। २। ११।

"अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा॥")

प्रकाशके, त्रि। यथा, मनुः। २। १८।

"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मयोगं निबोधत॥")

व्यञ्जनं, क्ली, (व्यज्यते व्यक्तीक्रियते अन्नादि संयोज्यतेऽनेनेति। वि + अन्ज + ल्युट्।) अन्नोपकरणम्। तत्तु सूपशाकादि। इति राजनिर्घण्टः॥ तत्पर्य्यायः। तेमनम् २ निष्ठानम् ३। इत्यमरः॥ तेमः ४। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। १०। १।

"आगो भर व्यञ्जनं गामश्वमभ्यञ्जनम्॥")

अस्य गुणाः।

"व्यञ्जनं प्राकसत्त्वाद्यं [illegible] पृथक् पृथक् पुनरिदम्।
सदैव येन येनेह व्यञ्जनं मनुष्यमानयोः।
तस्य तस्य यथोद्दिष्टगुणदोषैर्विभावयेत्॥"

इति राजवल्लभः।

व्यञ्जनविशेषगुणाः तत्तच्छब्दे द्रष्टव्याः। ●। चिह्नम्। (व्यञ्जना। यथा, साहित्यदर्पणे। ३। १८।

"[illegible] तस्य व्यञ्जकरूपिणि॥")

श्मश्रु। (यथा, महाभारते। ५। १५८। ११।

"[illegible] सुतं प्रत्यात्पत्तं स्वयम्।
[illegible]॥")

अवयवः। चिह्नम्। इति मेदिनी॥ स्त्रीपुंसयोरंशुद्वेगः। ककु [illegible]। [illegible]। तत्तु ककारादिहकारान्तवर्णाः। इति भरतः। (यथा, साहित्यदर्पणे। १०। ४३०।

"[illegible]
[illegible]॥")

व्यञ्जना, स्त्री, (वि + अञ्ज + णिच् + युच्। टाप्।) शब्दस्य वृत्तिविशेषः। तस्या लक्षणं यथा,—

"विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥"

[illegible]

[illegible]

"[illegible]"

"अनेकार्थस्य शब्दस्य
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना [illegible]
आदिशब्दात् विप्रयोगादयः। तथा,
...ऊर्द्ध्वं रक्षतु मे शार्ङ्गं जङ्घे रक्षतु नन्दकः ॥
...र्ष्णी रक्षतु शङ्खश्च पद्मं मे चरणावुभौ ।
...सर्व्वकार्य्यार्थसिद्ध्यर्थं पातु मां गरुडः सदा ॥
...राहो रक्षतु जले विषमेषु च वामनः ।
...टव्यां नरसिंहश्च सर्व्वतः पातु केशवः ॥
...हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु ।
...सांख्याचार्य्यस्तु कपिलो धातुसाम्यं करोतु मे ॥
...श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः ।
...सर्व्वान् शत्रून् सूदयतु मधुकैटभसूदनः ॥
...ष्णुः सदा विकिरतु किल्विषं मम विग्रहात् ।
...सौ मत्स्यस्तथा कूर्म्मः पातु मां सर्व्वतो दिशम् ॥

त्रिविक्रमस्तु मे देवः सर्व्वान् पापान् निकृन्ततु ।
नरनारायणौ देवौ बुद्धिं पालयतां मम ।
शेषो मे निर्म्मलं ज्ञानं करोत्वज्ञाननाशनम् ।
वडवामुखो नाशयतु कल्मषं यत् कृतं मया ॥
पद्भ्यां ददातु परमो सुखं मूर्द्ध्नां मम प्रभुः ।
दत्तात्रेयः कलयतु सपुत्रपशुबान्धवम् ॥
सर्व्वानरीन्नाशयतु रामः परशुना मम ।
रक्षोघ्नस्तु दाशरथिः पातु नित्यं महाभुजः ॥
शत्रून् मे समरे हन्याद्रामो यादवनन्दनः ।
प्रलम्बकेशिचाणूरपूतनाकंसनाशनः ॥
कृष्णस्य यो बालभावः स मे कामान् प्रयच्छतु ।
अन्धकारं तमो घोरं पुरुषं कृष्णपिङ्गलम् ॥
पश्यामि भयसन्त्रस्तः पाशहस्तमिवान्तकम् ।
ततोऽहं पुण्डरीकाक्षमच्युतं शरणं गतः ॥
धन्योऽहं निर्भयो नित्यं यस्य मे भगवान् हरिः ।
ध्यात्वा नारायणं देवं सर्व्वोपद्रवनाशनम् ॥
वैष्णवं कवचं बद्ध्वा विचरामि महीतले ।
अप्रधृष्योऽस्मि भूतानां सर्व्वदेवमयो ह्यहम् ॥
स्मरणाद्देवदेवस्य विष्णोरमिततेजसः ।
सिद्धिर्भवतु मे नित्यं यथामन्त्रमुदाहृतम् ॥
यो मां पश्यति चक्षुर्भ्यां यांश्च पश्यामि चक्षुषा ।
सर्व्वेषां पापदुष्टानां विष्णुर्बध्नाति चक्षुषा ॥
वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये त्वराः ।
ते छिन्दन्तु च पापं मे मम हिंसन्तु हिंसकान् ॥
राक्षसेषु पिशाचेषु कान्तारेष्वटवीषु च ।
विवादे राजमार्गेषु द्यूतेषु कलहेषु च ॥
नदीसन्तरणे घाते संप्राप्ते प्राणसंशये ।
अग्निचौरनिपाते च सर्व्वग्रहनिवारणे ॥
विद्युत्सर्पविषोद्वेगे रोगे च विघ्नसङ्कटे ।
जप्यमेतज्जपेन्नित्यं शरीरे भयमागते ॥
अयं भगवतो मन्त्रो मन्त्राणां परमो महान् ।
विख्यातं कवचं गुह्यं सर्व्वपापप्रणाशनम् ॥
स्वमायाकृतिनिर्म्माणकल्पान्तगहनो महत् ।
अनाद्यन्त जगद्बीज पद्मनाभ नमोऽस्तु ते ॥
ॐ कालाय स्वाहा । ॐ कालपुरुषाय स्वाहा ।
ॐ कृष्णाय स्वाहा । ॐ कृष्णपुरुषाय स्वाहा ।
ॐ चण्डाय स्वाहा । ॐ चण्डपुरुषाय स्वाहा ।
ॐ प्रचण्डाय स्वाहा । ॐ प्रचण्डपुरुषाय
स्वाहा । ॐ सर्व्वाय स्वाहा । ॐ सर्व्वपुरुषाय
स्वाहा । ॐ नमो भुवनेशाय त्रिलोकधात्रे
इहिटि मिहिटि स्वाहा । ॐ नमो अये अभये
ये ये सत्त्वा या पापचरा वैया दैत्यदानव-
यक्षराक्षसभूतपिशाचकूष्माण्डापस्मारकोच्छा-
दनज्वरादीनामैकाहिकद्वितीयकतृतीयकचातुर्थकमौ-
हूर्त्तिकदिनज्वररात्रिज्वरसन्ध्याज्वरसर्व्वज्वरा-
दीनां लूताकीटकण्टकपूतनाभुजङ्गस्थावरजङ्गम-
विषादीनामिदं शरीरं ममापथ्यं भवतु
तुमुलुस्फुटप्रकटोत्कटविकटदंष्ट्रपूर्व्वतो रक्ष ।
ॐ हैं हैं दिनकर सहस्रकाल समावृतो
जय महिमतो रक्ष । ॐ निवि निवि प्रदीप्त-
ज्वलनज्वालाकारा महा[illegible] [illegible]रतो रक्ष ।
ॐ सिलि सिलि दिलि [illegible] [illegible]हि गौरि

गान्धारि विषमोह विषविषमोहं मोहयतु
स्वाहा । इवियतो रक्ष मां अमुकस्य सर्व्व-
भूतभयोपद्रवेभ्यो रक्ष रक्ष जय जय विजयते
न हीयते विग्रमोऽहं कृतवान् यते । भयरूप
भयदोभयोऽभयं दिशतु ममासात् सादनमच्युतः ।
तदुदरमखिलं विशन्तु लोका युगपरिवर्त्तसहस्रं
यथासमनमिव प्रविशन्ति कलयन्तो ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
सर्व्वज्वरान्मम घ्नन्तु विष्णुर्नारायणो हरिः ॥"
इत्यादिमहापुराणे गारुडे सर्व्वव्याधिहरविष्णु-
कवचं नाम २०० अध्यायः ॥

व्याधिघातः, पुं, (व्याधेर्घातो यस्मात् ।) आर-
ग्वधवृक्षः । इत्यमरः ॥

व्याधितः, त्रि, (व्याधिः संजातोऽस्येति । तारका-
दित्वादितच् ।) व्याधियुक्तः । तत्पर्य्यायः ।
आमयावी २ विकृतः ३ अपटुः ४ आतुरः ५
अभ्यमितः ६ अभ्यान्तः ७ । इत्यमरः ॥ रोगी
८ । इति जटाधरः ॥ (यथा, हितोपदेशे ।
"दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥")

व्याधिहन्ता, [ऋ] पुं, (व्याधेर्हन्ता ।) वाराही-
कन्दः । इति राजनिर्घण्टः ॥ व्याधिघातके,त्रि ॥

व्याधुतः, त्रि, (वि+आ+धु+क्तः ।) कम्पितः ।
इति शब्दरत्नावली ॥

व्याधूतः, त्रि, (वि+आ+धू+क्तः ।) कम्पितः ।
इति शब्दरत्नावली ॥ (यथा, गीतगोविन्दे ।
१ । ३८ ।
"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्ण-
ज्वराः ॥")

व्यानः,पुं, (व्यानिति सर्व्वशरीरं व्याप्नोतीति । वि+
आ+अन+अच् ।) शरीरस्थपञ्चवायुन्तर्गत-
सर्व्वशरीरगवायुः । इत्यमरः ॥ इमे प्राणादयः
पञ्चवायवः शरीरे तिष्ठन्ति ते च नियत-
स्थानस्थाः । यदाहुः ।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥"
इति ॥
एवं तद्व्यापाराश्च यथा,—
"अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादि निमेषादि तद्व्यापाराः क्रमादमी ॥"
इति भरतः ॥
श्रीधरस्वामिमते तत्कर्म्म । व्यायमम् । वाक्-
यमप्रमारणादि । यदाह च ।
"व्यानो व्यानशयत्यङ्गं सर्व्वव्याधिप्रकोपकः ।
महार्त्तनस[illegible] [illegible]दानकारणः ॥
म [illegible] [illegible]र्गुणपर्य्ययेरपि ।
[illegible] [illegible]द्धश्च निरन्तरम् ।
[illegible] [illegible]मर्म्मपदः ॥"
। शारदातिलकटीका ॥

व्यापक [illegible] व्याप्+ण्वुल् ।) [illegible]
[illegible]

[illegible]

अन्तुश्चेयरूपा च द्वापरे संशया प्रिया।
कलौ महाप्रमता च सर्वत्र व्यापिका भवेत्।
कल्पेन भर्म भाषा अमक्षेत्र युगे युगे॥"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे १ अध्यायः॥

व्यापारः, पुं, (वि+आ+पृ+घञ्।) कर्म। यथा,—
"स्यात् प्राणवियोगफलको व्यापारो हननं स्मृतम्।
रागाद्वेषात् प्रमादाद्वा स्वतः परत एव वा॥"

इति प्रायश्चित्ततत्त्वधृतमिताक्षरावचनम्॥

(व्याक्षमम्। इति मल्लीनाथः। यथा, कुमारे। ६। २९।
"व्यापारकम्मणो तत्र व्यापारं कर्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥"
तत्त्वज्ञाने सति तत्प्रयत्नः। इति न्याय-दर्शनम्। यथा, भाषापरिच्छेदे।
"तज्जन्यत्वे सति तज्जन्यजनको व्यापारः सोऽपि बहु-विधः॥")

व्यापारी, [न्] त्रि, (व्यापारोऽस्यास्तीति। व्यापार+इनिः।) व्यापारविशिष्टः। व्याव-सायी। यथा,—
"व्यापारोपार्जिताचारी रत्नादिविक्रयी च यः।
न याति नरकं तस्य नार्जितेन धनं च॥"

इति ब्रह्मवैवर्तपुराणम्॥

व्यापी, [न्] पुं, (व्याप्नोति सर्वमिति। वि+आप+णिनिः।) विष्णुः। यथा,—
"अजरः सर्वगो व्यापी नैकात्मा नैककर्मकृत्॥"

इति महाभारते।

तस्य सहस्रनामस्तोत्रे। १३। १४९। ८४॥ त्रि, व्यापकः। यथा,—
"निगमकल्पितरो वा नृपतेश्च पुण्या सदा तिथिः।
अत्र पुण्यादरस्तस्य पारिकालता॥"

इति तिथ्यादितत्त्वधृतपराशरवचनम्॥

व्यापृतः, पुं, (वि+आ+पृ+क्तः।) कर्म-सचिवः। यथा,—
"नियुक्तो कर्मसचिव आयुक्तो व्यापृतश्च सः॥"

इति हेमचन्द्रः।

[illegible]

व्याप्तं, त्रि, (वि+आप्+क्तः।) [illegible]

[illegible]

व्याप्तिमान्, [त्] पुं, [illegible]

[illegible]

[illegible]

...नि बाधन्ते व्यायामसपरे जनाः॥")

...गुणादि यथा,—

...लाभो हि यदा पथ्यो बलिनो स्निग्ध-
भोजिनाम्।
...शीते वसन्ते च तेषां पथ्यतमः स्मृतः॥
...ऋतुषु सर्व्वेषु नरैरात्महितार्थिभिः।
...र्द्धेन तु कर्त्तव्यो व्यायामो हन्त्यतो यथाम्॥
...ललाटे नासायां यदा घर्म्मः प्रवर्त्तते।
...र्द्धं तं विजानीयाद्वायसोच्छ्वासमेव च॥
...र्यं कर्त्तव्यमथो सोढुं शिशिराद्यिनुता।
...व्याधयोऽपि चाहित्य व्यायामादुपजायते॥
...व्यायामं कुर्व्वतो नित्यं विरुद्धमपि भोजनम्।
...विदग्धं वा निर्द्दोषं परिपच्यते॥
...व्यायामवद्गात्रमथ सौख्यावकर्षणम्।
...व्यायामिनं मर्त्यं मर्द्दयन्त्यरयो बलात्॥
...नं सहसाक्रम्य जरा समधिगच्छति॥
...व्यायामदृढगात्रस्य पद्भ्यामुद्वर्त्तितस्य च।
...व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः॥
...कृतिनो वयो शीघ्रो कायो व्यागी चलातुरः॥
...बालान् वृद्धांश्च सीर्य्यो व्यायामं परिवर्ज्जयेत्॥
...पिपासार्त्तो बालो वृद्धोऽजीर्णी च संत्यजेत्।

...नैत्यादाः सत्त्वानां ... विगं प्रजायते॥
तथा ... जायते॥"
इति काशीखण्डः॥

व्यालीनः, पुं, (वि+आ+लीन+घञ्।) दन्तिविग्रहप्रकारविशेषः। यथा,—
"व्यालीढमतङ्गानां भावः प्रहरणं स्मृतः।
व्यालीनः समवायाभ्यां विच्छिद्य सामसा इति॥
व्यालीनप्रहाराः स्युः सर्व्वाङ्गसंस्थादिषु॥"
इति हेमचन्द्रः॥

(तल्लक्षणं यथा, साहित्यदर्पणे। ६। ४१६।
"व्यालीढमते आलीढ ... ।
... ॥
... ।
... ॥
... ।
... ॥")

व्यालः, पुं, (विशेषेण आसमन्तात् अलतीति। अल भूषणादौ+अच्।) सर्पः। श्वापदः। इत्यमरः॥ (यथा, मनुः। ६। ४६।
"व्यालस्तथा ... ।
... जरायुजाः॥")
दुष्टगजः। इति मेदिनी॥ (यथा, माघे। १२। २८।
"व्यालद्विपा यन्तृभिरुन्मदिष्णवः
कथञ्चिदारादपथेन निन्यिरे॥")
चित्रकः। व्याघ्रः। इति राजनिर्घण्टः॥ राजा। इत्यमरटीकायां मथुरेशः॥

व्यालः, त्रि, (वि+आ+अल+अच्।) शठः। धूर्त्तः। इति जटाधरः॥

व्यालकः, पुं, (व्याल एव। स्वार्थे कन्।) दुष्टगजः। तत्पर्य्यायः। गम्भीरवेदी २ अङ्कुशदुर्द्धरः ३ व्यालकः ४। इति त्रिकाण्डशेषः॥ (श्वापदः। यथा, महाभारते। १३। ११९। ७५।
"जायते व्यालकश्चापि मासं तस्मात्तु मानुषः॥")

व्यालखड्गः, पुं, व्यालनखः। इति राजनिर्घण्टः॥

व्यालगन्धा, स्त्री, (व्यालस्येव गन्धो यस्याः।) नाकुली। इति राजनिर्घण्टः॥

व्यालग्राहः, पुं, (व्यालं गृह्णातीति। व्याल+ग्रह+अण्।) व्यालग्राही। इत्यमरटीकायां भरतः॥ (यथा, मनुः। ८। २६०।
"व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः॥")

व्यालग्राही, [न्] पुं, (व्यालं गृह्णातीति। ग्रह+णिनिः।) सर्पधारी। सर्पखेलकः। साप्डिया इति वादिया इति च भाषा। तत्पर्य्यायः। आहितुण्डिकः २। इत्यमरः॥ जाङ्गुलिः ३ जाङ्गलिः ४ आहितुण्डिकः ५ व्यालग्राहः ६ गारुडिकः ७ विषवैद्यः ८। इति शब्दरत्नावली॥

व्यालजिह्वा, स्त्री, (व्यालस्य जिह्वेव आकृतिर्यस्याः।) महासमङ्गा। इति राजनिर्घण्टः॥ (व्यालजिह्वा च॥)

व्यालदंष्ट्रः, पुं, (व्यालस्य दंष्ट्रेव ...) गोक्षुरः। इति राजनिर्घण्टः॥

व्यालनखः, पुं, (व्यालस्य नख इव आकृतिर्यस्य।) गन्धद्रव्यविशेषः। बघनखा इति हिन्दी भाषा। तत्पर्य्यायः। कूटमः २ चक्रनायकः ३ चक्री ४ चक्रकारः ५ व्याघ्रपत् ६ व्याघ्रनखः ७ दीपिनखः ८ खपुरः ९ व्यालपाणिजः १० व्यालायुधः ११ व्यालबलः १२ व्यालखड्गः १३। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। कषायत्वम्। कफवातकुष्ठकण्डूव्रणनाशित्वम्। वर्ण्यत्वम्। मौक्ष्यप्रदत्वञ्च। इति राजनिर्घण्टः॥

व्यालपत्रा, स्त्री, (व्यालानि तीक्ष्णानि पत्राणि यस्याः।) एर्व्वारुः। इति राजनिर्घण्टः॥

व्यालबलः, पुं, व्यालनखः। इति राजनिर्घण्टः॥

व्यालमृगः, पुं, (व्यालो हिंस्रो मृगः पशुः।) चित्रव्याघ्रः। चिता बाघ इति भाषा। इति महाभारते राजधर्म्मः॥ (यथा, महाभारते। ३। १६६। ३।
"रथनेमिस्वनश्चैव घण्टाशब्दश्च भारत।
पृथक् व्यालमृगाणाञ्च पक्षिणामिव सर्व्वशः॥")

व्यालम्बः, पुं, (विशेषेण आलम्बते इति। वि+आ+लम्ब+अच्।) रक्तैरण्डः। इति वैद्यकम्॥ (लम्बमाने, त्रि। यथा, महाभारते। ७। ८८। १०।
"व्यालम्बहस्तान् संवृत्तान् सपक्षानिव पर्व्वतान्॥")

व्यालायुधं, क्ली, (व्यालस्यायुधं नख इव आकृतिर्यस्य।) नखीनामगन्धद्रव्यम्। इत्यमरटीकायां मथुरेशः॥

व्यालायुधः, पुं, (व्यालस्यायुधमिवाकृतिर्यस्य।) व्यालनखः। इति राजनिर्घण्टः॥

व्यावक्रोशी, स्त्री, (वि+अव+क्रुश+"कर्म्मव्यतिहारे णच् स्त्रियाम्।" ३। ३। ४३। इति णच्। ततः "णचः स्त्रियामञ्।" ५।४।१४। इति स्वार्थे अञ्। "न कर्म्मव्यतिहारे। ७। ३। ६। इति ऐच्-प्रतिषेधः। स्त्रियां ङीप्।) परस्पराक्रोशनम्। इति स्त्रीलिङ्गसंग्रहटीकायां भरतः॥

व्यावभाषी, स्त्री, (वि+अव+भाष+णच्। स्वार्थे अञ्। ङीप्।) व्यावक्रोशी। इत्यमरटीकायां रायमुकुटः॥

व्यावर्त्तः, पुं, (वि+आ+वृत+घञ्।) नाभिकण्टकः। इति शब्दरत्नावली॥ तत्र व्यावर्त्तकोऽपि पाठः॥

व्यावहारी, स्त्री, (वि+अव+हृ+णच्। स्वार्थे अञ्। ङीप्।) परस्परहरणम्। इत्यमरटीकायां भरतः॥

व्यावहासी, स्त्री, (वि+अव+हस+णच्। स्वार्थे अञ्। ङीप्।) परस्परहसनम्। इत्यमरटीकायां भरतः॥

व्यावृत्तः, त्रि, (वि+आ+वृत+क्त।
यथा। इते तु
व्यावृत्तश्च॥ (...

व्यावृत्तिः, स्त्री, (वि+आ+वृत्+क्तिन् ।) खण्डनम् । यथा,—
"अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः ।
पदे त्वर्व्वाचीने पतति न मनः कस्य न वचः ॥"
इति महिम्नस्तोत्रम् ॥
व्यावृत्तिः । यथा । सर्व्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि तस्यानुगुणत्वात् । इति चिन्तामणौ असाधारण्यखण्डम् ॥

व्यासः, पुं, (वि+अस्+घञ् ।) विस्तारः । इत्यमरः ॥ (यथा, महाभारते । १ । १ । ५१ ।
"विस्तीर्य्यैतत् महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥"
"समासः संक्षेपः व्यासो विस्तारः ।" इति तट्टीका ॥) मानभेदः । इति शब्दरत्नावली ॥ पाठकब्राह्मणः । यथा, नैयतकालिकतत्त्वतरौ भविष्यपुराणम् ॥
"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ।
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थं चार्पयेन्नृप ।
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते ॥"
इति तिथ्यादितत्त्वम् ॥
गोलस्य मध्यरेखा । यथा,—
"व्यासे भनन्दाग्निहते विभक्ते
खबाणसूर्य्यैः परिधिस्तु सूक्ष्मः ।
द्वाविंशतिघ्ने विहृतेऽथ शैलैः
स्थूलोऽथवा स्याद्व्यवहारयोग्यः ॥"
उदाहरणम् ।
"विष्कम्भमानं किल यत्र सप्त
तत्र प्रमाणं परिधेः प्रचक्ष्व ।
द्वाविंशतिर्यत्र परिधिप्रमाणं
तद्व्याससंख्या च सखे विचिन्त्य ॥"
इति लीलावती ॥*॥
(व्यस्यति वेदानिति । वि+आ+अस्+अण् ।) मुनिविशेषः । तस्य पर्य्यायो वेदव्यासशब्दे द्रष्टव्यः । (अस्य निरुक्तिर्यथा महाभारते । १ । १०५ । १४ ।
"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च ॥")
स च सत्यवत्यां कन्याकाले पराशराज्जातः । [illegible] कलोद्भवः । यथा,—
"व्यासः पुराणसूत्रञ्च पप्रच्छ वाल्मिकिं यदा ।
मौनीभूतः स चकार ध्यानेन जगदम्बिकाम् ।
तदा चकार सिद्धान्तं तद्वरेण मुनीश्वरः ।
संप्राप निर्म्मलं ज्ञानं भ्रमान्धध्वंसदीपकम् ।
पुराणसूत्रं श्रुत्वा स व्यासः कृष्णकलोद्भवः ।
तां [illegible] पुष्करे ।
तदा सतो वरं प्राप्य स कवीन्द्रो बभूव ह ।
तदा वेदविभागञ्च पुराणञ्च चकार सः ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४ अध्यायः ॥*॥
तस्य जन्मान्तरं यथा,—
"अथ भूयो जगत्स्रष्टा भोःशब्देनानुनादयन् ।
सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत् ।
अपान्तरतमा नाम सुतो वाक्सम्भवः प्रभुः ।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः ।
तमुवाच नतं मूर्द्ध्ना देवानामादिरव्ययः ।
वेदाख्याने श्रुतिः कार्य्या त्वया मतिमतां वर ।
तस्मात् कुरु यथाज्ञप्तं ममैतद्वचनं मुने ।
तेन भिन्नास्तदा वेदा मनोः स्वायम्भुवेऽन्तरे ।
ततस्तुतोष भगवान् हरिस्तेनास्य कर्म्मणा ।
तपसा च सुतप्तेन यमेन नियमेन च ।
मन्वन्तरेषु पुत्त्रत्वमेवमेतं प्रवर्त्तकः ।
भविष्यस्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः ॥"
इति महाभारते मोक्षधर्म्मः ॥*॥
अन्यच्च ।
"सुतं त्वजनयच्छक्तिरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ।
द्वैपायनादरण्यां वै शुको जज्ञे गुणान्वितः ।"
इति वह्निपुराणे प्रजापतिसर्गो नामाध्यायः ॥*
युगभेदे व्यासभेदो यथा,—
"यस्मिन्मन्वन्तरे व्यासा ये ये तांस्तान्निबोध मे ।
यथा च भेदः शाखानां व्यासेन क्रियते मुने ।
अष्टाविंशतिकृत्वो वै वेदो व्यस्तो महर्षिभिः ।
वैवस्वतेऽन्तरे तस्मिन् द्वापरेषु पुनः पुनः ।
वेदव्यासा व्यतीता ये ह्यष्टाविंशतिसत्तमाः ।
चतुर्द्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः ।
द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ।
तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः ।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ।
सप्तमे च तथैवेन्द्रो वशिष्ठश्चाष्टमे स्मृतः ।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ।
एकादशे तु त्रिवृषो भरद्वाजस्ततः परम् ।
त्रयोदशे चान्तरीक्षो धर्म्मश्चापि चतुर्द्दशे ।
त्रय्यारुणः पञ्चदशे षोडशे तु धनञ्जयः ।
क्रतुञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः ।
ततो व्यासो भरद्वाजो भरद्वाजात्तु गौतमः ।
गौतमादुत्तमो व्यासो हर्य्यात्मा योऽभिधीयते ।
अथ हर्य्यात्मनो वेनः स्मृतो वाजश्रवास्तु यः ।
सोमो मुख्यायनस्तस्मात्तृणबिन्दुरिति स्मृतः ।
ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते ।
तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं मुने ।
जातुकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः ।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः ।
एको वेदश्चतुर्द्धा तु तैः कृतो द्वापरादिषु ।
भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति ।
व्यतीते मम पुत्त्रेऽस्मिन् कृष्णद्वैपायने मुनौ ॥"
इति विष्णुपुराणे ३ अंशे ३ अध्यायः ॥*॥
कूर्म्मपुराणे विपर्य्याद् विशेषः । द्वादशे द्वापरे शततेजाः । त्रयोदशे धर्म्मः । चतुर्द्दशे तरक्षुः । पञ्चदशे त्र्यारुणः । [illegible]विंशे वाजश्रवाः । [illegible]विंशे तृणबिन्दुः । त्रिंशे [illegible] । विस्तरस्तु देवीभागवते । तत्रैव द्रष्टव्यम् ।)

व्यासक्तः, त्रि, (वि+आ+सञ्ज्[illegible] विशेषासक्तः । संलग्नः । यथा,—
[illegible]
मूर्त्तिर्य्यस्य विष्णोरस्तु [illegible]

व्यासङ्गः, पुं, विशेषेण आसङ्गः । पूर्व्वमनुभावानोर्द्धमुप्रवृत्त [illegible]

व्यासमाता, [ऋ] स्त्री, ([illegible] वेदव्यासजननी । इति [illegible] पर्य्यायः । सत्यवती १ वासवी २ योजनगन्धा ३ दासेयी ४ । इति हेमचन्द्रः ॥ गन्धाली [illegible] इति च पाठः । काली ७ [illegible] ८ चित्राङ्गदसूः ९ [illegible] इति त्रिकाण्डशेषः ॥ मत्स्योदरी १[illegible] दाशनन्दिनी १३ । इति [illegible]

व्याविद्धः, त्रि, (वि+आ+ [illegible] इति मिताक्षरा ।

व्याहतः, त्रि, (वि+आ+ [illegible] आहतः । व्यर्थः । यथा । [illegible]
न्द्रियार्थयोः सन्निकर्षविनिमयात् [illegible]
देशान्तरविषयिणी [illegible]
गौतमसूत्रे प्रत्यक्षपरीक्षाप्रकरणम् [illegible]
"व्याहतत्वात् सर्व्वाणि च [illegible]
निर्द्दिष्टाखिलदेशावधिः स यदा [illegible]

व्याहारः, पुं, (वि+आ+हृ+घञ् । [illegible] इत्यमरः ॥ (यथा, [illegible] ७१ ।
"अभिरक्ष्य शकुन्तव्याहारेषु [illegible]
पशुपक्षिव्याहारे [illegible]

व्याहृतिः, स्त्री, (वि+ [illegible] व्याहारः । मन्त्रविशेषः । यथा,—
"ओङ्कारमादितः कृत्वा
ततोऽधीयीत [illegible]
महाव्याहृतयस्त्रिसः [illegible]
प्रधानपुरुषः कालो ब्रह्मविष्णुमहेश्वराः [illegible]
सत्त्वं रजस्तमश्चैव क्रमाद्व्याहृतयः [illegible]

…रक्तम्बरं मम सावित्री स्यात्पदम्बरम् ।
…मत्तो महाभाग सारात्सार उदाहृतः ॥"
इति कौर्म्मे उपविभागे १३ अध्यायः ॥
…त्यम् । यथा, कुमारसम्भवे । ३ । ६३ ।
"न हीश्वरव्याहृतयः कदाचित्
पुष्णन्ति लोके विपरीतमर्थम् ॥")
…त्रि, (वि + वे + क्तः ।) स्यूतम् । इति
…तिहिरूपकोषः ॥
…स्त्री, (वि + वे + क्तिन् ।) स्यूतिः । तन्तु-
…तिः । इति भरतद्विरूपकोषः ॥
…मः, पुं, (वि + उत् + क्रम + घञ् ।) क्रम-
…र्य्ययः । व्यतिक्रमः । तत्पर्य्यायः । उत्क्रमः २
…क्रमः ३ । इति हेमचन्द्रः ॥ (यथा, साहित्य-
…र्पणे । १० ।
…त्रिन् कथितस्त चपल रे का त्वरा हं कुमारी
…ग्याहं वितर हहहा व्युत्क्रमः क्वासि
यासि ॥")
…नं,क्ली,(वि + उत् + स्था + ल्युट् ।) स्वातन्त्र्य-
…णम् । विरोधाचरणम् । इति मेदिनी ॥
…यथा, महाभारते । १४ । २८ । १६ ।
"…त्वं ते हविर्भीरा पुरुषाश्च शवरैः सह ।
…बलं परिगता व्युत्थानात् तच धर्म्मिणः ॥")
…निरोधनम् । समाधिपारणम् । इति हेम-
…न्द्रः ॥ नृत्यभेदः । इति शब्दरत्नावली ॥
…विशेषेणोत्थानञ्च ॥ (चित्तस्यावस्थाविशेषः ।
…नि मातङ्गलदर्शनम् ॥)
…त्तिः, स्त्री, (वि + उत् + पद् + क्तिन् ।) विशेषे-
…त्पत्तिः । संस्कारः । इति व्युत्पत्तशब्दार्थ-
…र्शनात् । यथा । शरत्कालबोधनीयत्वेन शारदा-
…शब्दानुपपत्तेस्तत् पदं तालव्यादि सारं दतालीति
…त्पत्तिस्तु काल्पनिकी । इति तिथ्यादितत्त्वम् ॥
…त्तिज्ञानम् । यथा । व्यवहारादिबाधकं विना
…तिरस्कारादपि व्युत्पत्तेः । बाधकं विना स्वसा-
…व्यस्य बाधकं यद्विशेष्यत्वं तदभाववत्त्वविशेष्य-
…प्रकारेण व्युत्पत्तेः व्युत्पत्तिसम्भवात् शक्ति-
…ग्रहसम्भवादिति यावत् । इति व्याख्यातवादस्य
…माथुरी टीका ॥
…त्पन्नः, त्रि, (वि + उत् + पद् + क्तः ।) संस्कृतः ।
इति हेमचन्द्रशब्दरत्नावल्यौ ॥ व्युत्पत्तियुक्तः ।
यथा । व्याकरणव्युत्पन्नशब्दज्ञानाधीनं शास्त्रा-
…र्थज्ञानं तदधीना च वैदिकक्रिया तत्फलं
…स्वर्गादि । इति मुग्धबोधटीकायां दुर्गा-
…दासः ॥
…त्पादकः, त्रि, (विशेषेणोत्पादयति ज्ञानम् ।
वि + उत् + पद + णिच् + ण्वुल् ।) व्युत्पत्ति-
…जनकः । यथा । शब्दव्युत्पादकशास्त्रारम्भे
…शब्देरेव मङ्गलं कर्त्तव्यम् । इति मुग्धबोध-
टीकायां दुर्गादासः ॥
…दासः, पुं, (वि + उत् + अस + घञ् ।) निरासः ।
परित्यागः । यथा । तदेवैतेवकारश्रवणात्तिथि-
…शेषे खण्डविशेषो नियम्यते कर्म्मणि खण्डान्तर-
…व्युदासाय । इत्यमावास्याश्राद्धकालनिरूपणे

तिथ्यादितत्त्वम् ॥ (यथा च महाभारते । १२ ।
१६ । १८ ।
"यथैकान्तव्युदासेन शरीरे पाञ्चभौतिके ॥")
व्युष्टं, क्ली, (वि + वस् + क्तः ।) फलम् । दिनम् ।
प्रभातम् । (यथा, माघे । १२ । ४ ।
"व्युष्टं प्रयाणञ्च वियोगवेदना
विदूननारीकमभूत् समन्ततः ॥")
पर्य्युषितम् । इति हेमचन्द्रः ॥ (प्रभातार्थे क्वचित्
पुंलिङ्गोऽपि । स तु दोषायाः पुत्रः । यथा,
भागवते । ६ । १३ । १४ ।
"प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः ।
व्युष्टः सुतं पुष्करिण्यां सर्व्वतेजसमादधे ॥")
व्युष्टः, त्रि, (वि + वस + क्तः ।) उषितः । (यथा,
महाभारते । ३ । ६८ । २८ ।
"सा व्युष्टा रजनीं तत्र पितुर्वेश्म विभाविनी ।")
दग्धः । इति मेदिनी ॥
व्युष्टिः, स्त्री, (वि + वस् + क्तिन् ।) फलम् । (यथा,
महाभारते । १२ । २२८ । ४ ।
"महतस्तपसो व्युष्टा पश्यलोकौ परावरौ ॥")
समृद्धिः । इति मेदिनी ॥ स्तुतिः । इति हेम-
चन्द्रः ॥ (प्रकाशः । यथा, ऋग्वेदे ।१।१०१।५।
"व्युष्टिषु शवसा शश्वतीनाम् ॥"
"व्युष्टिषु सतीषु प्रकाशेषु सत्सु ।" इति तद्-
भाष्ये सायणः ॥)
व्यूढः,त्रि, (विशेषेण उह्यतेस्म । वि + वह + क्तः ।)
विन्यस्तः । संहतः । इत्यमरः । ३ । १ । ४४ ॥
(व्यूहरचनयाधिष्ठितः । यथा, गीतायाम् ।१।२।
"दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्य्योधनस्तदा ।
आचार्य्यमुपसंगम्य राजा वचनमब्रवीत् ॥")
पृथुलः । इति मेदिनी ॥ (यथा, रघुः । १।१३।
"व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्म्मक्षमं देहं क्षात्रो धर्म्म इवाश्रितः ॥")
व्यूढकङ्कटः, त्रि, (व्यूढः कङ्कटः सन्नाहो येन ।)
सन्नद्धः । इत्यमरः ॥
व्यूढिः, स्त्री, (वि + वह + क्तिन् ।) विन्यासः ।
संहतिः । पृथुलता । इति व्यूढशब्दार्थदर्श-
नात् ॥
व्यूतं, त्रि, स्यूतम् । तन्तुसन्ततम् । विपूर्व्ववेञ्धातोः
क्तप्रत्ययेन निष्पन्नमेतत् ॥
व्यूतिः,स्त्री, (वि + वे अथ वा + क्तिन् । "ऊतियूति-
जूतीति ।" ३ । ३ । ९७ । इति निपातितः ।)
वस्त्रादिवयनक्रिया । तत्पर्य्यायः । वानिः २ ।
इत्यमरः ॥ व्युतिः ३ । इति तट्टीका ॥ वायी
४ । इति शब्दरत्नावली ॥
व्यूहः, पुं, (वि + ऊह + घञ् ।) समूहः । निर्म्मा-
णम् । तर्कः । इति मेदिनी ॥ देहः । (यथा,
भागवते । ११ । ६ । १० ।
"यः सात्वतैः समविभूतय आत्मवद्भि-
र्व्यूहेऽर्च्चितः सवनशः स्वरतिक्रमाय ॥")
सैन्यः । इति त्रिकाण्डशेषः ॥ (परिणामः ।
लिङ्गम् । यथा, भागवते । ४ । २८ । ७० ।
"यावद्दुहिमनोऽपादंगुदव्यूहो कालादिमाय ॥")

युद्धार्थसेनारचना । तत्पर्य्यायः । बलविन्यासः २ ।
इत्यमरः ॥ "युद्धार्थं सैन्यस्य देशविशेषे विभज्य
दुर्लङ्घत्वनिमित्तं स्थापनं व्यूहः । ऊह वितर्के
विपूर्व्वात् घञ् । युद्धे दण्डादयो भेदा विशेषा
व्यूहस्येत्यर्थात् आदिना भोगमण्डलसंहतानां
ग्रहः । यथाह कामन्दकिः ।
तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ।
मण्डलं सर्व्वतो वृत्तिः पृथग्वृत्तिरसंहतः ॥इति ॥
एषां चतुर्णाञ्च बहवो भेदाः क्रौञ्चचक्रादयो
ग्रन्थगौरवभयान्नोक्ताः ।" इति भरतः ॥ अपि च ।
"समग्रस्य तु सैन्यस्य विन्यासः स्थानभेदतः ।
स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम् ॥
व्यूहभेदास्तु चत्वारो दण्डो भोगोऽथमण्डलम् ।
असंहतश्च निर्द्दिष्टा नीतिसारादिसम्मताः ॥
अन्येऽपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित् ।
तिर्य्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ॥
मण्डलं सर्व्वतो वृत्तिः पृथग्वृत्तिरसंहतः ।
सैन्यानां नीतिसारादौ व्यूहभेदाः समीरिताः ।
क्रौञ्चचक्रादिभेदानां लक्षणं भारतादिषु ॥"
इति शब्दरत्नावली ॥
(यथा च कामन्दकीयनीतौ ।१९।२८—५०।
"सर्व्वव्यूहविधानज्ञा युद्धकर्म्मसु कर्म्मठाः ।
उरः कक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः ।
कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह इष्यते ॥
उरश्च कक्षपक्षौ च व्यूहोऽयं सप्रतिग्रहः ।
गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्ज्जितः ॥
अभेद्याः कुलजा मेध्या लब्धलक्ष्याः प्रहारिणः ।
सेनाङ्गपतयः कार्य्या दृष्टयुद्धप्रतिक्रियाः ॥
प्रवीरपुरुषैरेतैस्तिष्ठेयुः परिवारिताः ।
अभेदेन च युद्धेरन् रक्षेयुश्च परस्परम् ॥
फल्गु सैन्यस्य यत्किञ्चिन्मध्ये व्यूहस्य तद्भवेत् ।
युद्धवस्तु च यत्किञ्चित्प्रायस्तज्जघने भवेत् ॥
युद्धार्थं युद्धकुशलं चण्डानीकं प्रयोजयेत् ।
युद्धं हि नायकप्रायं हन्यते तदनायकम् ॥
व्यूहोऽयुग्मबलः पत्त्यश्वरथदन्तिभिः ।
तथाप्रतिहतो शेषो हन्याश्वरथपत्तिभिः ॥
मध्ये देशे हयानीकं रथानीकं तु कक्षयोः ।
पक्षयोश्च गजानीकं व्यूहोऽन्तभिदयं स्मृतः ॥
रथस्थाने हयान्दद्यात्पदातींश्च हयाश्रये ।
रथाभावे तु मतिमाञ्छागानेव प्रकल्पयेत् ॥
विभज्य प्रक्षिपेन्मध्ये पत्त्यश्वरथकुञ्जरान् ।
मध्ये कुर्व्वीत नागेन्द्रान् पत्त्यश्वरथवारितान् ।
धनुः शूर्पौ च दण्डश्च शकटो मकरध्वजः ।
इत्यादयो महाव्यूहास्तदाकारान् प्रकल्पयेत् ॥
यदि स्याद्दण्डवाहुल्यं सदा चापः प्रकीर्त्तितः ।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः ॥
कथिताः प्रकृतिव्यूहा भेदास्तेषां प्रकीर्त्तिताः ।
यः स तं व्यूहं मतिमान् कार्य्ये स्थाने प्रकल्पयेत् ॥
तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ।
प्रदरो दृढकोऽसह्यश्चापो वै तद्विपर्य्ययः ॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ।
विशालविजयः शूची स्थूणाकर्णचमूमुखः ।

सुखाख्यो वलयश्चैव इत्यभेदाः प्रकीर्त्तिताः ।
अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां चैकपक्षतः ।
अतिक्रान्तश्च पक्षाभ्यां अपोऽन्यस्तु विपर्य्ययः ।
स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्द्ध्वगः ।
द्विगुणान्तस्त्वतिक्रान्तपक्षोऽन्योऽस्य विपर्य्ययः ।
द्विचतुर्द्दण्ड इत्येवं ज्ञेया लक्षणतः क्रमात् ।
गोमूत्रिकाहिसञ्चारी शकटो मकरस्तथा ।
भोगभेदाः समाख्यातास्तथा परिप्लवण्डकः ।
दण्डपक्षो युगोरस्थः शकटस्तद्विपर्य्ययः ।
मकरो व्यत्ययश्चैव शेषः कुञ्जरराजिभिः ।
मण्डलव्यूहभेदौ च सर्व्वतोभद्रदुर्ज्जयौ ।
अष्टानीको द्वितीयस्तु प्रथमः सर्व्वतोमुखः ।
अर्द्धचन्द्रक उद्धारो वज्रो भेदास्तु संहतेः ।
तथा कर्कटशृङ्गी च काकपादी च गोधिका ।
त्रिचतुःपञ्चसैन्यानां ज्ञेया आकारभेदतः ।
इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः ।
एते षष्टश्च प्रोक्ता दण्डव्यूहाश्च षड्विधाः ।
तथा व्यूहद्वयञ्चैव मण्डलस्य प्रयोक्तृभिः ।
असंहतास्तु षड्व्यूहा भोगव्यूहाश्च पञ्चधा ।
व्यूहश्चैतु प्रयोक्तव्याः सुप्रदृढकाल उपस्थिते ।
पक्षादीनामथैकेन हत्वा शेषं परिक्षिपेत् ।
उरसा च समाहृत्य कोटिभ्यां परिवेष्टयेत् ।
परकोटिसमाक्रम्य पक्षाभ्यामप्रतिग्रहः ।
कोटिभ्यां जघने हन्यादुरसा च प्रपीडयेत् ।
एवं व्यूहप्रयत्नेन यत्नवानवनीपतिः ।
विदारयेद्व्यूहमार्त्तं बलेन द्विषतामलम् ।”)

व्यूहनं, क्ली, (वि+ऊह+ल्युट् ।) सैन्यसंस्था-नम् । विपूर्व्वोहधातोरनट्प्रत्ययेन निष्पन्न-मिदम् । (भेदनम् । यथा, भागवते ।३।२६।२६।
“चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ।”
“व्यूहनं भेदनं द्रव्यादेः ।” इति तट्टीकायां स्वामी । व्योमके, त्रि । यथा, हरिवंशे । १२६ । ३६ ।
“परं गुणेभ्यः पृश्निगर्भसंज्ञं
यस्य प्रज्ञं व्यूहनं कालरूपम् ।”
“व्यूहनं जगद्व्योभकम् ।” इति तट्टीकायां नीलकण्ठः ।)

व्यूहपार्ष्णिः, पुं, (व्यूहस्य पार्ष्णिः ।) व्यूहपश्चा-द्भागः । तत्पर्य्यायः । प्रत्यासारः २ । इत्यमरः । प्रत्यासरः ३ । इति तट्टीका । व्यूहस्य पश्चाद्-व्यूहान्तरम् । इति केचित् । इति भरतः । व्यूहमध्यम् । इति शब्दरत्नावली ।

व्यै, ज ऐ इतौ । इति कविकल्पद्रुमः । (भ्वा०-उभ०-सक०-अनिट् ।) ज, व्ययति व्ययते । ऐ, व्यैयात् । इति दुर्गादासः ।

व्योकारः पुं, लौहकारः । इत्यमरः ।

व्योम, [न्] क्ली, (व्यै ञ्य इतौ+“नामन् सीम-न्निति ।” उणा० ४ । १४६ । इति निपातनात् साधुः । यद्वा, “विपूर्व्वादवतेर्व्याप्त्यर्थात् औणादिके ‘सर्व्वधातुभ्यो मनिन् ।’ इति सूत्रेण मनिन्प्रत्यये ‘ज्वरत्वरश्रिव्यविमवामुपधायाश्च ।’ इत्यूठि गुणः । व्ययति व्याप्नोति सर्व्वं जगत् । यद्वा व्ययतेरौणादिकः आते मन् व्योम । व्याय-मानं विविधमपि विष्टपं । यद्वा रक्ष-णार्थे विपूर्व्वात् अवतेः पालनार्थकधातोः । उणादौ तु नामन् सीमन् व्योमन् इत्यादिना व्यान् संवृणोति इत्याकाशमिति चर्म निपात्यते । दीप्यते नक्षत्रैः व्योम । तथाच निरुक्तम् व्योम्नि रक्षत्रिवं मण्डलेषु तमः परिक्षीणो भानुना इति ।” इति तिथ्यादितत्त्वटीका । १ । ४ । १ ।) आकाशः । इत्यमरः । (यथा, रघुः । ३ । ५८ ।
“इषुभिः व्यवतिष्ठस्वैर्मैव पवनप्रभैः ।
भुजङ्गमभिव व्योम कुर्व्वन् चाप्यसे भूपतिम् ।”)
जलम् । भास्करस्योपस्थानायतः । इति मेदिनी । अभ्रकम् । इति राजनिर्घण्टः ।

व्योमकेशः, पुं, (व्योम एव केशा यस्य । विराट्-मूर्त्तित्वादस्य तथात्वम् ।) शिवः । इत्यमरः । (यथा, महाभारते । ७ । ५०० । १९८ ।
“धर्म्मावकाशमणौ लोके प्रकाशन्ते वर्च्चश्च याः ।
ते केशा विश्वरूपात्ते व्योमकेश इति स्मृतः ।”)

व्योमकेशी, [न्] पुं, महादेवः । महाभारत-कालो व्योमव्यापिनः केशा यस्य अस्तीति व्योम-केशशब्दात् इन्प्रत्ययेन निष्पन्नमेतत् ।

व्योमचारिपुरं, क्ली, (व्योमचारि आकाशगामि पुरम् ।) व्योमपुरम् । इति भूरिप्रयोगः ।

व्योमचारी, [न्] पुं, (व्योम्नि चरतीति । चर+णिनिः ।) देवता । पक्षी । इति मेदिनी । चिरजीवी । द्विजाः । इति शिवः । (आकाश-चारिणि, त्रि । यथा, कथासरित्सागरे । २२ । ५६ ।
“अस्ति पूर्व्वमहं व्योमचारी विद्याधरोऽभ-वम् ।”)

व्योमधूमः, पुं, (व्योम्नः धूमः ।) मेघः । इति त्रिकाण्डशेषः ।

व्योमनासिका, स्त्री, भारतीपक्षी । इति त्रिकाण्ड-शेषः ।

व्योममुद्गरं, क्ली, (व्योम्नः मुद्गरमिव ।) पताका । इति त्रिकाण्डशेषः ।

व्योममण्डलं, क्ली, (व्योम्नः मण्डलम् ।) पताका । इति शब्दरत्नावली । आकाशश्च ।

व्योममुद्गरः, पुं, (व्योम्नः मुद्गर इव ।) निर्घातः । इति हारावली ।

व्योमयानं, क्ली, (व्योमगामि यानम् ।) विमानम् । इत्यमरः ।

व्योमस्थली, स्त्री, भूमिः । इति भूरिप्रयोगः । (व्योम्नः स्थली ।) नभःस्थलञ्च ।

व्योमाभः, पुं, (व्योम्ना शून्येन आभातीति । आ+भा+कः ।) बुद्धः । इति त्रिकाण्डशेषः ।

व्योमोदकं, क्ली, (व्योम्नः उदकम् ।) दिव्योदकम् । इति राजनिर्घण्टः ।

व्योषं, क्ली, (विशेषेण ओषतीति । उष दाहे+पचाद्यच् ।) त्रिकटु । इत्यमरः । (यथा, सुश्रुते । १ । ४४ ।
“व्योषं त्रिजातकं मुस्ता विडङ्गामलके तथा ।”)

व्रज, गतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) व्रजति । इति ...
व्रज, क संस्कृतौ । गतौ । इति ...
(चुरा०-पर०-सक०-सेट् ।) ...
...
...
व्रजं, क्ली, व्रजनम् ...
...
कौमुदी ।
व्रजः, पुं, (व्रज गतौ + ...
... इति ...
... । इत्यमरः । (यथा, ...
१६८ । १२ ।
“तत्र प्रभाते ...
प्रादुरासीत् ...
गोष्ठम् । (यथा, ...
“निवृत्य ...
...
... । इति मेदिनी ।
... । अस्य विवरण-
“ब्रह्ममण्डलमध्ये ...
... महापीठं ...
...
...
... परिपूर्णं ...
...
...
...
...
... विभिन्नानि ...
...
...
...
मादि ।
“वनानि ...
... महापीठं १ ...
कोकिलाख्यं तृतीयञ्च ३ ...
पञ्चमं कुमुदाख्यञ्च ५ ...
... पञ्चमं ...
... प्रोक्तं ८
...
एकादशं समाख्यातं ...
... द्वादशं
इति द्वादशसंख्यानि ...
...
अथ द्वादशोपवनाख्यानि ...
“आदौ ... नाम १ द्वितीयं ...
...
तृतीयं ... नाम ३ ...
... पञ्चमं ...
...
... नाम षष्ठं ...

…वनकनामानमष्टमं परिकीर्त्तितम् ८ ।
…ङ्गिनवनं श्रेष्ठं नवमं मानभङ्गम् ९ ।
…शायिवनं श्रेष्ठं दशमं पापनाशनम् १० ।
…दशं समाख्यातं नारदाख्यं शुभोदितम् ११ ।
…दशं परमानन्दवनं सर्व्वार्थदायकम् १२ ।
…त द्वादशसंख्यानि वनान्युपवनानि च ।"
इति द्वादशोपवनानि । * ।
अथ द्वादशप्रतिवनानि । भविष्ये ।
…ादौ रङ्कवनं श्रेष्ठं पुरसंज्ञाविराजितम् १ ।
…र्त्तिवनं द्वितीयञ्च २ करहाख्यं तृतीयकम् ३ ।
…र्थं काम्यनामानं वनं कामप्रदं नृणाम् ४ ।
…मञ्जननामानं पञ्चमं स्त्रीशुभप्रदम् ५ ।
…ा कर्णवनं श्रेष्ठं षष्ठं स्वप्नवरप्रदम् ६ ।
…ाशिपलकं नाम वनं सप्तममीरितम् ७ ।
…दधिपत्त्राख्यं वनं नन्दनमष्टमम् ८ ।
…मिन्द्रवनं नाम नवमं कृष्णपूजितम् ९ ।
…भावनं शुभं प्रोक्तं दशमं नन्दभाषितम् १० ।
…कावलीवनं श्रेष्ठमेकादशमुदाहृतम् ११ ।
…ा लोहवनं श्रेष्ठं द्वादशं शुभदं नृणाम् १२ ।
…न प्रतिवनान्याहुर्मार्गे वामे च दक्षिणे ।
…ति द्वादशसंख्यास्ते देवावाछफलप्रदाः ।"
इति द्वादश प्रतिवनानि । * ।
अथ द्वादशाधिवनानि । विष्णुपुराणे ।
मथुरा प्रथमं नाम १ राधाकुण्डं द्वितीयकम् २ ।
…न्दग्रामं तृतीयञ्च ३ गूढ़स्थानं चतुर्थकम् ४ ।
…चमं ललिताग्रामं ५ वृषभानुपुरञ्च षट् ६ ।
…मं गोकुलं स्थान-७ मष्टमं बलदेवकम् ८ ।
…गोवर्द्धनवनं श्रेष्ठं नवमं कामनाप्रदम् ९ ।
…ं जावबटं नाम दशमं परिकीर्त्तितम् १० ।
…श्रीवृन्दावनं श्रेष्ठमेकादशं प्रकीर्त्तितम् ११ ।
…दनतटकं स्थानं वनं द्वादशं कीर्त्तितम् १२ ।
…ति द्वादशसंख्यानि वनान्यधिवनानि च ।
…ग्रामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः ।
…षां नैव विलोकेन वनयात्रा च निष्फला ।
…षाञ्च दर्शनेनैव वनयात्रा शुभप्रदा ।
…ादौ लीलां यदा पश्चाद्वनयात्रां ततश्चरेत् ।
…र्व्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात् ।
…र्व्वत्र विजयी भूयाद्वनयात्राप्रभावतः ।"
इति व्रजभक्तिविलासे १ अध्यायः ।

…कः, पुं, तपस्वी । इति शब्दरत्नावली ।
…किशोरः, पुं (व्रजस्य किशोरः ।) श्रीकृष्णः ।
स तु द्वादशाधिवनान्तर्गतललिताग्रामाधिवना-
धिपो देवः । "अथ ललिताग्रामाधिपव्रज-
किशोरमन्त्रः । यथा श्रीधरोपनिषदि । ॐ श्रीं
ललिताग्रामाधिवनाधिपतये व्रजकिशोराय
नमः । इत्येकविंशाक्षरो व्रजकिशोरमन्त्रः ।
अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य
विभाण्डक ऋषिर्व्रजकिशोरो देवता गायत्री
छन्दः मम सकलपापक्षयद्वारा युगलकृष्णदर्श-
नार्थे विनियोगः । शिरसि विभाण्डकऋषये
नमः मुखे व्रजकिशोराय नमः हृदि गायत्री-
छन्दसे नमः । अथ ध्यानम् ।
'ललितासंयुतं कृष्णं सर्व्वैस्तु सखिभिर्युतम् ।
ध्यायेत्त्रिवंशिकूपस्थं महारासकृतोत्सवम् ॥'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्या-
दिना जपं समर्पयेत् । इति ललिताग्रामाधिप-
व्रजकिशोरमन्त्रः ।" इति व्रजभक्तिविलासे १
अध्यायः ॥

व्रजनाथः, पुं, (व्रजस्य नाथः ।) श्रीकृष्णः । इति
पुराणम् ॥

व्रजभूः, पुं, (व्रजे भूरुत्पत्तिर्यस्य ।) केलिकदम्बः ।
इति शब्दचन्द्रिका ॥ (व्रजस्य भूर्भूमिः ।)
व्रजभूमौ, स्त्री । व्रजजाते, त्रि ॥

व्रजमण्डलं, क्ली, (व्रजस्य मण्डलम् ।) व्रजभूमिः ।
यथा, मात्स्ये ।
"व्रजमण्डलभूगोलं प्रेयनामफलं वरम् ।
कुसुराख्यं महाश्रेष्ठं सर्व्वेषां मध्यसंस्थितम् ॥"
इति व्रजविलासे १ अध्यायः ॥

व्रजमोहनः, पुं, (व्रजान् व्रजवासिनो मोहय-
तीति । मुह + णिच् + ल्युल् ।) श्रीकृष्णः । इति
पुराणम् ॥

व्रजवरः, पुं, (व्रजे वरः श्रेष्ठः ।) श्रीकृष्णः । स तु
द्वादशाधिवनान्तर्गतजावबटाधिवनाधिपो देवः ।
"अथ जावबटाधिवनाधिपव्रजवरमन्त्रः । शौन-
कीये ।
'वटाद्वहिः समन्तात्तु सघनं वनमास्थितम् ।
तमेवाधिवनं ख्यातं वटसेवापरायणम् ॥
तस्मिन्मध्ये वटं श्रेष्ठं कृष्णक्रीड़ावरप्रदम् ।
वटाद्वहिर्वनं ख्यातं मध्ये चैव वटं स्मृतम् ॥
वटं वृक्षं स्थितं तत्र वटसंज्ञं विधीयते ।
वटभावानुसारेण वटलिङ्गानि दर्शयेत् ॥'
वटस्थानलिङ्गम् । ॐ ठः जौं वटाधिवनाधि-
पतये व्रजवराय नमः । इत्येकोनविंशाक्षरो
जावबटाधिवनाधिपव्रजवरमन्त्रः । अनेन मन्त्रेण
प्राणायामः । अस्य मन्त्रस्य यलोक ऋषि-
र्जावबटाधिपो व्रजवरो देवता पङ्क्तिश्छन्दः
मम सकलसौभाग्यसम्पत्फलप्राप्त्यर्थे जपे विनि-
योगः । न्यासं पूर्व्ववत् । अथ ध्यानम् ।
'नानाशृङ्गारभूषाढ्यं राधाकृष्णं मनोहरम् ।
ध्यायेद्युगलमूर्त्तिञ्च वनयात्रावरप्रदम् ॥'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्या-
दिना जपं समर्पयेत् । इति जावबटाधिवना-
धिपव्रजवरमन्त्रः ।" इति व्रजभक्तिविलासे १
अध्यायः ॥

व्रजवल्लभः, पुं, (व्रजानां व्रजवासिनां वल्लभः
प्रियः ।) श्रीकृष्णः । इति पुराणम् ॥

व्रजाङ्गना, स्त्री, (व्रजस्य अङ्गना ।) गोपी ।
यथा, छन्दोमञ्जर्य्याम् ।
"विलासवंशध्वनिसं सुधानिलैः
प्रपूर्य यः पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु वः ॥"

व्रज्या, स्त्री, (व्रजनमिति । व्रज गतौ + "व्रजयजो-
र्भावे क्यप् ।" ३ । ३ । ९८ । इति क्यप् ।)
पर्य्यटनम् । जिगीषोः प्रयाणम् । गमनम् ।
इत्यमरः ॥ वर्गः । इति मेदिनी ॥ (सजाती-
यानामेकत्र सन्निवेशः । यथा, साहित्यदर्पणे ।
६ । ५६५ ।
"कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ।
व्रज्याक्रमेण रचितः स एवातिमनोहरः ॥") |
रङ्गः । इति धरणिः ॥

व्रण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
अक०-सेट् ।) व्रणति । इति दुर्गादासः ॥

व्रण, त् क अङ्गचूर्णे । इति कविकल्पद्रुमः ॥
(अदन्त चुरा०-पर०-सक०-सेट् ।) अङ्गचूर्णः
अङ्गभेदः । व्रणयति गात्रं बाणेन भटः । इति
दुर्गादासः ॥

व्रणः, पुं क्ली, (व्रणयति गात्रमिति । व्रण अङ्ग-
चूर्णे + पचादित्वात् अच् ।) क्षतम् । तत्पर्य्यायः ।
ईर्म्मम् २ अरुः ३ । इत्यमरः ॥ ईर्म्मः ४ । इति
तट्टीका ॥ (यथा, रघुः । १२ । ५५ ।
"स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम् ।
आत्मनः सुमहत् कर्म्म व्रणैरावेद्य संस्थितः ॥")
अथ व्रणाधिकारः ।
"व्रणो द्विधा परिज्ञेयो दोषजागन्तुभेदतः ।
दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः ॥"
तत्र वातिकस्य लक्षणमाह । .
"स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः ।
तुद्यते स्फुटितश्यावो व्रणो मारुतसम्भवः ॥"
स्तब्धः अचलः ॥ * ॥ पैत्तिकमाह ।
"तृष्णामोहज्वरक्लेददाहदुःखावदारणैः ।
व्रणं पित्तकृतं विद्यात् स्रावैर्गन्धैश्च पूतिकैः ॥"
क्लेद आर्द्रता । दुःखं यथारूपम् । अवदारणं
व्रणे विदारणवत् पीड़ा ॥ * ॥ श्लैष्मिकमाह ।
"बहुपिच्छो गुरुः स्निग्धस्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ॥"
बहुपिच्छः बहुपिच्छिलः । अल्पसंक्लेद ईष-
दार्द्रः ॥ * ॥ रौधिरं द्वन्द्वजं सान्निपातिकमाह ।
"रक्तो रक्तस्रुती रक्ताद्द्विजः स्यात्तदन्वयः ।"
तदन्वयः द्वित्रिदोषलिङ्गसमन्वयः ॥ * ॥ शुद्ध-
व्रणलिङ्गमाह ।
"जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्प-
वेदनः ।
सुव्यवस्थो निरास्रावः शुद्धव्रण इति स्मृतः ॥"
जिह्वातलाभः तलशब्दोऽत्र स्वरूपार्थः । तेन
जिह्वावद्रक्तः । सुव्यवस्थः उच्छूनतारहितः ॥
दुष्टव्रणलिङ्गमाह ।
"पूतिपूयादिदुष्टास्रक्स्राव्युत्सङ्गी चिरस्थितिः ।
दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्य्ययः ॥"
उत्सङ्गी कोटरवान् । अतिगन्धादिः आदि-
शब्देन सावेदनाविवर्णतादयः संगृह्यन्ते ॥ * ॥
संरोहद्व्रणस्य लिङ्गमाह ।
"कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः ।
स्थिराश्च पिड़काभन्तो रोहतीति तमादिशेत् ।"

कपोतवर्णप्रतिमाः पाण्डुधूमराः। स्थिराः विशीर्णसारहिताः। पिडकावन्तः संरोहमायान्ति ये मांसाङ्कुरास्तद्युक्ताः॥ *॥ सम्यक्रूढलिङ्गमाह।

"रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम्।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्॥"

रूढवर्त्मानं संरूढमार्गम्। समतलं अनिम्नम्॥ *॥ सुखसाध्यत्वादिकमाह।

"त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः।
धीमतोऽभिनवः काले सुखे साध्यः सुखव्रणः॥"

सुखे देशे मर्मरहिते। अनुपद्रवः ज्वरतृष्णाश्वासकासारोचकादिरहितः। धीमतः पथ्यसेविनः। सुखे काले हेमन्ते शिशिरे च।

"गुणैरन्यतरैर्हीनः कृच्छ्रो व्रणः स्मृतः।
सर्व्वैर्विहीनो विज्ञेयस्त्वसाध्यो निरुपक्रमः॥"

एभिस्त्वङ्मांसजत्वादिभिः। निरुपक्रमः अनुपक्रान्तः चिरमुपेक्षित इति यावत्।

"वसामेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्।
आगन्तुजो व्रणः सिद्ध्येन्न सिद्ध्येद्दोषसम्भवः॥"

मस्तुलुङ्गं मस्तकाभ्यन्तरस्नेहः।

"कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम्।
व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः॥"

अरिष्टमाह।

"दह्यन्ते चान्तरत्यर्थं बहिःशीताश्च ये व्रणाः।
दह्यन्ते बहिरत्यर्थं भवन्त्यन्तश्च शीतलाः॥
प्राणमांसक्षयश्वासकासारोचकपीडिताः।
प्रवृद्धपूयरुधिरं व्रणा ये चापि मर्म्मसु।
क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः।
चिकित्सेन्नैव तान् वैद्यः संरक्षन्नात्मनो यशः॥
सद्यागुर्व्वाण्यसुमनाः पद्मचन्दनचम्पकम्।
सगन्धा दिव्यगन्धाश्च समूर्च्छां व्रणाः स्मृताः॥"

मर्म्मसु पायुनाभिहृदयादिषु। सुमनाः जातिः। दिव्यगन्धाः पारिजातादिगन्धाः॥ *॥ अथाङ्गव्रणस्य निदानमाह।

"नानाधारामुखैः शस्त्रैर्नानास्थाननिपातितैः।
भवन्ति नानाकृतयो व्रणांस्तांस्तान्निबोध मे॥"

नानाधारामुखानि येषां तैः शस्त्रैः अर्द्धचन्द्रखड्गभल्लकुन्तशूलशरादिभिः। नानाकृतयः बह्वाकृतयः। ता आकृतीराह।

"छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च।
घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम्॥"

अथ छिन्नस्य लक्षणमाह।

"तिर्य्यक् छिन्न ऋजुर्व्वापि यो व्रणश्चायतो भवेत्।
गात्रस्य पातनं तद्धि छिन्नमित्यभिधीयते॥"

यो व्रणः तिर्य्यक्छिन्नः खड्गादिहततिर्य्यक्छेदनतः। ऋजुर्व्वापि अथवा खड्गादिहतो ऋजुव्रणः। आयतः दीर्घः। आयत इति तिर्य्यक्छिन्नस्य ऋजोश्च विशेषणम्। गात्रस्य पातनं गात्रस्यैकदेशस्य छेदेन पृथक्करणं वा छिन्नमित्यभिधीयते॥ *॥ भिन्नमाह।

"शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते॥"

आशयः कोष्ठः॥ *॥ कोष्ठभेदस्य लक्षणमाह।

"आमाग्न्याशयपक्वानां मूत्रस्य रुधिरस्य च।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते॥
तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति॥
मूर्च्छाश्वासतृषाध्मानमभक्तच्छन्द एव च।
विण्मूत्रवातसङ्गश्च स्वेदस्रावोऽस्त्रिरक्तता॥
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च।
हृदि शूलं पार्श्वयोश्च विशेषश्चाभिधीयते॥"

तस्मिन् कोष्ठे। भिन्ने शस्त्रादिभिः। रक्तपूर्णे कोष्ठे तन्मात्रमार्गाभिघातात् पूर्णेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते॥ *॥ आमाशये पक्वाशये च रक्तपूर्णे लक्षणमिदमाह।

"आमाशयस्थे रुधिरे रुधिरं छर्द्दयत्यपि।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम्॥
पक्वाशयगते रक्ते रुजा गौरवमेव च।
अधःकाये विशेषेण शीतता च भवेदिह॥"

रुजा शूलम्। गौरवं पक्वाशये। अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यन्वयः। शीतता च भवेदिह। इह नाभेरधोदेशे शीतता च स्यात्। सा च वायोस्तत्स्वभावात्॥ *॥ विद्धमाह।

"सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्द्दिशेत्॥"

आशयं विना कोष्ठं विना। उत्तुण्डितं अनिर्गतशल्यम्। निर्गतं वा निर्गतशल्यं वा॥ *॥ सशल्यस्य व्रणस्य लक्षणमाह।

"श्यावं सशोथं पिडकाचितञ्च
मुहुर्मुहुः शोणितवाहिनञ्च।
मृदूद्गतं बुद्बुदतुल्यमांसं
व्रणं सशल्यं सरुजं वदन्ति॥"

मुहुर्मुहुः शोणितवाहिनं यदा यदा शल्यं चलति तदा तदा रुधिरं वहति। उद्गतं उत्थितमुखम्॥ *॥ कोष्ठस्थितस्य शल्यस्य लक्षणमाह।

"तथोऽतीत्य शिरादीनि भित्त्वाङ्गं परिहृत्य वा।
कोष्ठे प्रतिष्ठितं शल्यं कुर्य्यादुक्तानुपद्रवान्॥"

तथः तथापि अतिक्रम्य उक्तानुपद्रवान् आटोपानाहौ मूत्रविण्नाशं पुरीषदर्शनञ्च॥ *॥ असाध्यस्य कोष्ठस्य रक्तस्य पुरीषस्य लक्षणमाह।

"कोष्ठान्तर्लोहितं पाण्डु शीतपादकराननम्।
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्जयेत्॥"

आनद्धं आनाहवन्तम्॥ *॥
क्षतमाह।

"नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम्।
विषमं व्रणमङ्गे यत्तु क्षतं परिकीर्त्तितम्॥"

नातिच्छिन्नं नातिदीर्घव्रातम्। नातिभिन्नं नातिगम्भीरघातम्। उभयोश्छिन्नभिन्नयोः। विषमं व्रणमङ्गे यत् यद्व्रणमङ्गवैषम्यकरम्॥ *॥ पिच्चितमाह।

"प्रहारपी...
नामित ...
प्रहारो मुद्गरादिना। ...
पृथ्वी निपिष्टान्॥ *॥ ...
"वर्णमादि ... वस्तु ...
उपमायामिन्नं ...
वर्णमात् ...
मांसशिरास्नायुसन्ध्यस्थि...
लक्षणमाह।

"व्रणः ...
विचेष्टनं ...
मत्वाङ्गना ...
कौशा ...
मांसोदकाभं रुधिरञ्च ...
सर्व्वेन्द्रियार्थोपरमश्च ...
इयार्द्धसं...
सामान्यतो मर्म्मसु

चलनं भूमौ। विचेष्टनं ...
पादादिप्रक्षेपणादिकम्। ...
मोहः। प्रमोहो मनोमोह...
बालक ...
रव गच्छेत् ...
सर्व्वेन्द्रियार्थोपरमः ...
अथ मर्म्मशिरास्नायुसन्ध्य...
लक्षणमाह।

"सुरेन्द्रगोपप्रतिमं प्रभूतं
रक्तं स्रवेत्तत्तनुपवनश्च ...
करोति रोगान् विविधान् ...
शिरासु विद्धास्वथवा ...

सुरेन्द्रगोपो ...
बहुटी इति लोके विख्यात्। प्रभूतं ...
शिरोऽभितापाश्वसादकादीन्...
दिना। क्षतासु खड्गादिना।

"कौब्जं शरीरावयवा...
क्रियासु ...
चिरात् व्रणो रोहति ...
तं स्नायुविद्धं पुरुषं वदन्ति ...

कौब्जं विद्धस्नाङ्गस्य वक्रता। ...

"शोथातिवृद्धिस्तुमुला ...
बलक्षयः सर्व्वत एव शोथः ...
क्षतेषु सन्धिष्वचलाचलेषु
स्यात् सन्धिकर्म्मोपरमश्च ...

सर्व्वत एव शोथः सर्व्वसन्धिषु ...
उपरमः नाशः।

"घोरा रुजो यस्य निशादि...
सर्व्वास्ववस्थासु न चैति शा...
भिषग्विपश्चिद्विदितार्थसूत्र-
स्तमस्थिविद्धं पुरुषं प्रवक्ति॥"

सर्व्वास्ववस्थासु शयनासनादिकासु। ...
स्रवः शान्तप्रलाप्तनम्॥ *॥ अथ म...
विद्धलिङ्गानि पृथगभिधाय मर्म्म...
विद्धानां पृथग्लिङ्गान्यतिदिशन्नाह।

ग्धात्म्यदेमानि विभावयेत्
ङ्गानि मर्म्मस्वपि ताड़ितेषु ।”
शिरादीनां विद्धानां एतानि लिङ्गानि
ानि लिङ्गानि चकारात् भ्रमप्रलापा-
मर्म्मस्वपि शिरादिषु ताड़ितेषु विद्धेषु ।
ान् जानीयात् । * । सर्व्वव्रणानामुप-
।
पक्षघातश्च शिरास्तम्भोऽपतानकः ।
ाहो व्रणे पीड़ा ज्वरस्तृष्णा हनुग्रहः ।
ा्रदिरतीसारो हिक्का श्वासः सवेपथुः ।
पद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ।”
दग्धस्य निदानमाह ।
षड्विधो ज्ञेयः स्नेहरूक्षः समाश्रितः ।
त्र तु तैलादि रूक्षं लौहादि कथ्यते ।”
धं चतुर्व्विधमाह ।
दग्धं चतुर्द्धा स्यात् प्लुष्टं दुर्दग्धमेव च ।
दग्धं तथा तीव्रदग्धञ्च परिकीर्त्तितम् ।”
लक्षणमाह ।
र्णमतिप्लुष्टं तत् प्लुष्टमभिधीयते ।
हो यथावन्तो यत्र स्फोटा भवन्ति हि ।
ते प्रशाम्यन्ति तद्दुर्दग्धमुदाहृतम् ।
र्णमगम्भीरं दाहपीड़ासमन्वितम् ।
गतश्च कथितं सम्यग्दग्धं भिषग्वरैः ।
यं यत्र दग्धं स्याद्विशेषो वपुषस्तथा ।
स्नायुसिरासन्धीनां तं वदन्त्यतिदग्धकम् ।
: वेदना दाहो ज्वरस्तृष्णा मूर्च्छया सह ।
व्रणस्तु चिरादस्तोऽपि रूढ़ो याति विव-
र्णताम् ।”*।
व्रणस्य चिकित्सा ।
दौ शोथहरो लेपस्ततस्तु परिषेचनम् ।
पनमस्त्रमोक्षणतः स्यादुपनाहनम् ।
नं भेदनं पश्चात् पीड़नं शोधनं तथा ।
णं वर्णकरणं व्रणस्यैते क्रमाः स्मृताः ।”
श्चिकित्साः । सुश्रुतेषु व्रणस्य षष्टिरुपक्रमा
क्ताः सन्ति । ते सर्व्वेऽत्र विस्तरभयान्न
क्ताः । * । तत्रादौ शोथहरं लेपमाह ।
ा प्रज्वलिते वैशल्यस्सता परिषेचनम् ।
ं प्रशमयत्याशिवमालेपनं रुजम् ।
पूरजटाहिंस्रा देवदारु महौषधम् ।
ाभिमन्थो लेपोऽयं वातशोथविनाशनः ।*
कं चन्दनं दूर्व्वा नलमूलन्तु पद्मकम् ।
ीरं वालकं पद्मं लेपोऽयं पित्तशोथहा ।
गोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
पिष्टैः प्रदेहः स्याच्छोथे पित्तसमुद्भवे ।*।
गन्धेन रक्तजे च लेप एषोऽभिपूजितः ।
गन्धाश्वगन्धा च मञ्जिष्ठा सरलस्तथा ।
ैकिकाश्वगन्धा च लेपोऽयं श्लेष्मशोथहा ।”
मदङ्गी मेढ़ाशृङ्गी । एकैकिका श्यामनि-
ान: ।
कृष्णा पुरायपिण्याकं शिग्रुत्वक् शिकता
शिवा ।
त्रपिष्टः सुखोष्णोऽयं प्रलेपः श्लेष्मशोथहा ।*।

न रात्रौ लेपनं दद्याद्दत्तं च पतितं तथा ।
न च पर्य्युषितं शुष्यमाणं तत्रैव धारयेत् ।”
दत्तं दत्तमेव पुनर्न दद्यात् । पतितं दीयमानं
यदङ्गात् पतितम् । पर्य्युषितं लेपनद्रव्यकल्की-
कृतं यत् पर्य्युषितम् ।
“तमसा पिहितो ह्यूष्मा रोमकूपमुखे स्थितः ।
विना लेपेन निर्याति रात्रौ नालेपयेदतः ।
रात्रावपि प्रलेपस्तु विधातव्यो विचक्षणैः ।
अपाकिशोथे गम्भीरे रक्तपित्तसमुद्भवे ।”* ।
अथ परिषेचनमाह ।
“यथाम्बुभिः सिच्यमानः शान्तिमग्निर्हि गच्छति ।
दोषाग्निरेवं सहसा परिषेकेण शाम्यति ।”
तद्यथा,—
“वातशोथघ्ननिक्वाथैस्तैलैर्मांसरसैर्घृतैः ।
उष्णैः संसेचयेत् शोथं वातिकं काञ्जिकेन तु ।
पित्तरक्ताभिघातोत्थं शोथं सिञ्चेत्तु शीतलैः ।
क्षीराज्यमधुखण्डेक्षुरसैः पित्तहरैः शृतैः ।
कफशोथघ्ननिःक्वाथैरशीतैः परिषेचयेत् ।
तैलक्षारासुखञ्चैव शोथं श्लेष्मसमुद्भवम् ।”*।
अथ विम्लापनमाह ।
“रुजतः कठिनस्यास्य कार्य्यं विम्लापनं शनैः ।”
अथ शोथस्य विम्लापनस्य विधिमाह । सुश्रुतः ।
“अभ्यज्य स्वेदयित्वा तु वेणुनाड्या शनैः शनैः ।
विमर्द्दयेद्भिषड्मन्दं तलेनाङ्गुष्ठकेन वा ।”
वेणुनाड्या स्वेदयित्वा उष्णस्वेदं कृत्वा । * ।
रक्तमोक्षणमाह ।
“वेदनोपशमार्थाय तथा पाकशमाय च ।
अचिरोत्पतिते शोथे शोणितस्रावणञ्चरेत् ।”
चरेत् कुर्य्यात् ।
“एकतस्तु क्रियाः सर्व्वा रक्तमोक्षणमेकतः ।
रक्तं हि वेदनामूलं तद्विनास्ति न चापि रुक् ।
विवर्णे कठिने श्यावे व्रणे चात्यन्तवेदने ।
सविशेषे विशेषेण जलौकोभिः पदैरपि ।”
शोणितस्रावणञ्चरेदित्यनेनान्वयः । * ।
अथोपनाहस्वेदमाह । तस्य विधिर्भेषजसाधन-
प्रकरणे कथित एवास्ति ।
“दन्तावतां दारुणानां कठिनानां तथैव च ।
शोथानां स्वेदनं कार्य्यं ये चाप्येवं विधा व्रणाः ।”
शोथानां सामान्यानां व्रणाः व्रणशोथाः तेषा-
मपि स्वेदनं कार्य्यम् ।
“शोथयोरुपनाहन्तु दद्यादामविदग्धयोः ।
प्रशाम्यत्यविदग्धस्तु विदग्धः पाकमेति च ।”
अविदग्धः आमः । विदग्धः पाकोन्मुखः । स
यथा,—
“दशमूली बला रास्ना वाजिगन्धा प्रसारिणी ।
मूलं फलञ्च वातारिसिन्दुवारपुनर्नवाः ।
शोभाञ्जनः कृष्णा चापि सैन्धवं विश्वभेषजम् ।
शणकार्पासयोर्बीजमतसी च कुलत्थिका ।
तिला यवाश्च सिद्धार्थः कुटेरो मूलकं मिसिः ।
यथाप्राप्तैरमीभिस्तु द्रव्यैरम्लेन संयुतैः ।
कल्कीकृतैः सुखोष्णैश्च स्वेदैर्द्विविधपत्रैः ।
अनेन प्रशमं याति वातशोथो न संशयः ।”

दशमूल्यादिरूपमाह ।
“पुनर्नवा दारु शुण्ठी शिग्रुः सिद्धार्थ एव च ।
अम्लपिष्टः सुखोष्णोऽयं प्रलेपः सर्व्वशोथहा ।”
पुनर्नवादिः । * ।
अथ पाचनमाह ।
“न प्रशाम्यति यः शोथः प्रलेपादिविधानतः ।
द्रव्याणि पाचनीयानि दद्यात्तत्रोपनाहने ।”
पाचनद्रव्याण्याह ।
“शणकमूलशिग्रूणां फलानि तिलसर्षपाः ।
अतसीसक्तवः किण्वमुष्णद्रव्याश्च पाचनम् ।”
शणफलादीनामतस्यन्ताः सक्तवः कर्त्तव्याः ।
किण्वं सुरावीजम् । यवगोधूमधान्यादिप्रकारः
अन्यच्चोष्णद्रव्यं व्रणस्य पाचनं भवति । * ।
अथ भेदनमाह ।
“अन्तःपूयेषु वक्त्रेषु तथैवोत्सङ्गवत्स्वपि ।
गतिमत्स्वथ रोगेषु भेदनं संप्रयुज्यते ।”
उत्सङ्गवत्सु कोटरवत्सु । गतिमत्सु नाड़ी-
व्रणेषु । भेदनं शस्त्रमौषधकर्म्म च । * । तत्र
शस्त्रेण भेदनमाह ।
“रोगे यथनसाध्ये तु यथादेशं प्रमाणतः ।
शस्त्रं विधाय दोषस्तु स्रावयेत् कथितं यथा ।”
क्वचिच्छस्त्रनिषेधापवादमाह ।
“बालवृद्धासहक्षीणाभीरूणां योषितामपि ।
व्रणेषु मर्म्मजातेषु भेदनं द्रव्यलेपनम् ।”
तत्र भेदमाह ।
“चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः ।
कपोतकङ्कगृध्राणां मलं लेपेन दारणम् ।”
चिरविल्वः करञ्जः । अग्निकः भल्लातकः ।
“भल्लातकास्थल्वे तु रक्तचन्दनमिष्यते ।”
हयमारकः करवीरः । दारणं भेदनम् ।
“क्षारद्रव्यं तथा क्षारो दारणः परिकीर्त्तितः ।”
क्षारद्रव्यं अपामार्गादि । क्षारः स्वर्जिका यव-
क्षारादिः ।
“हस्तिदन्तो जले पिष्टो बिन्दुमात्रः प्रलेपतः ।
अत्यन्तकठिने शोथे कथितो भेदनः परः ।”*।
अथ पीड़नमाह ।
“पूयगर्भानणूद्वारान् व्रणान् मर्म्मगतानपि ।
यथोक्तैः पीड़नद्रव्यैः समन्तात् परिपीड़येत् ।”
पीड़नद्रव्याण्याह ।
“द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि प्रपी-
ड़येत् ।
यवगोधूममाषाणां चूर्णानि च समासतः ।
शुष्यमाणमुपेक्षेत प्रलेपं पीड़नं प्रति ।
न चापि मुखमालिम्पेत्तथा दोषः प्रसिच्यते ।”
पीड़नं प्रति पीड़नद्रव्यलेपं प्रति । पीड़नद्रव्य-
लेपे शुष्यन्तमपि धारयेदित्यर्थः । तथा व्रणस्य
मुखे लेपं विना प्रसिच्यते स्रवति । * ।
अथ शोधनमाह ।
“द्रव्याश्च त्वदिशुद्धस्य व्रणः शुद्धिकरः परः ।
पटोलनिम्बपत्रस्य सर्व्वदैव प्रयुज्यते ।
दानिके दशमानां चीरिणां पीतिरं नदे ।
आरग्वधादिः कषाय उपायः शोधने हितः ।

अश्वत्थोडुम्बरप्लक्षवटवेतसकं स्मृतम् ।
व्रणशोथोपदंशानां नाशनं क्षालनात् स्मृतम् ॥
तैलसैन्धवयष्ट्याह्वनिम्बपत्रनिशायुगैः ।
त्रिवृद्वचनयुतैः कार्य्यः प्रलेपो व्रणशोधनः ॥
एकैकं सारिवामूलं सर्व्वव्रणविशोधनम् ।
निम्बपत्रतिलादन्तीत्रिवृत्सैन्धवमाक्षिकम् ।
दुष्टव्रणप्रशमनो लेपः शोधनकेशरी ॥”
शोधनकेशरी शोधनश्रेष्ठः ।
“लेपान्निम्बदलैः कल्कैर्व्वा शोधनरोपणः ।
भक्षणाच्छर्द्दिमन्दाग्निपित्तश्लेष्मकमीन् हरेत् ॥
व्रणान् विशोधयेत् वर्त्ती सूक्ष्मा स्यात् सन्धि-
मर्म्मजान् ।
अभयत्रिवृतादन्तीलाङ्गलीमधुसैन्धवैः ॥
निम्बपत्रघृतक्षौद्रदार्व्वीमधुकसंयुता ।
वर्त्तिस्तिलानां कल्को वा शोधयेद्रोपयेद्-
व्रणम् ॥”*।
अथ रोपणमाह ।
“अपेतपूतिमांसानां मांसस्थानमरोहताम् ।
कल्कस्तु रोपणे देयस्तिलजो मधुसंयुतः ॥
अश्वगन्धा बहा लोध्रः कट्फलं मधुयष्टिका ।
समङ्गा धातकीपुष्पं परमं व्रणरोपणम् ॥
मधुयुक्ता शरपुङ्खा सर्व्वव्रणरोपणी कथिता ।
गुडूचीपत्रधत्तूरबला मोचा कुठेरका ॥
एषणीर्भ प्रलेपेन गम्भीरव्रणरोपकाः ॥”
गुडूचीपत्र कलौञ्जीपत्र । अस्या एतदेव नाम
पुस्तके धृतम् । कुठेरक वरवरी ।
“ककुभोडुम्बराश्वत्थजम्बुकट्फललोध्रजैः ।
त्वक्चूर्णैश्चूर्णिता लेपात् प्ररोहन्ति महाव्रणाः ॥
प्रियङ्गुधातकीपुष्पयष्टीमधुजतूनि च ।
सत्याप्यूर्णीकृतानि स्युः रोपणान्यवधूननात् ॥
यवचूर्णं समधुकं सतैलं सह सर्पिषा ।
दद्याद्दाहप्रशमनं कोष्णं दाहशूलोपशान्तये ॥
करञ्जारिष्टनिर्गुण्डीलेपो हन्याद्व्रणं क्रमीन् ।
लशुनस्याथवा लेपो हिङ्गुनिम्बकृतोऽथवा ॥
निम्बपत्रवचाहिङ्गुसर्पिर्लवणसर्षपैः ।
धूपनं स्याद्व्रणे रक्षःकृमिकण्डूरुजापहम् ॥
ये क्लेदपाकस्रुतिगन्धवन्तो
व्रणाश्चिरोत्थाः सततञ्च शोथाः ।
प्रयान्ति ते गुग्गुलुमिश्रितेन
पीतेन शान्तिः त्रिफलाकृतेन ॥
पटोलनिम्बासनसारधात्री-
पथ्यात्रिवृद्दन्त्यमृताञ्जिते तु ।
पिबेत् कृतं गुग्गुलुना विसर्प-
विस्फोटदुष्टव्रणनाशनिष्टम् ॥”*।
अथ व्रणवर्त्ताकरणम् ।
“अधःस्थिता समञ्जिष्ठा सलाक्षा रक्तमोदयम् ।
इङ्गेनः चक्रताप्रसक्तः नारङ्गार्ज्जुन स्थानः ॥”*
अथ व्रणिनो भोजनम् ।
“जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम् ।
भुञ्जानो जाङ्गलैर्म्मांसैः शीघ्रं व्रणमपोहति ॥
तण्डुलीयकजीवन्तीवास्तूकतरुणमूलकैः ।
वार्त्ताकुपटोलकारवेल्लकैः ॥

सदाडिमैः सामलकैः घृतभृष्टैः ससैन्धवैः ।
अन्यैरेवं गुणैश्चापि मुद्गादीनां रसेन च ॥”
एभिः सह जीर्णशाल्योदनं भुञ्जानः शीघ्रं व्रण-
मपोहतीत्यन्वयः ।
“अम्लं दधि च शाकञ्च माषमानूपमौदकम् ।
क्षीरं गुरूणि चान्यानि व्रणिनः परिवर्ज्जयेत् ॥
व्रणे श्वयथुरायासात् स च रागश्च जागरात् ।
तौ च रुक् च दिवास्वापात् ताश्च मृत्युश्च
मैथुनात् ॥”*।
अथागन्तुव्रणचिकित्सा ।
“कुर्व्वीत सद्यो व्रणं कुम्भाद्धूमं चाधश्च शोधनम् ।
क्रिया शीता प्रयोक्तव्या रक्तपित्तोष्मनाशिनी ॥
लङ्घनञ्च बलं ज्ञात्वा भोजनं चापमोचणम् ।
घृष्टे विदलिते चैव सुतरामिष्यते विधिः ॥
